श्रीः

ऋक्संहिता

सायणाचार्यविरचितभाष्यसहिता

पदपाठयुता च.

तस्याअयंपंचमोष्टकः

अस्याः पुनर्मुद्रणाद्यधिकारः प्रकाशकाभ्यांस्वाधीनएवरक्षितः।

श्रीः

ऋक्संहिता

सायणाचार्यविरचितभाष्यसहिता

पदपाठयुताच.

इयंच

तत्त्वविवेचकग्रंथप्रसारकसमित्यांप्रेरितः तुकारामतात्याभिख्यः,

गणपतकृष्णाजीमुद्रायंत्रालयाधिपतिः आत्मारामकान्होबाभिख्यः,

इत्येताभ्यां

वोडसोपाह्वमहामहोपाध्यायराजारामशास्त्रि,

गोरेइत्युपाभिधशिवरामशास्त्रिभ्यांशोधयित्वा

मुंबय्यां

गणपतकृष्णाजीमुद्रायंत्रालयेमुद्रयित्वा

प्रकाशिता.

तस्याअयंपञ्चमोष्टकः

शकाब्दाः १८११

एतत्पुस्तकस्य स्वामित्वं

मुनिरसगजेंदुमिते (१८६७) सन् संज्ञकवत्सरे कृतराजकीय

पञ्चविंशतितम (२५) नियमानुसारतोऽसाधारणीकृतम्.

पंडित नारायण मुळजी बुक सेलर
और पब्लीशर, रानघाटी, मुंबई.

॥ श्रीगणेशायनमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥ १ ॥

अथ पंचमाष्टके प्रथमोध्याय आरभ्यते । षष्ठमंडलस्य षष्ठेनुवाके चतुर्दश सूक्तानि तत्र स्तुषे नरेत्येकादशर्चं प्रथमं सूक्तं अत्रेयमनुक्रमणिका स्तुषे एकादशाश्विनं त्विति । मंडलद्रष्टा बार्हस्पत्यो भरद्वाजऋषिः । अनुक्तत्वात्त्रिष्टुप्छन्दः अश्विनौ देवता । प्रातरनुवाकाश्विने क्रतौ इदमादिके द्वे सूक्ते आश्विनशस्त्रे चैत एव सूत्रितं च स्तुषे नरेति सूक्ते इति ।

तत्र प्रथमा—

ॐम् स्तुषेनरा॒दि॒वोअ॒स्यप्र॒सन्ता॒श्विना॑हु॒वेजर॑माणोअ॒र्कैः ।
यास॒द्यउ॒स्रान्युषि॒ज्मोअन्ता॒न्युयू॑षतः॒पर्यु॒रुव॒रांसि ॥ १ ॥

स्तु॒षे । नरा॑ । दि॒वः । अ॒स्य । प्र॒ऽसन्ता॑ । अ॒श्विना॑ । हु॒वे ।
जर॑माणः । अ॒र्कैः । या । स॒द्यः । उ॒स्रा । वि॒ऽउषि॑ । ज्मः ।
अन्ता॑न् । युयू॑षतः । परि॑ । उ॒रु । व॒रांसि ॥ १ ॥

दिवो द्युलोकस्य नरा नेतारौ अस्य भुवनस्य प्रसन्ता प्रसन्तौ प्रभवन्तावीश्वरौ अश्विना अश्विनौ अश्वैरन्वितौ स्तुषे प्रगीतमंत्रसाध्यैः स्तोत्रैः स्तोतुं अर्कैः अर्चनीयमंत्रसाध्यैः शस्त्रैः जरमाणः स्तुतिं कुर्वन् हुवे आह्वयामि । कीदृशावित्यपेक्षायां या यौ सद्यएव उस्रा शत्रूणां निवारकौ व्युषि व्युष्टौ निशायाः समाप्तौ ज्मः पृथिव्याः अन्तान् पर्यंतान् उरु पुरूणि वरांसि रूपस्यावरकाणि तमांसि च परि परितः युयूषतः पृथक्कुरुतः । अथवा वरांसि तेजांसि तमोनिवारणान्परि युयूषतः विस्तारयतः ॥ १ ॥

अथ द्वितीया—

ताय॒ज्ञमाशुचि॑भिश्चक्र॒मा॒णारथ॑स्यभा॒नुं॑रुरुचू॒रजो॑भिः ।
पु॒रूव॒रां॑स्यमि॑ता॒मिमा॑ना॒पोधन्वा॒न्यति॑याथो॒अज्रा॑न् ॥ २ ॥

ता । यज्ञम् । आ । शुचिंऽभिः । चक्रमाणा । रथस्य । भानुम् ।
रुरुचुः । रजःऽभिः । पुरु । वरांसि । अमिता । मिमाना ।
अपः । धन्वानि । अति । याथः । अज्रान् ॥ २ ॥

[1] किंच ता तौ प्रसिद्धौ अश्विनौ यज्ञं अस्मदीयं यागं आचक्रमाणा अभिचक्रमाणौ शुचिभिर्निर्मलैः रजोभिः स्वीयैः तेजोभिः रजोरजतेर्ज्योतीरजउच्यतइतियास्केनोक्तत्वात् रथस्य स्वकीयस्य रथस्य भानुं दीप्तिं रुरुचुः रोचयेते । अपि च पुरु बहूनि वरांसि तमोनिवारकाणि तेजांसि अमिता अपरिमितानि मिमाना निर्मिमाणौ अप उद्दिश्य धन्वानि मरुप्रदेशान् अज्रान् स्वकीयान् अश्वान् अतियाथः अतिक्रामयथः ॥ २ ॥

अथ तृतीया–

ताहत्यद्वर्तिर्यदरध्रमुग्रेत्थाधियऊहथुःशश्वदश्वैः ।
मनोजवेभिरिषिरैःशयध्यैपरिव्यथिर्दाशुषोमर्त्यस्य ॥ ३ ॥

ता । ह । त्यत् । वर्तिः । यत् । अरध्रम् । उग्रा । इत्था । धियः ।
ऊहथुः । शश्वत् । अश्वैः । मनःऽजवेभिः । इषिरैः ।
शयध्यै । परि । व्यथिः । दाशुषः । मर्त्यस्य ॥ ३ ॥

ता ह तौ खलु उग्रा उग्रौ अश्विनौ युवां यत् अरध्रं असमृद्धं त्यद्वर्तिर्यजमानस्य तद्गृहं समर्धयितुं गच्छथः । किंचेत्था इत्थं धियः स्तोतॄन् इषिरैः एषणीयैः काम्यैः मनोजवेभिर्मनोवेगैः अश्वैः स्वीयैरश्वैः शश्वत्सर्वदा ऊहथुः स्वर्गं प्रापयथः । मर्त्यस्य मनुष्यस्य दाशुषो यजमानस्य व्यथिः हिंसकः परिशयध्यै परिशयनाय दीर्घनिद्रायै युवाभ्यां क्रियताम् ॥ ३ ॥

अथ चतुर्थी–

तानव्यसोजरमाणस्यमन्मोपभूषतोयुयुजानसप्ती ।
शुभंपृक्षमिषमूर्जंवहन्ताहोतायक्षत्प्रत्नोअध्रुग्युवाना ॥ ४ ॥

---

१ नि० ४. १९. ।

ता। नव्यसः। जरमाणस्य। मन्म। उप। भूपतः।
युयुजानसप्ती इति युयुजानऽसप्ती। शुभम्। पृक्षम्। इषम्।
ऊर्जम्। वहन्ता। होता। यक्षत्। प्रत्नः। अध्रुक्। युवाना॥ ४॥

ता तावश्विनौ युयुजानसप्ती रथे युज्यमानाश्वौ शुभं शोभनं पृक्षमन्नं पयः पृक्ष इत्यन्ननामसु पाठात् इषं पुष्टिं ऊर्जं रसं च वहन्ता वहन्तौ नव्यसो नवतरस्य जरमाणस्य स्तुतिं कुर्वतः मन्म मननीयं स्तोत्रं उपभूपतः उपगच्छतः। यद्वा स्तोत्रसमीपेभवतः किंच युवाना नित्यतरुणौ वौ होता देवानामाह्वाता अध्रुक् अद्रोग्धा प्रियः प्रत्नः पुराणोग्निः यक्षत् यजतु॥ ४॥

अथ पंचमी—

तावल्गूदस्रापुरुशाकतमाप्रत्नानव्यसावचसाविवासे।
याशंसतेस्तुवतेशम्भविष्ठावभूवतुर्गृणतेचित्रराती॥ ५॥ १॥

ता। वल्गू इति। दस्रा। पुरुशाकऽतमा। प्रत्ना। नव्यसा। वचसा।
आ। विवासे। या। शंसते। स्तुवते। शम्ऽभविष्ठा। बभूवतुः।
गृणते। चित्रराती इति चित्रऽराती॥ ५॥ १॥

या यौ शंसते शस्त्रैः स्तुतिं कुर्वते स्तुवते स्तोत्रैः स्तुतिं कुर्वते जनाय शंभविष्ठा अतिशयेन सुखस्य भावयितारौ अतिशयेन सुखस्वरूपौ वा गृणते स्तोत्रशस्त्रव्यतिरिक्तलौकिकस्तुतिभिः स्तुवते च चित्रराती विचित्रदानौ बभूवतुः। ता तौ वल्गू वल्गनशीलौ रुचिरौ वा पुरुशाकतमा अतिशयेन बहुकर्माणौ बहुसहायौ वा प्रत्ना प्रत्नौ पुराणौ प्रत्नं प्रदिवइति पुराणनामसु पाठात् दस्रा दर्शनीयौ अश्विनौ नव्यसा नवतरेण वचसा स्तुत्या आविवासे परिचरामि॥ ५॥

॥ इति पंचमस्य प्रथमे प्रथमो वर्गः॥ १॥

अथ षष्ठी—

ताभुज्युंविभिरद्भ्यःसमुद्रात्तुग्रस्यसूनुमूहथूरजोभिः।
अरेणुभिर्योजनेभिर्भुजन्तापतत्रिभिरर्णसोनिरुपस्थात्॥ ६॥

ता । भुज्युम् । विऽभिः । अत्ऽभ्यः । समुद्रात् । तुग्रस्य । सूनुम् ।
ऊहथुः । रजःऽभिः । अरेणुऽभिः । योजनेभिः । भुजन्ता ।
पतत्रिऽभिः । अर्णसः । निः । उपऽस्थात् ॥ ६ ॥

ता तावश्विनौ युवां तुग्रस्य सूनुं भुज्युं भुज्युनामकं समुद्रमध्ये भग्ननावं भुजन्ता रक्षन्तौ अरेणुभिः रेणुसहितैः आन्तरिक्षैः रजोभिर्मार्गैः योजनेभिःरथयुक्तैः पतत्रिभिः पतनवद्भिः विभिः अश्वैः अर्णसोजलस्य उपस्थात् योनेः समुद्रात् अद्भ्यो निरूहथुः निरगमयतं। समुद्रादद्भ्य-इति प्रयोगो मातुर्गृहाद्गच्छतीतिवत् ॥ ६ ॥

अथ सप्तमी—

विजयुषारथ्यायातमद्रिंश्रुतंहवंवृषणावध्रिमत्याः ।
दशस्यन्ताशयवेपिप्यथुर्गामितिच्यवानासुमतिंभुरण्यू ॥ ७ ॥

वि । जयुषा । रथ्या । यातम् । अद्रिम् । श्रुतम् । हवम् ।
वृषणा । वध्रिऽमत्याः । दशस्यन्ता । शयवे । पिप्यथुः ।
गाम् । इति । च्यवाना । सुऽमतिम् । भुरण्यू इति ॥ ७ ॥

रथ्या हे रथारूढावश्विनौ जयुषा जयशीलेन रथेन अद्रिं मार्गे स्थितं पर्वतं वियातं व्यवधिर्थां।यातिरत्र वधकर्मा तथा च निगमान्तरं—विभिन्दुनानासत्यारथेनविपर्वताँअजरयू-अयातमिति। वृषणा कामानां वर्षितारौ वध्रिमत्याः पुत्रार्थिन्याः हवमाह्वानं श्रुतं शृणुतं दशस्यन्ता स्तोतृभ्यः कामान्प्रयच्छन्तौ शयवे युवां स्तुवते गां निवृत्तप्रसवां पिप्यथुः क्षीरेणाप्यायमतं। तथा च निगमान्तरं—शयवेचिन्नासत्याशचीभिर्जसुरयेस्तर्यंपिप्यथुर्गामिति । सुष्टुवि इतीत्थं सुमतिं च्यवाना गच्छन्तौ भुरण्यू सर्वत्र गन्तारौ यज्ञस्य भर्तारौ वा भवतं ॥ ७ ॥

अथाष्टमी—

यद्रोदसीप्रदिवोअस्तिभूमाहेळोदेवानामुतमर्त्यत्रा ।
तदादित्यावसवोरुद्रियासोरक्षोयुजेतपुरघंदधात ॥ ८ ॥

१ ऋ० सं० १. ८. ११. २ ऋ० सं० १. ८. १२.

यत् । रोदसी इति । प्रऽदिवः । अस्ति । भूम । हेळः । देवानाम् ।
उत । मर्त्यऽत्रा । तत् । आदित्याः । वसवः । रुद्रियासः ।
रक्षःऽयुजे । तपुः । अघम् । दधात ॥ ८ ॥

रोदसी हे द्यावापृथिव्यौ हे आदित्याः हे वसवः रुद्रियासः हे रुद्रपुत्राः मरुतः मर्त्यत्रा मर्त्येषु अश्विनोः परिचारकेषु देवानां यद्धेळः क्रोधः भूम महानस्ति तद्धेळः तपुस्तापकं रक्षोयुजे रक्षोभिर्युक्ताय रक्षसां स्वामिने प्रेरकाय वा अघं आहन्तृ दधात कुरुत । अथवा रक्षोयुजे रक्षोभिर्युक्ताय यज्वने अघमाहन्तृ कुरुत ॥ ८ ॥

अथ नवमी—

यईंराजानावृतुथाविदधद्रजसोमित्रोवरुणश्चिकेतत् ।
गम्भीरायरक्षसेहेतिमस्यद्रोघायचिद्वचसआनवाय ॥ ९ ॥

यः । ईम् । राजानौ । ऋतुऽथा । विऽदधत् । रजसः । मित्रः ।
वरुणः । चिकेतत् । गम्भीराय । रक्षसे । हेतिम् । अस्य ।
द्रोघाय । चित् । वचसे । आनवाय ॥ ९ ॥

यो नरः रजसः समस्तलोकस्य लोकारजांस्युच्यन्ते[1] इति यास्केनोक्तत्वात् राजानौ ईं एतावश्विनौ ऋतुथा कालेकाले विदधत्परिचरति तं मित्रोवरुणश्च चिकेतत् जानीयात् मित्रवरुणप्रभृतयोदेवा एनं विदु रित्यर्थः । किंच अयं परिचारकः गंभीराय महाबलाय रक्षसे राक्षसाय हेतिं घातकमायुधं अस्य अस्यति क्षिपति प्रथमपुरुषस्य मध्यमपुरुषेण व्यत्ययः द्रोघायाभिद्रोहात्मकाय आनवाय मनुष्यसंबन्धिने वचसे चित् वचनायैव हेतिमस्यति मनुष्याणामभिद्रोहायैनमास्कन्दतीति ॥ ९ ॥

अथ दशमी—

अन्तरैश्चक्रैस्तनयायवर्तिर्द्युमतायातंनृवतारथेन ।
सनुत्येनत्यजसामर्त्यस्यवनुष्यतामपिशीर्षावृक्तम् ॥ १० ॥

---

१ नि० ४. १९ ।

अन्तरैः । चक्रैः । तनयाय । वर्तिः । द्युऽमता । आ । यातम् ।
नृऽवता । रथेन । सनुत्येन । त्यजसा । मर्त्यस्य । वनुष्यताम् ।
अपि । शीर्षा । ववृक्तम् ॥ १० ॥

हे अश्विनौ अन्तरैः अनिकृष्टैश्चक्रैर्युक्तेन द्युमता दीप्तिमता नृवता नेत्रा सारथिना युक्तेन यद्वा अश्वयुक्तेन पतंगाः नर इति अश्वनामसु पाठात् रथेन वर्तिः अस्माकं गृहं तनयाय तनयं दातुं आयातं अपि च सनुत्येन तिरोहितेन त्यजसा क्रोधेन हृणिस्त्यजइति क्रोधनामसु पाठात् मर्त्यस्य मनुष्यस्य वनुष्यतां बाधमानानां वनुष्यतिर्हंतिकर्मेति यास्केनोक्तत्वात् शीर्षा शिरांस्यपि ववृक्तं प्रवृक्तं ॥ १० ॥

अथैकादशी–

आपरमाभिरुतमध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।
दृळ्हस्यचिद्गोमतोविव्रजस्यदुरोवर्तंगृणतेचित्रराती ॥११॥२॥

आ । परमाभिः । उत । मध्यमाभिः नियुत्ऽभिः । यातम् ।
अवमाभिः । अर्वाक् । दृळ्हस्य । चित् । गोऽमतः । वि । व्रजस्य ।
दुरः । वर्तम् । गृणते । चित्रराती इति चित्रऽराती ॥ ११ ॥ २ ॥

हे अश्विनौ परमाभिरुत्कृष्टाभिः उतापि च मध्यमाभिरनुत्कृष्टाभिः अवमाभिः निकृष्टाभिश्च नियुद्भिः वाहैरर्वागस्मदभिमुखं आयातं दृळ्हस्य चित् दृळ्हाविधानस्यापि गोमतो गोयुक्तस्य व्रजस्य गोष्ठस्य दुरो द्वाराणि विवर्तं विवृणुतं । किंच गृणते स्तुवते मह्यं चित्रराती विचित्रदानौ भवतं ॥ ११ ॥

॥ इति पंचमस्य प्रथमे द्वितीयो वर्गः ॥ २ ॥

कत्येत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षं अत्रेयमनुक्रमणिका कत्यैकपदान्त्यं त्रैष्टुभमिति आवांसुम्नइत्येकादशी एकपदाविराट् शिष्टास्त्रिष्टुभः आश्विनं त्वित्युक्तत्वात् अस्यापि सूक्तस्य अश्विनौ देवता प्रातरनुवाकाश्विनशस्त्रयोः त्रैष्टुभे छन्दसि विनियोगः ।

---

१ नि० ५. २. ।

तत्र प्रथमा–

क्वंश्त्यावुल्गूपुंरुहूताद्यदूतोनस्तोमोंविदुन्नमंस्वान् ।
आयोअर्वाङ्नासंत्यावुवर्तंप्रेष्ठाह्यसंथोअस्यमन्मंन् ॥ १ ॥

क्वं । त्या । वुल्गू इतिं । पुरुऽहूता । अद्य । दूतः । न । स्तोमंः ।
अविदत् । नमंस्वान् । आ । यः । अर्वाक् । नासंत्या । वुवर्तं ।
प्रेष्ठा । हि । असंथः । अस्य । मन्मंन् ॥ १ ॥

क्व कुत्र स्थितौ वल्गू रुचिरौ पुरुहूता बहुभिराहूतौ त्या तावश्विनौ नमस्वान् हविषा युक्तः नम आयुरित्यन्ननामसु पाठात् स्तोमः पंचदशादिस्तोमः अद्य दूतो न प्रेरितोदूत इव अविदत् विंदेत् यः स्तोमः अर्वांगस्मदभिमुखं नासत्यावश्विनौ आववर्त आवर्तयत् । हे अश्विनौ युवामस्य स्तोतुः मन्मन् स्तोत्रे प्रेष्ठा हि प्रियतमौ हि असथो भवतः ॥ १ ॥

अथ द्वितीया–

अरंमेगन्तंहवंनायास्मैगृणानायथापिबाथोअन्धंः ।
परिंहत्यद्वर्तिर्याथोरिषोनयत्परोनान्तंरस्तुतुर्यात् ॥ २ ॥

अरंम् । मे । गन्तम् । हवंनाय । अस्मै । गृणाना । यथां । पिबाथः ।
अन्धंः । परिं । ह । त्यत् । वर्तिः । याथः । रिषः । न । यत् । परंः ।
न । अन्तंरः । तुतुर्यात् ॥ २ ॥

हे अश्विनौ युवां मे मदीयायास्मै हवनायाह्वानाय अरं पर्याप्तं गन्तं गच्छतं गृणाना स्तूयमानौ अंधः सोमं यथा पिबाथः पिबतं । रिषो हिंसकस्य शत्रोः त्यद्वर्तिः तद्गृहं परियाथः परितोयाथः यद्वर्तिः परो विप्रकृष्टो न तुतुर्यात् न हिंस्यात् अन्तरः संनिकृष्टोपि न तुतुर्यात् यद्वा त्यद्वर्तिः तदस्मदीयं गृहं रिषोहिंसकात्परियाथः । त्यद्वर्तिः परोविप्रकृष्टः अन्तरः सन्निकृष्टोपि न तुतुर्यात् अयं भावः यथास्मदीयं गृहं दूरस्थः सन्निकृष्टोपि न हिंस्यात् तथा रक्षां कुरुथइति ॥ २ ॥

अथ तृतीया–

अकारिवामन्धंसोवरींमन्नस्तारिबर्हिःसुप्रायुणतंमम् ।
उत्तानहंस्तोयुवयुर्ववन्दावांनक्षन्तोअद्रंयआञ्जन् ॥ ३ ॥

अकारि । वाम् । अन्धसः । वरीमन् । अस्तारि । बर्हिः ।
सुप्रऽअयनऽतमम् । उत्तानऽहस्तः । युवऽयुः । ववन्द । आ । वाम् ।
नक्षन्तः । अद्रयः । आञ्जन् ॥ ३ ॥

वां युवयोरर्थे अन्धसः सोमस्य वरीमन् विस्तृतेभिषवादौ यत्कृत्यमस्ति तदकारि । कृतं सुपायणतमं मृदुतमं बर्हिः अस्तारि स्तीर्णं उत्तानहस्तः कृतांजलिः युवयुः युवां कामयमानः होता ववन्द स्तौति वां युवां नक्षन्तः व्याप्नुवन्तः तृक्ष वृक्ष नक्ष गताविति धातुः अद्रयः ग्रावाणः आंजन् सोमरसं आसमन्ताद्व्यक्तीकृतवन्तः ॥ ३ ॥

अथ चतुर्थी—

ऊर्ध्वोवामग्निरध्वरेष्वस्थात्प्ररातिरेतिजूर्णिनीघृताची ।
प्रहोतागूर्तमनाउराणोयुक्तयोनासत्याहवीमन् ॥ ४ ॥

ऊर्ध्वः । वाम् । अग्निः । अध्वरेषु । अस्थात् । प्र । रातिः ।
एति । जूर्णिनी । घृताची । प्र । होता । गूर्तऽमनाः । उराणः । अयुक्त ।
यः । नासत्या । हवीमन् ॥ ४ ॥

अग्निः वां युवयोर्यज्ञार्थं ऊर्ध्वःअस्थात् उदतिष्ठत् अध्वरेषु यज्ञेषु प्रैति समिद्धःआहवनीयं गच्छति च रातिः धनं हविः जूर्णिनी जूर्णिजवतेर्वेतियास्केनोक्तत्वात् घृताची घृतेनाक्ता उपस्तीर्णाभिघारितेत्यर्थः किं च होता उराणः उरुकुर्वाणः प्रगूर्तमनाः प्रकर्षेण उद्युक्तमनाः भवति यो होता नासत्यावश्विनौ हवीमन्नाह्वाने स्तोत्रे वा अयुक्त योजयति ॥ ४ ॥

अथपञ्चमी—

अधिश्रियेदुहितासूर्यस्यरथंतस्थौपुरुभुजाशतोतिम् ।
प्रमायाभिर्मायिनाभूतमत्रनरानृतूजनिमन्यज्ञियानाम् ॥५॥२॥

अधि । श्रिये । दुहिता । सूर्यस्य । रथम् । तस्थौ । पुरुऽभुजा ।
शतऽऊतिम् । प्र । मायाभिः । मायिना । भूतम् । अत्र । । नरा ।
नृतू इति । जनिमन् । यज्ञियानाम् ॥ ५ ॥ २ ॥

१ नि० ६. ४.

हे पुरुभुजा पूर्णभुजौ बहूनां रक्षकावश्विनौ युवयोः शवोर्ति बहुरक्षकं बहुगमनं वा रथं सूर्यस्य दुहिता सूर्या श्रिये श्रयितुमधितस्थौ अध्यतिष्ठत्। अपि च यज्ञियानां देवानामत्र जनिमन् अस्मिन् जन्मनि प्रादुर्भावे मायाभिः प्रज्ञानैः शचीमाया इति प्रज्ञा नामसु पाठात्मायिनौ प्रज्ञावन्तौ नरा नेतारौ नृतू नृत्यंतौ भूतं भवतं। यद्वा हे मायिनौ प्राज्ञौ नरौ नेतारौ नृतू नृत्यन्तावश्विनौ यज्ञियानां देवानां अत्र जनिमन् जन्मनि प्रादुर्भावे प्रभूतं प्राज्ञतमं अग्न्यादिकं देवं मायाभिः प्रज्ञानैः कौशलैर्वा जितवन्तौ स्थः इत्यर्थः। अयमर्थः प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीमित्यादिना स्पष्टीकृतः ॥ ५ ॥

॥ इति पंचमस्य प्रथमे तृतीयो वर्गः ॥ ३ ॥

अथ षष्ठी—

युवंश्रीभिर्दर्शताभिराभिःशुभेपुष्टिमूहथुःसूर्यायाः।
प्रवांवयोवपुषेनुपप्तन्नक्षद्वाणीसुष्टुताधिष्ण्यावाम् ॥ ६ ॥

युवम्। श्रीभिः। दर्शताभिः। आभिः। शुभे। पुष्टिम्। ऊहथुः। सूर्यायाः। प्र। वाम्। वयः। वपुषे। अनु। पप्तन्। नक्षत्। वाणी इति। सुऽस्तुता। धिष्ण्या। वाम् ॥ ६ ॥

हे अश्विनौ युवं युवां दर्शताभिः दर्शनीयाभिराभिः श्रीमतां परिदृश्यमानाभिः श्रीभिः लक्ष्मीभिः कान्तिभिर्वा सूर्यायाः युवयोः पत्न्याः शुभे शोभनार्थं पुष्टिं पूर्तिं ऊहथुः प्रापयथः। किं च वां युवां वयोश्वा वपुषे शोभायै प्रानुपप्तन् प्रकर्षेणान्वपतन्। अपि च हे धिष्ण्यास्तुत्यर्हावश्विनौ वां युवां सुष्टुता वाणी ऋषीणां स्तुतिः नक्षत व्याप्नोति ॥ ६ ॥

अथ सप्तमी—

आवांवयोश्वासोवहिष्ठाअभिप्रयोनासत्यावहन्तु।
प्रवांरथोमनोजवाअसर्जीषःपृक्षइषिधोअनुपूर्वीः ॥ ७ ॥

आ। वाम्। वयः। अश्वासः। वहिष्ठाः। अभि। प्रयः। नासत्या। वहन्तु। प्र। वाम्। रथः। मनःऽजवाः। असर्जि। इषः। पृक्षः। इषिधः। अनु। पूर्वीः ॥ ७ ॥

---

१ ऐ० ब्रा० ४. ७.।

हे नासत्यौ वां युवां वयो गन्तारः वहिष्ठाः वोळ्हृतमाः अश्वासो अश्वाः प्रयः सोमरूपमन्नमभि आ वहन्तु। वां युवयोः मनोजवाः मनोवेगोरथः पृक्षः संपर्चनीयः इषिधः एषणीयाः पूर्वीर्वह्नीः इषोन्नानि सोमान् अनुप्रासर्जि विसृष्टः ॥ ७ ॥

अथाष्टमी–

पुरुह्रिवांपुरुभुजादेष्णंधेनुंनइषंपिन्वतमसंक्राम्।
स्तुतश्चवांमाध्वीसुष्टुतिश्चरसाश्चयेवामनुरातिमग्मन् ॥ ८ ॥

पुरु। हि। वाम्। पुरुऽभुजा। देष्णम्। धेनुम्। नः। इषम्।
पिन्वतम्। असंक्राम्। स्तुतः। च। वाम्। माध्वी इति। सुऽस्तुतिः।
च। रसाः। च। ये। वाम्। अनु। रातिम्। अग्मन् ॥ ८ ॥

पुरुभुजा हे पूर्णभुजौ बहुपालकौ वां युवयोर्देष्णं दातव्यं धनं पुरु बहु हि भवति अतः कारणान्नोस्मभ्यं धेनुं प्रीणयित्रीं असक्रां मत्तोन्यत्रासंक्रमणीं असक्रामसंक्रमणीमिति यास्केनोक्तत्वात् इषमन्नं पिन्वतं प्रयच्छतं यद्वा इषमेषणीयां धेनुमित्यन्वयः किं च वां स्तुतः स्तुवन्तीति स्तुतः स्तोतारः सन्ति माध्वी मदयितारावश्विनौ सुष्टुतिः शोभना स्तुतिश्च स्तोतृषु भवति। रसाः सोमरसाश्च संति ये रसाः वां युवयोः रातिं दानं अनु अनूद्दिश्यागमन् देवयजनं प्राप्ताः अयं भावः सुष्टुतिं श्रुत्वा देवयजनं प्राप्तान् सोमरसान् पीत्वा स्तोतृभ्यः कामान्प्रयच्छतमिति शेषः ॥ ८ ॥

अथ नवमी–

उतमेऋज्रेपुरयस्यरघ्वीसुमीळ्हेशतंपेरुकेचपक्का।
शाण्डोदाद्धिरणिनःस्मद्दिष्टीन्दशवशासोअभिषाचऋष्वान् ॥ ९ ॥

उत। मे। ऋज्रे इति। पुरयस्य। रघ्वी इति। सुऽमीळ्हे। शतम्।
पेरुके। च। पक्का। शाण्डः। दात्। हिरणिनः। स्मत्ऽदिष्टीन्।
दश। वशासः। अभिऽसाचः। ऋष्वान् ॥ ९ ॥

उतापि च पुरयस्य पुरयनामकस्य स्वभूते ऋज्रे ऋजुगमने रघ्वी क्षिप्रगामिन्यौ वडवे मे अश्विनौ स्तुतिं कुर्वतो ममाभूतां सुमीळ्हे राति विद्यमानाः सन्तः शतं गावो ममाभूवन् पेरुके राति

१ नि० ६. २९.

विद्यमानानि पक्का पक्कान्यन्नानि ममासन् शांडश्च राजा हिरणिनः हिरण्यवतः स्मदिष्टीन् प्रशस्तदर्शनान् रथानश्वान्वा दश दशसंख्याकान् प्रशासः अनुगुणान् अभिपाचः शत्रूणामभिभावुकान् कण्वान् दर्शनीयान् पुरुषान् अश्विनोः स्तोतृभ्यो दात् ददातु ॥ ९ ॥

अथ दशमी—

संवांशतानासत्यासहस्राश्वानांपुरुपन्थागिरेदात् ।
भरद्वाजायवीरनूगिरेदाद्धतारक्षांसिपुरुदंससास्युः ॥ १० ॥

सम् । वाम् । शत । नासत्या । सहस्रा । अश्वानाम् । पुरुऽपन्थाः । गिरे । दात् । भरतऽवाजाय । वीरं । नु । गिरे । दात् । हता । रक्षांसि पुरुऽदंससा । स्युरितिस्युः ॥ १० ॥

नासत्या हे अश्विनौ वां युवयोर्गिरे गृणातीति गीः स्तोता तस्मै अश्वानां शता शतानि सहस्रा सहस्राणि पुरुपंथा नाम राजा संदात् संददाति । वीर हे वीरावश्विनौ द्विवचनस्य लुक् गिरे युवयोः स्तोत्रे भरद्वाजाय मह्यं अपि नु क्षिप्रं दात् ददातु । किं च हे पुरुदंससा बहुकर्माणावश्विनौ युवयोरनुग्रहात् रक्षांसि हता हतानि स्युः ॥ १० ॥

अथैकादशी—

आवांसुम्नेवरिमन्त्सूरिभिःष्याम् ॥ ११ ॥ ४ ॥

आ । वाम् । सुम्ने । वरिमन् । सूरिऽभिः । स्याम् ॥ ११ ॥ ४ ॥

हे अश्विनौ वरिमन् विस्तृते सुम्ने वां युवाभ्यां दत्ते सुखावहे धने जलार्थं सुम्नमिति सुखनामसु पाठात् सूरिभिर्विद्वद्भिः सह आरामन्तात् स्यां भवेयं ॥ ११ ॥

॥ इति पंचमस्य प्रथमे चतुर्थो वर्गः ॥ ४ ॥

उदुश्रियइति षळृचं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमुषोदेवताकं अनुक्रम्यते च—उदुश्रिये षळुषस्यं तु इति प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छन्दसि आश्विनशस्त्रे चैतदादिके द्वे सूक्ते सूत्र्यते हि—उदुश्रियइतिसूक्तेइति ।

तत्र प्रथमा—

उदुंश्रियउषसोरोचमानाअस्थुरपांनोर्मयोरुशन्तः ।
कृणोतिविश्वांसुपथांसुगान्यभूंदुवस्वीदक्षिणामघोनीं ॥ १ ॥

उत् । ऊँ इति । श्रिये । उषसः । रोचमानाः । अस्थुः । अपाम् ।
न । ऊर्मयः । रुशन्तः । कृणोति । विश्वा । सुऽपथा । सुऽगानि ।
अभूत् । ऊँ इति । वस्वी । दक्षिणा । मघोनी ॥ १ ॥

रोचमाना दीप्यमाना रुशन्तः शुक्लवर्णाः रुशदिति वर्णनामेति यास्कः उषसः श्रिये जगतः शोभायै जगद्व्याप्तुं वा अपामूर्मयो न उदकसंबन्धिनस्तरंगाइव उदस्थुः उत्तिष्ठन्ति। अनन्तरमेकवन्निगमः उषाः विश्वा विश्वानि स्थानानि सुपथा सुमार्गाणि सुगानि सुखेन गम्यानि कृणोति करोति अथ च मघोनी धनवत्युषाः वस्वी प्रशस्ता दक्षिणा समर्धयित्री चाभूव ॥ १ ॥

अथ द्वितीया—

भद्रादंदृक्षउर्वियाविभास्युत्तेंशोचिर्भानवोद्यामंपप्तन् ।
आविर्वक्षः कृणुषेशुम्भमानोषोदेविरोचमानामहोंभिः ॥ २ ॥

भद्रा । ददृक्षे । उर्विया । वि । भासि । उत् । ते । शोचिः ।
भानवः । द्याम् । अपप्तन् । आविः । वक्षः । कृणुषे । शुम्भमाना ।
उषः । देवि । रोचमाना । महःऽभिः ॥ २ ॥

हे उषो देवि भद्रा कल्याणी ददृक्षे दृश्यसे उर्विया विस्तीर्णा च विभासि ते तव शोचिः शोचिषः जसोलुक् दीप्यमाना भानवोरश्मयः द्यामन्तरिक्षं उदपप्तन् उत्पतन्ति । किं च हे उषोदेवि महोभिस्तेजोभिः शुंभमाना शोभमाना दीप्यमाना रोचमाना वक्षः त्वदीयं रूपं आविष्कृणुषे प्रकटीकरोषि ॥ २ ॥

अथ तृतीया—

वहन्तिसीमरुणासोरुशन्तोगावंःसुभगांमुर्वियाप्रथानाम् ।
अपेंजतेशूरोअस्तेवशत्रून्बाधंतेतमोंअजिरोनवोळ्हा ॥ ३ ॥

---

१ नि० २ २०।

वहन्ति । सीम् । अरुणासः । रुशन्तः । गावः । सुऽभगाम् । उर्विया ।
प्रथानाम् । अप । ईजते । शूरः । अस्ताऽइव । शत्रून् । बाधते ।
तमः । अजिरः । न । वोळ्हा ॥ ३ ॥

अरुणासो लोहितवर्णाःरुशन्तो दीप्यमाना गावः रश्मयःकिरणा गाव इति रश्मि नामसु पाठात् सुभगां उर्विया उर्वी विस्तीर्णा प्रथानां प्रथमानां सीमेनामुषोदेवतां वहन्ति सेयमुषो देवता शूरः अस्तेव वीरः क्षेप्तेव शत्रून् तमः अपेजते अपगमयति । वोळ्हा सेनायाः अजिरो न क्षिप्रगामी शत्रून् यथा वा तथा तमांसि बाधते च ॥ ३ ॥

अथ चतुर्थी—

सुगोतेसुपथापर्वतेष्ववातेअपस्तरसिस्वभानो ।
सानआवहपृथुयामन्नृष्वेरयिंदिवोदुहितरिषयध्यै ॥ ४ ॥

सुऽगा । उत । ते । सुऽपथा । पर्वतेषु । अवाते । अपः । तरसि ।
स्वभानोऽइति स्वऽभानो । सा । नः । आ । वह । पृथुऽयामन् ।
ऋष्वे । रयिम् । दिवः । दुहितः । इषयध्यै ॥ ४ ॥

हे उषोदेवि पर्वतेषु उत दुर्गेष्वपि अवाते गमनसाधनरहिते देशे सुपथा सुपथानि मार्गाणि सुगा सुगानि सुखेन गम्यानि ते तव भवन्ति । स्वभानो हे स्वप्रकाश अपोन्तरिक्षं आकाशं आप इत्यन्तरिक्षनामसु पाठात् सामुद्रिकीरपोवा तरसि । पृथुयामन् पृथुरथे ऋष्वे दर्शनीये दिवो दुहितः अन्तरिक्षसुते हे उषोदेवि सा त्वं इषयध्यै एषणीयं रयिं धनं नोस्मभ्यं आवह ॥४॥

अथ पंचमी—

सावहयोक्षभिरवातोषोवरंवहसिजोषमनु ।
त्वंदिवोदुहितर्याहदेवीपूर्वहूतौमंहनादर्शतामूः ॥ ५ ॥

सा । आ । वह । या । उक्षऽभिः । अवाता । उषः । वरम् । वहसि ।
जोषम् । अनु । त्वम् । दिवः । दुहितः । या । ह । देवी । पूर्वऽहूतौ ।
मंहना । दर्शता । भूः ॥ ५ ॥

हे उषः सा त्वं धरं धनं महमावह। या त्वं अवाता अप्रतिगता जोषं प्रीतिं अनु उक्षभिः अनडुद्भिरश्वैर्वा स्तोतृभ्योवरं वहसि। किं च हे दिवोदुहितः अन्तरिक्षसुते या त्वं देवी द्योतमाना पूर्वहूतौ प्रथमाह्वाने प्रातरनुवाके मंहना पूजनीया भवसि सा त्वं दर्शता दर्शनीया भूरिति योजना या दर्शताभूरित्यन्वये यद्वृत्तेन सामानाधिकरण्यात् भूरित्यस्य निघातो न स्यात् ॥ ५ ॥

अथ षष्ठी—

उत्तेवयंश्चिद्वसतेरपप्तन्नरश्चयेपितुभाजोव्युष्टौ।
अमासतेवहसिभूरिवाममुषोदेविदाशुषेमर्त्याय ॥ ६ ॥ ५ ॥

उत्। ते। वयः। चित्। वसतेः। अपप्तन्। नरः। च। ये। पितुऽभाजः। विऽउष्टौ। अमा। सते। वहसि। भूरि। वामम्। उषः। देवि। दाशुषे। मर्त्याय ॥ ६ ॥ ५ ॥

हे उषोदेवि ते तव व्युष्टौ सत्यां वयश्चित् पक्षिणोपि वसतेः निवासस्थानात् उदपप्तन् उत्पतन्ति ये पितुभाजो हविषां संभक्तारः अन्नस्योपार्जकावा पितुरित्यन्ननामसु पाठात् नरश्च तेपि चोत्पतन्ति किं च हे उषोदेवि त्वं अमा समीपे सते वर्तमानाय दाशुषे हविषां प्रदात्रे मर्त्याय भूरि प्रभूतं वामं धनं वहसि॥ ६ ॥

॥ इति पंचमस्य प्रथमे पंचमो वर्गः ॥ ५ ॥

एषास्येति षळृचं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं अनुक्रम्यतेच एषास्येति उषस्यंत्विति पूर्वसूक्ते उक्तत्वात् इदमप्युषोदेवताकं प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्र प्रथमा—

एषास्यानोदुहितादिवोजाःक्षितीरुच्छन्तीमानुषीरजीगः।
याभानुनारुशतारम्यास्वज्ञायितिरस्तमसश्चिदक्तून् ॥ १ ॥

एषा। स्या। नः। दुहिता। दिवःऽजाः। क्षितीः। उच्छन्तीः। मानुषीः। अजीगरिति। या। भानुना। रुशता। राम्यासु। अज्ञायि। तिरः। तमसः। चित्। अक्तून् ॥ १ ॥

एषा स्या सा दिवोजाः दिवोजाता अतएव दुहिता[1] दिवः पुत्र्युषा नोस्मदर्थं उच्छंती तमांसि वर्जयन्ती क्षितीः प्रजाः मानुषी रजीगः उद्गिरति जीर्णार्तिर्गिरतिकर्मेवेति यास्कः प्रकाशयतीति यावत् या रुशता दीप्यमानेन भानुना युक्ता राम्यासु याम्यासु रात्रिषु रेफयकारयोर्व्यत्ययः अक्तून् नक्षत्रादि तेजांसि तमसश्चित् तमांसि च तिरस्तिरस्कुर्वती अज्ञापि दृश्यते ॥ १ ॥

अथ द्वितीया—

वितद्ययुररुणयुग्भिरश्वैश्चित्रंभान्त्युषसश्चन्द्ररथाः ।
अग्रंयज्ञस्यबृहतोनयन्तीर्विताबाधन्तेतमऊर्म्यायाः ॥ २ ॥

वि । तत् । ययुः । अरुणयुक्ऽभिः । अश्वैः । चित्रम् । भान्ति । उषसः । चन्द्रऽरथाः । अग्रम् । यज्ञस्य । बृहतः । नयन्तीः । वि । ताः । बाधन्ते । तमः । ऊर्म्यायाः ॥ २ ॥

चन्द्ररथाःकान्तिरथाः चन्द्रश्चन्दतेःकान्तिकर्मणइति यास्कः । ता उषसः तत् तदानीं प्रातःकाले बृहतो बृंहणशीलस्य यज्ञस्य अग्रं मुखं नयन्तीः संपादयंत्यः अरुणयुग्भिररुणवर्णयुक्तैरश्वैः विययुः विस्तीर्णं यान्ति चित्रं यथाभवति तथाभान्ति च ऊर्म्यायाः रात्रेः अक्तुः ऊर्म्येति रात्रिनामसु पाठात् तमो विबाधन्ते सम्यगपनयन्ति च ॥ २ ॥

अथ तृतीया—

श्रवोवाजमिषमूर्जंवहन्तीर्निदाशुषउषसोमर्त्याय ।
मघोनीर्वीरवत्पत्यमानाअवोधातविधतेरत्नमद्य ॥ ३ ॥

श्रवः । वाजम् । इषम् । ऊर्जम् । वहन्तीः । नि । दाशुषे । उषसः । मर्त्याय । मघोनीः । वीरऽवत् । पत्यमानाः । अवः । धात । विधते । रत्नम् । अद्य ॥ ३ ॥

हे उषसः दाशुषे हविषां दात्रे मर्त्याय श्रवःकीर्तिं वाजं बलं इषमन्नं ऊर्जं रसं च वहन्तौ वहंत्योयूयं मघोनी धनवत्यः पत्यमाना गच्छन्त्यः अद्य विधते परिचरते मह्यं वीरवत् पुत्रपौत्रादिसहितं अवोन्नं सिनं अवेत्यन्ननामसु पाठात् रत्नं धनं च श्वार्त रत्नमिति धननामसु पाठात् निधात नितरां धत्त ॥ ३ ॥

---

1 नि० ६.८. । 2 नि० ११.५. ।

अथ चतुर्थी–

इदाहिवोंविधतेरत्नमस्तीदावीरायदाशुषउपासः ।
इदाविप्रायजरतेयदुक्थानिष्ममावतेवहथापुराचित् ॥ ४ ॥

इदा । हि । वः । विधते । रत्नम् । अस्ति । इदा । वीराय । दाशुषे । उपसः । इदा । विप्राय । जरते । यत् । उक्था । नि । स्म । माऽवते । वहथ । पुरा । चित् ॥ ४ ॥

हे उषः इदाहि इदानीमेव वोयुष्माकं विधते परिचरते दातुं रत्नं धनमस्ति इदाहि इदानीमेव वीराय प्रेरयित्रे हविषां दाशुषे यजमानाय दातुं वोरत्नमस्ति इदाहि इदानीमेव विप्राय प्राज्ञाय जरते स्तुवते दातुं वोरत्नमस्ति यद्यस्मिन् विप्रे उक्था उक्थनामकानि स्तोत्राणि विद्यन्ते मावते मत्सदृशाय यजमानाय तद्रत्नं निवहथ पुराचित् पुरापि रत्नं मह्यं दत्तं ॥ ४ ॥

अथ पंचमी–

इदाहितंउषोअद्रिसानोगोत्रागवामंगिरसोगृणन्ति ।
व्यर्केणविभिदुर्ब्रह्मणाचसत्यानृणामभवद्देवहूतिः ॥ ५ ॥

इदा । हि । ते । उषः । अद्रिसानो इत्यद्रिऽसानो । गोत्रा । गवाम् । अंगिरसः । गृणन्ति । वि । अर्केण । बिभिदुः । ब्रह्मणा । च । सत्या । नृणाम् । अभवत् । देवऽहूतिः ॥ ५ ॥

हे उषः अद्रिसानो आदृतसानो ते तव प्रसादात् इदाहि सद्यएवगवां गोत्रा संघान् अंगिरसो गृणन्ति सृजन्ति तथा च निगमान्तरं–गवां गोत्रमुदसृजोयदंगिरइति । अर्केण अर्चनीयेन ब्रह्मणा स्तोत्रेण वि बिभिदुः तमांसि विदारयन्ति च नृणां नेतॄणां तेषामंगिरसां देवहूतिर्देवविषयास्तुतिः सत्या सत्यफलाभवत् ॥ ५ ॥

अथ षष्ठी–

उच्छादिवोदुहितःप्रत्नवन्नोभरद्वाजवद्विधतेमघोनि ।
सुवीरंरयिंगृणतेरिरीह्युरुगायमधिधेहिश्रवोनः ॥ ६ ॥ ६ ॥

---

१ ऋ० सं० २. ६. ३२.

उच्छ । दिवः । दुहितः । प्रत्नऽवत् । नः । भरद्वाजऽवत् ।
विधते । मघोनि । सुऽवीरम् । रयिम् । गृणते । रिरीहि ।
उरुऽगायम् । अधि । धेहि । श्रवः । नः ॥ ६ ॥ ६ ॥

हे दिवो दुहितरुषः प्रत्नवत् पुरातनेभ्य इव नोस्मदर्थ उच्छ तमांसि वर्जय । हे मघोनि भरद्वाजवत् विधते परिचरते भरद्वाजवदिति वचनात् अन्योप्यस्ति भरद्वाजः तथाच ब्राह्मणं— प्राणो वै भरद्वाजवदिति । गृणते स्तुतिं कुर्वते मह्यं सुवीरं कल्याणं पुत्रपौत्रादियुक्तं रयिं धनं रिरीहि देहि । किं च नोस्मभ्यं उरुगायं बहुभिर्गातव्यं श्रवोन्नं अधिधेहि अधिकंप्रयच्छ ॥६॥

॥ इति पंचमस्य प्रथमे षष्ठो वर्गः ॥ ६ ॥

वपुर्न्वित्येकादशर्चं पंचमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मारुतं तथा चानुक्रम्यते—वपुर्न्वेकादश मारुतमिति व्यूळ्हे दशरात्रे षष्ठेहन्याग्निमारुते इदं सूक्तं मारुतनिविद्धानं सूत्रितं च— हविष्पांतं वपुर्नुतदिति वैश्वदेवे पर्वणि मारुतसप्तकपालस्य प्रचित्रमर्कमिति याज्या प्रचित्रमर्कं गृणते नवानुयाज्या इति एकादशिने मारुते पशौ प्रचित्रमर्कमित्येषैव याज्या सूत्रितं च—प्रचित्रमर्कं गृणते तुराया।इवेदप्रमा।अहेवेति।

तत्र प्रथमा—

वपुर्नुतच्चिकितुषेचिदस्तुसमानंनामधेनुपत्यमानम् ।
मर्तेष्वन्यद्दोहसेपीपायसकृच्छुक्रंदुदुहेपृश्निरूधः ॥ १ ॥

वपुः । नु । तत् । चिकितुषे । चित् । अस्तु । समानम् । नाम ।
धेनु । पत्यमानम् । मर्तेषु । अन्यत् । दोहसे । पीपाय ।
सकृत् । शुक्रम् । दुदुहे । पृश्निः । ऊधः ॥ १ ॥

तत्प्रसिद्धं समानमेकरूपं मरुतः सर्वदा समानरूपाः तथा च निगमान्तरं—अज्येष्ठासो अकनिष्ठासएतइति । नाम स्थिराणामपि नामकं धेनु प्रीणयितृ पत्यमानं सर्वदा गच्छद् वपुर्मरु-

१ तै०सं० ५ ३ । २ ऋ० सं० ४ ३ २५ ।
२

अथ चतुर्थी–

इदाहिवोविधतेरत्नमस्तीदावीरायदाशुषउषासः ।
इदाविप्रायजरतेयदुक्थानिष्ममावतेवहथापुराचित् ॥ ४ ॥

इदा । हि । वः । विधते । रत्नम् । अस्ति । इदा । वीराय । दाशुषे ।
उषसः । इदा । विप्राय । जरते । यत् । उक्था । नि । स्म ।
माऽवते । वहथ । पुरा । चित् ॥ ४ ॥

हे उषः इदाहि इदानीमेव वोयुष्माकं विधते परिचरते दातुं रत्नं धनमस्ति इदाहि इदानीमेव वीराय प्रेरयित्रे हविर्षां दाशुषे यजमानाय दातुं वोरत्नमस्ति इदाहि इदानीमेव विप्राय मात्राय जरते स्तुवते दातुं वोरत्नमस्ति यद्यस्मिन् विप्रे उक्था उक्थनामकानि स्तोत्राणि विद्यन्ते मावते मत्सदृशाय यजमानाय तद्रत्नं निवहथ पुराचित् पुरापि रत्नं मह्यं दत्तं ॥ ४ ॥

अथ पंचमी–

इदाहितउषोअद्रिसानोगोत्रागवामङ्गिरसोगृणन्ति ।
व्यर्केणबिभिदुर्ब्रह्मणाचसत्यानृणामभवद्देवहूतिः ॥ ५ ॥

इदा । हि । ते । उषः । अद्रिसानो इत्यद्रिऽसानो । गोत्रा ।
गवाम् । अङ्गिरसः । गृणन्ति । वि । अर्केण । बिभिदुः । ब्रह्मणा ।
च । सत्या । नृणाम् । अभवत् । देवऽहूतिः ॥ ५ ॥

हे उषः अद्रिसानो आदृतसानो ते तव प्रसादात् इदाहि सद्यएवगवां गोत्रा संघान् अंगिरसो गृणन्ति सृजन्ति तथा च निगमान्तरं–गवां गोत्रमुदसृजोयदंगिरईति । अर्केण अर्चनीयेन ब्रह्मणा स्तोत्रेण वि बिभिदुः तमांसि विदारयन्ति च नृणां नेतॄणां तेषामंगिरसां देवहूतिर्देवविषयास्तुतिः सत्या सत्यफलाभवत् ॥ ५ ॥

अथ षष्ठी–

उच्छादिवोदुहितःप्रत्नवन्नोभरद्वाजवद्विधतेमघोनि ।
सुवीरंरयिंगृणतेरिरीह्युरुगायमधिधेहिश्रवोनः ॥ ६ ॥ ६ ॥

---

१ ऋ० सं० २. ६. ३२. ।

तां रूपं चिकितुषे विदुषे स्तोत्रे नु क्षिप्रं अस्तु प्रादुर्भवतु । चिदिति पूरकं किं च तद्रूपं मर्त्येषु मर्त्यलोके अन्यदोषधिवनस्पत्यादिकं दोहसे कामान् दोग्धुं पीपाय आप्याययति। किं च मरुतामेव निर्देशात् पृश्निरन्तरिक्षं सकृत्संवत्सरस्य वर्षासु शुक्रं शुक्लवर्णं ऊधः उदकं दुदुहे क्षरति ॥ १ ॥

अथ द्वितीया—

येअ॒ग्नयो॒नशोशु॑चन्नि॒धा॒नाद्वि॒र्यत्त्रि॒र्म॒रुतो॑वावृ॒धन्त॑ ।
अ॒रे॒णवो॑हिर॒ण्यया॑सएषांसा॒कंनृ॒म्णैः पौंस्ये॑भिश्चभूवन् ॥ २ ॥

ये । अ॒ग्नयः॑ । न । शोशु॑चन् । इ॒धा॒नाः । द्विः । यत् । त्रिः ।
म॒रुतः॑ । व॒वृ॒धन्त॑ । अ॒रे॒णवः॑ । हि॒र॒ण्यया॑सः । ए॒षा॒म् ।
सा॒कम् । नृ॒म्णैः । पौंस्ये॑भिः । च॒ । भू॒व॒न् ॥ २ ॥

ये मरुतः इधानाः अग्नयो न समिध्यमानाः अग्नयइव शोशुचन् दीप्यन्ते यत् ये मरुतः द्विर्द्विगुणं त्रिस्त्रिगुणं च ववृधन्त इच्छानुरूपं वर्धन्ते । संहितायां दीर्घश्छान्दसः एषां मरुतां रथाः अरेणवो रेणुरहिताः हिरण्ययासो हिरण्मयालंकाराश्च भवन्ति । ते मरुतः नृम्णैर्धनैः पौंस्येभिर्बलैश्च साकं सार्धं भूवन् प्रादुर्भवन्ति । तथा च निगमान्तरं—ये पृषतीभिर्ऋष्टिभिरिति[1] ॥ २ ॥

अथ तृतीया—

रु॒द्रस्य॒येमी॒ळ्हुषः॒सन्ति॑पु॒त्रायाँ॑श्चो॒नुदाधृ॑वि॒र्भर॑ध्यै ।
वि॒देहि॒मा॒ता॒म॒हो॒म॒हीषासेत्पृश्निः॑सु॒भ्वे॒३॒॑गर्भ॒माधा॑त् ॥ ३ ॥

रु॒द्रस्य॑ । ये । मी॒ळ्हुषः॑ । सन्ति॑ । पु॒त्राः । यान् । चो॒ इति॑ ।
नु । दाधृ॑विः । भर॑ध्यै । वि॒दे । हि । मा॒ता । म॒हः । म॒ही । सा । सा ।
इत् । पृश्निः॑ । सु॒ऽभ्वे॑ । गर्भ॑म् । आ । अ॒धा॒त् ॥ ३ ॥

मीळ्हुषः सेक्तुः रुद्रस्य पुत्रा ये मरुतः सन्ति दाधृविः धरित्री पृश्निरन्तरिक्षं यांश्चोनु यांश्च मरुतोनुभरध्यै भर्तुं क्षमा भवति विदेहि सर्वज्ञाताहि महो महतामेषां माता सा पृश्निर्मही महती किं च सा पृश्निः सुभ्वे नृणां सम्यक्भवनाय गर्भमुदकं आधात् आदधाति ॥ ३ ॥

---

१ ऋ० सं० १. ३. १२. ।

अथ चतुर्थी–

नयईषन्तेजनुषोयान्वं१न्तःसन्तोवद्यानिपुनानाः ।
निर्यद्दुह्रेशुचयोनुजोषमनुश्रियातन्वमुक्षमाणाः ॥ ४ ॥

न । ये । ईषन्ते । जनुषः । अया । नु । अन्तरिति । सन्तः ।
अवद्यानि । पुनानाः । निः । यत् । दुह्रे । शुचयः । अनु ।
जोषम् । अनु । श्रिया । तन्वम् । उक्षमाणाः ॥ ४ ॥

ये प्रसिद्धा मरुतः जनुषो जनान् स्तोतॄन् प्रति अया अयेन मनसा धनेन नेषन्ते न गच्छन्ति । किं तेषां रक्षणीयत्वाभावाद्गमनाभावः नेत्याह अन्तः सन्तः सर्वेषां हृदि वर्तमानाएव अवद्यानि पापानि पुनानाः शोधयन्तः तथा च निगमान्तरं–प्राणावैमरुतःस्वापयइति।[1]अतः सर्वप्राणिनां हृदि वर्तमानानां तेषां गमनं नास्तीति अध्यात्मं प्राणरूपेणावस्थानं दर्शितं भवति । शीघ्रगामित्वं तु तेषामाधिदैवतरूपेणेति द्रष्टव्यं यद्यदा शुचयो दीप्यमाना मरुतः जोषमनु स्तोतॄणां काममनु निर्दुह्रे नितरां दुहंत्युदकं तथा श्रिया दीप्त्या अनु अनुगतास्तन्वं आत्मीयं शरीरं प्रकाशयन्तः उक्षमाणाः भूमिं सिंचन्तो भवन्ति । यद्वा तन्वं विस्तीर्णं यथा भवति तथोक्षमाणा भूमिं सिंचन्तो भवन्तीत्यर्थः ॥ ४ ॥

अथ पंचमी–

मक्षूनयेषुदोहसेचिदयाआनामधृष्णुमारुतंदधानाः ।
नयेस्तौनाअयासोमह्नानूचित्सुदानुरवयासदुग्रान् ॥ ५ ॥ ७ ॥

मक्षु । न । येषु । दोहसे । चित् । अयाः । आ । नाम । धृष्णु ।
मारुतम् । दधानाः । न । ये । स्तौनाः । अयासः । मह्ना ।
नु । चित् । सुऽदानुः । अव । यासत् । उग्रान् ॥ ५ ॥ ७ ॥

येषु प्रसिद्धेषु मरुत्सु धृष्णु धर्षकं मारुतं नाम मरुत्संज्ञकं शस्त्रं आदधानाः उच्चारयन्तः अयाः उपगच्छन्तः स्तोतारः मक्षु क्षिप्रं दोहसे कामान् दोग्धुं क्षमा भवन्ति । नेति संप्रत्यर्थे ये स्तौनाः स्तेनास्तिरोहितावा स्तोतृधनानामपहर्तारः अयासो गन्तारो भवन्ति। मह्ना म-

---

1 ऐ० ब्रा० ३.१६ ।

हत्वेन युक्ताश्च भवन्ति । उग्रान् तान् क्रुध्दान् सुदानुः शोभनहविर्दानो यजमानः अवयासत् अवयजते अपगतक्रोधान्करोति नेति संप्रत्यर्थे ॥ ५ ॥

॥ इति पंचमस्य प्रथमे सप्तमो वर्गः ॥ ७ ॥

अथ षष्ठी—

तदद्गुग्राःशवसाधृष्णुर्षेणाउभेयुंजन्तरोदसीसुमेके ।
अधस्मैषुरोदसीस्वशोचिरामवत्सुतस्थौनरोकः ॥ ६ ॥

ते । इत् । उग्राः । शवसा । धृष्णुऽसेनाः । उभे इति । युजन्त ।
रोदसी इति । सुमेके इतिसुऽमेके । अध । स्म । एषु । रोदसी ।
स्वऽशोचिः । आ । अमवत्ऽसु । तस्थौ । न । रोकः ॥ ६ ॥

ते मरुतः उग्राः शवसा बलेन वेगेन युक्ताः धृष्णुषेणा धर्षकसेनाः सुमेके सुरूपे उभे रोदसी द्यावापृथिव्यौ युजन्त योजयन्ति वृष्ट्या पृथिवीं तर्पयन्तीत्यभिप्रायः । अध स्म अपि च एषु मरुत्सु रोदसी रुद्रस्य पत्नी माध्यमिकीवाक् स्वशोचिः स्वदीप्तिर्वर्तते अमवत्सु बलवत्सु तेषु रोको दीप्तिर्बाधको वा नातस्थौ नतिष्ठति न नि.सरत्येवेत्यर्थः ॥ ६ ॥

अथ सप्तमी—

अनेनोवोमरुतोयामोअस्त्वनश्वश्चिद्यमजत्यरथीः ।
अनवसोअनभीशूरजस्तूर्विरोदसीपथ्यायातिसाधन् ॥ ७ ॥

अनेनः । वः । मरुतः । यामः । अस्तु । अनश्वः । चित् ।
यम् । अजति । अरथीः । अनवसः । अनभीशुः । रजःऽतूः ।
वि । रोदसी इति । पथ्याः । याति । साधन् ॥ ७ ॥

हे मरुतः वो युष्माकं संबन्धी यामो रथः अनेनः पापरहितं यथा भवति तथा अस्तु प्रादुर्भवतु । किं च यं यामं अरथीः रथिः सारथिः नरथिः अरथीः असारथिरपि स्तोता अजति प्रेरयति । स रथः अनश्वश्चित् अश्वरहितोपि अनवसः पथ्यदनरहितः अनभीशुः पाशरहितोपि रजस्तूः उदकस्य प्रेरकः साधन् स्तोतॄणां कामान् साधयन् रोदसी द्यावापृथिव्यौ पथ्याः पथोन्तरिक्षमार्गान् वियाति विविधं गच्छति ॥ ७ ॥

अथाष्टमी—

नास्यवर्तानतरुतान्वस्तिमरुतोयमवथवाजसातौ ।
तोकेवागोपुतनयेयमप्सुसवृजंदर्तापार्येअधद्योः ॥ ८ ॥

न । अस्य । वर्ता । न । तरुता । नु । अस्ति । मरुतः । यम् ।
अवथ । वाजऽसातौ । तोके । वा । गोषु । तनये । यम् ।
अप्ऽसु । सः । व्रजम् । दर्ता । पार्ये । अध । द्योः ॥ ८ ॥

हे मरुतः वाजसातौ संग्रामे यमवथ रक्षथ । अस्य जनस्य वर्ता प्रेरको नास्ति अस्य तरुता नु हिंसिता च नास्ति अध अपि च तोके पुत्रे तनये पौत्रे धने वा गोषु वा अप्सु वा निमित्तभूतेषु यमवथ पार्ये संग्रामे द्योः दीप्तस्यापि विजिगीषोर्वा शत्रोः व्रजं गवां संघं दर्ता दारयिता भवति ॥ ८ ॥

अथ नवमी—

प्रचित्रमर्कंगृणतेतुरायमारुतायस्वतवसेभरध्वम् ।
येसहांसिसहसासहन्तेरेजतेअग्नेपृथिवीमखेभ्यः ॥ ९ ॥

प्र । चित्रम् । अर्कम् । गृणते । तुराय । मारुताय । स्वऽतवसे ।
भरध्वम् । ये । सहांसि । सहसा । सहन्ते । रेजते ।
अग्ने । पृथिवी । मखेभ्यः ॥ ९ ॥

हे अग्ने गृणते शब्दं कुर्वते स्तूयमानाय वा तुराय त्वरिताय स्वतवसे स्वभूतबलाय मारुताय मरुतां गणाय चित्रं दर्शनीयं अर्कमन्नं हविः स्वधा अर्क इत्यन्ननामसु पाठात् प्रभरध्वं त्वत्सहायभूता ऋत्विजः त्वं च सर्वे यूयं प्रभरत । यथा लोके बहुष्वेककार्यकरेषु मुख्यमेकं संबोध्य यूयमेवं कुरुतेति प्रार्थना तद्वदत्रापि मुख्यमग्निमेकमेव संबोध्य प्रभरध्वमिति बहुवचनप्रयोगः ये मरुतः सहांसि शत्रूणां बलानि सहसा बलेन सहन्ते अभिभवन्ति । मखेभ्यो मंहनीयेभ्यो मरुद्भ्यो भयात् पृथिवी रेजते कंपते । मारुतायेति तद्धितवृत्तावन्तर्भूतानामपि मरुतां बुद्ध्या प्रविभागात् य इति प्रत्यवमर्शः यथा महाभाष्ये अथ शब्दानुशासनं केषां शब्दानामिति यथा वा लोके राजपुरुषइत्युक्ते कस्य राज्ञ इति ॥ ९ ॥

अथ दशमी–

त्विषीमन्तोअध्वरस्येवदिद्युत्तृषुच्यवसोजुह्वो३नाग्नेः ।
अर्चत्रयोधुनयोनवीराभ्राजज्जन्मानोमरुतोअधृष्टाः ॥ १० ॥

त्विषिऽमन्तः । अध्वरस्यऽइव । दिद्युत् । तृषुऽच्यवसः ।
जुह्वः । न । अग्नेः । अर्चत्रयः । धुनयः । न । वीराः ।
भ्राजत्ऽजन्मानः । मरुतः । अधृष्टाः ॥ १० ॥

मरुतः अध्वरस्येव यज्ञस्येव दिद्युत् द्योतमानाः तृषुच्यवसः क्षिप्रगमनाः अग्नेः जुह्वो न रश्मय इव त्विषीमन्तो दीप्तिमन्तः अर्चत्रयोर्चनीयाः धुनयो न सपत्नान् कंपयन्त इव वीराः शूराः भ्राजज्जन्मानः दीप्तशरीराः अधृष्टाः परैरनभिभूताश्च भवन्ति ॥ १० ॥

अथैकादशी–

तंवृधन्तंमारुतंभ्राजदृष्टिंरुद्रस्यसूनुंहवसाविवासे ।
दिवःशर्धायशुचयोमनीषागिरयोनापउग्राअस्पृध्रन् ॥ ११ ॥८॥

तम् । वृधन्तम् । मारुतम् । भ्राजत्ऽऋष्टिम् । रुद्रस्य ।
सूनुम् । हवसा । आ । विवासे । दिवः । शर्धाय । शुचयः ।
मनीषाः । गिरयः । न । आपः । उग्राः । अस्पृध्रन् ॥ ११ ॥ ८ ॥

तं प्रसिद्धं वृधन्तं वर्धमानं भ्राजदृष्टिं भ्राजमानर्ष्टिं रुद्रस्य सूनुं पुत्रं मारुतं मरुद्गणं हवसा स्तोत्रेण आविवासे परिचरामि । किं च दिवः स्तोतुः शुचयो निर्मलाः मनीषाः स्तुतयः उग्राः उद्गूर्णाः शर्धाय मारुताय बलाय त्वक्षः शर्ध इति बलनामसु पाठात् आपः आप्नुवन्तः गिरयो न मेघाइव गिरिः व्रज इति मेघनामसु पाठात् अस्पृध्रन् अस्पर्धन्त ॥ ११ ॥

॥ इति पंचमस्य प्रथमे ष्टमो वर्गः ॥ ८ ॥

विश्वेषांव इत्येकादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मैत्रावरुणं तथा चानुक्रम्यते–विश्वेषां मैत्रावरुणमिति सूक्तविनियोगो लैंगिकः मैत्रावरुणे पशौ आयातं मित्रावरुणेति पशुपुरोडाशस्यानुवाक्या सूत्रितं च–आयातंमित्रावरुणासुशस्त्यानोमित्रावरुणाहव्यजुष्टिमिति । व्यूह्ळे दशरात्रे सप्तमे हनि प्रउगशस्त्रे प्रयद्वामिति मैत्रावरुणस्तृतीयस्तृचः तथा च सूत्रितं–प्रयद्वां मित्रावरुणास्पूर्धन्नागोमतानासत्यारथेनेति ।

तत्र प्रथमा—

विश्वेषांवः॒सतांज्येष्ठ॑तमागी॒र्भिर्मि॒त्रावरु॑णावावृ॒धध्यै॑ ।
संयार॒श्मेव॑य॒मतु॒र्यमि॑ष्ठा॒द्वाजना॑ँअसंमाबा॒हुभिः॒स्वैः ॥ १ ॥

विश्वे॑षाम् । व॒ः । स॒ताम् । ज्येष्ठ॑ऽतमा । गी॒ःऽभिः॑ । मि॒त्रावरु॑णा । व॒वृधध्यै॑ । सम् । या । र॒श्माऽइ॑व । य॒मतु॑ः । यमि॑ष्ठा । द्वा । जना॑न् । अस॑मा । बा॒हुऽभि॑ः । स्वैः ॥ १ ॥

विश्वेषां सतां मध्ये ज्येष्ठतमा ज्येष्ठतमौ मित्रावरुणौ वः वां गीर्भिः स्तुतिभिः ववृधध्यै वर्धयितुं प्रवृत्तोस्मि या यौ द्वा द्वौ सहितौ असमा विषमौ त्रिरश्रिर्हन्तिचतुरश्रिरुग्रइति निगमान्तरेण साम्यं दर्शितं यमिष्ठा यन्तृतमौ स्वै रात्मीयै र्बाहुभिः रश्मेव रश्मिनेव अश्वान् जनान् संयमतुः संगच्छतः बाहुभिरिति बहुवचनं पूजार्थं ॥ १ ॥

अथ द्वितीया—

इ॒यंमद्वां॒प्रस्तृ॑णीतेमनी॒षोप॑प्रि॒यानम॑सा॒ब॒र्हिरच्छ॑ ।
य॒न्तंनो॑मित्रावरुणा॒वधृ॑ष्टंछ॒र्दिर्यद्वां॑वरू॒थ्यं॑सुदानू ॥ २ ॥

इ॒यम् । मत् । वा॒म् । प्र । स्तृ॒णी॒ते । म॒नी॒षा । उप॑ । प्रि॒या । नम॑सा । ब॒र्हिः । अच्छ॑ । य॒न्तम् । न॒ः । मि॒त्रा॒व॒रु॒णौ॒ । अधृ॑ष्टम् । छ॒र्दिः॑ । यत् । वा॒म् । व॒रू॒थ्य॑म् । सु॒दा॒नु॒ इति॑सुऽदानू ॥ २ ॥

हे मित्रावरुणौ वां युवां मत् मम इयं मनीषा स्तुतिः प्रस्तृणीते प्रच्छादयति । प्रिया हे प्रियौ युवां नमसा अन्नेन हविषा सहोपगच्छति च । युवयोः बर्हिः यज्ञमच्छ अभिगच्छति च । हे मित्रावरुणौ नोस्मभ्यं अधृष्टं अनभिभूतं छर्दिर्गृहं यंतं प्रयच्छतं हे सुदानू शोभनदानौ वां युवयोः संबन्धि युवाभ्यां देयं यद्गृहं वरूथ्यं शीतवातातपानां वारयितृ भवति ॥ २ ॥

अथ तृतीया—

आया॑तंमित्रावरुणासुश॒स्त्युप॑प्रि॒यानम॑साहू॒यमा॑ना ।
संयाव॑प्न॒स्थो॒अपसे॑वज॒नाञ्छ्रु॑धीय॒तश्चि॑द्यतथोमहि॒त्वा ॥ ३ ॥

---

१ ऋ० सं० २. २. २२. १

आ । यातम् । मित्रावरुणा । सुऽशस्ति । उप॑ । प्रिया । नमसा ।
हूयमाना । सम् । यौ । अप्नःऽस्थः । अपसांऽइव । जनान् ।
श्रुधिऽयतः । चित् । यतथः । महिऽत्वा ॥ ३ ॥

हे मित्रावरुणौ सुशस्ति शोभनशंसनं नमसा अन्नेन हविषा स्तोत्रेण हूयमाना स्तूयमानौ प्रिया विश्वस्य प्रियौ उपायातं उपागच्छतं । यो महित्वा महत्वेनयुक्तौ युवां श्रुधीयतः श्रुधिमन्नं यशोवा आत्मनइच्छतो जनान् अप्नःस्थः कर्मण्यधिष्ठितः पुरुषः अपः अप्नइति कर्मनामसु पाठात् अपसेव कर्मणेव संयतथः संगच्छथः ॥ ३ ॥

अथ चतुर्थी—

अश्वानयावाजिनापूतबन्धूऋतायद्गर्भमदितिर्भरध्यै ।
प्रयामहिमहान्ताजायमानाघोरामर्तायरिपवेनिदीधः ॥ ४ ॥

अश्वा । न । या । वाजिना । पूतबन्धू इति पूतऽबन्धू । ऋता ।
यत् । गर्भम् । अदितिः । भरध्यै । प्र । या । महि । महान्ता ।
जायमाना । घोरा । मर्ताय । रिपवे । नि । दीधरितिदीधः ॥ ४ ॥

या यौ अश्वान अश्वाविव वाजिना वाजिनौ बलिनौ पूतबन्धू पूतस्तोत्रौ ऋता सत्यौ च यत् यौ गर्भं गर्भभूतौ अदितिर्देवी भरध्यै बभार । किं च या यौ जायमाना जायमानावेव महि महतो महान्ता महत्तरौ प्रभूतौ मित्रावरुणौ मर्ताय मर्त्याय रिपवे हिंसकाय घोरा घोरौ घातकौ निदीधः निदधार अदितिः स्वोदरे ॥ ४ ॥

अथपंचमी—

विश्वेयद्वांमंहनामन्दमानाःक्षत्रंदेवासोअदधुसजोषाः ।
परियद्भूथोरोदसीचिदुर्वीसन्तिस्पशोअदब्धासोअमूराः ॥५॥१॥

विश्वे । यत् । वाम् । मंहना । मन्दमानाः । क्षत्रम् । देवासः । अदधुः ।
सऽजोषाः । परि । यत् । भूथः । रोदसी इति । चित् । उर्वी इति ।
सन्ति । स्पशः । अदब्धासः । अमूराः ॥ ५ ॥ १ ॥

विश्वे सर्वे देवासो देवाः सजोषाः परस्परं प्रीतियुक्ताः यत् यौ वां युवां मंहना महत्वेन मंदमानाः स्तुवन्तः क्षत्रं बलमदधुः धत्तवन्तः । किं च यत् यौ युवां उर्वी विस्तीर्णे रोदसी द्यावापृथिव्यौ परिभूथः परिभवथः । तयोर्युवयोः अदब्धासः अहिंसिताः अमूराः अमूढाः स्पशः रश्मयश्चरा वा सन्ति ॥ ५ ॥

॥ इति पंचमस्य प्रथमे नवमो वर्गः ॥ ९ ॥

अथ षष्ठी–

ताहिक्षत्रंधारयेथेअनुद्यून्दृंहेथेसानुमुपमादिवद्योः ।
दृळ्होनक्षत्रउतविश्वदेवोभूमिमातान्द्यांधासिनायोः ॥ ६ ॥

ता । हि । क्षत्रम् । धारयेथे इति । अनु । द्यून् । दृंहेथे इति । सानुम् । उपमात्ऽइव । द्योः । दृळ्हः । नक्षत्रः । उत । विश्वऽदेवः । भूमिम् । आ । अतान् । द्याम् । धासिना । आयोः ॥ ६ ॥

ता तौ मित्रावरुणौ युवां अनुद्यून् दिवसेदिवसे क्षत्रं बलं धारयेथेहि । द्योरन्तरिक्षस्य सानुं समुच्छ्रितप्रदेशं मेघं सूर्यं वा दृंहेथे दृढीकुरुतं । उपमादिव उपमीयते प्रक्षिप्यते इत्युपमात् स्थूणा सा यथावत्सं धारयति तद्वत् इत्यर्थः । दृळ्हः युवाभ्यां दृढीकृतश्च मेघो नक्षत्रः अन्तरिक्षं व्याप्नुवानः उत अपि च विश्वदेवः सूर्यो भूमिं द्यां दिवं च आयोर्मनुष्यस्य द्रुत्व आयव इति मनुष्यनामसु पाठात् धासिना अन्नेन हविषा क्षुत् धासिरित्यन्ननामसु पाठात् आप्यायितःसन् आ अतान् आतनोति युवाभ्यां दृढीकृतएव ॥ ६ ॥

अथ सप्तमी–

ताविग्रंधैथेजठरंपृणध्याआयत्सद्मसभृतयःपृणन्ति ।
नमृष्यन्तेयुवतयोवाताविघत्पयोविश्वजिन्वाभरन्ते ॥ ७ ॥

ता । विग्रम् । धैथे इति । जठरम् । पृणध्यै । आ । यत् । सद्म । सऽभृतयः । पृणन्ति । न । मृष्यन्ते । युवतयः । अवाताः । वि । यत् । पयः । विश्वऽजिन्वा । भरन्ते ॥ ७ ॥

ता तौ मित्रावरुणौ युवां विप्रं प्राज्ञं यजमानं विपः विप्र इति मेधाविनामसु पाठात् धेथे धारयथः । जठरमुदरं पृणध्यै सोमेन पूरयितुं यद्यदा सप्ततयः सप्तभिर्ग्रियमाणा ऋत्विजः सद्म यज्ञसदनं आपृणन्ति आपूरयन्ति । विश्वजिन्वा हे विश्वजिन्वानौ यद्यदा पयो जलं भवद्भ्यां प्रहितं तदा युवतयो नद्यो दिशो वा न धृष्यन्ते रजसानाभिभूयन्ते । अथातः अशुष्का अविरमन्ते विभूतिं धारयन्ति ॥ ७ ॥

अथाष्टमी–

ताजि॒ह्वया॒सद॑मे॒दंसु॑मे॒धाआयद्वां॑स॒त्योअ॑र॒तिर्ऋ॒तेभूत् ।
तद्वां॑महि॒त्वंघृ॑ता॒न्नावस्तुयु॒वंदा॒शुषे॒विच॑यि॒ष्टमंहः॑ ॥ ८ ॥

ता । जि॒ह्वया॑ । सद॑म् । आ । इ॒दम् । सु॒ऽमे॒धाः । आ । यत् ।
वा॒म् । स॒त्यः । अ॒र॒तिः । ऋ॒ते । भू॒त् । तत् । वा॒म् । म॒हि॒ऽत्वम् ।
घृ॒त॒ऽअ॒न्नौ॒ । अ॒स्तु॒ । यु॒वम् । दा॒शुषे॑ । वि । च॒यि॒ष्ट॒म् । अंहः॑ ॥ ८ ॥

ता तौ मित्रावरुणौ युवां सुमेधाः प्राज्ञः जिह्वया वाचा सदं सर्वदा इदं जलं आयाचते । आ इत्युपसर्गदर्शनाद्योग्यक्रियाध्याहाराद्याचत इत्यध्याह्रियते । पूर्वस्याम्ऋचि जठरस्य प्रकृतत्वात् बुद्धौ विपरिवर्तमानं जलं इदंशब्देन परामृश्यते । यद्यदा वां युवयोररतिः रभिगन्ता ऋते यज्ञे सत्यो मायारहितः आभूत् आभवति । हे घृतान्नौ त्वन्महित्वमपेक्षितप्रदातृत्वलक्षणं वां युवयोरस्तु किं च युवं युवां दाशुषे दाशुषो यजमानस्य षष्ठ्यर्थे चतुर्थी अंहः पापं विचयिष्टं विनाशयतमित्यर्थः ॥ ८ ॥

अथ नवमी–

प्रयद्वां॑मित्रावरुणास्पू॒र्धन्प्रि॒याधाम॑यु॒वधि॑ता॒मि॒नन्ति॑ ।
नयेदे॒वास॒ओह॑सा॒नमर्ता॒अय॑ज्ञसाचो॒अप्यो॒नपु॒त्राः ॥ ९ ॥

प्र । यत् । वा॒म् । मि॒त्रा॒व॒रु॒णा॒ । स्पू॒र्धन् । प्रि॒या । धाम॑ ।
यु॒वऽधि॑ता । मि॒नन्ति॑ । न । ये । दे॒वासः॑ । ओह॑सा । न ।
मर्ताः॑ । अय॑ज्ञऽसाचः । अप्यः॑ । न । पु॒त्राः ॥ ९ ॥

हे मित्रावरुणौ वां युवयोः प्रिया प्रियाणि धाम धामानि कर्माणि युवधिता युवाभ्यां विहितानि यत्र ये यजन्तो जना स्पूर्धन् स्पर्धमानाः प्रमिनन्ति हिंसन्ति। ये च देवासो देवाः ओहसा वहनसाधनेन स्तोत्रेण युज्यन्ते मर्ता मनुष्याश्च ओहसा न युज्यन्ते ये च अप्यः अपः कर्म तद्वन्तः अयज्ञसाचः यज्ञयुक्ता न वृथा कर्माणि कुर्वन्त इत्यर्थः। ये च न पुत्राः पृणन्तीति पुत्राः न पुत्राः अपृणन्त इत्यर्थः तान् सर्वान्विचयिष्टमित्यनुपज्यते ॥ ९ ॥

अथ दशमी–

विय॒द्वाचं॒कीस्ता॒सो॒भर॑न्ते॒शंस॑न्ति॒केचि॑न्नि॒विदो॑मना॒नाः।
आद्वां॑ब्रवाम॒स॒त्यान्यु॒क्थान॒कि॑र्दे॒वेभि॑र्यतथोमहि॒त्वा ॥ १० ॥

वि। यत्। वाच॑म्। की॒रुतासः॑। भर॑न्ते। शंस॑न्ति। के। चि॒त्।
नि॒ऽविदः॑। म॒ना॒नाः। आत्। वा॒म्। ब्र॒वा॒म। स॒त्यानि॑। उ॒क्था।
नकिः॑। दे॒वेभिः॑। य॒त॒थः। म॒हि॒ऽत्वा ॥ १० ॥

यद्यदा कीस्तासो मेधाविनः उद्गातारः उशिजःकीस्तास इतिमेधाविनामसु पाठात् वाचं स्तुतिं विभरन्ते पृथगुचारयन्ति तदा केचिद्बह्वचाः मनानाः अग्न्यादींस्तुवन्तः निविदः शंसन्ति आत् तथा सति वां युवाभ्यां सत्यान्युक्थानि स्तोत्राणि वयं ब्रवाम महित्वा महत्वेन देवेभिरन्यैर्देवैः सह नकिर्यतथः न गच्छथः ॥ १० ॥

अथैकादशी–

अ॒वोरि॒त्थावां॑छ॒र्दिषो॑अ॒भिष्टौ॑यु॒वोर्मि॑त्रावरुणा॒वस्कृ॑धोयु।
अनु॒यद्गावः॑स्फु॒रानृ॑जि॒प्यंधृ॒ष्णुंयद्रणे॒वृष॑णंयु॒नज॑न् ॥ ११ ॥ १० ॥

अ॒वोः। इ॒त्था। वा॒म्। छ॒र्दिषः॑। अ॒भिष्टौ॑। यु॒वोः। मि॒त्रा॒व॒रु॒णौ॒।
अस्कृ॑धोयु। अनु॑। यत्। गावः॑। स्फु॒रान्। ऋ॒जि॒प्यम्।
धृ॒ष्णुम्। यत्। रणे॑। वृष॑णम्। यु॒नज॑न् ॥ ११ ॥ १० ॥

हे मित्रावरुणौ अवोः अवतोर्वां युवयोरभिष्टौ अभिगमने छर्दिषः गृहाय सुखाय वा चतुर्थ्यर्थे षष्ठी युवामभिगवेषु स्तोत्रेषु युवोः युवयोः संबन्धि युवाभ्यां देयं तद्गृहादिकं अस्कृधोयु अविच्छिन्नं भवति। तथा च यास्कः अस्कृधोयुरकृध्वायुःकृध्विति ह्रस्वनामनिकृत्तं भवती–

र्ति । इत्था सत्यमेव कदा मित्रावरुणयोरभिगमनं इत्यत आह यद्दा गावः स्तुतयः अनुस्फुरान् अनुस्फुरेयुः यदा च ऋजिप्यं ऋजुगामिनं धृष्णुं शत्रूणां धर्षकं वृषणं कामानां वर्षितारं सोमं रणे रमणे यज्ञे सुनजन् यजमाना युंज्युः ॥ ११ ॥

॥ इति पंचमस्य प्रथमे दशमो वर्गः ॥ १० ॥

श्रुष्टीवामित्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रावरुणं तथाचानुक्रम्यते—श्रुष्टीवामैन्द्रावरुणमुपांत्येजगत्याविति । प्रस्तराजे इन्द्रावरुणासुतपावित्येते जगत्यौ शिष्टास्त्रिष्टुभः इन्द्रावरुणौ देवता आभिप्लविकेपूक्थ्येषु तृतीयसवने होत्रकशस्त्रेषु स्तोमवृद्धौ मैत्रावरुणस्येदमावापार्थं सूक्तं सूत्रितं च—श्रुष्टीवांयज्ञोयुवांनरेति । तृतीयसवने इन्द्रावरुणासुतपाविमंसुतमितिप्रशास्तुःप्रस्थितयाज्या सूत्रितं च—इन्द्रावरुणासुतपाविमंसुतमिन्द्रश्चसोमंपिबतबृहस्पतइति । उक्थ्ये तृतीयसवने इन्द्रावरुणामधुमत्तमस्येति । मैत्रावरुणस्य शस्त्रयाज्या सूत्रितं च इन्द्रावरुणा मधुमस्येतियाज्येति ।

तत्र प्रथमा—

श्रुष्टीवांयज्ञउद्यतःसजोषामनुष्वद्वृक्तबर्हिषोयजध्यै ।
आयइन्द्रावरुणाविषेअद्यमहेसुम्नायमहआववर्तत् ॥ १ ॥

श्रुष्टी । वाम् । यज्ञः । उत्ऽयतः । सऽजोषाः । मनुष्वत् ।
वृक्तऽबर्हिषः । यजध्यै । आ । यः । इन्द्रावरुणौ ।
इषे । अद्य । महे । सुम्नाय । महे । आऽववर्तत् ॥ १ ॥

महे महनीयौ हे इन्द्रावरुणौ वां युवयोरर्थे श्रुष्टी क्षिप्रः तथा च यास्कः—श्रुष्टीति क्षिप्रनाम श्रु अष्टीति । यज्ञः सोमः सजोषाः ऋत्विग्भिः सहितः अद्य आसमन्तात् उद्यतः प्रवृत्तः यः सोमः मनुष्वत् मनोरिव वृक्तबर्हिषः स्तीर्णबर्हिषो यजमानस्य इषोन्नार्थं महे महते सुम्नाय सुखाय च यजध्यै यष्टुं वां आववर्तत् आवर्तयति ॥ १ ॥

अथ द्वितीया—

ताहिश्रेष्ठादेवतातातुजाशूराणांशविष्ठाताहिभूतम् ।
मघोनांमंहिष्ठातुविशुष्मऋतेनवृत्रतुरासर्वसेना ॥ २ ॥

१ नि० ६. ३. । २ नि० ६. १२. ।

ता । हि । श्रेष्ठा । देवऽताता । तुजा । शूराणाम् ।
शविष्ठा । ता । हि । भूतम् । मघोनाम् । मंहिष्ठा ।
तुविऽशुष्मा । ऋतेन । वृत्रऽतुरा । सर्वऽसेना ॥ २ ॥

हे इन्द्रावरुणौ ता तौ प्रसिद्धौ युवां श्रेष्ठा श्रेष्ठौ देवताता देवतातौ यज्ञे इष्टिर्देवतातेति यज्ञनामसु पाठात् तुजा धनानां प्रेरकौ हि भूतं भवतं । किं च ता तौ हि युवां शूराणां मध्ये शविष्ठा अतिशयेन बलवन्तौ भूतं किं च मघोनां दानवतां मंहिष्ठा दातृतमौ तुविशुष्मा बहुबलौ ऋतेन सत्येन वृत्रतुरा शत्रूणां हिंसकौ सर्वसेना कृत्स्नसेनौ च भूतमिति ॥ २ ॥

अथ तृतीया—

तागृणीहिनमस्येभिःशूषैःसुम्नेभिरिन्द्रावरुणाचकाना ।
वज्रेणान्यःशवसाहन्तिवृत्रंसिषक्त्यन्योवृजनेषुविप्रः ॥ ३ ॥

ता । गृणीहि । नमस्येभिः । शूषैः । सुम्नेभिः । इन्द्रावरुणा ।
चकाना । वज्रेण । अन्यः । शवसा । हन्ति ।
वृत्रम् । सिसक्ति । अन्यः । वृजनेषु । विप्रः ॥ ३ ॥

हे भरद्वाज नमस्येभिः स्तुत्यैः शूषैः बलैः शूषमिति बलनामसु पाठात् सुम्नेभिः सुखैश्च सर्वैश्चकाना स्तुतौ कामयितः शब्दकर्मा तस्य लिटः कानचि रूपमिदं ता तौ इन्द्रावरुणौ गृणीहि स्तुहि । अन्यः तयोरन्यइन्द्रः वृत्रं वृत्रनामकमसुरं वज्रेण हन्ति । अन्योवरुणः विप्रः प्राज्ञः वृजनेषु स्तोतॄणामुपद्रवेषु रक्षितुं शवसा बलेन सिषक्ति संगच्छते ॥ ३ ॥

अथ चतुर्थी—

ग्नाश्चयन्नरश्चवावृधन्तविश्वेदेवासोनरांस्वगूर्ताः ।
प्रैभ्यइन्द्रावरुणामहित्वाद्यौश्चपृथिविभूतमुर्वी ॥ ४ ॥

ग्नाः । च । यत् । नरः । च । वावृधन्त । विश्वे । देवासः ।
नराम् । स्वऽगूर्ताः । प्र । एभ्यः । इन्द्रावरुणा । महिऽत्वा ।
द्यौः । च । पृथिवि । भूतम् । उर्वी इति ॥ ४ ॥

नरां नृणां मनुष्याणां मध्ये ग्नाश्च स्त्रियश्च मेना ग्ना इति स्त्रीणामिति यास्कवचनात्। नरश्च पुरुषाश्च विश्वे सर्वे देवासो देवाः देवास इत्यत्र पुमान् स्त्रियेत्येकशेषात् देव्यश्च देवाश्च देवास इति निर्देशः पुंवन्निर्देशः स्वगूर्ताः स्वयमुद्यताः यद्यदा ववृधन्त स्तुतिभिर्वर्धयन्ते। तदा हे इन्द्रावरुणौ महित्वा महत्वयुक्तौ एभ्यः स्तोतृभ्यः प्रभूतं प्रभवतं हे द्यौः पृथिवि च उभे उर्वी विस्तीर्णे युवां एभ्यः प्रभूतमित्यनुषंगः ॥ ४ ॥

अथ पंचमी–

स इत्सुदानुः स्ववाँ ऋतावेन्द्रा यो वां वरुण दाशति त्मन्।
इषा स द्विषस्तरेद्दास्वान्वंसद्रयिं रयिवतश्च जनान् ॥ ५ ॥ ११ ॥

सः। इत्। सुऽदानुः। स्वऽवान्। ऋतऽवा। इन्द्रा। यः।
वा। वरुणा। दाशति। त्मन्। इषा। सः। द्विषः। तरेत्।
दास्वान्। वंसत्। रयिम्। रयिऽवतः। च। जनान् ॥ ५ ॥ ११ ॥

हे इन्द्रा इन्द्रौ वरुणा हे वरुणौ इतरेतरयोगादुभयत्रद्विवचनप्रयोगः वरुणेत्यत्र संहितायां ह्रस्वश्छान्दसः वां युवाभ्यां यो यजमानः त्मन् आत्मनैव दाशति हवींषि ददाति। स इत् स एव सुदानुः शोभनदानो भवति। स्ववान् धनवांश्च ऋतावा यज्ञवांश्च भवति। किं च सः दास्वान् दानवान् द्विषो द्वेष्टॄन् इषा अन्नेन जयलब्धेन सह तरेत् प्राप्येत्। अपि च रयिं धनं रयिवतो धनवतो जनान् पुत्रांश्च वंसत् संभजेत् ॥ ५ ॥

॥ इति पंचमस्य प्रथमे एकादशो वर्गः ॥ ११ ॥

अथ षष्ठी–

यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम्।
अस्मे स इन्द्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः ॥ ६ ॥

यम्। युवम्। दाशुऽअध्वराय। देवा। रयिम्। धत्थः।
वसुऽमन्तम्। पुरुऽक्षुम्। अस्मे इति। सः। इन्द्रावरुणा।
अपि। स्यात्। प्र। यः। भनक्ति। वनुषाम्। अशस्तीः ॥ ६ ॥

१ नि० ३.२१।

देवा देवौ स्तूयमानौ हे इन्द्रावरुणौ युवं युवां दाश्वध्वराय दत्तहविष्काय वसुमन्तं धनानुबन्धिनं पुरुक्षुं बह्वन्नं पूर्णयशस्कं वा यं यादृशं रयिं धनं धत्थः प्रयच्छथः योपि च वनुषां हिंसकानां अशस्तीः प्रकीर्तीः शत्रुकृतान्ययशांसीत्यर्थः। प्रभनक्ति प्ररुजति। सतादृशोरयिः अस्मे अस्मासु स्यात् भूयात्॥ ६ ॥

अथ सप्तमी—

उ॒त नः॑ सु॒त्रात्रो॑ दे॒वगो॑पाः सू॒रिभ्य॑ इन्द्रावरुणा र॒यिः ष्या॑त्।
येषां॒ शुष्मः॒ पृत॑नासु सा॒ह्वान्प्र स॒द्यो द्यु॒म्ना ति॒रते॒ ततु॑रिः ॥ ७ ॥

उ॒त। नः॒। सु॒ऽत्रात्रः॑। दे॒वऽगो॑पाः। सू॒रिऽभ्यः॑। इ॒न्द्रा॒व॒रु॒णा॒।
र॒यिः। स्या॒त्। येषा॑म्। शुष्मः॑। पृत॑नासु। सा॒ह्वान्। प्र।
स॒द्यः। द्यु॒म्ना। ति॒रते॑। ततु॑रिः ॥ ७ ॥

उतापि च इन्द्रावरुणा हे इन्द्रावरुणौ सूरिभ्यः स्तोतृभ्यः नोस्मभ्यं सुत्रात्रः सुरक्षः देवगोपाः देवा गोपा गोप्तारो यस्य सतथाविधः रयिर्धनं स्यात् भूयात्। किं च येषामस्माकं शुष्मो बलं पृतनासु युद्धेषु साह्वान् शत्रूणामभिभविता ततुरिः हिंसकश्च सन् द्युम्ना यशांसि सद्यएव प्रतिरथे सम्यक्विस्तृणुयात्॥ ७ ॥

अथाष्टमी—

नू न॑ इन्द्रावरुणा गृणा॒ना पृ॒ङ्क्तं र॒यिं सौ॑श्रव॒साय॑ देवा।
इ॒त्था गृ॒णन्तो॑ म॒हिन॑स्य॒ शर्धो॒ऽपो न ना॒वा दु॑रि॒ता त॑रेम ॥ ८ ॥

नु। नः॒। इ॒न्द्रा॒व॒रु॒णा॒। गृ॒णा॒ना। पृ॒ङ्क्तम्। र॒यिम्। सौ॒श्र॒व॒साय॑।
दे॒वा॒। इ॒त्था। गृ॒णन्तः॑। म॒हिन॑स्य। शर्धः॑। अ॒पः। न। ना॒वा।
दुः॒ऽइ॒ता। त॒रे॒म ॥ ८ ॥

हे इन्द्रावरुणा इन्द्रावरुणौ गृणाना स्तूयमानौ युवां नोस्मभ्यं सौश्रवसाय सुश्रवसोभावः सौश्रवसं तस्मै सुश्रवस्त्वाय रयिं धनं नु क्षिप्रं पृंक्तं प्रयच्छतं। किं च देवा हे देवौ महिनस्य महतोर्युवयोः शर्धोबलं इत्था इत्थं गृणन्तः स्तुवन्तः वयं दुरिता दुरितानि नावा अपोन उदकानीव तरेम॥ ८ ॥

अथ नवमी—

प्रसम्राजेबृहतेमन्मनुप्रियमर्चदेवायवरुणायसप्रथः।
अयंयउर्वीमहिनामहिव्रतःक्रत्वाविभात्यजरोनशोचिषा ॥ ९ ॥

प्र। सम्ऽराजे। बृहते। मन्म। नु। प्रियम्। अर्च। देवाय।
वरुणाय। सऽप्रथः। अयम्। यः। उर्वी इति। महिना।
महिऽव्रतः। क्रत्वा। विऽभाति। अजरः। न। शोचिषा ॥ ९ ॥

हे स्तोतः सम्राजे आज्ञया राज्ञां शासकाय बृहते परिवृढाय देवाय द्योतमानाय वरुणाय प्रियं मनोहरं सप्रथः सर्वतः पृथु तथा च यास्कः—सप्रथाः सर्वतः पृथुरिति[1]। मन्म स्तोत्रं नु अद्य प्रार्च प्रोच्चारय अयं यः यो यं वरुणः महिना महिम्ना युक्तः महिव्रतोमहाकर्मा क्रत्वा प्रज्ञया च युक्तः शोचिषा तेजसा युक्तः अजरो न जरारहितश्च उर्वी विस्तीर्णे द्यावापृथिव्यौ विभाति विभासयति ॥ ९ ॥

अथ दशमी—

इन्द्रावरुणासुतपाविमंसुतंसोमंपिवतंमद्यंधृतव्रता।
युवोरथोअध्वरंदेववीतयेप्रतिस्वसरमुपयातिपीतये ॥ १० ॥

इन्द्रावरुणा। सुतऽपौ। इमम्। सुतम्। सोमम्। पिवतम्।
मद्यम्। धृतऽव्रता। युवोः। रथः। अध्वरम्। देवऽवीतये।
प्रति। स्वसरम्। उप। याति। पीतये ॥ १० ॥

इन्द्रावरुणा हे इन्द्रावरुणौ सुतपौ सुतस्य सोमस्य पातारौ युवां मद्यं मदकरं सुतमभिषुतमिमं सोमं पिवतं किं च धृतव्रता हे धृतकर्माणौ युवोः युवयोः रथः अध्वरमुद्दिश्य देववीतये देवानां पानार्थं पीतये युवयोरपि सोमपानार्थं स्वसरं मार्गं प्रत्युपयाति ॥ १० ॥

अथैकादशी—

इन्द्रावरुणामधुमत्तमस्यवृष्णःसोमस्यवृषणावृषेथाम्।
इदंवामन्धःपरिषिक्तमस्मेआसद्यास्मिन्बर्हिषिमादयेथाम् ॥११॥१२॥

---

1 नि० ६ ७.।

इन्द्रावरुणा । मधुमत्ऽतमस्य । वृष्णः । सोमस्य । वृषणा ।
आ । वृषेथाम् । इदम् । वाम् । अन्धः । परिऽसिक्तम् । अस्मे इति ।
आऽसद्य । अस्मिन् । बर्हिषि । मादयेथाम् ॥ ११ ॥ १२ ॥

हे इन्द्रावरुणा इन्द्रावरुणौ वृषणा कामानां वर्षितारौ युवां मधुमत्तमस्य अतिशयेन मधुमन्तं रसवन्तं वृष्णोवर्षितारं सोमस्य सोमं आवृषेथां अश्नीतं तथा च शतपथब्राह्मणं—यथाभागमावृषायध्वमिति । यथाभागमश्नीतेत्येवैतदाहेति । वां युवयोरर्थे इदमन्धः सोमरूपमन्नं अस्मे अस्माभिः परिषिक्तं पात्रेषु अतः आसद्योपविश्यास्मिन्बर्हिषि यज्ञे मादयेथां सोमपानेनेतिशेषः ॥ ११ ॥

॥ इति पंचमस्य मथमे द्वादशोवर्गः ॥ १२ ॥

संवांकर्मणेत्यष्टर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रावैष्णवं अनुक्रम्यते च—संवामष्टावैन्द्रावैष्णवमिति । उक्थे तृतीयसवनेच्छावाकशस्त्रे एतत्सूक्तं सूत्र्यते हि—संवांकर्मणेन्द्राविष्णूमदपतीमदानामिति याज्येति । सोमातिरेके प्रातःसवने नैमित्तिके शस्त्रे परिहिते सति गाणगारिमते संवामिति तस्य शस्त्रयाज्या सूत्रितं च—इन्द्राविष्णव्येति गाणगारिर्दैवतप्रधानत्वात् संवांकर्मणासमिषाहिनोमीति । सोमातिरेके माध्यंदिनसवने याविश्वासामित्येषा शस्त्रयाज्या सूत्रितं च—याविश्वासांजनितारामतीनामितियाज्येति । उक्थे तृतीयसवनेच्छावाकस्येन्द्राविष्णूमदपती इति शस्त्रयाज्या सूत्रंतूदाहृतं तृतीयसवनेच्छावाकस्येन्द्राविष्णूपिबतमितिप्रस्थितयाज्या सूत्रितंच इन्द्राविष्णूपिबतंमध्वोअस्येमंस्तोममर्हतेजातवेदसइति ।

तत्र प्रथमा—

संवांकर्मणासमिषाहिनोमीन्द्राविष्णूअपसस्पारेअस्य ।
जुषेथांयज्ञंद्रविणंचधत्तमरिष्टैर्नःपथिभिःपारयन्ता ॥ १ ॥

सम् । वाम् । कर्मणा । सम् । इषा । हिनोमि । इन्द्राविष्णू इति ।
अपसः । पारे । अस्य । जुषेथाम् । यज्ञम् । द्रविणम् । च ।
धत्तम् । अरिष्टैः । नः । पथिऽभिः । पारयन्ता ॥ १ ॥

हे इन्द्राविष्णू वां युवां कर्मणा स्तोत्रेण इषा हविषा च संहिनोमि सम्यक्प्रेरयामि । अप्नसः कर्मणः अस्य उक्थस्य पारे समाप्तौ यज्ञं जुषेथां सेवेथां । किं च अरिष्टैः अनुपद्रवैः पथिभिर्मार्गैः नोस्मान् पारयन्ता पारं नयन्तौ युवां द्रविणं धनं धत्तमस्मभ्यं दत्तं ॥ १ ॥

अथ द्वितीया—

याविश्वासांजनितारांमतीनामिन्द्राविष्णूंकलशासोमधानां ।
प्रवांगिरःशस्यमानाअवन्तुप्रस्तोमासोगीयमानासोअर्कैः ॥ २ ॥

या । विश्वासाम् । जनितारा । मतीनाम् । इन्द्राविष्णू इति । कलशा । सोमऽधाना । प्र । वाम् । गिरः । शस्यमानाः । अवन्तु । प्र । स्तोमासः । गीयमानासः । अर्कैः ॥ २ ॥

या यौ प्रसिद्धाविन्द्राविष्णू विश्वासां सर्वासां मतीनां स्तुतीनां जनितारा जनितारौ जनजनने इत्यस्माद्धातोस्तृचीदं रूपं यद्वा जनी प्रादुर्भावे इत्यस्माद्धातोरेव तृचि जनितामंत्रे इति निपातनाण्णिलोपः कलशा कलशौ सोमधाना सोमस्य निधानभूतौ च स्यातां । अथ प्रत्यक्षस्तुतिः हे इन्द्राविष्णू वां युवां शस्यमाना उच्चार्यमाणाः शस्त्ररूपाः गिरो वाचः प्रावन्तु प्राप्नुवन्तु अर्कैः स्तोतृभिः गीयमानासः गीयमानाः स्तोमासः स्तोमाः स्तोत्राणि च प्रावन्तु प्राप्नुवन्तु ॥ २ ॥

अथ तृतीया—

इन्द्राविष्णूमदपतीमदानामासोमंयातंद्रविणोदधाना ।
संवामञ्जन्त्वक्तुभिर्मतीनांसंस्तोमासःशस्यमानासउक्थैः ॥ ३ ॥

इन्द्राविष्णू इति । मदपती इति मदऽपती । मदानाम् । आ । सोमम् । यातम् । द्रविणो इति । दधाना । सम् । वाम् । अञ्जन्तु । अक्तुऽभिः । मतीनाम् । सम् । स्तोमासः । शस्यमानासः । उक्थैः ॥ ३ ॥

हे इन्द्राविष्णू मदानां सोमानां मदपती स्वामिनौ मदपती इत्यत्र मदशब्दोनुवादः द्रविणो द्रविणानि धनान्यपि द्रविणा उ इति पदद्वयमेकीभूय द्रविणो इति निष्पन्नं पदं । दधाना ददानौ युवां सोममभि आयातं मतीनां स्तोतॄणां स्तोमासः स्तोत्राणि उक्थैः शस्त्रैः सार्धं शस्यमानासः उच्चार्यमाणाः वां युवां अक्तुभिस्तेजोभिः समजन्तु समर्धयन्तु संसमिति द्विरुक्तिरादरार्था ॥ ३ ॥

अथ चतुर्थी—

आवामश्वासोअभिमातिषाहइन्द्राविष्णूसधमादोवहन्तु ।
जुषेथांविश्वाहवनामतीनामुपब्रह्माणिशृणुतंगिरोमे ॥ ४ ॥

आ । वाम् । अश्वासः । अभिमातिऽसहः । इन्द्राविष्णू इति ।
सधऽमादः । वहन्तु । जुषेथाम् । विश्वा । हवना । मतीनाम् । उप ।
ब्रह्माणि । शृणुतम् । गिरः । मे ॥ ४ ॥

हे इन्द्राविष्णू वां युवां अभिमातिषाहः अभिमातीनां हिंसकानां अभिभवितारः सधमादः सहमाद्यन्तः अश्वासः अश्वाः आवहन्तु मतीनां स्तोतॄणां विश्वा विश्वानि हवना हवनानि स्तोत्राणि जुषेथां सेवेथां तदर्थं मे मदीयानि ब्रह्माणि स्तोत्राणि गिरः शस्त्ररूपा वाचश्च उपशृणुतं ॥ ४ ॥

अथ पंचमी—

इन्द्राविष्णूतत्पनयाय्यंवांसोमस्यमदउरुचक्रमाथे ।
अकृणुतमन्तरिक्षंवरीयोप्रथतंजीवसेनोरजांसि ॥ ५ ॥

इन्द्राविष्णू इति । तत् । पनयाय्यम् । वाम् । सोमस्य । मदे । उरु ।
चक्रमाथे इति । अकृणुतम् । अन्तरिक्षम् । वरीयः । अप्रथतम् ।
जीवसे । नः । रजांसि ॥ ५ ॥

हे इन्द्राविष्णू वां युवयोः तत्कर्म पनयाय्यं स्तुत्यं किं तत्कर्मेत्यतआह सोमस्य मदे सति यदुरु विस्तीर्णं चक्रमाथे विचक्रमाथे । यद्यपि विष्णोरेव विक्रमः तथाप्येकार्थत्वात् उभयोरित्युच्यते यच्चान्तरिक्षं वरीयः उरुतरं अकृणुतं अकुरुतं यदपि च रजांसि लोकान् सर्वान् लोकारजांस्युच्यन्तइति यास्कः[1] । नोस्माकं जीवनाय अप्रथतं अप्रथयतं ॥ ५ ॥

अथ षष्ठी—

इन्द्राविष्णूहविषावावृधानाग्राद्वानानमसारातहव्या ।
घृतासुतीद्रविणंधत्तमस्मेसमुद्रस्थःकलशःसोमधानः ॥ ६ ॥

---

१ नि० ४. १९ ।

इन्द्रा॑विष्णू॒ इति॑ । ह॒विषा॑ । व॒वृ॒धा॒ना । अग्र॑ऽअद्वाना । नम॑सा ।
रा॒तऽह॑व्या । घृ॒तासु॑ती॒ इति॑ घृ॒तऽआसु॑ती । द्रवि॑णम् । ध॒त्त॒म् ।
अ॒स्मे इति॑ । स॒मु॒द्रः । स्थः॒ । क॒ल॒शः । सोम॒ऽधानः॑ ॥ ६ ॥

घृतासुती घृतान्नाविन्द्राविष्णू युवां हविषा सोमेन वावृधाना वर्धमानौ अग्राद्वाना सोमाग्रस्य शुक्रस्यात्तारौ नमसा नमस्कारेण रातहव्या दत्तहविष्कौ यजमानैरस्मे अस्मभ्यं द्रविणं धनं धत्तं मपच्छतं किं च युवां समुद्रः उदधिरिव स्थो भवथः । मतः सोमधानः सोमनिधानकलशोभवथः ॥ ६ ॥

अथ सप्तमी–

इन्द्रा॑विष्णू॒पिब॑तं॒मध्वो॑अ॒स्यसोम॑स्यदस्राज॒ठरं॑पृणेथाम् ।
आवा॒मन्धां॑सिमदि॒राण्य॑ग्म॒न्नुप॒ब्रह्मा॑णिशृणु॒तंहवं॑मे ॥ ७ ॥

इन्द्रा॑विष्णू॒ इति॑ । पिब॑तम् । मध्वः॑ । अ॒स्य । सोम॑स्य । द॒स्रा॒ ।
ज॒ठर॑म् । पृ॒णे॒था॒म् । आ । वा॒म् । अन्धां॑सि । म॒दि॒राणि॑ ।
अ॒ग्म॒न् । उप॑ । ब्रह्मा॑णि । शृ॒णु॒त॒म् । हव॑म् । मे॒ ॥ ७ ॥

हे दस्रा दर्शनीयाविन्द्राविष्णू युवां मध्वः अस्य मदकरं सोमस्य सोमं पिवतं किं च जठरं उदरं पृणेथां सोमेन पूरयेथां । हे इन्द्राविष्णू वां युवां मदिराणि मदकराणि अंधांसि सोमात्मकान्यन्नानि आग्मन् अभिगच्छन्तु । मे मदीयानि ब्रह्माणि स्तोत्राणि हवं मदीयमाह्वानं चोपशृणुतं ॥ ७ ॥

अथाष्टमी–

उ॒भाजि॑ग्यथु॒र्नप॑राजयेथे॒नप॑राजिग्येकत॒रश्च॒नैनोः॑ ।
इन्द्र॑श्चविष्णो॒यदप॑स्पृधेथांत्रे॒धास॒हस्रं॒वितदैर॑येथाम् ॥ ८ ॥ १३ ॥

उ॒भा । जि॒ग्य॒थुः॒ । न । परा॑ । ज॒ये॒थे॒ इति॑ । न । परा॑ । जि॒ग्ये॒ ।
क॒त॒रः । च॒न । ए॒नोः॒ । इन्द्रः॑ । च॒ । विष्णो॒ इति॑ । यत् ।
अप॑स्पृधेथाम् । त्रे॒धा । स॒हस्र॑म् । वि । तत् । ऐर॑येथा॒म् ॥ ८ ॥ १३ ॥

हे इन्द्राविष्णू उभा उभौ युवां जिग्यथुः शत्रूनजैष्टं नपराजयेथे न पुनः कदाचन पराजयेथे एनोरेनयोर्युवयोर्मध्ये कतरश्चन एकतरोपि न पराजिग्ये न पराजैष्ट हे विष्णो इन्द्रश्च त्वं च युवां यत् यद्वस्तु प्रत्यपस्पृधेथां असुरैः सहास्पृधेथां त्रेधा लोकवेदवागात्मना त्रिधास्थितं सहस्रममितं च वितैरयेथां व्यक्रमेथामित्यर्थः । तथा च ब्राह्मणं—उभाजिग्यथुरित्यच्छावाकस्योभीहितो जिग्यथुर्नपराजयेथे नपराजिग्यइतिनहितयोः कतरश्चनपराजिग्यइन्द्रश्चविष्णोयदपस्पृधेथां त्रेधासहस्रंवितदैरयेथामितीन्द्रश्चह वैविष्णुश्चासुरैर्युयुधातेतान्हस्मजित्वोचतुः कल्पामहाइतितेहतथेत्यसुराऊचुः सोब्रवीदिन्द्रोयावदेवायं विष्णुस्त्रिर्विक्रमते तावदस्माकमथयुष्माकमितरदितिसइमान्लोकान्विचक्रमेथोवेदानथोवाचंतदाहुः किंतत्सहस्रमितीमेलोकाइमे वेदाअथोवागितिब्रूयादैरयेथामैरयेथामिति । यद्वा तत्सहस्रं गवां सहस्रं त्रेधा व्यैरयेथामित्यर्थः ॥८॥

॥ इति पंचमस्य प्रथमे त्रयोदशो वर्गः ॥ १३ ॥

घृतवतीभुवनानामितिषळ्चंनवमंसूक्तं भरद्वाजस्यार्षं जागतं द्यावापृथिवीदेवताकं तथा चानुक्रम्यते—घृतवतीषड्द्यावापृथिवीयं जागतमिति आभिप्लविके पंचमेहनि वैश्वदेवशस्त्रे आद्यस्तृचोद्यावापृथिव्यनिविद्धानार्थः सूत्रितंच—घृतवती भुवनानामभिश्रियेन्द्रऋभुभिर्वाजवद्भिरिति तृचाविति । बृहस्पतिसवे वैश्वदेवशस्त्रे एषतृचः सूत्रितं च—आभिप्लविके तृतीयेहनि वैश्वदेवशस्त्रे घृतेनद्यावापृथिवी इति तिस्रोद्यावापृथिवीयनिविद्धानार्थाः सूत्रितंच—घृतेनद्यावापृथिवीइति तिस्रोनश्योजातइति ।

तत्र प्रथमा—

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ १ ॥

घृतवती इति घृतऽवती । भुवनानाम् । अभिऽश्रिया । उर्वी इति । पृथ्वी इति । मधुदुघे इति मधुऽदुघे । सुऽपेशसा द्यावापृथिवी इति । वरुणस्य । धर्मणा । विस्कभिते इति विऽस्कभिते । अजरे इति । भूरिऽरेतसा ॥ १ ॥

१ ऐ० ब्रा० ६. १५ ।

द्यावापृथिवी हे द्यावापृथिव्यौ घृतवती दीप्तिमत्यौ उदकवत्यौ वा वर्न घृतमित्युदकनामसु पाठात् भवतइति शेषः भुवनानां भूतानामभिश्रिया अभिश्रयणीये भवत इति सर्वत्रानुसंबन्धनीयं उर्वी विस्तीर्णे पृथ्वी बहुकार्यरूपेण प्रथिते च मधुदुघे मधुनउदकस्य दोग्ध्यौ सुपेशसा सुरूपे वरुणस्य सर्वस्य नियामकस्य धर्मणा धारणेन विष्कभिते पृथग्धारिते अजरे नित्ये भूरिरेतसा बहुरेतस्के बहुकार्ये वा भवतः । अत्र साक्षात् द्यावापृथिव्योः स्तुतिप्रसंगात् वरुणस्येति द्रष्टव्यं ॥ १ ॥

अथ द्वितीया—

असंश्चन्तीभूरिधारेपयस्वतीघृतंदुहातेसुकृतेशुचिव्रते ।
राजन्तीअस्यभुवनस्यरोदसीअस्मेरेतःसिञ्चतंयन्मनुर्हितम् ॥२॥

असंश्चन्ती इति । भूरिधारे इति भूरिऽधारे । पयस्वती इति । घृतम् । दुहाते इति । सुऽकृते । शुचिव्रते इति शुचिऽव्रते । राजन्ती इति । अस्य । भुवनस्य । रोदसी इति । अस्मे इति । रेतः । सिञ्चतम् । यत् । मनुःऽहितम् ॥ २ ॥

असश्चन्ती असज्यमाने व्युदस्यंत्यौवा भूरिधारे बहुधारे दिवो वृष्टिधाराः पृथिव्याश्चाहुत्युद्भूतरसधाराः एवमुभयोरपि बहुधारत्वं पयस्वती उदकवत्यौ तथा च यास्कः—असज्यमाने इतिवाव्युदस्यंत्याविति वा बहुधारे उदकवत्याविति[1] । शुचिव्रते शुचिक्रिये द्यावापृथिव्यौ सुकृते शोभनकारिणे यजमानाय घृतं सस्यादिसमृद्धिहेतु उदकं दुहाते । अथ प्रत्यक्षस्तुतिः रोदसी हे द्यावापृथिव्यौ अस्य भुवनस्य भूतजातस्य राजन्ती ईशाते युवां अस्मै अस्मासु रेतः प्रजननसमर्थं वीर्यं सिंचतं यद्रेतोमनुर्हितं मनुष्येभ्यो हितं ॥ २ ॥

अथ तृतीया—

योवांमृजवेक्रमणायरोदसीमर्तोददाशधिषणेससाधति ।
प्रप्रजाभिर्जायतेधर्मणस्परियुवोःसिक्ताविषुरूपाणिसव्रता ॥३॥

---

१ नि० ५. २ ।

यः । वाम् । ऋजवे । क्रमणाय । रोदसी इति । मर्तः । ददाश ।
धिषणे इति । सः । साधति । प्र । प्रऽजाभिः । जायते । धर्मणः ।
परि । युवोः । सिक्ता । विषुऽरूपाणि । सऽव्रता ॥ ३ ॥

धिषणे धृष्टे सर्वस्य भुवनस्य निवासभूते वा हे रोदसी वां युवाभ्यां यो मर्तो मर्त्यः ऋजवे क्रमणाय युवयोः सुखगमनाय ददाश हवींषि ददाति स मर्त्यः साधति कामान् साधयति । किं च प्रजाभिः पुत्रपौत्रादिभिः प्रजायते प्रवृद्धो भवति।धर्मणः कर्मणः परिउपरि युवोर्युवयोः सिक्ता सिक्तानि रेतांसि विषुरूपाणि नानावर्णानि सव्रता समानकर्माणि भूतानि जायन्ते ॥३॥

अथ चतुर्थी—

घृतेनद्यावापृथिवीअभीवृतेघृतश्रियाघृतपृचाघृतावृधा ।
उर्वीपृथ्वीहोतृवूर्येपुरोहितेतेइद्विप्राईळतेसुम्नमिष्टये ॥ ४ ॥

घृतेन ।द्यावापृथिवी इति । अभिवृते इत्यभिऽवृते । घृतऽश्रिया । घृतऽपृचा ।
घृतऽवृधा । उर्वी इति । पृथ्वी इति । होतृऽवूर्ये । पुरोहिते इति पुरःऽहिते । ते इति । इत् । विप्राः । ईळते । सुम्नम् । इष्टये ॥ ४ ॥

द्यावापृथिवी द्यावापृथिव्यौ घृतेनोदकेन अभिवृते आवृते भवतः घृतश्रिया उदकं श्रयंत्यौच घृतपृचा घृतसंपृक्तेच घृतवृधा घृतं वर्धयंत्यौ च उर्वी विस्तीर्णे पृथ्वी प्रथिते च भवतः होतृवूर्ये यज्ञे पुरोहिते यजमानैः पुरस्कृते च भवतः विप्राः प्राज्ञाः स्तोतारः ते इत् द्यावापृथिव्यावेव इष्टये यज्ञाय होत्रा इष्टिरिति यज्ञनामसु पाठात् सुम्नं सुखं ईळते याचन्ते। सुखे सति हि यागाः प्रवर्तन्ते ॥ ४ ॥

अथ पंचमी—

मधुनोद्यावापृथिवीमिमिक्षतांमधुश्चुतांमधुदुघेमधुव्रते ।
दधानेयज्ञंद्रविणंचदेवतामहिश्रवोवाजमस्मेसुवीर्यम् ॥ ५ ॥

मधु । नः । द्यावापृथिवी इति । मिमिक्षताम् । मधुऽश्चुता ।
मधुदुघे इति मधुऽदुघे । मधुव्रते इति मधुऽव्रते । दधाने इति । यज्ञम् ।
द्रविणम् । च । देवता । महि । श्रवः । वाजम् । अस्मे इति ।सुऽवीर्यम्॥५॥

मधुश्चुतः उदकस्य क्षारयित्र्यौ मधुदुघे उदकदोग्ध्र्यौ मधुमते उदकार्थकर्माणौ देवता देवताभूते अस्मे अस्मासु यज्ञं द्रविणं धनं च महि महत् श्रवोयशः वाजमन्नं सुवीर्यं सुवीरत्वं च दधाने ददत्यौ द्यावापृथिवी द्यावापृथिव्यौ नोस्मान् मधु मधुना तृतीयैकवचनस्य लुक् मिमिक्षतां सिंचतां ॥ ५ ॥

अथ षष्ठी—

ऊर्जंनोद्यौश्चपृथिवीचपिन्वतांपितामाताविश्वविदासुदंससा।
संरराणेरोदसीविश्वशंम्भुवासनिंवाजंरयिमस्मेसमिन्वताम् ॥६॥१४॥

ऊर्जम् । नः । द्यौः । च । पृथिवी । च । पिन्वताम् । पिता । माता । विश्वऽविदा । सुऽदंससा । संरराणे इति सम्ऽरराणे । रोदसी इति । विश्वऽशम्भुवा । सनिम् । वाजम् । रयिम् । अस्मे इति । सम् । इन्वताम् ॥ ६ ॥ १४ ॥

पिता वर्षस्य सेक्तृत्वेन पितृभूता द्यौश्च माता धारकत्वेन मातृभूता पृथिवी च उभे नः अस्मभ्यं ऊर्जमन्नं पिन्वतां यच्छतां । किंच विश्वविदा विश्वं जानंत्यौ विश्वस्य वेदयित्र्यौ वा सुदंससा सुकर्माणौ संरराणे परस्परोपकार्योपकारकभावेन सहरममाणे विश्वशंभुवा सर्वस्य भावयित्र्यौ रोदसी द्यावापृथिव्यौ अस्मे अस्मासु सनिं संभजनीयं पुत्रादिकं वाजं बलं रयिं धनं च समिन्वतां संप्रेरयतां ॥ ६ ॥

॥ इति पंचमस्य प्रथमे चतुर्दशोवर्गः ॥ १४ ॥

उदुष्यदेवइतिषळृचं दशमं सूक्तं भरद्वाजस्यार्षं सवितृदेवताकं आद्यास्तिस्रोजगत्यः चतुर्थ्याद्यास्तिस्रस्त्रिष्टुभः तथा चानुक्रान्तं—उदुष्यःसावित्रं त्रिजगत्यन्तमिति सूक्तविनियोगोलैंगिकः चातुर्विंशिकेहनि वैश्वदेवशस्त्रे आद्यस्तृचः सावित्रसूक्तस्थाने आवपनीयः सूत्रितं च—उदुष्यदेवः सविता हिरण्ययेति तिस्रः तेहिद्यावापृथिवीति । बृहस्पतिसवेपि वैश्वदेवशस्त्रे सावित्रसूक्तस्थाने एषतृचः सूत्रितं च उदुष्यदेवः सविताहिरण्ययेत्यनूचिष्ठेदिति । व्यूळ्हे पंचमेहनि वैश्वदेवशस्त्रे उदुष्यदेवः सविता दमूनाइति तृचः सावित्रनिविद्धानार्थः सूत्रितं च—उदुष्यदेवःसवितादमूनाइति तिस्रइति । वैश्वदेवपर्वणि सावित्रद्वादशकपालस्य वाममद्येतियाज्या सूत्रितं च—वाममद्यसवितर्वाममश्वः पूषन्तवव्रतेवयमिति ।

तत्र प्रथमा—

उदुष्यदेवःसविताहिरण्ययाबाहूअयंस्तसवनायसुक्रतुः ।
घृतेनपाणीअभिप्रुष्णुतेमखोयुवासुदक्षोरजसोविधर्मणि ॥ १ ॥

उत् । ऊँ इति । स्यः । देवः । सविता । हिरण्ययां । बाहू इति ।
अयंस्त । सवनाय । सुऽक्रतुः । घृतेन । पाणी इति । अभि ।
प्रुष्णुते । मखः । युवा । सुऽदक्षः । रजसः । विऽधर्मणि ॥ १ ॥

देवो द्योतमानः सुक्रतुः सुकर्मा स्यः सः प्रसिद्धः सविता हिरण्यया हिरण्मयौ आत्मीयौ बाहू सवनाय सुवनाय दानाय वा उदयंस्त उद्यच्छति किंच मखो मंहनीयो युवा नित्यतरुणः सुदक्षः सुप्रज्ञः रजसो लोकस्योदकस्यवा विधर्मणि विधारणे स्थितः घृतेनोदकेन पूर्णौ स्वौ पाणी अभिप्रुष्णुते अभिप्रेरयति ॥ १ ॥

अथ द्वितीया—

देवस्यवयंसवितुःसवीमनिश्रेष्ठेस्यामवसुनश्चदावने ।
योविश्वस्यद्विपदोयश्चतुष्पदोनिवेशनेप्रसवेचासिभूमनः ॥ २ ॥

देवस्य । वयम् । सवितुः । सवीमनि । श्रेष्ठे । स्याम । वसुनः ।
च । दावने । यः । विश्वस्य । द्विऽपदः । यः । चतुःऽपदः ।
निऽवेशने । प्रऽसवे । च । असि । भूमनः ॥ २ ॥

तस्य देवस्य सवितुः प्रेरकस्य सवीमनि प्रसवे अनुज्ञाने तथा च यास्कः—सवीमनिप्रसवेइतिश्रेष्ठे । अतिशयेन प्रशस्ते वसुनो धनस्य दावने दाने च वयं स्याम समर्था भूयास्म यस्त्वं विश्वस्य सर्वस्य द्विपदोनिवेशने स्थितो प्रसवे च स्वतंत्रोसि यस्त्वं भूमनो भूरेश्चतुष्पदोनिवेशने प्रसवे च स्वतंत्रोसि ॥ २ ॥

---

१ नि० ६. ७. ।

अथ तृतीया–

अदब्धेभिःसवितःपायुभिष्ट्वंशिवेभिरद्यपरिपाहिनोगयम् ।
हिरण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नोअघशंसईशत ॥ ३ ॥

अदब्धेभिः । सवितरिति । पायुऽभिः । त्वम् । शिवेभिः । अद्य ।
परि । पाहि । नः । गयम् । हिरण्यऽजिह्वः । सुवितायं । नव्यसे ।
रक्ष । माकिः । नः । अघऽशंसः । ईशत ॥ ३ ॥

हे सवितः अदब्धेभिः अहिंसितैः पायुभिः तेजोभिः रक्षणसाधनैर्वा शिवेभिः सुखकारिभिः नोस्माकं गयं गृहं धनं वा गयः छदरइति गृहनामसु मीढ्हं गयइति धननामसु पाठात् अद्य परिपाहि रक्ष । हिरण्यजिह्वो हितरमणीयवाक् त्वं तथाचयास्कः–हिरण्यंकस्मादित्युपक्रम्य हितरमणंभंवतीतिवेति । सुविताय सुखाय नव्यसे नवतराय भव रक्ष अस्मान्पालय च नोस्माकमघ शंसः अनर्थमाशंसमानः शत्रुः माकिरीशत मेशत ॥ ३ ॥

अथ चतुर्थी–

उदुष्यदेवःसवितादमूनाहिरण्यपाणिःप्रतिदोषमस्थात् ।
अयोहनुर्यजतोमन्द्रजिह्वआदाशुषेसुवतिभूरिवामम् ॥ ४ ॥

उत् । ऊँ इति । स्यः । देवः । सविता । दमूनाः । हिरण्यऽपाणिः ।
प्रतिऽदोषम् । अस्थात् । अयःऽहनुः । यजतः । मन्द्रऽजिह्वः । आ ।
दाशुषे । सुवति । भूरि । वामम् ॥ ४ ॥

देवो द्योतमानः दमूनाः दममनाः दानमनावा तथा च यास्कः–दमूनादममनावा दानमनावा दान्तमनावेति । हिरण्यपाणिः हिरण्मयपाणिः अयोहनुः हिरण्मयहनुः रुक्मं अय इतिहिरण्यनामसु पाठात् यजतो यष्टव्यः मन्द्रजिह्वः मोदमानवाक् स्यः सः सविता प्रतिदोषं प्रतिरात्रं रात्रेरवसाने उदस्थात् उत्तिष्ठतु यो दाशुषे यजमानाय महं भूरि प्रभूतं वामं वननीयं संभजनीयमन्नं वामं वननीयमिति यास्कः। आसुवति प्रेरयति ॥ ४ ॥

---

१ नि० २. १०. । २ नि० ४. ४ । ३ नि० ६. ३१. ।

अथ पञ्चमी–

उदूँअयाँउपवक्तेवबाहूहिरण्ययासवितासुप्रतीका ।
दिवोरोहांस्यरुहत्पृथिव्याअरीरमत्पतयत्कच्चिदभ्वम् ॥ ५ ॥

उत् । ऊँ इति । अयान् । उपवक्ताऽइव । बाहू इति । हिरण्ययां ।
सविता । सुऽप्रतीका । दिवः । रोहांसि । अरुहत् । पृथिव्याः ।
अरीरमत् । पतयत् । कत् । चित् । अभ्वम् ॥ ५ ॥

सविता उपवक्तेव अस्माकमधिवक्तेव हिरण्यया हिरण्मयौ सुप्रतीका शोभनावयवौ बाहू उदयान् उद्यच्छतुयोर्य पृथिव्याः पृथिवीपर्यन्तात् दिवोन्तरिक्षस्य रोहांसि उच्छ्रितप्रदेशान् अरुहत् रोहति पतयत् गच्छत् कच्चित् यत्किंचिदभ्वं महत् सर्वं वस्तुजातं तिरोहितं अरीरमत् रमयति च ॥ ५ ॥

अथ षष्ठी–

वाममद्यसवितर्वाममुश्वोदिवेदिवेवाममस्मभ्यंसावीः ।
वामस्यहिक्षयस्यदेवभूरेरयाधियावामभाजःस्याम ॥ ६ ॥ १५ ॥

वामम् । अद्य । सवितः । वामम् । ऊँ इति । श्वः । दिवेऽदिवे ।
वामम् । अस्मभ्यम् । सावीः । वामस्य । हि । क्षयस्य ।
देव । भूरेः । अया । धिया । वामऽभाजः । स्याम ॥ ६ ॥ १५ ॥

हे सवितः अस्मभ्यं वामं धनं अद्य सावीः सुव श्वश्च वामं धनं प्रसुव किं बहूक्त्या दिवेदिवे प्रतिदिनं वामं धनं प्रसुव हे देव हि यस्मात् क्षयस्य निवासभूतस्य भूरेः प्रभूतस्य वामस्य दातासि अतो वयं अया अनया धिया स्तुत्या वामभाजो धनवन्तः स्याम भूयास्म उ इति पूरणः ॥ ६ ॥

॥ इति पंचमस्य प्रथमे पंचदशोवर्गः ॥ १५ ॥

इन्द्रासोमामहीतिपंचर्चमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं इंद्रासोमदेवताकं अनुक्रम्यते च–इन्द्रासोमापंचेन्द्रासोममिति सूक्तविनियोगोलैंगिकः ।

तत्र प्रथमा—

इन्द्रासोमामहितद्वांमहित्वंयुवंमहानिप्रथमानिचक्रथुः।
युवंसूर्यंविविदथुर्युवंस्व१र्विश्वातमांस्यहतंनिदश्च ॥ १ ॥

इन्द्रासोमा। महि। तत्। वाम्। महिऽत्वम्। युवम्। महानि।
प्रथमानि। चक्रथुः। युवम्। सूर्यम्। विविदथुः। युवम्।
स्वः। विश्वा। तमांसि। अहतम्। निदः। च ॥ १ ॥

इन्द्रासोमा हे इन्द्रासोमौ वां युवयोः तन्महित्वं महत्त्वं महि महत्। किंतदित्यतआह युवं युवां महानि महान्ति प्रथमानि प्रतमानि मुख्यानि वा भूतानि प्रथमइति मुख्यनामप्रतमो भवतीतियास्कः। चक्रथुः अकार्ष्ट। किंच युवं युवां सूर्यं विविदथुः अलंभयतं चजनान् युवं युवां स्वरुदकं च विविदथुः हेम स्वरित्युदकनामसु पाठात् अपि च विश्वा विश्वानि तमांसि निदश्च निन्दितृनसुरांश्च अहतं अहिंस्तम् ॥ १ ॥

अथ द्वितीया—

इन्द्रासोमावासयथमुषासमुत्सूर्यंनयथोज्योतिषासह।
उपद्यांस्कम्भथुःस्कम्भनेनाप्रथतंपृथिवींमातरंवि ॥ २ ॥

इन्द्रासोमा। वासयथः। उषसम्। उत्। सूर्यम्। नयथः।
ज्योतिषा। सह। उप। द्याम्। स्कम्भथुः। स्कम्भनेन।
अप्रथतम्। पृथिवीम्। मातरम्। वि ॥ २ ॥

इन्द्रासोमा हे इन्द्रासोमौ उषसं वासयथः विवासयथः उषसं व्युच्छन्तीं कारयथ इत्यर्थः। किं च सूर्यं ज्योतिषा तेजसा सह उन्नयथः अपि च द्यां दिवं स्कंभनेन स्तंभनहेतुनान्तरिक्षेण मध्ये स्थापितेन उपस्कंभथुः अस्तंभयतं मातरं विश्वस्य मातृभूतां पृथिवीं व्यप्रथतं व्यप्रथयतम् ॥ २ ॥

इन्द्रासोमौ । अहिम् । अपः । परिऽस्थाम् । हथः । वृत्रम् । अनु । वाम् । द्यौः । अमन्यत । प्र । अर्णांसि । ऐरयतम् । नदीनाम् । आ । समुद्राणि । पप्रथुः । पुरूणि ॥ ३ ॥

हे इन्द्रासोमौ अहिं जगत आहन्तारं अपोमेघस्थान्युदकानि परिष्ठां परिवृत्यस्थितं वृत्रं असुरं हथः हतं तदानीं द्यौर्वां युवां अन्वमन्यत किं च नदीनां अर्णांस्युदकानि प्रैरयतं पुरूणि बहुनि तुवि पुर्विति बहुनामसु पाठात् समुद्राणि उदकस्थानानि आपप्रथुः उदकैरापूरयतं च । अथवा समुन्दन्तीति उदकान्येव समुद्राणि तानि रसेनापूरयतमित्यर्थः तथा च यास्कः—समुद्रः कस्मात्समुद्द्रवंत्यस्मादापः समभिद्रवंत्येनमापःसंमोदन्तेऽस्मिन्भूतानिसमुद्रकोभवतिसमुनत्तीतिवेति[1] ॥ ३ ॥

अथ चतुर्थी—

इन्द्रासोमापक्वमामास्वन्तर्निगवामिद्दधथुर्वक्षणासु ।
जगृभथुरनेपिनद्धमासुरुशच्चित्रासुजगतीष्वन्तः ॥ ४ ॥

इन्द्रासोमा । पक्वम् । आमासु । अन्तः । नि । गवाम् । इत् । दधथुः । वक्षणासु । जगृभथुः । अनपिऽनद्धम् । आसु । रुशत् । चित्रासु । जगतीषु । अन्तरिति ॥ ४ ॥

इन्द्रासोमा हे इन्द्रासोमौ आमासु अपक्वासु गवां वक्षणासु ऊधःसु अन्तर्मध्ये पक्वं पयो निदधुः । किं च चित्रासु नानावर्णासु आसु जगतीषु गोषु इळा जगतीति गोनामसु पाठात् अन्तर्मध्ये अनपिनद्धं केनाप्यबद्धं रुशत् शुक्लवर्णं पयोजगृभथुः यथा पृथिव्यां स्वयं न क्षरन्ति तथा धारितवन्तावित्यर्थः । इदिति पूरणः ॥ ४ ॥

अथ पंचमी—

इन्द्रासोमायुवमङ्गतरुत्रमपत्यसाचंश्रुत्यंरराथे ।
युवंशुष्मंनर्यंचर्षणिभ्यःसंविव्यथुःपृतनाषाहमुग्रा ॥ ५ ॥ १६ ॥

[1] नि० २. १०.

इन्द्रासोमा । युवम् । अङ्ग । तरुत्रम् । अपत्यऽसाचम् । श्रुत्यम् । रराथे इति । युवम् । शुष्मम् । नर्यम् । चर्षणिऽभ्यः । सम् । विव्यथुः । पृतनाऽसहम् । उग्रा ॥ ५ ॥ १६ ॥

इन्द्रासोमा हे इन्द्रासोमौ युवं युवां तरुत्रं तारकं अपत्यसाचं संतानयुक्तं श्रुत्यं श्रवणीयं रयिं धनं अंग क्षिप्रं रराथे अस्मभ्यं धत्थः किंच उग्रा हे उद्गूर्णाविन्द्रासोमौ युवं युवां नर्यं नृभ्योहितं पृतनासहं शत्रुसैन्याभिभावुकं शुष्मं बलं चर्षणिभ्योमनुष्येभ्यः कृष्टयः चर्षणय इतिमनुष्यनामसु पाठात् संविव्यथुः समतनुतं परिवेष्टयथोवा ॥ ५ ॥

॥ इति पंचमस्य प्रथमे षोडशोवर्गः ॥ १६ ॥

योअद्रिभिदितिद्वादशर्चंसूक्तं बार्हस्पत्यं भरद्वाजस्यार्षं त्रैष्टुभं तथा चानुक्रम्यते—योअद्रिभिद्द्वादशबार्हस्पत्यमिति आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे स्तोमातिशंसनार्थमिदं सूक्तं सूत्र्यते हि योअद्रिभिद्यस्तेदिवइति सूक्ते इति । वाजपेये बार्हस्पत्ये चरौ बृहस्पतिः समजयद्वसूनि त्वामीळेअजिरंदूत्यायेति ।

तत्र प्रथमा—

योअद्रिभित्प्रथमजाऋतावाबृहस्पतिराङ्गिरसोहविष्मान् । द्विबर्हज्मापाघर्मसत्पितानआरोदसीवृषभोरोरवीति ॥ १ ॥

यः । अद्रिऽभित् । प्रथमऽजाः । ऋतऽवा । बृहस्पतिः । आङ्गिरसः । हविष्मान् । द्विबर्हऽज्मा । प्राघर्मऽसत् । पिता । नः । आ । रोदसी इति । वृषभः । रोरवीति ॥ १ ॥

योबृहस्पतिः अद्रिभित् पणिभिर्विरचितानां शिलोच्चयानां भेत्ता मेघानां विदारको वा अद्रिःग्रावेति मेघनामसु पाठात् प्रथमजाः प्रजापतेर्वीर्यात् प्रथमं जातः ऋतावा सत्यवानुदकवान्वा अंगिरसः पश्चाज्जातः तथा च निगमः—येंगाराआसंस्तेंगिरसोभवन्यदंगाराःपुनरवशान्ताउददीप्यन्तत्तद्बृहस्पतिरभवदिति । हविष्मान् यज्ञभागवान् द्विबर्हज्मा द्वयोर्लोकयोर्बृंहितगमनः प्राघर्मसत् प्रकर्षेण दीप्तस्थाने वर्तमानो नोस्माकं पिता पालयिता भवति सबृहस्पतिः वृषभो वर्षकः सन् रोदसी द्यावापृथिव्यौ आरोरवीति अभिगर्जति ॥ १ ॥

---

१ ऐ० ब्रा० ३. ३४.।

अथ द्वितीया–

जनायचिद्यईवंतउलोकंबृहस्पतिर्देवहूतौचकारं ।
घ्नन्वृत्राणिविपुरोदर्दरीतिजयञ्छत्रूँरमित्रान्पृत्सुसाहन् ॥ २ ॥

जनाय । चित् । यः । ईवते । ऊँ इति । लोकम् । बृहस्पतिः ।
देवऽहूतौ । चकार । घ्नन् । वृत्राणि । वि । पुरः । दर्दरीति ।
जयन् । शत्रून् । अमित्रान् । पृत्ऽसु । सहन् ॥ २ ॥

अपि च योबृहस्पतिः देवहूतौ यज्ञे वर्तमानाय ईवते उपगच्छते स्तोत्रे जनाय लोकं स्थानं चकार करोति चिदिति पूरणः सवृत्राण्यावरकाणि तमांसि घ्नन् निवारयन् पृत्सु युद्धेषु शत्रून् जयन् अमित्रान् सहन् अभिभवन् पुरः आसुरीः पुरीः विदर्दरीति भृशं विदारयति ॥२॥

अथ तृतीया–

बृहस्पतिःसमजयद्वसूनिमहोव्रजान्गोमतोदेवएषः ।
अपःसिषासन्त्स्व१रप्रतीतोबृहस्पतिर्हन्त्यमित्रमर्कैः ॥ ३ ॥१७॥

बृहस्पतिः । सम् । अजयत् । वसूनि । महः । व्रजान् ।
गोऽमतः । देवः । एषः । अपः । सिसासन् । स्वः । अप्रतिऽइतः ।
बृहस्पतिः । हन्ति । अमित्रम् । अर्कैः ॥ ३ ॥ १७ ॥

देवोद्योतमानः एषप्रसिद्धोबृहस्पतिः वसूनि पणीनामसुराणां बलस्य वा धनानि महो महतो गोमतोगोसहितान् व्रजांश्च समजयत् तथा च निगमो–बृहस्पतिर्गोवपुषोवलस्यनिर्मज्ञानंनपर्वणोजभारेति[1] । दूरमितपणयोवरीयउद्गावोयन्तुमिनतीर्ऋतेन । बृहस्पतिर्याअविन्दन्निगूह्ळाः सोमोग्रावाणऋषयश्चविप्राइति[2] । किंच बृहस्पतिः अप्रतीतः केनाप्यप्रतिगतः सिषासन् संभक्तुमिच्छन् स्वः स्वर्गस्य अमित्रं असुरं अर्कैरर्चनसाधनैर्मंत्रैर्हन्ति अर्कोमंत्रोभवतियदेनेनार्चन्तीतियास्कः[3] ॥ ३ ॥

॥ इति पंचमस्य प्रथमे सप्तदशोवर्गः ॥ १७ ॥

---

1 ऋ० सं० ८. २. १८. । 2 ऋ० सं० ८. ६. ६. । 3 नि० ५. ४. ।

सोमारुद्रेतिचतुर्ऋचं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं सोमारुद्रदेवताकं अनुक्रम्यते च सोमारुद्राचतुष्कं सोमारौद्रमिति। विनियोगोलैंगिकः।

तत्र प्रथमा—

सोमारुद्राधारयेथामसुर्यं१प्रवामिष्टयोरमश्नुवन्तु।
दमेदमेसप्तरत्नादधानाशंनोभूतंद्विपदेशंचतुष्पदे ॥ १ ॥

सोमारुद्रा। धारयेथाम्। असुर्यम्। प्र। वाम्। इष्टयः।
अरम्। अश्नुवन्तु। दमेऽदमे। सप्त। रत्ना। दधाना। शम्।
नः। भूतम्। द्विऽपदे। शम्। चतुःऽपदे ॥ १ ॥

सोमारुद्रा हे सोमारुद्रौ असुर्यं असुरसंबन्धिबलं अस्मासु धारयेथां किं च दमेदमे सर्वेष्वस्मद्गृहेषु इष्टयोयज्ञाः वां युवां अरमलं पर्याप्तं प्राश्नुवन्तु प्रकर्षेणव्याप्नुवन्तु। अपि च युवां सप्तरत्ना रत्नानि दधाना धारयन्तौ नोस्मभ्यं शं सुखकरौ सुखरूपौ वा भूतं भवतं। द्विपदे अस्मदीयाय पुत्रादये चतुष्पदे पश्वादये च शं भूतं भवतं ॥१ ॥

अथ द्वितीया—

सोमारुद्राविवृहतंविषूचीममीवायानोगयमाविवेश।
आरेबाधेथांनिर्ऋतिंपराचैरस्मेभद्रासौश्रवसानिसन्तु ॥ २ ॥

सोमारुद्रा। वि। वृहतम्। विषूचीम्। अमीवा। या। नः।
गयम्। आऽविवेश। आरे। बाधेथाम्। निःऽऋतिम्।
पराचैः। अस्मे। इति। भद्रा सौश्रवसानि। सन्तु ॥ २॥

सोमारुद्रा हे सोमारुद्रौ नोस्माकं गयं गृहं गृहगतंप्राणिजातंवा याअमीवा योरोगआविवेश तांविषूचीं विष्वक् सर्वतो गच्छन्तीं अमीवां विवृहतं वियोजयतं। अपि च निर्ऋतिमलक्ष्मीं पराचैः पराग्यथाभवति तथा आरे दूरे बाधेथां निवारयतं। अस्मे अस्माकं भद्रा भद्राणि सौश्रवसानि अन्नानि यशांसि च संतु भवन्तु सुश्रवसोभावः सौश्रवसं श्रवोन्नंयशश्च ॥ २ ॥

अथ तृतीया–

सोमारुद्रायुवमेतान्यस्मेविश्वातनूषुभेषजानिधत्तम् ।
अवस्यतंमुञ्चतंयन्नोअस्तितनूषुबद्धंकृतमेनोअस्मत् ॥ ३ ॥

सोमारुद्रा । युवम् । एतानि । अस्मे इति । विश्वा । तनूषु ।
भेषजानि । धत्तम् । अव । स्यतम् । मुञ्चतम् । यत् । नः ।
अस्ति । तनूषु । बद्धम् । कृतम् । एनः । अस्मत् ॥ ३ ॥

हे सोमारुद्रा सोमारुद्रौ युवं युवां अस्मे अस्माकं तनूष्वंगेषु एतानि प्रसिद्धानि विश्वा सर्वाणि भेषजानि धत्तं धारयतं । किं च नोस्माकं तनूष्वंगेषु अस्माभिः कृतं बद्धं च यदेनः पापमस्ति विद्यते तत्पापं अवस्यतं क्षपयतं श्लथयतं शिथिलबन्धं कुरुतमित्यर्थः । अस्मदस्मत्तोमुंचतंच ॥ ३ ॥

अथ चतुर्थी–

तिग्मायुधौतिग्महेतीसुशेवौसोमारुद्राविहसुमृळतंनः ।
प्रनोमुञ्चतंवरुणस्यपाशाद्गोपायतंनःसुमनस्यमाना ॥४॥१८॥

तिग्मऽआयुधौ । तिग्महेती इति तिग्मऽहेती । सुऽशेवौ ।
सोमारुद्रौ । इह । सु । मृळतम् । नः । प्र । नः । मुञ्चतम् । वरुणस्य ।
पाशात् । गोपायतम् । नः । सुऽमनस्यमाना ॥ ४ ॥ १८ ॥

हेसोमारुद्रौ तिग्मायुधौ दीप्तधनुष्कौ तिग्महेती तीक्ष्णशरौ सुशेवौ शोभनसुखप्रदौ सुमनस्यमाना शोभनंमनःस्तोत्रमिच्छन्तौ सुमनस्यमानौ स्तूयमानौ सुमनसौ वा सन्तौ युवां इह लोके नोस्मान् सु अत्यन्तं मृळतं सुखयतं नोस्मान्वरुणस्य पाशात् प्रमुंचतं नोस्मान् गोपायतं आपद्भ्योरक्षतं च ॥ ४ ॥

॥ इति पंचमस्य प्रथमेष्टादशोवर्गः ॥ १८ ॥

जीमूतस्येत्येकोनविंशर्चंचतुर्दशंसूक्तं भारद्वाजस्यपायोरार्षं अनुक्रम्यतेच—जीमूतस्यैवेकोनापायुर्भारद्वाजःसंग्रामांगान्यृकृशोभितुष्टावसर्मधनुर्ज्यामार्त्नीइषुधिंजगत्यर्धे सारथिमर्धेरश्मीनश्वाचर्थं रथगोपानजगत्यादि लिंगोक्तदेवताद्वाभ्यामिषूः प्रतोदंहस्तघ्नंद्वाभ्यामिषूः पराः पंक्त्यादयो लिंगोक्तदेवताः संग्रामाशिषोन्त्यानुष्टुप् ऋजीतआलाकेतिचद्वेद्वेइति । रथेतिष्ठन् ब्राह्मणासइतिषष्ठीदशम्यौ जगत्यौ अंत्यायोनःस्वोअरणइत्येषानुष्टुप् ऋजीतेआजंघन्तिआलाकाअवसृष्टायोनःस्वइतिपंचानुष्टुभः यत्रबाणाइतिपंक्तिः शिष्टास्त्रिष्टुभः आद्ययावर्मस्तूयते द्वितीययाधनुः तृतीययाज्या चतुर्थ्यार्त्नी पंचम्याइषुधिः अतः पंचानांवर्माद्यादेवताः षष्ठ्याः पूर्वार्धेनसारथिः स्तूयते अतः सोर्धर्चस्तद्देवताकः उत्तरार्धेनरश्मयः स्तूयन्ते सप्तम्याअश्वाः अष्टम्यारथः नवम्यारथगोपाः अतस्तास्तद्देवताकाः ब्राह्मणासइत्यस्यांब्राह्मणपितृसोम्यद्यावापृथिवीपूषाणोलिंगोक्तादेवताः एकादशीद्वादश्याविषुस्तुतिरूपत्वात् इषुदेवताके त्रयोदश्याप्रतोदः चतुर्दश्याहस्तघ्नः पंचदशीषोडश्याविषुदेवताके सप्तदश्यायुद्धभूमिब्रह्मणस्पत्यदितिरूपालिंगोक्तदेवताः अष्टादश्याः कवचसोमवरुणदेवताः अंत्यायादेवाब्रह्मचदेवता युद्धेअनेनसूक्तेनराजानंसंनाहयेव तथाचाश्वलायनः—संग्रामेसमुपोढेराजानंसंनाहयेदात्वाहार्षमन्तरेधीतिपश्चाद्रथस्यावस्थायजीमूतस्येवभवतिप्रतीकमितिकवचंप्रयच्छेदुत्तरयाधनुरुत्तरांवाचयेत्स्वयंचतुर्थींजपेत्पंचम्येषुधिंप्रयच्छेदभिप्रवर्तमानेषष्ठींसप्तम्याश्वानष्टमीमिषूनवेक्षमाणं वाचयत्यहिरिवभोगैःपर्येतिबाहुमितितलं नह्यमानमिति तथाचावसृष्टापरापतेतीषून्विसर्जयेद्यत्रबाणाः संपतन्तीतियुध्यमानेषुजपेदसंशिष्याद्वेति । अध्यायोपाकरणोत्सर्जनयोर्मंडलांत्यहोमे योनःस्वइत्यषा ।

तत्र प्रथमा—

जीमूतस्येवभवतिप्रतीकंयद्वर्मीयातिसमदामुपस्थे ।
अनाविद्धयातन्वाजयत्वंसत्वावर्मणोमहिमापिपर्तु ॥ १ ॥

जीमूतस्यऽइव । भवति । प्रतीकम् । यत् । वर्मी । याति ।
सऽमदाम् । उपऽस्थे । अनाविद्धया । तन्वा । जय ।
त्वम् । सः । त्वा । वर्मणः । महिमा । पिपर्तु ॥ १ ॥

समदां संग्रामाणां उपस्थे उपस्थाने सति यदायं राजा वर्मी कवची याति तदा लोहमयेन वर्मणा सन्नद्धस्य राज्ञः प्रतीकं रूपं जीमूतस्येव मेघस्येव भवति मेघस्य यादृशं रूपं ता-

इशमस्य भवतीत्यर्थः हे राजन् त्वं अनाविद्धया शत्रुभिरबाधितया तन्वा शरीरेण शत्रून् जय वर्मणः सतादृशो महिमा त्वा त्वां पिपर्तु पालयतु ॥ १ ॥

अथ द्वितीया—

धन्व॑ना॒गाधन्व॑ना॒जिंज॑येम॒धन्व॑नाती॒व्राःस॒मदो॑जयेम ।
धनुः॒शत्रो॑रपका॒मंकृ॑णोति॒धन्व॑ना॒सर्वाः॑प्र॒दिशो॑जयेम ॥ २॥

धन्व॑ना । गाः । धन्व॑ना । आ॒जिम् । ज॒ये॒म॒ । धन्व॑ना । ती॒व्राः ।
स॒ऽमदः॑ । ज॒ये॒म॒ । धनुः॑ । शत्रोः॑ । अ॒प॒ऽका॒मम् । कृ॒णो॒ति॒ ।
धन्व॑ना । सर्वाः॑ । प्र॒ऽदिशः॑ । ज॒ये॒म॒ ॥ २ ॥

धन्वना चापेन गाः शत्रूणां जयेम वयं वशीकरवाम धन्वना आजिं संग्रामं च जयेम धन्वना तीव्राः उद्धताः समदः अत्यन्तमदवतीः शत्रुसेनाश्च जयेम तथाचयास्कः—संमदः समदोवात्तेः संमदोवामदतेरिति । धनुः शत्रोरपकामं कामस्यापायं कृणोति करोतु । किं च धन्वना वयं सर्वाः प्रदिशः सर्वासु दिक्षु वर्तमानान् शत्रून् जयेम प्रदिक् शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्तते मंचाः क्रोशंतीतिवत् । धन्वन् शब्दस्य जयतेश्चावृत्तिरादरार्था ॥ २ ॥

अथ तृतीया—

व॒क्ष्यन्ती॒वेदाग॑नीगन्ति॒कर्णं॑प्रि॒यंसखा॑यंपरिषस्वजा॒ना ।
योषे॑वशिङ्क्ते॒वित॒ताधि॒धन्व॒ञ्ज्याइ॒यंसम॑नेपा॒रय॑न्ती ॥ ३ ॥

व॒क्ष्यन्ती॑ऽइव । इत् । आ । ग॒नी॒ग॒न्ति॒ । कर्ण॑म् । प्रि॒यम् ।
सखा॑यम् । प॒रि॒ऽस॒स्व॒जा॒ना । योषा॑ऽइव । शि॒ङ्क्ते॒ । वि॒ऽत॒ता ।
अधि॑ । धन्व॑न् । ज्या । इ॒यम् । सम॑ने । पा॒रय॑न्ती ॥ ३ ॥

पूर्वेण ऋग्द्वयेन कवचधनुषी स्तुते अत्र ज्यास्तुतिः इयं ज्या समने संग्रामे धन्वन् धन्वनि अधीति सप्तम्यर्थानुवादः । वितता विस्तृता पारयन्ती पारं नयन्ती प्रियं प्रियकरं वाक्यं वक्ष्यन्ती इव कर्णं धन्विनो राज्ञः कर्णप्रदेशं आगनीगन्ति आगच्छति । इदिति पूरणः योषा नारी सखायं पतिमिव परिषस्वजाना इमं परिष्वजमाना शिंक्ते शब्दायते च । तथाच या-

---

१ नि० ९. १८. ।

स्कः—वक्ष्यन्तीवागच्छति कर्णप्रियमिव सखायमिपुं परिष्वजमाना योषेव शिंक्ते शब्दंकरोति विततांधिधनुषिज्येयंसमने संग्रामे पारयन्ती पारं नयन्तीति ॥ ३ ॥

अथ चतुर्थी—

तेआचरन्तीसमनेवयोषामातेवपुत्रंबिभृतामुपस्थे ।
अपशत्रून्विध्यतांसंविदानेआर्त्नीइमेविष्फुरन्तीअमित्रान् ॥ ४ ॥

ते इति । आचरन्ती इत्याऽचरन्ती । समनाऽइव । योषा । माताऽइव । पुत्रम् । बिभृताम् । उपऽस्थे । अप । शत्रून् । विध्यताम् । संविदाने इति सम्ऽविदाने । आर्त्नी इति । इमे इति । विस्फुरन्ती इति विऽस्फुरन्ती । अमित्रान् ॥ ४ ॥

अत्र धनुःकोट्योः स्तुतिः ते धनुःकोट्यौ समनेव समनस्केव योषा पतिसमीपं न त्यजति तद्वदाचरन्ती अभितश्चरंत्यौ उपस्थे उपस्थाने मातेव पुत्रं यथामाता पुत्रं धारयति तद्वत् बिभृतां राजानं धारयेतां । किं च इमे धनुःकोट्यौ संविदाने संजानाने विसंवादरहिते आर्त्नीगच्छन्त्यौ ऋगताविति धातोः चुर्यणिभ्यां निरिति बाहुलकात् निप्रत्ययोधातोरार्तभावश्च ततः कृदिकाराद-क्तिनइतिङीप् द्विवचनस्य पूर्वसवर्णः अस्य राज्ञः अमित्रान् विष्फुरन्ती विहिंसंत्यौ शत्रूंश्च अपविध्यतां।तथाच यास्कः—तेआचारन्ती समनसाविवयोषे मातेवपुत्रं बिभृतामुपस्थउपस्थाने पविध्यतां शत्रून् संविदाने आर्त्न्याविमे विघ्नवत्यावमित्रानिति ॥ ४ ॥

अथ पंचमी—

बह्वीनांपिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य ।
इषुधिसङ्काःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः ॥ ५ ॥ १९ ॥

बह्वीनाम् । पिता । बहुः । अस्य । पुत्रः । चिश्चा । कृणोति । समना । अवऽगत्य । इषुऽधिः । सङ्काः । पृतनाः । च । सर्वाः । पृष्ठे । निऽनद्धः । जयति । प्रऽसूतः ॥ ५ ॥ १९ ॥

---

१ नि० ९. १८. । २ नि० ९. ३९. ।

इषुधिरत्र स्तूयते इषुधिः बह्वीनामिषूणांपिता भवति रक्षणहेतुत्वात् पितेत्युच्यते इषुशब्द-स्योभयलिंगत्वात् बह्वीनामिति प्रयोगः अस्य इषुधेः पुत्रः इषुर्बहुर्भवति बहवः इषवो हि इषु-धौ निधीयन्ते इषूणां निधानत्वादिषुधिः तथाच यास्कः—इषुधिरिषूणां निधानमिति। चिश्चाकृ-णोति चिश्चेति शब्दानुकृतिः इषुषूद्रियमाणेषु इषुधिश्चिश्चाशब्दं करोति। किंच इषुधिः पृष्ठे निनद्धः धन्विनो राज्ञः पृष्ठभागे बद्धः समना युद्धानि अवगत्य प्राप्य प्रसूतः प्रसुवन् कर्तरिनिष्ठा इषून्प्रेरयन् संकाः सहकायन्ति शब्दायन्ते इति संकाः पृतनाः सर्वाः सेनाः जयति ॥ ५ ॥

॥ इति पंचमस्य प्रथमे एकोनविंशोवर्गः ॥ १९ ॥

अथ षष्ठी—

रथेतिष्ठन्नयतिवाजिनःपुरोयत्रयत्रकामयतेसुषारथिः ।
अभीशूनांमहिमानंपनायतमनःपश्चादनुयच्छन्तिरश्मयः ॥ ६ ॥

रथे । तिष्ठन् । नयति । वाजिनः । पुरः । यत्रऽयत्र । कामयते ।
सुऽसारथिः । अभीशूनाम् । महिमानम् । पनायत । मनः ।
पश्चात् । अनु । यच्छन्ति । रश्मयः ॥ ६ ॥

अत्र पूर्वार्धे सारथिस्तुतिः उत्तरार्धेभीशूनां स्तुतिः सुषारथिः शोभनसारथिः रथे तिष्ठन् पुरः पुरस्तात् वर्तमानान् वाजिनोश्वान् यत्र यत्र नेतुं कामयते तत्र तत्र नयति ये रथे रश्मयो-श्वग्रीवाभ्यां व्याप्य वर्तमानाः पाशाः पश्चात् रथस्य पृष्ठभागे विद्यमानानश्वान् मनः सारथे-र्मनोनुकूलं अनुयच्छन्ति नियच्छन्ति तेषामभीशूनां रश्मीनां महिमानं महत्त्वं पनायत हे जनाः स्तुत तथाच यास्कः—रथेतिष्ठन्नयतिवाजिनःपुरस्तात्सतोयत्रयत्रकामयतेसुषारथिःकल्याणसा-रथिरभीशूनांमहिमानंपूजयतमनःपश्चात्सतोनुयच्छन्तिरश्मयइति ॥ ६ ॥

अथ सप्तमी—

तीव्रान्घोषान्कृण्वतेवृषपाणयोश्वारथेभिःसहवाजयन्तः ।
अवक्रामन्तःप्रपदैरमित्रान्क्षिणन्तिशत्रूँरनपव्ययन्तः ॥ ७ ॥

---

१ नि० ९. १३.   २ नि० ९. १६.

तीव्रान् । घोषान् । कृण्वते । वृषऽपाणयः । अश्वाः ।
रथेभिः । सह । वाजयन्तः । अवऽक्रामन्तः । प्रऽपदैः ।
अमित्रान् । क्षिणन्ति । शत्रून् । अनपऽव्ययन्तः ॥ ७ ॥

अत्राश्वस्तुतिः अश्वाः वृषपाणयः पांसूनां वर्षकखुराः रथेभिः रथैः सह वाजयन्तो वेगमाचरन्तः तीव्रान् उच्चतरान्घोषान् शब्दान् कुर्वते कृण्वते किं च। अनपव्ययन्तोऽपलायमानाः अमित्रान् हिंसकान् शत्रून् प्रपदैः पादाग्रैः अवक्रामन्तः क्षिणंति हिंसन्ति ॥ ७ ॥

अथाष्टमी–

रथवाहनंहविरस्यनामयत्रायुधंनिहितमस्यवर्म।
तत्रारथमुपशग्मंसदेमविश्वाहावयंसुमनस्यमानाः ॥ ८ ॥

रथऽवाहनम् । हविः । अस्य । नाम । यत्र । आयुधम् ।
निऽहितम् । अस्य । वर्म । तत्र । रथम् । उप । शग्मम् ।
सदेम । विश्वाहा । वयम् । सुऽमनस्यमानाः ॥ ८ ॥

अस्य राज्ञः रथवाहनं शत्रून् जित्वा रथेनोह्यमानं धनं हविर्भवति अग्नेर्हविरिवयर्धकं भवतीत्यर्थः। नामेति संमतिः यत्र रथे अस्य राज्ञः आयुधं धनुः शरादिकं वर्म कवचं च निहितं भवति तत्रेत्यव्ययस्य सार्वविभक्तिकत्वात् शग्मं सुखकरं विश्वाहा सर्वदा सुमनस्यमानाः सुखमनसो भवन्तो वयं पायवो भरद्वाजाः उपसदेम उपगच्छेम ॥ ८ ॥

अथ नवमी–

स्वादुषंसदःपितरोवयोधाःकृच्छ्रेश्रितःशक्तीवन्तोगभीराः।
चित्रसेनाइषुबलाअमृध्राःसतोवीराउरवोव्रातसाहाः ॥ ९ ॥

स्वादुऽसंसदः । पितरः । वयःऽधाः । कृच्छ्रेऽश्रितः ।
शक्तिऽवन्तः । गभीराः । चित्रऽसेनाः । इषुऽबलाः ।
अमृध्राः । सतःऽवीराः । उरवः । व्रातऽसहाः ॥ ९ ॥

१ नि० ३. २०. २ नि० ११. १८.

अत्र रथगोपस्तुतिः पितरो रथस्य पालयितारः स्वादुषं सदः शत्रूणां स्वादुन्यन्ने संसीदन्तः शत्रूणामन्नमवसादयन्तो वा वयोधाः अन्नस्य दातारः कृच्छ्रे श्रितः आपदि श्रयन्तः शक्तिरायुधविशेषः तद्वन्तः शक्तीवन्तः शक्तिहस्ताइति यावत्। यद्वा शक्तिर्बलं तद्वन्तः गभीराः अनाधृष्याः चित्रसेनाः दर्शनीयसेनाः इषुबलाः बाणबलाः अमृध्राः हिंसितुमशक्याः सतोवीराः प्राप्तवीर्याः। तथाचयास्कः—तिरः सतइति प्राप्तस्य तिरः स्तीर्णंभवति सतःसंसृतंभवतीति। उरवोमहान्तः व्रातसहाः समूहानामभिभवितारोभवन्तीति ॥ ९ ॥

अथ दशमी—

ब्राह्मणासःपितरःसोम्यासःशिवेनोद्यावापृथिवीअनेहसा।
पूषानःपातुदुरितादृतावृधोरक्षामाकिर्नोअघशंसईशत ॥१०॥२०॥

ब्राह्मणासः। पितरः। सोम्यासः। शिवे इति। नः।
द्यावापृथिवी इति। अनेहसा। पूषा नः। पातु। दुःऽइतात्।
ऋतऽवृधः। रक्ष। माकिः। नः। अघऽशंसः। ईशत ॥ १० ॥ २०॥

ब्राह्मणासो हे ब्राह्मणाः पितरः ऋतावृधः ऋतस्य यज्ञस्य वा वर्धयितारःसोम्यासः सोमार्हाः सोमसंपादिनो वा तथाचयास्कः—सोम्याः सोमसंपादिनइति नोस्मान् रक्षत रक्षेत्युपरितनमेकवचनान्तं सत्यपिव्यवधाने बहुवचनान्ततया विपरिणतं सदत्रसंबध्यते अध्याहारस्यातिजघन्यत्वात्। किं च अनेहसा अपापे द्यावापृथिवी द्यावापृथिव्यौ नोस्माकं शिवे सुखकृतौ भवतां पूषा पोषको देवोपि नोस्मान् दुरितात् दुष्कृतात्पातु रक्षतु। नोस्माकमघशंसः पापशंसः शत्रुरपिमाकिरीशत माईष्ट ॥ १० ॥

इति पंचमस्य प्रथमे विंशोवर्गः ॥ २० ॥

अथैकादशी—

सुपर्णंवस्तेमृगोअस्यादन्तोगोभिःसंनद्धापततिप्रसूता।
यत्रानरःसंचविचद्रवन्तितत्रास्मभ्यमिषवःशर्मयंसन् ॥ ११ ॥

---

१ नि० ३. २०. २ नि० ११. १८.

अथ पंचदशी—

आलाक्तायारुरुशीर्ष्ण्यथोयस्याअयोमुखम् ।
इदंपर्जन्यरेतसइष्वैदेव्यैबृहन्नमः ॥ १५ ॥ २१ ॥

आलऽअक्ता । या । रुरुऽशीर्ष्णी । अथो इति । यस्याः । अयः ।
मुखम् । इदम् । पर्जन्यऽरेतसे । इष्वै । देव्यै बृहत् । नमः ॥१५॥२१॥

या इषुः आलाक्ता आलेन विषेणाक्ता रुरुशीर्ष्णी हन्तृशिरस्का अर्तेर्हिंसाकर्मणोरुरुशब्दो त्पत्तिः शृंगशीर्ष्णी वा अथो किंच यस्याः इषोर्मुखं अयः अयोमयं भवति पर्जन्यरेतसे पर्जन्यः रेतोयस्याः सापर्जन्यरेताः तस्यै पर्जन्यकार्यभूतायै शरकांडस्य पर्जन्यजन्यत्वात् बृहत् बृहत्यै तस्यै इष्वै देव्यै इदं नमः क्रियतइति ॥ १५ ॥

॥ इति पंचमस्य प्रथमे एकविंशोवर्गः ॥ २१ ॥

अथ षोडशी—

अवसृष्टापरापतशरव्येब्रह्मसंशिते ।
गच्छामित्रान्प्रपद्यस्वमामीषांकंचनोच्छिषः ॥ १६ ॥

अवऽसृष्टा । परा । पत । शरव्ये । ब्रह्मऽसंशिते । गच्छ । अमित्रान् ।
प्र । पद्यस्व । मा । अमीषाम् । कम् । चन । उत् । शिषः ॥ १६ ॥

ब्रह्मसंशिते मंत्रेण तीक्ष्णीकृते शरव्ये हिंसाकुशले इषो त्वं अवसृष्टा क्षिप्ता परापत परागच्छ इतोदेशाद्गच्छ च अमित्रान् हिंसकान् प्रपद्यस्व प्राप्नुहि च अमीषाममित्राणां मध्ये कंचन कंचिदपि माउच्छिषः अवशिष्टं माकुरु ॥ १६ ॥

अथ सप्तदशी—

यत्रबाणाःसंपतंतिकुमाराविशिखाइव ।
तत्रानोब्रह्मणस्पतिरदितिःशर्मयच्छतुविश्वाहाशर्मयच्छतु ॥१७॥

यत्र । बाणाः । सम्ऽपतन्ति । कुमाराः । विशिखाःऽइव ।
तत्र । नः । ब्रह्मणः । पतिः । अदितिः । शर्म ।
यच्छतु । विश्वाहा । शर्म । यच्छतु ॥ १७ ॥

यत्र युद्धे कुमाराः विशिखाइव मुंडिताइव बाणाः संपतंति तत्र नोस्मभ्यं ब्रह्मणस्पतिः शर्म सुखं विश्वाहा सर्वदा यच्छतु अदितिश्च शर्म यच्छतु द्विरुक्तिरादरार्था ॥ १७ ॥

अथाष्टादशी–

मर्माणितेवर्मणाछादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ।
उरोर्वरीयोवरुणस्तेकृणोतुजयन्तंत्वानुदेवामदन्तु ॥ १८ ॥

मर्माणि । ते । वर्मणा । छादयामि । सोमः । त्वा । राजा ।
अमृतेन । अनु । वस्ताम् । उरोः । वरीयः । वरुणः ।
ते । कृणोतु । जयन्तम् । त्वा । अनु । देवाः । मदन्तु ॥ १८ ॥

हे राजन् ते त्वदीयानिमर्माणि येषु स्थानेषु विद्धः सद्योम्रियते तानि मर्माणि वर्मणा कवचेन छादयामि सोमोराजा त्वा त्वां अनु मर्मच्छादनानंतरममृतेन वस्तां आच्छादयतु । किंच वरुणोपि ते तुभ्यं उरोर्वरीयः उरुतरं सुखं कृणोतु करोतु । जयंतं त्वा त्वां देवाः सर्वेपि अनुमदन्तु अनुहृष्यन्तु ॥ १८ ॥

अथैकोनविंशी–

योनःस्वोअरणोयश्चनिष्ट्योजिघांसति ।
देवास्तंसर्वेधूर्वन्तुब्रह्मवर्ममान्तरम् ॥ १९ ॥ २२ ॥

यः । नः । स्वः । अरणः । यः । च । निष्ट्यः । जिघांसति ।
देवाः । तम् । सर्वे । धूर्वन्तु । ब्रह्म । वर्म । मम । अन्तरम् ॥ १९ ॥ २२ ॥

यः स्वोज्ञातिः अरणः अरममाणः यश्च निष्ट्यः तिरोभूतः दूरेस्थितः नोस्मान् जिघांसति हन्तुमिच्छति तं देवाः सर्वे देवाः धूर्वन्तु हिंसन्तु ब्रह्म मंत्रोमम अंतरं शराणां निवारकं वर्म विद्यते ॥ १९ ॥

॥ इति पंचमस्य प्रथमे द्वाविंशोवर्गः ॥ २२ ॥

॥ इति षष्ठे मंडले षष्ठोनुवाकः ॥ ६ ॥

॥ इति भारद्वाजं षष्ठं मंडलंसमाप्तं ॥

अथ पंचदशी–

आलाक्तायारुरुशीर्ष्ण्यथोयस्याअयोमुखम् ।
इदंपर्जन्यरेतसइष्वैदेव्यैबृहन्नमः ॥ १५ ॥ २१ ॥

आलऽअक्ता । या । रुरुऽशीर्ष्णी । अथो इति । यस्याः । अयः ।
मुखम् । इदम् । पर्जन्यऽरेतसे । इष्वै । देव्यै बृहत् । नमः ॥१५॥२१॥

या इषुः आलाक्ता आलेन विषेणाक्ता रुरुशीर्ष्णी हन्तृशिरस्का अर्तेर्हिंसाकर्मणोरुरुशब्दो ऽस्ति: शृंगशीर्ष्णी वा अथो किंच यस्याः इषोर्मुखं अयः अयोमयं भवति पर्जन्यरेतसे पर्जन्यः रेतोयस्याः सापर्जन्यरेताः तस्यै पर्जन्यकार्यभूतायै शरकांडस्य पर्जन्यजन्यत्वात् बृहत् बृहत्यै तस्यै इष्वै देव्यै इदं नमः क्रियतइति ॥ १५ ॥

॥ इति पंचमस्य प्रथमे एकविंशोवर्गः ॥ २१ ॥

अथ षोडशी–

अवसृष्टापरापतशरव्येब्रह्मसंशिते ।
गच्छामित्रान्प्रपद्यस्वमामीषांकंचनोच्छिषः ॥ १६ ॥

अवऽसृष्टा । परा । पत । शरव्ये । ब्रह्मऽसंशिते । गच्छ । अमित्रान् ।
प्र । पद्यस्व । मा । अमीषाम् । कम् । चन । उत् । शिषः ॥ १६ ॥

ब्रह्मसंशिते मंत्रेण तीक्ष्णीकृते शरव्ये हिंसाकुशले इषो त्वं अवसृष्टा क्षिप्ता परापत परागच्छ इतोदेशाद्गच्छ च अमित्रान् हिंसकान् प्रपद्यस्व प्राप्नुहि च अमीषाममित्राणां मध्ये कंचन कंचिदपि माउच्छिषः अवशिष्टं माकुरु ॥ १६ ॥

अथ सप्तदशी–

यत्रबाणाःसंपतंतिकुमाराविशिखाइव ।
तत्रानोब्रह्मणस्पतिरदितिःशर्मयच्छतुविश्वाहाशर्मयच्छतु ॥१७॥

यत्र । बाणाः । सम्ऽपतन्ति । कुमाराः । विशिखाःऽइव ।
तत्र । नः । ब्रह्मणः । पतिः । अदितिः । शर्म ।
यच्छतु । विश्वाहा । शर्म । यच्छतु ॥ १७ ॥

यत्र युद्धे कुमाराः विशिखाइव मुंडिताइव बाणाः संपतंति तत्र नोस्मभ्यं ब्रह्मणस्पतिः शर्म सुखं विश्वाहा सर्वदा यच्छतु अदितिश्च शर्म यच्छतु द्विरुक्तिरादरार्था ॥ १७ ॥

अथाष्टादशी—

मर्माणिते॒वर्म॑णाछादयामि॒सोम॑स्त्वा॒राजा॒मृते॒नानु॑वस्ताम् ।
उ॒रोर्वरी॑योव॒रु॑णस्तेकृणोतु॒जय॑न्तं॒त्वानु॑दे॒वाम॑दन्तु ॥ १८ ॥

मर्मा॑णि । ते॒ । वर्म॑णा । छा॒दया॒मि॒ । सोमः॑ । त्वा॒ । राजा॑ ।
अ॒मृते॑न । अनु॑ । व॒स्ता॒म् । उ॒रोः । वरी॑यः । वरु॑णः ।
ते॒ । कृ॒णो॒तु॒ । जय॑न्तम् । त्वा॒ । अनु॑ । दे॒वाः । म॒द॒न्तु॒ ॥ १८ ॥

हे राजन् ते त्वदीयानिमर्माणि येषु स्थानेषु विद्धः सद्योम्रियते तानि मर्माणि वर्मणा कवचेन छादयामि सोमोराजा त्वा त्वां अनु मर्मच्छादनानंतरममृतेन वस्तां आच्छादयतु । किंच वरुणोपि ते तुभ्यं उरोर्वरीयः उरुतरं सुखं कृणोतु करोतु । जयंतं त्वा त्वां देवाः सर्वेपि अनुमदन्तु अनुहृष्यन्तु ॥ १८ ॥

अथैकोनविंशी—

योनः॒स्वोअर॑णो॒यश्च॒निष्ट्यो॒जिघां॑सति ।
दे॒वास्तंसर्वे॑धूर्वन्तु॒ब्रह्म॒वर्म॒ममान्त॑रम् ॥ १९ ॥ २२ ॥

यः । नः॒ । स्वः । अर॑णः । यः । च॒ । निष्ट्यः॑ । जिघां॑सति ।
दे॒वाः । तम् । सर्वे॑ । धू॒र्व॒न्तु॒ । ब्रह्म॑ । वर्म॑ । मम॑ । अन्त॑रम् ॥ १९ ॥ २२ ॥

यः स्वोज्ञातिः अरणः अरममाणः यश्च निष्ट्यः तिरोभूतः दूरेस्थितः नोस्मान् जिघांसति हन्तुमिच्छति तं देवाः सर्वे देवाः धूर्वन्तु हिंसन्तु ब्रह्म मंत्रोमम अंतरं शराणां निवारकं वर्म विद्यते ॥ १९ ॥

॥ इति पंचमस्य प्रथमे द्वाविंशोवर्गः ॥ २२ ॥

॥ इति षष्ठे मंडले षष्ठोनुवाकः ॥ ६ ॥

॥ इति भारद्वाजं षष्ठं मंडलंसमाप्तं ॥

वासिष्ठे सप्तमे मंडले षडनुवाकाः तत्र प्रथमेनुवाके सप्तदश सूक्तानि तत्राग्निंनरइति पंचविंशत्यृचं प्रथमं सूक्तं अत्रेयमनुक्रमणिका—अग्निंपंचाधिका विराजोष्टादशाद्याइति सप्तमं मंडलं वसिष्ठो पश्यदित्युक्तत्वान्मंडलद्रष्टा वसिष्ठऋषिः आदितोष्टादश विराजस्त्र्येकादशकाः शिष्टा अनादेशपरिभाषया त्रिष्टुभः मंडलादिपरिभाषया अग्निर्देवता विश्वजितीदं सूक्तं आज्यशस्त्रं सूत्रितं च—विश्वजितोग्निंनरइत्याज्यमिति । अत्रेश्चतुर्वीराख्ये चतूरात्रे चतुर्थेहनि इदमेवसूक्तमाज्यशस्त्रं सूत्र्यते हि—अग्निंनरइतिचतुर्थइति व्यूढे दशरात्रे चतुर्थेहनि इदं सूक्तं जातवेदस्य निविद्धानं सूत्रितं च—अग्निंनरइत्याग्निमारुतमिति । महाव्रतेपीदमाज्यशस्त्रं तथैव पंचमारण्यके सूत्र्यते—आज्यमउगेविश्वजितइति । प्रातरनुवाके त्वमग्नेवसूनित्यादीनामनुष्टुभां स्थाने आद्यस्तृचः प्रक्षेपणीयः सूत्र्यते हि—दशमेहन्यनुष्टुभांस्थानेग्निंनरोदीधितिभिररण्योरिति तृचमाग्नेये क्रताविति । आद्याः षळृचः तस्मिन्नेवाहनि आग्निमारुते शस्त्रे स्तोत्रियानुरूपार्थाः सूत्रितं च—अग्निंनरोदीधितिभिररण्योरिति स्तोत्रियानुरूपाविति । मंडलादिहोमेप्येषा । आधाने तृतीयायामिष्टौ प्रेद्धइति स्विष्टकृतोनुवाक्या सूत्रितं च—प्रेद्धोअग्नइमोअग्नइति संयाज्ये इति । एवमन्यत्रापि दीक्षणीयादिषु स्विष्टकृतोनुवाक्या । प्रायणीयेष्टौ सेदग्निरग्नीनित्यादिके द्वे स्विष्टकृतो याज्यानुवाक्ये सूत्रितंच—सेदग्निरग्नीरत्यस्त्वन्यानिति द्वे संयाज्ये इति । आधाने तृतीयायामिष्टौ । इमोअग्नइति स्विष्टकृतो याज्या सूत्रितं च—इमोअग्नइति संयाज्ये इति । एवमन्यत्रापि दीक्षणीयादिषु एषा सौविष्टकृतीयाज्या प्रातरनुवाकाग्नेये क्रतौ त्रैष्टुभे छंदसि आश्विनशस्त्रे च त्वमग्नेसुहवइत्याद्याः पंचर्चः सूत्रितं च—त्वमग्नेसुहवोरण्वसंदृगिति ।

तत्र प्रथमा—

अग्निंनरोदीधितिभिररण्योर्हस्तच्युतीजनयन्तप्रशस्तम् ।
दूरेदृशंगृहपतिमथर्युम् ॥ १ ॥

अग्निम् । नरः । दीधितिऽभिः । अरण्योः । हस्तऽच्युती । जनयन्त ।
प्रऽशस्तम् । दूरेऽदृशम् । गृहऽपतिम् । अथर्युम् ॥ १ ॥

नरो नेतारऋत्विजः प्रशस्तं प्रकर्षेण स्तुतं दूरेदृशं दूरेदृश्यमानं दूरेपश्यन्तं वा गृहपतिं गृहाणां पालकं अथर्युं आगम्यमतनवन्तंवाग्निं अरण्योर्विद्यमानं हस्तच्युती हस्तप्रच्युत्या हस्तगत्या दीधितिभिः अंगुलिभिः जनयन्त दीधितयोंगुल्यो भवन्ति धीयन्ते कर्मस्वरणी प्रत्यृतएने

अग्निसमरणाज्जायतइतिवा हस्तच्युती हस्तप्रच्युत्या जनयंत प्रशस्तं दूरेदर्शनं गृहपतिमतनवन्तमिति ॥ १ ॥

अथ द्वितीया–

तम॒ग्निमस्ते॒वस॑वो॒न्यृ॑ण्वन्त्सुप्रति॒चक्ष॒मव॑से॒कुत॑श्चित् ।
द॒क्षाय्यो॒योदम॒आस॒नित्यः॑ ॥ २ ॥

तम् । अ॒ग्निम् । अस्ते॑ । वस॑वः । नि । ऋ॒ण्व॒न् । सु॒ऽप्र॒ति॒चक्ष॑म् ।
अव॑से । कुत॑ः । चि॒त् । द॒क्षाय्य॑ः । यः । दमे॑ । आस॑ । नित्य॑ः ॥ २ ॥

योग्निः दमे गृहे दक्षाय्यः पूजनीयो हविर्भिः समर्धनीयोवा नित्यो जस्रः आस बभूव तं सुप्रतिचक्षं सुप्रतिदर्शनमग्निं कुतश्चित् सर्वस्मादपि भयहेतोः अवसे रक्षणाय वसवो वासकाः ये वसिष्ठा अस्ते गृहे न्यृण्वन् न्यदधुः ॥ २ ॥

अथ तृतीया–

प्रेद्धो॑अग्नेदीदिहि॒पुरो॑नो॒ज॑स्रयासू॒र्म्या॑यविष्ठ ।
त्वांशश्व॑न्त॒उप॑यन्ति॒वाजाः॑ ॥ ३ ॥

प्रऽइ॑द्धः । अ॒ग्ने॒ । दी॒दि॒हि॒ । पु॒रः । नः॒ । अज॑स्रया । सू॒र्म्या॑ ।
य॒वि॒ष्ठ॒ । त्वाम् । शश्व॑न्तः । उप॑ । य॒न्ति॒ । वाजाः॑ ॥ ३ ॥

यविष्ठ युवतम हे अग्ने प्रेद्धः प्रकर्षेण समिद्धस्त्वं अजस्रया सरणशीलया सूर्म्या ज्वालया नोस्मदर्थं पुरः पुरस्तादाहवनीयायतने दीदिहि दीप्यस्व त्वां शश्वन्तो बहवः वाजाः अन्नानि हवींषि उपयन्ति उपगच्छन्ति ॥ ३ ॥

अथ चतुर्थी–

प्रतेअ॒ग्नयो॒ग्निभ्यो॒वरं॒निःसु॒वीरा॑सःशोशुचन्तद्यु॒मन्तः॑ ।
यत्रा॒नरः॑स॒मास॑ते॒सुजा॒ताः ॥ ४ ॥

---

१ नि० ५ । १० ।

प्र। ते। अग्नयः। अग्निऽभ्यः। वरम्। निः। सुऽवीरासः। शोशुचन्त। द्युऽमन्तः। यत्र। नरः। सम्ऽआसते। सुऽजाताः ॥ ४ ॥

अग्निभ्यो लौकिकेभ्योग्निभ्यः वरं अत्यन्तं द्युमन्तोदीप्तिमन्तः सुवीरासः कल्याणपुत्रपौत्रप्रदाः ते अग्नयो प्रनिःशोशुचन्त प्रकर्षेण नितरां दीप्यन्ते यत्र येष्वग्निषु सुजाताः सुजन्मानः नरः कर्मणां नेतारो यजमाना ऋत्विजो वा समासते सहासते ॥ ४ ॥

अथ पंचमी–

दानोअग्नेधियारयिंसुवीरंस्वपत्यंसहस्यप्रशस्तम्।
नयंयावातरतियातुमावान् ॥ ५ ॥ २३ ॥

दाः। नः। अग्ने। धिया। रयिम्। सुऽवीरम्। सुऽअपत्यम्। सहस्य। प्रऽशस्तम्। न। यम्। यावा। तरति। यातुऽमावान् ॥ ५ ॥ २३ ॥

सहस्य अभिभवकुशल हे अग्ने सुवीरं शोभनपुत्रपौत्रोपेतं स्वपत्यं शोभनपौत्रोपेतं प्रशस्तं श्रेष्ठं रयिं धनं धिया स्तोत्रेण नोस्मभ्यं दाःदेहि यं रयिं यावा अभिगन्ता शत्रुःयातुमावान् हिंसायानिर्गतः नलोपाभावश्छांदसः यद्वा हिंसायुक्तः परोवतिर्मत्वर्थीयः पूरकः न तरति न बाधते ॥ ५ ॥

॥ इति पंचमस्य प्रथमे त्रयोविंशो वर्गः ॥ २३ ॥

अथ षष्ठी–

उपयमेतियुवतिःसुदक्षंदोषावस्तोर्हविष्मतीघृताची।
उपस्वैनमरमतिर्वसूयुः ॥ ६ ॥

उप। यम्। एति। युवतिः। सुऽदक्षम्। दोषा। वस्तोः। हविष्मती। घृताची। उप। स्वा। एनम्। अरमतिः। वसुऽयुः ॥ ६ ॥

सुदक्षं सुबलं यमग्निं हविष्मती हविषा युक्ता घृताची घृतमंचतीति घृताची जुहूः युवतिः अग्निना नित्ययुक्ता दोषा वस्तोः रात्रावहनि च उपैति उपगच्छति तमेनं स्वा स्वकीया अरमतिः दीप्तिः वसुयुः स्तोतॄणां धनमिच्छन्ती उपैति ॥ ६ ॥

अथ सप्तमी–

विश्वा॑अग्ने॒अप॑द॒हारा॑ती॒र्येभि॒स्तपो॑भि॒रद॑हो॒जरू॑थम् ।
प्रनि॑स्व॒रंचा॑तय॒स्वामी॑वाम् ॥ ७ ॥

विश्वा॑: । अ॒ग्ने॒ । अप॑ । द॒ह॒ । अरा॑ती: । येभि॑: । तप॑:ऽभि: । अद॑ह: ।
जरू॑थम् । प्र । नि॒ऽस्व॒रम् । चा॒त॒य॒स्व॒ । अमी॑वाम् ॥ ७ ॥

हे अग्ने विश्वा विश्वान् अरातीः शत्रून् तपोभिस्तेजोभिः अपदह येभिः यैस्तपोभिः जरूथं परुषशब्दकारिणं राक्षसं गृणातेरूथन्प्रत्ययेसति जरूथशब्दनिष्पत्तिः अदहो दहसि। किंच अमीवां रोगं निस्वरं न्यकृतोपतापं यथाभवति तथा स्वृशब्दोपतापयोरितिधातुः प्रचातयस्व प्रकर्षेण नाशय चतविगत्यर्थेवेति भट्टभास्करमिश्रः ॥ ७ ॥

अथाष्टमी–

आयस्ते॑अग्नइ॒धते॒अनी॑कं॒वसि॑ष्ठ॒शुक्र॒दीदि॑व॒:पाव॑क ।
उ॒तोन॑ए॒भिः॑स्त॒वथै॑रि॒हस्या॑: ॥ ८ ॥

आ । यः । ते॒ । अ॒ग्ने॒ । इ॒धते॑ । अनी॑कम् । वसि॑ष्ठ शुक्र॑ ।
दीदि॑ऽवः । पाव॑क । उ॒तो इति॑ । न॒: । ए॒भिः॑ । स्त॒वथै॑: । इ॒ह । स्या॒: ॥८॥

वसिष्ठ श्रेष्ठ शुक्र शुभ्र दीदिवः दीप्त पावक शोधक हे अग्ने ते तव अनीकं तेजः यः आ इधते समेधयति तस्येव नोस्माकं उतो अपि च येभिः स्तवथैः स्तोत्रैः इहास्मिन्यज्ञे स्याः भव॥८॥

अथ नवमी–

वियेते॑अग्नेभेजि॒रेअनी॑कं॒मर्ता॒नर॒:पित्र्या॑स:पुरु॒त्रा ।
उ॒तोन॑ए॒भिः॑सु॒मना॑इ॒हस्या॑: ॥ ९ ॥

वि । ये । ते॒ । अ॒ग्ने॒ । भे॒जि॒रे । अनी॑कम् । मर्ता॑: । नर॑: । पित्र्या॑सः ।
पु॒रु॒ऽत्रा । उ॒तो इति॑ । न॒: । ए॒भिः॑ । सु॒ऽमना॑: । इ॒ह । स्या॒: ॥ ९ ॥

हे अग्ने ते तव अनीकं तेजः पित्र्यासः पितृहिताः आर्यपावा मर्ता मनुष्याः नरः कर्मणां नेतारो ये यजमानाः पुरुत्रा बहुषु देशेषु विभेजिरे विभजन्त आदधुरितियावत् तेषामिव नोस्माकं उतो अपि एभिः स्तुतैः सह स्तोत्रैर्वा सुमना अनुग्राहकमनाः सन् इह यज्ञे स्याः भव॥९॥

अथ दशमी–

इमेनरोंवृत्रहत्येपुशूराविश्वाअदेवीरभिसंन्तुमायाः ।
येमेधियंपनयन्तप्रशस्ताम् ॥ १० ॥ २४ ॥

इमे । नरः । वृत्रऽहत्येषु । शूराः । विश्वाः । अदेवीः । अभि ।
सन्तु । मायाः । ये । मे । धियम् । पनयन्त । प्रऽशस्ताम्॥१०॥२४॥

ये मनुष्याः मे मदीयां प्रशस्तां प्रकृष्टां धियं कर्म स्तुतिं वा पनयन्त स्तुवन्ति ब्रुवन्ति वा तइमे मयि स्निग्धा नरो मनुष्या वृत्रहत्येषु संग्रामेषु शूराः अदेवीरासुरीः विश्वाः सर्वाः मायाः अभिसन्तु अभिभवन्तु ॥ १० ॥

॥ इतिपंचमस्य प्रथमे चतुर्विंशोवर्गः ॥ २४ ॥

अथैकादशी–

माशूनेंअग्नेनिषंदामनृणांमाशेषसोवीरतापरित्वा ।
प्रजावंतीपुदुर्यासुदुर्यै ॥ ११ ॥

मा । शूने । अग्ने । नि । सदाम । नृणाम् । मा । अशेषसः ।
अवीरता । परि । त्वा । प्रजाऽवंतीषु । दुर्यासु । दुर्य ॥ ११ ॥

हे अग्ने शूने शून्ये पुत्रादिरहिते गृहे मानिषदाम न निवसाम नृणामन्येषां च गृहे मा- निषदाम दुर्य गृहेभ्योहित हे अग्ने अशेषसः अपुत्राः तोकम शेष इति पुत्रनामसु पाठात् अवीर- ता अवीरतया युक्ताश्च सन्तः त्वा त्वां परिचरन्तः प्रजावतीष्वेव दुर्यासु गृहेषु निवसाम॥११॥

अथ द्वादशी–

यमश्वीनित्यमुपयातियज्ञंप्रजावंन्तंस्वपत्यंक्षयंनः ।
स्वजन्मनाशेषसावावृधानम् ॥ १२ ॥

यम् । अश्वी । नित्यम् । उपऽयाति । यज्ञम् । प्रजाऽवन्तम्
सुऽअपत्यम् । क्षयम् । नः । स्वऽजन्मना । शेषसा । ववृधानम्॥१२॥

यं यत्तं यत्नाश्रयं अश्वी अश्ववानग्निः नित्यमुपयाति तं प्रजावन्तं भृत्यादिसहितं स्वपत्यं शोभनसंतानोपेतं स्वजन्मना औरसेन शेपसा पुत्रेण ववृधानं वर्धमानं क्षयं गृहं नोस्मभ्यं हे अग्ने देहीति शेषः ॥ १२ ॥

अथ त्रयोदशी–

पाहिनोअग्नेरक्षसोअजुंष्टात्पाहिधूर्तेररंरुषोअघायोः ।
त्वायुजापृतनायूँरभिष्याम् ॥ १३ ॥

पाहि । नः । अग्ने । रक्षसः । अजुंष्टात् । पाहि । धूर्तेः । अररुषः ।
अघऽयोः । त्वा । युजा । पृतनाऽयून् । अभि । स्याम् ॥ १३ ॥

हे अग्ने नोस्मान् अजुष्टात् अप्रीतिविषयात् रक्षसो राक्षसात् पाहि रक्ष किं च अररु-पोऽदातुः अघायोः पापमिच्छतः धूर्तेर्हिंसकात् पाहि । अपि च त्वा त्वया युजा सहायभूतेन पृतनायून् पृतनाकामान् अभिष्यां अहमभिभवेयं ॥ १३ ॥

अथ चतुर्दशी–

सेदग्निरग्नीँरत्यंस्त्वन्यान्यत्रंवाजीतनंयोवीळुपाणिः ।
सहस्रंपाथाअक्षरांसमेति ॥ १४ ॥

सः । इत् । अग्निः । अग्नीन् । अति । अस्तु । अन्यान् । यत्र । वाजी ।
तनंयः । वीळुऽपाणिः । सहस्रंऽपाथाः । अक्षरां । सम्ऽएति ॥ १४ ॥

सइत् सएवाग्निः आहवनीयादिरस्मदीयः अन्यानितरानन्यदीयानग्नीन् अत्यस्तु अति-भवतु यत्र यस्मिन्नग्नौ वाजी अशनवान् बलवान् वा वीळुपाणिः दृढहस्तः वीळु च्यौत्नमिति ब-लनामसु पाठात् सहस्रपाथाः बह्वन्नः बहुस्थानोवा बहूदकोवा तनयोस्मत्पुत्रः अक्षरा अक्षरेण क्षयरहितेन स्तोत्रेण समेति सम्यक् परिचरन्नेति समर्थपुत्रवत्तएवाग्निरन्यदीयानग्नीनभिभ-वतीति भावः ॥ १४ ॥

अथ पंचदशी–

सेदग्निर्योवंनुष्यतोनिपातिसमेद्धारमंहंसउरुष्यात् ।
सुजातासःपरिचरन्तिवीराः ॥ १५ ॥ २५ ॥

सः । इत् । अग्निः । यः । वनुष्यतः । निऽपाति । समऽएद्धारम् ।
अंहसः । उरुष्यात् । सुऽजातासः । परि । चरन्ति । वीराः॥१५॥२५॥

यः समेद्धारं प्रबोधकं वनुष्यतो हिंसकान् वनुष्यतिर्हंतिकर्मेतियास्कः । उरुष्यात् अधिकादंहसः पापाच निपाति अत्यन्तं रक्षति यं च सुजातासः सुजन्मानएव वीराः स्तोतारः सुतावा परिचरन्ति सइत् सएवाग्निः ॥१५॥

॥ इति पंचमस्य प्रथमे पंचविंशो वर्गः ॥२५॥

अथ षोडशी–

अयंसोअग्निराहुतःपुरुत्रायमीशानःसमिदिन्धेहविष्मान् ।
परियमेत्यध्वरेषुहोता ॥ १६ ॥

अयम् । सः । अग्निः । आऽहुतः । पुरुऽत्रा । यम् । ईशानः । सम् ।
इत् । इन्धे । हविष्मान् । परि । यम् । एति । अध्वरेषु । होता ॥१६॥

यमग्निं ईशानः समृद्धः ऐश्वर्यमिच्छन् वा हविष्मान् यजमानः समिदिन्धे सम्यग्दीपयतियं चाध्वरेषु हिंसारहितेषु यज्ञेषु होता देवानामाह्वाता पर्येति परिगच्छति सोयमग्निः पुरुत्रा बहुषु देशेषु बहुषु यज्ञेषुवा आहुतः आहुतिभिरभिहुतः ॥१६॥

अथ सप्तदशी–

त्वेअंग्नआहवनानिभूरीशानासआजुहुयामनित्या ।
उभाकृण्वन्तोवहतूमियेधे ॥ १७ ॥

त्वे इति । अग्ने । आऽहवनानि । भूरि । ईशानासः । आ । जुहुयाम ।
नित्या । उभा । कृण्वन्तः । वहतू इति । मियेधे ॥ १७ ॥

हे अग्ने त्वे त्वयि ईशानासः धनानामीश्वराः सन्तः नित्या नित्यान्यग्निहोत्रादीनि उभा उभौ वहतू वहनहेतू स्तोत्रं शस्त्रं च कृण्वन्तः कुर्वन्तः मियेधे यज्ञे भूरि बहूनि आहवनानि हवींषि आजुहुयाम आजुहवाम ॥ १७ ॥

---

१ नि० ५. २.

अथाष्टादशी—

इमोअंग्नेवीतर्तमानिहव्याजंस्रोवक्षिदेवतांतिमच्छ ।
प्रतिनईंसुरभीणिव्यन्तु ॥ १८ ॥

इमो इति । अग्ने । वीतऽतंमानि । हव्या । अजंस्रः । वक्षि ।
देवऽतांतिम् । अच्छ । प्रतिं । नः । ईम् । सुरभीणि । व्यन्तु ॥ १८ ॥

हे अग्ने त्वं अजस्रः अनवरतःसन् इमो इमानि वीततमानि अतिशयेन कान्तानि ह-
व्या हव्यानि देवतातिं देवानां समूहं अभिवक्षि वह अच्छ गच्छ च नोस्मदीयानि सुरभीणि
शोभनानि ईं एतानि हव्यानि देवाः प्रतिव्यन्तु प्रत्येकं कामयन्तां ॥ १८ ॥

अथैकोनविंशी—

मानोअग्नेवीरतेपरादादुर्वाससेमतयेमानोअस्यै ।
मानःक्षुधेमारक्षसंऋतावोमानोदमेमावनआजुहूर्थाः ॥ १९ ॥

मा । नः । अग्ने । अवीरते । परां । दाः । दुःऽवासंसे । अमंतये ।
मा । नः । अस्यै । मा । नः । क्षुधे । मा । रक्षसे । ऋतऽवः ।
मा । नः । दमें । मा । वने । आ । जुहूर्थाः ॥ १९ ॥

हे अग्ने नोस्मान् अवीरते अपुत्रतायै मापरादाः मादेहि दुर्वाससे दुष्टवस्त्रायच नोमापरा-
दाः अस्यै अमतये अभिहान्यै नोस्मान् मापरादाः क्षुधे अशनायायै नोस्मान् माच परादाः र-
क्षसे मलिने चास्मान् मापरादाः हेऋतावः सत्यवन्नग्ने नोस्मान् दमे गृहे माजुहूर्थाः माहिंसीः
हुर्छांकौटिल्येइति धातुः वनेचास्मान् माजुहूर्थाः ॥ १९॥

अथविंशी—

नूमेब्रह्माण्यग्नउच्छशाधित्वंदेवमघवंद्भ्यःसुषूदः ।
रातौस्यामोभयासआतेयूयंपातस्वस्तिभिःसदानः ॥२०॥२६॥

नु । मे । ब्रह्माणि । अग्ने । उत् । शशाधि । त्वम् । देव । मघवत्ऽभ्यः ।
सुसूदः । रातौ । स्याम । उभयांसः । आ । ते । यूयम् । पात ।
स्वस्तिऽभिः । सदा । नः ॥ २० ॥ २६ ॥

हे अग्ने मे मम मदर्थं ब्रह्माणि अन्नानि नु क्षिप्रमुच्छशाधि उत्कर्षेण शोधितानि कुरु। किं च हे देव द्योतमानाग्ने मघवद्भ्योहविष्मद्भ्योस्मभ्यं सुपूदः अन्नानि प्रेरय। ते त्वदीयायां रातौ दाने उभयासः स्तोत्रिणः शस्त्रिणश्च अथवा स्तुवन्तो यजमानाश्च वयं आस्याम अत्यर्थं भवेम नोस्मान् यूयं त्वं त्वत्परिवाराश्च सर्वे स्वस्तिभिरविनाशिभिर्मंगलैः। तथा च यास्कः—स्वस्तीत्यविनाशिनामास्तिरभिपूजितः स्वस्तीति[1] सदा पात रक्षत ॥ २० ॥

॥ इति पंचमस्य प्रथमे षड्विंशो वर्गः ॥ २६ ॥

अथैकविंशी—

त्वमग्नेसुहवोरण्वसंन्दृक्सुदीतीसूनोसहसोदिदीहि।
मात्वेसचातनयेनित्यआधङ्मावीरोअस्मन्नर्योविदासीत् ॥२१॥

त्वम्। अग्ने। सुऽहवः रण्वऽसंन्दृक्। सुऽदीती। सूनो इति। सहसः। दिदीहि। मा। त्वे इति। सचा। तनये। नित्ये। आ। धक्। मा। वीरः। अस्मत्। नर्यः। वि। दासीत् ॥ २१ ॥

सहसःसूनो सहसःसुत हे अग्ने सुहवः स्वाह्वानः रण्वसंदृक् रमणीयसंदर्शनस्त्वं सुदीती शोभनया दीप्त्या दिदीहि दीप्यस्व। किं च तनये नित्ये औरसे पुत्रे त्वे त्वं सचा सहायभूतः मा आधक् मा अभिधाक्षीः। अपि च अस्मत् पृथग्भूतः अस्माकं वा षष्ठ्यर्थे पंचमी वीरः पुत्रः नर्यो नरहितः माविदासीत् मोपक्षीयत ॥ २१ ॥

अथ द्वाविंशी—

मानोअग्नेदुर्भृतयेसचैषुदेवेद्धेष्वग्निषुप्रवोचः।
मातेअस्मान्दुर्मतयोभृमाच्चिद्देवस्यसूनोसहसोनशन्त ॥ २२ ॥

मा। नः। अग्ने। दुःऽभृतये। सचा। एषु। देवऽइद्धेषु। अग्निषु। प्र। वोचः। मा। ते। अस्मान्। दुःऽमतयः। भृमात्। चित्। देवस्य। सूनो इति। सहसः। नशन्त ॥ २२ ॥

---

[1] नि० ३.२१।

हे अग्ने सचा सहायभूतस्त्वं देवेद्धेषु ऋत्विग्भिः समिद्धेषु एष्वग्निषु दुर्भृतये कृच्छ्रभरणाय नोस्मान् मा प्रवोचः न ब्रूहि त्वत्सहायभूताअग्नयः यथा माम कृच्छ्रेणबिभृयुः तथा ब्रूहीत्यर्थः किं च सहसः सूनो हे बलस्य पुत्राग्ने देवस्य द्योतमानस्य ते तव दुर्मतयो निग्रहबुद्धयः भ्रमाच्चिद् भ्रमादपि अत्र संप्रसारणं छान्दसं प्रमादादपीत्यर्थः । अस्मान्मानशंत माप्यामुवंतु नशदितिव्याप्तिकर्मसु पाठात् ॥ २२ ॥

अथ त्रयोविंशी—

समर्तोअग्नेस्वनीकरेवानमर्त्येयआजुहोतिहव्यम् ।
सदेवतांवसुवनिंदधातियंसूरिरर्थीपृच्छमानएति ॥ २३ ॥

सः । मर्तः । अग्ने । सुऽअनीक । रेवान् । अमर्त्ये । यः ।
आऽजुहोति । हव्यम् । सः । देवता । वसुऽवनिम् । दधाति ।
यम् । सूरिः । अर्थी । पृच्छमानः । एति ॥ २३ ॥

स्वनीक सुतेजस्क हे अग्ने अमर्त्ये अमनुष्ये देवतात्मनि त्वयि हव्यं हविः यआजुहोति समर्तो मनुष्यो रेवान् धनवान् भवति यं मर्त्यं सूरिः प्राज्ञः अर्थी धनादिकामः पृच्छमानः असावुदारः क्वास्तइतिपृच्छन् एति अभिगच्छति स एव मनुष्यः देवता देवतायां वसुवनिं धनपोषं दधाति धारयति यद्वा सदेवताग्निः वसुवनिं यजमानं दधाति धारयति यमग्निं सूरिः स्तोता अर्थी प्रयोजनवान् पृच्छमानः कोसावग्निरिति पृच्छमानएति ॥ २३ ॥

अथ चतुर्विंशी—

महोनोअग्नेसुवितस्यविद्वान्रयिंसूरिभ्यआवहाबृहन्तम् ।
येनवयंसहसावन्मदेमाविक्षितासआयुषासुवीराः ॥ २४ ॥

महः । नः । अग्ने । सुवितस्य । विद्वान् । रयिम् । सूरिऽभ्यः ।
आ । वह । बृहन्तम् । येन । वयम् । सहसाऽवन् । मदेम ।
अविऽक्षितासः । आयुषा । सुऽवीराः ॥ २४ ॥

हे अग्ने मे मम मदर्थं ब्रह्माणि अन्नानि नु क्षिप्रमुच्छशाधि उत्कर्षेण शोधितानि कुरु। किं च हे देव द्योतमानाग्ने मघवद्भ्योहविष्मद्भ्योस्मभ्यं सुपूदः अन्नानि प्रेरय। ते त्वदीयायां रातौ दाने उभयासः स्तोतिणः शस्त्रिणश्च अथवा स्तुवन्तो यजमानाश्च वयं आस्याम अत्यर्थं भवेम नोस्मान् यूयं त्वं त्वत्परिवाराश्च सर्वे स्वस्तिभिरविनाशिभिर्मंगलैः। तथा च यास्कः—स्वस्तीत्यविनाशिनामास्तिरभिपूजितः स्वस्तीति[1] सदा पात रक्षत ॥ २० ॥

॥ इति पंचमस्य प्रथमे षड्विंशो वर्गः ॥ २६ ॥

अथैकविंशी—

त्वमग्नेसुहवोरण्वसंन्दृक्सुदीतीसूनोसहसोदिदीहि।
मात्वेसचातनयेनित्यआधङ्मावीरोअस्मन्नर्योविदासीत् ॥२१॥

त्वम्। अग्ने। सुऽहवः रण्वऽसंन्दृक्। सुऽदीती। सूनो इति। सहसः। दिदीहि। मा। त्वे इति। सचा। तनये। नित्ये। आ। धक्। मा। वीरः। अस्मत्। नर्यः। वि। दासीत् ॥ २१ ॥

सहसःसूनो सहसःसुत हे अग्ने सुहवः स्वाह्वानः रण्वसंदृक् रमणीयसंदर्शनस्त्वं सुदीती शोभनया दीप्त्या दिदीहि दीप्यस्व। किं च तनये नित्ये औरसे पुत्रे त्वे त्वं सचा सहायभूतः मा आधक् मा अभिधाक्षीः। अपि च अस्मत् पृथग्भूतः अस्माकं वा षष्ठ्यर्थे पंचमी वीरः पुत्रः नर्यो नरहितः माविदासीत् मोपक्षीयत ॥ २१ ॥

अथ द्वाविंशी—

मानोअग्नेदुर्भृतयेसचैषुदेवेद्धेष्वग्निषुप्रवोचः।
मातेअस्मान्दुर्मतयोभृमाच्चिद्देवस्यसूनोसहसोनशन्त ॥ २२ ॥

मा। नः। अग्ने। दुःऽभृतये। सचा। एषु। देवऽइद्धेषु। अग्निषु। प्र। वोचः। मा। ते। अस्मान्। दुःऽमतयः। भृमात्। चित्। देवस्य। सूनो इति। सहसः। नशन्त ॥ २२ ॥

[1] नि० ३.२१।

हे अग्ने सचा सहायभूतस्त्वं देवेद्धेषु ऋत्विग्भिः समिद्धेषु एष्वग्निषु दुर्भृतये कृच्छ्रभरणाय नोस्मान् मा प्रवोचः न ब्रूहि त्वत्सहायभूताअग्नयः यथा माम कृच्छ्रेणबिभ्रयुः तथा ब्रूहीत्यर्थः किं च सहसः सूनो हे बलस्य पुत्राग्ने देवस्य द्योतमानस्य ते तव दुर्मतयो निग्रहबुद्धयः भ्रमाच्चिद् भ्रमादपि अत्र संप्रसारणं छान्दसं प्रमादादपीत्यर्थः । अस्मान्मानशंत माभ्यामुवंतु नशदितिव्याप्तिकर्मसु पाठात् ॥ २२ ॥

अथ त्रयोविंशी—

समर्तोअग्नेस्वनीकरेवानमर्त्येयआजुहोतिहव्यम् ।
सदेवतावसुवनिंदधातियंसूरिरर्थीपृच्छमानएति ॥ २३ ॥

सः । मर्तः । अग्ने । सुऽअनीक । रेवान् । अमर्त्ये । यः ।
आऽजुहोति । हव्यम् । सः । देवता । वसुऽवनिम् । दधाति ।
यम् । सूरिः । अर्थी । पृच्छमानः । एति ॥ २३ ॥

स्वनीक सुतेजस्क हे अग्ने अमर्त्ये अमनुष्ये देवतात्मनि त्वयि हव्यं हविः यआजुहोति समर्तो मनुष्यो रेवान् धनवान् भवति यं मर्त्यं सूरिः प्राज्ञः अर्थी धनादिकामः पृच्छमानः असावुदारः क्वास्तइतिपृच्छन् एति अभिगच्छति स एव मनुष्यः देवता देवताभ्यो वसुवनिं धनपोषं दधाति धारयति यद्वा सदेवताग्निः वसुवनिं यजमानं दधाति धारयति यमग्निं सूरिः स्तोता अर्थी प्रयोजनवान् पृच्छमानः कोसावग्निरिति पृच्छमानएति ॥ २३ ॥

अथ चतुर्विंशी—

महोनोअग्नेसुवितस्यविद्वान्रयिंसूरिभ्यआवहाबृहन्तम् ।
येनवयंसहसावन्मदेमाविक्षितासआयुषासुवीराः ॥ २४ ॥

महः । नः । अग्ने । सुवितस्य । विद्वान् । रयिम् । सूरिऽभ्यः ।
आ । वह । बृहन्तम् । येन । वयम् । सहसाऽवन् । मदेम ।
अविऽक्षितासः । आयुषा । सुऽवीराः ॥ २४ ॥

हे अग्ने नोस्मदीयस्य महो महतः सुवितस्य कल्याणस्य कर्मणो विद्वान् अस्मदीयं कल्याणं कर्म जानन्नित्यर्थः। त्वं सूरिभ्यः स्तोतृभ्योस्मभ्यं बृहन्तं महान्तं रायिं धनं आवह रयिमेव विशिनष्टि हे सहसावन् बलयन्नग्ने येन धनेन वयं स्तोतारः अविक्षितासः अविक्षीणाः आयुषा पूर्णायुषः सुवीराः कल्याणपुत्रपौत्राश्च सन्तो मदेम हृष्येम ॥ २४ ॥

अथ पंचविंशी--

नूमेब्रह्मांण्यग्नउच्छंशाधित्वंदेवमघवंद्भ्यःसुषूदः ।
रातौस्यामोभयांसआतेयूयंपांतस्वस्तिभिःसदांनः ॥२५॥२७॥

नु । मे । ब्रह्मांणि । अग्ने । उत् । शशाधि । त्वम् । देव ।
मघवंत्ऽभ्यः । सुसूदः । रातौ । स्याम । उभयांसः । आ । ते ।
यूयम् । पात । स्वस्तिऽभिः । सदां । नः ॥ २५॥ २७ ॥

इयमृक् प्रागेव व्याख्याता ॥ २५ ॥

॥ इति पंचमस्य प्रथमे सप्तविंशोवर्गः ॥ २७ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येण विरचितेमाधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके प्रथमोध्यायः समाप्तः ॥१॥

॥श्रीगणेशाय नमः॥

यस्य निःश्वसितं वेदा योवेदेभ्योखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥ १ ॥

जुषस्वनइत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं आप्रमन्त्रोक्तत्वात् इदं तनूनपाद्रहितं समिद्धाद्या अग्निविशेषाः प्रत्यृचं देवताउक्ताः तथाचानुक्रम्यते—जुषस्वैकादशाप्रमिति। पशाविष्टाविदमाप्रीसूक्तं सूत्रितं च—जुषस्वनःसमिधमिति वसिष्ठानामिति। पत्नीसंयाजे त्वाष्ट्रयागस्ययाज्या त्वाष्ट्रे पशावपिपुरोडाशस्यानुवाक्येयमिति पूर्वमुक्तम्।

तत्र प्रथमा—

ॐम् जुषस्वनःसमिधमग्नेअद्यशोचाबृहद्यजतंधूममृण्वन्।
उपस्पृशदिव्यंसानुस्तूपैःसंरश्मिभिस्ततनःसूर्यस्य॥ १॥

जुषस्व। नः। सम्ऽइधम्। अग्ने। अद्य। शोच। बृहत्। यजतम्। धूमम्। ऋण्वन्। उप। स्पृश। दिव्यम्। सानु। स्तूपैः। सम्। रश्मिऽभिः। ततनः। सूर्यस्य॥ १॥

हे अग्ने नोस्माकं समिधं अद्य जुषस्व सेवस्व यजतं यजनीयं प्रशस्तं धूमं ऋण्वन् प्रेरयन् बृहदत्यन्तं शोच दीप्यस्व च किंच दिव्यमन्तरिक्षभवं सानु समुच्छ्रितं स्तूपैः तैः रश्मिभिः उपस्पृश अपि च सूर्यस्य रश्मिभिस्तेजोभिः संततनः संगच्छस्व॥ १॥

अथ द्वितीया—

नराशंसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः।
येसुक्रतवःशुचयोधियंधाःस्वदन्तिदेवाउभयानिहव्या॥ २॥

नराशंसस्य। महिमानम्। एषाम्। उप। स्तोषाम। यजतस्य। यज्ञैः। ये। सुऽक्रतवः। शुचयः। धियम्ऽधाः। स्वदन्ति। देवाः। उभयानि। हव्या॥ २॥

ये देवाः सुकृतवः सुप्रज्ञाः सुकर्माणोवा शुचयो दीप्तिमन्तो धियंधाः कर्मणांधारयितारः उभयानि सौमिकानि च हविःसंस्थादीनि च हव्या हव्यानि स्वदंति स्वदयन्ति तेषामेषांमध्ये यज्ञैर्हविर्भिः स्तोत्रैर्वा यजतस्य यजनीयस्य नराशंसस्य नरैः प्रशंसनीयस्याग्निविशेषस्य महिमानं महत्त्वं उपस्तोषाम वयमुपस्तुमः तथा च यास्कः—नराआसीनाःशंसंत्यग्निरितिशाकपूणिर्नरैः प्रशस्योभवति तस्यैषा भवति नराशंसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैर्येसुकर्माणः शुचयो धियंधारयितारःस्वदंतुदेवाउभयानिहव्यापिसोमंचेतराणिचेति[1] ॥ २ ॥

अथ तृतीया—

ई॒ळेन्यं॑वो॒असु॑रंसु॒दक्ष॑म॒न्तर्दू॒तंरोद॑सीस॒त्यवा॑चम् ।
म॒नु॒ष्वद॒ग्निंमनु॑नास॒मिद्धं॒सम॑ध्व॒राय॒सद॒मिन्म॑हेम ॥ ३ ॥

ई॒ळेन्य॑म् । व॒ः । असु॑रम् । सु॒ऽदक्ष॑म् । अ॒न्तः । दू॒तम् । रोद॑सी॒ इति॑ । स॒त्यऽवा॑चम् । म॒नु॒ष्वत् । अ॒ग्निम् । मनु॑ना । सम्ऽइ॑द्धम् । सम् । अ॒ध्व॒राय॑ । सद॑म् । इत् । म॒हे॒म ॥ ३ ॥

हे अध्वर्यवः वोयूयं ईळेन्यं स्तुत्यमसुरं बलवन्तं सुदक्षं सुप्रज्ञः रोदसी रोदस्योरन्तर्मध्ये दूतं देवानां हविर्वहनार्थं चरन्तं सत्यवाचं मनुष्वत् मनुष्यवत् मनुना समिद्धं यथेदानीं मनुष्याः समिन्धते तथा पूर्वं मनुना प्रजापतिना समिद्धमग्निमध्वराय यज्ञाय सदमित् सदैव संमहेम संपूजयत मध्यमपुरुषस्य व्यत्ययेनोत्तमपुरुषत्वम् ॥ ३ ॥

अथ चतुर्थी—

स॒प॒र्यवो॒भर॑माणाअ॒भि॒ज्ञु॒प्रवृ॑ञ्जते॒नम॑साब॒र्हिर॒ग्नौ ।
आ॒जु॒ह्वा॑नाघृ॒तपृ॑ष्ठं॒पृष॑द्व॒दध्व॑र्यवोह॒विषा॑मर्जयध्वम् ॥ ४ ॥

स॒प॒र्यव॑ः । भर॑माणाः । अ॒भि॒ऽज्ञु । प्र । वृ॒ञ्ज॒ते॒ । नम॑सा । ब॒र्हिः । अ॒ग्नौ । आ॒ऽजु॒ह्वा॑नः । घृ॒तऽपृ॑ष्ठम् । पृष॑त्ऽवत् । अध्व॑र्यवः । ह॒विषा॑ । म॒र्ज॒य॒ध्व॒म् ॥ ४ ॥

---

1 नि० ८. ७.।

सपर्यवः परिचरणमिच्छन्तः अभिज्ञु अभिगतजानुकं भरणाः पदैर्भरन्तः बर्हिः नमसा हविषासहाग्नौ प्रवृञ्जते प्रभरन्ति । तदेव विशदयति हे अध्वर्यवः घृतपृष्ठं घृतसंसिक्तपृष्ठं पृषद्वत् स्थूलबिंदुभिर्युक्तं बर्हिर्हविषासह आजुह्वानाः मर्जयध्वं अग्निं परिचरत ॥ ४ ॥

अथ पञ्चमी—

स्वाध्यो३ विदुरोदेवयन्तोऽशिश्रयूरथयुर्देवताता ।
पूर्वीशिशुंनमातरारिहाणेसमग्रुवोनसमनेष्वञ्जन् ॥ ५ ॥ १ ॥

सुऽआध्यः । वि । दुरः । देवऽयन्तः । अशिश्रयुः । रथऽयुः ।
देवऽताता । पूर्वी इति । शिशुम् । न । मातरा । रिहाणे इति ।
सम् । अग्रुवः । न । समनेषु । अञ्जन् ॥ ५ ॥ १ ॥

स्वाध्यः सुकर्माणः देवयन्तो देवकामाः यजमानाः रथयुः रथकामाश्च जसि पूर्वसवर्णो-ह्रस्वश्च देवताता देवतातौ यज्ञे दुरो यज्ञगृहद्वाराणि व्यशिश्रयुः आश्रितवन्तः । किं च समनेषु यज्ञेषु पूर्वी प्राचीने प्रागग्रे जूहूपभृतौ शिशुंन वत्समिव मातरौ गावौ रिहाणे अग्निं लिहाने अग्रुवोन यथानद्यः क्षेत्राण्युदकेन तद्वत् समञ्जन् अध्वर्यव आज्येन समञ्जन्ति ॥ ५ ॥

॥ इति पञ्चमस्य द्वितीये प्रथमो वर्गः ॥ १ ॥

अथ षष्ठी—

उतयोषणेदिव्येमहीनउषासानक्तासुदुघेवधेनुः ।
बर्हिषदापुरुहूतेमघोनीआयज्ञियेसुविताययश्रयेताम् ॥ ६ ॥

उत । योषणे इति । दिव्ये इति । मही इति । नः । उषसानक्ता ।
सुदुघाऽइव । धेनुः । बर्हिःऽसदा । पुरुहूते इतिपुरुऽहूते ।
मघोनी इति । आ । यज्ञिये इति । सुविताय । श्रयेताम् ॥ ६ ॥

उतापिच योषणे युवत्यौ स्त्रीरूपे वा दिव्ये दिविभवे मही महत्यौ बर्हिषदा बर्हिषि सीदन्त्यौ पुरुहूते बहुभिः स्तुते मघोनी धनवत्यौ यज्ञिये यज्ञार्हे उषासानक्ता अहोरात्रे सुदुघेव धेनुः कामधुग्धेनुरिव नोस्मान् सुविताय कल्याणाय आश्रयेताम् ॥ ६ ॥

अथ सप्तमी–

विप्रा॑य॒ज्ञेषु॒मानु॑षेषु॒का॒रू॒मन्ये॑वां॒जा॒तवे॑दसा॒यज॑ध्यै ।
ऊ॒र्ध्वंनो॑अध्व॒रंकृ॑तं॒हवे॑षु॒तादे॒वेषु॑वनथो॒वार्या॑णि ॥ ७ ॥

विप्रा॑ । य॒ज्ञेषु॑ । मानु॑षेषु । का॒रू इति॑ । मन्ये॑ । वा॒म् । जा॒तऽवे॑दसा ।
यज॑ध्यै । ऊ॒र्ध्वम् । नः॒ । अ॒ध्व॒रम् । कृ॒तम् । हवे॑षु । ता ।
दे॒वेषु॑ । व॒न॒थः॒ । वार्या॑णि ॥ ७ ॥

हे दैव्यौ होतारौ विप्रा मेधाविनौ जातवेदसा जातधनौ मानुषेषु मनुष्यैः क्रियमाणेषु यज्ञेषु कारू कर्मणां कर्तारौ वां युवां यजध्यै यष्टुं मन्ये स्तौमि । किं च हवेषु हवनेषु स्तोत्रेषु सत्सु नोस्माकमध्वरमकुटिलं यज्ञं ऊर्ध्वं देवाभिमुखं कृतं कुरुतं । च अपिच ता तौ युवां देवेषु विद्यमानानि वार्याणि धनानि वनथः संभजथः तान्यस्मभ्यं संप्रयच्छथइत्यर्थः ॥ ७ ॥

अथाष्टमी–

आभार॑तीभार॑तीभिः॒स॒जोषा॒इळा॑दे॒वैर्म॑नु॒ष्ये॑भिर॒ग्निः ।
सर॑स्वतीसारस्व॒तेभि॑र॒र्वाक्ति॒स्रोदे॒वीर्ब॒र्हिरेदंस॑दन्तु ॥ ८ ॥

आ । भार॑ती । भार॑तीभिः । स॒ऽजोषाः॑ । इळा॑ । दे॒वैः । म॒नु॒ष्ये॑भिः ।
अ॒ग्निः । सर॑स्वती । सा॒र॒स्व॒तेभिः॑ । अ॒र्वाक् । ति॒स्रः । दे॒वीः ।
ब॒र्हिः । आ । इ॒दम् । स॒द॒न्तु॒ ॥ ८ ॥

एतदादि ऋक्चतुष्टयं द्वितीयाष्टकस्याष्टमाध्याये यद्यपि व्याख्यातं तथापि व्यवधानात् संक्षेपतोत्रापि व्याख्यायते । भारती भरतस्यादित्यस्यपत्नी भारतीभिः सजोषाः सहिता इळा मनुष्येभिः मनुष्यलोकभवैः देवैः सार्धं अग्निरागच्छतु । सरस्वती सारस्वतेभिः सारस्वतैः मध्यमस्थानैर्देवैः सार्धं अर्वागस्मदभिमुखमागच्छतु आगत्य तिस्रोदेवीः देव्यः प्रथमार्थे द्वितीया बर्हिरिदमासदन्तु ॥ ८ ॥

अथ नवमी–

तन्न॑स्तु॒रीप॒मध॑पोष॒यि॒त्नुदेव॑त्वष्ट॒र्विर॑रा॒णस्य॑स्व ।
यतो॑वी॒रः॑क॒र्म॒ण्यः॑सु॒दक्षो॑यु॒क्तग्रा॑वा॒जाय॑ते॒दे॒वका॑मः ॥ ९ ॥

तत् । नः । तुरीपम् । अर्ध । पोषयित्नु । देव । त्वष्टः । वि । रराणः ।
स्यस्वेति स्यस्व । यतः । वीरः । कर्मण्यः । सुऽदक्षः ।
युक्तऽग्रावा । जायते । देवऽकामः ॥ ९ ॥

देव द्योतमान हे त्वष्टः रराणो रममाणस्त्वं नोस्माकं तुरीपं त्वरितमाप्नुवत् पोषयित्नु पोषकरं तद्रेतः विस्यस्व विशेषेणावसानं प्रापय विमोचयेत्यर्थः । यतोरेतसः कर्मण्यः कर्मसु साधुः सुदक्षः सुबलो युक्तग्रावा सोमसुत् देवकामो वीरः पुत्रो जायते ॥ ९ ॥

अथ दशमी–

वनस्पतेवसृजोपदेवानग्निर्हविःशमितासूदयाति ।
सेदुहोतासत्यतरोयजातियथादेवानांजनिमानिवेद ॥ १० ॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः ।
शमिता । सूदयाति । सः । इत् । ॐ इति । होता । सत्यऽतरः ।
यजाति । यथा । देवानाम् । जनिमानि । वेद ॥ १० ॥

हे वनस्पते देवानुपावसृज । अथ परोक्षस्तुतिः अग्निर्वनस्पतिः शमिता शामित्ररूपःसन् हविः सूदयाति प्रेरयतु सेत् सएव वनस्पतिः होता देवानामाह्वाता सत्यतरोपिसन् यजाति यजतु देवानां जनिमानि जननानि यथा स्वयं वेद तथा ॥ १० ॥

अथैकादशी–

आयाह्यग्नेसमिधानोअर्वाङिन्द्रेणदेवैःसरथंतुरेभिः ।
बर्हिर्नआस्तामदितिःसुपुत्राःस्वाहादेवाअमृतामादयन्ताम् ॥ ११ ॥ २ ॥

आ । याहि । अग्ने । सम्ऽइधानः । अर्वाङ् । इन्द्रेण । देवैः ।
सऽरथम् । तुरेभिः । बर्हिः । नः । आस्ताम् । अदितिः ।
सुऽपुत्राः । स्वाहा । देवाः । अमृताः । मादयन्ताम् ॥ ११ ॥ २ ॥

हे अग्ने समिधान समिध्यमानः अर्वाङस्मदभिमुखस्त्वं इन्द्रेण तुरेभिः त्वरितैर्देवैश्च सरथं समानरथं यथा भवति तथा आयाहि आगच्छ नोस्माकं बर्हिरध्यास्तां । अदितिश्च सुपुत्राः कल्याणपुत्राः स्वाहा देवाश्च सर्वे अमृताः सन्तोमादयन्तामिति ॥ ११ ॥

॥ इति पञ्चमस्य द्वितीये द्वितीयो वर्गः ॥ २ ॥

अग्निंवोदेवमिति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं अत्रेयमनुक्रमणिका—अग्निंवोदशेति अग्निंवोदेवमित्येतदादीनि दशसूक्तानि तृतीयचतुर्थवर्जितानि मातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छन्दसि आश्विनशस्त्रे च विनियुक्तानि सूत्रितंच-अग्निंवोदेवमिति दशानां तृतीयचतुर्थे उद्धरेदिति । व्युह्ले दशरात्रेष्टमेहनीदं सूक्तं आज्यशस्त्रं सूत्यते हि—द्वितीयस्याग्निंवोदेवमित्याज्यमिति ।

तत्र प्रथमा—

अ॒ग्निं वो॑ दे॒वम॒ग्निभिः॑ स॒जोषा॒ यजि॑ष्ठं दू॒तम॑ध्व॒रे कृ॑णुध्वम् ।
यो मर्त्ये॑षु॒ निध्रु॑विॠ॒तावा॒ तपु॑र्मू॒र्धा घृ॒तान्नः॑ पाव॒कः ॥ १ ॥

अ॒ग्निम् । वः॒ । दे॒वम् । अ॒ग्निऽभिः॑ । स॒ऽजोषाः॑ । यजि॑ष्ठम् ।
दू॒तम् । अ॒ध्व॒रे । कृ॒णु॒ध्व॒म् । यः । मर्त्ये॑षु । निऽध्रु॑विः । ऋ॒तऽवा॑ ।
तपुः॑ऽमूर्धा । घृ॒तऽअ॑न्नः । पा॒व॒कः ॥ १ ॥

हेदेवाः वो यूयं देवं द्योतमानं अग्निभिरन्यैरग्निभिः सजोषाः सजोषसं सहितं द्वितीयार्थे प्रथमा यजिष्ठं यष्टृतममग्निं अध्वरे कौटिल्यरहिते यज्ञे दूतं कृणुध्वं कुरुत योग्निर्देवोपिसन् मर्त्येषु निध्रुविः नितरां ध्रुवस्तिष्ठति ऋतावा यज्ञवान् सत्यवान् वा तपुर्मूर्धा तापकतेजाः घृतान्नः पावकः शोधकश्च भवति ॥ १ ॥

अथ द्वितीया—

प्रोथ॒दश्वो॒ न यव॑सेवि॒ष्यन्य॒दा म॒हः सं॒वर॑णा॒द्व्यस्था॑त् ।
आद॑स्य॒ वातो॒ अनु॑ वाति शो॒चिरध॑स्म ते॒ व्रज॑नं कृ॒ष्णम॑स्ति ॥ २ ॥

प्रोथंत् । अश्वंः । न । यवंसे । अविष्यन् । यदा । महः ।
सम्ऽवरणात् । वि । अस्थात् । आत् । अस्य । वातः । अनुं । वाति ।
शोचिः । अधं । स्म । ते । व्रजनम् । कृष्णम् । अस्ति ॥ २॥

यवसे घासे अविष्यन् भक्षयन् प्रोथत् शब्दं कुर्वन् संचरन्वा अश्वोन अश्वइव महो-महतः संवरणान्निरोधात् दावरूपोग्निः यदा व्यस्थात् सततेषु वृक्षेषु वितिष्ठते आत् तदा अस्याग्नेः शोचिरर्चिरनुवातो वाति । अथ प्रत्यक्षस्तुतिः अधअनन्तरं हे अग्ने ते तव व्रजनं वर्त्म कृष्णमस्ति भवति स्मेतिपूरणः ॥ २ ॥

अथ तृतीया–

उद्यस्यंतेनवंजातस्यवृष्णोग्नेचरंन्त्यजरांइधानाः ।
अच्छाद्यामंरुपोधूमएंतिसंदूतोअंग्नईयंसेहिदेवान् ॥ ३ ॥

उत् । यस्यं । ते । नवंऽजातस्य । वृष्णंः । अग्ने । चरंन्ति ।
अजरांः । इधानाः । अच्छं । द्याम् । अरुषः । धूमः । एति ।
सम् । दूतः । अग्ने । ईयंसे । हि । देवान् ॥ ३ ॥

हे अग्ने नवजातस्य नवप्रादुर्भावस्य वृष्णोवर्षितुर्यस्य ते तव अजराः जरारहिताः ज्वालाः इधानाः समिध्यमानाः उच्चरन्त्युद्गच्छन्ति । अस्य अरुषः अरोचमानो धूमोद्यामच्छ दिवमभिएति अभिगच्छति । हे अग्ने त्वं दूतः सन् समीयसेहि संप्राप्नोषिच ॥ ३ ॥

अथ चतुर्थी–

वियस्यंतेपृथिव्यांपाजोअश्रेंत्तृषुयदन्नांसमवृंक्तजम्भैः ।
सेनेंवसृष्टाप्रसिंतिष्टएतियवंनदस्मजुह्वाविवेक्षि ॥ ४ ॥

वि । यस्यं । ते । पृथिव्याम् । पाजंः । अश्रेंत् । तृषु । यत् ।
अन्नां । सम्ऽअर्वृक्त । जम्भैः । सेनांऽइव । सृष्टा । प्रऽसिंतिः ।
ते । एति । यवंम् । न । दस्म । जुह्वां । विवेक्षि ॥ ४ ॥

हे अग्ने यस्य दावरूपस्य ते तव पाजस्तेजः पृथिव्यां भूम्यां वृषु क्षिप्रं व्यश्रेव् विश्रयति यदा अन्नानि काष्ठादीनि जंभैर्दन्तैः ज्वालाभिरित्यर्थः समवृक् वृंक्ते खादति तथा सेनेव सृष्टा उद्युक्ता ते तव प्रसितिर्ज्वाला एति गच्छति । दस्म हे दर्शनीयाग्ने त्वं यवंन यवमिव जुह्वा ज्वालया विवेक्षि काष्ठादीनि भक्षयसि व्याप्नोषि वा ॥ ४ ॥

अथ पञ्चमी—

तमिद्दोपातमुषसियविंष्ठमग्निमत्यंनमर्जयन्तुनरः ।
निशिशांनाअतिथिमस्ययोनौदीदायंशोचिराहुतस्यवृष्णः ॥ ५ ॥३॥

तम् । इत् । दोषा । तम् । उषसि । यविष्ठम् । अग्निम् । अत्यम् ।
न । मर्जयन्त । नरः । निऽशिशानाः । अतिथिम् । अस्य । योनौ ।
दीदाय । शोचिः । आऽहुतस्य । वृष्णः ॥ ५ ॥ ३ ॥

यविष्ठं युवतमं अतिथिं अतिथिवत्पूज्यं तमित् तमेवाग्निं दोषा दोषायां रात्रौउषसि वासरेपि तमेवास्याग्नेर्योनौ स्थाने आवहनीयायतने धिष्ण्ये वा निशिशानाः दीपयन्तो नरो मनुष्याः अत्यं सततगमनयुक्तं वोढारमश्वमिव मर्जयन्त परिचरन्ति । आहूतस्य च वृष्णः कामानां वर्षितुरग्नेस्तस्य शोचिर्ज्वाला दीदाय दीप्यते ॥ ५ ॥

॥ इति पञ्चमस्य द्वितीये तृतीयो वर्गः ॥ ३ ॥

अथ षष्ठी—

सुसंदृक्तेस्वनीकप्रतीकंवियद्रुक्मोनरोचसउपाके ।
दिवोनतेतन्यतुरेतिशुष्मश्चित्रोनसूरःप्रतिचक्षिभानुम् ॥ ६ ॥

सुऽसन्दृक् । ते । सुऽअनीक । प्रतीकम् । वि । यत् । रुक्मः ।
न । रोचसे । उपाके । दिवः । न । ते । तन्यतुः । एति । शुष्मः ।
चित्रः । न । सूरः । प्रति । चक्षि । भानुम् ॥ ६ ॥

स्वनीक हेसुतेजस्काग्ने यदा रुक्मोन सूर्यइव सुवर्णमिव वा उपाके अन्तिके विरोचसे विशेषेण दीप्यसे तदा ते तव प्रतीकं रूपमंगंवा सुसंदृक् सुसंदर्शनं भवति । किं च ते तव शुष्मो दिवोन्तरिक्षाद् तन्यतुर्न अशनिरिव एति निर्गच्छति । चित्रोदर्शनीयः सूरोन सूर्यइव भानुं स्वां दीप्तिं प्रतिचक्षि प्रदर्शयसि ॥ ६ ॥

अथ सप्तमी–

यथा॑वः॒स्वाहा॒ग्नये॒दाशे॑म॒परी॒ळाभि॑र्घृ॒तव॑द्भिश्चह॒व्यैः ।
तेभि॑र्नोअग्ने॒अमि॑तै॒र्महो॑भिः॒श॒तंपू॒र्भिराय॑सीभि॒र्निपा॑हि ॥ ७ ॥

यथा॑ । वः॒ । स्वाहा॑ । अ॒ग्नये॑ । दाशे॑म । परि॑ । इळा॑भिः ।
घृ॒तव॑त्ऽभिः । च॒ । ह॒व्यैः । तेभिः॑ । नः॒ । अ॒ग्ने॒ । अमि॑तैः ।
महः॑ऽभिः । श॒तम् । पूः॒ऽभिः । आय॑सीभिः । नि । पा॒हि॒ ॥ ७ ॥

हे अग्ने अग्नये अग्रस्य नेत्रे वः तुभ्यं स्वाहा स्वाहुतं हविः किं च यथा वयमिळाभिः गोविकारैः क्षीरादिभिः घृतवद्भिः घृतसहितैः हव्यैः पुरोडाशादिभिश्च दाशेम परिचरेम । तथा त्वमपि तेभिः प्रसिद्धैः अमितैः अपरिमितैः महोभिस्तेजोभिः शतमपरिमिताभिः आयसीभिर्हिरण्मयीभिः रुक्मं अय इति हिरण्यनामसु पाठात् पूर्भिर्नगरीभिरिव नोस्मान् निपाहि नितरां रक्ष ॥ ७ ॥

अथाष्टमी–

यावा॒तिस॒न्तिदा॒शुषे॒अधृ॑ष्टा॒गिरो॒वा॒याभि॑र्नृ॒वती॑रुरु॒ष्याः ।
ताभि॑र्नः॒सूनोसहसो॒निपा॑हि॒स्मत्सू॒रीञ्ज॑रि॒तॄञ्जा॑तवेदः ॥ ८ ॥

यः । वा॒ । ते॒ । सन्ति॑ । दा॒शुषे॑ । अधृ॑ष्टाः । गिरः॑ । वा॒ । याभिः॑ ।
नृ॒ऽवतीः॑ । उ॒रु॒ष्याः । ताभिः॑ । नः॒ । सूनो॒ इति॑ । स॒ह॒सः॒ ।
नि । पा॒हि॒ । स्मत् । सू॒रीन् । ज॒रि॒तॄन् । जा॒त॒ऽवे॒दः॒ ॥ ८ ॥

सहसःसूनो हे बलस्यपुत्र जातवेदाग्ने दाशुषे दाशुषस्ते तव यावा याश्च ज्वालाः सन्ति अधृष्टाः रक्षोभिरप्रधृषिताः गिरोवा गिरश्च सन्ति याभिर्गीर्भिर्नृवतीः पुत्रवतीः प्रजा उरुष्याः रक्षेः ताभिरुभयीभिर्नोस्मान् स्मदिति प्रशस्तवचनः प्रशस्तान् सूरीन् हविषां प्रेरकान् जरितॄन् स्तोतॄंश्च निपाहि नितरां रक्ष ॥ ८ ॥

अथ नवमी–

निर्यत्पू॒तेव॒स्वधि॑तिः॒शुचि॒र्गात्स्वया॑कृ॒पात॒न्वा॒३॒॑रोच॑मानः ।
आयोमा॒त्रोरु॒शेन्यो॒जनि॑ष्टदे॒वय॑ज्याय॒सु॒क्रतुः॒पाव॒कः ॥ ९ ॥

निः । यत् । पूताऽइंव । स्वऽधितिः । शुचिः । गात् । स्वया ।
कृपा । तन्वा । रोचमानः । आ । यः । मात्रोः । उशेन्यः ।
जनिष्ट । देवऽयज्याय । सुऽक्रतुः : पावकः ॥ ९ ॥

यद्यदा शुचिरग्निः स्वया स्वकीयया तन्वा ततया कृपा कृपया दीप्त्या रोचमानः पूतेव स्वधितिः तीक्ष्णीकृता स्वधितिरिव निर्गात् काष्ठान्निर्गच्छति तदानीं देवयज्याय भवति तदेव विशदयति योग्निः उशेन्यः कमनीयः सुक्रतुः सुकर्मा पावकः शोधकश्च मात्रोररण्योः आजनिष्ट आजायत सदेवयज्यायभवतीति ॥ ९ ॥

अथ दशमी—

एतानोअग्नेसौभगादिदीह्यपिक्रतुंसुचेतसंवतेम ।
विश्वास्तोतृभ्योगृणतेचसन्तुयूयंपातस्वस्तिभिःसदानः ॥१०॥४॥

एता । नः । अग्ने । सौभंगा । दिदिहि । अपि । क्रतुम् ।
सुऽचेतसम् । वतेम । विश्वा । स्तोतृऽभ्यः । गृणते । च । सन्तु ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥ ४ ॥

हे अग्ने एता एतानि परिदृश्यमानानि सौभगा सौभगानि शोभनानि धनानि नोस्मभ्यं दिदीहि दीपय देहिवा अपि अपिच क्रतुं कर्म यज्ञानां कर्तारं वा सुचेतसं शोभनप्रज्ञायुक्तं सुप्रज्ञानं पुत्रं वा वतेम संभजेमहि । वनतेः संभजनार्थस्यवर्णान्तरागमेसतिरूपं विश्वा विश्वानि धनानि स्तोतृभ्य उद्गातृभ्यो गृणते शंसतेच सन्तु यूयं त्वत्परिवाराश्च सर्वे यूयं नोस्मान् स्वस्तिभिः क्षेमैः सदा सर्वदा पात रक्षत ॥ १० ॥

॥ इति पञ्चमस्य द्वितीये चतुर्थो वर्गः ॥ ४ ॥

प्रवःशुक्रायेति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं प्रवइत्यनुक्रान्तं । प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्ये द्वितीयेनोक्तः सूक्तविनियोगः । एकादशिनआग्नेयपशौ प्रवः शुक्रायेत्येषा वपाया याज्या सूत्रितं च—प्रवःशुक्रायभानवेभरध्वंपथाविमस्यमनुपोहविर्भिरिति ।

तत्र प्रथमा—

प्रवंःशुक्रायंभानवेंभरध्वंहव्यंमतिंचाग्नयेसुपूतम् ।
योदैव्यानिमानुंषाजनूंष्यन्तर्विश्वानिविद्मनाजिगांति ॥ १ ॥

प्र । वः । शुक्रार्य । भानवें । भरध्वम् । हव्यम् । मतिम् । च ।
अग्नयें । सुऽपूर्तम् । यः । दैव्यानि । मानुंषा । जनूंषि । अन्तः ।
विश्वांनि । विद्मना । जिगांति ॥ १ ॥

हे हविषां वोढारः वो यूयं शुक्राय शुभ्राय भानवे दीप्तायाग्नये सुपूतं सुशुद्धहव्यं मतिं स्तुतिं च प्रभरध्वं योऽग्निर्दैव्यानि मानुषा मानुषाणि च विश्वा विश्वानि जनूंषि जातानि अन्तरन्तरा विद्मना प्रज्ञानेन मार्गेण वा जिगाति गच्छति देवान् मनुष्यांश्चान्तराहवींषि नेतुं वर्ततइत्यर्थः ॥ १ ॥

अथ द्वितीया—

सगृत्सोंअग्निस्तरुंणश्चिदस्तुयतोयविंष्ठोअजंनिष्टमातुः ।
संयोवनायुवतेशुचिंदन्भूरिंचिदन्नासमिदंत्तिसद्यः ॥ २ ॥

सः । गृत्सः । अग्निः । तरुंणः । चित् । अस्तु । यतः । यविंष्ठः ।
अजंनिष्ट । मातुः । सम् । यः । वना । युवतें । शुचिंऽदन् ।
भूरिं । चित् । अन्ना । सम् । इत् । अत्ति । सद्यः ॥ २ ॥

सचित्सएव गृत्सो मेधावी तथा च यास्कः—गृत्स इतिमेधाविनाम[1] अग्निस्तरुणस्तार-कोभवति यदा यतोऽपस्मान्मातुररण्याः यविष्ठो युवतमःसन् अजनिष्ट। योऽग्निः शुचिदन् दीप्तदन्तः वना वनानि संयुवते आत्मना संयोजयति। किं च भूरिचित् भूरीण्यपि अन्ना स्वीयान्यन्नानि सद्यइव् सद्यएव समत्ति सम्यग्भक्षयति ॥ २ ॥

अथ तृतीया—

अस्यदेवस्यंसंसद्यनींकेयंमर्तासःश्येतंजंगृभ्रे ।
नियोगृभंपौरुंषेयीमुवोचंदुरोकंमग्निरायवेंशुशोच ॥ ३ ॥

---

[1] नि० ९. ५. ।

अस्य । देवस्य । सम्ऽसदि । अनीके । यम् । मर्तासः । श्येतम् ।
जगृभ्रे । नि । यः । गृभम् । पौरुषेयीम् । उवोच । दुःऽओकम् ।
अग्निः । आयवे । शुशोच ॥ ३ ॥

अस्य देवस्याग्नेः अनीके मुख्ये संसदि स्थाने श्येतं श्वेतं शुभ्रं यमग्निं मर्तासो मनुष्याः जगृभ्रे परिगृह्णंति । यश्चाग्निः पौरुषेयीं पुरुषैः क्रियमाणां गृभं गृभीतं निउवोच अत्र वचिः सेवार्थे वर्तते निषेवतइत्यर्थः । सोग्निः आयवे मनुष्यार्थं दुसवः आयवइति मनुष्यनामसु पाठाद् दुरोकं सपत्नैर्दुःसेवं यथा भवति तथा शुशोच दीप्यते ॥ ३ ॥

अथ चतुर्थी—

अयंकविरकविषुप्रचेतामर्तेष्वग्निरमृतोनिधायि ।
समानोअत्रजुहुरःसहस्वःसदात्वेसुमनसःस्याम ॥ ४ ॥

अयम् । कविः । अकविषु । प्रऽचेताः । मर्तेषु । अग्निः । अमृतः ।
नि । धायि । सः । मा । नः । अत्र । जुहुरः । सहस्वः । सदा ।
त्वे इति । सुऽमनसः । स्याम ॥ ४ ॥

कविः क्रान्तदृक् प्रचेताः प्रकाशकः अमृतोमरणधर्मरहितोयमग्निः अकविषु अक्रान्तदृक्षु मर्तेषु मरणधर्मकेषु निधायि निहितः । अथ प्रत्यक्षस्तुतिः सहस्वोबलवन्नग्ने त्वे यस्मिन् त्वयि सदा वयं सुमनसः सुमतयः स्याम । सत्वं अत्रास्मिन्लोके नोस्मान् माजुहुरः मा हिंसीः ॥ ४ ॥

अथ पञ्चमी—

आयोयोनिंदेवकृतंससादक्रत्वाह्य१ग्निरमृताँअतारीत् ।
तमोषधीश्चवनिनश्चगर्भंभूमिश्चविश्वधायसंबिभर्ति ॥ ५ ॥ ५ ॥

आ । यः । योनिम् । देवऽकृतम् । ससाद । क्रत्वा । हि । अग्निः ।
अमृतान् । अतारीत् । तम् । ओषधीः । च । वनिनः । च ।
गर्भम् । भूमिः । च । विश्वऽधायसम् । बिभर्ति ॥ ५ ॥ ५ ॥

योनिः देवकृतं देवैः कल्पितं योनिं स्थानं आसद्य अध्यास्ते। किमर्थं देवाः स्थानं कल्पयन्त्यग्नेरित्यत आह हि यस्मात् कारणात् अग्निः क्रत्वा प्रज्ञया अमृतान् देवान् अतारीत्। विश्वधायसं विश्वस्य धारकं ओषधीरोषधयः वनिनश्च वृक्षाश्च गर्भे गर्भं सन्तं तं बिभ्रती भूमिश्च बिभर्ति श्रुतमेव बिभर्तीति पदं बहुवचनान्ततया विपरिणतंसत् ओषधीभिः वनिभिश्च संबध्यते ॥ ५ ॥

॥ इति पञ्चमस्य द्वितीये पञ्चमो वर्गः ॥ ५ ॥

अथ षष्ठी—

ईशेह्य१ग्निरमृतस्यभूरेरीशेरायःसुवीर्यस्यदातोः ।
मात्वावयंसहसावन्नवीरामाप्सवःपरिषदाममादुवः ॥ ६ ॥

ईशे । हि । अग्निः । अमृतस्य । भूरेः । ईशे । रायः ।
सुऽवीर्यस्य । दातोः । मा । त्वा । वयम् । सहसाऽवन् ।
अऽवीराः । मा । अप्सवः । परि । सदाम । मा । अदुवः ॥ ६ ॥

अमृतस्य अमृतमन्नमुदकं वा द्वितीयार्थे षष्ठी भूरेरधिकं दातोर्दातुमग्निः ईशे ईष्टे हि। सुवीर्यस्य शोभनवीर्ययुक्तं रायो धनं दातुं ईशे ईष्टे। अथ प्रत्यक्षस्तुतिः सहसावान् हे बलवन्नग्ने वयं वसिष्ठाः अवीराः पुत्रादिरहिताःसन्तः मापरिषदाम मापर्युपविशाम। अप्सवो रूपरहिताश्चसंतो मापरिषदाम। तथा च यास्कः—अप्सइति रूपनामेति अदुवः परिचरणहीनाश्च मापरिषदाम ॥ ६ ॥

अथ सप्तमी—

परिषद्यंह्यरणस्यरेक्णोनित्यस्यरायःपतयःस्याम ।
नशेषोअग्नेअन्यजातमस्त्यचेतानस्यमापथोविदुक्षः ॥ ७ ॥

परिऽसद्यम् । हि । अरणस्य । रेक्णः । नित्यस्य । रायः ।
पतयः । स्याम । न । शेषः । अग्ने । अन्यऽजातम् । अस्ति ।
अचेतानस्य । मा । पथः । वि । दुक्षः ॥ ७ ॥

---

१ नि० ५. १३.

अरणस्य अनृणस्य रेक्णो धनं परिषद्यं पर्याप्तं भवति । हि अतो नित्यस्यापुनर्देयस्य रायो धनस्य पतयःस्याम । यद्वा अरणस्य रेक्णो धनं परिषद्यं परिहर्तव्यं भवति अतो नित्यस्य औरसस्य रायः पुत्राख्यस्य धनस्य पतयः स्याम । हे अग्ने अन्यजातं अनौरसं शेषोपत्यं नास्ति नभवति । अचेतानस्य अविदुषः पथो मार्गान् पुत्रोत्पादनममुखान् मार्गान् माविदुक्षः माविदुदुषः । दुषवैकृत्ये धातुः तथा च यास्कः—परिहर्तव्यंहिनोपसर्तव्यमरणस्य रेक्णे रणो पार्णो भवति रेक्णइति धननाम रिच्यते प्रयतो नित्यस्य रायः पतयः स्याम न शेषो अग्ने अन्यजातमस्ति शेष इत्यपत्यनामशिष्यते प्रयतो चेतयमानस्य तत्प्रमत्तस्य भवति मानः पथो विदूदुष इति ॥ ७ ॥ अथाष्टमी—

नुहिग्रभायारंणःसुशेवोन्योदर्योमनंसामन्तवाउं ।
अधांचिदोकःपुनरित्सएत्यानोवाज्यंभीषाळेंतुनव्यः ॥ ८ ॥

नुहि । ग्रभाय । अरंणः । सुऽशेवंः । अन्यऽउंदर्यः । मनंसा ।
मन्तवै । ऊँ इति । अर्ध । चित् । ओकः । पुनंः । इत् । सः ।
एति । आ । नः । वाजी । अभीषाट् । एतु । नव्यंः ॥ ८ ॥

पूर्वस्यामृच्युक्तएवार्थोत्र प्रपंच्यते अरणो रममाणो न्योदर्यः सुशेवः सुखतमःसन् ग्रभाय पुत्रत्वेन ग्रहणाय मनसा मन्तवाउ मनसापिमन्तव्यो नभवति । अधचित् अपि च सोन्योदर्यः ओकइव संस्थानमेव पुनरेति प्राप्नोति अतो वाजी अन्नवान् अभीषाट् शत्रूणामभिभविता नव्यो नवजातः पुत्रो नोस्मान् आएतु आगच्छतु ॥ ८ ॥

अथ नवमी—

त्वमंग्नेवनुष्यतोनिपाहित्वमुंनःसहसावन्नवद्यात् ।
सन्त्वांध्वस्मन्वदभ्येतुपाथःसंरयिःस्पृहयाय्यंःसहस्री ॥ ९ ॥

त्वम् । अग्ने । वनुष्यतः । नि । पाहि । त्वम् । ऊँ इति । नः ।
सहसाऽवन् । अवद्यात् । सम् । त्वा । [1]ध्वस्मन्ऽवत् । अभि ।
एतु । पार्थः । सम् । रयिः । स्पृहयाय्यंः । सहस्री ॥ ९ ॥

[1]नि० ३. २. ।

हे अग्ने त्वं वनुष्यतो हिंसकाद् नोस्मान्निपाहि सहसावन् हे बलवन्नग्ने त्वमु त्वमेवा-
घात्पापाद् च नोस्मान्निपाहि त्वा त्वां ध्वस्मन्वद् ध्वस्तदोषं पाथोन्नंहविः समभ्येतु सम्यक्
प्राप्नोतु अपिचास्मान् स्पृहयाय्यः स्पृहणीयः सहस्री सहस्रसंख्याको रयिः अभ्येतु ॥ ९ ॥

अथ दशमी—

एतानोंअग्नेसौभगादिदीह्यपिक्रतुंसुचेतसंवतेम ।
विश्वांस्तोतृभ्योगृणतेचसन्तुयूयंपातस्वस्तिभिःसदानः ॥१०॥६॥

एता । नः । अग्ने । सौभगा । दिदीहि । अपि । क्रतुम् ।
सुऽचेतसम् । वतेम । विश्वा । स्तोतृऽभ्यः । गृणते । च । सन्तु ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥ ६ ॥

एषा ऋक् प्राक् व्याख्याता ॥ १० ॥

॥ इति पंचमस्य द्वितीये षष्ठो वर्गः ॥६ ॥

प्राग्नये तवस इति नवर्चं पंचमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकं तथाचानु-
क्रान्तं—प्राग्नये नव वैश्वानरीयं त्विति विनियोगो लैंगिकः ।

तत्र प्रथमा—

प्राग्नयेतवसेभरध्वंगिरंदिवोअरतयेपृथिव्याः ।
योविश्वेषाममृतानामुपस्थेवैश्वानरोवावृधेजागृवद्भिः ॥ १ ॥

प्र । अग्नये । तवसे । भरध्वम् । गिरम् । दिवः । अरतये ।
पृथिव्याः । यः । विश्वेषाम् । अमृतानाम् । उपऽस्थे ।
वैश्वानरः । ववृधे । जागृवत्ऽभिः ॥ १ ॥

हे स्तोतारः तवसे प्रवृद्धाय दिवोन्तरिक्षस्य पृथिव्याश्च अरतये गंत्रे अग्नये वैश्वानर-
संज्ञकाय अग्नये गिरं स्तुतिं प्रभरध्वं । यो वैश्वानरो विश्वनरहितोग्निः विश्वेषां सर्वेषाममृतानां
देवानां उपस्थे उपस्थाने यज्ञे जागृवद्भिः प्रबुद्धैः देवैः सहितःसन् ववृधे स्तुतिभिर्हविर्भिश्च
वर्धते ॥ १ ॥

अरणस्य अनृणस्य रेक्णो धनं परिषद्यं पर्याप्तं भवति । हि अतो नित्यस्यापुनर्देयस्य रायो धनस्य पतयःस्याम । यद्वा अरणस्य रेक्णो धनं परिषद्यं परिहर्तव्यं भवति अतो नित्यस्य औरसस्य रायः पुत्राख्यस्य धनस्य पतयः स्याम । हे अग्ने अन्यजातं अनौरसं शेषोपत्यं नास्ति नभवति। अचेतानस्य अविदुषः पथो मार्गान् पुत्रोत्पादनप्रमुखान् मार्गान् माविदुक्षः माविदुदुषः । दुषवैकृत्ये धातुः तथा च यास्कः—परिहर्तव्यंहिनोपसर्तव्यमरणस्य रेक्णे रणो पार्णो भवति रेक्णइति धननाम रिच्यते प्रयतो नित्यस्य रायः पतयः स्याम न शेषो अग्ने अन्यजातमस्ति शेष इत्यपत्यनामशिष्यते प्रयतो चेतयमानस्य तत्प्रमत्तस्य भवति मानः पथो विदूदुष इति ॥ ७ ॥ अथाष्टमी—

नहिग्रभायारणःसुशेवोन्योदर्योमनसामन्तवाउ ।
अधाचिदोकःपुनरित्सएत्यानोवाज्यभीपाळेतुनव्यः ॥ ८ ॥

नहि । ग्रभाय । अरणः । सुऽशेवः । अन्यऽउदर्यः । मनसा ।
मन्तवै । ऊँ इति । अध । चित् । ओकः । पुनः । इत् । सः ।
एति । आ । नः । वाजी । अभीषाट् । एतु । नव्यः ॥ ८ ॥

पूर्वस्यामृच्युक्तएवार्थोत्र प्रपंच्यते अरणो रममाणो न्योदर्यः सुशेवः सुखतमःसन् ग्रभाय पुत्रत्वेन ग्रहणाय मनसा मन्तवाउ मनसापिमन्तव्यो नभवति । अधचित् अपि च सोन्योदर्यः ओकइव संस्थानमेव पुनरेति प्राप्नोति अतो वाजी अन्नवान् अभीषाट् शत्रूणामभिभविता नव्यो नवजातः पुत्रो नोस्मान् आएतु आगच्छतु ॥ ८ ॥

अथ नवमी—

त्वमग्नेवनुष्यतोनिपाहित्वमुनःसहसावन्नवद्यात् ।
सन्त्वाध्वस्मन्वदभ्येतुपाथःसंरयिःस्पृहयाय्यःसहस्री ॥ ९ ॥

त्वम् । अग्ने । वनुष्यतः । नि । पाहि । त्वम् । ऊँ इति । नः ।
सहसाऽवन् । अवद्यात् । सम् । त्वा । ध्वस्मन्ऽवत् । अभि ।
एतु । पाथः । सम् । रयिः । स्पृहयाय्यः । सहस्री ॥ ९ ॥

१नि० ३. २.

हे अग्ने त्वं वनुष्यतो हिंसकाद् नोऽस्मान्निपाहि सहसावन् हे बलवन्नग्ने त्वमु त्वमेवा-यातपापाद् च नोऽस्मान्निपाहि त्वा त्वां ध्वस्मन्वद् ध्वस्तदोषं पाथोऽन्नंहविः समभ्येतु सम्यक् प्राप्नोतु अपिचास्मान् स्पृहयाय्यः स्पृहणीयः सहस्री सहस्रसंख्याको रयिः अभ्येतु ॥ ९ ॥

अथ दशमी—

एतानोअग्नेसौभगादिदीह्यपिक्रतुंसुचेतसंवतेम ।
विश्वास्तोतृभ्योगृणतेचसन्तुयूयंपातस्वस्तिभिःसदानः ॥१०॥६॥

एता । नः । अग्ने । सौभगा । दिदीहि । अपि । क्रतुम् ।
सुऽचेतसम् । वतेम । विश्वा । स्तोतृऽभ्यः । गृणते । च । सन्तु ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥ ६ ॥

एषा ऋक् प्राक् व्याख्याता ॥ १० ॥

॥ इति पंचमस्य द्वितीये षष्ठो वर्गः ॥६ ॥

प्राग्नये तवस इति नवर्चं पंचमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकं तथाचानुक्रान्तं—प्राग्नये नव वैश्वानरीयं त्विति विनियोगो लैंगिकः ।

तत्र प्रथमा—

प्राग्नयेतवसेभरध्वंगिरंदिवोअरतयेपृथिव्याः ।
योविश्वेषाममृतानामुपस्थेवैश्वानरोवावृधेजागृवद्भिः ॥ १ ॥

प्र । अग्नये । तवसे । भरध्वम् । गिरम् । दिवः । अरतये ।
पृथिव्याः । यः । विश्वेषाम् । अमृतानाम् । उपऽस्थे ।
वैश्वानरः । ववृधे । जागृवत्ऽभिः ॥ १ ॥

हे स्तोतारः तवसे प्रवृद्धाय दिवोन्तरिक्षस्य पृथिव्याश्च अरतये गंत्रे अग्नये वैश्वानरसंज्ञकाय अग्नये गिरं स्तुतिं प्रभरध्वं । यो वैश्वानरो विश्वनरहितोऽग्निः विश्वेषां सर्वेषाममृतानां देवानां उपस्थे उपस्थाने यज्ञे जागृवद्भिः प्रबुद्धैः देवैः सहितःसन् ववृधे स्तुतिभिर्हविर्भिश्च वर्धते ॥ १ ॥

अथ द्वितीया–

पृष्टोदिविधाय्यग्निःपृथिव्यांनेतासिन्धूनांवृषभस्तियानाम् ।
समानुषीरभिविशोविभांतिवैश्वानरोवावृधानोवरेण ॥ २ ॥

पृष्टः । दिवि । धायि । अग्निः । पृथिव्याम् । नेता । सिन्धूनाम् ।
वृषभः । स्तियानाम् । सः । मानुषीः । अभि । विशः । वि ।
भाति । वैश्वानरः । ववृधानः । वरेण ॥ २ ॥

सिन्धूनां नदीनां नेता स्तियानां अपां स्तिया आपोभवन्ति स्त्यायनादिति[1] यास्कवचनात् । वृषभो वर्षिता पृष्टोर्चितस्तेजसा संपृक्तो वा योग्निः दिव्यन्तरिक्षे पृथिव्यां च धायिन्यधायि । स वैश्वानरो विश्वनरहितोग्निः वरेण श्रेष्ठेन हविषा तेजसा वा वावृधानो वर्धमानःसन् मानुषीर्विशोभिमानुषीः प्रजाः प्रति विभाति ॥ २ ॥

अथ तृतीया–

त्वद्भियाविशआयन्नसिक्नीरसमनाजहतीर्भोजनानि ।
वैश्वानरपूरवेशोशुचानःपुरोयदग्नेदरयन्नदीदेः ॥ ३ ॥

त्वत् । भिया । विशः । आयन् । असिक्नीः । असमनाः ।
जहतीः । भोजनानि । वैश्वानर । पूरवे । शोशुचानः । पुरः ।
यत् । अग्ने । दरयन् । अदीदेः ॥ ३ ॥

हे वैश्वानर विश्वनरहिताग्ने त्वत् त्वत्तो भिया भीत्या असिक्नीः असितवर्णाः राजस्यः प्रथमार्थे द्वितीया विशः प्रजाः असमनाः परस्परमसमेताः भोजनानि धनानि जहतीः त्यजन्त्यः आयन् आगच्छन् । कदेत्यत आह यद्यदा पूरवे राज्ञे शोशुचानो दीप्यमानः पुरस्तस्य शत्रूणां पुरो दरयन् दारयन् अदीदेः अज्वलः तथा च निगमः–अंहोराजन्वरिवःपूरवेकरिति[2] ॥ ३ ॥

---

१ नि० ६. १७. । २ ऋ० सं० १. ५. ५. ।

अथ चतुर्थी—

तवं॑त्रि॒धातु॑पृथि॒वीउ॒तद्यौर्वैश्वा॑नरव्र॒तम॑ग्नेसचन्त ।
त्वंभा॒सारोद॑सी॒आत॑तन्थाजस्रे॑णशो॒चिषा॒शोशु॑चानः ॥ ४ ॥

तवं॑ । त्रि॒ऽधातु॑ । पृ॒थि॒वी । उ॒त । द्यौः । वैश्वा॑नर । व्र॒तम् ।
अ॒ग्ने॒ । स॒च॒न्त॒ । त्वम् । भा॒सा । रोद॑सी॒ इति॑ । आ ।
त॒त॒न्थ॒ । अज॑स्रेण । शो॒चिषा॑ । शोशु॑चानः ॥ ४ ॥

हे वैश्वानर विश्वेषां नराणां नेतरग्ने तथा च यास्कः—वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयन्तीति वेति । तव व्रतं त्वत्प्रीतिकरं कर्म त्रिधातु अन्तरिक्षं पृथिवी च उतापि च द्यौरिति त्रयो लोकाः सचन्त सेवन्ते त्रैलोक्यवर्तिन्यः प्रजाः त्वदर्थं कर्म कुर्वन्तीत्यर्थः । अपि च त्वं अजस्रेण नित्येन शोचिषा प्रकाशेन शोशुचानो दीप्यमानो भासा दीप्त्या रोदसी द्यावापृथिव्यौ चाततंथ विस्तारयसि ॥ ४ ॥

अथ पञ्चमी—

त्वाम॑ग्नेह॒रितो॑वावशा॒नागिरः॑सचन्ते॒धुन॑योघृ॒ताचीः॑ ।
पतिं॑कृष्टी॒नांर॒थ्यं॑रयी॒णांवै॑श्वान॒रमु॒षसां॑के॒तुमह्ना॑म् ॥ ५ ॥ ७ ॥

त्वाम् । अ॒ग्ने॒ । ह॒रितः॑ । वा॒व॒शा॒नाः । गिरः॑ । स॒च॒न्ते॒ । धुन॑यः ।
घृ॒ताचीः॑ । पति॑म् । कृ॒ष्टी॒नाम् । र॒थ्य॑म् । र॒यी॒णाम् ।
वै॒श्वा॒न॒रम् । उ॒षसा॑म् । के॒तुम् । अह्ना॑म् ॥ ५ ॥ ७ ॥

हेअग्ने कृष्टीनां क्षितयः कृष्टय इति मनुष्यनामसु पाठात् पतिं स्वामिनं रयीणां धनानां रथ्यं नेतारं उषसामह्नां महान्तं केतुं प्रज्ञापकं वैश्वानरं विश्वनरहितं त्वां हरितोऽश्वाः वावशानाः कामयमानाः सचन्ते सेवन्ते तथा गिरो नृणां स्तुतिरूपावाचः धुनयः पापं धुन्वानाः घृताचीः घृतमंचंत्यः हविषासहिता इत्यर्थः सचन्ते ॥ ५ ॥

॥ इति पञ्चमस्य द्वितीये सप्तमो वर्गः ॥७ ॥

---

१ नि० ७. २१.।

अथ षष्ठी–

त्वेअ॑सु॒र्यं१॒॑वस॑वो॒न्यृ॑ण्व॒न्क्रतुं॒हि॒ते॑मित्रमहोजु॒षन्त॑ ।
त्वंदस्यूँ॒रोक॑सोअग्नआजउ॒रुज्योति॑र्ज॒नय॒न्नार्या॑य ॥ ६ ॥
त्वे इति॑ । अ॒सु॒र्य॑म् । वस॑वः । नि । ऋ॒ण्व॒न् । क्रतु॑म् । हि ।
ते॒ । मि॒त्र॒ऽम॒हः॒ । जु॒षन्त॑ । त्वम् । दस्यू॑न् । ओक॑सः । अ॒ग्ने॒ ।
आ॒ज॒ः । उ॒रु । ज्योति॑ः । ज॒नय॑न् । आर्या॑य ॥ ६ ॥

हेमित्रमहः मित्राणां पूजयितरग्ने त्वे त्वयि वसवो वासकादेवा असुर्यं बलं न्यृण्वन् न्यगमयन्। ते क्रतुं त्वत्प्रीतिकरं कर्म जुषन्त असेवन्तहि। किं च त्वं आर्याय कर्मवते जनाय उरु ज्योतिः अधिकं तेजो जनयन् दस्यून् कर्महीनान् ओकसः स्थानात् आजः निरगमयः ॥ ६ ॥

अथ सप्तमी–

सजाय॑मानःप॒र॒मेव्यो॑मन्वा॒युर्नपाथ॒ःपरि॑पासिस॒द्यः ।
त्वंभुव॑नाज॒नय॑न्न॒भिक्र॒न्नप॑त्यायजातवेदोदश॒स्यन् ॥ ७ ॥
सः । जाय॑मानः । प॒र॒मे । वि॒ऽओ॑मन् । वा॒युः । न । पाथ॑ः ।
परि॑ । पा॒सि॒ । स॒द्यः । त्वम् । भुव॑ना । ज॒नय॑न् । अ॒भि ।
क्र॒न् । अप॑त्याय । जा॒त॒ऽवे॒दः॒ । द॒श॒स्यन् ॥ ७ ॥

हे वैश्वानर सद्यसिद्धः त्वं परमे दूरस्थे व्योमन्नन्तरिक्षे जायमानः सूर्यरूपेण प्रादुर्भवन् वायुर्न यथा वायुः द्विदेवत्यग्रहेषु प्रथमं सोमं पिबति तथा पाथः सोमं सद्यः परिपासि परिपिबसि यद्वा वायुरिव पाथो जलं परिपासि परिपिबसि शोषयसीत्यर्थः। किं च हे जातवेदः जातधनाग्ने त्वं भुवना भुवनानि उदकानि भूतं भुवनमित्युदक नामसु पाठात् जनयन् अपत्याय अपत्यवत्पालनीयाय यजमानाय दशस्यन् कामांश्च यच्छन् अभिक्रन् वैद्युतात्मना अभिक्रन्दसि अभिगर्जसि वा ॥ ७ ॥

अथाष्टमी–

ताम॑ग्नेअ॒स्मेइष॒मेर॑यस्व॒वैश्वा॑नरद्यु॒मतीं॑जातवेदः
यया॒राध॒ःपिन्व॑सिविश्ववारपृथुश्रवो॑दा॒शुषे॒मर्त्या॑य ॥ ८ ॥

ताम् । अग्ने । अस्मे इति । इषम् । आ । ईरयस्व । वैश्वानर ।
द्युऽमतीम् । जातऽवेदः । यया । राधः पिन्वसि ।
विश्वऽवार । पृथु । श्रवः । दाशुषे । मर्त्याय ॥ ८ ॥

हे जातवेदः जातप्रज्ञ वैश्वानर विश्वनरहिताग्ने तामिषं एषणीयां वृष्टिं द्युमतीं दीप्तिमतीं अस्मे अस्मभ्यं एरयस्व प्रेरयस्व । वृष्ट्या त्रैलोक्यं द्योतते हि । यद्वा यथा द्युमतीं तामिषमन्नमेरयस्व तथा च श्रूयते—तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजतीति । अथवा इषमेषणीयां तां द्युमतीं भास्वतीं दीप्तिमेरयस्व यया इषा रायो धनं पिन्वसि पालयसि अपि च हे विश्ववार विश्वैर्वरणीयाग्ने पृथु विस्तीर्णं श्रवो यशः दाशुषे मर्त्याय यजमानाय पिन्वसि ॥ ८ ॥

अथ नवमी—

तंनोअग्नेमघवद्भ्यःपुरुक्षुंरयिंनिवाजंश्रुत्यंयुवस्व ।
वैश्वानरमहिनःशर्मयच्छरुद्रेभिरग्नेवसुभिःसजोषाः ॥ ९ ॥ ८ ॥

तम् । नः । अग्ने । मघवत्ऽभ्यः । पुरुऽक्षुम् । रयिम् । नि ।
वाजम् । श्रुत्यम् । युवस्व । वैश्वानर । महि । नः । शर्म ।
यच्छ । रुद्रेभिः । अग्ने । वसुऽभिः । सऽजोषाः ॥ ९ ॥ ८ ॥

हे अग्ने मघवद्भ्यो धनवद्भ्यः हविष्मद्भ्य इत्यर्थः नोऽस्मभ्यं पुरुक्षुं बह्वन्नं बहुयशस्कं वा तं प्रसिद्धं रयिं श्रुत्यं श्रवणीयं वाजं बलं च नियुवस्व नितरां मिश्रयस्व । किं च हे वैश्वानर विश्वनरहिताग्ने त्वं रुद्रेभिः रुद्रैर्वसुभिश्च देवैः सजोषाः सहितश्च सन् नोऽस्मभ्यं महि महत् शर्म सुखं यच्छ प्रयच्छ ॥ ९ ॥

॥ इति पञ्चमस्य द्वितीयेऽष्टमो वर्गः ॥ ८ ॥

प्रसम्राज इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं अनुक्रम्यते च—प्रसम्राजः सप्त वैश्वानरीयं त्विर्युकत्वाद् अस्यापि वैश्वानरोऽग्निर्देवता । विनियोगो लैङ्गिकः ।

१ ऐ०ब्रा० १.५. ।

तत्र प्रथमा–

प्रसम्राजोअसुरस्यप्रशस्तिंपुंसःकृष्टीनामनुमाद्यस्य ।
इन्द्रस्येवप्रतवसस्कृतानिवन्देदारुंवन्दमानोविवक्मि ॥ १ ॥

प्र । सम्ऽराजः । असुरस्य । प्रऽशस्तिम् । पुंसः । कृष्टीनाम् ।
अनुऽमाद्यस्य । इन्द्रस्यऽइव । प्र । तवसः । कृतानि ।
वन्दे । दारुम् । वन्दमानः । विवक्मि ॥ १ ॥

दारुं पुरां भेत्तारं वन्दे वन्दमानःसन् सम्राजः सर्वस्य भुवनस्येश्वरस्य असुरस्य बलवतः पुंसो वीरस्य पौंस्यमिति वीर्यमुच्यते तथा च यास्कः–पुमान् पुरुमना भवति पुंसतेर्वेति । कृष्टीनां जनानां अनुमाद्यस्य स्तुत्यस्य तवसो बलवतइन्द्रस्येव तस्य वैश्वानरस्य प्रशस्तिं स्तुतिं कृतानि कर्माणि च प्रविवक्मि प्रब्रवीमि ॥ १ ॥

अथ द्वितीया–

कविंकेतुंधासिंभानुमद्रेर्हिन्वन्तिशंराज्यंरोदस्योः ।
पुरन्दरस्यगीर्भिराविवासेग्नेर्व्रतानिपूर्व्यामहानि ॥ २ ॥

कविम् । केतुम् । धासिम् । भानुम् । अद्रेः । हिन्वन्ति ।
शम् । राज्यम् । रोदस्योः । पुरम्ऽदरस्य । गीःऽभिः । आ ।
विवासे । अग्नेः । व्रतानि । पूर्व्या । महानि ॥ २ ॥

कविं प्राज्ञं केतुं विश्वस्य प्रज्ञापकं धासिं अद्रेर्धर्तारं आदर्तुः स्तोतुर्वा भानुं भासकं शं सुखकरं रोदस्योः द्यावापृथिव्योः राज्यं राजानं वैश्वानरमग्निं हिन्वन्ति मदीयाः प्रीणयन्ति प्रेरयन्ति वा देवाः । अहं च पुरंदरस्य पुरां दारयितुरग्नेःपूर्व्या पूर्व्याणि पुरातनानि महानि महान्ति व्रतानि कर्माणि गीर्भिराविवासे परिचरामि ॥ २ ॥

अथ तृतीया–

न्यक्रतून्ग्रथिनोमृध्रवाचःपणीँरश्रद्धाँअवृधाँअयज्ञान् ।
प्रप्रतान्दस्यूँरग्निर्विवायपूर्वश्चकारापराँअयज्यून् ॥ ३ ॥

नि। अक्रतून्। ग्रथिनः। मृध्रऽवाचः। पणीन्। अश्रद्धान्।
अवृधान्। अयज्ञान्। प्रऽप्र। तान्। दस्यून्। अग्निः।
विवाय। पूर्वः। चकार। अपरान्। अयज्यून् ॥ ३ ॥

अक्रतून् अयज्ञान् ग्रथिनो जल्पकान् मृध्रवाचो हिंसितवचस्कान् पणीन् पणिनामकान् वार्धुषिकान् अश्रद्धान् यज्ञादिषु श्रद्धारहितान् अवृधान् स्तुतिभिरग्निमवर्धयतः अयज्ञान् यज्ञहीनान् तान् दस्यून् वृथा कालस्य नेतृन् अग्निः प्र प्र अत्यन्तं निविवाय नितरां गमयेव। तदेवाह अग्निः पूर्वो मुख्यःसन् अयज्यून् अयजमानान् अपरान् जघन्यान् चकार करोतीत्यर्थः ॥ ३ ॥

अथ चतुर्थी–

योअपाचीनेतमसिमदन्तीःप्राचीश्चकारनृतमःशचीभिः।
तमीशानंवस्वोअग्निंगृणीषेऽनानतंदमयन्तंपृतन्यून् ॥ ४ ॥

यः। अपाचीने। तमसि। मदन्तीः। प्राचीः। चकार।
नृऽतमः। शचीभिः। तम्। ईशानम्। वस्वः। अग्निम्।
गृणीषे। अनानतम्। दमयन्तम्। पृतन्यून् ॥ ४ ॥

नृतमो नेतृतमो योग्निः अपाचीने अप्रकाशमाने तमसि निमग्नाः प्रजाः मदन्तीः स्तुवन्तीः शचीभिस्ताभ्योदत्ताभिः प्रज्ञाभिः प्राचीः ऋजुगामिनीश्चकार। यद्वा नेतृतमो योग्निः अपाचीने तमसि निशायां मदन्तीर्माद्यन्तीरुषसः शचीभिः प्रज्ञाभिः प्राचीश्चकारेत्यर्थः। तं वस्वो धनस्येशानं अनानतमप्रह्वं पृतन्यून् युद्धकामांश्च दमयन्तमग्निं गृणीषे स्तौमि ॥ ४ ॥

अथ पञ्चमी–

योदेह्यो३अनमयद्वधस्नैर्योअर्यपत्नीरुषसश्चकार।
सनिरुध्यानहुषोयह्वोअग्निर्विशश्चक्रेबलिहृतःसहोभिः ॥ ५ ॥

यः। देह्यः। अनमयत्। वधऽस्नैः। यः। अर्यऽपत्नीः। उषसः।
चकार। सः। निऽरुध्य। नहुषः। यह्वः। अग्निः। विशः।
चक्रे। बलिऽहृतः। सहःऽभिः ॥ ५ ॥

योभिर्दस्यो देही रुपचिता आसुरीर्विंशः वधस्नैः वधैरायुधैर्वा अनमयत् हीना अकरोत्। यश्च अर्यः पत्नीः अर्यः सूर्यः पतिर्यासां ताः अर्यपत्न्यः ता उपसश्चकार अकरोत्। स यह्वो महानग्निः विशः प्रजाः सहोभिः बलैः निरुध्य नहुषे राज्ञो बलिहृतः करप्रदाश्चक्रे ॥ ५ ॥

अथ षष्ठी–

यस्यशर्मन्नुपविश्वेजनासएवैस्तस्थुःसुमतिंभिक्षमाणाः।
वैश्वानरोवरमारोदस्योराग्निःससादपित्रोरुपस्थम् ॥ ६ ॥

यस्य। शर्मन्। उप। विश्वे। जनासः। एवैः। तस्थुः।
सुऽमतिम्। भिक्षमाणाः। वैश्वानरः। वरम्। आ। रोदस्योः।
आ। अग्निः। ससाद। पित्रोः। उपऽस्थम् ॥ ६ ॥

विश्वे सर्वे जनासो जनाः शर्मन् शर्मणि सुखनिमित्तं यस्य वैश्वानरस्य सुमतिं भिक्षमाणाः प्रार्थमानाः एवैः कर्मभिर्हविर्भिर्वा उपतस्थुः यमेवोपतिष्ठन्ते। सवैश्वानरो विश्वनरहितोग्निः सूर्यः सन् पित्रोः मातापित्रोः रोदस्योः द्यावापृथिव्योः वरमुत्कृष्टं उपस्थं मध्यमन्तरिक्षमाससाद आगच्छत् ॥ ६ ॥

अथ सप्तमी–

आदेवोददेबुध्न्याउवसूनिवैश्वानरउदितासूर्यस्य।
आसमुद्रादवरादापरस्मादाग्निर्ददेदिवआपृथिव्याः ॥ ७ ॥ ९ ॥

आ। देवः। ददे। बुध्न्या। वसूनि। वैश्वानरः। उत्ऽइता।
सूर्यस्य। आ। समुद्रात्। अवरात्। आ। परस्मात्। आ।
अग्निः। ददे। दिवः। आ। पृथिव्याः ॥ ७ ॥ ९ ॥

वैश्वानरो विश्वनरहितोग्निः देवो द्योतमानः बुध्न्या बुध्न्यानि अन्तरिक्षाणि बुध्नमन्तरिक्षं तथा च यास्कः–बुध्नमरिक्षं बद्धा अस्मिन् धृता आप इति वेति[1]। वसूनि आच्छादकानि तमांसि वसआच्छादने इति धातुः सूर्यस्य उदिता उदितौ उदयेसति आददे समुद्रादन्तरिक्षात् सगरः

[1] नि० १०. ४४.।

समुद्र इत्यन्तरिक्ष नामसु पाठात् अवरात् पृथिव्याः तमांस्याददे समुद्रात्परस्माद्दिवोपि तमांस्याददे तदेव दर्शयति अग्निर्दिवस्तमांस्याददे पृथिव्याश्च तमांस्याददे ॥ ७ ॥

॥ इति पंचमस्य द्वितीये नवमो वर्गः ॥ ९ ॥

प्रवोदेवमिति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं प्रवोदेवमित्यनुक्रान्तं । प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्ते उक्तोविनियोगः ।

तत्र प्रथमा—

प्रवोदेवंचित्सहसानमग्निमश्वंनवाजिनंहिषेनमोभिः ।
भवानोदूतोअध्वरस्यविद्वान्त्मनादेवेषुविविदेमितद्रुः ॥ १ ॥

प्र । वः । देवम् । चित् । सहसानम् । अग्निम् । अश्वम् ।
न । वाजिनम् । हिषे । नमःऽभिः । भव । नः । दूतः । अध्वरस्य ।
विद्वान् । त्मना । देवेषु । विविदे । मितऽद्रुः ॥ १ ॥

हेअग्ने वः त्वां देवं द्योतमानादिगुणयुक्तं सहसानं राक्षसानभिभवन्तं बलमाचरन्तं वा अग्निमग्रस्यनेतारं अश्वं न अश्वमिव वाजिनं वेगवन्तं बलवन्तं वा नमोभिः स्तुतिभिः हविर्भिर्वा प्रहिषे हे अग्ने त्वांचित् प्रहिणोम्येव । किं च हे अग्ने त्वं विद्वान् जानन् नोस्माकमध्वरस्य यज्ञस्य दूतो भव । अथ परोक्षस्तुतिः त्मना आत्मना स्वयमेव देवेषु मितद्रु दग्धद्रुमोग्निरिव विविदे प्रज्ञायते ॥ १ ॥

अथ द्वितीया—

आयाह्यग्नेपथ्याअनुस्वामन्द्रोदेवानांसख्यंजुषाणः ।
आसानुशुष्मैर्नदयन्पृथिव्याजम्भेभिर्विश्वमुशधग्वनानि ॥ २ ॥

आ । याहि । अग्ने । पथ्याः । अनु । स्वाः । मन्द्रः । देवानाम् ।
सख्यम् । जुषाणः । आ । सानु । शुष्मैः । नदयन् । पृथिव्याः ।
जम्भेभिः । विश्वम् । उशधक् । वनानि ॥ २ ॥

हे अग्ने त्वं मन्द्रो मदयिता स्तुत्योवा देवानां सख्यं देवैः सह सख्यमित्यर्थः। जुषाणः सेवमानः सन् पृथिव्याः सानु समुच्छ्रितं तृणगुल्मादिकं शुष्मे शोषकैर्दाहकैस्तेजोभिः नदयन् शब्दायमानः दह्यमानं हि शब्दायते जंभेभिर्दंष्ट्राभिर्ज्वालाभिरित्यर्थः। विश्वं विश्वानि वनानि उशधक् कामयमानो दहन् स्वाः पथ्या अनु स्वैर्मार्गैरित्यर्थः। आ आयाहि आकारस्य पुनर्वचनमादरार्थं ॥ २ ॥

अथ तृतीया–

प्राचीनोयज्ञःसुधितंहिबर्हिःप्रीणीतेअग्निरीळितोनहोता।
आमातराविश्ववारेहुवानोयतोयविष्ठजज्ञिषेसुशेवः ॥ ३ ॥

प्राचीनः। यज्ञः। सुऽधितम्। हि। बर्हिः। प्रीणीते। अग्निः। ईळितः। न। होता। आ। मातरा। विश्ववारे इतिविश्वऽवारे। हुवानः। यतः। यविष्ठ। जज्ञिषे। सुऽशेवः ॥ ३ ॥

अयं यज्ञः प्राचीनः सम्यगनुष्ठीयतइत्यर्थः। यद्वा यज्ञो यष्टा होता प्राचीनः यद्वा यज्ञो हविः प्राचीनः प्राचीनं प्राङ्मुखमासन्नं बर्हिर्हि बर्हिश्च सुधितं सुनिहितं ईळितः स्तुतोग्निः प्रीणीते तृप्तश्च भवति। होतान होताच नेतिचार्थे। विश्ववारे विश्वैवरणीये मातरा द्यावापृथिव्याविडायामाहुवानोभवति। कदेत्यतआह यतो यदा यविष्ठ हे युवतमाग्ने त्वं सुशेवः सुखो जज्ञिषेजायसे ॥ ३ ॥

अथ चतुर्थी–

सद्योअध्वरेरथिरंजनन्तमानुषासोविचेतसोयएषाम्।
विशामधायिविश्पतिर्दुरोणेऽग्निर्मन्द्रोमधुवचाऋतावा ॥ ४ ॥

सद्यः। अध्वरे। रथिरम्। जनन्त। मानुषासः। विऽचेतसः। यः। एषाम्। विशाम्। अधायि। विश्पतिः। दुरोणे। अग्निः। मन्द्रः। मधुऽवचाः। ऋतऽवा ॥ ४ ॥

विचेतसो विविक्तप्रज्ञाः मानुषासो मनुष्याः अध्वरे यज्ञे रथिरं रथिनं नेतारमग्निं सद्योजनंत जनयन्ति । य एषां हविर्वहति सोयमग्निर्विश्पतिः विशांपतिः विश्वस्य पतिर्वा मन्द्रो मदयिता मधुवचाः मादयितृवचस्कः ऋतवा यज्ञवान् विशां मनुष्याणां दुरोणे गृहे अधाहि आहितः ॥ ४ ॥

अथ पञ्चमी—

असांदिद्वृतोवह्निराजगुन्वानुग्निर्ब्रह्मानृषदनेविधुर्ता ।
द्यौश्चयंपृथिवीवावृधातेआयंहोतायजतिविश्ववारम् ॥ ५ ॥

असांदि । वृतः । वह्निः । आऽजुगुन्वान् । अग्निः । ब्रह्मा ।
नृऽसदने । विऽधुर्ता । द्यौः । च । यम् । पृथिवी । वुवृधाते इति ।
आ । यम् । होता । यजति । विश्वऽवारम् ॥ ५ ॥

वृतो होतृत्वेन वह्निर्हविषां वोढा ब्रह्मा परिवृढः विधर्ता विश्वस्य धारकोग्निः आजगन्वान् द्युलोकादागतः आगमनशीलोवा नृषदने होतुःस्थाने असादि उपविष्टः । यमग्निं द्यौश्च पृथिवी च उभे ववृधाते वर्धयतः यं च विश्ववारं विश्वैर्वरणीयं होता मानुष आयजति ॥ ५ ॥

अथ षष्ठी—

एतेद्युम्नेभिर्विश्वमातिरन्तमन्त्रंयेवारंनर्याअतंक्षन् ।
प्रयेविशस्तिरन्तश्रोषमाणाआयेमेअस्यदीधयन्नृतस्य ॥ ६ ॥

एते । द्युम्नेभिः । विश्वम् । आ । अतिरन्त । मन्त्रम् । ये ।
वा । अरम् । नर्याः । अतंक्षन् । प्र । ये । विशः । तिरन्त ।
श्रोषमाणाः । आ । ये । मे । अस्य । दीधयन् । ऋतस्य ॥ ६ ॥

एते मदीयाः पुरुषाः द्युम्नेभिरन्नैः विश्वं पोष्यवर्गं आतिरन्त वर्धयन्ति । अथवा द्युम्नेभिर्यशोभिः विश्वं जगदातिरन्त अभ्यगच्छन्नित्यर्थः । क इत्यत आह ये नर्या मनुष्याः मन्त्रं स्तोत्रं स्तुत्यंवा अरं पर्याप्तं अतक्षन् समस्कुर्वन् । वेति समुच्चये ये च विशो जनाः श्रोषमाणाः शृण्वंतः संग्यङ्गोरिति द्वित्वं इकोझलिति सनः कित्वं च सर्वे विधयश्छन्दसिविकल्पन्त इति नभवतः शुश्रुषन्तदर्शा सनः इत्यात्मनेपदं च तिरन्त वर्धयन्ति । मे मदिया ये वा ऋतस्यास्य सत्यमिममग्निं कर्मणिषष्ठी मानुषाणामश्नीयादिविवत् आदीधयन् आदीपयन् ॥ ६ ॥

अथ सप्तमी—

नूत्वामंग्नईमहेवसिष्ठाईशानंसूनोसहसोवसूनाम् ।
इषंस्तोतृभ्योमघवंद्भ्यआनड्यूयंपातस्वस्तिभिःसदानः॥७॥१०॥

नु । त्वाम् । अग्ने । ईमहे । वसिष्ठाः । ईशानम् । सूनोइति ।
सहसः । वसूनाम् । इषम् । स्तोतृऽभ्यः । मघवंत्ऽभ्यः । आनट् ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ १० ॥

सहसःसूनो बलस्यपुत्राग्ने वसिष्ठा वयं वसूनामीशानं त्वां अस्मदीयेभ्यः स्तोतृभ्यो मघवद्भ्यो हविष्मद्भ्यश्च इषमन्नं नु क्षिप्रं अद्य वा आनट् मापयेः। नशेर्व्याप्तिकर्मणोवर्णातिण्यर्थोलुङि छन्दस्यपि दृश्यते इत्यडागमः यूयं त्वत्परिवाराश्च सर्वे यूयं नोस्मान् सदा स्वस्तिभिः पात इत्येवं ईमहे याचामहे ॥ ७ ॥

॥ इति पञ्चमस्य द्वितीये दशमो वर्गः ॥ १० ॥

इन्धे राजेति सप्तर्चं अष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं इंधेराजेत्यनुक्रान्तं। प्रातरनुवाका श्विनशस्त्रयोरुक्तोविनियोगः । आतिथ्यायां प्रप्रायमग्निरिति स्विष्टकृतोयाज्या सूत्रितंच— प्रप्रायमग्निर्भरतस्यशृण्वइति संयाज्ये इति ।

तत्र प्रथमा—

इन्धेराजासमर्योनमोभिर्यस्यप्रतीकमाहुतंघृतेन ।
नरोहव्येभिरीळतेसबाधआग्निरग्रंउषसामशोचि ॥ १ ॥

इन्धे । राजा । सम् । अर्यः । नमःऽभिः । यस्य । प्रतीकम् ।
आऽहुतम् । घृतेन । नरः । हव्येभिः । ईळते । सऽबाधः ।
आ । अग्निः । अग्रे । उषसाम् । अशोचि ॥ १ ॥

राजा दीप्तः अर्यःस्वामी हविषां प्रेरकोवाग्निः नमोभिः स्तुतिभिः सह समिन्धे समिध्यते। यस्याग्नेः प्रतीकं रूपं घृतेनाहुतं भवति। यं चनरोस्मदीयाः सबाधः संश्लिष्टाःसंजातबाधा वा हव्येभिर्हव्यैः सार्धं ईळते स्तुवन्ति सोग्निरुषसामग्रे आ अशोचि आ दीप्यते ॥ १ ॥

अथ द्वितीया—

अयमुष्यसुमहाँअवेदिहोतामन्द्रोमनुषोयह्वोअग्निः ।
विभाअकःससृजानःपृथिव्यांकृष्णपविरोषधीभिर्ववक्षे ॥ २ ॥

अयम् । ऊँ इति । स्यः । सुऽमहान् । अवेदि । होता । मन्द्रः । मनुषः । यह्वः । अग्निः । वि । भाः । अकरित्यकः । ससृजानः । पृथिव्याम् । कृष्णऽपविः । ओषधीभिः । ववक्षे ॥ २ ॥

स्यः सोयं होता देवानामाह्वाता मन्द्रो मदयिता यह्वो महानग्निः मनुषो मनुष्यस्य सुमहानवेदि सुमहत्त्वेन प्रज्ञायते । अपि च सोयं भाः दीप्तिः व्यकः विकरोति अन्तरिक्षे । किं च सोयं कृष्णपविः कृष्णमार्गोग्निः पृथिव्यां ससृजानः सृज्यमानः सन्नोषधीभिर्ववक्षे वर्धयते ॥ २ ॥

अथ तृतीया—

कयानोअग्नेविवसःसुवृक्तिंकामुस्वधामृणवःशस्यमानः ।
कदाभवेमपतयःसुदत्ररायोवन्तारोदुष्टरस्यसाधोः ॥ ३ ॥

कया । नः । अग्ने । वि । वसः । सुऽवृक्तिम् । काम् । ऊँ इति । स्वधाम् । ऋणवः । शस्यमानः । कदा । भवेम । पतयः । सुऽदत्र । रायः । वन्तारः । दुस्तरस्य । साधोः ॥ ३ ॥

हे अग्ने त्वं कया स्वधया हविषा नोस्माकं सुवृक्तिं स्तुतिं विवसः व्याप्नुषे आच्छादयसि-वा । कामु कांच स्वधां शस्यमानः स्तूयमानः त्वं ऋणवः प्राप्नुयाः हे सुदत्र शोभनदानाग्ने तथा च यास्कः—सुदत्रः कल्याणदानइति[1] । वयं कदा दुष्टरस्य शत्रुभिः दुर्हिंसकस्य साधोः समीचीनस्य रायो धनस्य पतयः स्वामिनो भवेम । वन्तारः संभक्तारश्च कदा भवेम ॥ ३ ॥

---

1 नि० ६. १४. ।

अथ चतुर्थी—

प्रप्रायमग्निर्भरतस्यशृण्वेवियत्सूर्योनरोचतेबृहद्भाः।
अभियःपूरुंपृतनासुतस्थौद्युतानोदैव्योअतिथिःशुशोच॥ ४॥

प्रऽप्र । अयम् । अग्निः । भरतस्य । शृण्वे । वि । यत् । सूर्यः ।
न । रोचते । बृहत् । भाः । अभि । यः । पूरुम् । पृतनासु ।
तस्थौ । द्युतानः । दैव्यः । अतिथिः । शुशोच ॥ ४ ॥

अयं प्रसिद्धोग्निः भरतस्य यजमानस्य मम प्रप्र अत्यन्तं शृण्वे प्रथितोभवति । कदेत्यत्राह यद्यदा सूर्योन सूर्यइव बृहद्भाः बृहद्भासमानो विरोचते प्रकाशते । किं च योग्निः पृतनासु संग्रामेषु पूरुं पुरुनामकमसुरं अभितस्थौ अभिबभूव । सोयं द्युता दीप्यमानो दैव्योतिथिः देवानामतिथिवत्पूज्यःसन् शुशोच जज्वाल ॥ ४ ॥

अथ पञ्चमी—

असन्नित्त्वेआहवनानिभूरिभुवोविश्वेभिःसुमनाअनीकैः।
स्तुतश्चिदग्नेशृण्विषेगृणानःस्वयंवर्धस्वतन्वंसुजात॥ ५॥

असन् । इत् । त्वे इति । आऽहवनानि । भूरि । भुवः । विश्वेभिः ।
सुऽमनाः । अनीकैः । स्तुतः । चित् । अग्ने । शृण्विषे ।
गृणानः । स्वयम् । वर्धस्व । तन्वम् । सुऽजात ॥ ५ ॥

हे अग्ने त्वे त्वयि आहवनानि हवींषि आहुतयोवा भूरि बहूनि असन्नित् भवन्त्येव । त्वं च विश्वेभिर्विश्वैरनीकैस्तेजोभिः त्वद्विभूतिभिः अग्निभिर्वा सह सुमनाः भुवोभव । हे अग्ने स्तुतश्चित् स्तोतुः स्तौतीतिस्तुत स्तोत्रं शृण्विषे शृणु हे सुजात कल्याण प्रादुर्भावाग्ने गृणानः स्तूयमानस्त्वं स्वयं स्वयमेव तन्वं स्वांतनुं मम तनुं वा वर्धस्व वर्धयस्व ॥ ५ ॥

अथ षष्ठी—

इदंवचःशतसाःसंसहस्रमुदग्नयेजनिषीष्टद्विबर्हाः।
शंयत्स्तोतृभ्यआपयेभवातिद्युमदमीवचातनंरक्षोहा॥ ६॥

इदम् । वचः । शतऽसाः । सम्ऽसहस्रम् । उत् । अग्नये ।
जनिषीष्ट । द्विऽबर्हाः । शम् । यत् । स्तोतृऽभ्यः । आपये ।
भवाति । द्युऽमत् । अमीवऽचातनम् । रक्षःऽहा ॥ ६ ॥

शतसाः गवां शतस्य संभक्ता संसहस्रं गवां सहस्रेणच संयुतः द्विबर्हाः द्वाभ्यां विद्याकर्मभ्यां बृहन् वसिष्ठः द्वयोः स्थानयोर्द्युलोकयोः महान्वा तथा च यास्कः–द्विबर्हा द्वयोः स्थानयोः परिवृढइति । इदं वचः इदं स्तोत्रं अग्नये उज्जनिषीष्ट उदजीजनत् । किंतदित्यत्राह यद्वचः द्युमत् दीप्तिमत् यशस्करमित्यर्थः अमीवचातनं रोगाणां निवारकं रक्षोहा रक्षसां हंतृ च स्तोतृभ्यः आपये तद्बंधवे पुत्रादिकायापि शं सुखदं भवाति भवेत् ॥ ६ ॥

अथ सप्तमी

नूत्वामग्नईमहेवसिष्ठाईशानंसूनोसहसोवसूनाम् ।
इषंस्तोतृभ्योमघवंद्भ्यआनड्यूयंपातस्वस्तिभिःसदानः ॥७॥११॥

नु । त्वाम् । अग्ने । ईमहे । वसिष्ठाः । ईशानम् । सूनो इति ।
सहसः । वसूनाम् । इषम् । स्तोतृऽभ्यः । मघवत्ऽभ्यः ।
आनट् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ ११ ॥

इयमृक् प्रागेव व्याख्याता ॥ ७ ॥

॥ इति पञ्चमस्य द्वितीये एकादशो वर्गः ॥ ११ ॥

अबोधिजारइति षळृचं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं अबोधिषळित्यनुक्रान्तं प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्ये उक्तोविनियोगः ।

तत्र प्रथमा–

अबोधिजारउषसामुपस्थाद्धोतामन्द्रःकवितमःपावकः ।
दधातिकेतुमुभयस्यजन्तोर्हव्यादेवेषुद्रविणंसुकृत्सु ॥ १ ॥

---

१ नि० ६. १७. ।

अबोधि । जारः । उषसाम् । उपऽस्थात् होता । मन्द्रः ।
कविऽतमः । पावकः । दधाति । केतुम् । उभयस्य । जन्तोः ।
हव्या । देवेषु । द्रविणम् । सुकृतऽसु ॥ १ ॥

जारः सर्वेषां प्राणिनां जरयिता होता देवानामाह्वाता मन्द्रो मदयिता स्तुत्यो वा कवितमः प्राज्ञतमः पावकः शोधकोऽग्निः उषसामुपस्थात् मध्ये अबोधि अबुध्यत । किं च उभयस्य द्विपदश्च चतुष्पदश्च दैव्यस्य मानुषस्य वा जन्तोः प्राणिनः केतुं प्रज्ञानं दधाति विदधाति । देवेषु च हव्या हव्यानि दधाति । सुकृत्सु यजमानेषु च द्रविणं धनं दधाति ॥ १ ॥

अथ द्वितीया—

ससुक्रतुर्योविदुरःपणीनांपुनानोअर्कंपुरुभोजसंनः ।
होतामन्द्रोविशांदमूनास्तिरस्तमोददृशेराम्याणाम् ॥ २ ॥

सः । सुऽक्रतुः । यः । वि । दुरः । पणीनाम् । पुनानः । अर्कम् ।
पुरुऽभोजसम् । नः । होता । मन्द्रः । विशाम् । दमूनाः । तिरः ।
तमः । ददृशे । राम्याणाम् ॥ २ ॥

सोऽग्निः सुक्रतुः सुकर्मा सुप्रज्ञो वा भवति योऽग्निः पणीनां असुराणां दुरो गवां द्वाराणि पिधानानि विवृतवान् पुरुभोजसं बहुक्षीरं अर्कमर्चनीयं गवां संघं नोऽस्मदर्थं पुनानः शोधयन् हरन् इत्यर्थः। होता देवानामाह्वाता मन्द्रो मदयिता स्तुत्यो वा दमूनाः दममनावा दानमनावा दान्तमनावा राम्याणां रात्रीणां रमयित्रीणां वा विशां जनानां यजमानानां वा तमोंधकारं तिरः तिरस्कुर्वन् ददृशे दृश्यते । च यद्वा तमस्तिरोददृशे नाशयतीत्यर्थः ॥ २ ॥

अथ तृतीया—

अमूरःकविरदितिर्विवस्वान्त्सुसंसन्मित्रोअतिथिःशिवोनः ।
चित्रभानुरुषसांभात्यग्रेपांगर्भःप्रस्व१आविवेश ॥ ३ ॥
अमूरः । कविः । अदितिः । विवस्वान् । सुऽसंसत् । मित्रः ।
अतिथिः । शिवः । नः । चित्रऽभानुः । उषसाम् । भाति ।
अग्रे । अपाम् । गर्भः । प्रऽस्वः । आ । विवेश ॥ ३ ॥

योग्निरमूरोमूढः कविः प्राज्ञः अदिविरदीनः विवस्वान् दीप्तिमान् सुसंसत् शोभनसदनः शोभनसंवेदनोवा मित्रः प्रमीतेस्त्राता सर्वेषां अतिथिः अतिथिवत्पूज्यः शिवः शिवकरोजगतः चित्रभानुः चित्रदीप्तिः उपसामग्रे मुखे भाति । सोपमपां गर्भःसन् प्रस्वः जायमानाः ओषधीराविवेश ॥ ३ ॥   अथ चतुर्थी—

ईळेन्योवोमनुंषोयुगेषुंसमनगाअंशुचज्जातवेंदाः ।
सुसंदृशांभानुनायोविभातिप्रतिगावंःसमिधानंबुंधन्त ॥ ४ ॥

ईळेन्यंः । वः । मनुंषः । युगेषुं । समनऽगाः । अशुचत् । जातऽवेंदाः । सुऽसन्दृशां । भानुनां । यः । विऽभातिं । प्रतिं । गावंः । समऽइधानम् । बुधन्त ॥ ४ ॥

हे अग्ने वस्त्वं अत्र विभक्तेर्वचनव्यत्ययः मनुषो मनुष्यस्य युगेषु यागकालेषु सर्वेष्वपि दिवसेषु वा ईळेन्यः स्तुत्यः अतः परं परोक्षस्तुतिः योग्निर्जातवेदाः जातधनः समनगाः युद्धेषु संगन्तःसन् अशुचत् दीप्यते सुसंदृशा सुसंदर्शनेन भानुना तेजसा विभातिच तमग्निं समिधानं समिध्यमानं गावः स्तुतयः प्रतिबुधन्त प्रतिबोधयन्ति ॥ ४ ॥

विश्वेदेवेपशावग्नेयाहीति हविषोयाज्या सूत्रितं च—अग्नेयाहिदूत्यंमारिषण्यइन्द्रंनरोनेमधिताहवन्तइति तिस्रइति ॥ ४ ॥

सेषा पञ्चमी—

अग्नेंयाहिदूत्यं१मारिषण्योदेवाँअच्छांब्रह्मकृतांगणेनं ।
सरंस्वतींमरुतोअश्विनापोयक्षिदेवान्रत्नधेयायविश्वान् ॥ ५ ॥

अग्ने । याहि । दूत्यंम् । मा । रिषण्यः । देवान् । अच्छं । ब्रह्मऽकृतां । गणेनं । सरंस्वतीम् । मरुतंः । अश्विनां । अपः । यक्षि । देवान् । रत्नऽधेयाय । विश्वान् ॥ ५ ॥

हे अग्ने दूत्यं दूतस्य कर्म हविर्वहनादि याहि देवानच्छाभिगच्छ । गणेन संघेन सह ब्रह्मकृता ब्रह्मकृतोस्मान् अस्मदीयांश्च तत्र स्तोतॄन् मारिषण्यः माहिंसीः सरस्वतीं मरुतो अश्विना अश्विनौ अपश्च एतान् देवान् रत्नधेयायास्मभ्यं रत्नदानाय यक्षिच ॥ ५ ॥

अथ षष्ठी–

त्वाम॑ग्ने स॒मिधा॒नो वसि॑ष्ठो॒ जरू॑थं हन्य॒क्षि रा॒ये पुरं॑धिम् ।
पु॒रु॒णी॒था जा॑तवेदो जरस्व यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ६ ॥१२॥

त्वाम् । अ॒ग्ने॒ । स॒म्ऽइ॒धा॒नः । वसि॑ष्ठः । जरू॑थम् । ह॒न् । यक्षि॑ ।
रा॒ये । पुर॑म्ऽधिम् । पु॒रु॒ऽनी॒था । जा॒त॒ऽवे॒दः॒ । ज॒र॒स्व॒ ।
यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ६ ॥ १२ ॥

हे अग्ने त्वां वसिष्ठऋषिः समिधानोऽभवति । त्वं च जरूथं परुषभाषिणं जरणीयं वा रक्षोगणं हन् जहि । राये धनवते यजमानाय पुरंधिं बहुधियं देवगणं तथा च यास्कः–पुरंधिर्बहुधीरिति[1] यक्षि यज । किं च हे जातवेदोऽग्ने पुरुणीथा बहुनीथेन बहुना स्तोत्रेण जरस्व देवान् स्तुहि । यद्वा पुरुणीथानेकमार्गाणि रक्षांसि जरयेत्यर्थः ॥ ६ ॥

॥ इति पञ्चमस्य द्वितीये द्वादशो वर्गः ॥ १२ ॥

उपोनजारइति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं तथाचानुक्रान्तं उपोनपञ्चेति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्र प्रथमा–

उपो॒ न जा॒रः पृ॒थु पाजो॑ अश्रे॒द्दवि॑द्युत॒द्दीद्य॒च्छोशु॑चानः ।
वृषा॒ हरिः॒ शुचि॒रा भा॑ति भा॒सा धियो॑ हिन्वा॒न उ॑श॒तीर॑जीगः ॥ १ ॥

उप॑ । न । जा॒रः । पृ॒थु । पाजः॑ । अ॒श्रे॒त् । दवि॑द्युतत् ।
दीद्य॑त् । शोशु॑चानः । वृषा॑ । हरिः॑ । शुचिः॑ । आ । भा॒ति॒ ।
भा॒सा । धियः॑ । हि॒न्वा॒नः । उ॒श॒तीः । अ॒जी॒ग॒रि॒ति॑ ॥ १ ॥

अग्निः उपोन जारः उषसोजारः सूर्यः तद्वत् पृथु विस्तीर्णं पाजस्तेजः अश्रेत् श्रयति । किं च दविद्युतत् दीद्यत शोशुचानइति त्रयोपिशब्दा यद्यपि दीप्तिकर्माणः तथापि दीप्तेर्भूयस्त्वज्ञा-

[1] नि० ६. १३ ।

पनाय प्रयुक्ताइति न पुनरुक्तिः अत्यन्तं दीप्यमानइत्यर्थः। वृषा कामानां वर्षिता हरिर्हविषां प्रेरकः शुचिः शुद्धिकृदग्निः धियः कर्माणि हिन्वानः प्रेरयन् भासा दीप्त्या आभाति प्रकाशते। अपि च उशतीः कामयमानाः अजीगः जागरयति तमसा तिरोहिताः प्रजाः उद्गिरतिवा ॥१॥

अथ द्वितीया—

स्वं१र्णवस्तोरुषसामरोचियज्ञंतन्वानाउशिजोनमन्मं।
अग्निर्जन्मानिदेवआविविद्वान्द्रवद्दूतोदेवयावावनिष्ठः ॥ २ ॥

स्वः। न। वस्तोः। उषसाम्। अरोचि। यज्ञम्। तन्वानाः।
उशिजः। न। मन्म। अग्निः। जन्मानि। देवः। आ। वि।
विद्वान्। द्रवत्। दूतः। देवऽयावा। वनिष्ठः ॥ २ ॥

अग्नेः वस्तोरहनि वस्तोः द्युरित्यहर्नामसुपाठात् उषसामग्रे स्वर्णआदित्यइव तथा च यास्कः—स्वरादित्योभवति सुअरणः सुईरणइति। अरोचि दीप्यते उशिजोन ऋत्विजश्च यज्ञं तन्वानाः विस्तारयन्तः मन्म मन्मानि मननीयानि स्तोत्राणि पठंतीतिशेषः। नेति संप्रत्यर्थे अपि च विद्वान् जानन् दूतो देवानां देवयावा देवान् प्रतिगच्छन् वनिष्ठो दातृतमोग्निः विआद्रवत् विविधमाद्रवति ॥ २ ॥

अथ तृतीया—

अच्छागिरोमतयोदेवयन्तीरग्निंयन्तिद्रविणंभिक्षमाणाः।
सुसंदृशंसुप्रतीकंस्वञ्चंहव्यवाहमरतिंमानुषाणाम् ॥ ३ ॥

अच्छ। गिरः। मतयः। देवऽयन्तीः। अग्निम्। यन्ति। द्रविणम्।
भिक्षमाणाः। सुऽसन्दृशम्। सुऽप्रतीकम्। सुऽअञ्चम्।
हव्यऽवाहम्। अरतिम्। मानुषाणाम् ॥ ३ ॥

मतयः स्तुतिरूपाः देवयन्तीर्देवानिच्छन्त्यो द्रविणं धनं भिक्षमाणाः याचमानाः गिरोवाचः सुसंदृशं कल्याणसंदर्शनं सुप्रतीकं सुरूपं शोभनांगंवा स्वंचं सुष्ठु गच्छन्तं हव्यवाहं हव्यानां वोढारं मानुषाणामरतिं स्वामिनमग्निं अच्छाभियन्ति अभिगच्छन्ति ॥ ३ ॥

---

१ नि० २. १४.।

अथ चतुर्थी—

इन्द्रंनोअग्नेवसुंभिःसजोषारुद्रंरुद्रेभिरावंहाबृहन्तंम्।
आदित्येभिरदितिंविश्वजंन्यांबृहस्पतिमृक्वंभिर्विश्ववारम् ॥ ४ ॥

इन्द्रंम् । नः । अग्ने । वसुंऽभिः । सऽजोषाः । रुद्रम् । रुद्रेभिः ।
आ । वह । बृहन्तंम् । आदित्येभिः । अदितिंम् । विश्वऽजंन्याम् ।
बृहस्पतिम् । ऋक्वंऽभिः । विश्वऽवारम् ॥ ४ ॥

हे अग्ने वसुभिर्देवैः सजोषाः संगतस्त्वं नोस्मदर्थमिन्द्रमावह । रुद्रेभिः रुद्रैः देवैः सङ्गतो बृहन्तं महान्तं रुद्रं चावह । आदित्येभिरादित्यैर्देवैः संगतो विश्वजन्यां विश्वजनहितां अदितिं चावह ऋक्वभिः स्तुत्यैरङ्गिरोभिर्देवैः संगतो विश्ववारं विश्वैः संभजनीयं बृहस्पतिं चावह ॥ ४ ॥

अथ पंचमी—

मन्द्रंहोतारमुशिजोयविष्ठमग्निंविशईळतेअध्वरेषुं।
सहिक्षपावाँअभवद्रयीणामतंन्द्रोदूतोयजथायदेवान् ॥५॥१३॥

मन्द्रम् । होतारम् । उशिजः । यविष्ठम् । अग्निम् । विशः ।
ईळते । अध्वरेषुं । सः । हि । क्षपाऽवान् । अभंवत् ।
रयीणाम् । अतंन्द्रः । दूतः । यजथाय । देवान् ॥ ५ ॥ १३ ॥

उशिजः कामयमानाः विशोमनुष्याः मन्द्रं स्तुत्यं होतारमाह्वातारं यविष्ठं युवतममग्निं अध्वरेषु यागेषु ईळते स्तुवन्ति। हि यस्मात् कारणात् सोग्निः क्षपावान् रात्रिमान् रात्रौ खल्वग्नये अग्निहोत्रं हूयते रयीणां सूर्यस्य रयिमतां हविष्मतां यजमानानां देवान् यजथाय यष्टुं अतन्द्रस्तन्द्रारहितोभवत् । तथा च श्रूयते यस्माद्दूतोभवत्तस्माद्विशस्तमध्वरेईळतइति ॥ ५ ॥

॥ इति पञ्चमस्य द्वितीये त्रयोदशो वर्गः ॥ १३ ॥

महाँअसीति पञ्चर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं महानित्यनुक्रान्तं प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्र प्रथमा—

महाँअस्यध्वरस्यप्रकेतोनऋतेत्वदमृतामादयन्ते ।
आविश्वेभिःसरथंयाहिदेवैर्न्यग्नेहोताप्रथमःसदेह ॥ १ ॥

महान् । असि । अध्वरस्य । प्रऽकेतः । न । ऋते । त्वत् ।
अमृताः । मादयन्ते । आ । विश्वेभिः । सऽरथम् । याहि । देवैः ।
नि । अग्ने । होता । प्रथमः । सद । इह ॥ १ ॥

हे अग्ने त्वमध्वरस्य प्रकेतः प्रज्ञापकःसन् महानसि त्वदृते त्वयाविना अमृताः देवाः न-मादयन्ते नमाद्यन्ति विश्वेभिः विश्वैर्देवैःसरथं यथा भवति आयाहि च इहास्तीर्णे बर्हिषि प्रथमो मुख्यो होता आह्वातासन् निषद निषीदच ॥ १ ॥

वाजपेये बार्हस्पत्यचरोः स्विष्टकृतोनुवाक्या सूत्रितं च—त्वामीळतेअजिरंदूत्यायाग्निंसुदीतिंसुदृशंगृणन्तइति ।

सैषात्र द्वितीया—

त्वामीळतेअजिरंदूत्यायहविष्मन्तःसदमिन्मानुषासः ।
यस्यदेवैरासदोबर्हिरग्नेहान्यस्मैसुदिनाभवन्ति ॥ २ ॥

त्वाम् । ईळते । अजिरम् । दूत्याय । हविष्मन्तः । सदम् । इत् ।
मानुषासः । यस्य । देवैः । आ । असदः । बर्हिः । अग्ने । अहानि ।
अस्मै । सुऽदिना । भवन्ति ॥ २ ॥

हे अग्ने अजिरं गमनशीलं त्वां मानुषासो मानुषाः हविष्मन्तो यजमानाः सदमित् सदैव दूत्याय दूतकर्मणे हविर्वहनाय ईळते याचन्ते। किमर्थं इत्यतआह यस्य हविष्मतो बर्हिर्देवैःसार्धं आसदः त्वं अधितिष्ठसि अस्मै हविष्मते अहानि सुदिना सुदिनानि शोभनदिनानि भवन्ति॥२॥

अथ तृतीया—

त्रिश्चिदक्तोःप्रचिकितुर्वसूनित्वेअन्तर्दाशुषेमर्त्याय ।
मनुष्वदग्नइहयक्षिदेवान्भवानोदूतोअभिशस्तिपावा ॥ ३ ॥

त्रिः । चित् । अक्तोः । प्र । चिकितुः । वसूनि । त्वे इति ।
अन्तः । दाशुषे । मर्त्याय । मनुष्वत् । अग्ने । इह । यक्षि ।
देवान् । भव । नः । दूतः । अभिशस्तिऽपावा ॥ ३ ॥

हे अग्ने त्वे त्वयि अन्तर्मध्ये अक्तोअह्नः यद्यपि अक्तुरिति रात्रेर्नाम तथाप्यत्र अज्यन्ते व्यज्यन्ते रूपादीन्यस्मिन्नित्यह्नोनाम त्रिस्त्रिवारं त्रिषु सवनेषु वसूनि हवींषि दाशुषे हविषां प्रदात्रे मर्त्याय मनुष्याय तदर्थमित्यर्थः प्रचिकितुः प्रवेदयन्ति ऋत्विजः । यद्वा अक्तोरह्नि त्रिः त्रीनग्निमश्वमजं च त्वय्यन्तर्निहितानि प्रचिकितुरविदन्नित्यर्थः । अपि च मनुष्वत् मनोरिव इह ममास्मिन्यज्ञे दूतस्त्वं देवान् यक्षि यज । नोस्माकमभिशस्तिपावा अभिशस्तेः अभिशंसकात् शात्रवात् पावा रक्षिता भव चिदिति पूरणः ॥ ३ ॥

अथ चतुर्थी—

अग्निरीशेबृहतोअध्वरस्याग्निर्विश्वस्यहविषःकृतस्य ।
क्रतुंह्यस्यवसवोजुषन्ताथादेवादधिरेहव्यवाहम् ॥ ४ ॥

अग्निः । ईशे । बृहतः । अध्वरस्य । अग्निः । विश्वस्य । हविषः ।
कृतस्य । क्रतुम् । हि । अस्य । वसवः । जुषन्त । अथ । देवाः ।
दधिरे । हव्यऽवाहम् ॥ ४ ॥

बृहतो महतो अध्वरस्य कौटिल्यरहितस्य यज्ञस्य अग्निरीशे ईष्टे विश्वस्य सर्वस्य कृतस्य संस्कृतस्य हविषः चाग्निरेवेष्टे हियस्मादस्याग्नेः क्रतुं कर्म वसवो देवाः जुषन्त सेवन्ते अथापि च देवाः अग्निं हव्यवाहं हव्यानां वोढारं दधिरे चक्रिरे इत्यर्थः ॥ ४ ॥

अथ पंचमी—

आग्नेवहहविरद्यायदेवानिन्द्रज्येष्ठासइहमादयन्ताम् ।
इमंयज्ञंदिविदेवेषुधेहियूयंपातस्वस्तिभिःसदानः ॥ ५ ॥ १४ ॥

आ । अग्ने । वह । हविःऽअद्याय । देवान् । इन्द्रऽज्येष्ठासः ।
इह । मादयन्ताम् । इमम् । यज्ञम् । दिवि । देवेषु । धेहि । यूयम् ।
पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ १४ ॥

हे अग्ने हविरघाय हविषां भरणाय देवान् आवह। किमर्थं इत्यतआह इहास्मिन् यज्ञे इन्द्रज्येष्ठास इन्द्रप्रमुखादेवाः मादयन्तां इमं यज्ञं इदं यष्टव्यं हविः दिविस्थितेषु देवेषु धेहि निधेहि देवान्वा इहानय इदं हविर्वा देवेषु नयेति भावः। अन्तिमः पादोव्याख्यातचरः॥ ५॥

॥ इति पञ्चमस्य द्वितीये चतुर्दशो वर्गः॥ १४॥

अगन्ममहेति तृचात्मकं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं तथाचानुक्रान्तं अगन्मतृचमिति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः। व्यूह्ळे दशरात्रे नवमेहनि इदं सूक्तमाज्यशस्त्रं सूत्रितंच—तृतीयस्यागन्ममहेत्याज्यमिति।

तत्र प्रथमा—

अग॑न्म म॒हा नम॑सा॒ यवि॑ष्ठं॒ यो दी॒दाय॒ समि॑द्धः॒ स्वे दु॑रो॒णे।
चि॒त्रभा॑नुं॒ रोद॑सी अ॒न्तरु॒र्वी स्वा॑हुतं वि॒श्वतः॑ प्र॒त्यञ्च॑म्॥ १॥

अग॑न्म। म॒हा। नम॑सा। यवि॑ष्ठम्। यः। दी॒दाय॑। सम्ऽइ॑द्धः।
स्वे। दु॒रो॒णे। चि॒त्रऽभा॑नुम्। रोद॑सी॒ इति॑। अ॒न्तः। उ॒र्वी इति॑।
सुऽआ॑हुतम्। वि॒श्वतः॑। प्र॒त्यञ्च॑म्॥ १॥

योग्निः स्वेदुरोणे स्वेस्थाने आहवनीये समिद्धः काष्ठैः समिद्धःसन् दीदाय दीप्यते तमिमं यविष्ठं युवतमं उर्वी विस्तीर्णयोः रोदसी रोदस्योः द्यावापृथिव्योरन्तर्मध्येन्तरिक्षे चित्रभानुं चित्रज्वालं स्वाहुतं सुष्ठु आहुतिभिर्हुतं सन्तं विश्वतः सर्वतः प्रत्यञ्चं प्रतिगच्छन्तमग्निं महा महता नमस्कारेण अगन्म वयमुपगच्छाम॥ १॥

अथ द्वितीया—

स म॒ह्ना विश्वा॑ दुरि॒तानि॑ सा॒ह्वान॒ग्निः ष्ट॑वे॒ दम॒ आ जा॒तवे॑दाः।
स नो॑ रक्षिषद्दुरि॒ताद॑व॒द्याद॒स्मान्गृ॑ण॒त उ॒त नो॑ म॒घोनः॑॥ २॥

सः। म॒ह्ना। विश्वा॑। दुः॒ऽइ॒तानि॑। स॒ह्वान्। अ॒ग्निः। स्त॒वे॒।
दमे॑। आ। जा॒तऽवे॑दाः। सः। नः॒। र॒क्षि॒ष॒त्। दुः॒ऽइ॒तात्।
अ॒व॒द्यात्। अ॒स्मान्। गृ॒ण॒तः। उ॒त। नः॒। म॒घोनः॑॥ २॥

योग्निर्मह्ना महत्त्वेन विश्वा विश्वानि दुरितानि सह्वान् अभिभवन् जातवेदाः जातधनो जातप्रज्ञोवा दमे यज्ञगृहे स्तवे अस्माभिः स्तूयते सोग्निरस्मान् दुरितात् पापात् अवद्यात् निंदि-

ताच्च कर्मणोरक्षिषव् रक्षतु। अस्मान गृणतः स्तुवतोपि रक्षिषव्। उताधिच सोग्निः नो मघोनो हविष्मतोरक्षिषव्॥ २॥

॥

अथ तृतीया–

त्वंवरुणउतमित्रोअंग्नेत्वांवंर्धन्तिमतिभिर्वसिष्ठाः।
त्वेवसुंसुषणनानिसन्तुयूयंपातस्वस्तिभिःसदानः॥ ३॥ १५॥

त्वम्। वरुणः। उत। मित्रः। अग्ने। त्वाम्। वर्धन्ति। मतिऽभिः।
वसिष्ठाः। त्वे इति। वसु। सुऽसननानि। सन्तु। यूयम्।
पात। स्वस्तिऽभिः। सदा। नः॥ ३॥ १५॥

हे अग्ने त्वं वरुणोसि उतापि च त्वं मित्रोसि जगतः प्रमीतेस्त्रातासि त्वां वसिष्ठाःमतिभिः स्तुतिभिः वर्धन्ति वर्धयन्ति त्वे त्वयि विद्यमानानि वसु वसूनि सुसननानि सुसंभजनानि संत्विति स्पष्टमन्यत्॥ ३॥

॥ इति पंचमस्य द्वितीये पञ्चदशो वर्गः॥ १५॥

प्राग्नयइति तृचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकं तथाचानुक्रान्तं– प्राग्नयेवैश्वानरीयमिति। विनियोगोलैंगिकः।

तत्र प्रथमा–

प्राग्नयेविश्वशुचेधियंधेंसुरघ्नेमन्मंधीतिंभरध्वम्।
भरेहविर्नबर्हिषिप्रीणानोवैश्वानरायर्यतयेमतीनाम्॥ १॥

प्र। अग्नये। विश्वऽशुचे। धियम्ऽधे। असुरऽघ्ने। मन्मं।
धीतिम्। भरध्वम्। भरे। हविः। न। बर्हिषि। प्रीणान.।
वैश्वानराय। यतये। मतीनाम्॥ १॥

हे सखायः विश्वशुचे विश्वं यो दीपयति तस्मै धियंधे धियां कर्मणां यो धाता तस्मै असुरघ्ने असुराणां यो हन्ता तस्मै अग्नये मन्म मननीयं स्तोत्रं धीतिं कर्मच प्रभरध्वं। मतीनाम भिमतानां कामानां यतये दात्रे वैश्वानराय विश्वनरहिताय अग्निविशेषाय बर्हिषि यज्ञे हविर्न

हविरिव स्तुतिं प्रीणानः प्रीयमाणोहं भरे भरामि । यद्वा हविः प्रीणानः प्रीणयन्नहं बर्हिषि ह-
विर्भरे संभरामि नेति संप्रत्यर्थे ॥ १ ॥

अथ द्वितीया–

त्वमग्नेशोचिषाशोशुचानआरोदसीअपृणाजायमानः ।
त्वंदेवाँअभिशस्तेरमुञ्चोवैश्वानरजातवेदोमहित्वा ॥ २ ॥

त्वम् । अग्ने । शोचिषा । शोशुचानः । आ । रोदसी इति ।
अपृणाः । जायमानः । त्वम् । देवान् । अभिऽशस्तेः । अमुञ्चः ।
वैश्वानर । जातऽवेदः । महिऽत्वा ॥ २ ॥

हे अग्ने त्वं शोचिषा दीप्त्या शोशुचानो दीप्यमानो जायमानो जायमानएव रोदसी द्या-
वापृथिव्यौ आ अपृणाः आपूरयः। अपि च जातवेदो जातप्रज्ञ जातधनवा वैश्वानर विश्वनर-
हित हे अग्ने त्वं देवान् महित्वा महत्त्वेन अभिशस्तेः अभिशंसकात् शत्रोरमुंचः अमोचयः॥२॥

अथ तृतीया–

जातोयदग्नेभुवनाव्यख्यःपशून्नगोपाइर्यःपरिज्मा ।
वैश्वानरब्रह्मणेविन्दगातुंयूयंपातस्वस्तिभिःसदानः ॥ ३ ॥ १६ ॥

जातः । यत् । अग्ने । भुवना । वि । अख्यः । पशून् । न ।
गोपाः । इर्यः । परिऽज्मा । वैश्वानर । ब्रह्मणे । विन्द । गातुम् ।
यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥ १६ ॥

हे अग्ने जातः सूर्यात्मनाजातः त्वं इर्य्यः स्वामी प्रेरयन्वा परिज्मा परितोगन्तासन् पशू-
न्न गोपाः यथा गवां पालकः पशून् पश्यति तद्वत् । यद्यदा भुवना भूतानि व्यख्यः रक्षणार्थं प-
श्यसि तदा ब्रह्मणे ब्रह्मस्तोत्रं तदर्थं गातुं गतिं फलप्राप्तिं विंद । यद्वा ब्रह्मणे ब्राह्मणार्थं गातुं
विन्द येन ब्रह्मणा उपद्रवान्निर्गच्छन्ति तं गातुं विन्देत्यर्थः । स्पष्टमन्यत् ॥ ३ ॥

॥ इति पंचमस्य द्वितीये षोडशो वर्गः ॥ १६ ॥

समिधा जातवेदसइति तृचं चतुर्दशं सूक्तं वसिष्ठस्यार्षमाग्नेयम् आद्या बृहती द्विती-
या तृतीये त्रिष्टुभौ तथाचानुक्रम्यते–समिधा बृहत्यादीति विनीयोगोलैङ्गिकः ।

तत्र प्रथमा—

समिधाजातवेदसेदेवायदेवहूतिभिः ।
हविर्भिःशुक्रशोचिषेनमस्विनोवयंदाशेमाग्नये ॥ १ ॥

सम्ऽइधा । जातऽवेदसे । देवाय । देवहूतिऽभिः । हविःऽभिः ।
शुक्रऽशोचिषे । नमस्विनः । वयम् । दाशेम । अग्नये ॥ १ ॥

जातवेदसे जातवेदसं जातमज्ञं अग्नये अग्निं समिधा वयं वसिष्ठाः दाशेम परिचरेम । देवाय देवं स्तुत्यमग्निं देवहूतिभिर्देवस्तुतिभिः दाशेम । शुक्रशोचिषे शुभ्रशोचिषं शुभ्रदीप्तिं नमस्विनोहविष्मन्तोवयं हविर्भिर्दाशेम । अत्र दाशतियोगाद् कर्मणि चतुर्थी प्रायेण सर्वत्र दाशतियोगे कर्मणिचतुर्थी दृश्यते ॥ १ ॥

अथ द्वितीया—

वयन्तेअग्नेसमिधाविधेमवयन्दाशेमसुष्टुतीयजत्र ।
वयंघृतेनाध्वरस्यहोतर्वयंदेवहविषाभद्रशोचे ॥ २ ॥

वयम् । ते । अग्ने । सम्ऽइधा । विधेम । वयम् । दाशेम ।
सुऽस्तुती । यजत्र । वयम् । घृतेन । अध्वरस्य । होतः ।
वयम् । देव । हविषा । भद्रऽशोचे ॥ २ ॥

हे अग्ने ते त्वां वयं वसिष्ठाः समिधा विधेम परिचरेम । हे यजत्र यष्टव्याग्ने वयं सुष्टुती शोभनया स्तुत्या दाशेम त्वां परिचरेम । अध्वरस्य यज्ञस्य होतरग्ने वयं घृतेनाज्येन त्वां दाशेम । हे भद्रशोचे कल्याणज्वाल देव द्योतमानाग्ने त्वां वयं हविषा दाशेम ॥ २ ॥

अथ तृतीया—

आनोदेवेभिरुपदेवहूतिमग्नेयाहिवषट्कृतिंजुषाणः ।
तुभ्यंदेवायदाशतःस्यामयूयंपातस्वस्तिभिःसदानः ॥ ३ ॥ १७ ॥

आ । नः । देवेभिः । उप । देवऽहूतिम् । अग्ने । याहि । वषट्ऽकृतिम् ।
जुषाणः । तुभ्यम् । देवाय । दाशतः । स्याम । यूयम् । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ३ ॥ १७ ॥

हे अग्ने नोऽस्माकं देवहूतिं स्तोत्रं यज्ञंवा देवेभिः देवैः सार्धं वषट्कृतिं हविः जुषाणः सेवमानस्त्वं उप आयाहि । देवाय द्योतमानाय तुभ्यं वयं दाशतः परिचरन्तः स्याम भवेम । सिद्धमन्यत् ॥ ३ ॥

॥ इति पञ्चमस्य द्वितीये सप्तदशो वर्गः ॥ १७ ॥

उपसद्यायेति पञ्चदशर्चं पञ्चदशं सूक्तं वसिष्ठस्यार्षं गायत्रमाग्नेयं तथाचानुक्रान्तं—उपसद्याय पंचोना गायत्रमिति प्रातरनुवाके आग्नेयेक्रतौ गायत्रेछन्दसि आश्विनशस्त्रे चेदं सूक्तं सूत्रितं च—उपसद्याय त्वमग्नेयज्ञानामिति तिस्रउत्तमाउद्धरेदिति।उपसदि पौर्वाह्णिक्यां उपसद्यायेत्याद्यास्तिस्रऋचः सामिधेन्यः सूत्र्यते च—उपसद्यायमीळ्हुषइति तिस्रः ऐकैकां त्रिरन्वानमिति। पवित्रेष्ट्यां अग्नेरक्षांसीत्येषा प्रथमाज्यभागानुवाक्या सूत्रितं च—पावकवन्तावाज्यभागावग्नी रक्षांसिसेधतीति। अन्वारंभणीयायां अग्नेर्भगिनोयाज्या सूत्रितं च—आसवंसवितुर्यथा सनोराधांस्याभरेति । स्वस्त्ययन्यामिष्टौ अग्नेरक्षाणइतिप्रथमाज्यभागानुवाक्या सूत्रितं च—स्वस्त्ययन्यां रक्षितवन्तावग्नेरक्षाणोअंहसइति ।

तत्र प्रथमा—

उपसद्यायमीळ्हुषआस्येजुहुताहविः । योनोनेदिष्ठमाप्यम् ॥ १ ॥

उपसद्याय । मीळ्हुषे । आस्ये । जुहुत । हविः ।

यः । नः । नेदिष्ठम् । आप्यम् ॥ १ ॥

हेअध्वर्यवः उपसद्याय उपसदनीयाय मीळ्हुषे कामानां वर्षित्रे अग्नये तत्प्रीत्यर्थं आस्ये तस्यैवमुखे हविर्जुहुत । योग्निः नेदिष्ठमासन्नतममाप्यं भवति आसन्नतमोबन्धुर्भवतीत्यर्थः आप्यमितिस्वार्थिकस्तद्धितः ॥ १ ॥

अथ द्वितीया—

यःपञ्चचर्षणीरभिनिषसाददमेदमे । कविर्गृहपतिर्युवा ॥ २ ॥

यः । पञ्च । चर्षणीः । अभि । निऽससाद ।

दमेऽदमे । कविः । गृहऽपतिः । युवा ॥ २ ॥

योग्निः कविः प्राज्ञो गृहपतिः गृहाणां पालयिता युवा नित्यतरुणःसन् पंचचर्षणीः पञ्चजनान् मनुष्यानभि अभिमुखं दमेदमे गृहेगृहे निषसाद निषीदति । उत्तरया वाक्यपरिसमाप्तिः ॥ २ ॥

अथ तृतीया—

सनोवेदोअमात्यमग्नीरक्षतुविश्वतः । उतास्मान्पात्वंहसः ॥ ३ ॥

सः । नः । वेदः । अमात्यम् । अग्निः । रक्षतु ।
विश्वतः । उत । अस्मान् । पातु । अंहसः ॥ ३ ॥

सोग्निर्नोस्माकं वेदोधनं अमात्यं अन्तिके भवं सह भूत्वा विश्वतः सर्वतोबाधकात् रक्षतु । उतापिच अस्मान्वसिष्ठानंहसः पापात् पातु रक्षतु ॥ ३ ॥

अथ चतुर्थी—

नवंनुस्तोममग्नयेदिवःश्येनायजीजनम् । वस्वःकुविद्वनातिनः ॥ ४ ॥

नवम् । नु । स्तोमम् । अग्नये । दिवः । श्येनाय ।
जीजनम् । वस्वः । कुवित् । वनाति । नः ॥ ४ ॥

दिवो द्युलोकस्य श्येनाय श्येनसदृशाय नु क्षिप्रं गन्त्रे अग्नये यस्मै नवं नूतनं स्तोमं जीजनं जनयामि । सोग्निर्नोस्मभ्यं कुवित् बहु वस्वोवसु धनं कर्मणिषष्ठी वनाति ददात्वित्यर्थः ॥ ४ ॥

अथ पंचमी—

स्पार्हायस्यश्रियोदृशेरयिर्वीरवतोयथा । अग्रेयज्ञस्यशोचतः ॥५॥१८॥

स्पार्हाः । यस्य । श्रियः । दृशे । रयिः । वीरऽवतः ।
यथा । अग्रे । यज्ञस्य । शोचतः ॥ ५ ॥ १८ ॥

यस्याग्नेः पुरस्ताद्भागे शोचतो दीप्यमानस्य यस्याग्नेः श्रियो दीप्तयः वीरवतः पुत्रवतो रयिर्धनं यथा तद्वत् दृशे द्रष्टुं चक्षुषेवा स्पार्हाः स्पृहणीयाः भवन्ति । तस्मै नवं स्तोमं जीजनमित्यनुषंगः उत्तरत्र संबंधोवा ॥ ५ ॥

॥ इति पंचमस्य द्वितीयेष्टादशो वर्गः ॥ १८ ॥

अथ षष्ठी—

सेमांवेतुवर्षट्कृतिमग्निर्जुषतनोगिरः । यजिष्ठोहव्यवाहनः ॥ ६ ॥

सः । इमाम् । वेतु । वर्षट्ऽकृतिम् । अग्निः । जुषत ।
नः । गिरः । यजिष्ठः । हव्यऽवाहनः ॥ ६ ॥

यजिष्ठो यजनीयतमो यष्टृतमोवा हव्यवाहनो हव्यानां हविषां वोढा सोग्निरिमां वषट्कृतिं अस्माभिर्दीयमानामाहुतिं वेतु कामयतां भक्षयतु वा । नोस्माकं गिरः स्तुतीश्च जुषत सेवताम् ॥ ६ ॥

अथ सप्तमी—

नित्वानक्ष्यविश्पतेद्युमन्तंदेवधीमहि । सुवीरमग्नआहुत ॥ ७ ॥

नि । त्वा । नक्ष्य । विश्पते । द्युऽमन्तम् । देव ।
धीमहि । सुऽवीरम् । अग्ने । आऽहुत ॥ ७ ॥

नक्ष्य उपगन्तव्य नक्षतिर्व्याप्तिकर्मा विश्पते विशांपते देव द्योतमान आहुत सर्वैर्यजमानैरभिहुत हे अग्ने द्युमन्तं दीप्तिमन्तं सुवीरं कल्याणस्तोतृकं त्वा त्वां वयं निधीमहि निहितवन्तः ॥ ७ ॥

अथाष्टमी—

क्षपउस्रश्चदीदिहिस्वग्नयस्त्वयावयम् । सुवीरस्त्वमस्मयुः ॥ ८ ॥

क्षपः । उस्रः । च । दीदिहि । सुऽअग्नयः । त्वया ।
वयम् । सुऽवीरः । त्वम् । अस्मऽयुः ॥ ८ ॥

हे अग्ने त्वं क्षपोरात्रीः उस्रः अहानि च सर्वदेतियावत् दीदिहि दीप्यस्व दीप्यमानेन त्वया वयं वसिष्ठाः स्वग्नयः शोभमानाग्नयो भवाम । अस्मयुःअस्मान् कामयमानः सुपआत्मनःक्यजिति क्यचिकृते क्याच्छन्दसीति उ प्रत्ययः ककारलोपश्छान्दसः तथा च यास्कः—अस्मयुरस्मान्कामयमानइति । त्वं सुवीरः सुस्तोत्रिको भव ॥ ८ ॥

अथ नवमी–

उप॑त्वासा॒तये॒नरो॒विप्रा॑सोयन्ति॒धी॒तिभिः॑ । उपाक्ष॑रासह॒स्रिणी॑ ॥९॥

उप॑ । त्वा॒ । सा॒तये॑ । नरः॑ । विप्रा॑सः । य॒न्ति॒ ।
धी॒तिऽभिः॑ । उप॑ । अक्ष॑रा । स॒ह॒स्रिणी॑ ॥ ९ ॥

हे अग्ने त्वा त्वां नरो नेतारो यजमानाः विप्रासो विप्राः मेधाविनः धीतिभिः कर्मभिः सातये धनाय कामानां लाभायवा उपयन्ति उपगच्छन्ति । सहस्रिणी सहस्रसंख्याका अक्षरा क्षयरहिता स्तुतिरूपा अस्मदीया वाक् त्वामुपयाति च ॥ ९ ॥

अथ दशमी–

अ॒ग्नीरक्षां॑सिसेधतिशु॒क्रशो॑चि॒रम॑र्त्यः । शुचिः॑पाव॒कईड्यः॑ ॥१०॥१९॥

अ॒ग्निः । रक्षां॑सि । से॒ध॒ति॒ । शु॒क्रऽशो॑चिः । अम॑र्त्यः ।
शुचिः॑ । पा॒व॒कः । ईड्यः॑ ॥ १० ॥ १९ ॥

शुक्रशोचिः शुभ्रज्वालः अमर्त्यः मरणरहितो देवतात्मा शुचिः स्वयं शुद्धः पावकः अन्येषामपि शोधकः ईड्यः स्तुत्योग्निः रक्षांसि राक्षसान् सेधति बाधतां ॥ १० ॥

॥ इति पंचमस्य द्वितीये एकोनविंशो वर्गः ॥१९॥

अथैकादशी–

सनो॒राधां॑स्याभ॒रेशा॑नःसहसोयहो । भग॑श्चदातु॒वार्य॑म् ॥ ११ ॥

सः । नः॒ । राधां॑सि । आ । भ॒र॒ । ईशा॑नः । स॒ह॒सः॒ ।
य॒हो॒ इति॑ । भगः॑ । च॒ । दा॒तु॒ । वार्य॑म् ॥ ११ ॥

हे सहसोयहो बलस्यपुत्राग्ने समसिद्धस्त्वं ईशानः सर्वस्य जगतः ईश्वरः सन् नोस्मभ्यं राधांसि धनानि रायःराधइति धननामसु पाठात् आभर आहर । भगश्च भगोदेवोपि वार्यं वरणीयं धनं दातु अस्मभ्यं ददातु । अभ्यासलोपश्छान्दसः भगोनसूक्ते निपातभागिनी देवता ॥११॥

अथ द्वादशी–

त्वम॑ग्नेवी॒रव॑द्यशो॑दे॒वश्च॑सवि॒ताभगः॑ । दिति॑श्चदाति॒वार्य॑म् ॥ १२ ॥

त्वम् । अग्ने । वीरऽवत् । यशः । देवः । च । सविता ।
भर्गः । दितिः । च । दाति । वार्यम् ॥ १२ ॥

हे अग्ने त्वं वीरवत् पुत्रपौत्रोपेतं यशोन्नं देहीति शेषः। देवश्च सविता सविता देवोपि वार्यं वरणीयं धनं दाति ददातु । भगश्च देवोपि ददातु । दितिश्च दितिरपि देवी ददातु । सवित्रादिः सूक्ते निपातभागिनी देवता ॥ १२ ॥

अथ त्रयोदशी—

अग्नेरक्षाणोअंहसःप्रतिष्मदेवरीषतः । तपिष्ठैरजरोदह ॥ १३ ॥

अग्ने । रक्ष । नः । अंहसः । प्रति । स्म ।
देव । रिषतः । तपिष्ठैः । अजरः । दह ॥ १३ ॥

हे अग्ने त्वं नोस्मान् अंहसः पापात् रक्ष पाहि । संहितायां दीर्घश्छान्दसः अपिच हे देव द्योतमानाग्ने अजरो जरारहितस्त्वं रिषतो हिंसतः शत्रून् तपिष्ठैरतिशयेन तापकैस्तेजोभिः दह भस्मीकुरु ॥ १३ ॥

अथ चतुर्दशी—

अधामहीनआयस्यनाधृष्टोनृपीतये । पूर्भवाशतभुजिः ॥१४॥

अध । मही । नः । आयसी । अनाधृष्टः । नृऽपीतये ।
पूः । भव । शतऽभुजिः ॥ १४ ॥

अधा अधुना हे अग्ने अनाधृष्टः अप्रतिधर्षणीयः त्वं नोस्माकं नृपीतये नृणां रक्षणार्थं मही महती आयसी अयसा निर्मिता शतभुजिः अत्यन्तं विस्तृता शतगुणा पूः पुरी तद्रक्षासाधनभूतप्राकारादिर्वा पूरुच्यते भव। यथा अयसा निर्मिता पुरी तद्रक्षासाधनभूतप्राकारादिर्वा शत्रुभ्यो भीतान्रक्षति तद्वद्रक्षसेभ्यो भीतानस्मान् पाहीत्यर्थः ॥ १४ ॥

अथ पंचदशी—

त्वंनःपाह्यंहसोदोषावस्तरघायतः । दिवानक्तमदाभ्य ॥१५॥२०॥

त्वम् । नः । पाहि । अंहसः । दोषाऽवस्तः । अघऽयतः ।
दिवा । नक्तम् । अदाभ्य ॥ १५ ॥ २० ॥

हे अदाभ्य अहिंस्य दोषा वस्तः रात्रेराच्छादयितः तमसोवारयितरित्यर्थः। अग्ने त्वं नोस्मान् अंहसः पापात् अघायतः पापमिच्छतः शत्रोश्च दिवानक्तं अहनि रात्रौ च सर्वदा पाहि रक्ष ॥ १५ ॥

॥ इति पञ्चमस्य द्वितीये विंशो वर्गः ॥ २० ॥

एनावइति द्वादशर्चं षोडशं सूक्तं वसिष्ठस्यार्षमग्निदेवताकं अयुजो बृहत्यः युजः सतोबृहत्यः तथाचानुक्रान्तम्—एनावोद्वादश प्रागाथमिति। प्रातरनुवाके आग्नेये क्रतौ बार्हते छन्दसि आश्विनशस्त्रेचेदं सूक्तं सूत्रितं च—एनावोअग्निं प्रवोयह्वमिति। आग्निमारुतशस्त्रेदेवोवोद्रविणोदाइति प्रगाथोनुरूपः सूत्रितं च—देवोवोद्रविणोदाइति प्रगाथौ स्तोत्रियानुरूपाविति।

तत्र प्रथमा–

एनावोअग्निंनमसोर्जोनपातमाहुवे।
प्रियंचेतिष्ठमरतिंस्वध्वरंविश्वस्यदूतममृतम् ॥ १ ॥
एना। वः। अग्निम्। नमसा। ऊर्जः। नपातम्। आ। हुवे।
प्रियम्। चेतिष्ठम्। अरतिम्। सुऽअध्वरम्। विश्वस्य। दूतम्।
अमृतम् ॥ १ ॥

ऊर्जो बलस्य नपातं पुत्रं सूनुः नपादित्यपत्यनामसु पाठात् प्रियं प्रियमस्माकं चेतिष्ठं अतिशयेन ज्ञातारं प्रज्ञापकंवा अरतिं गन्तारं स्वामिनं वा स्वध्वरं सुयज्ञं विश्वस्य सर्वस्य यजमानस्य दूतममृतं नित्यमग्निमेना एनेन नमसा स्तोत्रेण यद्यप्यत्रान्वादेशोनास्ति तथापि छान्दसत्वादिदंशब्दस्यैनादेशः यद्वा एना एनमित्यग्नेर्विशेषणं समानार्थत्वात् पूर्वेषु सूक्तेष्वादिष्टत्वाद्वसिष्ठेनान्वादिश्यते। वोयुष्मदर्थमाहुवे आह्वयामि ॥ १ ॥

अथ द्वितीया–

सयोजतेअरुषाविश्वभोजसासदुद्रवत्स्वाहुतः।
सुब्रह्मायज्ञःसुशमीवसूनांदेवंराधोजनानाम् ॥ २ ॥
सः। योजते। अरुषा। विश्वऽभोजसा। सः। दुद्रवत्।
सुऽआहुतः। सुऽब्रह्मा। यज्ञः। सुऽशमी। वसूनाम्। देवम्।
राधः। जनानाम् ॥ २ ॥

सोमिरुषा आरोचमानो विश्वभोजसा विश्वस्य पालयितारौ अश्वौ योजते रथे युनक्तु। यद्वा सोग्निः अरुषा आरोचमानेन तेजसा विश्वभोजसा विश्वरक्षकेण योजते अयुज्यत। किंच सोग्निः दुद्रवत् आनेतुं देवान्प्रति भृशं द्रवतु द्रवविद्या। स्वाहुतः सुष्ठाहुतः सुब्रह्मा सुस्तुतिः शोभनान्नोवा यष्टव्यः सुशमी सुकर्मा च भवति। तमिमं देवं द्योतमानं वसूनां वासकानां जनानां वसिष्ठानां राधो हविरभिगच्छतितिशेषः। यद्वा एवंगुणविशिष्टोग्निः वसूनां धनानां मध्ये देवमत्यन्तप्रकाशमानं राधो धनं जनानां यजमानानां धनवत्प्रियतमइत्यर्थः॥ २॥

अथ तृतीया–

उदस्यशोचिरस्थादाजुह्वानस्यमीळ्हुषः।
उद्धूमासोअरुषासोदिविस्पृशःसमग्निमिन्धतेनरः॥ ३॥

उत्। अस्य। शोचिः। अस्थात्। आऽजुह्वानस्य। मीळ्हुषः।
उत्। धूमासः। अरुषासः। दिविऽस्पृशः। सम्। अग्निम्।
इन्धते। नरः॥ ३॥

मीळ्हुषः कामानां वर्षितुः आजुह्वानस्याभिहूयमानस्याग्नेः शोचिस्तेजः उदस्थादुत्तिष्ठति अरुषासः आरोचमानाः दिविस्पृशोन्तरिक्षस्पृशो धूमासोधूमाश्च उदस्थुः अस्थात् इत्येकवचनान्तं बहुवचनान्ततया विपरिणतंसदत्रान्वेति। तमिममग्निं नरः कर्मणां नेतारः ऋत्विजः समिन्धते सम्यक् दीपयन्ति॥ ३॥

अथ चतुर्थी–

तंत्वादूतंकृण्महेयशस्तमंदेवाँआवीतयेवह।
विश्वासूनोसहसोमर्तभोजनारास्वतद्यत्त्वेमहे॥ ४॥

तम्। त्वा। दूतम्। कृण्महे। यशःऽतमम्। देवान्। आ।
वीतये। वह। विश्वा। सूनो इति। सहसः। मर्तऽभोजना।
रास्व। तत्। यत्। त्वा। ईमहे॥ ४॥

हे सहसःसूनो बलस्यपुत्राग्ने यशस्तममतिशयेन यशस्विनं तं प्रसिद्धं यं त्वा त्वां दूतं कृण्महे कुर्मः। सः त्वं देवान् वीतये हविषां भक्षणाय आवह। किंच यद्यदा त्वा त्वां ईमहे

याचामहे। तदेव विश्वा विश्वानि मर्तभोजनानि मनुष्याणां भोग्यानि कल्याणानि धनानि रास्वास्मभ्यं देहि ॥ ४ ॥

अथ पंचमी–

त्वमग्नेगृहपतिस्त्वंहोतानोअध्वरे।
त्वंपोताविश्ववारप्रचेतायक्षिवेषिचवार्यम् ॥ ५ ॥

त्वम्। अग्ने। गृहऽपतिः। त्वम्। होता। नः। अध्वरे।
त्वम्। पोता। विश्वऽवार। प्रऽचेताः। यक्षि। वेषि।
च। वार्यम् ॥ ५ ॥

हे विश्ववार विश्वैर्वरणीयाग्ने त्वं नोस्माकमध्वरे यागे गृहपतिरसि यजमानोसि। त्वं होता देवानामाह्वाता त्वं त्वमेव पोतासि। अतः प्रचेताः प्रकृष्टमतिस्त्वं वार्यं वरणीयं हविः यक्षि यज वेषि च कामयस्व भक्षयवा ॥ ५ ॥

अथ षष्ठी–

कृधिरत्नंयजमानायसुक्रतोत्वंहिरत्नधाअसि।
आनंऋतेशिशीहिविश्वमृत्विजंसुशंसोयश्चदक्षते ॥ ६ ॥ २१ ॥

कृधि। रत्नम्। यजमानाय। सुक्रतो इति सुऽक्रतो। त्वम्।
हि। रत्नऽधाः। असि। आ। नः। ऋते। शिशीहि। विश्वम्।
ऋत्विजम्। सुऽशंसः। यः। च। दक्षते ॥ ६ ॥ ॥ २१ ॥

हे सुक्रतो शोभनकर्मन्नग्ने यजमानाय मह्यं रत्नं धनं श्वात्रं रत्नमिति धननामसु पाठात् कृधि कुरु देहीत्यर्थः। हि यस्मात्त्वं रत्नधाः रत्नस्य दातासि। नोस्माकमृते यज्ञे विश्वं सर्वं ऋत्विजं आशिशीहि तीक्ष्णीकुरु। किं च यः सुशंसः सुस्तुतिरस्मत्पुत्रो दक्षते वर्धते तं वर्धय यः सुशंसो होता वर्धते तं वर्धयेत्यर्थः। होतुः पृथगुपादानमादरार्थं ॥ ६ ॥

॥ इति पञ्चमस्य द्वितीये एकविंशो वर्गः ॥ २१ ॥

अथ सप्तमी–

त्वेअग्नेस्वाहुतप्रियासःसन्तुसूरयः।
यन्तारोयेमघवानोजनानामूर्वान्दयन्तगोनाम् ॥ ७ ॥

त्वे इति॑ । अ॒ग्ने॒ । सु॒ऽआ॒हु॒त॒ । प्रि॒यासः॑ । स॒न्तु॒ । सू॒रयः॑ ।
य॒न्तारः॑ । ये । म॒घऽवा॑नः । जना॑नाम् । ऊ॒र्वान् । दय॑न्त ।
गोना॑म् ॥ ७ ॥

हे अग्ने स्वाहुत यजमानैः सुष्ठु आहुत त्वे तव सूरयः प्रेरकाः स्तोतारो वा प्रियासः प्रियाः सन्तु भवन्तु । किं च ये मघवानो धनवन्तो यन्तारः प्रदातारः जनानामस्मदीयानामूर्वान् समूहान् गोनां गवां च ऊर्वान् दयन्त प्रयच्छन्ति ते च तव प्रियासः सन्त्विति पूर्वेण संबंधः ॥ ७॥

अथाष्टमी–

येषा॒मिळा॑घृ॒तह॑स्तादुरो॒णआँअपि॑प्रा॒तानि॒षीद॑ति ।
ताँस्त्रा॑यस्वसहस्यद्रु॒हो॑नि॒दोय॒च्छा॑नः॒शर्म॑दी॒र्घश्रु॑त् ॥ ८ ॥

येषा॑म् । इळा॑ । घृ॒तऽह॑स्ता । दु॒रो॒णे । आ । अपि॑ ।
प्रा॒ता । नि॒ऽसीद॑ति । तान् । त्रा॒य॒स्व॒ । स॒ह॒स्य॒ । द्रु॒हः । नि॒दः ।
यच्छ॑ । नः॒ । शर्म॑ । दी॒र्घ॒ऽश्रुत् ॥ ८ ॥

येषां दुरोणे गृहे घृतहस्ता घृतयुक्तौ हस्तौ यस्याःअसौ घृतहस्ता घृतेनाभिघारितेत्यर्थः। इळान्नरूपा हविर्लक्षणा देवी इरा इळेत्यन्ननामसु पाठात् । प्राता पूर्णा आनिषीदति आसीदति । अपीतिपूरणः तान् हविष्मतो यजमानान् हे सहस्य सहसे बलाय हिताग्ने द्रुहो द्रोग्धुर्निदो निन्दकाच्च शत्रोस्त्रायस्व । नोस्मभ्यं दीर्घश्रुत् दीर्घकालं श्रोतव्यं शर्म सुखं गृहं वा यच्छ च देहि ॥ ८ ॥

अथ नवमी–

सम॒न्द्रया॑चजि॒ह्वया॒वह्नि॑रा॒साव्रि॒दुष्ट॑रः ।
अग्ने॑र॒यिंम॒घव॑द्भ्योन॒आव॑हह॒व्यदा॑तिंचसूदय ॥ ९ ॥

सः । म॒न्द्रया॑ । च॒ । जि॒ह्वया॑ । वह्निः॑ । आ॒सा । वि॒दुःऽत॑रः ।
अग्ने॑ । र॒यिम् । म॒घव॑त्ऽभ्यः । नः॒ । आ । व॒ह॒ । ह॒व्यऽदा॑तिम् ।
च॒ । सू॒द॒य॒ ॥ ९ ॥

हे अग्ने मन्द्रया च मोदयित्र्या देवानामासा आस्यस्थानीयया जिह्वया ज्वालया वह्निर्हवियां वोढा विदुष्टरो विद्वत्तरः सपसिद्धस्त्वं मघवद्भ्यो हविष्मद्भ्यो नोस्मभ्यं रयिं धनं आवहच। हव्यदातिं हव्यानि ददातीतिहव्यदातिर्यजमानः तं तथाच वाजसनेयिनः आमनन्ति—यजमानोवै हव्यदातिरिति। सूदयच कर्मसु प्रेरयच ॥ ९ ॥

अथ दशमी—

येराधांसिददत्यश्व्यामघाकामेनश्रवसोमहः।
ताँअंहसःपिपृहिपर्तृभिष्ट्वंशतंपूर्भिर्यविष्ठ्य ॥ १० ॥

ये। राधांसि। ददति। अश्व्या। मघा। कामेन। श्रवसः।
महः। तान्। अंहसः। पिपृहि। पर्तृऽभिः। त्वम्। शतम्।
पूःऽभिः। यविष्ठ्य ॥ १० ॥

हे यविष्ठ्य युवतमाग्ने त्वं ये यजमानाः महो महतः श्रवसो यशसः कामेन इच्छया यशस्कामाः सन्तइत्यर्थः। राधांसि साधकानि अश्व्या अश्वात्मकानि मघा मघानि ददति तान् दातॄन् अंहसः पापात् शत्रोर्वा पर्तृभिः रक्षासाधनभूतैः शतमपरिमिताभिः पूर्भिर्नगरीभिश्च पिपृहि पालय ॥ १० ॥

अथैकादशी—

देवोवोद्रविणोदाःपूर्णांविवष्ट्यासिचम्।
उद्वासिञ्चध्वमुपवापृणध्वमादिद्वोदेवओहते ॥ ११ ॥

देवः। वः। द्रविणःऽदाः। पूर्णाम्। विवष्टि। आऽसिचम्।
उत्। वा। सिञ्चध्वम्। उप। वा। पृणध्वम्।
आत्। इत्। वः। देवः। ओहते ॥ ११ ॥

द्रविणोदाः धनानां दाता देवोग्निः वो युष्मदीयां पूर्णां हविषा आसिचं आसिक्तं स्रुचं विवष्टि कामयते अतउत्सिंचध्वं वा सोमेन पात्रमुपपृणध्वं वा सोमं वाशब्दौ समुच्चयार्थौ स्रुवग्रहेण होतृचमसं पूरयत च अग्नये सोमं यच्छतचेत्यर्थः आदिदनंतरमेव देवोग्निर्वोयुष्मान् ओहते वहति ॥ ११ ॥

अथ द्वादशी–

तंहोतारमध्वरस्यप्रचेतसंवह्निंदेवाअकृण्वत ।
दधातिरत्नंविधतेसुवीर्यमग्निर्जनायदाशुषे ॥ १२ ॥ २२ ॥

तम् । होतारम् । अध्वरस्य । प्रऽचेतसम् । वह्निम् ।
देवाः । अकृण्वत । दधाति । रत्नम् । विधते ।
सुऽवीर्यम् । अग्निः । जनाय । दाशुषे ॥ १२ ॥ २२ ॥

देवाः प्रचेतसं प्रकृष्टमतिं अग्निमध्वरस्य यज्ञस्य वह्निं वोढारं होतारं चाकृण्वत अकुर्वन् । किमर्थमित्यत आह सचाग्निः विधते परिचरते दाशुषे हविषां प्रदात्रे जनाय सुवीर्यं शोभनवीर्योपेतं रत्नं रमणीयं धनं दधाति ददातित्यर्थः ॥ १२ ॥

॥ इति पञ्चमस्य द्वितीये द्वाविंशो वर्गः ॥ २२ ॥

अग्ने भव सुषमिधेति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षं अग्निदेवताकं सप्तापि द्विपदात्रिष्टुभः तथैवानुक्रम्यते–अग्नेभव सप्तद्वैपदं त्रैष्टुभमिति । अतिरात्रे पञ्चेहनि तृतीयसवने मैत्रावरुणशस्त्रे अग्नेभवेति तृचोनुरूपः सूत्र्यतेहि–अग्नेत्वन्नोअन्तमोग्नेभवसुषमिधासमिद्धइतिस्तोत्रियानुरूपाविति । तत्र प्रथमा–

अग्नेभवसुषमिधासमिद्धउतबर्हिरुर्वियाविस्तृणीताम् ॥ १ ॥

अग्ने । भव । सुऽसमिधा । सम्ऽइद्धः । उत । बर्हिः ।
उर्विया । वि । स्तृणीताम् ॥ १ ॥

हे अग्ने सुषमिधा शोभनया समिधा समिद्धोभव सम्यग्दीप्तोभव । उतापि च बर्हिरुर्विया विस्तीर्णं विस्तृणीतां उपस्तृणीतमध्वर्युः ॥ १ ॥

अथ द्वितीया–

उतद्वारउशतीर्विश्रयन्तामुतदेवाँउशतआवहेह ॥ २ ॥

उत । द्वारः । उशतीः । वि । श्रयन्ताम् ।
उत । देवान् । उशतः । आ । वह । इह ॥ २ ॥

उताषि च उशतीर्देवान् कामयमानाः द्वारो यज्ञगृहस्य देव्योवा तथा च यास्कः—द्वारोजवते-र्वा द्रवतेर्वा वारयतेर्वेति[1]। विश्रयन्तां उताषिच उशतीयज्ञं कामयमानान् देवानिहयज्ञे आवह॥२॥

अथ तृतीया—

अग्नेवीहिहविषायक्षिदेवान्त्स्वध्वराकृणुहिजातवेदः ॥ ३ ॥

अग्ने । वीहि । हविषा । यक्षि । देवान् ।
सुऽअध्वरा । कृणुहि । जातऽवेदः ॥ ३ ॥

हे जातवेदः जातधनाग्ने वीहि देवानभिगच्छ हविषा देवान्यक्षि यजच स्वध्वरा स्वध्वरान् शोभनयज्ञांश्च कृणुहि कुरु ॥ ३ ॥

अथ चतुर्थी—

स्वध्वराकरतिजातवेदायक्षद्देवाँअमृतान्पिप्रयच्च ॥ ४ ॥

सुऽअध्वरा । करति । जातऽवेदाः । यक्षत् ।
देवान् । अमृतान् । पिप्रयत् । च ॥ ४ ॥

जातवेदाः जातधनोग्निः अमृतान् मरणरहितान् देवान् स्वध्वरा स्वध्वरान् शोभनयज्ञान् करति करोतु यक्षत् हविषा यजतु च पिप्रयत् स्तोत्रैः प्रीणयतुच ॥ ४ ॥

अथ पञ्चमी—

वंस्वविश्वावार्याणिप्रचेतःसत्याभवन्त्वाशिषोनोअद्य ॥ ५ ॥

वंस्व । विश्वा । वार्याणि । प्रचेत इति प्रऽचेतः ।
सत्याः । भवन्तु । आऽशिषः । नः । अद्य ॥ ५ ॥

हे प्रचेतः प्रकृष्टमतिमन्नग्ने विश्वा विश्वानि वार्याणि वरणीयानि धनानि वंस्व अस्मभ्यं देहि नोस्माकमाशिषोद्य सत्यायथार्था भवन्तु ॥ ५ ॥

अथ षष्ठी—

त्वामुतेदधिरेहव्यवाहंदेवासोअग्नऊर्जआनपातम् ॥ ६ ॥

[1] नि० ८. ९.।

त्वाम्। ऊर्म् इति। ते। दधिरे। हव्यऽवाहम्।
देवासः। अग्ने। ऊर्जः। आ। नपातम्॥ ६॥

हे अग्ने ऊर्जोबलस्य नपातं पुत्रं सूनुः नपादित्यपत्यनामसु पाठात् त्वाम् त्वामेव ते प्रसिद्धादेवासोदेवा हव्यवाहं हविषोवोढारं आदधिरे अकुर्वन्नित्यर्थः॥ ६॥

अथ सप्तमी—

तेतेदेवायदाशतःस्याममहोनोरत्नाविदधइयानः॥ ७॥ २३॥

ते। ते। देवाय। दाशतः। स्याम। महः। नः।
रत्ना। वि। दधः। इयानः॥ ७॥ २३॥

हे अग्ने देवाय द्योतमानाय ते तुभ्यं ते प्रसिद्धा वसिष्ठावयं दाशतः हवींषि ददतः स्याम भवेम। अतोमहोमहांस्त्वं इयानः उपगम्यमानो याच्यमानोवा नोस्मभ्यं रत्ना रत्नानि रमणीयानि धनानि विदधः विधत्स्व॥ ७॥

॥ इति पञ्चमस्य द्वितीये त्रयोविंशो वर्गः॥ २३॥

॥ इति सप्तमे मंडले प्रथमोनुवाकः॥ १॥

द्वितीयेनुवाके षोडश सूक्तानि तत्र त्वेहयत्पितरइति पंचविंशर्चं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमिन्द्रदेवताकं द्वाविंशादिभिश्चतसृभिः सुदासनाम्नोराज्ञो दानंस्तूयते अतस्तास्तद्देवताकाः अनुक्रम्यतेहि—त्वेहपंचाधिकेंद्रं सुदासः पैजवनस्य चतस्रोन्त्या दानस्तुतिरिति। महाव्रते आदितः पंचदशर्चः शंसनीयाः तथैव पंचमारण्यके सूत्रितं—त्वेहयत्पितरश्चिन्नइन्द्रेतिपंचदशेति।

तत्र प्रथमा—

त्वेहयत्पितरश्चिन्नइन्द्रविश्वावामाजरितारोअसन्वन्।
त्वेगावःसुदुघास्त्वेह्यश्वास्त्वंवसुदेवयतेवनिष्ठः॥ १॥

त्वे इति। ह। यत्। पितरः। चित्। नः। इन्द्र। विश्वा।
वामा। जरितारः। असन्वन्। त्वे इति। गावः। सुऽदुघाः।
त्वे इति। हि। अश्वाः। त्वम्। वसु। देवऽयते। वनिष्ठः॥ १॥

हे इन्द्र त्वेह त्वय्येव नोस्माकं पितरश्चित् पितरोपि जरितारः स्तोतारः सन्तः यद्यस्मा-
त् कारणात् विश्वा विश्वानि वामा वामानि वननीयानि धनानि तथा च यास्कः—वामं वननी-
यंभवतीति । असन्वन् अलभन्त तस्माद्वयमपि धनकामास्त्वां स्तुमः तद्युक्तं । हि यस्मात्
कारणात् त्वे त्वयि गावः सुदुघाः दोग्धुं सुशकाः सन्ति त्वे त्वयि अश्वाः सन्ति त्वं वसु धनं
देवयते देवं त्वामिच्छते यजमानाय वनिष्ठो दातृतमोभवसि ॥ १ ॥

अथ द्वितीया—

राजेवहिजनिभिःक्षेष्येवावद्युभिरभिविदुष्कविःसन् ।
पिशागिरोमघवन्गोभिरश्वैस्त्वायतःशिशीहिरायेअस्मान् ॥ २ ॥
राजाऽइव । हि । जनिऽभिः । क्षेषि । एव । अव । द्युऽभिः ।
अभि । विदुः । कविः । सन् ॥ पिशा । गिरः । मघऽवन् । गोभिः ।
अश्वैः । त्वाऽयतः । शिशीहि । राये । अस्मान् ॥ २ ॥

हे इन्द्र त्वं जनिभिर्जायाभिः राजेव द्युभिर्दीप्तिभिः सह क्षेष्येव निवसस्येव ह्येति पूरणः
किं च हे मघवन् धनवन्निन्द्र विदुर्विद्वान् कविः क्रान्तकर्मा क्रान्तप्रज्ञोवा सन् गिरः स्तोतॄनस्मा-
न् पिशा रूपेण हिरण्यादिना वा गोभिश्चाश्वैश्च अभि अभितो रक्ष त्वायतः त्वत्कामानस्मान्
राये शिशीहि धनार्थं च संस्कुरु ॥ २ ॥

अथ तृतीया—

इमाउत्वापस्पृधानासोअत्रमन्द्रागिरोदेवयन्तीरुपस्थुः ।
अर्वाचीतेपथ्याराय एतुस्यामतेसुमताविन्द्रशर्मन् ॥ ३ ॥
इमाः । ऊम् इति । त्वा । पस्पृधानासः । अत्र । मन्द्राः । गिरः ।
देवऽयन्तीः । उप । स्थुः । अर्वाची । ते । पथ्या । रायः । एतु ।
स्याम । ते । सुऽमतौ । इन्द्र । शर्मन् ॥ ३ ॥

हे इन्द्र त्वा त्वां अत्र यज्ञे स्तोतृरिवा प्रवर्तमानाः पस्पृधानासः स्पर्धमाना मन्द्राः मोद-
मानाः इमागिरः स्तुतयः उपस्थुः उपतिष्ठन्ति । अतस्ते तव रायोधनस्य पथ्या सृतिः अर्वाची
अस्मदभिमुखी एतु गच्छतु । हे इन्द्र वयं च ते सुमतौ सुष्टुतौ वर्तमानाः शर्मन् शर्मणि सुखे
स्याम भूयास्म ॥ ३ ॥

---

१ निं० ६ १७ ।

अथ चतुर्थी–

धेनुंनत्वासूयवसेदुदुंक्षन्नुपब्रह्माणिससृजेवसिष्ठः ।
त्वामिन्मेगोपतिंविश्वआहानइन्द्रःसुमतिंगन्त्वच्छ ॥ ४ ॥

धेनुम् । न । त्वा । सुऽयवसे । दुधुक्षन् । उप । ब्रह्माणि । ससृजे । वसिष्ठः । त्वाम् । इत् । मे । गोऽपतिम् । विश्वः । आह । आ । नः । इन्द्रः । सुऽमतिम् । गन्तु । अच्छ ॥ ४ ॥

हे इन्द्र सुयवसे सुतृणे गोष्ठे वर्तमानां धेनुं न धेनुमिव सुहविष्के यज्ञगृहे दृष्टान्तसामर्थ्यादार्ष्टान्तिकलाभः वर्तमानं त्वां दुदुक्षन् दुधुक्षन् संहितायां व्यत्ययेन दकारः कामान् दोग्धुमिच्छन् वसिष्ठः ब्रह्माणि वत्सस्थानीयानि स्तोत्राणि उपससृजे उपसृजते मे मम विश्वः सर्वोजनः त्वामित् त्वामेव गोपतिं गवां स्वामिनमाह ब्रवीति । अथ परोक्षस्तुतिः नोस्माकं सुमतिं सुष्टुतिं अच्छाभि इन्द्रआगन्तु आगच्छतु ॥ ४ ॥

अथ पंचमी–

अर्णांसिचित्पप्रथानासुदासइन्द्रोगाधान्यकृणोत्सुपारा ।
शर्धन्तंशिम्युमुचथस्यनव्यःशापंसिन्धूनामकृणोदशस्तीः ॥५॥२४॥

अर्णांसि । चित् । पप्रथाना । सुऽदासे । इन्द्रः । गाधानि । अकृणोत् । सुऽपारा । शर्धन्तम् । शिम्युम् । उचथस्य । नव्यः । शापम् । सिन्धूनाम् । अकृणोत् । अशस्तीः ॥ ५ ॥ २४ ॥

नव्यः स्तुत्यइन्द्रः अर्णांसि शत्रुभिर्विदारितायाः परुष्ण्या उदकानि पप्रथाचित् प्रथमानान्यपि सुदासे राज्ञे गाधानि सुपारा सुपाराणि पारयितुं तर्तुं योग्यानि चाकृणोत् अकरोत् अपि च शर्धन्तं उत्साहमानं शिम्युं बोधमानं शापं विश्वरूपोद्भवमात्मनोभिशापं अशस्तीरभिशस्तीश्च उचथस्य स्तोतुः सिन्धूनां नदीनामकृणोद्करोत् ॥ ५ ॥

॥ इति पञ्चमस्य द्वितीये चतुर्विंशो वर्गः ॥ २४ ॥

अथ षष्ठी–

पुरोळाइत्तुर्वशोयक्षुरासीद्रायेमत्स्यासोनिशिताअपीव ।
श्रुष्टिंचक्रुर्भृगवोद्रुह्यवश्चसखासखायमतरद्विषूचोः ॥ ६ ॥

अथाष्टमी–

दुराध्यो३ अदितिं स्रेवयन्तोचेतसो विजगृभ्रेपरुष्णीम्।
मह्नाविव्यक्पृथिवीं पत्यमानःपशुष्कविरशयच्चायमानः ॥ ८ ॥

दुःऽआध्यः। अदितिम्। स्रेवयन्तः। अचेतसः। वि। जगृभ्रे।
परुष्णीम्। मह्ना। अविव्यक्। पृथिवीम्। पत्यमानः। पशुः।
कविः। अशयत्। चायमानः ॥ ८ ॥

दुराध्यो दुष्टाभिसंधयोऽचेतसो मन्दमतयः सुदासः शत्रवः अदितिमदीनां परुष्णीं नदीं स्रेवयन्तः वि जगृभ्रे। विग्रहः कूलभेदः तमकुर्वन् परुष्ण्याः कूलं बिभिदुरित्यर्थः स सुदासः मह्ना इन्द्रप्रसादलब्धेन महिम्ना पृथिवीमविव्यक् तदेव व्याप्नोत् न पुनरुदकेनाव्याप्यत ततः सुदासः शत्रुः चायमानः चयमानस्य पुत्रः कविः कविनामा पत्यमानः पाल्यमानः पशुः यागे संज्ञप्तः पशुरिव आशयत् आशेत सुदासानिहत इत्यर्थः ॥ ८ ॥

अथ नवमी–

ईयुरर्थं नन्यर्थं परुष्णीमाशुश्चनेदभिपित्वं जगाम।
सुदासइन्द्रःसुतुकाँअमित्रानरन्धयन्मानुषेवध्रिवाचः ॥ ९ ॥

ईयुः। अर्थम्। न। निःऽअर्थम्। परुष्णीम्। आशुः। चन।
इत्। अभिऽपित्वम्। जगाम। सुऽदासे। इन्द्रः। सुऽतुकान्।
अमित्रान्। अरन्धयत्। मानुषे। वध्रिऽवाचः ॥ ९ ॥

अथेन्द्रः परुष्ण्याः विच्छिन्नानि पर्वाणि सन्दधे ततः परुष्ण्या आपो यथापूर्वमर्थं गन्तव्यमेव प्रवणदेशं प्रति परुष्णीमीयुः आययांचक्रुः। इणूगताविति धातोरन्तर्भावितण्यर्थो लिटि ईयुरिति अतो द्विकर्मकमाख्यातं न्यर्थं अगन्तव्यं परुष्ण्याः पार्श्वयोः स्थितं निम्नं देशं प्रति परुष्णीं नेयुः आशुश्च न राज्ञः सुदासः अश्वोपि अभिपित्वमभिप्राप्तव्यमेव जगाम इन्द्रश्च सुदासे राज्ञे मानुषे लोके वध्रिवाचोजल्पकान् अमित्रान् शत्रून् सुतुकान् सुतोकान् तुक् तोकमित्यपत्यनामसु पाठात् अरन्धयत् वशमानयत् ॥ ९ ॥

अथ दशमी—

ईयुर्गावोनयवसादगोपायथाकृतमभिमित्रंचितासः ।
पृश्निगावःपृश्निनिप्रेषितासःश्रुष्टिंचक्रुर्नियुतोरन्तयश्च ॥१०॥२५॥

ईयुः । गावः । न । यवसात् । अगोपाः । यथाऽकृतम् ।
अभि । मित्रम् । चितासः । पृश्निऽगावः । पृश्निऽनिप्रेषितासः ।
श्रुष्टिम् । चक्रुः । निऽयुतः । रन्तयः । च ॥ १० ॥ २५ ॥

यदा इन्द्रः सुदासोरक्षणार्थं आगच्छति तदा पृश्निनिप्रेषितासः पृश्निनिप्रेषिताः पृश्न्या मात्रा नितरांप्रहिताः चितासः संहताः जानन्तोवा पृश्निगावः पृश्निवर्णांगावोऽश्वा येषान्ते पृश्निगावोमरुतः यथाकृतमिन्द्रस्यसाहाय्यं करवामेति यथापूर्वं समयः कृतः तं समयमनतिक्रम्य मित्रमिन्द्रं यवसात् निमित्तार्थे पञ्चमी यवसं निमित्तीकृत्य अगोपाः गोपालेनारक्षिताः गावो न गावइव अभीयुः अभिजग्मुः रन्तयोरममाणाः नियुतोमरुतामश्वाश्च श्रुष्टिं शीघ्रगामिं चक्रुः तस्मिन्युद्धे मरुतः इन्द्रं साहाय्यार्थं अभ्यगच्छन्नित्यर्थः ॥ १० ॥

॥ इति पञ्चमस्य द्वितीये पञ्चविंशो वर्गः ॥ २५ ॥

अथैकादशी—

एकंचयोविंशतिंचश्रवस्यावैकर्णयोर्जनान्राजान्यस्तः ।
दस्मोनसद्मन्निशिशातिबर्हिःशूरःसर्गमकृणोदिन्द्रएषाम् ॥ ११ ॥

एकम् । च । यः । विंशतिम् । च । श्रवस्या । वैकर्णयोः ।
जनान् । राजा । नि । अस्तः इत्यस्तः । दस्मः । न । सद्मन् । नि ।
शिशाति । बर्हिः । शूरः । सर्गम् । अकृणोत् । इन्द्रः । एषाम् ॥ ११ ॥

यःसुदासोराजा श्रवस्या यशसइच्छया अन्नेच्छया वा परुष्ण्याः पार्श्वस्थयोः वैकर्णयोः जनपदयोर्विद्यमानान् एकं च विंशतिंचजनान् न्यस्तः आत्मना अहन् सराजा दस्मोन दर्शनीयो युवाऽध्वर्युरिव सद्मन् यज्ञगृहे बर्हिर्यस्मिन्युद्धे सपत्नान् निशिशाति नितरां लुनाति तस्मिन्युद्धे शूर इन्द्रः एषां मरुतां सर्गं प्रसवमकृणोत् सुदासः साहाय्यार्थमकरोत् ॥ ११ ॥

अथ द्वादशी–

अधंश्रुतंकवपंवृद्धमप्स्वनुंद्रुह्युंनिवृंणग्वज्रंबाहुः ।
वृणानाअत्रंसख्यायंसख्यंत्वायन्तोयेअमंदुन्ननुंत्वा ॥ १२ ॥

अधं । श्रुतम् । कवर्षम् । वृद्धम् । अप्ऽसु । अनुं । द्रुह्युम् । नि ।
वृणक् । वज्रंऽबाहुः । वृणानाः । अत्रं । सख्यार्य । सख्यम् ।
त्वाऽयन्तः । ये । अमंदन् । अनुं । त्वा ॥ १२ ॥

अधापिच वज्रबाहुरिन्द्रः श्रुतं कवषं च वृद्धं च त्रीन् तथा द्रुह्युं अनु आनुपूर्व्येण अप्सूदकेषु निवृणक् न्यमज्जयदित्यर्थः अत्रास्मिन्नवसरे ये त्वायन्तः त्वत्कामाः त्वा त्वां अन्वमदन् अस्तुवन् ते सखायः सख्याय सख्यार्थं त्वां वृणानाः सख्यं लेभिरइति शेषः ॥ १२ ॥

अथ त्रयोदशी–

विसद्योविश्वांदृंहितान्येषामिन्द्रःपुरःसहंसासप्तदंर्दः ।
व्यानंवस्यतृत्संवेगयंभाग्जेष्मंपूरुंविदथेंमृध्रवांचम् ॥ १३ ॥

वि । सद्यः । विश्वां । दृंहितानिं । एषाम् । इन्द्रंः । पुरंः । सहंसा ।
सप्त । दर्दृरितिं दर्दः । वि । आनंवस्य । तृत्संवे । गर्यम् । भाक् ।
जेष्मं । पूरुम् । विदथें । मृध्रऽवांचम् ॥ १३ ॥

एषां कवषादीनां विश्वा विश्वानि दृंहितानि दृढानि दुर्गाणि पुरोनगरीश्च तद्रक्षासाधनभूतान् सप्तप्रकारांश्च इन्द्रः सहसा बलेन सद्यएव विदर्दः विदारयामास।अपिच आनवस्य आनोः संबन्धिनोबलस्य आनोः पुत्रस्य वा गयं गृहं धनं वा तृत्सवे तृत्सुनामकाय राज्ञे तृत्सूनां गणाय वा विभाक् व्यभजत् अदादित्यर्थः इत्थमिन्द्रं स्तुवन्तोवयं विदथे युद्धे मृध्रवाचं बाधवाचं पूरुं मनुष्यं जेष्म जयेम ॥ १३ ॥

अथ चतुर्दशी–

निगव्यवोनंवोद्रुह्यवंश्चषष्टिःशतासुंषुपुःषट्सहस्रां ।
षष्टिर्वीरासोअधिषड्दुंवोयुविश्वेदिन्द्रंस्यवीर्याकृतानिं ॥ १४ ॥

अथ दशमी—

ईपुर्गावोनयवंसादगोपायथाकृतमभिमित्रंचितासः।
पृश्निगावःपृश्निनिप्रेपितासःश्रुष्टिंचक्रुर्नियुतोरन्तयश्च ॥१०॥२५॥

ईयुः। गावः। न। यवसात्। अगोपाः। यथाऽकृतम्।
अभि। मित्रम्। चितासः। पृश्निऽगावः। पृश्निऽनिप्रेपितासः।
श्रुष्टिम्। चक्रुः। निऽयुतः। रन्तयः। च ॥ १० ॥ २५ ॥

यदा इन्द्रः सुदासोरक्षणार्थं आगच्छति तदा पृश्निनिप्रेपितासः पृश्निनिप्रेषिताः पृश्न्या मात्रा नितरांमहिताः चितासः संहताः जानन्तोवा पृश्निगावः पृश्निवर्णागावोऽश्वा येषान्ते पृश्निगावोमरुतः यथाकृतमिन्द्रस्यसाहाय्यं करवामेति यथापूर्वं समयः कृतः तं समयमनतिक्रम्य मित्रमिन्द्रं यवसात् निमित्तार्थे पञ्चमी यवसं निमित्तीकृत्य अगोपाः गोपालेनारक्षिताः गावो न गावइव अभीयुः अभिजग्मुः रन्तयोरममाणाः नियुतोमरुतामश्वाश्च श्रुष्टिं शीघ्रमार्तिं चक्रुः तस्मिन्युद्धे मरुतः इन्द्रं साहाय्यार्थं अभ्यगच्छन्नित्यर्थः ॥ १० ॥

॥ इति पञ्चमस्य द्वितीये पञ्चविंशो वर्गः ॥ २५ ॥

अथैकादशी—

एकंचयोविंशतिंचश्रवस्यावैकर्णयोर्जनान्राजान्यस्तः।
दस्मोनसद्मन्निशिशातिबर्हिःशूरःसर्गमकृणोदिन्द्रएषाम् ॥ ११ ॥

एकम्। च। यः। विंशतिम्। च। श्रवस्या। वैकर्णयोः।
जनान्। राजा। नि। अस्तः। इत्यस्तः। दस्मः। न। सद्मन्। नि।
शिशाति। बर्हिः। शूरः। सर्गम्। अकृणोत्। इन्द्रः। एषाम् ॥ ११ ॥

यःसुदासोराजा श्रवस्या यशसइच्छया अन्नेच्छया वा परुष्ण्याः पार्श्वस्थयोः वैकर्णयोः जनपदयोर्विद्यमानान् एकं च विंशतिंचजनान् न्यस्तः आत्मना अहन् सराजा दस्मोन दर्शनीयो युवाऽध्वर्युरिव सद्मन् यज्ञगृहे बर्हिर्यस्मिन्युद्धे सपत्नान् निशिशाति नितरां लुनाति तस्मिन्युद्धे शूर इन्द्रः एषां मरुतां सर्गं प्रसवमकृणोत् सुदासः साहाय्यार्थमकरोत् ॥ ११ ॥

अथ द्वादशी–

अधं श्रुतं कवषं वृद्धमप्स्वनु द्रुह्युं नि वृणग्वज्रबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्ननु त्वा ॥ १२ ॥

अर्ध । श्रुतम् । कुवर्षम् । वृद्धम् । अप्ऽसु । अनु । द्रुह्युम् । नि ।
वृणक् । वज्रऽबाहुः । वृणानाः । अत्र । सख्याय । सख्यम् ।
त्वाऽयन्तः । ये । अमदन् । अनु । त्वा ॥ १२ ॥

अथापिच वज्रबाहुरिन्द्रः श्रुतं कवषं च वृद्धं च त्रीन् तथा द्रुह्युं अनु आनुपूर्व्येण अप्सूदकेपु निवृणक् न्यमज्जयदित्यर्थः अत्रास्मिन्नवसरे ये त्वायन्तः त्वत्कामाः त्वा त्वां अन्वमदन् अस्तुवन् ते सखायः सख्याय सख्यार्थं त्वां वृणानाः सख्यं लेभिरइति शेषः ॥ १२ ॥

अथ त्रयोदशी–

वि सद्यो विश्वा दृंहितान्येषामिन्द्रः पुरः सहसा सप्त दर्दः ।
व्यानवस्य तृत्सवे गयं भाग्जेष्म पूरुं विदथे मृध्रवाचम् ॥ १३ ॥

वि । सद्यः । विश्वा । दृंहितानि । एषाम् । इन्द्रः । पुरः । सहसा ।
सप्त । दर्दरिति दर्दः । वि । आनवस्य । तृत्सवे । गयम् । भाक् ।
जेष्म । पूरुम् । विदथे । मृध्रऽवाचम् ॥ १३ ॥

एषां कवषादीनां विश्वा विश्वानि दृंहितानि दृढानि दुर्गाणि पुरोनगरीश्च तद्रक्षासाधनभूतान् सप्तप्रकारांश्च इन्द्रः सहसा बलेन सद्यएव विदर्दः विदारयामास।अपिच आनवस्य आनोः संबन्धिनोबलस्य आनोः पुत्रस्य वा गयं गृहं धनं वा तृत्सवे तृत्सुनामकाय राज्ञे तृत्सूनां गणाय वा विभाक् व्यभजत् अदादित्यर्थः इत्थमिन्द्रं स्तुवन्तोवयं विदथे युद्धे मृध्रवाचं बाधवाचं पूरुं मनुष्यं जेष्म जयेम ॥ १३ ॥

अथ चतुर्दशी–

नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट्सहस्रा ।
षष्टिर्वीरासो अधि षड्दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि ॥ १४ ॥

नि । गव्यवः । अनवः । द्रुह्यवः । च । षष्टिः । शता । सुसुपुः ।
षट् । सहस्रा । षष्टिः । वीरासः । अधि । षट् । दुवःऽयु । विश्वा ।
इत् । इन्द्रस्य । वीर्या । कृतानि ॥ १४ ॥

गव्यवो गोकामाः अनवः अनोः संबन्धिनः द्रुह्यवो द्रुह्योः संबंधिनश्च वीरासोवीराःषष्टिः शता शतानि सहस्राणीत्यर्थः । षट्सहस्रा सहस्राणि च षष्टिश्च अधि षट् अधिकाः षट् च दुवोयु दुवोयुवे चतुर्थीलुक् परिचरणकामाय सुदासे नमस्यति दुवस्यतीति परिचरणकर्मसु पाठाव नि सुषुपुः नितरां शेरते निहताइत्यर्थः तान्येतानि विश्वा विश्वानि कृतानि कार्याणि इन्द्रस्यैव इन्द्रस्यैव वीर्या वीर्याणीति ॥ १४ ॥ अथ पञ्चदशी–

इन्द्रेणैतेतृत्सवोवेविषाणाआपोनसृष्टाअधवन्तनीचीः ।
दुर्मित्रासःप्रकलविन्मिमानाजहुर्विश्वानिभोजनासुदासे ॥१५॥२६॥

इन्द्रेण । एते । तृत्सवः । वेविषाणाः । आपः । न । सृष्टाः ।
अधवन्त । नीचीः । दुःऽमित्रासः । प्रकलऽवित् । मिमानाः ।
जहुः । विश्वानि । भोजना । सुऽदासे ॥ १५ ॥ २६ ॥

कदाचिदिन्द्रेण रक्षिताअपि अन्यदा तेनैव बाध्यन्ते एते तृत्सवः दुर्मित्रासो दुष्टमित्राः प्रकलवित् अजानन्तः इन्द्रेण वेविषाणाः युद्धार्थं संगताः सृष्टाः पलायनार्थं उद्युक्ताः नीचीर्नीचीना आपोन आपइव अधवन्त अधावन्त ततोमिमानाः सुदासा बाध्यमाना विश्वा विश्वानि भोजना भोग्यानि धनानि सुदासे राज्ञे जहुः ॥ १५ ॥

॥ इति पञ्चमस्य द्वितीये षड्विंशोवर्गः ॥ २६ ॥

अथ षोडशी–

अर्धंवीरस्यशृतपामनिन्द्रंपराशर्धन्तंनुनुदेअभिक्षाम् ।
इन्द्रोमन्युंमन्युम्योमिमायभेजेपथोवर्तनिंपत्यमानः ॥ १६ ॥

अर्धम् । वीरस्य । शृतऽपाम् । अनिन्द्रम् । परा । शर्धन्तम् ।
नुनुदे । अभि । क्षाम् । इन्द्रः । मन्युम् । मन्युऽम्यः । मिमाय ।
भेजे । पथः । वर्तनिम् । पत्यमानः ॥ १६ ॥

इन्द्रः अभिक्षां भूमिमभि भूम्यामित्यर्थः । वीरस्य वीर्ययुक्तस्य सुदासः अर्धं हिंसकं अर्धे हिंसाकर्मणोर्धशब्दस्य निष्पत्तिः अनिन्द्रं यस्यबुद्धाविन्द्रोनास्त्यसावनिन्द्रः तमिन्द्रमगणयन्त-मित्यर्थः श्रुतर्पां श्रुतस्य क्षीरादेः हविषः पावारं शर्धंतं उत्साहमानं परा नुनुदे किंच मन्युम्यो-मन्युकर्तुः मन्युना मिनतोहिंसतो वा शत्रोर्मन्युं क्रोधं मिमाय बबाधे अथ सुदासः शत्रुः पथो मार्गान् पत्यमानोगच्छन् वर्तनिं पलायनमार्गं भेजे माप ॥ १६ ॥

अथ सप्तदशी—

आध्रेणचित्तद्वेकंचकारसिंह्यंचित्पेत्वेनाजघान ।
अवस्रक्तीर्वेश्यावृश्चदिन्द्रःप्रायच्छद्विश्वाभोजनासुदासे ॥ १७ ॥

आध्रेण । चित् । तत् । ऊँ इति । एकम् । चकार । सिंह्यम् । चित् ।
पेत्वेन । जघान । अव । स्रक्तीः । वेश्या । अवृश्चत् । इन्द्रः ।
प्र । अयच्छत् । विश्वा । भोजना । सुऽदासे ॥ १७ ॥

इन्द्रः तत् तदा आध्रेणचित् दरिद्रेणापि सुदासे एकं मुख्यं दानकर्म चकार कारयामास । सिंह्यं चित् प्रबयाः सिंहः सिंह्यः तमपि पेत्वेन छागेन जघान घातयामास वेश्या वेशी सूची तथा स्रक्तीः यूपादरश्रीनवावृश्चत् अववृक्णवान् वेश्यादेः कृत्यं सूच्यैवाकरोदित्यर्थः तान्येतानि त्रीणि कर्माणि असंभावितानीति नाशंकनीयानि इन्द्रस्य महिम्नोधिकत्वात् विश्वा विश्वानि भोजना भोजनानि भोग्यानि धनानि सुदासे राज्ञे प्रायच्छद्ददाच ॥ १७ ॥

अथाष्टादशी—

शश्वन्तोहिशत्रवोरारधुष्टेभेदस्यचिच्छर्धतोविन्दरन्धिम् ।
मर्ताँएनःस्तुवतोयःकृणोतितिग्मंतस्मिन्निजहिवज्रमिन्द्र॥१८॥

शश्वन्तः । हि । शत्रवः । ररधुः । ते । भेदस्य । चित् ।
शर्धतः । विन्द । रन्धिम् । मर्तान् । एनः । स्तुवतः । यः ।
कृणोति । तिग्मम् । तस्मिन् । नि । जहि । वज्रम् । इन्द्र ॥ १८ ॥

हे इन्द्र ते तव शत्रवोरयः शश्वन्तोबहवः रध्रुः वशमीयुः चिदपिच शर्धतः उत्सहमानस्य भेदस्य भिनत्ति मर्यादाइति भेदोनास्तिकः तस्य यद्वा भेदोनाम सुदासः शत्रुः कश्चित्तस्येत्यर्थः रन्धि वशीकुरं विन्द लभ योभेदः स्तुवतस्त्वां स्तुवतोमर्तान् मर्त्यान् प्रति एनः पापं कृणोति करोति तस्मिन् भेदे तिग्मं निशितं योद्धारं उत्साहवन्तं तथा च यास्कः–तिग्मं तेजतेरुत्साहकर्मणइति। वज्रं वजति गच्छत्येव शत्रुं न प्रतिहन्यतइति वज्रस्तं वज्रशब्दो वजेर्ऋज्रेन्द्राग्रवज्रविप्रेत्यादिनारन्प्रत्ययान्तो निपातितः। तं जहि वज्रेण भेदं महेरत्यर्थः ॥ १८ ॥

अथैकोनविंशी–

आवदिन्द्रंयमुनातृत्सवश्चप्रात्रभेदंसर्वतातामुपायत्।
अजासश्चशिग्रवोयक्षवश्चबलिंशीर्षाणिजभ्रुरश्व्यानि ॥ १९ ॥

आवत्। इन्द्रम्। यमुना। तृत्सवः। च। प्र। अत्र। भेदम्।
सर्वऽताता। मुषायत्। अजासः। च। शिग्रवः। यक्षवः।
च। बलिम्। शीर्षाणि। जभ्रुः। अश्व्यानि ॥ १९ ॥

अत्रास्मिन् सर्वताता सर्वतातौ युद्धे यः इन्द्रोभेदं नास्तिकं भेदनामकं वा सुदासः शत्रुं प्रमुषायत् प्रामुष्णात् अवधीदित्यर्थः तमिन्द्रं यमुना आवत् अतोषयत् तत्तीरवासीजनः सर्वोप्यतोषयदित्यर्थः तृत्सवः तृत्सोः पुरुषाश्चावन् आवदित्येकवचनं बहुवचनान्ततया विपरिणतं सदत्रसंबध्यते। किंचाजासोऽजाः जनपदाः शिग्रवोजनपदाः यक्षवश्च जनपदाः अश्व्यान्यश्वसंबन्धीनि शीर्षाणि शिरांसि युद्धे हतानामश्वानां शिरांसीत्यर्थः बलिमुपहारं तस्मै इन्द्रायोपजभ्रुः उपजह्रुः। यद्वा अश्व्यानि शीर्षाणि युद्धे गृहीतान् मुख्यानश्वानिन्द्रायोपहारं जह्रुरित्यर्थः॥१९॥

अथ विंशी–

नतइन्द्रसुमतयोनरायःसंचक्षेपूर्वाउपसोननूत्नाः।
देवकंचिन्मान्यमानंजघन्थावत्मनाबृहतःशम्बरंभेत् ॥२०॥२७॥

न। ते। इन्द्र। सुऽमतयः। न। रायः। सम्ऽचक्षे। पूर्वाः।
उषसः। न। नूत्नाः। देवकम्। चित्। मान्यमानम्।
जघन्थ। अव। त्मना। बृहतः। शम्बरम्। भेत् ॥ २० ॥ २७ ॥

---

१ नि० १०.६.।

हे इन्द्र ते तव पूर्वाः पुरातनाः सुमतयः शोभनमतयो रायोधनानि च उपसोन उपसइव न संचक्षे संख्यातुं न शक्याः न नूनाः नूतनाश्च सुमतयोरायश्च न संचक्षे। किं च त्वं मान्यमानं मन्यमानस्य पुत्रं देवकं देवकनामानं शत्रुं जघन्थ अवधीः। त्मना स्वयमेव बृहतो महतः शैलात् शंबरं च अवभेत् अवाभैत्सीरिति ॥ २० ॥

॥ इति पञ्चमस्य द्वितीये सप्तविंशो वर्गः ॥ २७ ॥

अथैकविंशी–

प्रयेगृहादमंमदुस्त्वायापराशरःशतयातुर्वसिष्ठः ।
नतेभोजस्यसख्यंमृषन्ताधासूरिभ्यःसुदिनाव्युंच्छान् ॥ २१ ॥

प्र । ये । गृहात् । अमंमदुः । त्वाऽया । पराऽशरः । शतऽयातुः ।
वसिष्ठः । न । ते । भोजस्य । सख्यम् । मृषन्त । अध ।
सूरिऽभ्यः । सुऽदिना । वि । उच्छान् ॥ २१ ॥

हे इन्द्र पराशरः शतयातुः बहुरक्षाः बहूनि रक्षांसि याधितुं यं कामयन्ते सशतयातुः बहूनां रक्षसां शातयिता वा शक्तिः वसिष्ठश्च एवमादयोये ऋषयः त्वाया त्वदिच्छया गृहात् गृहं प्राप्य ल्यब्लोपे द्वितीयार्थे पञ्चमी। यद्वा गृहात् गृहे सप्तम्यर्थे पञ्चमी। प्राममदुः त्वां प्रतुष्टुवुः प्रकर्षेण तर्पितवन्तोवा ते पराशरप्रभृतयः भोजस्य भोजकस्य पालकस्य ते तव सख्यं सख्युः कर्म स्तोत्रं यजनं वा न मृषन्त न विस्मरन्ति मृषमर्षे मर्षोमर्षणं तन्नकुर्वन्तीत्यर्थः यतोन विस्मरंति अध अतो हेतोः सूरीभ्यः सूरीणां स्तोतृणामेषां अत्र विभक्तिव्यत्ययः सुदिना सुदिनानि व्युच्छान् व्युच्छन्ति निवसन्ति उपगच्छन्तीत्यर्थः ॥ २१ ॥

अथ द्वाविंशी–

द्वेनप्तुर्देववतःशतेगोर्द्वारथावधूमन्तासुदासः ।
अर्हन्नग्नेपैजवनस्यदानंहोतेवसद्मपर्येमिरेभन् ॥ २२ ॥

द्वे इति । नप्तुः । देवऽवतः । शते इति । गोः । द्वा । रथा । वधूऽमन्ता ।
सुऽदासः । अर्हन् । अग्ने । पैजऽवनस्य । दानम् । होताऽइव ।
सद्म । परि । एमि । रेभन् ॥ २२ ॥

देववतोराज्ञोनप्तुः पौत्रस्य पैजवनस्य पिजवनपुत्रस्य सुदासोराज्ञो गोर्गवां द्वेशते वधूमन्ता वधूसंयुक्तौ द्वाद्वौ रथा रथौ च देयं दानं दानभूतान् रेभन् इन्द्रः स्तुवन् अतएव अर्हन् योग्योहं वसिष्ठः हे अग्ने सद्म यज्ञगृहं होतेव वषट्कर्तेव पर्येमि अत्राग्नेः संबोधनं सर्वदेवमुख्यत्वप्रतिपादनार्थं नतु देवतात्वज्ञापनार्थं अतस्तद्देवताकत्वादस्यसूक्तस्य ॥ २२ ॥

अथ त्रयोविंशी–

च॒त्वारो॑मापैजव॒नस्य॒दाना॒ःस्मद्दि॑ष्टयःकृश॒निनो॑निरे॒के ।
ऋ॒ज्रासो॑मापृथिवि॒ष्ठाःसु॒दास॑स्तो॒कंतो॒काय॒श्रव॑सेवहन्ति ॥ २३ ॥

च॒त्वारः॑ । मा॒ । पैज॒ऽव॒नस्य॑ । दानाः॑ । स्मत्ऽदि॑ष्टयः । कृ॒श॒निनः॑ । नि॒रे॒के । ऋ॒ज्रासः॑ । मा॒ । पृ॒थि॒वि॒ऽस्थाः । सु॒ऽदासः॑ । तो॒कम् । तो॒काय॑ । श्रव॑से । व॒ह॒न्ति॒ ॥ २३ ॥

पैजवनस्य पिजवनपुत्रस्य सुदासोराज्ञः स्मद्दिष्टयः प्रशस्तातिसर्जनश्रद्धादिदानांगयुक्ताः कृशनिनो हिरण्यालंकारवन्तः निरेके दुर्गतौ सत्यां ऋज्रासो ऋजुगामिनः पृथिविष्ठाः पृथिव्यां सुप्रतिष्ठिताः दानाः देयभूताश्चत्वारोश्वाः तोकं पुत्रवत्पालनीयं मां वसिष्ठं रथे स्थितं तोकाय तोकस्य पुत्रस्य षष्ठ्यर्थे चतुर्थी श्रवसे अन्नाय यशसे वा वहन्ति पुनर्मेतिपूरणः ॥ २३ ॥

अथ चतुर्विंशी–

यस्य॒श्रवो॒रोद॑सीअ॒न्तरु॒र्वीशी॒र्ष्णेशी॑र्ष्णेविब॒भाजा॑विभ॒क्ता ।
स॒प्तेदिन्द्रं॒नस्र॒वतो॑गृणन्ति॒नियु॑ध्याम॒धिम॑शिशाद॒भीके॑ ॥ २४ ॥

यस्य॑ । श्रवः॑ । रोद॑सी॒ इति॑ । अ॒न्तः । उ॒र्वी इति॑ । शी॒र्ष्णेऽशी॑र्ष्णे । वि॒ऽब॒भाज॑ । वि॒ऽभ॒क्ता । स॒प्त । इत् । इन्द्र॑म् । न । स्र॒वतः॑ । गृ॒ण॒न्ति॒ । नि । यु॒ध्याम॒धिम् । अ॒शि॒शा॒त् । अ॒भीके॑ ॥ २४ ॥

यस्य सुदासः श्रवो यशः उर्वी विस्तीर्णे रोदसी द्यावापृथिव्यौ अन्तं विस्तीर्णयोर्द्यावापृथिव्योर्मध्ये वर्ततइत्यर्थः । यश्च सुदाः विभक्ताधनस्य प्रदाता शीर्ष्णेशीर्ष्णे श्रेष्ठाय श्रेष्ठाय विबभाज धनं प्रददौ तं सुदासं सप्तेव् सप्तैव लोकाः इन्द्रं न इन्द्रमिव गृणन्ति स्तुवन्ति । किं च स्रवतो नद्यः अभीके युद्धे युध्यामधिं युध्यामधिनामकं सपत्नं नि अशिशात् न्यहन् ॥२४॥

अथ पञ्चविंशी—

इमंनरोमरुतःसश्चतानुदिवोदासंनपितरंसुदासः ।
अविष्टनापैजवनस्यकेतंदूणाशंक्षत्रमजरंदुवोयु ॥ २५ ॥२८॥

इमम् । नरः । मरुतः । सश्चत । अनु । दिवःऽदासम् । न । पितरम् ।
सुऽदासः । अविष्टन । पैजऽवनस्य । केतम् । दुःऽनशम् ।
क्षत्रम् । अजरम् । दुवःऽयु ॥ २५ ॥ २८ ॥

हे नरो नेतारो मरुतः इमं सुदासं राजानं सुदासो राज्ञः पितरं दिवोदासं न दिवोदासमिव दिवोदासइतिपिजनवनस्यैवनामान्तरं अनु सश्चत अनु सेवध्वं । किं च दुवोयु परिचरणकामस्य पष्ठ्यालुक् पैजवनस्य पिजवनपुत्रस्य सुदासः केतं मंत्रं गृहं वा अविष्टन रक्षत । अपि चास्य सुदासः क्षत्रं बलं दूणाशं दुर्नशं अविनाशि अजरं अशिथिलं चास्तु ॥ २५ ॥

॥ इति पञ्चमस्य द्वितीयेष्टाविंशो वर्गः ॥ २८॥

यस्तिग्मशृंग इत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं तथाचानुक्रान्तं—यस्तिग्मशृंगएकादशेति।आभिप्लविके पञ्चमेहनि एतन्निविद्धानं सूत्रितंच—कयाशुभायस्तिग्मशृंगइति मध्यन्दिनइति । विषुवति निष्केवल्यशस्त्रेप्येतत्सूक्तं सूत्रितं च—यस्तिग्मशृंगोभित्यंमेषमिति।महाव्रते निष्केवल्येप्येतत्सूक्तं सूत्रितं च—यस्तिग्मशृंगोवृषभोनभीम उग्रोजज्ञेवीर्यायस्वधावानिति । आयुष्कामेष्ट्यां यातेअस्यामितीन्द्रस्य त्रातुर्याज्या सूत्रितं च—यातेअस्यांसहसावन्परिष्टौ याहिनोअग्नेपायुभिरिति ।

तत्र प्रथमा—

यस्तिग्मशृंङ्गोवृषभोनभीमएकःकृष्टीश्च्यावयतिप्रविश्वाः।
यःशश्वतोअदाशुषोगयस्यप्रयन्तासिसुष्वितरायवेदः ॥ १ ॥

यः । तिग्मऽशृङ्गः । वृषभः । न । भीमः । एकः । कृष्टीः । च्यवयति ।
प्र । विश्वाः । यः । शश्वतः । अदाशुषः । गयस्य । प्रऽयन्ता ।
असि । सुस्विऽतराय । वेदः ॥ १ ॥

अथ षष्ठी–

सनातातंइन्द्रभोजनानिरातहंव्यायदाशुषेसुदासे ।
वृष्णेतेहरीवृषणायुनज्मिव्यन्तुब्रह्माणिपुरुशाकवाजम् ॥ ६ ॥

सना । ता । ते । इन्द्र । भोजनानि । रातऽहव्याय । दाशुषे ।
सुऽदासे । वृष्णे । ते । हरी इति । वृषणा । युनज्मि ।
व्यन्तु । ब्रह्माणि । पुरुऽशाक । वाजम् ॥ ६ ॥

हे इन्द्र ते तव रातहव्याय दाशुषे यजमानाय सुदासे ता तानि त्वया दत्तानि भोजनानि भोग्यानि धनानि सना सनानि सनातनानि बभूवुरितिशेषः। हे पुरुशाक बहुकर्मन्निन्द्र वृष्णे कामानां वर्षित्रे ते तुभ्यं त्वामानेतुमित्यर्थः। वृषणा वृषणौ हरी अश्वौ युनज्मि रथे योजयामि। ब्रह्माण्यस्मदीयानि स्तोत्राणि वाजं बलिनं त्वां व्यन्तु गच्छन्तु॥ ६ ॥

अथ सप्तमी–

मातेअस्यांसहसावन्परिष्टावघायभूमहरिवःपरादै ।
त्रायस्वनोवृकेभिर्वरूथैस्तवप्रियासःसूरिषुस्याम ॥ ७ ॥

मा । ते । अस्याम् । सहसाऽवन् । परिष्टौ । अघाय ।
भूम । हरिऽवः । पराऽदै । त्रायस्व । नः । अवृकेभिः ।
वरूथैः । तव । प्रियासः । सूरिषु । स्याम ॥ ७ ॥

हे सहसावन् बलवन् हरिवो हरिवन्निन्द्र ते तव अस्यां स्तोत्रेणास्माभिः क्रियमाणायां परिष्टावन्वेषणायां परादै परादानाय अघाय अहन्त्रे वयं माभूम। किं च नोस्मान् अवृकेभिः अबाधैर्वरूथैः वारयन्त्युपद्रवेभ्यः इति वरूथानि रक्षणानि तैस्त्रायस्व पाहि। तव सूरिषु स्तोतृषु मध्ये वयं प्रियासः प्रियाः स्याम भूयास्म॥ ७ ॥

अथाष्टमी–

प्रियासइत्तेमघवन्नभिष्टौनरोमदेमशरणेसखायः ।
नितुर्वशंनियाद्वंशिशीह्यतिथिग्वायशंस्यंकरिष्यन् ॥ ८ ॥

प्रियासः । इत् । ते । मघऽवन् । अभिष्टौ । नरः । मदेम ।
शरणे । सखायः । नि । तुर्वशम् । नि । याद्वम् ।
शिशीहि । अतिथिऽग्वाय । शंस्यम् । करिष्यन् ॥ ८ ॥

हे मघवन् धनवन्निन्द्र ते तवाभिष्टावभ्येषणे नरःस्तोतॄणां नेतारो वयं सखायः समानख्यातयः प्रियासःप्रियाश्च सन्तः शरणे इत् गृहे एव मदेम मोदेम। किं च अतिथिग्वाय पूज्यातिथीन् गच्छतीत्यतिथिग्वः तस्मै सुदासे दिवोदासाय वास्मदीयाय राज्ञे शंस्यं शंसनीयं सुखं करिष्यन् कुर्वन् तुर्वशं राजानं निशिशीहि वशं कुरु याद्वं च राजानं नि शिशीहीत्यर्थः॥८॥

अथ नवमी–

सद्यश्चिन्नुतेमघवन्नभिष्टौनरःशंसन्त्युक्थशासउक्था ।
येतेहवेभिर्विपणीँरदाशन्नस्मान्वृणीष्वयुज्यायतस्मै ॥ ९ ॥

सद्यः । चित् । नु । ते । मघऽवन् । अभिष्टौ । नरः । शंसन्ति ।
उक्थऽशसः । उक्था । ये । ते । हवेभिः । वि । पणीन् ।
अदाशन् । अस्मान् । वृणीष्व । युज्याय । तस्मै ॥ ९ ॥

हेमघवन् धनवन्निन्द्र ते तव नु अद्य अभिष्टावभ्येषणे ये नरः उक्थशासःउक्थानां शंसितारः उक्था उक्थानि शस्त्राणि सद्यश्चित् सद्यएव शंसन्ति किं च ते तव हवेभिः स्तोत्रैः पणीन् अप्रदानशीलान् वणिजोपि व्यदाशन् धनानि विशेषेणादापयन्नित्यर्थः। तानस्मान् तस्मै युज्याय सख्याय तत्सख्यमनुवर्तयितुं वृणीष्वापरिगृहाण ॥ ९ ॥

अथ दशमी–

एतेस्तोमानरांनृतमतुभ्यमस्मद्र्यंचोददतोमघानि ।
तेषामिन्द्रवृत्रहत्येशिवोभूःसखाचशूरोविताचनृणाम् ॥ १० ॥

एते । स्तोमाः । नराम् । नृऽतम । तुभ्यम् । अस्मद्र्यञ्चः ।
ददतः । मघानि । तेषाम् । इन्द्र । वृत्रऽहत्ये । शिवः ।
भूः । सखा । च । शूरः । अविता । च । नृणाम् ॥ १० ॥

हे नृतम नेतृतमेन्द्र तुभ्यं नरां नेतॄणां यएते स्तोमाः संघाः मघानि मंहनीयानि ह-वींषि ददतो ददन्तः असमभ्यंचोस्मदभिमुखाः अभूवन्निति शेषः । तेषां नृणां वृत्रहत्ये संग्रामे शिवः कल्याणकृद् भूः भव । सखाच भूः । शूरः वीरःसन् अविता रक्षिता च भूः ॥ १० ॥

अथैकादशी—

नूइन्द्रशूरस्तवमानऊतीब्रह्मजूतस्तन्वावावृधस्व ।
उपनोवाजान्मिमीह्युपस्तीन्यूयंपातस्वस्तिभिःसदानः॥११॥३०॥

नु । इन्द्र । शूर । स्तवमानः । ऊती । ब्रह्मऽजूतः । तन्वा ।
ववृधस्व । उप । नः । वाजान् । मिमीहि । उप । स्तीन् ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ११ ॥ ३० ॥

हे शूरेन्द्र नु अद्य स्तवमानः स्तूयमानः ब्रह्मजूतो ब्रह्मणा स्तोत्रेण प्रेरितः तन्वा शरीरेण ववृधस्व अपि च नोस्मभ्यं वाजानन्नान् उपमिमीहि प्रयच्छेत्यर्थः । स्तीन् गृहांश्चोपमिमीहि । स्पष्टमन्यत् ॥ ११ ॥

॥ इति पञ्चमस्य द्वितीये त्रिंशोवर्गः ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन् ।

पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टके द्वितीयोध्यायःसमाप्तः॥२॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा योवेदेभ्योखिलंजगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अथ तृतीयोध्याय आरभ्यते । उग्रोजज्ञइति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं तथाचानुक्रम्यते—उग्रोदशेति । आभिप्लविके चतुर्थेहनि निष्केवल्ये एतत्सूक्तं निविद्धानं सूत्रितं च—चतुर्थस्योग्रोजज्ञइति निष्केवल्यमिति । महाव्रतेपि निष्केवल्येएतत्सूक्तं तथैव पंचमारण्यके सूत्रितं—उग्रोजज्ञेवीर्यायस्वधावानुद्ब्रह्माण्यैरतश्रवस्येति । सौमिकचातुर्मास्येषु वैश्वदेवस्य स्थाने प्रथमं पृष्ठ्यमहः तत्रापि निष्केवल्ये एतत्सूक्तंनिविद्धानं सूत्रितं च—जनिष्ठाउग्रउग्रोजज्ञइति मध्यंदिनइति ।

तत्र प्रथमा—

ॐम् उग्रोजंज्ञेवीर्यायस्वधावाञ्चक्रिरपोनर्योयत्करिष्यन् ।
जग्मिर्युवांनृषदंनमवोभिस्त्रातानइन्द्रएनसोमहश्चित् ॥ १ ॥

उग्रः । जज्ञे । वीर्याय । स्वधाऽवान् । चक्रिः । अपः । नर्यः । यत् ।
करिष्यन् । जग्मिः । युवा । नृऽसदनम् । अवःऽभिः । त्राता ।
नः । इन्द्रः । एनसः । महः । चित् ॥ १ ॥

स्वधावान् बलवान् उग्रओजस्वी उद्गूर्णोवा इन्द्रः वीर्याय वीर्यं कर्तुं जज्ञे बभूव । नर्यो नरहितःसन् यत्कर्म करिष्यन् भवति तदपः कर्म चक्रिः कर्तैव । चक्रिरिति किन्प्रत्ययस्य लिड्वद्भावात् नलोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीप्रतिषेधः । अपिच नृषदनं यज्ञगृहं युवा नित्यतरुणःसन् अवोभीरक्षणैः सार्धं जग्मिः गन्ता महश्चिद् महतोप्येनसः पापात् नोस्माकं त्राता रक्षिता च भवेति ॥ १ ॥

अथ द्वितीया—

हन्तावृत्रमिन्द्रःशूशुवानःप्रावीन्नुवीरोजरितारमूती ।
कर्तासुदासेअहवाउलोकंदातावसुमुहुरादाशुषेभूत् ॥ २ ॥

हन्ता । वृत्रम् । इन्द्रः । शूशुवानः । प्र । आवीत् । नु । वीरः ।
जरितारम् । ऊती । कर्ता । सुऽदासे । अह । वै । ऊँ इति ।
लोकम् । दाता । वसु । मुहुः । आ । दाशुषे । भूत् ॥ २ ॥

इन्द्रः शूशुवानोवर्धमानःसन् वृत्रमसुरं हन्ता भवति । तृजन्तत्वादत्रषष्ठ्यभावः वीरो वीरःसन् जरितारं स्तोतारं नु क्षिप्रं ऊती ऊत्या रक्षया प्रावीत् प्रारक्षच । सुदासे राज्ञे लोकं जनपदं कर्ता च । यद्वा सुदासे कल्याणदानाय यजमानाय लोकं कर्ता च भवति इहाप्युत्तरत्रापि तृजन्तत्वात्षष्ठ्यभावः । अह वै उ इति त्रयः पूरणाः । दाशुषे यजमानाय वसु धनं मुहुर्भूयोभूयो ददाच भूद्भूत् आइति चार्थे ॥ २ ॥

अथ तृतीया—

युध्मोअनर्वाखजकृत्समद्वाशूरःसत्राषाड्जनुषेमषाह्ळः ।
व्यासइन्द्रःपृतनाःस्वोजाअधाविश्वंशत्रूयन्तंजघान ॥ ३ ॥

युध्मः । अनर्वा । खजऽकृत् । समत्ऽवा । शूरः । सत्राषाट् ।
जनुषा । ईम् । अषाह्ळः । वि । आसे । इन्द्रः । पृतनाः ।
सुऽओजाः । अध । विश्वम् । शत्रुऽयन्तम् । जघान ॥ ३ ॥

युध्मो योद्धा अनर्वा अभिगन्तृरहितो युद्धेष्वपराङ्मुखोवा खजकृद्युद्धकृत् खले खजे इति युद्धनामसु पाठात् । समद्वा समत्कलहः तद्वान् शूरः शौर्योपेतः जनुषा जन्मना स्वभावतएव सत्राषाट् बहूनामभिभविता अषाह्ळः स्वयंच केनाप्यनभिभूतः स्वोजाः सुबलः ईमयमिन्द्रः पृतनाः शत्रूणां सेनाः व्यासे विक्षिपति । अध अपि च शत्रूयन्तं शात्रवमाचरन्तं विश्वं सर्वं जघान हन्ति ॥ ३ ॥

अथ चतुर्थी—

उभेचिदिन्द्ररोदसीमहित्वापप्राथतविषीभिस्तुविष्मः ।
निवज्रमिन्द्रोहरिवान्मिमिक्षन्त्समन्धसामदेषुवाउवोच ॥ ४ ॥

उभे इति । चित् । इन्द्र । रोदसी इति । महिऽत्वा । आ ।
पप्राथ । तविषीभिः । तुविष्मः । नि । वज्रम् । इन्द्रः ।
हरिऽवान् । मिमिक्षन् । सम् । अन्धसा । मदेषु । वै । उवोच ॥ ४ ॥

हे तुविष्मो बहुधनेन्द्र महित्वा महित्वेन तविषीभिर्बलैश्च उभे चिद् उभे अपि रोदसी द्यावापृथिव्यौ आ पप्राथ आ पूरितवानसि। अथपरोक्षस्तुतिः हरिवानश्ववानिन्द्रो वज्रं निमिमिक्षन् शत्रुषु प्रापयन् मदेषु यज्ञेषु निविक्षुवा अन्धसा सोमेन समुवोच संसेव्यते संगच्छते वा। उचसमवाये इतिधातुः वा इति पूरणः॥ ४॥

अथ पंचमी–

वृषाजजानवृषणंरणायतमुंचिन्नारीनर्यंससूव।
प्रयःसेनानीरधनृभ्योअस्तीनःसत्वागवेषणःसधृष्णुः॥ ५॥ १॥

वृषा। जजान। वृषणम्। रणाय। तम्। ऊँ इति। चित्।
नारी। नर्यम्। ससूव। प्र। यः। सेनाऽनीः। अध। नृऽभ्यः।
अस्ति। इनः। सत्वा। गोऽएषणः। सः। धृष्णुः॥ ५॥॥ १॥

वृषा सेक्ता पिता कश्यपो वृषणं कामानां वर्षितारमिन्द्रं रणाय युद्धार्थं जजान।जनजनने इतिधातुः नर्यं नरहितं वसु तमेवेन्द्रं नारी चिद् अदितिरपि ससूव सुषुवे।अधापि च यइन्द्रोनृभ्योनृणां सेनानीः सेनानां नेता स प्रास्ति प्रभवति सइन्द्रः इनः सर्वस्य जगतः ईश्वरो भवति नियुत्वान् इन इतीश्वरनामसु पाठात् सत्वा शत्रूणां सादकश्च गवेषणः गवामन्वेष्टा च धृष्णुः शत्रूणां धर्षकश्च भवतीतिशेषः॥ ५॥

॥ इति पंचमस्य तृतीये प्रथमो वर्गः॥ १॥

अथ षष्ठी–

नूचित्सभ्रेषतेजनोनरेषन्मनोयोअस्यघोरमाविवासात्।
यज्ञैर्यइन्द्रेदधतेदुवांसिक्षयत्सरायऋतपाऋतेजाः॥ ६॥

नु। चित्। सः। भ्रेषते। जनः। न। रेषत्। मनः। यः।
अस्य। घोरम्। आऽविवासात्। यज्ञैः। यः। इन्द्रे। दधते।
दुवांसि। क्षयत्। सः। राये। ऋतऽपाः। ऋतेऽजाः॥ ६॥

योजनः अस्येन्द्रस्य घोरं शत्रूणां बाधकं मनोयज्ञैराविवासात् परिचरति सजनः नु इति प्रतिषेधे वर्तते चिदेवकारार्थे नूचिद् नैव भ्रेषते स्थानात् नभ्रश्यति नरेषत् नैव क्षीयेत अपिच

योजनोदुर्वांसि परिचरणसाधनानि स्तोत्रशस्त्राणीन्द्रे दधते निधत्ते तस्मै जनाय ऋतपाः यज्ञपाता ऋतेजाः यज्ञेजातश्च सइन्द्रो राये धनाय क्षयत् निवसति भवेदित्यर्थः ॥ ६ ॥

अथ सप्तमी–

यदिन्द्रपूर्वोअपराययशिक्षन्नयज्ज्यायान्कनीयसोदेष्णम् ।
अमृतइत्पर्यासीतदूरमाचित्रचित्र्यंभरारयिंनः ॥ ७ ॥

यत् । इन्द्र । पूर्वः । अपराय । शिक्षन् । अयत् । ज्यायान् ।
कनीयसः । देष्णम् । अमृतः । इत् । परि । आसीत । दूरम् ।
आ । चित्र । चित्र्यम् । भर । रयिम् । नः ॥ ७ ॥

हे चित्र चायनीयेन्द्र यद्धनं पूर्वःपिता ज्येष्ठोभ्राता वा अपराय पुत्राय कनीयसे वा शिक्षन् प्रयच्छन् शिक्षतिर्दानकर्मा शीक्षाति शिक्षति इति दानकर्मसु पाठात् भवतीति शेषः। यच्च देष्णं देयं धनं ज्यायान् ज्येष्ठः कनीयसः अयत् प्रामुयात् यच्चापि धनं पितृतोलब्ध्वा पुत्रोअमृतइत् अमृतएव सन् पितृगृहं विहाय दूरं पर्यासीत आस्ते तन्निविधं चित्र्यं चायनीयं रयिं धनं नोस्मभ्यमाभर आहर ॥ ७ ॥

अथाष्टमी–

यस्तइन्द्रप्रियोजनोददाशदसन्निरेकेअद्रिवःसखाते ।
वयंतेअस्यांसुमतौचनिष्ठाःस्यामवरूथेअघ्नतोनृपीतौ ॥ ८ ॥

यः । ते । इन्द्र । प्रियः । जनः । ददाशत् । असत् । निरेके ।
अद्रिऽवः । सखा । ते । वयम् । ते । अस्याम् । सुऽमतौ ।
चनिष्ठाः । स्याम । वरूथे । अघ्नतः । नृऽपीतौ ॥ ८ ॥

हे इन्द्र यः ते तुभ्यं प्रियः सखा जनो ददाशत् हवींषि दद्यात्। हे अद्रिवः ससखा ते तवं निरेके दाने असत्स्यात् वयं च वसिष्ठाः अघ्नतोहिंसतः ते तव अस्यां सुमतौ अनुग्रहबुद्धौ वर्तमानाश्चनिष्ठाः स्तुतिमत्तराः अतिशयेनान्नवन्तोवा चनोन्नं नृपीतौ नृणां रक्षके वरूथे गृहे वरणीये वा धने स्याम वसेम भवेम वा ॥ ८ ॥

अथ नवमी—

एषःस्तोमोंअचिक्रदृदृषांतउतस्तामुर्मघवन्नक्रपिष्ट ।
रायस्कामोंजरितारंन्तआगन्त्वमङ्गशक्रवस्वआशकोनः ॥ ९ ॥

एषः । स्तोमः । अचिक्रदत् । वृषा । ते । उत । स्तामुः ।
मघऽवन् । अक्रपिष्ट । रायः । कामः । जरितारम् । ते ।
आ । अगन् । त्वम् । अङ्ग । शक्र । वस्वः । आ । शकः । नः ॥९ ॥

हे मघवन् धनवन्निन्द्र ते त्वदर्थं वृषा सेक्ता एषः स्तोमः सोमः सूयमानः अचिक्रदत् क्रन्दति उतापिच स्तामुः स्तोता अक्रपिष्ट अस्तौत् अपिच हे शक्र ते तव जरितारं स्तोतारं मां रायोधनस्य कामोभिलाष आगन् आगतः अतस्त्वं वस्वो धनं कर्मणिषष्ठी नोस्मभ्यं अंग क्षिप्रं आशकः धेहि ॥ ९ ॥

अथ दशमी—

सनंइन्द्रत्वयंतायाइषेधास्त्मनांचयेमघवांनोजुनन्ति ।
वस्वीपुतेजरित्रेअंस्तुशक्तिर्यूयंपांतस्वस्तिभिःसदांनः ॥१०॥२॥

सः । नः । इन्द्र । त्वऽयंतायै । इषे । धाः । त्मनां । च । ये ।
मघऽवांनः । जुनन्ति । वस्वीं । सु । ते । जरित्रे । अस्तु ।
शक्तिः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः । ॥१०॥ ॥ २ ॥

हे इन्द्र सत्वं त्वयताये इषे त्वया दत्तमन्नं भोक्तुं नोस्मान् धाः धारय । ये च मघवानो हविष्मन्तः त्मना स्वयमेव जुनन्ति हवींषि त्वां प्रति प्रेरयन्ति तानपि त्वयताया इषे धाः अपि च वस्वीषु अत्यंतं प्रशस्तासु स्तुतिषु ते तव जरित्रे स्तोत्रे महां शक्तिः सामर्थ्यमस्तु । यद्वा जरित्रे महां ते तव वस्वीषु प्रशस्ता शक्तिर्दानमस्तु स्पष्टमन्यत् ॥ १० ॥

॥ इति पंचमस्य तृतीये द्वितीयोवर्गः ॥ २ ॥

असाविदेवमिति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं तथाचानुक्रान्तं—असावीति। माध्यंदिनसवनेमैत्रावरुणस्योन्नीयमानमिदं सूक्तं सूत्रितं च—असाविदेवमिहोपयातेत्यनुसवनमिति। इन्द्रस्य वृत्रघ्नः पशावभिक्रत्वेति वपाया अनुवाक्या। सूत्रितं च—अभिक्रत्वेन्द्रभूरधज्मन् त्वंमहाँइन्द्रतुभ्यंहक्षाइति।

तत्र प्रथमा—

असाविदेवंगोऋजीकमन्धोन्यस्मिन्निन्द्रोजनुषेमुवोच।
बोधामसित्वाहर्यश्वयज्ञैर्बोधानःस्तोममन्धसोमदेषु ॥ १ ॥

असावि। देवम्। गोऽऋजीकम्। अन्धः। नि। अस्मिन्।
इन्द्रः। जनुषा। ईम्। उवोच। बोधामसि। त्वा। हरिऽअश्व।
यज्ञैः। बोध। नः। स्तोमम्। अन्धसः। मदेषु ॥ १ ॥

देवं दीप्तं गोऋजीकं गोभिः संस्कृतं गव्येन मिश्रितमित्यर्थः अंधः सोमरूपमन्नं असावि अभिषुतं। ईमयमिन्द्रोस्मिन्नभिषुते सोमरूपेंधसि जनुषा स्वभावतएव न्युवोच नितरां संगतो भवति। अथ प्रत्यक्षस्तुतिः हे हर्यश्व त्वा त्वां यज्ञैः स्तोत्रैः हविर्भिर्वा बोधामसि बोधयामः। अन्धसः सोमस्य मदेषु नोस्माकं स्तोमं स्तोत्रं बोध बुध्यस्व च ॥ १ ॥

अथ द्वितीया—

प्रयन्तियज्ञंविपयन्तिबर्हिःसोममादोविदथेदुध्रवाचः।
न्युभ्रियन्तेयशसोगृभादादूरउपब्दोवृषणोनृषाचः ॥ २ ॥

प्र। यन्ति। यज्ञम्। विपयन्ति। बर्हिः। सोमऽमादः। विदथे।
दुध्रऽवाचः। नि। ऊँ इति। भ्रियन्ते। यशसः। गृभात्। आ।
दूरेऽउपब्दः। वृषणः। नृऽसाचः ॥ २ ॥

यज्ञं प्रयन्ति यष्टारः बर्हिश्च विपयन्ति स्तृणन्ति। विपिः स्तरणकर्मा विदथे यज्ञे सोममादो ग्रावाणश्च दुध्रवाचः दुर्धरवाचो भवन्ति। अपि च यशसो यशस्विनो दूरउपब्दः दूरेउपब्दिः शब्दो येषां ते दूरउपब्दः नृषाचः नृन्नेतॄनृत्विजः सचन्तइति नृषाचो वृषणो ग्रावाणो गृभात् गृहात् गृहमध्यमग्रावा तस्मात् आइति चार्थे निभ्रियन्ते अभिषववेलायां निगृह्यन्ते। उइति पूरणः॥ २ ॥

अथ तृतीया–

त्वमिन्द्रस्रवितवाअपस्कःपरिष्ठिताअहिनाशूरपूर्वीः ।
त्वद्वावक्रेरथ्यो३नधेनारेजन्तेविश्वाकृत्रिमाणिभीषा ॥ ३ ॥

त्वम् । इन्द्र । स्रवितवै । अपः । कः । परिऽस्थिताः ।
अहिना । शूर । पूर्वीः । त्वत् । वावक्रे । रथ्यः । न । धेनाः । रेजन्ते ।
विश्वा । कृत्रिमाणि । भीषा ॥ ३ ॥

हे शूरेन्द्र त्वं अहिना वृत्रेण परिष्ठिता आक्रान्ताः पूर्वीर्बह्वीरपउदकानि स्रवितवै स्रवितुं कः अकार्षीः धेनाः नद्यश्च त्वत् त्वत्तोहेतोः रथ्योन रथिनइव वावक्रे निर्गच्छन्ति । वकिकौटिल्ये इति धातुः । विश्वा विश्वानि कृत्रिमाणि भुवनानि च भीषा त्वत्तोभीत्या रेजन्ते कंपन्ते॥३॥

अथ चतुर्थी–

भीमोविवेषायुधेभिरेषामपांसिविश्वानर्याणिविद्वान् ।
इन्द्रःपुरोजर्हृषाणोविदूधोद्विवज्रहस्तोमहिनाजघान ॥ ४ ॥

भीमः । विवेष । आयुधेभिः । एषाम् । अपांसि । विश्वा ।
नर्याणि । विद्वान् । इन्द्रः । पुरः । जर्हृषाणः । वि । दूधोत् । वि ।
वज्रऽहस्तः । महिना । जघान ॥ ४ ॥

इन्द्रो नर्याणि नरहितानि विश्वा विश्वानि अपांसि कर्माणि विद्वान् जानन् आयुधेभिरायुधैः भीमो भयंकरःसन् एषां कर्मणिषष्ठी एतानसुरान् विवेष व्याप्तवान् पुरश्च तेषां विदूधोदकंपयत् । अपि च जर्हृषाणः हृष्यन् महिना महिम्ना युक्तो वज्रहस्तःसन् तान्विजघान ॥ ४ ॥

अथ पञ्चमी–

नयातवइन्द्रजूजुवुर्नोनवन्दनाशविष्ठवेद्याभिः ।
सशर्धदर्योविषुणस्यजन्तोर्माशिश्नदेवाअपिगुर्ऋतंनः ॥ ५ ॥३॥

न । यातवः । इन्द्र । जूजुवुः । नः । न । वन्दना । शविष्ठ । वेद्याभिः ।
सः । शर्धत् । अर्यः । विषुणस्य । जन्तोः । मा । शिश्नऽदेवाः ।
अपि । गुः । ऋतम् । नः ॥ ५ ॥ ३ ॥

हे इन्द्र यातवोराक्षसाः नोस्मान् न जूजुवुः न हिंस्युः। जूजुवुरिति हिंसाक्रियः पृथक्करणक्रियोवा॥ अपि च हेशविष्ठ बलवत्तमेन्द्र वन्दना वन्दनानि रक्षांसि वेद्याभिः वेद्याभ्यः प्रजाभ्योनोस्मान् नजूजुवुः नपृथक्कुर्वन्तु। किं च अर्यः स्वामी सइन्द्रः विषुणस्य विषमस्य जन्तोः प्राणिनः शासने शर्धत्र उत्सहेत। अथच शिश्नदेवाः शिश्नेन दीव्यन्ति क्रीडन्तइति शिश्नदेवाः अब्रह्मचर्याइत्यर्थः नोस्माकं ऋतं यज्ञं सत्यं वा मापिगुः मापिगमन्। तथा च यास्कः—सउत्सहतां योविषुणस्यजन्तोर्विषमस्य माशिश्नदेवाअब्रह्मचर्याः शिश्नं श्नथतेः अपिगुर्ऋतंनः सत्यंवा यज्ञंवेति[1] ॥५॥

॥ इति पंचमस्य तृतीयेतृतीयो वर्गः ॥ ३ ॥

अथ षष्ठी—

अभिक्रत्वेन्द्रभूरधज्मन्नतेविव्यङ्महिमानंरजांसि।
स्वेनाहिवृत्रंशवसाजघन्थनशत्रुरन्तंविविदद्युधाते॥ ६॥

अभि। क्रत्वा। इन्द्र। भूः। अध। ज्मन्। न। ते। विव्यक्।
महिमानम्। रजांसि। स्वेन। हि। वृत्रम्। शवसा। जघन्थ।
न। शत्रुः। अन्तम्। विविदत्। युधा। ते॥ ६॥

हे इन्द्र त्वं क्रत्वा कर्मणा ज्मन् पृथिव्यां वर्तमानान् जन्तून्वा अभिभूः अभ्यभूः अधापि च ते तव महिमानं रजांसि सर्वेलोका न विव्यक् व्यश्निर्व्याप्तिकर्मा न व्यामुवन्नित्यर्थः स्वेन हि आत्मीयेन च शवसा बलेन वृत्रं जघंथ त्वमवधीः शत्रुश्च युधा युद्धेन ते तवांतं हिंसां न विविदत् नलब्धवान्॥ ६॥

अथ सप्तमी—

देवाश्चित्तेअसुर्यायपूर्वेनुक्षत्रायममिरेसहांसि।
इन्द्रोमघानिदयतेविषह्येन्द्रंवाजस्यजोहुवन्तसातौ॥ ७॥

देवाः। चित्। ते। असुर्याय। पूर्वे। अनु। क्षत्राय। ममिरे।
सहांसि। इन्द्रः। मघानि। दयते। विऽसह्य। इन्द्रम्। वाजस्य।
जोहुवन्त। सातौ॥ ७॥

---

1 नि० ४. १९।

पूर्वे देवाश्चिद् असुरा अपि असुर्याय वलाय क्षत्राय क्षदिर्हिंसाकर्मा वलं हिंसां च उभे कर्तुमित्यर्थः । हे इन्द्र ते तव सहांसि बलानि अनुममिरे । हीने इत्यनुः कर्मप्रवचनीयः । तव बलेभ्योहीना ममिरे इत्यर्थः । तथा च निगमान्तरं—अनुतेदायिमहइन्द्रियायेति । अथपरोक्षस्तुतिः इन्द्रः शत्रून् विषह्य मघानि मंहनीयानि धनानि दयते प्रयच्छति अपि चेन्द्रं वाजस्यान्नस्य सातौ लाभार्थं जोहुवन्त स्तुवन्ति स्तोतारआह्वयन्ति वा ॥ ७ ॥

अथाष्टमी—

कीरिश्चिद्धित्वामवसेजुहावेशानमिन्द्रसौभगस्यभूरेः ।
अवोबभूथशतमूतेअस्मेअभिक्षत्तुस्त्वावतोवरूता ॥ ८ ॥

कीरिः । चित् । हि । त्वाम् । अवसे । जुहाव । ईशानम् । इन्द्र ।
सौभगस्य । भूरेः । अवः । बभूथ । शतम्ऽऊते । अस्मे इति ।
अभिऽक्षत्तुः । त्वाऽवतः । वरूता ॥ ८ ॥

हे इन्द्र ईशानं त्वां कीरिः स्तोता कारुः कीरिरिति स्तोतृनामसु पाठात् वसिष्ठोऽवसे रक्षणाय जुहाव हि स्तौति हि ह्वयति वा। चिदिति पूरणः अपि च हे शतमूते बहुरक्षेन्द्र अस्मे अस्माकं भूरेः प्रभूतस्य सौभगस्य धनस्य अवोरक्षा बभूथ बभूविथ अभिक्षत्तुरहिंसकस्य त्वावतः त्वत्सदृशस्य वरूता वारयितश्च भव ॥ ८

अथ नवमी—

सखायस्तइन्द्रविश्वहस्यामनमोवृधासोमहिनातरुत्र ।
वन्वन्तुस्मातेवसासमीकेऽभीतिमर्योवनुषांशवांसि ॥ ९ ॥

सखायः । ते । इन्द्र । विश्वह । स्याम । नमःऽवृधासः । महिना ।
तरुत्र । वन्वन्तु । स्म । ते । अवसा । समऽईके । अभिऽइतिम् ।
अर्यः । वनुषाम् । शवांसि ॥ ९ ॥

---

१ ऋ० सं० १. ४. २२. १

हे इन्द्र ते तव नमोवृधासो नमसा स्तुत्या हविषा वा वर्धयितारो वयं विश्वह सर्वदा सखायः स्याम भवेम महिना महिम्ना तरुत्रः अत्यंततारकेन्द्र ते तवावसा रक्षणेन समीके संग्रामे अर्योभीतिमभिगमनं वनुषां हिंसकानां शवांसि बलानि च वन्वन्तु स्तोतारो हिंसन्तु ॥ ९ ॥

अथ दशमी–

सनंइन्द्रत्वयंतायाइषेधास्त्मनांचयेमघवानोजुनन्ति ।
वस्वीषुतेजरित्रेअस्तुशक्तिर्यूयंपातस्वस्तिभिःसदानः ॥१०॥४॥

सः । नः । इन्द्र । त्वऽयंतायै । इषे । धाः । त्मना । च । ये ।
मघऽवानः । जुनन्ति । वस्वी । सु । ते । जरित्रे । अस्तु । शक्तिः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥ ४ ॥

इयमृक् व्याख्यातचरा ॥ १० ॥

॥ इति पंचमस्य तृतीये चतुर्थो वर्गः ॥ ४ ॥

पिबासोममिन्द्रमन्दतुत्वेति नवर्चं पंचमं सूक्तं। अनुक्रम्यते च–पिबनव वैराजमृतेंत्यामिति। वसिष्ठऋषिः आदितोष्टौविराजः नवमीत्रिष्टुबिन्द्रोदेवता दशरात्रे.चतुर्थेहनि निष्केवल्यशस्त्रे पिबासोममिन्द्रेतिषट् स्तोत्रियानुरूपौ सूत्रितं च–वैराजंचेत्पृष्ठं पिबासोममिन्द्रमन्दतुत्वेति षट्स्तोत्रियानुरूपाविति। महाव्रतेपि निष्केवल्येआद्याः षळृचः सूत्रितं च–पिबासोममिन्द्रमन्दतुत्वेति षळिति। आद्या निष्केवल्यशस्त्रयाज्या सूत्रितं च–पिबासोममिन्द्रमन्दतुत्वेति याज्येति। चतुर्थेहनि माध्यंदिने सवने होत्रकशस्त्रेषु सप्तविराजः त्रींस्तृचानकृत्वाएकैकस्तृचः शंसनीयः तत्र नतेगिरइत्याद्याश्चतस्रऋचः सूत्रितं च–नतेगिरोअपिमृष्येतुरस्य प्रवोमहेमहिवृधेभरध्वमिति ।

तत्र प्रथमा–

पिबासोममिन्द्रमन्दंतुत्वायन्तेसुषावहर्यश्वाद्रिः ।
सोतुर्बाहुभ्यांसुयंतोनार्वा ॥ १ ॥

पिब । सोमम् । इन्द्र । मन्दतु । त्वा । यम् । ते । सुसाव । हरिऽअश्व ।
अद्रिः । सोतुः । बाहुऽभ्याम् । सुऽयतः । न । अर्वा ॥ १ ॥

हे इन्द्र सोम पिब ससोमस्त्वा त्वां मन्दतु मादयतु । हे हर्यश्व ते त्वदर्थं सोतुरभिषवकर्तुर्बाहुभ्यामर्वान रश्मिभ्यामश्वइव सुयतः सुष्ठु परिगृहीतोद्रिर्ग्रावा यं सोमं सुषाव ॥ १ ॥

अथ द्वितीया–

यस्ते॒मदो॒युज्य॒श्चारु॒रस्ति॒येन॑वृ॒त्राणि॒हर्यश्वहंसि॑ ।
सत्वामि॑न्द्रप्रभूवसोममत्तु ॥ २ ॥

यः । ते॒ । मदः॑ । युज्यः॑ । चारुः॑ । अस्ति॑ । येन॑ । वृ॒त्राणि॑ ।
ह॒रि॒ऽअ॒श्व॒ । हंसि॑ । सः । त्वाम् । इ॒न्द्र॒ । प्र॒भु॒व॒सो॒ इति॑ प्रभु॒ऽव॒सो॒ ।
म॒म॒त्तु॒ ॥२॥

हे हर्यश्व ते तव यः युज्योगुणः चारुः समीचीनो मदो मदकरः सोमोस्ति विद्यते येनच पीतेन सोमेन वृत्राणि हंसि । हे प्रभूवसो प्रभूतधनेन्द्र त्वां ससोमोममत्तु मादयतु ॥ २ ॥

अथ तृतीया–

बोधा॒सुमे॑मघवन्वाच॒मेमांयांते॒वसि॑ष्ठोअर्चति॒प्रश॑स्तिम् ।
इ॒माब्रह्म॑सध॒मादे॑जुषस्व ॥ ३ ॥

बोध॑ । सु । मे॒ । म॒घ॒ऽव॒न् । वाच॑म् । आ । इ॒माम् ।
याम् । ते॒ । वसि॑ष्ठः । अर्च॑ति । प्रऽश॑स्तिम् । इ॒मा ।
ब्रह्म॑ । स॒ध॒ऽमादे॑ । जु॒ष॒स्व॒ ॥ ३ ॥

हे मघवन् धनवन्निन्द्र ते तव प्रशस्तिं स्तुतिरूपां यां वाचं वसिष्ठः अर्चति तामिमां मे वसिष्ठस्य संबन्धिनीं वाचं स्वबोध सुष्ठु अभिबुध्यस्व । किं च इमा इमानि ब्रह्म ब्रह्माणि सधमादे यज्ञे जुषस्व सेवस्व ॥ ३ ॥

अथ चतुर्थी–

श्रु॒धीहवं॑विपिपा॒नस्याद्रे॒र्बोधा॒विप्र॒स्यार्च॑तोमनी॒षाम् ।
कृ॒ष्वादुवां॒स्यन्त॑मास॒चेमा ॥ ४ ॥

श्रु॒धि । हव॑म् । वि॒ऽपि॒पा॒नस्य॑ । अद्रेः॑ । बोध॑ । विप्र॑स्य । अर्च॑तः ।
म॒नी॒षाम् । कृ॒ष्व । दुवां॑सि । अन्त॑मा । सचा॑ । इ॒मा ॥ ४ ॥

हे इन्द्र विपिपानस्य विपीतवतो विपिबतोवा ममादेर्याऽगोहवमाह्वानं श्रुधि शृणु। तथाच निगमान्तरं—ग्रावण्योवाचंवदतावदद्भ्यइति। विप्रस्य प्राज्ञस्य वसिष्ठस्यार्चतः स्तुवतो मनीषां स्तुतिं बोध बुध्यस्व च। इमा इमानि क्रियमाणानि दुवांसि परिचरणान्यन्तमान्तिकतमानि बुद्धिस्थानि सचा सह सहायभूतःसन् वा कृष्व कुरु च ॥ ४ ॥

अथ पंचमी—

नतेगिरोअपिमृष्येतुरस्यनसुष्टुतिमसुर्यस्यविद्वान्।
सदातेनामस्वयशोविवक्मि ॥ ५ ॥ ५ ॥

न। ते। गिरः। अपि। मृष्ये। तुरस्य। न। सुऽस्तुतिम्।
असुर्यस्य। विद्वान्। सदा। ते। नाम। स्वऽयशः। विवक्मि॥५॥५॥

हे इन्द्र तुरस्य शत्रूणां हिंसकस्य ते तव गिरः स्तुतीरसुर्यस्य द्वितीयार्थे षष्ठी त्वदीयमसुर्यं बलं विद्वान् जानन् अहं नापिमृष्ये मृषिर्मार्जनकर्मा न मार्जयामि नपरित्यजामीत्यर्थः। सुष्टुतिं शोभनां स्तुतिं च नापिमृष्ये मृषेर्मार्जनकर्मत्वमन्यत्रापिदृश्यते। तद्यथा—मानोअग्नेसख्यापित्र्याणिप्रमर्षिष्ठाइति। किंतु स्वयशः असाधारणयशास्ते तव नाम स्तोत्रं सदा सर्वदा विवक्मि ब्रवीमि ॥ ५ ॥

॥ इति पंचमस्य तृतीये पंचमो वर्गः ॥ ५ ॥

अथ षष्ठी—

भूरिहितेसवनामानुषेषुभूरिमनीषीहवतेत्वामित्।
मारेअस्मन्मघवञ्ज्योक्कः ॥ ६ ॥

भूरि। हि। ते। सवना। मानुषेषु। भूरि। मनीषी। हवते। त्वाम्।
इत्। मा। आरे। अस्मत्। मघऽवन्। ज्योक्। करिति कः॥ ६ ॥

हे मघवन् ते तव सवना सवनानि सोमाभिषवणानि भूरि भूरीणि मानुषेष्वस्मासु वर्तन्तइतिशेषः। हिः पूरणः मनीषी स्तोता त्वामित् त्वामेव भूरि हवते नितरांस्तौति आह्वयति। अतोस्मदस्मत्तआरेदूरे ज्योक् चिरकालं माकः आत्मानं माकार्षीः क्षिप्रमात्मानमस्मदासन्नं कुर्वित्यर्थः॥६॥

---

१ ऋ० सं० ८. ४. २९। २ ऋ सं० १. ५. १६।

अथ सप्तमी—

तुभ्येदिमासवनाशूरविश्वातुभ्यंब्रह्माणिवर्धनाकृणोमि ।
त्वंनृभिर्हव्योविश्वधासि ॥ ७ ॥

तुभ्यं । इत् । इमा । सवना । शूर । विश्वा । तुभ्यम् । ब्रह्माणि ।
वर्धना । कृणोमि । त्वम् । नृऽभिः । हव्यः । विश्वधा । असि ॥ ७ ॥

हे शूर तुभ्येत् तुभ्यमेव इमा इमानि विश्वा विश्वानि सवना सवनानि सोमाभिषवणानि मया क्रियन्तइति शेषः तुभ्यं त्वदर्थमेव वर्धना वर्धनानि ब्रह्माणि स्तोत्राणि कृणोमि करोमि । त्वमेव नृभिर्यज्ञानां नेतृभिः विश्वधा सर्वप्रकारैः हव्योह्वातव्यः स्तुत्योवासि ॥ ७ ॥

अथाष्टमी—

नूचिन्नुतेमन्यमानस्यदस्मोदश्नुवन्तिमहिमानमुग्र ।
नवीर्यमिन्द्रतेनराधः ॥ ८ ॥

नु । चित् । नु । ते । मन्यमानस्य । दस्म । उत् । अश्नुवन्ति ।
महिमानम् । उग्र । न । वीर्यम् । इन्द्र । ते । न । राधः ॥ ८ ॥

हे दस्म दर्शनीय मन्यमानस्य स्तूयमानस्य ते तव महिमानं नूचिदिति प्रतिषेधार्थः नु क्षिप्रं नूचिदुदश्नुवन्ति केचन न प्राप्नुवन्ति हे उग्र उद्गूर्ण ते तव राधो धनं हे इन्द्र ते वीर्यं सामर्थ्यं च नोदश्नुवन्ति ॥ ८ ॥

अथ नवमी—

येचपूर्वऋषयोयेचनूत्नाइन्द्रब्रह्माणिजनयन्तविप्राः ।
अस्मेतेसन्तुसख्याशिवानियूयंपातस्वस्तिभिःसदानः ॥९॥६॥

ये । च । पूर्वे । ऋषयः । ये । च । नूत्नाः । इन्द्र । ब्रह्माणि ।
जनयन्त । विप्राः । अस्मे इति । ते । सन्तु । सख्या । शिवानि ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ९ ॥ ६ ॥

ये च पूर्वे प्राक्तना ऋषयः ये च नूत्नाः नूतनाः विप्रामेधाविनऋषयो ब्रह्माणि स्तोत्राणि जनयन्त अजनयन्त तेष्विविवास्मे अस्मास्वपि हे इन्द्र ते तव सख्या सख्यानि शिवानि भद्राणि सन्तु स्पष्टमन्यत् ॥ ९ ॥

॥ इति पंचमस्य तृतीये षष्ठो वर्गः ॥ ६ ॥

उदुब्रह्माणीति षळृचं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं अनुक्रम्यतेच—उदुषळिति । अग्निष्टोमे माध्यन्दिनसवने ब्राह्मणाच्छंसिशस्त्रे एतत्सूक्तं सूत्रितंच—उदुब्रह्माण्यूजोपीवजीवृषभस्तुराषाळिति याज्येति । चातुर्विंशिकेहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे एवदहरहः शस्य संज्ञकं सूक्तं । सूत्रितं च । उदुब्रह्माण्यभितष्टेवेतीतरावहरहःशस्येइति । अहर्गणेषु द्वितीयादिष्वहःस्वेतदेवसूक्तं महाव्रतेपि निष्केवल्येएतत्सूक्तं सूत्रितं च—उदुब्रह्माण्यैरतश्रवस्यातेमहइन्द्रोत्युग्रेति पंचसूक्तानीति ।

तत्र प्रथमा—

उदुब्रह्माण्यैरतश्रवस्येन्द्रंसमर्येमहयावसिष्ठ ।
आयोविश्वानिशवसाततानोपश्रोतामईवतोवचांसि ॥ १ ॥

उत् । ऊँ इति । ब्रह्माणि । ऐरत । श्रवस्या । इन्द्रम् ।
सऽमर्ये । महय । वसिष्ठ । आ । यः । विश्वानि । शवसा ।
ततान । उपऽश्रोता । मे । ईवतः । वचांसि ॥ १ ॥

श्रवस्यान्नेच्छया ब्रह्माणि स्तोत्राणि हवींषि चेन्द्रार्थं उदैरत् सर्वेऋषयइति शेषः उइति पूरणः हे वसिष्ठ त्वमपि समर्ये यज्ञे इन्द्रं महय स्तोत्रेण हविषा च पूजय अपि च यइन्द्रो विश्वानि भुवनानि शवसा बलेन ततान व्याप्तवान् सईवतः उपगमनवतो मे मम वचांसि स्तुतिरूपाणि वाक्यानि उपश्रोता भवतु ॥ १ ॥

अथ द्वितीया—

अयामिघोषइन्द्रदेवजामिरिरज्यन्तयच्छुरुधोविवाचि ।
नहिस्वमायुश्चिकितेजनेषुतानीदंहांस्यतिपर्ष्यस्मान् ॥ २ ॥

अयांमि । घोषः । इन्द्र । देवऽजांमिः । इरज्यन्त । यत् ।
शुरुधः । विऽवाचि । नहि । स्वम् । आयुः । चिकिते । जनेषु ।
तानि । इत् । अंहांसि । अति । पर्षि । अस्मान् ॥ २ ॥

यद्यदा शुरुधः शुचं संरुन्धन्तीति शुरुध ओषध्य इरज्यन्त वर्धन्ते तदा हे इन्द्र त्वदर्थं विवाचि स्तोतरि देवजामिर्देवानां बन्धुः घोषः स्तुतिरूपः शब्दः अयामि अकारि अपि च जनेषु मध्ये केनापि स्वमायुः स्वं जीवितं नहि चिकिते ज्ञायते यैरायुः क्षीयते तानीत् तानि सर्वाण्येव अंहांसि पापान्यस्मानतिपर्षि अतिपारय ॥ २ ॥

अथ तृतीया–

युजेरथंगवेषणंहरिभ्यामुपब्रह्माणिजुजुषाणमस्थुः ।
विब्राधिष्टस्यरोदसीमहित्वेन्द्रोवृत्राण्यप्रतीजघन्वान् ॥ ३ ॥

युजे । रथम् । गोऽएषणम् । हरिऽभ्याम् । उप । ब्रह्माणि ।
जुजुषाणम् । अस्थुः । वि । बाधिष्ट । स्यः । रोदसी इति ।
महिऽत्वा । इन्द्रः । वृत्राणि । अप्रति । जघन्वान् ॥ ३ ॥

गवेषणं गवां प्रापकं इन्द्रस्य रथं हरिभ्यामिन्द्रवाहाभ्यां युजे स्तोतैरहंयुनज्मि ब्रह्माणि स्तोत्राणि जुजुषाणं परिचारैः सेव्यमानमिन्द्रं उपास्थुरुपतिष्ठंत । स्यः सोयमिन्द्रोमहित्वा महत्वेन रोदसी द्यावापृथिव्यौ विबाधिष्ट व्यबाधिष्ट च अपि चेन्द्रोवृत्राणि शत्रून् अप्रतिद्वन्द्वानि जघन्वान् हतवान् ॥ ३ ॥

अथ चतुर्थी–

आपश्चित्पिप्युःस्तर्योनगावोनक्षन्नृतंजरितारस्तइन्द्र ।
याहिवायुर्ननियुतोनोअच्छात्वंहिधीभिर्दयसेविवाजान् ॥ ४ ॥

आपः । चित् । पिप्युः । स्तर्यः । न । गावः । नक्षन् । ऋतम् ।
जरितारः । ते । इन्द्र । याहि । वायुः । न । निऽयुतः । नः ।
अच्छ । त्वम् । हि । धीभिः । दयसे । वि । वाजान् ॥ ४ ॥

हे इन्द्र त्वत्प्रसादादापश्चित् आपः तर्योन गावः तर्योवशागावइव पिप्युः वर्धंतां। अप्रसू-तागावोमांसलाभवन्ति हि। ते तव जरितारः स्तोतारश्च ऋतमुदकं नक्षन् व्याप्नुवन्। अपि च त्वं नोस्मान् नियुतोवायुर्न वायुरिव अच्छ याहि अभियाहि। त्वं हि धीभिः प्रज्ञाभिः कर्मभिर्वा वाजानन्नानि विदयसे स्तोतृभ्यः प्रयच्छसि॥ ४ ॥

अथ पंचमी–

तेत्वामदाइन्द्रमादयन्तुशुष्मिणंतुविराधसंजरित्रे।
एकोदेवत्रादयसेहिमर्तानस्मिञ्छूरसवनेमादयस्व ॥ ५ ॥

ते। त्वा। मदाः। इन्द्र। मादयन्तु। शुष्मिणम्। तुविऽराधसम्। जरित्रे। एकः। देवऽत्रा। दयसे। हि। मर्तान्। अस्मिन्। शूर। सवने। मादयस्व ॥ ५ ॥

हे इन्द्र त्वा त्वां तएते मदाः मदकराः सोमाः मादयन्तु अपि च जरित्रे स्तोत्रे शुष्मिणं बलवन्तं तुविराधसं बहुधनं पुत्रं प्रयच्छसीति शेषः। हे शूर त्वं देवत्रा देवेषु एकएव मर्तान् मनुष्यान् दयसे हि दयतिरनुकंपार्थः अस्मिन् सवने यज्ञे मादयस्व ॥ ५ ॥

अथ षष्ठी–

एवेदिन्द्रंवृषणंवज्रबाहुंवसिष्ठासोअभ्यर्चन्त्यर्कैः।
सनःस्तुतोवीरवद्धातुगोमद्यूयंपातस्वस्तिभिःसदानः ॥ ६ ॥ ७ ॥

एव। इत्। इन्द्रम्। वृषणम्। वज्रऽबाहुम्। वसिष्ठासः। अभि। अर्चन्ति। अर्कैः। सः। नः। स्तुतः। वीरऽवत्। धातु। गोऽमत्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः ॥ ६ ॥ ७॥

वसिष्ठासोवसिष्ठाः वज्रबाहुं वज्रकल्पबाहुं वृषणं कामानां वर्षितारमिन्द्रं एवेत् उक्तेन प्रकारेणैव अर्कैरर्चनीयैःस्तोत्रैः अभ्यर्चन्ति अभिपूजयन्ति स्तुतः सइन्द्रोनोस्मभ्यं वीरवत्पुत्रा-दियुक्तं गोमत् गोयुक्तं च धनं धातु ददातु स्पष्टमन्यत् ॥ ६ ॥

॥ इति पंचमस्य तृतीये सप्तमोवर्गः ॥ ७ ॥

योनिष्टइन्द्रसदनेअकारीति पळृचं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं अनुक्रम्यते च—योनिरिति। महाव्रते निष्केवल्येएतत्सूक्तं सूत्रितं च—योनिष्टइन्द्रसदनेअकारीत्येतस्यचतस्रः शस्त्वोत्तमामुपसंतत्योपोत्तमया परिदधातीति।

तत्र प्रथमा—

योनिष्टइन्द्रसदनेअकारितमानृभिःपुरुहूतप्रयाहि।
असोयथानोविताटृधेचददोवसूनिममदश्चसोमैः॥ १॥

योनिः। ते। इन्द्र। सदने। अकारि। तम्। आ। नृऽभिः। पुरुऽहूत। प्र। याहि। असः। यथा। नः। अविता। वृधे। च। ददः। वसूनि। ममदः। च। सोमैः॥ १॥

हे इन्द्र ते तव सदने सदनार्थं योनिः स्थानमकारि। हे पुरुहूत नृभिर्मरुद्भिः सार्धं तं योनिमाप्रयाहि। नोस्माकं यथाविता रक्षिता असः भवसि नोस्माकं वृधे वर्धनाय चासः तथा च वसूनि ददः अस्मभ्यं देहि सोमैरस्मदीयैर्ममदः मादयस्व च॥ १॥

अथ द्वितीया—

गृभीतंतेमनइन्द्रद्विबर्हाःसुतःसोमःपरिषिक्तामधूनि।
विसृष्टधेनाभरतेसुवृक्तिरियमिन्द्रंजोहुवतीमनीषा॥ २॥

गृभीतम्। ते। मनः। इन्द्र। द्विऽबर्हाः। सुतः। सोमः। परिऽसिक्ता। मधूनि। विसृष्टऽधेना। भरते। सुऽवृक्तिः। इयम्। इन्द्रम्। जोहुवती। मनीषा॥ २॥

हे इन्द्र द्विबर्हाः षष्ठ्यर्थे प्रथमा द्विबर्हसोद्वयोः स्थानयोः परिवृढस्य ते तवमनोगृभीतमस्माभिः परिगृहीतं सोमश्च सुतोभिषुतः मधूनि च परिषिक्तानि पात्रेषु परिषिक्तानि विसृष्टधेना विसृष्टजिह्वा मध्यमस्वरेणोच्चार्यमाणा सुवृक्तिः सुसमाप्तिरियं मनीषा स्तुतिरिन्द्रं जोहुवती भृशमाह्वयन्ती भरते संभ्रियते च॥ २॥

अथ तृतीया—

आनोंदिवआपृथिव्याऋंजीपिन्निदंबर्हिःसोमपेयाययाहि ।
वहंन्तुत्वाहरयोमद्र्यञ्चमाङ्गूषमच्छातवसंमदाय ॥ ३ ॥

आ । नः । दिवः । आ । पृथिव्याः । ऋजीपिन् । इदम् । बर्हिः ।
सोमऽपेयाय । याहि । वहन्तु । त्वा । हरयः । मद्र्यञ्चम् ।
आङ्गूषम् । अच्छ । तवसम् । मदाय ॥ ३ ॥

हे ऋजीपिन्निन्द्र नोस्माकमिदं बर्हिरिमं यज्ञं सोमपेयाय दिवः स्वर्गादायाह्यागच्छ पृथिव्या अन्तरिक्षाच्च आपः पृथिवीत्यन्तरिक्षनामसु पाठात् आयाहि अपि च तवसं मवृद्धं बलवन्तं वा मद्र्यंचं मदभिमुखं त्वा त्वां आंगूषं स्तोत्रं अच्छाभि मदाय मदार्थं हरयोश्वावहन्तु॥३॥

अथ चतुर्थी—

आनोविश्वाभिरूतिभिःसजोषाब्रह्मजुषाणोहर्यश्वयाहि ।
वरीवृजत्स्थविरेभिःसुशिप्रास्मेदधद्वृषणंशुष्ममिन्द्र ॥ ४ ॥

आ । नः । विश्वाभिः । ऊतिऽभिः । सऽजोषाः । ब्रह्म । जुषाणः ।
हरिऽअश्व । याहि । वरीवजत् । स्थविरेभिः । सुऽशिप्र ।
अस्मे इति । दधत् । वृषणम् । शुष्मम् । इन्द्र ॥ ४ ॥

हे हर्यश्व हरिनामकाश्व सुशिप्र शोभनहनो इन्द्र विश्वाभिः सर्वाभिरूतिभीरक्षाभिः सजोषाः संगतः स्थविरेभिर्वृद्धैर्मरुद्भिः सह वरीवृजत् शत्रून् भृशं हिंसन् अस्मे अस्मभ्यं वृषणं कामानां वर्षितारं शुष्मं बलवन्तं पुत्रं दधत् प्रयच्छन् ब्रह्म स्तोत्रं जुषाणः सेवमानो नोस्मानायाहि ॥ ४ ॥

अथ पञ्चमी—

एषःस्तोमोमहउग्रायवाहेधुरी३वात्योनवाजयन्नधायि ।
इन्द्रत्वायमर्कईट्टेवसूनांदिवीवद्यामधिनःश्रोमतंधाः ॥ ५ ॥

एषः । स्तोमः । महे । उग्राय । वाहे । धुरिऽइव । अत्यः । न । वाजयन् । अधायि । इन्द्र । त्वा । अयम् । अर्कः । ईट्टे । वसूनाम् । दिविऽइव । द्याम् । अधि । नः । श्रोमतम् । धाः ॥ ५ ॥

महे महते उग्राय उद्गूर्णाय ओजस्विने वा वाहे विश्वस्य वोढ्रे इन्द्राय धुरीव रथस्य अत्यो- नाश्वइव वाजयन् बलं कुर्वन् एषः स्तोमः अधायि व्यधायि । अथ प्रत्यक्षस्तुतिः हेइन्द्र त्वा त्वां अयमर्कः स्तोता वसूनां वसूनि धनानि ईट्टे याचते सत्वं नोस्मासु द्यां दिवीव श्रोमतं श्रवणी- यमन्नं पुत्रं वा अधि धाः अधि धेहि ॥ ५ ॥

अथ षष्ठी—

एवानइन्द्रवार्यस्यपूर्धिप्रतेमहींसुमतिंवेविदाम ।
इषंपिन्वमघवद्भ्यःसुवीरांयूयंपातस्वस्तिभिःसदानः ॥ ६ ॥ ८ ॥

एव । नः । इन्द्र । वार्यस्य । पूर्धि । प्र । ते । महीम् । सुऽमतिम् । वेविदाम । इषम् । पिन्व । मघवत्ऽभ्यः । सुऽवीराम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ ८ ॥

हे इन्द्र नोस्मान् एव एवं वार्यस्य तृतीयार्थे षष्ठी वरणीयेन धनेन पूर्धि पूरय । ते तव महीं महतीं सुमतिं अनुग्रहबुद्धिं प्रवेविदाम भृशं लभेमहि मघवद्भ्यो हविष्मद्भ्योस्मभ्यं सुवीरां शोभ- नपुत्रादियुतां इषमन्नं पिन्व प्रयच्छेत्यर्थः । स्पष्टमन्यत् ॥ ६ ॥

॥ इति पञ्चमस्य द्वितीयेष्टमो वर्गः ॥ ८ ॥

आतेमहइन्द्रेति पळृचमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं आतइत्यनुक्रान्तं । महाव्रते निष्केवल्ये इदमादीनि पंचसूक्तानि सूत्रितंच—आतेमहइन्द्रोत्युग्रेति पंचसूक्तानीति।

तत्र प्रथमा—

आतेमहइन्द्रोत्युग्रसमन्यवोयत्समरन्तसेनाः ।
पतातिदिद्युन्नर्यस्यबाह्वोर्मातेमनोविष्वद्र्यग्विचारीत् ॥ १ ॥

आ । ते । मृहः । इन्द्र । ऊती । उग्र । सऽमन्यवः । यत् । सम्ऽअरंन्त । सेनाः । पतांति । दि्द्युत् । नर्यस्य । बाहोः । मा । ते । मनः । विष्वद्र्यक् । वि । चारीत् ॥ १ ॥

हे उग्र उद्गूर्ण ओजस्विन्निन्द्र यद्यदा समन्यवः समोमन्युरभिमानोयासां ताः समन्यवः सेनाः समरन्त युध्यन्ते युद्धार्थं संगच्छन्ते वा तदा नर्यस्य नरहितस्य महोमहतः ते तव बाह्वोः स्थितं विद्युद्वायुधं विद्युत् हेतिरिति वज्रनामसु पाठात् ऊती ऊत्यै अस्मद्रक्षायै आपतानि आ पततु । ते तव विष्वद्र्यक् विष्वग्गन्तृमनः माविचारीत् अस्मास्वेव स्थिरं भवतु ॥ १ ॥

अथ द्वितीया—

निदुर्गइंन्द्रश्नथिह्यमित्रांनुभियेनोमर्तांसोअमन्ति ।
आरेतंशंसंकृणुहिनिनित्सोरानोंभरसंभरंणंवसूंनाम् ॥ २ ॥

नि । दुःऽगे । इन्द्र । श्नथिहि । अमित्रान् । अभि । ये । नः । मर्तांसः । अमन्ति । आरे । तम् । शंसंम् । कृणुहि । निनित्सोः । आ । नः । भर । सम्ऽभरंणम् । वसूंनाम् ॥ २ ॥

हे इन्द्र दुर्गे युद्धे ये मर्तासो मर्ताः अभि अभिमुखाः सन्तो नोस्मानमन्ति अभिभवन्ति तानमित्रान् शत्रून् निश्नथिहि निजहि । अपि च निनित्सोः अस्मान्निन्दितुमिच्छतो नरस्य तं शंसं आशंसनं आरे दूरे कृणुहि । अपि च नोस्मभ्यं वसूनां धनानां संभरणं समूहमाभर आहर ॥ २ ॥

अथ तृतीया—

शतंतेशिप्रिन्नूतयःसुदासेसहस्रंशंसाउतरातिरंस्तु ।
जहिवधर्वनुषोमर्त्यस्यास्मेद्युम्नमधिरत्नंचधेहि ॥ ३ ॥

शतम् । ते । शिप्रिन् । ऊतयः । सुऽदासे । सहस्रम् । शंसाः । उत । रातिः । अस्तु । जहि । वधः । वनुषः । मर्त्यस्य । अस्मे इति । द्युम्नम् । अधि । रत्नम् । च । धेहि ॥ ३ ॥

हे शिप्रिन् उष्णीषिन् इन्द्र ते त्वदीयाः शतं बह्वयः ऊतयो रक्षाः सुदासे शोभनदानाय मह्यं सन्तु । सहस्रं शंसाः शंसनीयाः कामाश्च सन्तु । उतापिच रातिर्धनमस्तु । वनुषो हिंसकस्य मर्त्यस्य वधः हिंसासाधनमायुधं च जहि अपिचास्मे अधि अस्मासु द्युम्नं दीप्तिमदन्नं यशोवा रत्नं च धेहि । तथाच यास्कः--द्युम्नं द्योततेर्यशोवान्नंवा अस्मे द्युम्नमधिरत्नंच धेहि अस्मासु द्युम्नं च रत्नं च धेहीति[1] ॥ ३ ॥

अथ चतुर्थी--

त्वावंतोहीन्द्रक्रत्वेअस्मित्वावंतोवितुःशूररातौ ।
विश्वेदहानितविषीवउग्रँओकःकृणुष्वहरिवोनमर्धीः ॥ ४ ॥

त्वाऽवंतः । हि । इन्द्र । क्रत्वे । अस्मि । त्वाऽवंतः । अवितुः ।
शूर । रातौ । विश्वा । इत् । अहानि । तविषीऽवः । उग्र ।
ओकः । कृणुष्व । हरिऽवः । न । मर्धीः ॥ ४ ॥

हे इन्द्र त्वावतः त्वत्सदृशस्य क्रत्वे कर्मणे अस्मि भवामि हि । हे शूर अवितुः विश्वस्य रक्षितुस्त्वावतस्त्वत्सदृशस्य रातौ दाने च अस्मीतिशेषः । हे तविषीवोबलवन् उग्र ओजस्विन्निन्द्र विश्वेत् विश्वान्येव अहानि ओकोस्माकं स्थानं कृणुष्व कुरु । हे हरिवो हरिवन् नमर्धीः अस्मान्नहिंस्याः ॥ ४ ॥

अथ पंचमी--

कुत्साएतेहर्यश्वायशूषमिन्द्रेसहोदेवजूतमियानाः ।
सत्राकृधिसुहनाशूरवृत्रावयंतरुत्राःसनुयामवाजम् ॥ ५ ॥

कुत्साः । एते । हरिऽअश्वाय । शूषम् । इन्द्रे । सहः । देवऽजूतम् ।
इयानाः । सत्रा । कृधि । सुऽहना । शूर । वृत्रा । वयम् । तरुत्राः ।
सनुयाम । वाजम् ॥ ५ ॥

एते वयं वसिष्ठाः हर्यश्वाय हरिनामकाश्वायेन्द्राय शूषं सुखकरं स्तोत्रं कुत्साः कुर्वाणाः करोतेः कुत्सशब्दनिष्पत्तिः इन्द्रे देवजूतं देवैः प्रेरितं सहोबलमियानाः याचमानाः तरुत्राः दु-

1 नि० ५. ५.

गाणि तीर्णाः सन्तो वाजं बलं सनुयाम लभेमहि । अपि च हे शूर वृत्रा वृत्राणि शत्रून् सुहना हन्तुं सुशकानि सत्रा सर्वदा कृधि कुरु ॥ ५ ॥

अथ षष्ठी–

एवानइन्द्रवार्यस्यपूर्धिप्रतेमहींसुमतिंवेविदाम ।
इषंपिन्वमघवद्भ्यःसुवीरांयूयंपातस्वस्तिभिःसदानः ॥ ६ ॥ ९ ॥

एव । नः । इन्द्र । वार्यस्य । पूर्धि । प्र । ते । महीम् । सुऽमतिम् । वेविदाम । इषम् । पिन्व । मघवत्ऽभ्यः । सुऽवीराम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ ९ ॥

इयं व्याख्यातचरा ॥ ६ ॥

॥ इति पंचमस्य तृतीये नवमो वर्गः ॥ ९ ॥

नसोमइन्द्रमिति पंचर्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं तथाचानुक्रम्यते—नसोमःपंचेति । महाव्रते उक्तोविनियोगः ।

तत्र प्रथमा–

नसोमइन्द्रमसुतोममादनाब्रह्माणोमघवानंसुतासः ।
तस्माउक्थंजनयेयज्जुजोषन्नृवन्नवीयःशृणवद्यथानः ॥ १ ॥

न । सोमः । इन्द्रम् । असुतः । ममाद । न । अब्रह्माणः । मघऽवानम् । सुतासः । तस्मै । उक्थम् । जनये । यत् । जुजोषत् । नृऽवत् । नवीयः । शृणवत् । यथा । नः ॥ १ ॥

मघवानं धनवन्तमिन्द्रमसुतोन अभिषुतः सोमोन ममाद न तर्पयति सुतासोभिषुताः अपि सोमा अब्रह्माणः स्तोत्रहीनाः न ममदुः ममादेत्येतदत्राप्यात्तं बहुवचनान्ततया विपरिणतं सदत्रसंबध्यते अतएव त्रिष्वपि सवनेषु पावमानैः स्तोत्रैः स्तुताएव सोमाहूयन्ते । अपि च नोस्मदीयं यदुक्थं इन्द्रोजुजोषत् सेवेत यथा च नृवत् राजेव आदरेण शृणवत् शृणुयात् तथा नवीयोनवतरमुक्थं शस्त्रं तस्माइन्द्राय जनये प्रवामीत्यर्थः ॥ १ ॥

अथ द्वितीया–

उक्थउक्थेसोमइन्द्रंममादनीथेनीथेमघवानंसुतासः ।
यदींसबाधःपितरंनपुत्राःसमानदक्षाअवसेहवन्ते ॥ २ ॥

उक्थेऽउक्थे । सोमः । इन्द्रम् । ममाद । नीथेऽनीथे ।
मघऽवानम् । सुतासः । यत् । ईम् । सऽबाधः । पितरम् । न । पुत्राः ।
समानऽदक्षाः । अवसे । हवन्ते ॥ २ ॥

यद्यस्मात् उक्थेउक्थे शस्त्रेशस्त्रे क्रियमाणे सोमोमघवानमिन्द्रं ममाद मादयति नीथेनीथे स्तोत्रेस्तोत्रे क्रियमाणे सुतासोभिषुताः सोमाः मादयन्ति तस्मादीमेनमिन्द्रं सबाधः परस्परं मिलिताः समानदक्षाः समानोत्साहा ऋत्विजः । पुत्राः पितरं न पितरमिव अवसे तर्पणाय स्वरक्षणाय वा हवन्ते शस्त्रैः स्तोत्रैश्च स्तुवन्ति ॥ २ ॥

अथ तृतीया–

चकारताकृणवन्नूनमन्यायानिब्रुवन्तिवेधसःसुतेषु ।
जनीरिवपतिरेकःसमानोनिमामृजेपुरइन्द्रःसुसर्वाः ॥ ३ ॥

चकार । ता । कृणवत् । नूनम् । अन्या । यानि । ब्रुवन्ति ।
वेधसः । सुतेषु । जनीःऽइव । पतिः । एकः । समानः । नि ।
ममृजे । पुरः । इन्द्रः । सु । सर्वाः ॥ ३ ॥

वेधसः स्तोत्राणां विधातारः सुतेषु अभिषुतेषु सोमेषु यानि कर्माणि ब्रुवन्ति ता तानि वृत्रवधादीनि कर्माणीन्द्रः पूर्वस्मिन्काले चकार नूनं । संप्रति अन्या अन्यान्यपि कर्माणि कृणवत् कुर्यात् । अपि च सइन्द्रः सर्वाः पुरः शत्रुनगरीः समानः समवृत्तिः एकः असहायः पतिः जनीरिव जायाइव सु निमामृजे सम्यगशोधयेत् ॥ ३ ॥

अथ चतुर्थी–

एवातमाहुरुतशृण्वइन्द्रएकोविभक्तातरणिर्मघानाम् ।
मिथस्तुरऊतयोयस्यपूर्वीरस्मेभद्राणिसश्चतप्रियाणि ॥ ४ ॥

एव । तम् । आहुः । उत । शृण्वे । इन्द्रः । एकः । विऽभक्ता ।
तरणिः । मघानाम् । मिथःऽतुरः । ऊतयः । यस्य । पूर्वीः ।
अस्मे इति । भद्राणि । सश्चत । प्रियाणि ॥ ४ ॥

यस्येन्द्रस्य मिथः तुरो बाधनाः संश्लिष्टावा पूर्वीः पूर्व्योबह्व्यः ऊतयो रक्षाः सन्ति तं एव एवमुक्तगुणमाहुः पूर्वे ऋषयः। उतापिचाद्यापि सइन्द्रो मघानां मंहनीयानां धनानां विभक्ता दातेति एको मुख्यः तरणिरापदस्तारयितेति शृण्वे श्रूयते तस्य च प्रसादादस्मे अस्मान् भद्राणि मंगलानि प्रियाणि कल्याणानि सश्चत सेवन्तां ॥ ४ ॥

अथ पञ्चमी—

एवावसिष्ठइन्द्रमूतयेनॄन्कृष्टीनांवृषभंसुतेगृणाति ।
सहस्रिणउपनोमाहिवाजान्यूयंपातस्वस्तिभिःसदानः ॥५॥१०॥

एव । वसिष्ठः । इन्द्रम् । ऊतये । नॄन् । कृष्टीनाम् । वृषभम् ।
सुते । गृणाति । सहस्रिणः । उप । नः । माहि । वाजान् । यूयम् । .
पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ १० ॥

वसिष्ठोनॄन्।नृणां षष्ठ्यर्थे द्वितीया।ऊतये रक्षार्थं कृष्टीनां प्रजानां वृषभं कामानां वर्षितारमिन्द्रं सुते अभिषुते सति एव एवं पूर्वोक्तप्रकारेण गृणाति स्तौति । अथ प्रत्यक्षस्तुतिः हे इन्द्र नोस्मभ्यं सहस्रिणः सहस्रसंख्याकान् वाजान् अन्नान्युपमाहि प्रयच्छेत्यर्थः । स्पष्टमन्यत् ॥५॥

॥ इति पंचमस्य तृतीये दशमो वर्गः ॥ १०॥

इन्द्रं नरइति पंचर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं इन्द्रंनरइत्यनुक्रान्तं महाव्रते निष्केवल्ये एतत्सूक्तं उक्तं तृतीयत्वेनेन्द्रपशौ वपापुरोडाशहविषां आद्यास्त्रिस्रः क्रमेणानुवाक्याः । सूत्रितं च—इन्द्रंनरोनेमधिताहवन्तउरुंनोलोकमनुनेषिविद्वानिति ।

तत्र प्रथमा—

इन्द्रंनरोनेमधिताहवन्तेयत्पार्यायुनजंतेधियस्ताः ।
शूरोनृषाताशवसश्चकानआगोमतिव्रजेभजात्वंनः ॥ १ ॥

इन्द्रम् । नरः । नेमऽधिता । हवन्ते । यत् । पार्याः । युनजते ।
धियः । ताः । शूरः । नृऽसाता । शवसः । चकानः । आ ।
गोऽमति । व्रजे । भज । त्वम् । नः ॥ १ ॥

यद्यदा पार्याः युद्धभरणनिमित्तास्ताः प्रसिद्धा धियः कर्माणि युनजते प्रयुज्यन्ते तदा नरो नेतारः यमिन्द्रं नेमधिता नेमधितौ संग्रामे हवन्ते ह्वयन्ति स त्वं शूरः नृषाता नृणां संभक्ता च शवसो बलस्य बलं चकानः कामयमानश्च सन् गोमति गावः संत्यस्मिन्निति गोमत् तस्मिन् व्रजे गोष्ठे समूहे नोस्मान् आभज प्रापय ॥ १ ॥

अथ द्वितीया—

यइन्द्रशुष्मोमघवन्तेअस्तिशिक्षासखिभ्यःपुरुहूतनृभ्यः ।
त्वंहिदृळ्हामघवन्विचेताअपावृधिपरिवृतंनराधः ॥ २ ॥

यः । इन्द्र । शुष्मः । मघऽवन् । ते । अस्ति । शिक्ष । सखिऽभ्यः ।
पुरुऽहूत । नृऽभ्यः । त्वम् । हि । दृळ्हा । मघऽवन् । विऽचेताः ।
अप । वृधि । परिऽवृतम् । न । राधः ॥ २ ॥

हे पुरुहूत बहुभिराहूतेन्द्र ते तव यः शुष्मोबलमस्ति तं शुष्मं सखिभ्यः स्तोतृभ्यो नृभ्यः शिक्ष देहि अपि च हे मघवन् हि यस्मात् दृळ्हा दृढानि पुरां द्वाराणि बिभेदिथेतिशेषः तस्मात्त्वं विचेताः विविक्तप्रज्ञः सन् परिवृतं तिरोहितं राधो धनं अपवृधि अस्मभ्यमपवृणु नेति संप्रत्यर्थे ॥ २ ॥

अथ तृतीया—

इन्द्रोराजाजगतश्चर्षणीनामधिक्षमिविषुरूपंयदस्ति ।
ततोददातिदाशुषेवसूनिचोदद्राधउपस्तुतश्चिदर्वाक् ॥ ३॥

इन्द्रः । राजा । जगतः । चर्षणीनाम् । अधि । क्षमि । विषुऽरूपम् ।
यत् । अस्ति । ततः । ददाति । दाशुषे । वसूनि । चोदत् । राधः ।
उपऽस्तुतः । चित् । अर्वाक् ॥ ३ ॥

तवं । प्रऽनीती । इन्द्र । जोहुवानान् । सम् । यत् । नॄन् ।
न । रोदसी इति । निनेथ । महे । क्षत्राय । शवसे । हि । जज्ञे ।
अतूतुजिम् । चित् । तूतुजिः । अशिश्नत् ॥ ३ ॥

हे इन्द्र यद्यस्त्वं तव मणीती प्रणीत्या प्रणयनेन जोहुवानान् भृशंस्तुवतोनॄन् स्तोतॄनि-व रोदसी द्यावापृथिव्यो सन्निनेथ संगमयसि दिवि पृथिव्यां च स्तोतॄन्मतिष्ठापयसीत्यर्थः। सत्वं महे महते क्षत्राय धनाय रयिः क्षत्रमिति धननामसु पाठात् शवसे बलाय च यजमाने-भ्योमहद्धनं बलं च दातुमित्यर्थः जज्ञे जज्ञिषे । हीति हेत्वर्थे यतएवमतः कारणात् अतूतुजिं अदातारं अयजमानं तूतुजिः दाता यजमानः अशिश्नत् श्नथतिर्हिंसाकर्मा तस्माल्लडर्थेलुङ् हिनस्ति चिदित्येवकारार्थे ॥ ३ ॥

अथ चतुर्थी—

एभिर्नइन्द्राहंभिर्दशस्यदुर्मित्रासोहिक्षितयःपवन्ते ।
प्रतियच्चष्टेअनृतमनेनाअवद्विताववरुणोमायीनःसात् ॥ ४ ॥

एभिः । नः । इन्द्र । अहंऽभिः । दशस्य । दुःऽमित्रासः ।
हि । क्षितयः । पवन्ते । प्रति । यत् । चष्टे । अनृतम् ।
अनेनाः । अव । द्विता । वरुणः । मायी । नः । सात् ॥ ४ ॥

हे इन्द्र दुर्मित्रासो दुष्टमित्रभूता बाधकाः क्षितयोजनाः पवन्ते अभिगच्छन्ते । हिः पूरणः पवतिर्गतिकर्मा तेभ्योधनमाच्छिद्य नोस्मभ्यं एभिः सात्विकैः अहभिरहोभिर्दशस्य देहि किं च अनेनाः एनसां निहन्ता मायी प्रज्ञावान् वरुणोयदनृतं नोस्मासु प्रतिचष्टे अभिपश्यति त-दनृतं । हे इन्द्र त्वत्प्रसादात् द्विता द्विधा अवसात् अवस्यतु विमोचयतु। तथाचयास्कः—स्यतिरु-पसृष्टोविमोचनइति ॥ ४ ॥ अथ पञ्चमी—

वोचेमेदिन्द्रंमघवानमेनंमहोरायोराधसोयद्ददन्नः ।
योअर्चतोब्रह्मकृतिमविष्ठोयूयंपातस्वस्तिभिःसदानः ॥५॥१२॥

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः ।
राधसः । यत् । ददत् । नः । यः । अर्चतः । ब्रह्मऽकृतिम् ।
अविष्ठः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ १२ ॥

यत् इन्द्रो महो महतो राधसः संराधकस्य रायो धनस्य द्वितीयार्थे षष्ठी संराधकं महद्धनं नोस्मभ्यं ददत् प्रायच्छत्। यश्चेन्द्रःअर्चतःस्तुवतोब्रह्मकृतिं क्रियमाणं ब्रह्मस्तोत्रं अविष्ठोतिशयेन रक्षिता गन्ता भवति। तमेनं मघवानं धनवन्तमिन्द्रं वोचेमेव् स्तुवेमैव। स्पष्टमन्यत्॥ ५॥

॥ इति पंचमस्य तृतीये द्वादशो वर्गः॥ १२॥

अयं सोमइन्द्रेति पंचर्चं द्वादशंसूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं। अयंसोमइत्यनुक्रान्तं। व्यूळ्हेदशरात्रे नवमेहनि अयंसोमइन्द्रेति प्रउगशस्त्रे ऐन्द्रस्तृचः सूत्रितंच—अयंसोमइन्द्रतुभ्यंसुन्वआतु प्रब्रह्माणइति षोडशिशस्त्रे ब्रह्मन्वीरइत्येषा त्रिष्टुप् सूत्रितंच—ब्रह्मन्वीरब्रह्मकृतिंजुषाणइतित्रिष्टुबिति।

तत्र प्रथमा—

अयंसोमंइन्द्रतुभ्यंसुन्वआतुप्रयाहिहरिवस्तदोकाः।
पिबात्व१स्यसुषुतस्यचारोर्ददोमघानिमघवन्नियानः॥ १॥

अयम्। सोमः। इन्द्र। तुभ्यम्। सुन्वे। आ। तु। प्र। याहि।
हरिऽवः। तत्ऽओकाः। पिब। तु। अस्य। सुऽसुतस्य। चारोः।
ददः। मघानि। मघऽवन्। इयानः॥ १॥

हे इन्द्र तुभ्यं त्वदर्थमयमेषसोमः सुन्वे अभिषुतोभवत् हे हरिवन्निन्द्र तदोकाः तत् सेवनीयोयस्यासौ तदोकाः तु क्षिप्रं आ प्रयाहि सुषुतस्य सम्यगभिषुतस्य चारोः शोभनस्यास्य द्वितीयार्थेषष्ठी सम्यगभिषुतं शोभनमित्यर्थः तु क्षिप्रं पिब च। अपि च हे मघवन् इयानः उपगम्यमानोयाच्यमानोवा त्वं मघानि धनानि ददः अस्मभ्यं देहि॥ १॥

अथ द्वितीया—

ब्रह्मन्वीरब्रह्मकृतिंजुषाणोर्वाचीनोहरिभिर्याहितूयम्।
अस्मिन्नुषुसवनेमादयस्वोपब्रह्माणिशृणवइमानः॥ २॥

ब्रह्मन्। वीर। ब्रह्मऽकृतिम्। जुषाणः। अर्वाचीनः। हरिऽभिः॥
याहि। तूयम्। अस्मिन्। ऊँ इति। सु। सवने। मादयस्व।
उप। ब्रह्माणि। शृणवः। इमा। नः॥ २॥

हे ब्रह्मन् परिवृढ वीरेन्द्र ब्रह्मकृतिं क्रियमाणं स्तोत्रं जुषाणः सेवमानः अर्वाचीनोऽस्मदभिमुखः सन् हरिभिरश्वैस्तूयं क्षिप्रं याहि अस्मिन्नु अस्मिन्नेव सवने यज्ञे सु सुष्ठु मादयस्व च । नोऽस्मदीयानि इमा इमानि ब्रह्माणि स्तोत्राणि चोपश्रृणवः उपशृणु ॥ २ ॥

अथ तृतीया—

कातेअस्त्यरंकृतिःसूक्तैःकदानूनंतेमघवन्दाशेम ।
विश्वामतीराततनेत्वायाधामइन्द्रश्रृणवोहवेमा ॥ ३ ॥

का । ते । अस्ति । अरम्ऽकृतिः । सुऽउक्तैः । कदा । नूनम् ।
ते । मघऽवन् । दाशेम । विश्वाः । मतीः । आ । ततने ।
त्वाऽया । अर्ध । मे । इन्द्र । शृणवः । हवा । इमा ॥ ३ ॥

हे इन्द्र ते तव सूक्तैरस्माभिः क्रियमाणैः स्तोत्रैः अरंकृतिः अलंकृतिः कास्ति कीदृशी भवति हे मघवन् ते तव कदा नूनं कदा खलु दाशेम प्रीतिमुत्पादयेम त्वाया त्वत्कामनयैव विश्वाः मतीः सर्वाः स्तुतीराततने करोमि । अध अतः कारणात् हे इन्द्र मे मदीयानि इमा इमानि हवा हवानि स्तोत्राणि शृणु ॥ ३ ॥

अथ चतुर्थी—

उतोघातेपुरुष्याइदासन्येषांपूर्वेषामश्रृणोर्ऋषीणाम् ।
अधाहंत्वांमघवञ्जोहवीमित्वंनइन्द्रासिप्रमतिःपितेव ॥ ४ ॥

उतो इति । घ । ते । पुरुष्याः । इत् । आसन् । येषाम् ।
पूर्वेषाम् । अशृणोः । ऋषीणाम् । अर्ध । अहम् । त्वा । मघऽवन् ।
जोहवीमि । त्वम् । नः । इन्द्र । असि । प्रऽमतिः । पिताऽइव ॥ ४ ॥

उतो अपि च घेति पूरणः हे मघवन् येषां पूर्वेषामृषीणां स्तुतीरशृणोः ते पूर्वे ऋषयः पुरुष्याइव पुरुषेभ्योहिताएवासन् अध अथोहं त्वा त्वां जोहवीमि भृशं स्तौमि अपि च हे इन्द्र त्वं नोऽस्माकं पितेव जनकइव प्रमतिः बन्धुरसि ॥ ४ ॥

अथ पंचमी–

वोचेमेदिन्द्रंमघवानमेनंमहोरायोराधसोयद्ददन्नः ।
योअर्चतोब्रह्मकृतिमविष्ठोयूयंपातस्वस्तिभिःसदानः ॥ ५॥१३॥

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः ।
राधसः । यत् । ददत् । नः । यः । अर्चतः । ब्रह्मऽकृतिम् । अविष्ठः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥१३ ॥

इयंव्याख्यातचरा ॥५॥

॥ इति पंचमस्य तृतीये त्रयोदशो वर्गः ॥१३ ॥

आनोदेवेति पंचर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं । आनोदेवेत्यनुक्रान्तं । प्रथमेछन्दोमे प्रउगशस्त्रे आनइत्ययमैन्द्रस्तृचः सूत्यतेहि–आनोदेवशवसायाहिशुष्मिन् प्रवोयत्तेपुदेवयन्तोअर्चन्निति ।

तत्र प्रथमा–

आनोदेवशवसायाहिशुष्मिन्भवावृधइन्द्ररायोअस्य ।
महेनृम्णायनृपतेसुवज्रमहिक्षत्रायपौंस्यायशूर ॥ १ ॥

आ । नः । देव । शवसा । याहि । शुष्मिन् । भव । वृधः । इन्द्र ।
रायः । अस्य । महे । नृम्णाय । नृऽपते । सुऽवज्र । महि ।
क्षत्राय । पौंस्याय । शूर ॥ १ ॥

हे देव द्योतमान शुष्मिन् बलवन्निन्द्र नोस्मान् शवसा बलेन सार्धमायाहि । अस्यास्मभ्यं देयस्य रायोधनस्यवृधो वर्धयिता च भव । हे नृपते सुवज्र महे महते नृम्णाय बलाय च भव। बाधः नृम्णमिति बलनामसु पाठात् । हे शूर महि महते क्षत्राय शत्रूणां हिंसकाय क्षदिर्हिंसाकर्मा पौंस्याय वीर्याय च भव ॥ १ ॥

अथ द्वितीया–

हवन्तउत्वाहव्यंविवाचितनूपुशूराःसूर्यस्यसातौ ।
त्वंविश्वेषुसेन्योजनेषुत्वंवृत्राणिरन्धयासुहन्तु ॥ २ ॥

हवन्ते । ऊँ इति । त्वा । हव्यम् । विऽवाचि । तनूपु । शूराः ।
सूर्यस्य । सातौ । त्वम् । विश्वेषु । सेन्यः । जनेषु । त्वम् । वृत्राणि ।
रन्धय । सुऽहन्तु ॥ २ ॥

हे इन्द्र हव्यं ह्वातव्यं त्वा त्वां विवाचि विविधावाचोयस्मिन् प्रादुर्भवन्ति तस्मिन् युद्धे शूराः पुरुषाः तनूष्वंगेषु रक्षणीयासु सूर्यस्य सातौ संभजने सति गच्छतीत्यायुरत्रसूर्यः विवक्षितः तस्य चिरकालं प्राप्त्यर्थं हवन्ते ह्वयन्ति । उः पूरणः । विश्वेषु सर्वेषु जनेषु त्वमेव सेन्यः सेनार्होसि । अपि च त्वं वृत्राणि शत्रून् सुहन्तु सुहन्तुनाम्ना वज्रेण रन्धय अस्मभ्यं वशीकुरु॥२॥

अथ तृतीया–

अहायदिन्द्रसुदिनाव्युच्छान्दधोयत्केतुमुपमंसमत्सु ।
न्यग्निःसीददसुरोनहोताहुवानोअत्रसुभगायदेवान् ॥ ३ ॥

अहा । यत् । इन्द्र । सुऽदिना । विऽउच्छान् । दधः । यत् ।
केतुम् । उपऽमम् । समत्ऽसु । नि । अग्निः । सीदत् । असुरः ।
न । होता । हुवानः । अत्र । सुऽभगाय । देवान् ॥ ३ ॥

हे इन्द्र यद्यदा अहा अहानि सुदिना सुदिनानि व्युच्छान् व्युच्छेयुः यद्यदा च समत्सु संग्रामेषु केतुं ज्ञानमुपमं अन्तिकं दधः धारयेः तदा नेति संप्रत्यर्थे असुरोबलवान् होता देवानामाह्वाताग्निः सुभगायास्माकं शोभनधनप्राप्तये देवान् हुवानो ह्वयन् अत्रास्मिन्यज्ञे निषीदतु न्यसीदत् ॥ ३ ॥

अथ चतुर्थी–

वयंतेतइन्द्रयेचदेवस्तवन्तशूरददतोमघानि ।
यच्छासूरिभ्यउपमंवरूथंस्वाभुवोजरणामश्नवन्त ॥ ४ ॥

वयम् । ते । ते । इन्द्र । ये । च । देव । स्तवन्त । शूर । ददतः ।
मघानि । यच्छ । सूरिऽभ्यः । उपऽमम् । वरूथम् । सुऽआभुवः ।
जरणाम् । अश्नवन्त ॥ ४ ॥

हे देव शूरेन्द्र ते तव वयं वसिष्ठाः स्वभूता ये जनाः मदीयपुत्रपौत्रादयो मघानि मंहनीयानि हवींषि ददतः प्रयच्छन्तः स्तवन्त स्तुवन्ति तेपि तव स्वभूताः तेभ्यः उभयेभ्यः स-

रिभ्यः स्तोतृभ्यः उपमं श्रेष्ठं वरूथं गृहं यच्छ प्रयच्छ अपि च ते उभे स्वाभुवः सुसमृद्धाः सन्तः जरणां जरां अश्नवन्त प्राप्नुवन्तु ॥ ४ ॥

अथ पंचमी—

वोचेमेदिन्द्रंमघवानमेनंमहोरायोराधसोयद्दन्नः ।
योअर्चतोब्रह्मकृतिमविष्ठोयूयंपातस्वस्तिभिःसदानः ॥५॥१४॥

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः । राधसः । यत् । ददत् । नः । यः । अर्चतः । ब्रह्मऽकृतिम् । अविष्ठः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ १४ ॥

एषासिद्धा ॥ ५ ॥

॥ इति पंचमस्य तृतीये चतुर्दशो वर्गः ॥ १४ ॥

प्रवइन्द्रायेति द्वादशर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षमैन्द्रं दशम्याद्यास्तिस्रोविराजः शिष्टागायत्र्यः तथाचानुक्रान्तं—प्रवोद्वादशगायत्रं त्रिविराळन्तमिति । सूक्तविनियोगोलैंगिकः। प्रथमेरात्रिपर्याये मैत्रावरुणशस्त्रे प्रवइन्द्रायेत्याद्यस्तृचः स्तोत्रियः। सूत्रितं च—प्रवइन्द्रायमादनं यच्चतान्यृजीषिणइति। अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे वयमिन्द्रत्वायवोभीत्यनुरूपस्तृचः तथा च सूत्रितं—वयमिन्द्रत्वायवोभिप्रार्चतेत्यायेस्तुत्तमामुद्धरेदिति । चतुर्थेहनि माध्यंदिनसवने होत्रकशस्त्रे आरंभणीयाभ्यऊर्ध्ववैराजकएकस्तृचआहवनीयःतदर्थाः प्रवोमहे महिवृधे भरध्वमित्याद्यास्तिस्रः सूत्रितं च—प्रवोमहेमहिवृधेभरध्वमिति चतस्रस्तिस्रश्च विराजइति ।

तत्र प्रथमा—

प्रवइन्द्रायमादनंहर्यश्वायगायत । सखायःसोमपाव्ने ॥ १॥

प्र । वः । इन्द्राय । मादनम् । हरिऽअश्वाय । गायत । सखायः । सोमऽपाव्ने ॥ १ ॥

हे सखायो वोयूयं हर्यश्वाय सोमपाव्ने सोमानां पात्रे इन्द्राय मादनं मदकरं स्तोत्रं प्रगायत ॥ १ ॥

अथ द्वितीया—

शंसेदुक्थंसुदानवउतद्युक्षंयथानरः । चकृमासत्यराधसे ॥ २ ॥

शंसं । इत् । उक्थम् । सुऽदानवे । उत । द्युक्षम् । यथा । नरः ।
चकृम । सत्यऽराधसे ॥ २ ॥

उतापि च हे स्तोतः सुदानवे शोभनदानाय सत्यराधसे सत्यधनायेन्द्राय उक्थं स्तोमं यथा नरोन्ये स्तोतारः द्युक्षं दीप्तिः साधनभूतं स्तोत्रं शंसन्ति तद्वत् त्वमपि शंस उच्चारय । इदितिपूरणः वयं चकृम स्तोत्रं करवाम ॥ २ ॥

अथ तृतीया—

त्वंनइन्द्रवाजयुस्त्वंगव्युःशतक्रतो । त्वंहिरण्ययुर्वसो ॥ ३ ॥

त्वम् । नः । इन्द्र । वाजऽयुः । त्वम् । गव्युः । शतक्रतो इति
शतऽक्रतो । त्वम् । हिरण्यऽयुः । वसो इति ॥ ३ ॥

हे इन्द्र त्वं नोस्माकं वाजयुरन्नकामो भव हे शतक्रतो त्वं नोस्माकं गव्युर्गोकामोभव हे वसो वासयितरिन्द्र त्वं हिरण्ययुः हिरण्यकामोपि भव । छन्दसि परेच्छायामपिदृश्यते क्यजितिक्यच् ॥ ३ ॥

अथ चतुर्थी—

वयमिन्द्रत्वायवोभिप्रणोनुमोवृषन् । विद्धीत्वस्यनोवसो ॥ ४ ॥

वयम् । इन्द्र । त्वाऽयवः । अभि । प्र । नोनुमः । वृषन् । विद्धि ।
तु । अस्य । नः । वसो इति ॥ ४ ॥

हे वृषन् कामानां वर्षितरिन्द्र त्वायवः त्वत्कामाः वयं वसिष्ठाः त्वामभि प्रणोनुमः प्रकर्षेण स्तुमः। हे वसो वासयितरिन्द्र अस्य इदं नः अस्मदीयं स्तोत्रं तु क्षिप्रं विद्धि अवधारय॥४॥

अथ पञ्चमी—

मानोनिदेचवक्तवेर्योरन्धीरराव्णे । त्वेअपिक्रतुर्मम ॥ ५ ॥

मा । नः । निदे । च । वक्तवे । अर्यः । रन्धीः । अराव्णे ।
त्वे इति । अपि । क्रतुः । मम ॥ ५ ॥

हे इन्द्र अर्यः स्वामी त्वं वक्तवे परुषवाक्यानां वक्त्रे निदे निन्दित्रे अराव्णे अदात्रे च नोस्मान् मारन्धीः वशं माकार्षीः । अपि अपिच ते त्वयि मम क्रतुः मदीयं स्तोत्रलक्षणं कर्म गच्छतितिशेषः अस्मदीयं स्तोत्रं भवच्चित्ते मविशत्वित्यर्थः ॥ ५ ॥

अथ षष्ठी–

त्वंवर्मा॑सिस॒प्रथः॑पुरोयो॒धश्च॑वृत्रहन् । त्वया॒प्रति॑ब्रुवे यु॒जा ॥६॥१५॥

त्वम् । वर्म॑ । अ॒सि॒ । स॒ऽप्रथः॑ । पु॒रः॒ऽयो॒धः । च॒ । वृ॒त्र॒ऽह॒न् ।
त्वया॑ । प्रति॑ । ब्रु॒वे॒ । यु॒जा ॥ ६ ॥१५॥

हे वृत्रहन् शत्रूणां हिंसकेन्द्र त्वं वर्म अस्माकं कवचमसि कवचवद्रक्षकोसीत्यर्थः । सप्रथः सर्वतः पृथुश्चासि पुरोयोधश्च पुरोयोद्धाचासि त्वया युजा त्वया सहायेन प्रति ब्रुवे शत्रून् प्रति ब्रवीमि प्रतिहन्मीत्यर्थः ॥ ६ ॥

॥ इति पंचमस्य तृतीये पंचदशो वर्गः ॥१५ ॥

अथ सप्तमी–

म॒हाँउ॒तासि॒यस्य॒तेऽनु॑स्व॒धाव॑री॒सहः॑ । म॒म्नाते॑इन्द्र॒रोद॑सी ॥ ७ ॥

म॒हान् । उ॒त । अ॒सि॒ । यस्य॑ । ते॒ । अनु॑ । स्व॒धाव॑री॒ इति॑ स्व॒धाऽव॑री
सहः॑ । म॒म्नाते॒ इति॑ । इ॒न्द्र॒ । रोद॑सी॒ इति॑ ॥ ७ ॥

उतापिच हे इन्द्र त्वं महानसि सर्वाधिकोसि हे इन्द्र यस्य ते तव सहो बलं स्वधावरी-अन्नवत्यौ रोदसी द्यावापृथिव्यौ अनुमम्नाते अनुमन्येते । त्वदीयं सहः सर्वाधिकमित्यत्रोभावपि लोकौ विसंवादं न कुरुत इत्यर्थः ॥ ७ ॥

अथाष्टमी–

तंत्वा॑म॒रुत्व॑ती॒परि॒भुव॒द्वाणी॑स॒याव॑री । नक्ष॑माणास॒हद्युभिः॑ ॥ ८ ॥

तम् । त्वा॒ । म॒रुत्व॑ती । परि॑ । भुव॑त् । वाणी॑ । स॒ऽयाव॑री ।
नक्ष॑माणा । स॒ह । द्युऽभिः॑ ॥ ८ ॥

हे इन्द्र तमुक्तगुणविशिष्टं त्वा त्वां सयावरी त्वयासहगंत्री यत्रयत्र त्वं यासि तत्रतत्र यातीत्यर्थः द्युभिस्तेजोभिः सह नक्षमाणा व्यामुवन्ती मरुत्वती मरुतः स्तोतारः तद्वती वाणी स्तुतिः परिभुवद् परिभवतु परिभवतिरत्रपरिग्रहार्थीयः परिगृह्णात्वित्यर्थः ॥ ८ ॥

अथ नवमी—

ऊर्ध्वासस्त्वान्विन्दवो भुवन्दस्ममुपद्यवि । सन्तेनमन्तकृष्टयः ॥ ९ ॥

ऊर्ध्वासः । त्वा । अनु । इन्दवः । भुवन् । दस्मम् । उप । द्यवि ।
सम् । ते । नमन्त । कृष्टयः ॥ ९ ॥

हे इन्द्र उपद्यवि द्युलोकसमीपे स्थितं दस्मं दर्शनीयं त्वा त्वां अनूद्दिश्य ऊर्ध्वासः ऊर्ध्वा इन्दवःअस्मदीयाः सोमाः भुवन् भवन्ति । कृष्टयः प्रजाश्च ते तुभ्यं सन्नमन्त । भुवि सोमास्त्वदर्थमेव जायन्ते । प्रजाश्च त्वामेव प्रणमन्तीतीन्द्रस्तुतिः ॥ ९ ॥

अथ दशमी—

प्रवोमहेमहिवृधेभरध्वंप्रचेतसेप्रसुमतिंकृणुध्वम् ।
विशःपूर्वीःप्रचराचर्षणिप्राः ॥ १० ॥

प्र । वः । महे । महिऽवृधे । भरध्वम् । प्रऽचेतसे । प्र ।
सुऽमतिम् । कृणुध्वम् । विशः । पूर्वीः । प्र । चर । चर्षणिऽप्राः ॥ १० ॥

हे मदीयाः पुरुषाः वोयूयं महिवृधे महतां धनानां वर्धयित्रे महे महते इन्द्राय प्रभरध्वं सोमाम्प्रणयत । प्रचेतसे प्रकृष्टमतये इन्द्राय सुमतिं सुष्टुतिं च प्रकृणुध्वं प्रकुरुत । अथ प्रत्यक्षस्तुतिः हे इन्द्र चर्षणिप्राः कामैः प्रजानां पूरयिता त्वं पूर्वीः हविषां पूरयित्रीर्विशः प्रजाः प्रचर अभिगच्छ ॥ १० ॥

अथैकादशी—

उरुव्यचसेमहिनेसुवृक्तिमिन्द्रायब्रह्मजनयन्तविप्राः ।
तस्यव्रतानिनमिनन्तिधीराः ॥ ११ ॥

उरुऽव्यचसे । महिने । सुऽवृक्तिम् । इन्द्राय । ब्रह्म । जनयन्त ।
विप्राः । तस्य । व्रतानि । न । मिनन्ति । धीराः ॥ ११ ॥

उरुव्यचसे पृथुव्याप्तये महिने महते यस्माइन्द्राय सुवृक्तिं स्तुतिं ब्रह्म अन्नं हविश्च विप्राः प्राज्ञाः जनयन्त जनयन्ति तस्येन्द्रस्य व्रतानि रक्षणादीनि कर्माणि धीराः प्राज्ञाः देवा अपि न मिनन्ति हिंसन्ति ॥ ११ ॥

अथ द्वादशी–

इन्द्रं॒ वाणी॒रनु॑त्तमन्युमे॒व स॒त्रा राजा॑नं दधिरे॒ सह॑ध्यै ।
हर्य॑श्वाय बर्हया॒ समा॒पीन् ॥ १२ ॥ ॥१६ ॥

इन्द्र॑म् । वाणीः॑ । अनु॑त्तऽमन्युम् । ए॒व । स॒त्रा । राजा॑नम् । द॒धि॒रे॒ ।
सह॑ध्यै । हरि॑ऽअश्वाय । ब॒र्ह॒य॒ । सम् । आ॒पीन् ॥ १२ ॥ १६ ॥

सत्रा राजानं सर्वतः जगतईश्वरं अनुत्तमन्युं केनाप्यनुत्तोबाधितोमन्युः क्रोधो यस्य सत-मेवेन्द्रं *वाणीः स्तुतयः सहध्यै स्तोत्राणि शत्रूणां अभिभवितुं दधिरे । अतोहेतोः हे स्तोतः त्व*-मपि हर्यश्वायेन्द्राय हर्यश्वमिन्द्रं स्तोतुमित्यर्थः आपीन् बन्धून् संबर्हय उत्साहय ॥ १२ ॥

॥ इति पंचमस्य तृतीये षोडशो वर्गः ॥१६॥

मोषुत्वेति सप्तविंशत्यृचं पंचदशं सूक्तं । अत्रेयमनुक्रमणिका–मोषुसप्ताधिका प्रागाथं तृती-या द्विपदा । सौदासैरग्नौ प्रक्षिप्यमाणः शक्तिरंत्यां प्रगाथमर्धलेभे सोर्धर्चेउक्ते दग्धस्तं पुत्रोक्तं वसि-ष्ठः समापयतेति शाट्यायनकं । वसिष्ठस्यैव हतपुत्रस्यार्षमिति तांडकमिति । मंडलद्रष्टावसिष्ठ-ऋषिः इन्द्रक्रतुंनइति प्रगाथस्यार्धर्चस्य वसिष्ठपुत्रः शक्तिर्वसिष्ठोवा । इन्द्रोदेवता अयुजोबृहत्यः युजः सतोबृहत्यः तृतीयातु द्विपदाविराट् महाव्रते निष्केवल्ये बार्हततृचाशीतावेतत्सूक्तं तत्रद्वि-पदामभित्वाशूरेत्येतं राथंतरं प्रगाथं नकिःसुदासइति प्रगाथंच वर्जयेत् । तथैव पंचमारण्यके सूत्रितम्–मोषुत्वावाघतश्चनेत्येतस्य द्विपदांचोद्धरति राथंतरंच प्रगाथमथहास्यनकिःसुदासोरथ-मित्येतं प्रगाथमुद्धृत्य त्वामिदाह्योनर इत्येतं प्रगाथं प्रत्यवदधातीति । चातुर्विंशिकेहनि पंचमेह-निच निष्केवल्ये मोषुत्वावाघतइतिप्रगाथःसद्विपदः सूत्रितंच–मोषुत्वावाघतश्चनेति सद्विपदउप-समस्येद्द्विपदामिति । चातुर्विंशिकेहनि मरुत्वतीये प्रकृतान्मरुत्वतीयात्प्रगाथादनन्तरं नकिःसुदा-सइति प्रगाथंशंसेत् पृष्ठ्याभिप्लवषडहयोस्तृतीयेषष्ठेहनिचायंप्रगाथः तथैवसूत्रितं–नकिःसुदा-सोरथमिति । मरुत्वतीयादूर्ध्वं नित्यादिति एवंस्थितान्प्रगाथान् पृष्ठ्याभिप्लवयोरन्वहं पुनः पुन-रावर्तयेयुरिति । अग्निष्टोमे माध्यंदिनसवनेच्छावाकशस्त्रे उदिन्वस्यरिच्यतइति प्रगाथः । तथाच सूत्रितम्–उदिन्वस्यरिच्यते भूयइदिति । अग्निष्टोमेमाध्यंदिनसवने मैत्रावरुणशस्त्रे कस्तमिन्द्रेति प्रगाथः सूत्रितं च–कस्तमिन्द्रत्वावसुं सद्योहजातइति । चातुर्विंशिकेहनि माध्यंदिनसवने मै-त्रावरुणशस्त्रस्यायंप्रगाथः अहर्गणेष्वपि द्वितीयादिष्वहस्सु सूत्रितंच–कस्तमिन्द्रत्वावसुंकन-

व्योअवसीनामिति आरंभणीयाः पर्यासान् कद्रुतोहरहःशस्यानीति होत्रकाइति । पृष्ठ्यषडहस्य तृतीयेहनि निष्केवल्येवैरूपसामपक्षे यदिन्द्रयावतइत्यनुरूपस्तृचः सूत्रितंच—यदिन्द्रयावतस्त्वमिति प्रगाथौस्तोत्रियानुरूपाविति । अग्निष्टोमे चातुर्विंशिकेहनि माध्यंदिनसवनेच्छावाकशस्त्रे तरणिरित्सिषासतीति वैकल्पिकस्तृचः सूत्रितं च—तरोभिर्वोविदद्वसुं तरणिरित्सिषासतीति प्रगाथौस्तोत्रियानुरूपाविति। अग्निष्टोमे निष्केवल्यशस्त्रे रथंतरसामपक्षे अभित्वाशूरेति प्रगाथःस्तोत्रियः सूत्रितंच—अभित्वाशूरनोनुमोभित्वापूर्वपीतयइति स्तोत्रियानुरूपाविति । आश्विनशस्त्रेप्ययंप्रगाथः तथैवसूत्रितं च—अभित्वाशूरनोनुमोवहवःसूरचक्षसइति प्रगाथाइति । महाव्रते निष्केवल्ये दक्षिणपक्षेयंप्रगाथः तथैवपंचमारण्यकेसूत्रितम्—अभित्वाशूरनोनुमोभित्वापूर्वपीतयइति रथंतरस्यस्तोत्रियानुरूपौ प्रगाथाविति।आश्विनशस्त्रे इन्द्रक्रतुंनइति प्रगाथः । सूत्रितं च—इन्द्रक्रतुंनआभराभित्वाशूरनोनुमइति । चातुर्विंशेहनि माध्यंदिनेसवने ब्राह्मणाच्छंसिशस्त्रेऽयं वैकल्पिकः स्तोत्रियःप्रगाथः सूत्रितंच—इन्द्रक्रतुंनआभरेन्द्रज्येष्ठंनआभरेति ।

तत्र प्रथमा—

मोपुत्वावाघतंश्चनारेअस्मन्निरीरमन् ।

आरात्ताच्चित्सधमादंनआगहीहवासन्नुपंश्रुधि ॥ १ ॥

मो इति । सु । त्वा । वाघतः । चन । आरे । अस्मत् । नि । रीरमन् । आरात्तात् । चित् । सधऽमादम् । नः । आ । गहि । इह । वा । सन् । उप । श्रुधि ॥ १ ॥

हे इन्द्र त्वा त्वया वाघतश्चन यजमाना अप्येतेस्मदस्मत्त आरे दूरे मोनिरीरमन् न नितरां रमयन्तु । अतः त्वं आरात्ताच्चित् दूरेपि वर्तमानोस्मदीयं सधमादं यज्ञमागह्यागच्छ इह वा अत्रापिवा सन् विद्यमानः उपश्रुधि अस्मदीयं स्तोत्रमुपशृणु ॥ १ ॥

अथ द्वितीया—

इमेहितेब्रह्मकृतःसुतेसचामधौनमक्षआसते ।

इन्द्रेकामंजरितारोवसूयवोरथेनपादमादधुः ॥ २ ॥

इमे । हि । ते । ब्रह्मऽकृतः । सुते । सचा । मधौ । न । मक्षः । आसते । इन्द्रे । कामम् । जरितारः । वसुऽयवः । रथे । न । पादम् । आ । दधुः ॥ २ ॥

हे इन्द्र ते त्वदर्थं सुते अभिषुते सोमे इमे ब्रह्मकृतः मधौन मधुनीव मक्षोमक्षिकाः सचासह आसते उपविशन्ति हीति प्रसिद्धौ। अथ परोक्षस्तुतिः वसूयवो धनकामाः जरितारः स्तोतारः काममिष्टमिन्द्रे रथे न पादं रथेपादमिव आदधुः समर्पयन्ति ॥ २ ॥

अथ तृतीया–

रा॒यस्कामो॒वज्र॑हस्तंसु॒दक्षि॑णंपु॒त्रोनपि॒तरं॑हुवे ॥ ३ ॥

रा॒यःऽका॑मः। वज्र॑ऽहस्तम्। सु॒ऽदक्षि॑णम्।
पु॒त्रः। न। पि॒तर॑म्। हु॒वे॒ ॥ ३ ॥

रायस्कामोधनकामोहं सुदक्षिणं शोभनदानं वज्रहस्तं इन्द्रं पुत्रोन पुत्रइव पितरं हुवे ह्वयामि ॥ ३ ॥

अथ चतुर्थी–

इ॒मइन्द्रा॑यसुन्वि॒रेसोमा॑सो॒दध्या॑शिरः।
ताँआमदा॑यवज्रहस्तपी॒तये॒हरि॑भ्यां॒या॒ह्योक॒आ ॥ ४ ॥

इ॒मे। इन्द्रा॑य। सु॒न्वि॒रे॒। सोमा॑सः। दधि॑ऽआशिरः। तान्।
आ। मदा॑य। व॒ज्र॒ऽह॒स्त॒। पी॒तये॑। हरि॑ऽभ्याम्।
या॒हि॒। ओकः॑। आ ॥ ४ ॥

हे वज्रहस्त दध्याशिरो दधिमिश्रणा इमे सोमासः सोमाः इन्द्राय तुभ्यं सुन्विरे सुताबभूवुः। तान् सोमान् मदाय मदार्थं पीतये पानाय ओको यज्ञसदनं आआभि हरिभ्यामश्वाभ्यां आयाहि आगच्छ ॥ ४ ॥

अथ पंचमी–

श्रव॒च्छ्रुत्क॑र्णईयते॒वसू॑ना॒नू॒चि॒न्नोम॑र्धिप॒द्गिरः॑।
स॒द्यश्चि॒द्यःस॒हस्रा॑णिश॒ताद॑द॒न्नकि॒र्दित्स॑न्त॒मामि॑नत् ॥ ५ ॥१७॥

श्रव॑त्। श्रु॒त्ऽक॑र्णः। ई॒य॒ते॒। वसू॑नाम्। नु। चि॒त्। नः॒।
म॒र्धि॒प॒त्। गिरः॑। स॒द्यः। चि॒त्। यः। स॒हस्रा॑णि। श॒ता।
दद॑त्। नकिः॑। दित्स॑न्तम्। आ। मि॒न॒त् ॥ ५ ॥ १७ ॥

श्रुत्कर्णं याञ्चाश्रवणरूपकर्णं इन्द्रो वसूनां वसनि ईयते याच्यते नोऽस्मदीयाः गिरोयाञ्चा-वाक्यानि श्रवत् शृणोतु नूचित् नैव मर्धिषत् हिनस्तु अश्रवणेन याञ्चावाक्यानि निष्फलानि नकरोत्वित्यर्थः। अपि च यः इन्द्रः सद्यश्चित् सद्यएव याञ्चानन्तरमेव सहस्राणि शता शतानि च ददत् प्रयच्छेत् दित्सन्तं दातुमिच्छन्तं तमिन्द्रं नकिरामिनत् नहिंस्यात् कश्चिदपि नवारमेदित्यर्थः॥ ५॥

॥ इति पंचमस्य तृतीये सप्तदशोवर्गः॥ १७॥

अथ षष्ठी—

सवीरोअप्रतिष्कुतइन्द्रेणशूशुवेनृभिः।
यस्तेगभीरासवनानिवृत्रहन्सुनोत्याचधावति॥ ६॥

सः। वीरः। अप्रतिऽस्कुतः। इन्द्रेण। शूशुवे। नृऽभिः। यः। ते।
गभीरा। सवनानि। वृत्रऽहन्। सुनोति। आ। च। धावति॥ ६॥

हे वृत्रहन् ते त्वदर्थं यः पुमान् गभीरा गभीराणि सवनानि सोमान् सुनोति आधावति च त्वां स्तुतिभिरुपधावति च सवीरइन्द्रेण हेतुना अप्रतिष्कुतः केनाप्यप्रतिगतः अप्रतिशब्दितोवाभवेत् नृभिः परिचारकैः शूशुवे उपगम्यतेच श्वयतिर्गतिकर्मा॥ ६॥

अथ सप्तमी—

भवावरूथंमघवन्मघोनांयत्समजासिशर्धतः।
वित्वाहतस्यवेदनंभजेमह्यादूणाशोभरागयम्॥ ७॥

भव। वरूथम्। मघऽवन्। मघोनाम्। यत्। सम्ऽअजासि। शर्धतः।
वि। त्वाऽहतस्य। वेदनम्। भजेमहि। आ। दुःऽनशः। भर। गयम्॥७॥

हे मघवन् धनवन्निन्द्र मघोनां हविष्मतां वरूथं उपद्रवाणां वारकं वर्म भव यद्यस्त्वं शर्धत उत्सहमानान् शत्रून् समजासि संप्रेरयेः अपि च त्वा हतस्य त्वया हतस्य शत्रोः वेदनं धनं विभजेमहि विशेषेण लभेमहि। किं च दुर्नशोनाशयितुमशक्यस्त्वं गयं गृहं धनं वा आभर अस्मभ्यमाहर॥ ७॥

अथाष्टमी—

सुनोतासोमपाव्नेसोममिन्द्रायवज्रिणे।
पचतापक्तीरवसेकृणुध्वमित्पृणन्नित्पृणतेमयः॥ ८॥

सुनोत॑ । सो॒म॒ऽपाव्ने॑ । सोम॑म् । इन्द्रा॑य । व॒ज्रिणे॑ । पच॑त । प॒क्तीः ।
अव॑से । कृ॒णु॒ध्वम् । इत् । पृ॒णन् । इत् । पृ॒ण॒ते । मयः॑ ॥ ८ ॥

हे मदीयाः पुरुषाः वज्रिणे सोमपाव्ने सोमस्यपात्रे इन्द्राय सोमं सुनोत अभिषुणुत अवसे इन्द्रं तर्पयितुं पक्तीः पक्तव्यान् पुरोडाशादीन् पचत च कृणुध्वमित् इन्द्रप्रियकराणि कर्माणि च कुरुतैव । इन्द्रो हि मयः सुखं पृणन्नित् यजमानाय प्रयच्छन्नेव पृणते हवींषीति शेषः॥८॥

अथ नवमी–

मास्रे॑धतसोमिनो॒दक्ष॑ता॒म॒हेकृ॑णु॒ध्वंरा॒यआ॒तुजे॑ ।
त॒रणि॒रिज्ज॑यति॒क्षेति॒पुष्य॑ति॒नदे॒वासः॑क॒व॒त्नवे॑ ॥ ९ ॥

मा । स्रे॒ध॒त॒ । सो॒मि॒नः॒ । दक्ष॑त । म॒हे । कृ॒णु॒ध्वम् । रा॒ये । आ॒ऽतुजे॑ ।
त॒रणिः॑ । इत् । ज॒य॒ति॒ । क्षेति॑ । पुष्य॑ति । न । दे॒वासः॑ । क॒व॒त्नवे॑ ॥९॥

हे मदीयाः जनाः सोमिनः सोमवतोयागात् मास्रेधत मांहिंसिष्ट । दक्षत यागादिकं कर्तुमुत्सहध्वं च । महे महते आतुजे तुजिर्हिंसाकर्मा दानकर्मा वा शत्रूणामभिहिंसकाय धनानां मदात्रेवेन्द्राय राये धनार्थं कृणुध्वं कर्माणि कुरुतच । तरणिरित् कर्मसु त्वरितएव जयति शत्रून् क्षेति गृहे निवसति च पुष्यति प्रजया पशुभिश्च पुष्टो भवति कवत्नवे कुत्सितक्रियाये कवोपसृष्टस्य अतेः सातत्यगमनकर्मणोरूपं कवत्नुरिति । देवासो देवानभवन्तीतिशेषः सुखप्राप्तये भवन्तीत्यर्थः ॥ ९ ॥

अथ दशमी–

नकिः॑सु॒दासो॒रथं॒पर्या॑स॒नरी॑रमत् ।
इन्द्रो॒यस्या॑वि॒तायस्य॑म॒रुतो॒गम॒त्सगोम॑तिव्र॒जे ॥ १० ॥ ॥ १८ ॥

नकिः॑ । सु॒ऽदासः॑ । रथ॑म् । परि॑ । आ॒स॒ । न । री॒र॒म॒त् । इन्द्रः॑ ।
यस्य॑ । अ॒वि॒ता । यस्य॑ । म॒रुतः॑ । गम॑त् । सः । गोऽम॑ति । व्र॒जे १०॥१८

सुदासः शोभनदानस्य यजमानस्य रथं नकिः पर्यास कश्चिन्नपर्यस्यति नरीरमत् नरमयति च आत्मार्थं नकश्चिदेनं गृह्णातीत्यर्थः । अपि च यस्येन्द्रोविता रक्षिता यस्य च मरुतोवितारः सगोमति गोयुक्ते व्रजे गोष्ठे गमत् गच्छेत् ॥ १० ॥

॥ इति पंचमस्य तृतीयेष्टादशो वर्गः ॥१८॥

अथैकादशी–

गम॒द्वाजं॑वा॒जय॑न्निन्द्र॒मर्त्यो॒यस्य॒त्वम॑वि॒ता॒भुवः॑ ।
अ॒स्माकं॑बोध्यवि॒तारथा॑नाम॒स्माकं॑शूर॒नृ॒णाम् ॥ ११ ॥

गम॑त् । वाज॑म् । वा॒जय॑न् । इन्द्र॒ । मर्त्यः॑ । यस्य॑ । त्वम् । अ॒वि॒ता । भुव॑ः । अ॒स्माक॑म् । बो॒धि॒ । अ॒वि॒ता । रथा॑नाम् । अ॒स्माक॑म् । शू॒र॒ । नृ॒णाम् ॥ ११ ॥

हे इन्द्र त्वं यस्य मर्त्यस्य अविता रक्षिता भुवः भवेः समर्त्यो वाजयन् स्तोत्रेण त्वां बलिनं कुर्वन् वाजमन्नं गमत् गच्छेत् अपि च हे शूर अस्माकं वासिष्ठानां रथानां अविता रक्षिता बोधि भव भवतेर्लोटिरूपं भकारस्यबकारश्छान्दसः अस्माकं नृणां पुत्रादीनां चाविता भव ॥ ११ ॥

अथ द्वादशी–

उदिन्न्व॑स्यरिच्य॒तेंऽशो॒धनं॒नजि॒ग्युषः॑ ।
यइन्द्रो॒हरि॑वा॒न्नद॑भन्ति॒तंरिपो॒दक्षं॑दधाति॒सो॒मिनि॑ ॥ १२ ॥

उत् । इत् । नु । अ॒स्य॒ । रि॒च्य॒ते॒ । अंशः॑ । धन॑म् । न । जि॒ग्युषः॑ । यः । इन्द्र॑ः । हरि॑ऽवान् । न । द॒भ॒न्ति॒ । तम् । रिपः॑ । दक्ष॑म् । द॒धा॒ति॒ । सो॒मिनि॑ ॥ १२ ॥

अस्येन्द्रस्य अंशो यज्ञे सोमस्य भागोतिरिच्यते अन्येभ्योपि देवेभ्यः इन्द्रस्य त्रिष्वपि सवनेषु सोमपानमस्ति माध्यंदिनं हि सर्वमैन्द्रमिति जिग्युषोजितवतो धनं न धनमिव उदिन्न्विति त्रयःपूरणाः अपि च योहरिवानिन्द्रः सोमिनि यजमाने दक्षं बलं दधाति संदधाति तं रिपोरिपवोनदभन्ति नहिंसन्ति ॥ १२ ॥

अथ त्रयोदशी–

मन्त्र॒मख॑र्वं॒सुधि॑तंसु॒पेश॑सं॒दधा॑तय॒ज्ञिये॒ष्वा ।
पू॒र्वीश्च॒नप्रसि॑तयस्तरन्ति॒तंयइन्द्रे॒कर्म॑णा॒भुव॑त् ॥ १३ ॥

मर्त्यम् । अखर्वम् । सुऽधितम् । सुऽपेशसम् । दधात । यज्ञियेषु ।
आ । पूर्वीः । चन । प्रऽसितयः । तरन्ति । तम् । यः । इन्द्रे ।
कर्मणा । भुवत् ॥ १३ ॥

हे जनाः अखर्वं अनल्पं सुधितं सुविहितं सुपेशसं शोभनरूपं मंत्रं स्तोत्रं यज्ञियेषु यजनीयेषु देवेषु मध्ये इन्द्राय दधात विधत्त यो जनः कर्मणा स्तुत्यादिरूपेण इन्द्रे इन्द्रस्य चित्ते भुवत् भवेत् तं जनं पूर्वीर्बह्व्यः प्रसितयः पाशादीनि बंधनानि चनेति समुदायोनेत्यर्थे वर्तते नतरन्ति नव्याप्नुवन्ति इत्यर्थः ॥ ॥ १३ ॥

अथ चतुर्दशी–

कस्तमिन्द्रत्वावसुमामर्त्योदधर्षति ।
श्रद्धाइत्तेमघवन्पार्येदिविवाजीवाजंसिषासति ॥ १४ ॥

कः । तम् । इन्द्र । त्वाऽवसुम् । आ । मर्त्यः । दधर्षति । श्रद्धा । इत् ।
ते । मघऽवन् । पार्ये । दिवि । वाजी । वाजम् । सिसासति ॥ १४ ॥

हे इन्द्र तव चित्ते योभवेत् त्वावसुं त्वंवसुर्व्यापकोयस्येति बहुव्रीहिः तं जनं कोमर्त्यआ दधर्षति आधर्षेत् हे मघवन् ते त्वदर्थं यः श्रद्धाइव श्रद्धया युक्तः सन् वाजी हविष्मान् भ- वेत् पार्येदिवि सौत्येहनि वाजमन्नं बलं वासिषासति सेवते ॥ १४ ॥

अथ पंचदशी–

मघोनःस्मवृत्रहत्येषुचोदययेददतिप्रियावसु ।
तवप्रणीतीहर्यश्वसूरिभिर्विश्वातरेमदुरिता ॥ १५ ॥ १९ ॥

मघोनः । स्म । वृत्रऽहत्येषु । चोदय । ये । ददति । प्रिया । वसु ।
तव । प्रऽनीती । हरिऽअश्व । सूरिऽभिः । विश्वा । तरेम ।
दुःऽइता ॥ १५ ॥ १९ ॥

हे इन्द्र मघोनोधनवतस्ते त्वदर्थमित्यर्थः प्रिया प्रियाणि वसु वसूनि धनानि ये जनाः ददति प्रयच्छन्ति स्मेतिपूरणः तान् जनान् वृत्रहत्येषु संग्रामेषु चोदय प्रेरय हे हर्यश्व तवप्र-

णीती प्रणीत्या प्रणयनेन सूरिभिः स्तोतृभिः पुत्रादिभिः सार्धं विश्वा विश्वानि दुरिता दुरितानि तरेम ॥ १५ ॥

॥ इति पंचमस्य तृतीये एकोनविंशो वर्गः ॥ १९ ॥

अथ षोडशी–

त्वेदिन्द्रावमंवसुत्वंपुष्यसिमध्यमम् ।
सत्राविश्वस्यपरमस्यराजसिनकिष्ट्वागोपुवृण्वते॥ १६ ॥

तवं । इत् । इन्द्र । अवमम् । वसुं । त्वम् । पुष्यसि । मध्यमम् ।
सत्रा । विश्वस्य । परमस्यं । राजसि । नकिः । त्वा । गोषुं ।
वृण्वते ॥ १६ ॥

हे इन्द्र अवमं अधमं त्रपुसीसादिकं वसु धनं यद्वा भौमंवस्ववमंतवैव तवैव त्वं त्वमेव मध्यमं वसु रजतहिरण्यादिकं आन्तरिक्षं वा पुष्यसि विश्वस्य सर्वस्य परमस्योत्तमस्यापि रत्नादेर्दिव्यस्य वा वसुनो राजसि ईशिषे सत्रा सत्यमेव अपि च त्वा त्वां गोषु निमित्तेषु नकिर्वृण्वते केपि न वारयन्ति ॥ १६ ॥

अथ सप्तदशी–

त्वंविश्वस्यधनदाअसिश्रुतोयईंभवन्त्याजयः ।
तवायंविश्वःपुरुहूतपार्थिवोवस्युर्नामभिक्षते॥ १७ ॥

त्वम् । विश्वस्य । धनऽदाः । असि । श्रुतः । ये । ईम् । भवन्ति ।
आजयः । तवं । अयम् । विश्वः । पुरुऽहूत । पार्थिवः । अवस्युः ।
नामं । भिक्षते ॥ १७ ॥

हे इन्द्र त्वं विश्वस्य सर्वस्य स्तोतुर्यजमानस्य वा धनदाः धनस्य दाता सन् श्रुतः प्रसिद्धोसि यईं य एते आजयो युद्धानि भवन्ति तेष्वपि धनदाः श्रुतोसि हे पुरुहूत विश्वः सर्वोप्ययं पार्थिवो जनः तव त्वत्तइत्यर्थः अवस्युः रक्षामिच्छन् नाम अन्नमुदकं वा यद्वा नामेत्युदकनामसु पाठात् भिक्षते याचते त्वामेवेतिशेषः ॥ १७ ॥

अथाष्टादशी–

यदिन्द्रयावतस्त्वमेतावदहमीशीय।
स्तोतारमिद्दिधिषेयरदावसोनपापत्वायरासीय॥ १८ ॥

यत्। इन्द्र। यावतः। त्वम्। एतावत्। अहम्। ईशीय। स्तोतारम्।
इत्। दिधिषेय। रदवसो इति रदऽवसो। न। पापऽत्वाय। रासीय॥१८

हे इन्द्र यद्यतो यावतो धनस्य त्वं ईशिषे एतावत् पञ्चालुक् एतावतोधनस्याहमीशीय ईश्वरो भवेयं हे रदवसो रदति ददाति वसूनीति रदवसुः ततोहमस्मदीयस्तोतारमिद्दिधिषेय धनप्रदानेन धारयेयमेव पापत्वाय नरासीय नदद्याम्॥ १८ ॥

अथैकोनविंशी–

शिक्षेयमिन्महयतेदिवेदिवेरायआकुहचिद्विदे।
नहित्वदन्यन्मघवन्नआप्यंवस्योअस्तिपिताचन॥ १९ ॥

शिक्षेयम्। इत्। महऽयते। दिवेऽदिवे। रायः। आ।
कुहचित्ऽविदे। नहि। त्वत्। अन्यत्। मघऽवन्। नः।
आप्यम्। वस्यः। अस्ति। पिता। चन॥ १९ ॥

कुहचिद्विदे कुत्रचिद्विद्यमानः कुहचिद्वित् तस्मै यत्र क्वापि विद्यमानायेत्यर्थः महयते पूजयते जनाय दिवेदिवे प्रतिदिनं रायो धनानि शिक्षेयमित् दद्यामेव आकारः पूरणः। एवमिन्द्रस्य वाक्यं श्रुत्वा संतुष्टऋषिर्वदति हे मघवन् त्वत् त्वत्तोन्यत् नः अस्माकं आप्यं ज्ञातेयं नह्यस्ति वस्यः प्रशस्यः पिताचन पालयिताच त्वदन्योनास्तीत्यर्थः॥ १९ ॥

अथ विंशी–

तरणिरित्सिषासतिवाजंपुरंध्यायुजा।
आवइन्द्रंपुरुहूतंनमेगिरानेमिंतष्टेवसुद्र्वम्॥ २० ॥ २०॥

तरणिः। इत्। सिसासति। वाजम्। पुरम्ऽध्या।
युजा। आ। वः। इन्द्रम्। पुरुऽहूतम्। नमे।
गिरा। नेमिम्। तष्टाऽइव। सुऽद्र्वम्॥ २० ॥ ॥ २०॥

तरणिरिव स्तुत्यादौ कर्मणि त्वरितएव पुमान् पुरंध्या महत्या धिया युजा सहायभूतया वाजमन्नं सिपासति संभजते पुरुहूतं बहुभिराहूतमिन्द्रं यःत्वांगिरास्तुत्या अहं आनमे नेमिं चक्रस्य वलयं सुद्रुं शोभनदारुं तष्टेव यथावर्धकिः दारुनेमिं आनमयते तद्वदित्यर्थः ॥ २० ॥

॥ इति पंचमस्य तृतीये विंशो वर्गः ॥ २० ॥

अथैकविंशी–

नदुः॒ष्टुतीमर्त्यो॑विन्दते॒वसु॒नस्रेध॑न्तंर॒यिर्न॑शत् ।
सु॒शक्ति॒रिन्म॑घव॒न्तुभ्यं॒मा॑वते॒देष्णं॒यत्पार्ये॑दि॒वि॥ २१ ॥

न । दुः॒ऽस्तुती । मर्त्यः॑ । वि॒न्दते॒ । वसु॑ । न । स्रेध॑न्तम् ।
र॒यिः । न॒शत् । सु॒ऽशक्तिः॑ । इत् । म॒घ॒ऽव॒न् । तुभ्य॑म् ।
मा॒ऽव॑ते । दे॒ष्णम् । यत् । पार्ये॑ । दि॒वि ॥ २१ ॥

मर्त्यो मनुष्यो दुष्टुती दुष्टुत्या वसु धनं न विन्दते इन्द्रं स्तुवन्नेव वसु लभतइत्यर्थः स्रेधन्तं हिंसन्तं इन्द्रविषयस्तुत्यादि कर्माण्यकुर्वन्तं इत्यर्थः रयिः धनं न नशत् नव्याप्नोति । हे मघवन् – त्वया पार्ये दिवि सौत्ये दिवसे मावते मत्सदृशाय देष्णं दातव्यं यद्धनमस्ति तत्तुभ्यं त्वत्तः सुशक्तिरित् सुकर्मैव विंदत इति व्यवहितमप्यनुपज्यते अध्याहारस्यान्तिकत्वात् ॥ २१ ॥

अथ द्वाविंशी–

अ॒भित्वा॑शूरनोनुमोदु॑ग्धाइवधे॒नवः॑ ।
ईशा॑नम॒स्यजग॑तःस्व॒र्दृश॒मीशा॑नमिन्द्रत॒स्थुषः॑ ॥ २२ ॥

अ॒भि । त्वा॒ । शू॒र॒ । नो॒नु॒मः॒ । अदु॑ग्धाःऽइव । धे॒नवः॑ । ईशा॑नम् ।
अ॒स्य । जग॑तः । स्वः॒ऽदृश॑म् । ईशा॑नम् । इ॒न्द्र॒ । त॒स्थुषः॑ ॥ २२ ॥

हे शूरेन्द्र अस्य जगतो जंगमस्येशानमीश्वरं तस्थुषः स्थावरस्य चेशानं ईशानमिति पदस्यावृत्तिरादरार्था स्वर्दृशं सर्वदृशं त्वा त्वां अदुग्धाइव धेनवः यथा अदुग्धा धेनवः क्षीरपूर्णोधस्त्वेन वर्तन्ते तद्वत्सोमपूर्णचमसत्वेन वर्तमानावयं अभिनोनुमो भृशमभिष्टुमः ॥ २२॥

अथ त्रयोविंशी–

नत्वावाँ॑अ॒न्योदि॒व्योनपार्थि॑वो॒नजा॒तोनज॑निष्यते ।
अ॒श्वा॒यन्तो॑मघवन्निन्द्रवा॒जिनो॑ग॒व्यन्त॑स्त्वाहवामहे॥ २३ ॥

न । त्वाऽवा॑न् । अ॒न्यः । दि॒व्यः । न । पार्थि॑वः । न । जा॒तः ।
न । ज॒नि॒ष्य॒ते॒ । अ॒श्व॒ऽयन्तः॑ । म॒घ॒ऽव॒न् । इ॒न्द्र॒ ।
वा॒जिन॑ः । ग॒व्यन्त॑ः । त्वा॒ । ह॒वा॒म॒हे॒ ॥ २३ ॥

हे मघवन् इन्द्र दिव्यो दिविभवः त्वावान् त्वत्सदृशोन्यो न जायते पार्थिवः पृथिव्यां भवोपि त्वावानन्यो नजायते दिव्यः पार्थिवोवा त्वावानन्योनजातः नचजनिष्यते पृथिव्यां दिवि च त्रिष्वपि लोकेषु त्वत्सदृशः कश्चिन्नास्तीत्यर्थः । अश्वायन्तोश्वानिच्छन्तो वाजिनो वाजमिच्छन्तः इच्छायामिनिप्रत्ययः हविष्मन्तोवा गव्यन्तोगाइच्छन्तश्च वयं त्वा त्वां हवामहे ह्वयामः ॥ २३ ॥

अथ चतुर्विंशी—

अ॒भी॒ष॒तस्तदा भ॑रेन्द्र॒ज्याय॒ःकनी॑यसः ।
पु॒रू॒व॒सु॒र्हि म॑घवन्त्स॒नाद॑सि॒भरे॑भरे॒च॒हव्य॑ः ॥ २४ ॥

अ॒भि । स॒तः । तत् । आ । भ॒र॒ । इन्द्र॑ । ज्याय॑ः । कनी॑यसः ।
पु॒रु॒ऽव॒सुः॑ । हि । म॒घ॒ऽव॒न् । स॒नात् । असि॑ । भरे॑ऽभरे । च॒ । हव्य॑ः ॥ २४ ॥

हे ज्यायो ज्यायन्निन्द्र आमंत्रितं पूर्वमविद्यमानवदिति इन्द्रपदस्याविद्यमानवद्भावात् ज्यायइत्यस्य सर्वानुदात्तत्वाभावः नकारस्यरुत्वं व्यत्ययात्नुमभावोवा । कनीयसः सतो मम तत्प्रसिद्धं धनं अभ्याभार हे मघवन् त्वं सनाच्चिरादेवारभ्य पुरूवसुर्हि बहुधनोह्यसि भरेभरे संग्रामे यज्ञेवा हव्यः आह्वातव्यः हविष्यश्चासि ॥ २४ ॥

अथ पंचविंशी—

परा॑णुदस्वमघवन्न॒मित्रा॑न्त्सु॒वेदा॑नो॒वसू॑कृधि ।
अ॒स्माकं॑बोध्यवि॒तामहा॑ध॒नेभवा॑वृ॒धःसखी॑नाम् ॥ २५ ॥

परा॑ । नु॒द॒स्व॒ । म॒घ॒ऽव॒न् । अ॒मित्रा॑न् । सु॒ऽवेदा॑ । नः॒ ।
वसु॑ । कृ॒धि॒ । अ॒स्माक॑म् । बो॒धि॒ । अ॒वि॒ता ।
म॒हा॒ऽध॒ने । भव॑ । वृ॒धः । सखी॑नाम् ॥ २५ ॥

हे मघवन् परा पराचीनानमित्रान् शत्रून् नुदस्व प्रेरय नोस्मभ्यं वसु वसूनि सुवेदा सुलभानि कृधि कुरु। महाधने संग्रामे वाजसातौ महाधनइति संग्रामनामसु पाठात् सखीनां स्तोतॄणामस्माकं वसिष्ठानामविता रक्षिता बोधि भव वृधोवर्धयिता च भव ॥ २५ ॥

अथ षड्विंशी–

इन्द्रक्रतुंनआभरपितापुत्रेभ्योयथा।
शिक्षाणोअस्मिन्पुरुहूतयामनिजीवाज्योतिरशीमहि ॥ २६ ॥
इन्द्र। क्रतुम्। नः। आ। भर। पिता। पुत्रेभ्यः। यथा।
शिक्ष। नः। अस्मिन्। पुरुऽहूत। यामनि।
जीवाः। ज्योतिः। अशीमहि ॥ २६ ॥

हे इन्द्र नोस्मभ्यं क्रतुं कर्म प्रज्ञानं वा आभर आहर। अपि च यथा पिता पुत्रेभ्योधनं प्रयच्छति तथा नोस्मभ्यं शिक्ष धनं देहि। हे पुरुहूत बहुभिराहूत अस्मिन् यामनि यज्ञे जीवाः वयं ज्योतिः सूर्यमशीमहि प्रतिदिनं प्राप्नुयाम ॥ २६ ॥

अथ सप्तविंशी–

मानोअज्ञाताव्रजनादुराध्योऽमाशिवासोअवक्रमुः।
त्वयावयंप्रवतःशश्वतीरपोतिशूरतरामसि ॥ २७ ॥ २१ ॥
मा। नः। अज्ञाताः। वृजनाः। दुःऽआध्यः। मा। अशिवासः।
अव। क्रमुः। त्वया। वयम्। प्रऽवतः। शश्वतीः।
अपः। अति। शूर। तरामसि ॥ २७ ॥ २१ ॥

हे इन्द्र अज्ञाताः अज्ञातगमनाः वृजनाः हिंसकाः दुराध्यः अशिवासः नोस्मान् मावक्रमुः मावचक्रमुः हे शूर त्वया वयं वसिष्ठाः प्रवतः प्रवणकाः रांतः शश्वतीर्बह्वीरपोतितरामसि अतितरामः ॥ २७ ॥

॥ इति पंचमस्य तृतीये एकविंशो वर्गः ॥ २१॥

भित्यंचइति चतुर्दशर्चं षोडशं सूक्तं अत्रेयमनुक्रमणिका–भित्यंचः पञ्चनासंस्तवो- वसिष्ठस्य सपुत्रस्येन्द्रेणवासंवादइति। आदितो नवानां वसिष्ठऋषिः वसिष्ठपुत्राणां स्तूयमानत्वात् तएवदेवता विद्युतोज्योतिरित्यादिभिः दशम्यादिभिः सपुत्रैर्वसिष्ठःस्तूयते अतोवसिष्ठो देवता तएवऋषयः यातेनोच्यतइतिन्यायात् अनुक्तत्वात्त्रिष्टुप्।

तत्र प्रथमा—

श्वित्यञ्चोमादक्षिणतस्कपर्दाधियंजिन्वासोअभिहिप्रमन्दुः ।
उत्तिष्ठन्वोचेपरिबर्हिषोनॄन्नमेदूरादवितवेवसिष्ठाः ॥ १ ॥

श्वित्यञ्चः । मा । दक्षिणतःऽकपर्दाः । धियम्ऽजिन्वासः ।
अभि । हि । प्रऽमन्दुः । उत्ऽतिष्ठन् । वोचे । परि ।
बर्हिषः । नॄन् । न । मे । दूरात् । अवितवे । वसिष्ठाः ॥ १ ॥

श्वित्यंचः श्वित्यं श्वेतवर्णं अंचंतीति श्वित्यंचः श्वेतवर्णाइत्यर्थः धियं जिन्वासः कर्मणां पूरयितारो दक्षिणतस्कपर्दाः दक्षिणेशिरसोभागे कपर्दाः चूडा येषां ते दक्षिणतस्कपर्दाः चूडाकर्मणि दक्षिणतोवसिष्ठानामितिस्मर्यते । मा मां अभिप्रमन्दुः विद्याबलेनाभिप्रहर्षयन् हिःपूरणः यतोमामभिप्रमन्दुरतोबर्हिषोयज्ञात् परीति पंचम्यर्थानुवादः उत्तिष्ठन् अहं नॄन् यज्ञस्य नेतॄन् वोचे ब्रवीमि मेमत्तोदूरात् वसिष्ठाः वसिष्ठस्य ममपुत्राः सुदासराजानं अवितवे गन्तुं न अर्हन्तीतिशेषः ॥ १ ॥

अथ द्वितीया—

दूरादिन्द्रमनयन्नासुतेनतिरोवैशन्तमतिपान्तमुग्रम् ।
पाशद्युम्नस्यवायतस्यसोमात्सुतादिन्द्रोवृणीतावसिष्ठान् ॥ २ ॥

दूरात् । इन्द्रम् । अनयन् । आ । सुतेन । तिरः । वैशन्तम् ।
अति । पान्तम् । उग्रम् । पाशऽद्युम्नस्य । वायतस्य ।
सोमात् । सुतात् । इन्द्रः । अवृणीत । वसिष्ठान् ॥ २ ॥

यदा वसिष्ठस्य पुत्राः सुदासं राजानमयाजन् तदैव पाशद्युम्नाख्योपि राजा सोमान्यष्टुमुद्यमंचकार तदा ते वसिष्ठपुत्राः पाशद्युम्नं तिरस्कृत्य तदीये यागे सोमं पिबन्तमिन्द्रं मंत्रबलेन तस्मादाच्छिद्य सुदासयज्ञे स्थापयामासुः तदेतद्वृत्तान्तं कीर्तयन् वसिष्ठः स्वसुताननेन मंत्रेण स्तौति वैशंतं वेशन्तःपल्वलं अत्रवेशन्तशब्देन सोमाधारश्चमसो लक्ष्यते तत्स्थं सोमं पांतं पिबन्तं उग्रमुद्गूर्णमिन्द्रं सुतेन सुदासोयज्ञेभिषुतेन सोमेन हेतुना तिरः पाशद्युम्नं तिरस्कृत्य दूरादानयन् वसिष्ठामंत्रबलेनानीतवन्तः । इन्द्रोपि वायतस्य वयतः पुत्रस्य पाशद्युम्नस्य द्वितीयार्थेषष्ठी वायतं

पाशद्युम्नं अतिहाय सुदासोयज्ञे सुताव् अभिषुताव् सोमाद्धेतोः वसिष्ठान् वसिष्ठस्य पुत्रान् अवृणीत पाशद्युम्नस्य सोमयागे चमसस्थं सोमं पिबन्नपीन्द्रस्तं पाशद्युम्नं तिरस्कृत्य मंत्रसामर्थ्यबलेन सुदासो यज्ञे आह्वनकाले वसिष्ठानाजगामेत्यर्थः ॥ २ ॥

अथ तृतीया–

एवेन्नुकंसिन्धुमेभिस्ततारेवेन्नुकंभेदमेभिर्जघान।
एवेन्नुकंदाशराज्ञेसुदासंप्रावदिन्द्रोब्रह्मणावोवसिष्ठाः ॥ ३ ॥

एव । इत् । नु । कम् । सिन्धुम् । एभिः । ततार । एव । इत् । नु । कम् । भेदम् । एभिः । जघान । एव । इत् । नु । कम् । दाशऽराज्ञे । सुऽदासम् । प्र । आवत् । इन्द्रः । ब्रह्मणा । वः । वसिष्ठाः ॥ ३ ॥

एवेव् यथा पाशद्युम्नस्य सवाख्ये सोमयागे चमसस्थं सोमं पिबन्तमपीद्रं वसिष्ठैः सुदाः प्राप्तवान् एवमेव सिन्धुं नदीं एभिर्वसिष्ठैः कं सुखेन ततार तीर्णआसीव् नुइतिपूरणः तथाचनिगमान्तरं– अर्णांसिचित्पप्रथानासुदासइति । एवेव् एवमेव भेदं भेदनामकं शत्रुमपि एभिर्वसिष्ठैरेव जघान । अथप्रत्यक्षस्तुतिः एवेव् एवमेव हे वसिष्ठाः वोयुष्मदीयेनब्रह्मणा स्तोत्रेण दाशराज्ञे दशभीराजभिः सह युद्धे प्रवृत्तेसति सुदासं राजानमिन्द्रः प्रावव् प्रारक्षव् तथाचनिगमान्तरं– दशराजानःसमिताअयज्यवः । सुदासमिन्द्रावरुणानयुयुधुरिति । दाशराज्ञेपरियत्तायविश्वतइतिचै ॥ ३ ॥

अथ चतुर्थी–

जुष्टीनरोब्रह्मणावःपितॄणामक्षमव्ययंनकिलारिषाथ।
यच्छक्करीषुबृहतारवेणेन्द्रेशुष्ममदधातावसिष्ठाः ॥ ४ ॥

जुष्टी । नरः । ब्रह्मणा । वः । पितॄणाम् । अक्षम् । अव्ययम् ।
न । किल । रिषाथ । यत् । शक्करीषु । बृहता ।
रवेण । इन्द्रे । शुष्मम् । अदधात । वसिष्ठाः ॥ ४ ॥

---

१ ऋ० सं० ५. ३. २४। २ ऋ. सं० ५. ६. ५। ३ ऋ० सं० ५. ६. ५।

हे नरो वो युष्मदीयेन ब्रह्मणा स्तोत्रेण पितॄणां जुष्टी प्रीतिर्भवति पितॄणामित्यनेन पारोक्ष्येण वसिष्ठस्यैवकीर्तनं अहं प्रीतोभवामीत्यर्थः । अथेदानीं स्वमाश्रमं गन्तुमुद्यतोहं अक्षं रथस्याक्षं अव्ययं व्ययामि लङर्थेलङ् चालयामीत्यर्थः । यूयं न किल रिषाथ नक्षीणाभवथ हे वसिष्ठाः यद्यस्माच्छक्करीष्वृक्षु बृहता श्रेष्ठेन रवेण साम्ना इन्द्रे शुष्मं बलं अदधात अधारयत ॥ ४ ॥

अथ पंचमी—

उद्यामि॒वेत्तृ॒ष्णजो॑नाथि॒तासो॒दीध॑युर्दाशरा॒ज्ञेवृ॒तासः॑ ।
वसि॑ष्ठस्यस्तुव॒तइन्द्रो॑अश्रो॒दु॒रुंतृत्सु॑भ्यो॒अकृणोदुलो॒कम् ॥५॥२२॥

उत् । द्याम्ऽइ॑व । इत् । तृ॒ष्णऽज॑ः । ना॒थि॒तासः॑ । अदी॑धयुः ।
दा॒श॒ऽरा॒ज्ञे । वृ॒तासः॑ । वसि॑ष्ठस्य । स्तु॒व॒तः । इन्द्रः॑ । अ॒श्रो॒त् ।
उ॒रुम् । तृत्सु॑ऽभ्यः । अ॒कृ॒णो॒त् । ऊँ इति॑ । लो॒कम् ॥ ५ ॥ २२ ॥

तृष्णजोजाततृष्णाः वृतासः तृत्सुभीराजभिर्वृताः नाथितासोवृष्टिं याचमाना वसिष्ठाः द्यामिव आदित्यमिवेन्द्रं दाशराज्ञे दशानां राज्ञां संग्रामे उददीधयुः उददीधयन् स्तुवतोवसिष्ठस्य स्तोत्रमिन्द्रः अश्रोदशृणोच्च उरुं विस्तीर्णं लोकं तृत्सुभ्योराजभ्यः अकृणोदकरोच्च अददाच्चेत्यर्थः इदुपूरणौ ॥ ५ ॥

॥ इति पञ्चमस्य तृतीये द्वाविंशो वर्गः ॥ २२ ॥

अथ षष्ठी—

दण्डाइ॒वेद्गो॒अज॑नासआसन्परि॑च्छिन्नाभर॒ताअ॑र्भ॒कासः॑ ।
अभ॑वच्चपुरए॒ताव॒सिष्ठ॒आदित्तृत्सू॑नां॒विशो॑अप्रथन्त ॥ ६ ॥

दण्डाः॑ऽइव । इत् । गोऽअज॑नासः । आ॒स॒न् । परि॑ऽछिन्नाः ।
भ॒र॒ताः । अ॒र्भ॒कासः॑ । अभ॑वत् । च॒ । पु॒रःऽए॒ता ।
वसि॑ष्ठः । आत् । इत् । तृत्सू॑नाम् । विशः॑ । अ॒प्र॒थ॒न्त॒ ॥ ६ ॥

गोअजनासो गवां प्रेरका दंडाइव यथादंडाः परिच्छिन्नपत्रोपशाखाभवन्ति तद्वद्भरताः तृत्सूनामेव राज्ञां भरता इतिनामान्तरेणोपादानं शत्रुभिः परिच्छिन्ना एवासन् इत् एवकारार्थः

अर्भकासोऽर्भका अल्पाआसन् आदित्यपरिच्छिन्नत्वादनन्तरमेव तेषां कृत्स्नानां वसिष्ठः पुरएता पुरोहितोऽभवच्च तत्पौरोहित्यसामर्थ्यात् कृत्स्नानां विशः प्रजाः अप्रथन्त अवर्धयन्त ॥ ६ ॥

अथ सप्तमी—

त्रयःकृण्वन्तिभुवनेषुरेतस्तिस्रःप्रजाआर्याज्योतिरग्राः ।
त्रयोघर्मासउपसंसचन्तेसर्वाँइत्ताँअनुविदुर्वसिष्ठाः ॥ ७ ॥

त्रयः । कृण्वन्ति । भुवनेषु । रेतः । तिस्रः । प्रऽजाः । आर्याः ।
ज्योतिःऽअग्राः । त्रयः । घर्मासः । उपसम् । सचन्ते ।
सर्वान् । इत् । तान् । अनु । विदुः । वसिष्ठाः ॥ ७ ॥

भुवनेषु पृथिव्यंतरिक्षद्युक्षु त्रयोऽग्निवायुसूर्याः यथाक्रमेण रेतो विश्वस्य धारकमुदकं कृण्वन्ति कुर्वन्ति तेषां त्रयाणां ज्योतिरग्रा आदित्यप्रमुखा आर्याः श्रेष्ठाः तिस्रः प्रजाभवन्ति तेच त्रयोऽग्निवायुसूर्याः घर्मासो दीप्यमानाः उपसं सचन्ते समवयन्ति दुर्शानान् सर्वानित् सर्वानेव तान् वसिष्ठा अनुविदुः अभिजानन्ति तेषां रहस्यविज्ञानादियमपि वसिष्ठानामेवस्तुतिः तथाच शाट्यायनकं—त्रयःकृण्वन्ति भुवनेषुरेतइत्यग्निः पृथिव्यां रेतःकृणोति वायुरन्तरिक्षे आदित्योदिवि तिस्रः प्रजाआर्याज्योतिरग्राइति वसवोरुद्राआदित्यास्तासां ज्योतिर्यदसावादित्यः त्रयोघर्मासउपसंसचन्तइत्यग्निरुपसं सचते वायुरुपसं सचते आदित्यउपसं सचतइति ॥ ७ ॥

अथाष्टमी—

सूर्यस्येववक्षथोज्योतिरेषांसमुद्रस्येवमहिमागभीरः ।
वातस्येवप्रजवोनान्येनस्तोमोवसिष्ठाअन्वेतवेवः ॥ ८ ॥

सूर्यस्यऽइव । वक्षथः । ज्योतिः । एषाम् । समुद्रस्यऽइव ।
महिमा । गभीरः । वातस्यऽइव । प्रऽजवः । न । अन्येन ।
स्तोमः । वसिष्ठाः । अनुऽएतवे । वः ॥ ८ ॥

हे वसिष्ठाः एषां वोयुष्माकं स्तोमोमहिमापिवा सूर्यस्यज्योतिरिव वक्षथः प्रकाशोस्ति हे वसिष्ठावोयुष्माकं महिमा स्तोमोपिवा समुद्रस्येव गभीरोस्ति तथा हे वसिष्ठाः एषां वोयुष्माकं स्तोमोऽत्रसमूहः महिमापिवा वातस्येव प्रजवः यथा वातस्य प्रवेगोन्येनान्वेतुं नशक्यः तद्वदन्येन तव महिमाअन्वेतवेअन्वेतुं न शक्यः ॥ ८ ॥

अथ नवमी—

तइन्निण्यंहृदयस्यप्रकेतैःसहस्रवल्शमभिसंचरन्ति ।
यमेनततंपरिधिंवयन्तोप्सरसउपसेदुर्वसिष्ठाः ॥ ९ ॥

ते । इत् । निण्यम् । हृदयस्य । प्रऽकेतैः । सहस्रऽवल्शम् ।
अभि । सम् । चरन्ति । यमेन । ततम् । परिऽधिम् । वयन्तः ।
अप्सरसः । उप । सेदुः । वसिष्ठाः ॥ ९ ॥

तइत् तएव वसिष्ठाः निण्यं तिरोहितं दुर्ज्ञानं निण्यं सस्वरित्यंतर्हितनामसु पठात् सहस्रवल्शं सहस्रशाखं संसारं हृदयस्य प्रकेतैः प्रज्ञानैरभिसंचरन्ति एवं स्वाच्छन्द्येनाभिसंचरन्तस्तेवसिष्ठाः यमेनकारणात्मना सर्वनियंत्रा ततं विस्तृतं परिधिं वस्त्रं परिधिरित्येनेन जन्मादिप्रवाहोविवक्षितः तं वयंतोऽप्सरसो जननीत्वेनोपसेदुः । अत्र वसिष्ठाइति बहुवचनं पूजायां वसिष्ठः पूर्वं प्रजापतेरुत्पन्नं देहमुत्सृज्याप्सरस्सु जायेयेति बुद्धिमकरोदितिभावः ॥ ९ ॥

अथ दशमी—

विद्युतोज्योतिःपरिसंजिहानंमित्रावरुणायदपश्यतांत्वा ।
तत्तेजन्मोतैकंवसिष्ठागस्त्योयत्त्वाविशआजभार ॥ १० ॥२३॥

विऽद्युतः । ज्योतिः । परि । सम्ऽजिहानम् । मित्रावरुणा ।
यत् । अपश्यताम् । त्वा । तत् । ते । जन्म । उत । एकम् । वसिष्ठ ।
अगस्त्यः । यत् । त्वा । विशः । आऽजभार ॥ १० ॥ २३ ॥

एतास्वृक्षु वसिष्ठस्यैव देहपरिग्रहः प्रतिपाद्यते एताश्चेन्द्रस्य वाक्यमित्येके वर्णयन्ति अपरे वसिष्ठपुत्राणामिति । हे वसिष्ठ यद्यदा विद्युतोविद्युतइव स्वीयं ज्योतिः देहान्तरपरिग्रहार्थं परिसंजिहानं परित्यजन्तं त्वा त्वां छान्दसमात्मनेपदं यद्वा जिघृक्षितदेहार्थं स्वीयं ज्योतिः परिसंजिहानं परिजिघृक्षन्तमित्यर्थः । अस्मिन्पक्षे जहातेर्गत्यर्थत्वादात्मनेपदं छान्दसं न भवति । मित्रावरुणा मित्रावरुणौ अपश्यतां आवाभ्यामयंजायेतेति सामकल्पतामित्यर्थः तत्तदा ते तवैकं

जन्म उतापिच यद्यदा आगस्त्योविशोनिवेशनान्मित्रावरुणावावां जनयिष्याव इत्येतस्मा-
त्पूर्वावस्थानात् त्वा त्वामाजभार आजहार ॥१०॥

॥ इति पंचमस्य तृतीये त्रयोविंशोवर्गः ॥ २३ ॥

अथैकादशी–

उतासिमैत्रावरुणोवसिष्ठोर्वश्याब्रह्मन्मनसोधिजातः ।
द्रप्संस्कन्नंब्रह्मणादैव्येनविश्वेदेवाःपुष्करेत्वाददन्त ॥ ११ ॥

उत । असि । मैत्रावरुणः । वसिष्ठ । उर्वश्याः । ब्रह्मन् ।
मनसः । अधि । जातः । द्रप्सम् । स्कन्नम् । ब्रह्मणा ।
दैव्येन । विश्वे । देवाः । पुष्करे । त्वा । अददन्त ॥ ११ ॥

उतापिच हे वसिष्ठ मैत्रावरुण मित्रावरुणयोः पुत्रोसि हे ब्रह्मन् वसिष्ठ उर्वश्याअप्सर-सोमनसोपमायं पुत्रःस्यादिति ईदृशात्संकल्पात् द्रप्सं रेतोमित्रावरुणयोरुर्वशीदर्शनात् स्कन्नमा-सीत् तस्मादधिजातोसि । तथा च वक्ष्यते सत्रेहजाताविषितौ इति ।एवं जातं त्वा त्वां दैव्येन देवसंब-न्धिना ब्रह्मणा वेदराशिना अहंभुवा युक्तं पुष्करे विश्वेदेवा अददन्तअधारयंत । तथा चादितेर्मित्रावरुणौ जज्ञाते इति प्रकृत्य पठ्यते–तयोरादित्ययोःसत्रेदृष्ट्वाप्सरसमुर्वशीं । रेतश्च-स्कंदतत्कुंभेन्यपतद्वासतीवरे ॥ १ ॥ तेनैवतुमुहूर्तेन वीर्यवंतौतपस्विनौ । अगस्त्यश्चवसिष्ठश्च-तत्रर्षीसंबभूवतुः ॥ २ ॥ बहुधापतितं रेतः कलशेचजलेस्थले । स्थलेवसिष्ठस्तुमुनिः संभूतऋषि-सत्तमः ॥ ३ ॥ कुंभेत्वगस्त्यः संभूतो जलेमत्स्योमहाद्युतिः । उदियायततोगस्त्यः शम्यामात्रो-महातपाः ॥ ४ ॥ मानेनसंमितोयस्मात्तस्मान्मान्यइहोच्यते । यद्वा कुंभादृषिर्जातः कुंभेना-पिहिमीयते ॥ ५ ॥ कुंभइत्यभिधानंच परिमाणंचलक्ष्यते । ततोप्सुगृह्यमाणासु वसिष्ठःपुष्करे-स्थितः ॥ ६ ॥ सर्वतःपुष्करेतंहि विश्वेदेवाअधारयन्निति ॥ ११ ॥

अथ द्वादशी–

सप्रकेतउभयस्यप्रविद्वान्त्सहस्रदानउतवासदानः ।
यमेनततंपरिधिंवयिष्यन्नप्सरसःपरिजज्ञेवसिष्ठः ॥ १२ ॥

सः । प्रऽकेतः । उभयस्य । प्रऽविद्वान् । सहस्रऽदानः । उत ।
वा । सऽदानः । यमेन । ततम् । परिऽधिम् । वयिष्यन् ।
अप्सरसः । परि । जज्ञे । वसिष्ठः ॥ १२ ॥

सः वसिष्ठः प्रकेतः प्रकृष्टज्ञानः उभयस्य उभयं दिवं च पृथिवीं च विद्वान् प्रकर्षेण जानन् सहस्रदानोभवत् किमनेन सहस्रदानइति विशेषणेन उत वा अपि वा सदानः सर्वदानसहितएवाभवत् । किं च वसिष्ठोयमेनकारणात्मना सर्वनियंत्रा ततं विस्तृतं परिधिं वस्त्रं परिधिरित्यनेन संसारप्रवाहोविवक्षितः तं वयिष्यन् अप्सरसः उर्वश्याः परीतिपंचम्यर्थानुवादः जज्ञे जातः ॥ १२ ॥

अथ त्रयोदशी–

सत्रेहजातविषितानमोभिःकुम्भेरेतःसिषिचतुःसमानम् ।
ततोहमानउदियायमध्यात्ततोजातमृषिमाहुर्वसिष्ठम् ॥ १३ ॥

सत्रे । ह । जातौ । इषिता । नमःऽभिः । कुम्भे । रेतः ।
सिसिचतुः । समानम् । ततः । ह । मानः । उत् । इयाय ।
मध्यात् । ततः । जातम् । ऋषिम् । आहुः । वसिष्ठम् ॥ १३ ॥

सत्रे बहुकर्तृके यागे हेतिपूरणः जातौ दीक्षितौ मित्रावरुणौ इषिताध्येषितौ स्वयमन्यैर्जनैर्नमोभिः स्तुतिभिः कुंभेवासतीवरे कलशे समानमेकदेव रेतः सिषिचतुः असिंचतां ततोवासतीवरात् कुंभात् मध्यादगस्त्योमानः शमीप्रमाणउदियाय प्रादुर्बभूव ततएव कुंभाद्वसिष्ठमप्यृषिंजातमाहुः हेतिपूरणः ॥ १३ ॥

अथ चतुर्दशी–

उक्थभृतंसामभृतंबिभर्तिग्रावाणंबिभ्रत्प्रवदात्यग्रे ।
उपैनमाध्वंसुमनस्यमानाआवोगच्छातिप्रतृदोवसिष्ठः ॥ १४ ॥ २४ ॥

उक्थऽभृतम् । सामऽभृतम् । बिभर्ति । ग्रावाणम् । बिभ्रत् ।
प्र । वदाति । अग्रे । उप । एनम् । आध्वम् । सुऽमनस्यमानाः ।
आ । वः । गच्छाति । प्रऽतृदः । वसिष्ठः ॥ १४ ॥ २४ ॥

हे प्रतृदः प्रतृदइति तृत्सवएवाभिधीयन्ते नामान्तरेण वोयुष्मान् वसिष्ठआगच्छाति आ गच्छति एनं वसिष्ठं सुमनस्यमानाः सुमनसःसन्त उपाध्वं उपतिष्ठत आगतश्चासौवसिष्ठोयज्ञे

अग्ने पुरोहितोब्रह्माणन् उक्थभृतं शस्त्राणां संभक्तारं बिभर्ति सामभृतं उद्गातारं बिभर्ति ग्रावाणमभिपवणं बिभ्रत् बिभ्रतं अध्वर्युं च बिभर्ति प्रवदाति यज्ञे यत्प्रवदितव्यं प्रैषादिनिमित्ते कर्तव्यमस्ति तदपि वदतीति वृत्रसत्र प्रतीन्द्रोब्रवीति ॥ १४ ॥

॥ इति पंचमस्य तृतीये चतुर्विंशोवर्गः ॥ २४ ॥

॥ इति सप्तमे मंडले द्वितीयोनुवाकः ॥ २ ॥

तृतीयेनुवाके द्वाविंशतिसूक्तानि तत्रप्रशुक्रेति पंचविंशत्यृचं प्रथमं सूक्तं अत्रेयमनुक्रमणिका—प्रशुक्रा पंचाधिका वैश्वदेवं हायाएकविंशतिर्द्विपदा अब्जामहेरर्धर्चं उत्तरोहिर्बुध्न्यायेति। वसिष्ठऋषिः आद्याएकविंशतिर्द्विपदा विंशत्यक्षराविराजः द्वाविंशाद्याश्चतस्रस्त्रिष्टुभः विश्वेदेवा-देवता। व्यूळ्हेदशरात्रे चतुर्थेहनि वैश्वदेवशस्त्रे सूक्तं वैश्वदेवनिविद्धानं सत्रितंच—प्रशुक्रैत्विति वैश्वदेवमिति। षोडशिनि आधूर्ष्वस्माइति द्विपदाइति। महाव्रतेप्येषा द्विपदा तथैवपंचमारण्यकेसूत्रितं—आधूर्ष्वस्माइत्येका रुद्रदोह्य इति।

तत्र प्रथमा—

प्रशुक्रैतुदेवीमनीषाअस्मत्सुतष्टोरथोनवाजी ॥ १ ॥

प्र। शुक्रा। एतु। देवी। मनीषा। अस्मत्। सुऽतष्टः। रथः। न। वाजी ॥१॥

शुक्रा दीप्ता देवी सर्वेषां कामानां प्रदात्री मनीषा स्तुतिरस्मदस्मत्तोस्मिन्सूक्ते स्तोष्यमाणान् देवान् वाजी वेगवान् सुतष्टः सुसंस्कृतोरथोन रथइव प्रैतु गच्छतु ॥ १ ॥

अथ द्वितीया—

विदुःपृथिव्यादिवोजनित्रंशृण्वन्त्यापोअधक्षरन्तीः ॥ २ ॥

विदुः। पृथिव्याः। दिवः। जनित्रम्। शृण्वन्ति। आपः। अधः। क्षरन्तीः॥२॥

अस्यामृच्यापः स्तूयन्ते क्षरन्तीः क्षरन्त्यआपोदिवः पृथिव्याश्च उभयोरपिलोकयोरित्यर्थः जनित्रमुत्पत्तिं विदुर्जानन्ति अधापिच शृण्वन्ति स्तोत्राणीति शेषः ॥ २ ॥

अथ तृतीया—

आपश्चिदस्मैपिन्वन्तपृथ्वीर्वृत्रेषुशूरामंसन्तउग्राः ॥ ३ ॥

आपः। चित्। अस्मै। पिन्वन्त। पृथ्वीः।

वृत्रेषु। शूराः। मंसन्ते। उग्राः ॥ ३ ॥

इन्द्रोसिमिन्द्वचे स्तूयते पृथ्वीः पृथ्व्यः प्रथमाना आपश्चिदापोप्यस्माइन्द्राय पिन्वन्त प्यायन्ते वृत्रेषुग्रद्धेषु सत्सु गाउद्धूर्णास्तेजस्विनोवा शूरायोद्धारोपि मंसन्ते इममेवेन्द्रंस्तुवन्ति ॥ ३ ॥

अथ चतुर्थी–

आधूर्ष्वस्मैदधाताश्वानिन्द्रोनवज्रीहिरण्यबाहुः ॥ ४ ॥

आ । धूःऽसु । अस्मै । दधात । अश्वान् ।

इन्द्रः । न । वज्री । हिरण्यऽबाहुः ॥ ४ ॥

अस्मै पद्यर्थेचतुर्थी अस्येन्द्रस्यागमनायाश्वान् धूर्षु रथस्य आदधात इन्द्रोन नेतिचार्थे इन्द्रःवज्री वज्रवान् हिरण्यबाहुः हिरण्यहस्तश्च भवति। पोडशिनिशस्यमानत्वादस्याऐन्द्रत्वं गम्यते आधूर्ष्वस्माइत्यत्रास्माइत्यस्य पदस्यानुदात्तत्वं पूर्वस्यामिन्द्रस्य प्रकृतत्वात् अतएव पूर्वाप्यैन्द्रीति विज्ञायते पूर्वस्यामप्यृचि अस्माइत्यत्रानुदात्तत्वं अल्पीयोर्थतरमनुदात्तमिति ।तथाच यास्कः–अस्येतिचोदात्तं प्रथमादेशेनुदात्तमन्वादेशेतीव्रार्थतरमनुदात्तमल्पीयोर्थतरमनुदात्तमिति । अल्पीयस्त्वं चेदंशब्दप्रवृत्तिनिमित्तस्य संनिधानस्य दूरस्थत्वेनेत्यवगन्तव्यम् ॥ ४ ॥

अथ पंचमी–

अभिप्रस्थाताहेवयज्ञंयातेवपत्मन्त्मनाहिनोत ॥ ५ ॥

अभि । प्र । स्थात । अहाऽइव । यज्ञम् ।

याताऽइव । पत्मन् । त्मना । हिनोत ॥ ५ ॥

यज्ञस्तुतिरियं हे जनाः यज्ञमभिप्रस्थात अभिक्रमत अहेवेतिपूरणौ अपि च पत्मन् पत्मनि यज्ञमार्गे त्मना स्वयमेव यातेव गन्तेव हिनोत गच्छत । हिगताविविधातुः ॥ ५ ॥

अथ षष्ठी–

त्मनासमत्सुहिनोतयज्ञंदधातकेतुंजनायवीरम् ॥ ६ ॥

त्मना । समत्ऽसु । हिनोत । यज्ञम् ।

दधात । केतुम् । जनाय । वीरम् ॥ ६ ॥

उक्तस्यैवविवरणमत्र हे मदीयाजनाः समत्सु संग्रामेषु त्मना स्वयमेव हिनोत गच्छत अपिच केतुं प्रज्ञापकं वीरं पापानां वारयितारं नाशकमित्यर्थः यज्ञं जनाय लोकाय तद्रक्षार्थमित्यर्थः दधात विधत्त ॥ ६ ॥

---

१ नि० ४.२५. ।

अथ सप्तमी–

उदस्यशुष्मांद्भानुर्नार्तंबिभर्तिभारंपृथिवीनभूम ॥ ७ ॥

उत् । अस्य । शुष्मात् । भानुः । न । आर्त ।

बिभर्ति । भारम् । पृथिवी । न । भूम ॥ ७ ॥

अस्य यज्ञस्य शुष्माद्बलाद्भानुः सूर्यउदार्त उद्गच्छति भूम भूतानि पृथिवीन पृथिवीव भारं लोकस्यार्थं यज्ञोबिभर्ति चन पूरणः ॥ ७ ॥

अथाष्टमी–

ह्वयामिदेवाँअयातुरग्नेसाधन्नृतेनधियंदधामि ॥ ८ ॥

ह्वयामि । देवान् । अयातुः । अग्ने । साधन् ।

ऋतेन । धियम् । दधामि ॥ ८ ॥

अस्मिन्नृचे देवाः स्तूयन्ते–हे अग्ने अयातुरहिंसादिनियमयुक्तेन ऋतेन यज्ञेन साधन् कामान् साधयन् देवान् ह्वयामि अपि च धियं देवानां परिचरणात्मकं कर्म दधामि करोमीत्यर्थः॥८

अथ नवमी–

अभिवोदेवींधियंदधिध्वंप्रवोदेवत्रावाचंकृणुध्वम् ॥ ९ ॥

अभि । वः । देवीम् । धियम् । दधिध्वम् ।

प्र । वः । देवऽत्रा । वाचम् । कृणुध्वम् ॥ ९ ॥

हे जनावोयूयं अभि देवानुद्दिश्य देवीं दीप्तां धियं कर्म दधिध्वं विधत्त । अपि च वोयूयं देवत्रा देवेषु वाचं स्तुतिरूपां प्रकृणुध्वं प्रकर्षेण कुरुध्वं ॥ ९ ॥

अथ दशमी–

आचष्टआसांपाथोनदीनांवरुणउग्रःसहस्रचक्षाः ॥ १० ॥ २५॥

आ । चष्टे । आसाम् । पाथः । नदीनाम् ।

वरुणः । उग्रः । सहस्रऽचक्षाः ॥ १० ॥ २५ ॥

सहस्रचक्षाः बहुचक्षुः वरुणः आसां नदीनां पाथोजलमाचष्टेभिपश्यति कीदृशोवरुणः उग्रः उद्गूर्णओजस्वी वा ॥ १० ॥

॥ इति पंचमस्य तृतीये पंचविंशोवर्गः ॥ २५ ॥

अथैकादशी—

राजा॑राष्ट्रानां॒पेशो॑न॒दीना॒मनु॑त्तमस्मै॑क्ष॒त्रंवि॒श्वायु॑ ॥ ११ ॥

राजा॑ । रा॒ष्ट्राना॑म् । पेशः॑ । न॒दीना॑म् । अनु॑त्तम् ।

अ॒स्मै॒ । क्ष॒त्रम् । वि॒श्वऽआ॑यु ॥ ११ ॥

राष्ट्रानां राष्ट्राणां णत्वाभावश्छान्दसः ईश्वराणामपि वरुणोराजा ईश्वरोभवति नदीनां पेशोरूपं रूपकृदपि भवतीत्यर्थः अस्मै षष्ठ्यर्थेचतुर्थी अस्य वरुणस्य क्षत्रं बलं अनुत्तं अन्यैरबाधितं विश्वायु सर्वतोगन्तृ भवतीति ॥ ११ ॥

अथ द्वादशी—

अवि॑ष्टोअ॒स्मान्विश्वा॑सुवि॒क्ष्वद्युं॑कृणोत॒शंसं॑निनि॒त्सोः ॥ १२ ॥

अवि॑ष्टो॒ इति॑ । अ॒स्मान् । विश्वा॑सु । वि॒क्षु । अद्यु॑म् ।

कृ॒णो॒त॒ । शंस॑म् । नि॒नि॒त्सोः ॥ १२ ॥

अयं द्वचोदेवः हे देवाः अस्मान् विश्वासु सर्वासु विक्षु प्रजासु । अविष्ट उइति समुदितमविष्टोइति । अविष्ट रक्षत शंसं निनित्सोः निन्दितुमिच्छतः शत्रोः अद्युं अदीप्तिं कृणोत कुरुत च ॥ १२

अथ त्रयोदशी—

व्ये॑तुदि॒द्युद्द्वि॒षामशे॑वायु॒योत॒विष्व॒ग्रप॑स्त॒नूना॑म् ॥ १३ ॥

वि । ए॒तु॒ । दि॒द्युत् । द्वि॒षाम् । अशे॑वा । यु॒योत॑ ।

विष्व॑क् । रपः॑ । त॒नूना॑म् ॥ १३ ॥

द्विषां शत्रूणां दिद्युदायुधमशेवा असुखकरी विष्वक् सर्वतोव्येतु अपगच्छतु तनूनामंगानां रपः पापं हे देवाः युयोत अस्मत्तः पृथक्कुरुत ॥ १३ ॥

अथ चतुर्दशी—

अ॒र्वाङ्नो॑अ॒ग्निर्ह॒व्यान्नमो॑भिः॒प्रेष्ठो॑अ॒स्मा॑अधायि॒स्तोमः॑ ॥ १४ ॥

अ॒र्वाङ् । नः॒ । अ॒ग्निः । ह॒व्यऽअत् । नमः॑ऽभिः ।

प्रेष्ठः॑ । अ॒स्मै॒ । अ॒धा॒यि॒ । स्तोमः॑ ॥ १४ ॥

हव्याद् हव्यानामत्ताग्निः नमोभिरस्मदीयैर्नमस्कारैः प्रेष्ठः प्रियतमः सन् नोस्मान् अर्वाक् रक्षतु । अस्मैअग्नये स्तोमः स्तोत्रमधायि अस्माभिर्व्यधायि ॥ १४ ॥

अथ पंचदशी–

सजूर्देवेभिरपांनपातंसखायंकृध्वंशिवोनोअस्तु॥ १५ ॥

सऽजूः । देवेभिः । अपाम् । नपातम् । सखायम् ।

कृध्वम् । शिवः । नः । अस्तु ॥ १५ ॥

हे स्तोतः अपामुदकानां नपातं पुत्रमग्निं सजुः नपादित्यपत्यनामसु पाठात् देवेभिर्देवैः सजूः सह सखायं मित्रं स्तुतिभिः कृध्वं कुरुध्वं । सचापांनपात् नोस्माकं शिवः सुखकरोस्तुभवतु॥१५॥

अथ षोडशी–

अब्जामुक्थैरहिंगृणीषेबुध्नेनदीनांरजःसुषीदन्॥ १६ ॥

अप्ऽजाम् । उक्थैः । अहिम् । गृणीषे । बुध्ने ।

नदीनाम् । रजःऽसु । सीदन् ॥ १६ ॥

अहिं मेघानां हन्तारं नदीनामुदकानां बुध्ने स्थाने बुध्नमन्तरिक्षं बद्धाअस्मिन् धृताआप इतिव्युत्पत्तेः तस्मिन् रजःसु उदकेषु सीदन् सीदन्तं अब्जां अप्सुजातं इममग्निं उक्थैः स्तोत्रैः गृणीषे । तथाचयास्कः–बुध्नेनदीनां रजस्सु उदकेषु सीदन् बुध्नमन्तरिक्षं बद्धाअस्मिन्धृता आपइतीति[1] ॥ १६ ॥

अथ सप्तदशी–

मानोहिर्बुध्न्योरिषेधान्मायज्ञोअस्यस्रिधदृतायोः ॥ १७ ॥

मा । नः । अहिः । बुध्न्यः । रिषे । धात् । मा । यज्ञः ।

अस्य । स्रिधत् । ऋतऽयोः ॥ १७ ॥

अहिर्बुध्न्यः बुध्नेन्तरिक्षे भवोबुध्न्यः अहिश्चासौ बुध्न्यश्चेत्यहिर्बुध्न्योग्निः नोस्मान्रिषे हिंसकाय माधात् माददातु अस्य ऋतायोर्यज्ञकामस्य यजमानस्य यज्ञोमा च स्रिधत् नक्षीयेत यद्वा अस्याहिर्बुध्न्यस्य इममहिर्बुध्न्यमुद्दिश्य ऋतयोर्यज्ञकामस्य योयज्ञः सनक्षीयेतेत्यर्थः ॥ १७ ॥

अथाष्टादशी–

उतनएषुनृषुश्रवोधुःप्ररायेयन्तुशर्धन्तोअर्यः ॥ १८ ॥

उत । नः । एषु । नृषु । श्रवः । धुः । प्र । राये । यन्तु ।

शर्धन्तः । अर्यः ॥ १८ ॥

---

1 नि० १०, ४४ ।

अयं द्वचोर्दैवोमारुतोवा उतापिच नोस्मदीयेषु एषु नृषु पुरुषेषु अवोर्त्नं धुर्देवामरुतोवा धारयन्तु। राये धनार्थं शर्धन्तः उत्सहमानाः मीयमाणावा अर्यः अरयः मयन्तु मगच्छन्तु म्रियन्तामित्यर्थः ॥ १८ ॥

अथैकोनविंशी–

तपन्तिशत्रुंस्वर्१णभूमामहासेनासोअमेभिरेषाम्॥ १९ ॥

तपन्ति । शत्रुम् । स्वः । न । भूमं । महाऽसेनासः ।
अमेभिः । एषाम् ॥ १९ ॥

महासेनासोमहासेनाराजानः एषां मरुतां देवानां वा अमेभिर्बलैः भूमा भुवनानि स्वर्ण आदित्यइव शुकं स्वकीयं तपन्ति बाधन्ते महान्तोपि राजानः अमैर्बलैः शत्रून् बाधन्ते तानि बलानि देवानामेवेत्यर्थः॥ १९ ॥

अथ विंशी–

आयन्नःपत्नीर्गमन्त्यच्छात्वष्टासुपाणिर्दधातुवीरान्॥ २०॥२६॥

आ । यत् । नः । पत्नीः । गमन्ति । अच्छ । त्वष्टा ।
सुऽपाणिः । दधातु । वीरान् ॥ २० ॥ २६ ॥

अस्यां देवपत्न्यः त्वष्टाच देवता यदा पत्नीर्देवानां पत्न्योनोस्मानच्छाभ्यागमंति आगच्छन्ति तदा सुपाणिः शोभनहस्तः त्वष्टा देवोपीसिपर् पुत्रान् दधातु अस्मभ्यं ददातु ॥ २० ॥

॥ इति पंचमस्य तृतीये षड्विंशो वर्गः ॥ २६ ॥

अथैकविंशी–

प्रतिनःस्तोमन्त्वष्टाजुषेतस्यादस्मेअरमतिर्वसूयुः ॥ २१ ॥

प्रति । नः । स्तोमम् । त्वष्टा । जुषेत । स्यात् ।
अस्मे इति । अरमतिः । वसुऽयुः ॥ २१ ॥

नोस्माकं स्तोमं स्तोत्रं त्वष्टा प्रतिजुषेत प्रतिसेवेत । अपि च अरमतिः पर्याप्तबुद्धिः सर्वविषयव्यापिबुद्धिर्वा त्वष्टा अस्मे अस्मदर्थं वसूयुः धनकामः स्यात् भूयात् ॥ २१ ॥

अथ द्वाविंशी—

तानोरासन्रातिषाचोवसून्यारोदसीवरुणानीशृणोतु ।
वरूत्रीभिःसुशरणोनोअस्तुत्वष्टासुदत्रोविदधातुरायः ॥ २२ ॥

ता । नः । रासन् । रातिऽसाचः । वसूनि । आ ।
रोदसी इति । वरुणानी । शृणोतु ।
वरूत्रीभिः । सुऽशरणः । नः । अस्तु । त्वष्टा । सुऽदत्रः ।
वि । दधातु । रायः । २२ ॥

ता यान्यस्माकमभीष्टानि तानि वसूनि धनानि रातिषाचो दानसमवेता देवपत्न्योनोस्मभ्यं रासन् प्रयच्छन्तु । अपि च वरुणानी वरुणस्य पत्नी आशृणोत्वस्मदीयं स्तोत्रमभिशृणोतु । रोदसी द्यावापृथिव्यौ चाभिशृणुतां । सुदत्रः कल्याणदानः त्वष्टाच वरूत्रीभिरुपद्रवानांवारयित्रीभिर्देवपत्नीभिः सह नोस्मभ्यं सुशरणः सुशरणप्रदोस्तु रायोधनानिच विदधातु ॥ २२ ॥

अथ त्रयोविंशी—

तन्नोरायःपर्वतास्तन्नआपस्तद्रातिषाचओषधीरुतद्यौः ।
वनस्पतिभिःपृथिवीसजोषाउभेरोदसीपरिपासतोनः ॥ २३ ॥

तत् । नः । रायः । पर्वताः । तत् । नः । आपः । तत् । रातिऽसाचः ।
ओषधीः । उत । द्यौः । वनस्पतिऽभिः । पृथिवी । सऽजोषाः ।
उभे इति । रोदसी इति । परि । पासतः । नः ॥ २३ ॥

नोस्माकं तदित्यव्ययः ता रायोधनानि पर्वताः परिपान्तु नोस्माकं तत् ता रायः आपश्च परिपान्तु तद्रातिषाचोदानसहितादेवपत्न्यश्च परिपान्तु ओषधीरोषधयश्च तत्परिपान्तु उतापिच द्यौस्तत्परिपातु वनस्पतिभिः सजोषाः सहिता पृथिव्यन्तरिक्षं च तत्परिपातु आपः पृथिवीत्यन्तरिक्षनामसु पाठात् नोस्माकं तदुभेरोदसी द्यावापृथिव्यावपि परिपासतः परिरक्षतां ॥२३॥

अथ चतुर्विंशी—

अनुतदुर्वीरोदसीजिहातामनुद्युक्षोवरुणइन्द्रसखा।
अनुविश्वेमरुतोयेसहासोरायःस्यामधरुणंधियध्यै॥ २४ ॥

अनु। तत्। उर्वीइति। रोदसीइति। जिहाताम्। अनु। द्युक्षः।
वरुणः। इन्द्रऽसखा। अनु। विश्वे। मरुतः। ये।
सहासः। रायः। स्याम। धरुणम्। धियध्यै॥ २४ ॥

तद्वक्ष्यमाणमुर्वी विस्तीर्णे रोदसी द्यावापृथिव्यावनुजिहातां अनुगच्छताम् अनुमन्येतामित्यर्थः द्युक्षोदीप्तेर्निवासभूतः इन्द्रसखा इन्द्रसखः इन्द्रः सखा यस्येति बहुव्रीहिः वरुणश्च तदनुजिहातां द्विवचनान्तस्यैकवचनान्ततया विपरिणामः। येसहासः शत्रूणामभिभवितारस्ते मरुतोपि तदनुजिहतां अत्र बहुवचनान्ततया विपरिणामः। यदनुमन्तव्यं तदाह—धियध्यै धरणीयं धारयितुं रायोधनस्य धरुणं धाम स्थानं वयं स्याम भवेमेति ॥ २४ ॥

अथ पंचविंशी—

तन्नइन्द्रोवरुणोमित्रोअग्निरापओषधीर्वनिनोजुषन्त।
शर्मन्त्स्याममरुतामुपस्थेयूयंपातस्वस्तिभिःसदानः॥२५॥ २७॥

तत्। नः। इन्द्रः। वरुणः। मित्रः। अग्निः। आपः। ओषधीः।
वनिनः। जुषन्त। शर्मन्। स्याम। मरुताम्। उपऽस्थे।
यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ २५॥ २७॥

नोस्मभ्यं तदिदं स्तोत्रमिन्द्रोवरुणश्च मित्रश्चाग्निश्चापश्चौषधीरोषधयश्च वनिनोवृक्षाश्च जुषन्त जुषन्तां सेवन्तां। वयं च मरुतामुपस्थे उपस्थाने वर्तमानाः शर्मन् शर्मणि सुखे गृहे वा स्याम भवेम सिद्धमन्यत्॥ २५ ॥

॥ इति पंचमस्य तृतीये सप्तविंशोवर्गः ॥२७॥

शंनइन्द्राग्नीति पंचदशर्चं द्वितीयं सूक्तं अत्रेयमनुक्रमणिका—शंनः पंचोना शान्तिरिति। वसिष्ठऋषिः त्रिष्टुप्छन्दः वैश्वदेवंहेत्युक्तत्वादिदमपि वैश्वदेवं। महानाम्नीव्रते एतत्सूक्तंजप्यं तथाचसूत्रितं—भद्रंकर्णेभिःशृणुयामदेवाः शंनइन्द्राग्नीभवतामवोभिरिति एवमेतासु।

तत्र प्रथमा—

शंनइन्द्राग्नीभवतामवोभिःशंनइन्द्रावरुणारातहव्या ।
शमिन्द्रासोमासुवितायशंयोःशंनइन्द्रापूषणावाजसातौ॥ १ ॥

शम् । नः । इन्द्राग्नी इति । भवताम् । अवःऽभिः । शम् । नः ।
इन्द्रावरुणा । रातऽहव्या । शम् । इन्द्रासोमा । सुविताय । शम् ।
योः । शम् । नः । इन्द्रापूषणा । वाजऽसातौ ॥ १ ॥

नोस्माकमस्मभ्यं वा इन्द्राग्नी अवोभीरक्षणैः शंशांत्यै भवतां । राहतव्या रातहव्यौ यजमानैर्दत्तहविष्काविन्द्रावरुणेन्द्रावरुणावपि नोस्मभ्यं शंशांत्यै भवतां । इन्द्रासोमा इन्द्रासोमावपि नः शं शांत्यै सुविताय कल्याणाय च भवतां शं शांत्यै सुखाय च पुनरुक्तिरादरार्था अथवा शं शमनहेतुकं सुखं योः विषययोगनिमित्तं सुखमित्यपुनरुक्तिः । इन्द्रापूषणा इन्द्रापूषणावपि वाजसातौ युद्धे अन्नलाभे निमित्ते वा नः शं शांत्यै भवतामित्यर्थः ॥ १॥

अथ द्वितीया—

शंनोभगःशमुनःशंसोअस्तुशंनःपुरंधिःशमुसन्तुरायः ।
शंनःसत्यस्यसुयमस्यशंसःशंनोअर्यमापुरुजातोअस्तु॥ २ ॥

शम् । नः । भगः । शम् । ऊँ इति । नः । शंसः । अस्तु ।
शम् । नः । पुरम्ऽधिः । शम् । ऊँ इति । सन्तु । रायः । शम् । नः ।
सत्यस्य । सुऽयमस्य । शंसः। शम् । नः । अर्यमा । पुरुऽजातः । अस्तु ॥२॥

नोस्माकं शं शांत्यै भगोदेवोस्तु भवतु नोस्माकं शमु शांत्यै एव शंसोनराशंसोस्तु भवतु नोस्माकं शं शांत्यै पुरंधिर्बहुधीरप्यस्तु रायोधनान्यपिशमु शांत्यै एव सन्तु नोस्माकं सुयमस्य शोभनयमयुक्तस्य सत्यस्य शंसोवचनमपि शमस्तु नोस्माकं शं शांत्यै पुरुजातोबहुप्रादुर्भावोर्यमादेवोप्यस्तु ॥ २॥

अथ तृतीया—

शंनोधाताशमुधर्तानोअस्तुशंनउरूचीभवतुस्वधाभिः ।
शंरोदसीबृहतीशंनोअद्रिःशंनोदेवानांसुहवानिसन्तु॥ ३ ॥

शम्। नः। धाता। शम्। ॐ इति। धर्ता। नः। अस्तु। शम्। नः। उरूची। भवतु। स्वधाभिः। शम्। रोदसी इति। बृहती इति। शम्। नः। अद्रिः। शम्। नः। देवानाम्। सुऽहवानि। सन्तु ॥३॥

नोस्माकं शं शांत्यै धातादेवोस्तु नोस्माकं शमु शांत्यै एव विधर्ता पुण्यपापानां विधारयिता वरुणोदेवोप्यस्तु नोस्माकं शं शांत्यै उरूचीविस्तीर्णगमनापृथिव्यपि स्वधाभिरन्नैः सहास्तु बृहतीमहत्यौ रोदसी द्यावापृथिव्यावपि शं भवतां अद्रिः पर्वतोपि नोस्माकं शं शांत्यै भवतु। शं शांत्यै नोस्माकंदेवानांसुहवानि सुष्टुतयःसन्तु भवन्तु ॥ ३ ॥

अथ चतुर्थी—

शंनोअग्निर्ज्योतिरनीकोअस्तुशंनोमित्रावरुणावश्विनाशम्।
शंनःसुकृतांसुकृतानिसन्तुशंनइषिरोअभिवातुवातः ॥ ४ ॥

शम्। नः। अग्निः। ज्योतिःऽअनीकः। अस्तु। शम्। नः। मित्रावरुणौ। अश्विना। शम्। शम्। नः। सुऽकृताम्। सुऽकृतानि। सन्तु। शम्। नः। इषिरः। अभि। वातु। वातः ॥ ४ ॥

ज्योतिरनीकोज्योतिर्मुखोग्निः नोस्माकं शं शांत्यै अस्तु भवतु मित्रावरुणा मित्रावरुणावपि नोस्माकं शं शांत्यै भवतां अश्विना अश्विनावपि शं भवतां सुकृतां पुण्यकर्मणां पुरुषाणां सुकृतानि पुण्यकर्माणि अपि नोस्माकं शं शांत्यै सन्तु भवंतु। इषिरोगमनशीलोपि वातोवायुरपि नोस्माकं शं शांत्यै अभिवातु ॥ ४ ॥

अथ पञ्चमी—

शंनोद्यावापृथिवीपूर्वहूतौशमन्तरिक्षंदृशयेनोअस्तु।
शंनओषधीर्वनिनोभवन्तुशंनोरजसस्पतिरस्तुजिष्णुः ॥५॥२८॥

शम्। नः। द्यावापृथिवीऽइति। पूर्वऽहूतौ। शम्। अन्तरिक्षम्। दृशये। नः। अस्तु। शम्। नः। ओषधीः। वनिनः। भवन्तु। शम्। नः। रजसः। पतिः। अस्तु। जिष्णुः ॥ ५ ॥ २८ ॥

नोस्माकं शं शांत्यै द्यावापृथिवी द्यावापृथिव्यौ पूर्वहूतौ प्रथमाह्वाने भवतां अन्तरिक्षमपि नोस्माकं दृशये दर्शनाय शमस्तु नोस्माकं शंशांत्यै ओषधीरोषधयोपि भवन्तु वनिनोवृक्षाश्च शं भवन्तु जिष्णुः जयशीलो रजसोलोकस्य पतिरिन्द्रोपि नोस्माकं शं शांत्यै अस्तु ॥ ५ ॥

॥ इति पंचमस्य तृतीयेष्टाविंशोवर्गः ॥ २८ ॥

अथ षष्ठी—

शंनइन्द्रोवसुभिर्देवोअस्तुशमादित्येभिर्वरुणःसुशंसः ।
शंनोरुद्रोरुद्रेभिर्जलाषःशंनस्त्वष्टाग्नाभिरिहशृणोतु॥ ६ ॥

शम् । नः । इन्द्रः । वसुऽभिः । देवः । अस्तु । शम् । आदित्येभिः । वरुणः । सुऽशंसः । शम् । नः । रुद्रः । रुद्रेभिः । जलाषः । शम् । नः । त्वष्टा । ग्नाभिः । इह । शृणोतु ॥ ६ ॥

देवोद्योतनादिगुणयुक्तइन्द्रोवसुभिर्देवैः सार्धं नोस्माकं शंशांत्यै भवतु सुशंसः शोभनस्तुतिर्वरुणोदेवः आदित्येभिः आदित्यैर्देवैः सार्धं शं शांत्यै अस्तु भवतु जलाषः सुखरूपोरुद्रोदुःखद्रावकोदेवः रुद्रेभिः रुद्रैः सार्धं शं शांत्यै नोस्माकं भवतु इहयज्ञे त्वष्टादेवः ग्नाभिर्देवपत्नीभिः सार्धं नः शं शांत्यै भवतु इहयज्ञे नः स्तोत्रं शृणोतुच ॥ ६॥

अथ सप्तमी—

शंनःसोमोभवतुब्रह्मशंनःशंनोग्रावाणःशमुसन्तुयज्ञाः ।
शंनःस्वरूणांमितयोभवन्तुशंनःप्रस्व१ःशम्वस्तुवेदिः ॥ ७ ॥

शम् । नः । सोमः । भवतु । ब्रह्म । शम् । नः । शम् । नः । ग्रावाणः । शम् । ऊँ इति । सन्तु । यज्ञाः । शम् । नः । स्वरूणाम् । मितयः । भवन्तु । शम् । नः । प्रऽस्वः । शम् । ऊँ इति । अस्तु । वेदिः ॥ ७ ॥

नोस्माकं शं शांत्यै सोमोदेवतारूपः भवतु ब्रह्म स्तोत्रमपि नोस्माकं शं शांत्यै भवतु ग्रावाणोभिषवसाधनभूताः पाषाणाअपि नोस्माकं शं शांत्यै भवन्तु यज्ञाश्च नः शमु शांत्यै एव सन्तु स्वरूणां यूपानां मितयः उन्मानान्यपि नोस्माकं शं शांत्यै भवन्तु प्रस्वः ओषधयोपि नोस्माकं शं शांत्यै भवन्तु वेदिरपि नः शमु शांत्यै एवास्तु ॥ ७ ॥

अथाष्टमी–

शंनःसूर्यउरुचक्षाउदेतुशंनश्चतस्रःप्रदिशोभवन्तु ।
शंनःपर्वताध्रुवयोभवन्तुशंनःसिन्धवःशमुसन्त्वापः ॥ ८ ॥

शम् । नः । सूर्यः । उरुऽचक्षाः । उत् । एतु । शम् । नः । चतस्रः ।
प्रऽदिशः । भवन्तु । शम् । नः । पर्वताः । ध्रुवयः ।
भवन्तु । शम् । नः । सिन्धवः । शम् । ऊँ इति । सन्तु । आपः ॥ ८ ॥

नोस्माकं शं शांत्यै सूर्यउरुचक्षाः विस्तीर्णतेजाः सन् उदेतु उदयं प्राप्नोतु । चतस्रः प्रदिशो-महादिशोपि नोस्माकं शं शांत्यै भवन्तु नोस्माकं शं शांत्यै पर्वताध्रुवयो ध्रुवाभवन्तु नोस्माकं शं शांत्यै सिन्धवोनद्योपि भवन्तु आपश्च नः शमु शांत्यै एव सन्तु ॥ ८ ॥

अथ नवमी–

शंनोअदितिर्भवतुव्रतेभिःशंनोभवन्तुमरुतःस्वर्काः ।
शंनोविष्णुःशमुपूषानोअस्तुशंनोभवित्रंशम्वस्तुवायुः ॥ ९ ॥

शम् । नः । अदितिः । भवतु । व्रतेभिः । शम् । नः । भवन्तु । मरुतः ।
सुऽअर्काः । शम् । नः । विष्णुः । शम् । ऊँ इति । पूषा । नः अस्तु ।
शम् । नः । भवित्रम् । शम् । ऊँ इति । अस्तु । वायुः ॥ ९ ॥

अदितिर्देवी व्रतेभिर्व्रतैः कर्मभिः सार्धं नोस्माकं शं शांत्यै भवतु स्वर्काः शोभनस्तुतयो-मरुतोपि नोस्माकं शं शांत्यै सन्तु विष्णुः व्यापकः नोस्माकं शं शांत्यै अस्तु पूषादेवोपि नोस्माकं शमु शांत्यै एवास्तु भवित्रं भुवनमन्तरिक्षं उदकंवा नोस्माकं शं शांत्यै अस्तु वायुरपि नः शमु शांत्यै एवास्तु ॥ ९ ॥

अथ दशमी–

शंनोदेवःसविताञायमाणःशंनोभवन्तूपसोविभातीः ।
शंनःपर्जन्योभवतुप्रजाभ्यःशंनःक्षेत्रस्यपतिरस्तुशंभुः ॥१०॥२९॥

शम् । नः । देवः । सविता । त्रायमाणः । शम् । नः । भवन्तु ।
उषसः । विऽभातीः । शम् । नः । पर्जन्यः । भवतु । प्रऽजाभ्यः ।
शम् । नः । क्षेत्रस्य । पतिः । अस्तु । शम्ऽभुः ॥ १० ॥ २९ ॥

देवः क्रीडनादिगुणयुक्तः सविता त्रायमाणो रक्षन् नोस्माकं शं शांत्यै भवतु विभातीर्व्युच्छंत्यःउषसोपिनोस्माकंशं शांत्यै भवन्तु नोस्माकं प्रजाभ्यः पर्जन्योपि शं भवतु शंभुः सुखस्यभावयिता क्षेत्रस्य पतिर्नोस्माकं शं शांत्यै अस्तु ॥ १०॥

॥ इति पंचमस्य तृतीये एकोनत्रिंशोवर्गः ॥ २९॥

अथैकादशी–

शंनोदेवाविश्वदेवाभवन्तुशंसरस्वतीसहधीभिरस्तु ।
शमभिषाचःशमुरातिषाचःशंनोदिव्याःपार्थिवाःशंनोअप्याः ॥ ११ ॥

शम् । नः । देवाः । विश्वऽदेवाः । भवन्तु । शम् । सरस्वती । सह ।
धीभिः । अस्तु । शम् । अभिऽसाचः । शम् । ऊँ इति । रातिऽसाचः ।
शम् । नः । दिव्याः । पार्थिवाः । शम् । नः । अप्याः ॥ ११ ॥

विश्वदेवा बहुस्तोत्रकादेवाः नोस्माकं शं शांत्यै भवन्तु सरस्वतीच धीभिः स्तुतिभिः कर्मभिर्वा सह नोस्माकं शं शांत्यै अस्तु अभिषाचोयज्ञमभितः सेवमानाश्च नः शं शांत्यै भवन्तु रातिषाचो दानं सेवमानाअपि शमु शांत्यै एव भवन्तु दिव्यादिविभवाश्च नोस्माकं शं शांत्यै भवन्तु पार्थिवाः पृथिव्यां संभूताश्च नः शं भवन्तु अप्या अप्स्वंतरिक्षेभवाश्च आकाशं आपइत्यन्तरिक्षनामसु पाठात् नोस्माकं शं शांत्यै भवन्तु ॥ ११ ॥

अथ द्वादशी–

शंनःसत्यस्यपतयोभवन्तुशंनोअर्वन्तःशमुसन्तुगावः ।
शंनऋभवःसुकृतःसुहस्ताःशंनोभवन्तुपितरोहवेषु ॥ १२ ॥

शम् । नः । सत्यस्य । पतयः । भवन्तु । शम् । नः । अर्वन्तः । शम् ।
ऊँ इति । सन्तु । गावः । शम् । नः । ऋभवः । सुऽकृतः । सुऽहस्ताः ।
शम् । नः । भवन्तु । पितरः । हवेषु ॥ १२ ॥

सत्यस्य पतयः पालकाः सत्यशीलादेवानोस्माकं शं शांत्यै भवंतु अर्वन्तोश्वाश्चनोस्माकं शं शांत्यै भवन्तु गावोपि नः शं शांत्यै सन्तु भवन्तु सुकृतः सुकर्माणः सुहस्वाः शोभनहस्ताः ऋभवोपि नोस्माकं शं शांत्यै सन्तु हवेषु स्तोत्रेषु सत्सु पितरोपि नोस्माकं शं शांत्यै भवन्तु॥१२॥

अथ त्रयोदशी–

शंनोअजएकपाद्देवोअस्तुशंनोहिर्बुध्न्यः१ःशंसमुद्रः।
शंनोअपांनपात्पेरुरस्तुशंनःपृश्निर्भवतुदेवगोपा ॥ १३ ॥

शम्। नः। अजः। एकऽपात्। देवः। अस्तु। शम्। नः। अहिः। बुध्न्यः। शम्। समुद्रः। शम्। नः। अपाम्। नपात्। पेरुः। अस्तु। शम्। नः। पृश्निः। भवतु। देवऽगोपा॥ १३॥

अजएकपाद् अजएकपान्नामधेयो देवोनोस्माकं शं शांत्यै अस्तु अहिर्बुध्न्यश्च नोस्माकं शं शांत्यै अस्तु समुद्रोपि नः शं शांत्यै अस्तु पेरुः उपद्रवेभ्यः पारयिता अपांनपाद् अपांनपान्नामधेयोपि देवोनोस्माकं शं शांत्यै अस्तु देवगोपा देवागोपायितारो यस्यांसापृश्निर्मरुतां माता नोस्माकं शं शांत्यै भवतु॥ १३॥

अथ चतुर्दशी–

आदित्यारुद्रावसवोजुषन्तेदंब्रह्मक्रियमाणंनवीयः।
शृण्वन्तुनोदिव्याःपार्थिवासोगोजाताउतयेयज्ञियासः॥ १४॥

आदित्याः। रुद्राः। वसवः। जुषन्त। इदम्। ब्रह्म। क्रियमाणम्। नवीयः। शृण्वन्तु। नः। दिव्याः। पार्थिवासः। गोऽजाताः। उत। ये। यज्ञियासः॥ १४॥

नवीयोनवतरमस्माभिः क्रियमाणमिदं ब्रह्मस्तोत्रं आदित्यादिव्याः अदितिर्द्यौरितिश्रुतेः। रुद्राआन्तरिक्षाः वसवः पार्थिवाश्च जुषन्त जुषन्तां सेवन्तां अन्येच दिव्याःदिविभवाःपार्थिवासः पार्थिवाः गोजाताः गोः पृश्नेर्जाताः नाकः गौरिति साधारणनामसु पाठाद् उतापिच ये यज्ञियासोयज्ञार्हाः ते सर्वेपि नोस्माकं हवं शृण्वन्तु॥ १४॥

---

१ ऋ० सं० १.६.१६.।

अथ पंचदशी—

येदे॒वानां॑य॒ज्ञिया॑य॒ज्ञिया॑नां॒मनो॒र्यज॑त्रा॒अमृ॑तां॒ऋत॒ज्ञाः।
तेनो॑रासन्तामुरुगा॒यम॒द्ययू॒यंपा॑तस्व॒स्तिभि॒ःसदा॑नः ॥ १५ ॥३०॥

ये। दे॒वाना॑म्। य॒ज्ञियाः॑। य॒ज्ञिया॑नाम्। मनोः॑। यज॑त्राः।।
अमृ॑ताः। ऋ॒त॒ऽज्ञाः। ते। नः॒। रा॒स॒न्ता॒म्। उ॒रु॒ऽगा॒य॒म्। अ॒द्य।
यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। स॒दा॑। नः॒॥ १५॥ ३०॥

यज्ञियानां यजनीयानां देवानामपि यज्ञियायजनीया मनोः प्रजापतेश्च यजत्रायजनीया अमृता मरणरहिता ऋतज्ञाः सत्यज्ञा ये देवाः सन्ति ते सर्वे उरुगायं बहुकीर्तिं पुत्रमद्य नोस्मभ्यं रासंतां प्रयच्छन्तु प्रसिद्धएवोत्तमः पादः ॥ १५ ॥

॥ इति पंचमस्य तृतीये त्रिंशोवर्गः ॥ ३० ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके तृतीयोध्यायःसमाप्तः॥३॥

॥श्रीगणेशाय नमः॥

यस्य निःश्वसितंवेदा योवेदेभ्योखिलंजगत् । निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरम्॥१॥

अथ पंचमाष्टके चतुर्थोध्यायआरभ्यते तत्र षडनुवाकात्मकस्य वासिष्ठस्य सप्तममंडलस्य तृतीयेनुवाके द्वाविंशतिसूक्तानि तत्र प्रब्रह्मेतिनवर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं पूर्ववद्वैश्वदेवं अनुक्रान्तंच—प्रब्रह्मनवेति । विनियोगोलैंगिकः ।

तत्र प्रथमा—

अम् प्रब्रह्मैतुसदनादृतस्यविरश्मिभिःससृजेसूर्योगाः ।
विसानुनापृथिवीसस्रउर्वीपृथुप्रतीकमध्येधेअग्निः ॥ १ ॥

प्र । ब्रह्म । एतु । सदनात् । ऋतस्य । वि । रश्मिऽभिः ।
ससृजे । सूर्यः । गाः । वि । सानुना । पृथिवी । सस्रे ।
उर्वी । पृथु । प्रतीकम् । अधि । आ । ईधे । अग्निः ॥ १ ॥

ऋतस्य यज्ञस्य सदनात् स्थानात् देवयजनदेशात् ब्रह्म स्तोत्रं स्तुत्यान् सूर्यादीन् प्रैतु प्रकर्षेण गच्छतु । किं तत् ब्रह्मेति तदाह सूर्यः सर्वस्य प्रेरकः शोभनवीर्योवा देवः रश्मिभिरात्मीयैः किरणैः गाः अपोवृष्ट्युदकानि विससृजे विसृजति विमुंचति प्रवर्षति । श्रूयतेहि—याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्योवर्षतीति । स्मृतिश्चभवति—आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति । अतईदृशं माहात्म्यं सूर्यस्यैव विद्यते नान्यस्य चिदित्यनेन पादेन सूर्यः स्तूयते । अपिच पृथिवी प्रथिताभूमिः सानुना समुच्छ्रितेन पर्वतादिना उर्वी विस्तीर्णा सती विसस्रे विसरति व्याप्नोति तथा अग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवं देवयजनलक्षणं स्थानमधि अधिपरी अनर्थकाविति अधेः कर्मप्रवचनीयसंज्ञायां कर्मप्रवचनीययुक्तइतिसप्तम्यर्थे द्वितीया ईदृशे स्थाने आईधे आदीप्यते ॥ १ ॥

अथ द्वितीया–

इमांवांमित्रावरुणासुवृक्तिमिषंनकृण्वेअसुरानवीयः।
इनोवामन्यःपदवीरदब्धोजनंचमित्रोयतति ब्रुवाणः ॥ २ ॥

इमाम् । वाम् । मित्रावरुणा । सुऽवृक्तिम् । इषम् । न ।
कृण्वे । असुरा । नवीयः । इनः । वाम् । अन्यः । पदऽवीः ।
अदब्धः । जनम् । च । मित्रः । यतति । ब्रुवाणः ॥ २ ॥

हे असुरा असुरौ बलवन्तौ हे मित्रावरुणा मित्रावरुणौ वां युवाभ्यां इषं न हवीरूपमन्नमिव नवीयो नवीयसीं इमामस्मदीयां पुरोवर्तिनीं सुवृक्तिं स्तुतिं कृण्वे अहं स्तोता करोमि। युवयोरन्यः अन्यतरः इनः प्रभुः अदब्धः शत्रुभिरहिंसितोवरुणः पदवीः पदस्य स्थानस्य प्रजनयिता वरुणोहि धर्माधर्मयोर्धारयितेति पदवीरित्युच्यते। ब्रुवाणः अस्माभिः स्तूयमानो मित्रश्च जनं सर्वं प्राणिजातं यतति यातयति प्रवर्तयति। तथाच श्रूयते–मित्रोजनान्यातयति ब्रुवाणइति[1] ॥ २ ॥

अथ तृतीया–

आवातस्यध्रजतोरन्तइत्याअपीपयन्तधेनवोनसूदाः।
महोदिवःसदनेजायमानोचिक्रदद्वृषभःसस्मिन्नूधन् ॥ ३ ॥

आ । वातस्य । ध्रजतः । रन्ते । इत्याः । अपीपयन्त । धेनवः ।
न । सूदाः । महः । दिवः । सदने । जायमानः । अचिक्रदत् ।
वृषभः । सस्मिन् । ऊधन् ॥ ३ ॥

ध्रजतो गच्छतो वातस्य वायोः इत्याः गतयः आरन्ते अभितोरमन्ते तथा सूदाः सूदप्रेरणे इतिधातुः क्षीरस्य प्रेरयित्र्यः धेनवो न नेतिचार्थे गावश्च अपीपयन्त प्यायन्ते एधन्ते। अपि च महो महतः दिवो द्योतमानस्यादित्यस्य सदने स्थानेन्तरिक्षे जायमानः उत्पद्यमानः वृषभो वर्षणशीलः पर्जन्यः सस्मिन् ऊधन् सस्मिन्नन्तरिक्षे अचिक्रदत् ॥ ३ ॥

---

[1] ऋ० सं० ३. ४. ५.

अथ चतुर्थी—

गिराय॒एता॒युन॒ज॑द्धरी॑त॒इन्द्र॑प्रि॒यासु॒रथा॑शूर॒धा॒यू ।
प्रयोम॒न्युंरिरि॑क्षतो॒मि॒नात्यासु॒क्रतु॑मर्य॒मणं॑वव॒त्याम् ॥ ४ ॥

गि॒रा । यः । ए॒ता । यु॒नज॑त् । हरी॒ इति॑ । ते॒ । इन्द्र॑ ।
प्रि॒या । सु॒ऽरथा॑ । शू॒र॒ । धा॒यू इति॑ । प्र । यः । म॒न्युम् । रिरि॑क्षतः ।
मि॒नाति॑ । आ । सु॒ऽक्रतु॑म् । अ॒र्य॒मण॑म् । व॒व॒त्या॒म् ॥ ४ ॥

अस्याः पूर्वार्धर्च इन्द्रस्तुतिः । अपरोर्यम्णः स्तुतिः । हे शूर विक्रान्तेन्द्र तव प्रिया प्रियौ सुरथा सुष्ठुरंहणौ धायू धारकौ एता एतौ हरी त्वदीयावश्वौ योजनः गिरास्तुतिरूपयावाचा युनजत् रथे युंज्यात् हे इन्द्र त्वमस्य यागमायाहीति शेषः योर्यमा रिरिक्षतः हिंसितुमिच्छतः शत्रोः संबन्धिनं मन्युं कोपं प्रमिनाति प्रकर्षेण हिनस्ति सुक्रतुं शोभनकर्माणं अर्यमणं आववृत्यां स्तुत्या आवर्तयामि ॥ ४ ॥

अथ पंचमी—

यज॑न्तेअस्यस॒ख्यंवय॑श्चनम॒स्विनः॒स्वऋ॒तस्य॒धाम॑न् ।
विपृक्षो॑बाबधे॒नृभि॒स्तवा॑नइ॒दंनमो॑रु॒द्राय॒प्रेष्ठ॑म् ॥ ५ ॥ १ ॥

यज॑न्ते । अ॒स्य॒ । स॒ख्यम् । वयः॑ । च॒ । न॒म॒स्विनः॑ । स्वे ।
ऋ॒तस्य॑ । धाम॑न् । वि । पृक्षः॑ । बा॒ब॒धे॒ । नृऽभिः॑ ।
स्तवा॑नः । इ॒दम् । नमः॑ । रु॒द्राय॑ । प्रेष्ठ॑म् ॥ ५ ॥ १ ॥

अनया रुद्रः स्तूयते नमस्विनः हविर्लक्षणान्नवन्तः स्वे स्वकीये ऋतस्य यज्ञस्य धामन् धामनि स्थाने स्वकीययज्ञगृहे स्थिताइत्यर्थः वयश्च गन्तारः कर्माणि कुर्वाणाः यजमानाः अस्य रुद्रस्य सख्यं सखित्वमुद्दिश्य यजन्ते पूजयन्तु नृभिः नेतृभिः स्तवानः स्तूयमानोरुद्रः पृक्षोन्नं स्तोतृषु विबाबधे विदधाति ददातीत्यर्थः प्रेष्ठं रुद्रस्य प्रियतमं इदं नमस्तस्मै रुद्राय मया क्रियते ॥ ५ ॥

॥ इतिपञ्चमस्यचतुर्थेप्रथमोवर्गः ॥ १ ॥

आवोवाहिष्ठइत्यष्टर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं अनुक्रम्यतेच—आवोष्टाविति । विनियोगोलैंगिकः ।

तत्र प्रथमा—

आवोवाहिष्ठोवहतुस्तवध्यैरथोवाजाऋभुक्षणोअमृक्तः ।
अभित्रिपृष्ठैःसवनेषुसोमैर्मदेसुशिप्रामहभिःपृणध्वम् ॥ १ ॥

आ । वः । वाहिष्ठः । वहतु । स्तवध्यै । रथः । वाजाः ।
ऋभुक्षणः । अमृक्तः । अभि । त्रिऽपृष्ठैः । सवनेषु ।
सोमैः । मदे । सुऽशिप्राः । महऽभिः । पृणध्वम् ॥ १ ॥

अनेन द्वचेन ऋभवः स्तूयन्ते ऋभुक्षणः विस्तीर्णस्य तेजसोनिवासभूता हे वाजाः ऋभवः वाहिष्ठोवोढृतमः स्तवध्यै स्तोतुमर्हं अमृक्तः केनाप्यहिंसितः युष्मदीयोरथः वो युष्मान् आवहतु आसमन्तात् अस्मदीयं यज्ञं प्रापयतु हेसुशिप्राः शोभनहनवः यूयं तेन रथेनागत्य सवनेष्वस्मदीययज्ञेषु मदे मदनिमित्तं त्रिपृष्ठैः क्षीरदधिसक्तुमिश्रैः महभिर्महद्भिः सोमैः अभिपृणध्वं युष्मदीयं जठरमभिपूरयत सरथः युष्मानावहत्विति पूर्वेणान्वयः ॥ १ ॥

अथ द्वितीया—

यूयंहरत्नंमघवत्सुधत्थस्वर्दृशऋभुक्षणोअमृक्तम् ।
संयज्ञेषुस्वधावन्तःपिबध्वंविनोराधांसिमतिभिर्दयध्वम् ॥ २ ॥

यूयम् । ह । रत्नम् । मघवत्ऽसु । धत्थ । स्वःऽदृशः । ऋभुक्षणः ।
अमृक्तम् । सम् । यज्ञेषु । स्वधाऽवन्तः । पिबध्वम् ।
वि । नः । राधांसि । मतिऽभिः । दयध्वम् ॥ २ ॥

हे ऋभुक्षणः हे ऋभवः स्वर्दृशः स्वर्गं पश्यन्तोयूयं ह यूयमेव मघवत्सु हविर्लक्षणान्नवत्सु अस्मासु निमित्तेषु अमृक्तं अहिंसितं चोरादिभिर्नापहृतमित्यर्थः रत्नं रमणीयं धत्थ धारयथ तदनन्तरं स्वधावन्तोबलवन्तस्ते यूयं यज्ञेषु अस्मदीययज्ञेषु संपिबध्वं सम्यक् सोमंपिबत अपिच यूयं मतिभिर्धनहेतुभिः नोस्मभ्यं राधांसि धनानि विदयध्वं विशेषेणदत्त ॥ २ ॥

अथ तृतीया—

उवोचिथहिमघवन्देष्णंमहोअर्भस्यवसुनोविभागे ।
उभातेंपूर्णावसुनागभस्तीनसूनृतानियमतेवसव्या ॥ ३ ॥

उवोचिथ । हि । मघऽवन् । देष्णम् । महः । अर्भस्य । वसुनः ।
विऽभागे । उभा । ते । पूर्णा । वसुना । गभस्ती इति ।
न । सूनृता । नि । यमते । वसव्या ॥ ३ ॥

उवोचिथेत्याद्याः पंचचंइन्द्रदेवताकाः हे मघवन् धनवन्निन्द्र त्वं महोमहतः अर्भस्याल्पस्यंच वसुनोधनस्य विभागे परिचरणानुकूलेदाननिमित्ते देष्णं धनं उवोचिथहि सेवसेखलु उचतिःसेवाकर्मा तथा ते त्वदीयौ उभा उभौ गभस्ती बाहू वसुना धनेन पूर्णा पूर्णौ भवतः ते त्वदीयासूनृतावाक् वसव्या वसूनि धनानि ननियमते ननियच्छति यद्वा वसव्या वसुषु धनेषु साधुः सूनृतावाक् धनेन संपूर्णौ त्वदीयौ बाहू ननियच्छति नाल्पंप्रदापयतीत्यर्थः ॥ ३ ॥

अथ चतुर्थी—

त्वमिन्द्रस्वयंशाऋभुक्षावाजोनसाधुरस्तमेष्यृक्वा ।
वयंनुतेदाश्वांसःस्यामब्रह्मकृण्वन्तोहरिवोवसिष्ठाः ॥ ४ ॥

त्वम् । इन्द्र । स्वऽयंशाः । ऋभुक्षाः । वाजः । न ।
साधुः । अस्तम् । एषि । ऋक्वा । वयम् । नु । ते । दाश्वांसः ।
स्याम । ब्रह्म । कृण्वन्तः । हरिऽवः । वसिष्ठाः ॥ ४ ॥

हे इन्द्र स्वयशाः असाधारणकीर्तिः ऋभुक्षाः ऋभुनिवासकः ऋभूणामीश्वरोवा त्वं साधुः साधकः वाजोन अन्नमिव ऋक्वा ऋक्वणः स्तोतुः मम अस्तं गृहं एषि मामुहि नु अद्य वयं वसिष्ठाः एतत्संज्ञकाऋषयो हे हरिवः स्वकीयाश्वोपेतेन्द्र ते त्वदर्थं दाश्वांसः हविर्लक्षणान्नं दत्तवन्तः ब्रह्म स्तोत्रं कृण्वन्तः कुर्वन्तःसन्तः स्याम भवेम ॥ ४ ॥

अथ पंचमी–

सनितासिप्रवतोदाशुषेचिद्याभिर्विवेषोहर्यश्वधीभिः ।
ववन्मानुतेयुज्याभिरूतीकदानइन्द्ररायआदशस्येः ॥ ५ ॥ ३ ॥

सनिता । असि । प्रऽवतः । दाशुषे । चित् । याभिः ।
विवेषः । हरिऽअश्व । धीभिः । ववन्म । नु । ते । युज्याभिः ।
ऊती । कदा । नः । इन्द्र । रायः । आ । दशस्येः ॥५॥ ३ ॥

हे हर्यश्व हरिनामकाश्वेन्द्र त्वं याभिर्धीभिः अस्मदीयाभिः स्तुतिभिः विवेषव्याप्नोषि सत्वं दाशुषेचित् हविर्दत्तवते यजमानायापि प्रवतः प्रवणस्य धनस्यसनितासि दाताभवसि अपिच हेइन्द्र त्वं नोस्मभ्यं कदा कस्मिन्काले रायो धनानि आदशस्येः प्रयच्छेः नु अद्य ते तव युज्याभिः योग्याभिः ऊती ऊतिभीरक्षाभिः ववन्म त्वां संभजेम ॥ ५ ॥

॥ इति पंचमस्य चतुर्थे तृतीयोवर्गः ॥ ३ ॥

अथ षष्ठी–

वासयसीववेधसस्त्वंनःकदानइन्द्रवचसोवुबोधः ।
अस्तंतात्याधियारयिंसुवीरंपृक्षोनोअर्वान्युहीतवाजी ॥ ६ ॥

वासयसिऽइव । वेधसः । त्वम् । नः । कदा । नः । इन्द्र ।
वचसः । बुबोधः । अस्तम् । तात्या । धिया । रयिम् ।
सुऽवीरम् । पृक्षः । नः । अर्वा । नि । उहीत । वाजी॥ ६ ॥

हे इन्द्र त्वं कदा कस्मिन्काले नोस्मदीयं वचसः वचोरूपं स्तोत्रं बुबोधः अवगच्छेः तथा सत्वं वेधसः स्तोतॄन् नः अस्मान् वासयसीव इवेदानीमर्थे इदानीं स्वकीयस्थाने अवस्थापयसि किंच वाजी बलवान् अर्वा वेगवान् त्वदीयोश्वः तात्या तनोतेरिदंरूपं संततया धिया अस्मत्प्रेरितया स्तुत्या हेतुभूतया सुवीरं शोभनपुत्रोपेतं रयिं त्वदीयं धनं पृक्षोन्नंच नोस्मदीयं अस्तं गृहं न्युहीत निवहेत् ॥ ६ ॥

अथ सप्तमी–

अ॒भि यं दे॒वी निर्ऋ॑तिश्चि॒दीशे॒ नक्ष॑न्त॒ इन्द्रं॑ श॒रदः॑ सु॒पृक्षः॑ ।
उप॑ त्रि॒ब॒न्धुर्ज॒रद॑ष्टिमे॒त्यस्व॑वेशं॒ यं कृ॒णव॑न्त॒ मर्ताः॑ ॥ ७ ॥

अ॒भि । यम् । दे॒वी । निःऽऋ॑तिः । चि॒त् । ईशे॑ । नक्ष॑न्ते ।
इन्द्र॑म् । श॒रदः॑ । सु॒ऽपृक्षः॑ । उप॑ । त्रि॒ऽब॒न्धुः । ज॒रत्ऽअ॑ष्टिम् ।
ए॒ति॒ । अस्व॑ऽवेशम् । यम् । कृ॒णव॑न्त । मर्ताः॑ ॥ ७ ॥

देवी द्योतमाना निर्ऋतिश्चिव भूमिरपि ईशे कृत्यार्थे केनप्रत्ययः ईशितव्या स्वभूतासती यमिन्द्रं अभिनक्षते व्याप्नोति सुपृक्षः शोभनान्नैरुपेताः शरदः संवत्सराश्च यमिन्द्रं नक्षन्ते व्याप्नुवन्ति मर्ताः मरणधर्माणः स्तोतारोवयंयमिन्द्रं अस्ववेशं स्वकीयेस्थाने अनुपविशन्तं कृ- णवन्त कुर्वंति त्रिबन्धुःत्रयाणां लोकानां बन्धकोविधारकः सइन्द्रः जरदष्टिं जरज्जीर्णमष्टिरशनं यस्यबलस्य हेतुभूतं तद्बलं उपैति उपगच्छति ॥ ७ ॥

अथाष्टमी–

आ नो॒ राधां॑सि सवितः स्त॒वध्या॒ आ रायो॑ यन्तु॒ पर्व॑तस्य रा॒तौ ।
सदा॑ नो दि॒व्यः पा॒युः सि॑षक्तु यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ८ ॥ ४ ॥

आ । नः॒ । राधां॑सि । स॒वि॒त॒रिति॑ । स्त॒वध्यै॑ । आ । रायः॑ ।
य॒न्तु॒ । पर्व॑तस्य । रा॒तौ । सदा॑ । नः॒ । दि॒व्यः । पा॒युः ।
सि॒स॒क्तु॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ८ ॥ ४ ॥

हे सवितः सर्वस्यप्रेरक देव त्वत् सकाशात् स्तवध्यै स्तोतुं योग्यानि राधांसि धनानि नोस्मान् आयन्तु आगच्छन्तु पर्वतस्य पर्वतइति कश्चिदिन्द्रस्य सखा एतत्संज्ञकस्य देवस्य रा- तौ दानेसति रायो धनानि अस्मानायन्तु पायुः सर्वस्य पालकोदिव्योदिविभवः सइन्द्रः सदा सर्वदा नोस्मान् सिषक्तु रक्षकत्वेनसेवतां अस्मिन् सूक्ते येप्रतिपादितादेवाः तेसर्वे यूयं नोस्मा- न् स्वस्तिभिः कल्याणैः सदा पात पालयत ॥ ८ ॥

॥ इति पंचमस्य चतुर्थे चतुर्थोवर्गः ॥ ४ ॥

उदुष्यदेवइत्यष्टर्चं पंचमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सवितृदेवताकं सप्तम्यष्टम्यौ वाजिदेवताके भगप्रणेतवसइत्यर्धर्चो भगदेवत्यः सावित्रोवा यथाचानुक्रमणिका—उदुष्यसावित्रमंत्येवाजिन्यौभगमितिभागोवार्धर्चइति । गतः सूक्तविनियोगः ।

तत्र प्रथमा—

उदुष्यदेवःसविताययामहिरण्ययीममतिंयामशिश्रेत् ।
नूनंभगोहव्योमानुषेभिर्वियोरत्नापुरुवसुर्दधाति ॥ १ ॥

उत् । ऊँ इति । स्यः । देवः । सविता । ययाम । हिरण्ययीम् ।
अमतिम् । याम् । अशिश्रेत् । नूनम् । भगः । हव्यः । मानुषेभिः ।
वि । यः । रत्ना । पुरुऽवसुः । दधाति ॥ १ ॥

सविता सर्वस्यप्रेरकः स्यः सदेवः हिरण्ययीं सुवर्णमयीं यां अमतिं रूपनामैतत् रूपं प्रभामित्यर्थः अशिश्रेत् आश्रयति याममतिं उदयाम उद्यच्छति उद्गमयति उइतिपदपूरणः नूनमद्य भगोभजनीयोयः सविता मानुषेभिः मनुष्यैः स्तोतृभिः हव्योह्वनीयः स्तोतव्योभवति पुरुवसुः बहुधनोयोदेवः स्तोतृभ्योरत्ना रत्नानि रमणीयानि धनानि विदधाति करोति ससविता देवः याममतिं उदयामेति पूर्वेणसंबंधः ॥ १ ॥

अथ द्वितीया—

उदुंतिष्ठसवितःश्रुध्य१स्यहिरण्यपाणेप्रभृंतावृतस्यं ।
व्यु१र्वीपृथ्वीममतिंसृजानआनृभ्योमर्तभोजनंसुवानः ॥ २ ॥

उत् । ऊँ इति । तिष्ठ । सवितः । श्रुधि । अस्य । हिरण्यऽपाणे ।
प्रऽभृंतौ । ऋतस्यं । वि । उर्वीम् । पृथ्वीम् । अमतिम् ।
सृजानः । आ । नृऽभ्यः । मर्तऽभोजनम् । सुवानः ॥ २ ॥

हे सवितः सर्वस्य प्रेरयितर्देव त्वं उत्तिष्ठ ऊर्ध्वंगच्छ ततः हिरण्यपाणे हेसुवर्णहस्त त्वं अस्मदीप्सितप्रदानाय ऋतस्य यज्ञस्य प्रभृतौ प्रणयने अस्य अस्मदीयमिदं स्तोत्रं श्रुधि शृणु उइतिपूरणः कीदृशस्त्वं उर्वीं विस्तीर्णां पृथ्वीं प्रथितां अमतिं रूपं प्रभां विसृजानोविसृजन् नृभ्योनेतृभ्यः स्तोतृभ्यः मर्तभोजनं मनुष्याणां भोगयोग्यं धनं आसुवानः प्रेरयन् एवंभूतस्त्वं इदं स्तोत्रं शृण्विति संबन्धः ॥ २ ॥

अथ तृतीया–

अपिष्टुतःसवितादेवोअस्तुयमाचिद्विश्वेवसवोगृणन्ति ।
सनःस्तोमान्नमस्यश्चनोधाद्विश्वेभिःपातुपायुभिर्निसूरीन् ॥३॥

अपि । स्तुतः । सविता । देवः । अस्तु । यम् । आ । चित् ।
विश्वे । वसवः । गृणन्ति । सः । नः । स्तोमान् । नमस्यः । चनः ।
धात् । विश्वेभिः । पातु । पायुऽभिः । नि । सूरीन् ॥ ३ ॥

अपिच सवितादेवः अस्माभिः स्तुतोस्तु अस्मदीयाः स्तुतीः शृणोत्वित्यर्थः विश्वे व-सवश्चित् सर्वेदेवा अपि यंसवितारं आगृणन्ति अभिष्टुवन्ति नमस्यः सर्वैर्नमस्करणीयः सदे-वः स्तोमान् नोस्मदीयानि स्तोत्राणिच नः अन्नं धात् दधातु अन्नफलानिकरोतु विश्वेभिर्वि-श्वैः सर्वैः पायुभिः पालनैः सूरीन् स्तोतॄन् अस्मान् निपातु नितरां पालयतु ॥ ३ ॥

अथ चतुर्थी–

अभियंदेव्यदितिर्गृणातिसवंदेवस्यसवितुर्जुषाणा ।
अभिसम्राजोवरुणोगृणन्त्यभिमित्रासोअर्यमासजोषाः ॥ ४ ॥

अभि । यम् । देवी । अदितिः । गृणाति । सवम् । देवस्य ।
सवितुः । जुषाणा । अभि । सम्ऽराजः । वरुणः । गृणन्ति ।
अभि । मित्रासः । अर्यमा । सऽजोषाः ॥ ४ ॥

देवी द्योतमाना अदितिरदीना देवमातायंसवितारं अभिगृणाति अभिष्टौति कीदृशी सवितुर्देवस्यैव सवं प्रसवमनुज्ञां जुषाणा सेवमाना सम्राजः सम्यग्राजमानाः वरुणः उपलक्ष-णमेतत् वरुणादयोदेवाः यंसवितारमभिगृणन्ति अभिष्टुवन्ति मित्रासोमित्रादयश्च सजोषाः समानप्रीतिः अर्यमा एतत्संज्ञकोदेवश्च यमभिगृणन्ति सनः स्तोमांश्चनोधादिति पूर्वयर्चासं-बन्धः ॥ ४ ॥

अथ पञ्चमी–

अभियेमिथोवनुषःसपन्तेरातिंदिवोरातिषाचःपृथिव्याः ।
अहिर्बुध्न्यउतनःशृणोतुवरूत्र्येकधेनुभिर्निपातु ॥ ५ ॥

अभि । ये । मिथः । वनुषः । सपन्ते । रातिम् । दिवः ।
रातिऽसाचः । पृथिव्याः । अहिः । बुध्न्यः । उत । नः ।
शृणोतु । वरूत्री । एकधेनुऽभिः । नि । पातु ॥ ५ ॥

रातिषाचोदानसेविनः वनुषः संभक्तारः ये यजमानाः मिथः परस्परं संहताभूत्वा सवितारं अभिलक्ष्य सपन्ते परिचरन्ति कीदृशं दिवोद्युलोकस्य पृथिव्याभूमेश्च रातिं मित्रभूतं उतापिच अहिर्बुध्न्यः बुध्नेन्तरिक्षेभवोबुध्न्यः एतीत्यहिः एवत्पदद्वयाभिधेयमध्यमस्थानोग्निः अहिर्बुध्न्यइत्युच्यते सवितुर्मित्रभूतः सोपि तेषां नोस्माकं सवितृविषयं स्तोत्रं शृणोतु तथा वरूत्रीवाग्देवी च सवितृसहितासती एकधेनुभिर्मुख्याभिर्गोभिः निपातु नितरामस्मान् पालयतु ॥ ५ ॥

अथ षष्ठी—

अनुतन्नोजास्पतिर्मंसीष्टरत्नंदेवस्यसवितुरियानः ।
भगमुग्रोवसेजोहवीतिभगमनुग्रोअधयातिरत्नम् ॥ ६ ॥

अनु । तत् । नः । जाःपतिः । मंसीष्ट । रत्नम् । देवस्य । सवितुः ।
इयानः । भगम् । उग्रः । अवसे । जोहवीति । भगम् । अनुग्रः ।
अध । याति । रत्नम् ॥ ६ ॥

इयानः अस्माभिर्याच्यमानः जास्पतिः प्रजानां पालकः सवितादेवः सवितुर्देवस्य स्वस्य संबंधिरत्नं रमणीयं तत् प्रसिद्धं धनं नोस्माकं अनुमंसीष्ट अनुमन्यतां उग्रओजस्वी स्तोता भगं भजनीयं सवितारं भगसंज्ञकं देवं वा अवसे नोस्माकं रक्षणाय जोहवीति भृशं ह्वयति अधापिच अनुग्रः असमर्थः स्तोता भगमेतत्संज्ञकं सवितारंवा रत्नं रमणीयं तत्प्रसिद्धं धनं याति याचते ॥ ६ ॥

वैश्वदेवपर्वणि वाजिनस्य हविषः शंनोभवंत्वित्यादिके द्वेयाज्यानुवाक्ये सूत्रितंच—शंनोभवन्तुवाजिनोहवेषु वाजेवाजेवतवाजिनोनइत्युभेश्चतुरवानं याज्यामिति ।

सैषा सप्तमी—

शंनोभवन्तुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः ।
जम्भयन्तोहिंवृकंरक्षांसिसनेम्यस्मद्युयवन्नमीवाः ॥ ७ ॥

शम् । नः । भवन्तु । वाजिनः । हवेषु । देवऽताता । मितऽद्रवः ।
सुऽअर्काः । जम्भयन्तः । अहिम् । वृकम् । रक्षांसि । सनेमि ।
अस्मत् । युयवन् । अमीवाः ॥ ७ ॥

देवताता देवतातौ यज्ञे हवेष्वस्मदीयेषु स्तोत्रेषु मितद्रवः मितद्रवणाः मितमार्गाः स्वर्काः शोभनान्नाः वाजिनः एतदभिधायकादेवाः नोस्माकं शं सुखाय भवन्तु अपिच अहिं आगत्य हन्तारं वृकं वस्त्रनामादातारं चोरमितिशेषः रक्षांसिच जंभयन्तोहिंसन्तोवाजिनोदेवाः सनेमि पुराणनामैतत् पुरातनाः अमीवाः रोगान् अस्मदस्मत्तः युयवन् पृथक्कुर्वन्तु ॥ ७ ॥

अथाष्टमी—

वाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः ।
अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः ॥ ८ ॥ ५॥

वाजेऽवाजे । अवत । वाजिनः । नः । धनेषु । विप्राः । अमृताः ।
ऋतऽज्ञाः । अस्य । मध्वः । पिबत । मादयध्वम् । तृप्ताः । यात ।
पथिऽभिः । देवऽयानैः ॥ ८ ॥ ५ ॥

हे वाजिनः एतन्नामकादेवाः विप्राः मेधाविनः अमृता अमरणधर्माणः ऋतज्ञाः सत्यं जानन्तः एवं भूताः सन्तोयूयं वाजेवाजे सर्वेषु युद्धेषुनोस्मान् धनेषु धननिमित्तेषु अवत पालयत ततोयूयं अस्यमध्वः मधुरोपेतमिमं सोमं पिबत सोमपानानंतरं मादयध्वं यूयं तृप्ताभवत ततस्तृप्तायूयं देवयानैः देवगमनसाधनैः पथिभिर्मार्गैर्यात गच्छत ॥ ८ ॥

॥ इति तृतीयस्य चतुर्थे पंचमोवर्गः ॥ ५ ॥

ऊर्ध्वोअग्निरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं ऊर्ध्वःसप्तवैश्वदेवं त्वित्यनुक्रमणिका। सूक्तविनियोगोलैंगिकः। द्वितीयेछन्दोमे प्रउगशस्त्रे ऊर्ध्वोअग्निरिति वैश्वदेवस्तृचः सूत्रितंच—ऊर्ध्वोअग्निःसुमतिंवस्वोअश्रेदुतस्यानःसरस्वतीजुषाणेति प्रउगमिति ।

तत्र प्रथमा—

ऊर्ध्वोअग्निःसुमतिंवस्वोअश्रेत्प्रतीचीजूर्णिर्देवतातिमेति ।
भेजातेअद्रीरथ्येवपन्थामृतंहोतानइषितोयजाति ॥ १ ॥

अभि । ये । मिथः । वनुषः । सपन्ते । रातिम् । दिवः ।
रातिऽसाचः । पृथिव्याः । अहिः । बुध्न्यः । उत । नः ।
शृणोतु । वरूत्री । एकधेनुऽभिः । नि । पातु॥ ५ ॥

रातिषाचोदानसेविनः वनुषः संभक्तारः ये यजमानाः मिथः परस्परं संहताभूत्वा सवितारं अभिलक्ष्य सपन्ते परिचरन्ति कीदृशं दिवोद्युलोकस्य पृथिव्याभूमेश्च रातिं मित्रभूतं उतापिच अहिर्बुध्न्यः बुध्नेन्तरिक्षेभवोबुध्न्यः एतीत्यहिः एतत्पदद्वयाभिधेयमध्यमस्थानोग्निः अहिर्बुध्न्यइत्युच्यते सवितुर्मित्रभूतः सोपि तेषां नोस्माकं सवितृविषयं स्तोत्रं शृणोतु तथा वरूत्रीवाग्देवी च सवितृसहितासती एकधेनुभिर्मुख्याभिर्गोभिः निपातु नितरामस्मान् पालयतु ॥ ५ ॥

अथ षष्ठी—

अनुतन्नोजास्पतिर्मंसीष्टरत्नंदेवस्यसवितुरियानः ।
भगमुग्रोवसेजोहवीतिभगमनुग्रोअधयातिरत्नम् ॥ ६ ॥

अनु । तत् । नः । जाःपतिः । मंसीष्ट । रत्नम् । देवस्य । सवितुः ।
इयानः । भगम् । उग्रः । अवसे । जोहवीति । भगम् । अनुग्रः ।
अध । याति । रत्नम् ॥ ६ ॥

इयानः अस्माभिर्याच्यमानः जास्पतिः प्रजानां पालकः सवितादेवः सवितुर्देवस्य स्वस्य संबंधिरत्नं रमणीयं तत् प्रसिद्धं धनं नोस्माकं अनुमंसीष्ट अनुमन्यतां उग्रओजस्वी स्तोता भगं भजनीयं सवितारं भगसंज्ञकं देवं वा अवसे नोस्माकं रक्षणाय जोहवीति भृशं ह्वयति अधापिच अनुग्रः असमर्थः स्तोता भगमेतत्संज्ञकं सवितारंवा रत्नं रमणीयं तत्प्रसिद्धं धनं याति याचते ॥ ६ ॥

वैश्वदेवपर्वणि वाजिनस्य हविषः शंनोभवंत्वित्यादिके द्वेयाज्यानुवाक्ये सूत्रितंच—शंनोभवन्तुवाजिनोहवेषु वाजेवाजेवतवाजिनोनइत्यूर्ध्वंतुरनवानं याज्यामिति ।

सैषा सप्तमी—

शंनोभवन्तुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः ।
जम्भयन्तोहिंवृकंरक्षांसिसनेम्यस्मद्युयवन्नमीवाः ॥ ७ ॥

शम् । नः । भवन्तु । वाजिनः । हवेषु । देवऽताता । मितऽद्रवः । सुऽअर्काः । जम्भयन्तः । अहिम् । वृकम् । रक्षांसि । सनेमि । अस्मत् । युयवन् । अमीवाः ॥ ७ ॥

देवताता देवतातौ यज्ञे हवेष्वस्मदीयेषु स्तोत्रेषु मितद्रवः मितद्रवणाः मितमार्गाः स्वर्काः शोभनान्नाः वाजिनः एतदभिधायकादेवाः नोस्माकं शं सुखाय भवन्तु अपिच अहिं आगत्य हन्तारं वृकं वस्तूनामादातारं चोरमितिशेषः रक्षांसिच जंभयन्तोहिंसन्तोवाजिनोदेवाः सनेमि पुराणनामैतत् पुरातनाः अमीवाः रोगान् अस्मदस्मत्तः युयवन् पृथक्कुर्वन्तु ॥ ७ ॥

अथाष्टमी—

वाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः ।
अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः ॥ ८ ॥ ५॥

वाजेऽवाजे । अवत । वाजिनः । नः । धनेषु । विप्राः । अमृताः । ऋतऽज्ञाः । अस्य । मध्वः । पिबत । मादयध्वम् । तृप्ताः । यात । पथिऽभिः । देवऽयानैः ॥ ८ ॥ ५ ॥

हे वाजिनः एतन्नामकादेवाः विप्राः मेधाविनः अमृता अमरणधर्माणः ऋतज्ञाः सत्यं जानन्तः एवं भूताः सन्तोयूयं वाजेवाजे सर्वेषु युद्धेषुनोस्मान् धनेषु धननिमित्तेषु अवत पालयत ततोयूयं अस्यमध्वः मधुरोपेतमिमं सोमं पिबत सोमपानानंतरं मादयध्वं यूयं तृप्ताभवत ततस्तृप्तायूयं देवयानैः देवगमनसाधनैः पथिभिर्मार्गैर्यात गच्छत ॥ ८ ॥

॥ इति तृतीयस्य चतुर्थे पंचमोवर्गः ॥ ५ ॥

ऊर्ध्वोअग्निरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं ऊर्ध्वःसप्तवैश्वदेवं त्वित्यनुक्रमणिका। सूक्तविनियोगोलैंगिकः। द्वितीयेछन्दोमे प्रउगशस्त्रे ऊर्ध्वोअग्निरिति वैश्वदेवस्तृचः सूत्रितंच—ऊर्ध्वोअग्निःसुमतिंवस्वोअश्रेदुतस्यानःसरस्वतीजुषाणेति प्रउगमिति ।

तत्र प्रथमा—

ऊर्ध्वोअग्निःसुमतिंवस्वोअश्रेत्प्रतीचीजूर्णिर्देवतातिमेति।
भेजातेअद्रीरथ्येवपन्थामृतंहोतानइषितोयजाति ॥ १ ॥

ऊर्ध्वः । अग्निः । सुऽमतिम् । वस्वः । अश्रेत् । प्रतीची । जूर्णिः ।
देवऽतातिम् । एति । भेजाते इति । अद्री इति । रथ्याऽइव ।
पन्थाम् । ऋतम् । होता । नः । इषितः । यजाति ॥ १ ॥

अग्निरंगनादिगुणविशिष्टः ऊर्ध्वउद्गमनःसन् वस्वोवासकस्य स्तोतुः सुमतिं अस्मदीयां शोभनांस्तुतिं अश्रेव्अश्रयतु सेवतां प्रतीची अभिमुखी जूर्णिः सर्वासां प्रजानां जरयित्री उषोदेवता देवतातिं यज्ञमेतिगच्छति अद्रीआदियन्तौ श्रद्धावन्तौ पत्नीयजमानौ पंथां पंथानं यज्ञमार्गं रथ्येव रथिनाविव भेजाते सेवाते तथा इषितः संप्रेषितो नोस्मदीयोहोता ऋतं यज्ञं यजाति यजतु करोत्वित्यर्थः ॥ १ ॥

अथ द्वितीया—

प्रवांवृजेसुप्रयाबर्हिरेषामाविश्पतीववीरिटइयाते ।
विशामक्तोरुषसःपूर्वहूतौवायुःपूषास्वस्तयेनियुत्वान् ॥ २ ॥

प्र । वृञ्जे । सुऽप्रयाः । बर्हिः । एषाम् । आ । विश्पतीइवेति विश्पतीऽइव । बीरिटे । इयाते इति । विशाम् । अक्तोः । उषसः । पूर्वऽहूतौ । वायुः । पूषा । स्वस्तये । नियुत्वान् ॥ २ ॥

एषां यजमानानां संबन्धि सुप्रयाः शोभनान्नेन युक्तं बर्हिः कुशमयं प्रवृञ्जे प्रवृज्यते आसाद्यतेइत्यर्थः विश्पतीव इवेतीदानीमर्थे इदानीं अस्मदीयानां प्रजानां पालकौ नियुत्वान् नियुच्छब्देन वडवाउच्यन्ते तद्वान् वायुः पूषाच विशां प्रजानां स्वस्तये क्षेमाय अक्तोः रात्रेः संबन्धिन्याउषसः सकाशात् पूर्वहूतौ पूर्वस्मिन्नाह्वानेसति बीरिटेन्तरिक्षे आ इयाते आगच्छतां यद्वा विश्पतीवेत्युपमा विशां मनुष्याणां बीरिटे गणे विश्पतीव राजानौ यथा गच्छतां तद्वत् अस्मिन्पक्षे विशामित्युभयत्र संबध्यते ॥ २ ॥

अथ तृतीया—

ज्मयाअत्रवसवोरन्तदेवाउरावन्तरिक्षेमर्जयन्तशुभ्राः ।
अर्वाक्पथउरुज्रयःकृणुध्वंश्रोतादूतस्यजग्मुषोनोअस्य ॥ ३ ॥

ज्मयाः । अत्र । वसवः । रन्त । देवाः । उरौ । अन्तरिक्षे ।
मर्जयन्त । शुभ्राः । अर्वाक् । पथः । उरुऽज्रयः ।
कृणुध्वम् । श्रोत । दूतस्य । जग्मुषः । नः । अस्य ॥ ३ ॥

वसवो वसुसंज्ञकादेवाः अत्रास्मिन्यज्ञे ज्मयाः पृथिव्यां रन्त रमयन्तां उरौ विस्तीर्णे अन्तरिक्षे स्थिताः शुभ्राः दीप्यमानाः मरुतश्च मर्जयन्त परिचर्यन्ते । हे उरुज्रयः प्रभूतगमनाः वसवोमरुतश्च यूयं पथः युष्मदीयान्मार्गान् अर्वागस्मदभिमुखं यथा भवति तथा कृणुध्वं कुरुत अपिच यूयं जग्मुषः युष्मान् प्रतिगतवतः नोस्मदीयस्य अस्य दूतस्याग्नेराह्वानं श्रोत शृणुत अग्निर्हि यजमानानां दूतःसन् देवानाह्वयतीत्यर्थः ॥ ३ ॥

अथ चतुर्थी–

तेहियज्ञेषुयज्ञियासऊमाःसधस्थंविश्वेअभिसन्तिदेवाः ।
ताँअध्वरउशतोयक्ष्यग्नेश्रुष्टीभगंनासत्यापुरंधिम् ॥ ४ ॥

ते । हि । यज्ञेषु । यज्ञियासः । ऊमाः । सधऽस्थम् । विश्वे ।
अभि । सन्ति । देवाः । तान् । अध्वरे । उशतः । यक्षि । अग्ने ।
श्रुष्टी । भगम् । नासत्या । पुरम्ऽधिम् ॥ ४ ॥

यज्ञेषु यागेषु तेहि तेखलु प्रसिद्धाः यज्ञियासोयज्ञार्हाः ऊमारक्षकाः विश्वे सर्वे देवाः सधस्थं सहस्थानं अभि सन्ति अभिभवन्ति आक्रामन्ति हे अग्ने अध्वरे अस्मदीये यज्ञे उशतः कामयमानान् तान् देवान् यक्षि यज । तथा श्रुष्टी क्षिप्रनामैतत् क्षिप्रं भगं एतत्संज्ञकं देवं नासत्या नासत्यौ अश्विनौ च पुरंधिं पुरूणां धातारमिन्द्रं च यज ॥ ४ ॥

अथ पंचमी–

आग्नेगिरोदिवआपृथिव्यामित्रंवहवरुणमिन्द्रमग्निम् ।
आर्यमणमदितिंविष्णुमेषांसरस्वतीमरुतोमादयन्ताम् ॥ ५ ॥

आ । अग्ने । गिरः । दिवः । आ । पृथिव्याः । मित्रम् । वह ।
वरुणम् । इन्द्रम् । अग्निम् । आ । अर्यमणम् । अदितिम् ।
विष्णुम् । एषाम् । सरस्वती । मरुतः । मादयन्ताम् ॥ ५ ॥

हे अग्ने त्वं दिवः द्युलोकात् सकाशात् गिरः गरीयान् स्तुत्यान् देवान् अस्मदीयं यज्ञं प्रति आवह आह्वानं कुरु पृथिव्याः अन्तरिक्षाच्च आवह कान् देवानिति तदुच्यते मित्रं एतत्संज्ञकं वरुणं च इन्द्रं च देवेषु देवतास्वरूपेणावस्थितं चाग्निं अर्यमणमेतत्संज्ञकं अदितिमदीनां पृथ्वीं च विष्णुं च एवंभूतान् देवान् एषामस्माकं यजमानानामर्थाय आवह सरस्वती वाग्देवता च मरुतश्च मादयन्तां अस्मदीयैः स्तोत्रैर्हविर्भिश्च मादयन्तु ॥ ५ ॥

अथ षष्ठी—

रेहव्यंमतिभिर्यज्ञियानांनक्षत्कामंमर्त्यानामसिन्वन् ।
धातारयिमविदस्यंसदासांसक्षीमहियुज्येभिर्नुदेवैः ॥ ६ ॥

ररे । हव्यम् । मतिऽभिः । यज्ञियानाम् । नक्षत् । कामम् ।
मर्त्यानाम् । असिन्वन् । धात । रयिम् । अविऽदस्यम् ।
सदाऽसाम् । सक्षीमहि । युज्येभिः । नु । देवैः ॥ ६॥

यज्ञियानां चतुर्थ्यर्थे षष्ठी यज्ञार्हेभ्यो देवेभ्यः मतिभिः अस्मदीयाभिः स्तुतिभिः सह हव्यं हविः ररे अस्माभिर्दीयते मर्त्यानां मनुष्याणां अस्माकं काममभिलाषं असिन्वन् अप्रतिबध्नन् अग्निर्नक्षत् अस्मदीयं यज्ञं व्याप्नोतु। हे देवाः यूयं अविदस्यं अनुपक्षपणीयं सदासां सर्वदा संभजनीयं रयिं धनं धात अस्मभ्यंदत्त नु अद्य वयं युज्येभिः सहायभूतैः इह यज्ञे समागतैर्देवैः सक्षीमहि यद्वा नुइत्युपमार्थे युज्येभिर्बन्धुभिरिवदेवैः सक्षीमहि ॥ ६ ॥

अथ सप्तमी—

नूरोदसीअभिष्टुतेवसिष्ठैर्ऋतावानोवरुणोमित्रोअग्निः ।
यच्छन्तुचन्द्राउपमन्नोअर्कंयूयंपातस्वस्तिभिःसदानः ॥ ७ ॥६॥

नु । रोदसी इति । अभिष्टुते इत्यभिऽस्तुते । वसिष्ठैः ।
ऋतऽवानः । वरुणः । मित्रः । अग्निः । यच्छन्तु । चन्द्राः । उपऽमम् ।
नः । अर्कम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ ६ ॥

नु अद्य रोदसी द्यावापृथिव्यौ वसिष्ठैरस्माभिः पूजार्थं बहुवचनं अभिष्टुते अभितः सर्वतः स्तुते अभूतां तथा ऋतावानः अस्माभिः क्रियमाणैर्यज्ञैरुपेतोवरुणोमित्रः अग्निश्च एवंभूतादेवाः अस्माभिरभिष्टुताआसन् चन्द्राः आह्लादकादेवाः नोस्मभ्यं अर्कमर्चनीयमन्नं उपमं सर्वोत्कृष्टं यच्छन्तु ददतु सूक्तमविपादितायेदेवास्तेसर्वे यूयं नोस्मान् स्वस्तिभिः अविनाशैः सदा सर्वदा पात पालयत ॥ ७ ॥

॥ इति पंचमस्य चतुर्थे षष्ठोवर्गः ॥ ६ ॥

ओश्रुष्टिरिति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं ओश्रुष्टिरित्यनुक्रान्तं विनियोगो लैंगिकः ।

तत्र प्रथमा—

ओश्रुष्टिर्विदथ्या३समेतुप्रतिस्तोमंदधीमहितुराणाम् ।
यदद्यदेवःसविताहुवातिस्यामास्यरत्निनोविभागे ॥ १ ॥

ओ इति । श्रुष्टिः । विदथ्या । सम् । एतु । प्रति । स्तोमम् ।
दधीमहि । तुराणाम् । यत् । अद्य । देवः । सविता ।
सुवाति । स्याम । अस्य । रत्निनः । विऽभागे ॥ १ ॥

हे देवाः विदथ्या विदथेन त्वदीयेन चित्तेन संपाद्याश्रुष्टिः सुखं अस्मान् ओ आसमेतु आगच्छतु अथवा श्रुष्टिर्वेगवती विदथ्या विदथे यज्ञे क्रियमाणाअस्मदीयास्तुतिः युष्मानागच्छतु वयं तुराणां वेगवतां देवानां स्तोमं स्तोत्रं प्रति दधीमहि कुर्वीमहि अद्येदानीं सवितादेवः यद्धनं सुवाति अस्मभ्यं प्रेरयेत् रत्निनोरमणीयधनवतः अस्य सवितुस्तस्य धनस्य विभागे दाने स्याम वयं भवेम ॥ १ ॥

अथ द्वितीया—

मित्रस्तन्नोवरुणोरोदसीचद्युभक्तमिन्द्रोअर्यमाददातु ।
दिदेष्टुदेव्यदितीरेक्णोवायुश्चयन्नियुवैतेभगश्च ॥ २ ॥

मित्रः । तत् । नः । वरुणः । रोदसी इति । च । द्युऽभक्तम् ।
इन्द्रः । अर्यमा । ददातु । दिदेष्टु । देवी । अदितिः । रेक्णः ।
वायुः । च । यत् । नियुवैते इति निऽयुवैते । भगः । च ॥ २ ॥

मित्रोदेवः नोस्मभ्यं तद प्रसिद्धं धनं ददातु प्रयच्छतु तथा वरुणोददातु रोदसी च द्यावापृथिव्यौ च दत्तां तथा इन्द्रः द्युभक्तं द्युभिः द्योतमानैः स्तोतृभिः सेवितं तद्धनं ददातु अर्यमाच ददातु तथा अदितिर्देवी रेक्णोधनं दिदेष्टु तद्धनमस्मभ्यं दिशतु वायुश्च भगश्च उभौ देवौ यद्धनं नियुवैते अस्मान्नितरां योजयेतां तद्धनमिति पूर्वेणसंबन्धः ॥ २ ॥

अथ तृतीया—

सेदुग्रोअस्तुमरुतःसशुष्मीयंमर्त्यंपृषदश्वाअवाथ ।
उतेमग्निःसरस्वतीजुनन्तिनतस्यरायःपर्येतास्ति ॥ ३ ॥

सः । इत् । उग्रः । अस्तु । मरुतः । सः । शुष्मी । यम् ।
मर्त्यम् । पृषत्ऽअश्वाः । अवाथ । उत । ईम् । अग्निः । सरस्वती ।
जुनन्ति । न । तस्य । रायः । परिऽएता । अस्ति ॥ ३ ॥

हे पृषदश्वाः पृषच्छब्देन केचिन्मृगविशेषाउच्यन्ते तएवाश्वावाहायेषां ते एवंभूता हे मरुतोरुद्रपुत्रादेवाः यूयं मर्त्यं मरणधर्माणं यं यजमानं अवाथ पालयत सेत् सएव यजमानः उग्रःअस्तु ओजस्वीभवतु तथा सशुष्मी बलवान् भवतु तथा उतापिच अग्निरंगनादिगुणयुक्तोदेवः सरस्वती वाग्देवता चेत्याद्याः सर्वेदेवा ईमेनं यजमानं जुनन्ति प्रवर्तयन्ति तस्य यजमानस्य संबन्धिनोरायोधनस्य कश्चिदपि पर्येता परिगन्ता नास्ति नाशको नभवतीत्यर्थः ॥३॥

अथ चतुर्थी—

अयंहिनेतावरुणऋतस्यमित्रोराजानोअर्यमापोधुः ।
सुहवादेव्यदितिरनर्वातेनोअंहोअतिपर्षन्नरिष्टान् ॥ ४ ॥

अयम् । हि । नेता । वरुणः । ऋतस्य । मित्रः । राजानः ।
अर्यमा । अपः । धुरिति धुः । सुऽहवा । देवी । अदितिः ।
अनर्वा । ते । नः । अंहः । अति । पर्षन् । अरिष्टान् ॥ ४ ॥

ऋतस्य यज्ञस्य सत्यस्यवा नेता प्रापयिता अयंहि अयंखलु वरुणश्च मित्रश्च अर्यमा च एते राजानः समर्थादेवाः अपः अस्मदीयं यज्ञादिलक्षणं कर्म धुः अधुः दधति अनर्वा केनाप्यप्रतिगता देवी द्योतमाना अदितिरदीना देवमाता सुहवा शोभनाह्वाना भवति ते वरुणादयोदेवाः अरिष्टानबाधितान् सतोनोस्मान् अंहोदुरितं अतिपर्षन् अतिपारयन्तु ॥ ४ ॥

अथ पञ्चमी–

अस्यदेवस्यमीळ्हुषोवयाविष्णोरेषस्यप्रभृथेहविर्भिः।
विदेहिरुद्रोरुद्रियंमहित्वंयासिष्टंवर्तिरश्विनाविरावत् ॥ ५ ॥

अस्य। देवस्य। मीळ्हुषः। वयाः। विष्णोः। एषस्य।
प्रऽभृथे। हविःऽभिः। विदे। हि। रुद्रः। रुद्रियम्।
महिऽत्वम्। यासिष्टम्। वर्तिः। अश्विनौ। इराऽवत्॥ ५ ॥

प्रभृथे हविर्भिर्हवीरूपैरन्नैरेषस्य प्रापणीयस्य मीळ्हुषः कामानां सेक्तुः विष्णोः सर्वदेवात्मकस्य अस्य देवस्य विष्णुः सर्वादेवताइतिश्रुतेः[1]। अन्येदेवाः वयाः शाखाइव भवन्ति रुद्रोदेवः रुद्रियं रुद्रसंबन्धिसुखं महित्वं महत्त्वं च विदेहि अस्मान् प्रापयति खलु अपिच हे अश्विनौ देवौ युवां इरावत् हविर्लक्षणान्नयुक्तं वर्तिरस्मदीयं गृहं यासिष्टं अयासिष्टं आगच्छतं॥५॥

अथ षष्ठी–

मात्रपूषन्नाघृणइरस्योवरूत्रीयद्रातिषाचश्चरासन्।
मयोभुवोनोअर्वन्तोनिपान्तुवृष्टिंपरिज्मावातोददातु ॥ ६ ॥

मा। अत्र। पूषन्। आघृणे। इरस्यः। वरूत्री। यत्।
रातिऽसाचः। च। रासन्। मयःऽभुवः। नः। अर्वन्तः। नि।
पान्तु। वृष्टिम्। परिऽज्मा। वातः। ददातु॥ ६ ॥

हे आघृणे प्राप्तदीप्ते एवंभूत हे पूषन् देव अत्रास्मिन् दाने माइरस्यः विघातं माकुथाः वरूत्री सर्वैर्वरणीया सरस्वतीरातिषाचश्च रातिदानं तस्यसंभक्त्र्योदेवपत्न्यश्च यद्धनं रासन् अ-

[1] ऐ० ब्रा० १. १.

स्मभ्यं प्रयच्छेयुः अत्र माकृथाइति पूर्वेणसंबन्धः किंच मयोभुवः सुखस्यभावकाः अर्वन्तोग-च्छन्तोदेवाः नोस्मान्निपान्तु नितरांपालयन्तु परिज्मा परितोगन्तावातोवायुः वृष्टिं वृष्टिलक्षणमु-दकं ददातु प्रयच्छत्वस्मभ्यं ॥ ६ ॥

अथ सप्तमी–

नूरोदसीअभिष्टुतेवसिष्ठैर्ऋतावानोवरुणोमित्रोअग्निः ।
यच्छन्तुचन्द्राउपमन्नोअर्कंयूयंपातस्वस्तिभिःसदानः ॥७॥ ७ ॥

नु । रोदसी इति । अभिस्तुते इत्यभिऽस्तुते । वसिष्ठैः । ऋतऽवानः ।
वरुणः । मित्रः । अग्निः । यच्छन्तु । चन्द्राः । उपऽमम् । नः ।
अर्कम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७॥ ७ ॥

पूर्वंव्याख्यातेयं अक्षरार्थस्तु द्यावापृथिव्यौ वरुणादयोदेवाश्च वसिष्ठैरस्माभिरभिष्टुताभ-वन्ति एवंभूता आह्लादकादेवाः सर्वोत्कृष्टमन्नं अस्मभ्यं ददतु अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवा यूयं कल्याणैरस्मान् सर्वदा पालयत ॥ ७ ॥

॥ इति पंचमस्य चतुर्थे सप्तमोवर्गः ॥ ७ ॥

प्रातरग्निमिति सप्तर्चमष्टमं सूक्तं अत्रानुक्रमणिका–प्रातर्भगं जगत्याद्यालिंगोक्तदेवतां-त्योपस्येति । वसिष्ठऋषिः आद्याजगती शिष्टास्त्रिष्टुभ आद्याअग्नीन्द्रादिदेवत्या द्वितीयाद्याः पंचभगदेवत्याः सप्तम्युषोदेवत्या । अत्रकेचिदाहुः–निर्वेष्टुकामोरोगार्तो भगसूक्तंजपेत्सदा । नि-र्वेशंविंशतिक्षिप्रं रोगैश्चपरिमुच्यतइति ।

तत्र प्रथमा–

प्रातरग्निंप्रातरिन्द्रंहवामहेप्रातर्मित्रावरुणाप्रातरश्विना ।
प्रातर्भगंपूषणंब्रह्मणस्पतिंप्रातःसोमम्मुतरुद्रंहुवेम ॥ १ ॥

प्रातः । अग्निम् । प्रातः । इन्द्रम् । हवामहे । प्रातः । मित्रावरुणा ।
प्रातः । अश्विना । प्रातः । भगम् । पूषणम् । ब्रह्मणः ।
पतिम् । प्रातः । सोमम् । उत । रुद्रम् । हुवेम ॥ १ ॥

प्रातरुषःकाले अग्निदेवं हवामहे वयं स्तोतार आह्वयामः तथा प्रातःकाले इन्द्रं हवामहे तथा मित्रावरुणौ अहोरात्राभिमानिनौ देवौ प्रातर्वयं हवामहे तथा अश्विनौ देवानां भिषजौ प्रातर्वयं हवामहे तथा प्रातर्भगं देवं पूषणं देवं ब्रह्मणस्पतिं मंत्राभिमानिनमेतत्संज्ञकं च आह्वयामः तथा प्रातः सोममेतत्संज्ञकं देवं उतापिच रुद्रं देवं च हुवेम आह्वयामः ॥ १ ॥

अथ द्वितीया—

प्रा॒त॒र्जितं॒ भग॑मु॒ग्रं हु॑वेम व॒यं पु॒त्रमदि॑ते॒र्यो वि॑ध॒र्ता ।
आ॒ध्रश्चि॒द्यं मन्य॑मानस्तु॒रश्चि॒द्राजा॑ चि॒द्यं भगं॑ भ॒क्षीत्याह॑ ॥ २ ॥

प्रा॒तः॒ऽजितं॑म् । भग॑म् । उ॒ग्रम् । हु॒वे॒म॒ । व॒यम् । पु॒त्रम् ।
अदि॑तेः । यः । वि॒ऽध॒र्ता । आ॒ध्रः । चि॒त् । यम् । मन्य॑मानः ।
तु॒रः । चि॒त् । राजा॑ । चि॒त् । यम् । भग॑म् । भ॒क्षि॒ । इति॑ । आह॑ ॥२॥

योभगोदेवः विधर्ता विश्वस्यजगतोधारकः जितं जयशीलं उग्रं उद्गूर्णं अदितेः पुत्रं भगं देवं प्रातःकालएव वयं हुवेम आह्वयामः । आध्रश्चित् दरिद्रोपि स्तोता यं भगं देवं मन्यमानः स्तुवन् भगं भजनीयं धनं भक्षि भज विभज मह्यं देहिइत्याह ब्रवीति तुरश्चित् तुरतिर्गतिकर्मा प्राप्तधनोपि राजाचित् समर्थोपि जनः यं भगं देवं भजनीयं धनं मह्यं भक्षि देहीत्याह तं भगं प्रातरेव वयं हुवेमेति संबन्धः ॥ २ ॥

अथ तृतीया—

भग॒ प्रणे॑त॒र्भग॒ सत्य॑राधो॒ भगे॒मां धिय॒मुद॑वा॒ दद॑न्नः ।
भग॒ प्र णो॑ जनय॒ गोभि॒रश्वै॒र्भग॒ प्र नृभि॑र्नृ॒वन्तः॑ स्याम ॥ ३ ॥

भग॑ । प्रने॑त॒रिति॑ प्रऽने॑तः । भग॑ । सत्य॑ऽराधः । भग॑ । इ॒माम् ।
धिय॑म् । उत् । अ॒व॒ । दद॑त् । नः॒ । भग॑ । प्र । नः॒ । ज॒न॒य॒ ।
गोभिः॑ । अश्वैः॑ । भग॑ । प्र । नृऽभिः॑ । नृ॒ऽवन्तः॑ । स्या॒म॒ ॥ ३ ॥

हे भगदेव त्वं प्रणेतः प्रकर्षेणनेतासि तादृशप्रणेतः हे भग त्वं सत्यराधः सत्यधनोसि तादृशसत्यराधः हे भग त्वं नोस्मभ्यं ददत् कामान् प्रयच्छन् इमामस्मदीयां धियं स्तुतिं उदव

उद्रक्ष सफलयुक्तांकुरु । हे भग त्वं गोभिरश्वैश्चनोस्मान् प्रजनय प्रोद्भूतान् कुरु हे भग त्वत्प्रसादात् वयं नृभिर्नेतृभिः पुत्रादिभिर्नृवन्तः मनुष्यवन्तः प्रस्याम प्रभवेम ॥ ३ ॥

अथ चतुर्थी–

उतेदानींभगवन्तःस्यामोतप्रपित्वउतमध्येअह्नाम् ।
उतोदितामघवन्त्सूर्यस्यवयंदेवानांसुमतौस्याम ॥ ४ ॥

उत । इदानीम् । भगऽवन्तः । स्याम । उत । प्रऽपित्वे । उत ।
मध्ये । अह्नाम् । उत । उत्ऽइता । मघऽवन् । सूर्यस्य ।
वयम् । देवानाम् । सुऽमतौ । स्याम ॥ ४ ॥

उतापिच इदानीं वयं भगवन्तः स्याम हे भग भगेन त्वया स्वामिनायुक्ता भवेम यद्वा भगवन्तोधनवन्तः स्याम उतापिच प्रपित्वे अह्नां प्राप्ते पूर्वाह्णे भगवन्तः स्याम उतापिच अह्नां दिवसानां मध्ये मध्याह्ने भगवन्तः स्याम उतापिच हे मघवन् धनवन् भगदेव सूर्यस्य सर्वस्य प्रेरकस्य देवस्य उदिता उदितौ उदयेसति वयं त्वदनुग्रहात् देवानामिन्द्रादीनां सुमतौ अनुग्रहबुद्धौ स्याम भवेम ॥ ४ ॥

अथ पंचमी–

भगएवभगवाँअस्तुदेवास्तेनवयंभगवन्तःस्याम ।
तंत्वाभगसर्वइज्जोहवीतिसनोभगपुरएताभवेह ॥ ५ ॥

भगः । एव । भगऽवान् । अस्तु । देवाः । तेन । वयम् ।
भगऽवन्तः । स्याम । तम् । त्वा । भग । सर्वः । इत् ।
जोहवीति । सः । नः । भग । पुरःऽएता । भव । इह ॥ ५ ॥

हे देवाः भगोदेवएव भगवान् धनवानस्तु तेन भगेन देवेन वा वयं भगवन्तः स्याम धनवन्तोभवेम हे भग तं प्रसिद्धं त्वा त्वां सर्वइत् सर्वएव जनः जोहवीति भृशं पुनःपुनर्वा आह्वयति हे भगदेव स त्वं इहास्मिन्यज्ञे नोस्माकं पुरएता पुरोगन्ता भव ॥ ५ ॥

अथ षष्ठी–

समध्वरायोषसोनमन्तदधिक्रावेवशुचयेपदाय ।
अर्वाचीनंवसुविदंभगंनोरथमिवाश्वावाजिनआवहन्तु ॥६॥

सम् । अध्वराय । उषसः । नमन्त । दधिक्रावाऽइव । शुचये ।
पदाय । अर्वाचीनम् । वसुऽविदम् । भगम् । नः ।
रथम्ऽइव । अश्वाः । वाजिनः । आ । वहन्तु ॥ ६॥

शुचये शुद्धाय गमनयोग्याय पदाय स्थानाय दधिक्रावेव यथा तथा अश्वः उषसोउ-षोदेवता अध्वराय अस्मदीयाय यागाय संनमन्त संगच्छन्तु वाजिनोवेगवन्तोश्वाः रथमिव र-थं यथा तथा उषसः अर्वाचीनं अस्मदभिमुखं वसुविदं धनस्य प्रापकं भगं देवं नोस्मान् प्रति आवहन्तु आनयन्तु ॥ ६ ॥

अथ सप्तमी–

अश्वावतीर्गोमतीर्नउषासोवीरवतीःसदमुच्छन्तुभद्राः ।
घृतंदुहानाविश्वतःप्रपीतायूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ ८ ॥

अश्वऽवतीः । गोऽमतीः । नः । उषसः । वीरऽवतीः । सदम् ।
उच्छन्तु । भद्राः । घृतम् । दुहानाः । विश्वतः । प्रऽपीताः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ ८ ॥

भद्राः भजनीयाः उषसः उषोदेवता अश्वावतीरश्ववत्यः अश्वसहिताः सत्यः गोमती-र्गोमत्यश्च वीरवतीर्वीरवत्यः पुत्रादिजनोपेताश्च भवंत्यः नोस्मभ्यं सदं सर्वदा उच्छन्तु व्युच्छन्तु नैशंतमोविवासयन्तु । कीदृश्यः घृतमुदकं दुहानाः सिंचंत्यः विश्वतः सर्वैर्गुणैः प्रपीताः प्रवृद्धाः एवंभूताउषसस्तम उच्छन्तु अस्मिन् सूक्ते प्रतिपादिताः हे सर्वे देवाः यूयं नोस्मान् सदा सर्वदा स्वस्तिभिः कल्याणैः पात पालयत ॥ ७ ॥

॥ इति पञ्चमस्य चतुर्थेष्टमो वर्गः ॥ ८ ॥

प्रब्रह्माणइति पळृचं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं अत्रानुक्रान्तं–प्रब्रह्माणः पड्वैश्वदेवंत्विति। सूक्तविनियोगोलैंगिकः। तृतीये छन्दोमे भउगशस्त्रे प्रब्रह्माणइति वैश्वदेवस्तृचः सूत्रितंच–प्रब्रह्माणोअंगिरसोनक्षन्त सरस्वतीं देवयन्तोहवन्तइति ।

तत्र प्रथमा–

प्रब्रह्माणोअङ्गिरसोनक्षन्तप्रक्रन्दनुर्नभन्यस्यवेतु ।
प्रधेनवंउदप्रुतोनवन्तयुज्यातामद्रीअध्वरस्यपेशः ॥ १ ॥

प्र । ब्रह्माणः । अङ्गिरसः । नक्षन्त । प्र । क्रन्दनुः । नभन्यस्य ।
वेतु । प्र । धेनवः । उदऽप्रुतः । नवन्त । युज्याताम् ।
अद्री इति । अध्वरस्य । पेशः ॥ १ ॥

ब्रह्माणः अंगिरसः एतन्नामकाऋषयःप्रनक्षन्त सर्वत्रव्याप्नुवन्तु क्रन्दनुः पर्जन्यः नभन्यस्य स्तोत्रस्य अस्मदीयं स्तोत्रं प्रवेतु प्रकर्षेणेच्छतु धेनवः प्रीणयित्र्योनद्यः उदप्रुतः उदकानि सिंचंत्यः प्रनवन्त सर्पन्तु अद्रिरद्रीयन्तौ पत्नीयजमानौ अध्वरस्य यज्ञस्य पेशः रूपं युज्यातां योजयेतां ॥ १ ॥

अथ द्वितीया–

सुगस्तेअग्नेसनवित्तोअध्वायुक्ष्वासुतेहरितोरोहितश्च ।
येवासद्मन्नरुपावीरवाहोहुवेदेवानांजनिमानिसत्तः ॥ २ ॥

सुऽगः । ते । अग्ने । सनऽवित्तः । अध्वा । युक्ष्व । सुते ।
हरितः । रोहितः । च । ये । वा । सद्मन् । अरुपाः । वीरऽवाहः ।
हुवे । देवानाम् । जनिमानि । सत्तः ॥ २ ॥

हे अग्ने सनवित्तः सनाच्चिरकालादारभ्यलब्धः ते त्वदीयोध्वामार्गः सुगः सुष्ठुगंतव्योभवतु किं च हरितःश्यामवर्णाः रोहितश्च लोहितवर्णश्चेत्युभयविधाः येवा येच ते त्वदीयाअश्वाः सद्मन् सद्मनि यज्ञगृहे वीरवाहःवीरं शूरं त्वां वहन्तः अरुपाः आरोचमानाभवन्ति तांश्च त्वं सुयुक्ष्व त्वदीयरथे सुष्ठु संयोजय निसत्तः यज्ञगृहे निषण्णोऽहं होतासन् सुते अभिषुते सोमे सति देवानामिन्द्रादीनां जनिमानि जनान् संघान् हुवे आह्वयामि ॥ २ ॥

अथ तृतीया–

सम्रुवोयज्ञंमहयन्नमोभिःप्रहोतामन्द्रोरिरिचउपाके ।
यजस्वसुपुर्वणीकदेवानायज्ञियामरमतिंववृत्याः ॥ ३ ॥

सम् । ऊँ इति । वः । यज्ञम् । महयन् । नमःऽभिः । प्र । होता ।
मन्द्रः । रिरिचे । उपाके । यजस्व । सु । पुरुऽअनीक ।
देवान् । आ । यज्ञियाम् । अरमतिम् । ववृत्याः ॥ ३ ॥

हे देवाः वोयुष्माकं यज्ञं नमोभिर्नमस्कारैर्युक्ता इमेस्तोतारोवा यजमानावा संमहयन् सम्यक् पूजयन्ति उइतिपूरकः मन्द्रः स्तुतिशीलः उपाके अस्माकं समीपे स्थितोस्मदीयोहोता प्ररिरिचे अन्येभ्योहोतृभ्यः अतिरिच्यते हे यजमान त्वं देवान् सु सुष्ठु यजस्व हे पुर्वणीक बहुतेजस्विन्नग्ने त्वं यज्ञियां यज्ञार्हां अरमतिं भूमिं आववृत्याः आवर्तय तथाचनिगमान्तरे-आनोमहीमरमतिंसजोषाइति ॥ ३ ॥

अथ चतुर्थी–

यदावीरस्यरेवतोदुरोणेस्योनशीरतिथिराचिकेतत् ।
सुप्रीतोअग्निःसुधितोदमआसविशेदातिवार्यमियत्यै ॥ ४ ॥

यदा । वीरस्य । रेवतः । दुरोणे । स्योनऽशीः । अतिथिः ।
आऽचिकेतत् । सुऽप्रीतः । अग्निः । सुऽधितः । दमे ।
आ । सः । विशे । दाति । वार्यम् । इयत्यै ॥ ४ ॥

अतिथिः सर्वेषामतिथिभूतोग्निः यदा वीरस्य वीरकस्य स्तोत्राणां प्रेरयितुः रेवतः हविष्मतोयजमानस्य दुरोणे गृहे स्योनशीः सुखेन शयनीयः आचिकेतत् प्रज्ञायते अग्निः दमे यज्ञगृहे सुधितः आकारश्चार्थे सुनिहितश्च सुष्ठु निहितःसन् यदा सुप्रीतोभवति तदा सोग्निः इयत्यै उपगच्छन्त्यै विशे प्रजायै वार्यं वरणीयं धनं दाति ददाति प्रयच्छति ॥ ४ ॥

---

१ ऋ० सं० ४. १. २१ ।

अथ पंचमी–

इमंनोअग्नेअध्वरंजुंषस्वमरुत्स्विन्द्रंयशसंकृधीनः।
आनक्तांबर्हिःसंदतामुषासोशंतांमित्रावरुणायजेह ॥ ५ ॥

इमम्। नः। अग्ने। अध्वरम्। जुषस्व। मरुत्ऽसुं। इन्द्रें।
यशसंम्। कृधि। नः। आ। नक्ता। बर्हिः। सदताम्।
उषसा। उशन्ता। मित्रावरुणा। यज। इह ॥ ५ ॥

हे अग्ने त्वं नोस्मदीयमिममध्वरं यज्ञं जुषस्व सेवस्व किंच मरुत्सु इन्द्रस्य सखिभूतेषु देवेषु इन्द्रेच यशसं यशोयुक्तं हविर्लक्षणान्नवन्तं नोस्मदीयं यज्ञं हेअग्ने त्वं कृधि कुरु स्थापयेत्यर्थः। तथा नक्ता रात्रिश्च उषसा दिवश्च अहर्निशेइत्यर्थः बर्हिर्बर्हिषि कुशमये आसदतां उपविशतां अपि च हे अग्ने उशान्ता उशन्तौ यज्ञमिच्छन्तौ मित्रावरुणा मित्रावरुणौ देवौ इहास्मिन् यज्ञे यज पूजय ॥ ५ ॥

अथ षष्ठी–

एवाग्निंसंहस्यं१वसिष्ठोरायस्कांमोविश्वप्स्न्यंस्यस्तौत्।
इषंर्यिंपंप्रथद्वाजंमस्मेयूयंपांतस्वस्तिभिःसदांनः ॥ ६ ॥ ९ ॥

एव। अग्निम्। सहस्यम्। वसिष्ठः। रायःऽकांमः। विश्वऽप्स्न्यस्य।
स्तौत्। इषम्। रयिम्। पप्रथत्। वाजम्। अस्मे इतिं।
यूयम्। पात। स्वस्तिऽभिः। सदा। नः ॥ ६ ॥ ९ ॥

वसिष्ठः एतदाख्यऋषिः रायस्कामः पश्वादिधनानीच्छन् एव एवमुक्तप्रकारेण सहस्यं सहोबलं तस्यपुत्रं तद्वन्तमितिवा अग्निं देवं विश्वप्स्न्यस्य पुरुरूपस्य धनस्य लाभाय स्तौत् एवंभूतोग्निः अस्मे अस्मभ्यं इषमन्नं रयिं धनं वाजं बलंच पप्रथत् प्रथयतु विस्तारयतु ददात्वित्यर्थः अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवायूयं अस्मान् कल्याणैः सर्वदा पालयत ॥ ६ ॥

॥ इति पंचमस्य चतुर्थे नवमो वर्गः ॥ ९ ॥

प्रवोयज्ञेष्विति पंचर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं प्रवःपंचेत्यनुक्रान्तं सूक्तविनियोगोलैंगिकः। प्रथमेछन्दोमे प्रउगशस्त्रे प्रवोयज्ञेष्विति वैश्वदेवस्तृचः सूत्रितंच—प्रवोयज्ञेषुदेवयन्तोअर्चन् प्रक्षोदसाधायसासस्रएषेति प्रउगमिति ।

तत्र प्रथमा—

प्रवोयज्ञेषुदेवयन्तोअर्चन्द्यावानमोभिःपृथिवीइषध्यै ।
येषांब्रह्माण्यसमानिविप्राविष्वग्वियन्तिवनिनोनशाखाः ॥१॥

प्र । वः । यज्ञेषु । देवऽयन्तः । अर्चन् । द्यावा । नमःऽभिः ।
पृथिवी इति । इषध्यै । येषाम् । ब्रह्माणि । असमानि । विप्राः ।
विष्वक् । विऽयन्ति । वनिनः । न । शाखाः ॥ १ ॥

देवयन्तो देवान्कामयमानाः विप्राः यज्ञेषुनमोभिः स्तुतिभिर्हविर्भिर्वा वोयुष्मान् इषध्यै अभिप्राप्तुं प्रार्चन् प्रार्चयन्ति प्रकर्षेणस्तुवन्ति द्यावा दिवं पृथिवी भूमिंच प्रस्तुवन्ति येषां विप्राणां मेधाविनां असमानि ब्रह्माणि स्तोत्राणि वनिनोन शाखाः वृक्षस्य शाखाः शाखाइव विष्वक् विश्वतः वियन्ति विशेषेणगच्छन्ति ते विप्राः प्रार्चन्निति पूर्वेण संबन्धः ॥ १ ॥

अथ द्वितीया—

प्रयज्ञएतुहेत्वोनसप्तिरुद्यच्छध्वंसमनसोघृताचीः ।
स्तृणीतबर्हिरध्वरायसाधूर्ध्वाशोचींषिदेवयून्यस्थुः ॥ २ ॥

प्र । यज्ञः । एतु । हेत्वः । न । सप्तिः । उत् । यच्छध्वम् ।
सऽमनसः । घृताचीः । स्तृणीत । बर्हिः । अध्वराय ।
साधु । ऊर्ध्वा । शोचींषि । देवऽयूनि । अस्थुः ॥ २ ॥

अयमस्मदीयोयज्ञः प्रैतु देवान् प्रतिगच्छतु तत्रदृष्टान्तः—हेत्वोन सप्तिः शीघ्रगामी अश्वोयथा तद्वत् हे ऋत्विजः सर्वे यूयं समनसः सदृशमनस्काः सन्तः घृताचीः स्रुचः उद्यच्छध्वं हस्ते उद्यम्य धारयत तथा अध्वराय यागं कर्तुं साधुसाधुकं बर्हिः कुशमयं स्तृणीत वेद्यां छादयत हे अग्ने देवयूनि देवान् कामयमानानि त्वदीयानि शोचींष्यर्चींषि ऊर्ध्वा ऊर्ध्वमुखानि अस्थुः तिष्ठन्तु ॥ २ ॥

अथ तृतीया–

आपुत्रासोनमातरंविभृत्राःसानौदेवासोबर्हिषःसदन्तु ।
आविश्वाचींविदथ्यामनक्त्वग्नेमानोदेवतातामृधस्कः ॥ ३ ॥

आ । पुत्रासः । न । मातरम् । विऽभृत्राः । सानौ । देवासः ।
बर्हिषः । सदन्तु । आ । विश्वाचीम् । विदथ्याम् । अनक्तु ।
अग्ने । मा । नः । देवऽताता । मृधः । करिति कः ॥ ३ ॥

मातरं जननीं विभृत्राः विशेषेणभर्तव्याः पुत्रासोन पुत्राइव तद्वदस्माकं भरणीया देवासोदेवाः बर्हिषः कुशमयस्य वेद्यामास्तीर्णस्य सानौ उन्नते देशे आसदन्तु उपविशन्तु हे अग्ने विदथ्यां यज्ञयोग्यां त्वदीयां ज्वालां विश्वाची विश्वं सर्वं हविरंचति गच्छतीति विश्वाची जुहूः आअनक्तु आसमन्तात्सिंचतु देवताता देवताती युद्धे नोस्माकं मृधः हिंसकान् हे अग्ने त्वं माकः माकार्षीः यज्ञवाचकोदेवतातिशब्दः अत्र संग्रामे वर्तते ॥ ३ ॥

अथ चतुर्थी–

तेसीषपन्तजोषमायजत्राऋतस्यधाराःसुदुघादुहानाः ।
ज्येष्ठंवोअद्यमहआवसूनामागन्तनसमनसोयतिष्ठ ॥ ४ ॥

ते । सीषपन्त । जोषम् । आ । यजत्राः । ऋतस्य । धाराः ।
सुऽदुघाः । दुहानाः । ज्येष्ठम् । वः । अद्य । महः । आ । वसूनाम् ।
आ । गन्तन । सऽमनसः । यति । स्थ ॥ ४ ॥

यजत्राः यजनीयाः ते इन्द्रादयोदेवाः ऋतस्योदकस्य सुदुघाः सुखेन दोग्धुं शक्याः धाराः दुहानाः वर्षन्तः जोषं पर्याप्तं यथा भवति तथा आसीषपन्त सपतिः परिचरणार्थः स्तुतिभिरासमन्तात्पर्यचीचरन् अस्मान् परिचरणं कुर्वन्तु स्वीकुर्वन्त्वितियावत् अद्यास्मिन्दिने हे देवाः वसूनां धनानां मध्ये ज्येष्ठं श्रेष्ठं वोयुष्मदीयं महो महनीयं धनं आगच्छतु यूयमपि समनसस्तुल्यमतयः सन्तः आगन्तन आगच्छत हे देवाः यूयं यतिष्ठ आगन्तनेति संबन्धः ॥ ४ ॥

अथ पञ्चमी—

एवानो॑अग्ने॒विक्ष्वा॒दश॑स्य॒त्वया॑व॒यंस॑हसाव॒न्नास्क्रा॑ः ।
रा॒याय॒ुजास॑ध॒मादो॒अरि॑ष्टा॒यूयंपा॑तस्व॒स्तिभि॒ः सदा॑नः ॥५॥१०॥

ए॒व । नः॒ । अ॒ग्ने॒ । वि॒क्षु । आ । द॒श॒स्य॒ । त्वया॑ । व॒यम् ।
स॒ह॒सा॒ऽव॒न् । आस्क्रा॑ः । रा॒या । यु॒जा । स॒ध॒ऽमाद॑ः । अरि॑ष्टाः ।
यू॒यम् । पा॒त॒ । स्व॒स्तिऽभि॑ः । सदा॑ । नः॒ ॥ ५ ॥ १० ॥

हे अग्ने एवं स्तुतस्त्वं विक्षु प्रजासु मध्ये नोस्मभ्यं आदशस्य धनं अभिप्रयच्छ हे सहसावन् बलवन्नग्ने त्वया आस्क्राः आस्कन्नाः वयं युजा नित्ययुक्तेन राया धनेन सधमादः सहमाद्यंतः अरिष्टाः अहिंसिताभवेम अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवा यूयं नोस्मान् कल्याणैः सर्वदा पालयत ॥ ५ ॥

॥ इति पंचमस्य चतुर्थे दशमोवर्गः ॥ १० ॥

दधिक्रांवइति पंचर्चमेकादशं सूक्तं वसिष्ठस्यार्षं दधिक्राख्यदेवताकं आद्याजगती साबुदधिक्रादिलिंगोक्तदेवताका शिष्टाश्चतस्त्रस्त्रिष्टुभः अनुक्रम्यतेहि— दधिक्रांदाधिकं जगत्याद्यालिंगोक्तदेवतेति । गतोविनियोगः ।

तत्र प्रथमा—

द॒धि॒क्रांवः॑प्रथ॒मम॒श्विनो॒पस॑म॒ग्निंस॒मिद्धं॒भग॑मू॒तये॑ह्वे ।
इन्द्रं॒विष्णुं॑पू॒षणं॒ब्रह्म॑ण॒स्पति॑मादि॒त्यान्द्यावा॑पृथि॒वीअ॒पः स्वः॑ ॥१॥

द॒धि॒ऽक्राम् । वः॒ । प्र॒थ॒मम् । अ॒श्विना॑ । उ॒षस॑म् । अ॒ग्निम् । सम्ऽइ॑द्धम् ।
भग॑म् । ऊ॒तये॑ । हु॒वे॒ । इन्द्र॑म् । विष्णु॑म् । पू॒षण॑म् । ब्रह्म॑णः । पति॑म् ।
आ॒दि॒त्यान् । द्यावा॑पृथि॒वी इति॑ । अ॒पः । स्वः॑१रिति॑ स्वः॑ ॥ १ ॥

हे स्तोतारोवोयुष्माकं ऊतये रक्षणाय प्रथमं दधिक्रां अश्वाभिमानिनीं देवतां हुवे आह्वयामि ततः अश्विना अश्विनौ देवौ उषसमुषोदेवतांच समिद्धं सम्यग्दीप्तमग्निंच भगं एतदाख्यं देवं च आह्वयामि इन्द्रं विष्णुं पूषणं च ब्रह्मणस्पतिं आदित्यान् द्यावापृथिवी अपः उदकदेवताः स्वः सूर्य इत्येतान् देवानाह्वयामि ॥ १ ॥

अथ द्वितीया—

दधिक्रामुनमसाबोधयन्तउदीराणायज्ञमुंपप्रयन्तः ।
इळांदेवींबर्हिषिसादयन्तोश्विनाविप्रासुहवांहुवेम ॥ २ ॥

दधिऽक्राम् । ऊँ इति । नमसा । बोधयन्तः । उत्ऽईराणाः ।
यज्ञम् । उपऽप्रयन्तः । इळाम् । देवीम् । बर्हिषि । सादयन्तः ।
अश्विना । विप्रा । सुऽहवा । हुवेम ॥ २ ॥

दधिक्रां एतन्नामकं अश्वविशेषं देवं नमसा स्तोत्रेण बोधयन्तः प्रज्ञापयन्तः उदीराणाः प्रेरयन्तः यज्ञं यागं उपप्रयन्तः उपक्रममाणा वयं बर्हिषि इळां हवीरूपां देवीं सादयन्तः आस्थापयन्तः सुहवा शोभनाह्वानौ विप्रा विप्रौ मेधाविनौ अश्विना अश्विनौ देवौ हुवेम आह्वयाम उइति पूरणः ॥ २ ॥

अथ तृतीया—

दधिक्रावाणंबुबुधानोअग्निमुपब्रुवउषसंसूर्यंगाम् ।
ब्रध्नंमंश्चतोर्वरुणस्यबभ्रुंतेविश्वास्मद्दुरितायावयन्तु ॥ ३ ॥

दधिऽक्रावाणम् । बुबुधानः । अग्निम् । उप । ब्रुवे ।
उषसम् । सूर्यम् । गाम् । ब्रध्नम् । मंश्चतोः । वरुणस्य । बभ्रुम् ।
ते । विश्वा । अस्मत् । दुःऽइता । यवयन्तु ॥ ३ ॥

दधिक्रावाणं अश्वविशेषं बुबुधानः स्तोत्रेण बोधयन्नहं अग्निं देवं उपब्रुवे उपस्तौमि तथा च उषसमुषोदेवतां सूर्यं सर्वस्य प्रेरकं देवं गां भूमिं वाग्देवतां वा एवं भूतान् देवान् अहमुपस्तौमि मंश्चतोः मन्यमानान् स्तुवतोजनान् चेतयते जानातीति यद्वा अभिमन्यमानांश्चातयते नाशयतीति मंश्चतुः तस्य वरुणस्य ब्रध्नं महान्तं बभ्रुं पिंगलवर्णमश्वं तस्यानयनार्थमहमुपब्रुवे ते देवाः अस्मदस्मत्तः विश्वा विश्वानि सर्वाणि दुरिता दुरितानि पापानि यवयन्तु पृथक्कुर्वन्तु ॥ ३ ॥

अथ चतुर्थी–

दधिक्रावांप्रथमोवाज्यर्वाग्रेरथानांभवतिप्रजानन् ।
संविदानउषसासूर्येणादित्येभिर्वसुभिरङ्गिरोभिः ॥ ४ ॥

दधिऽक्रावा । प्रथमः । वाजी । अर्वा । अग्रे । रथानाम् ।
भवति । प्रऽजानन् । सम्ऽविदानः । उषसा । सूर्येण । आदित्येभिः ।
वसुऽभिः । अङ्गिरःऽभिः ॥ ४ ॥

प्रथमः सर्वेषामश्वानांमुख्यः वाजी शीघ्रगामी अर्वा गमनशीलः दधिक्रावा अश्वरूपो देवः प्रजानन् रथसंयोजनीयांस्तांस्तानश्वानधिष्ठाय ज्ञातव्यानि सम्यक् जानन् रथानामग्रे प्रमुखोभवति कीदृशोश्वः उषसा उषोदेवतया सूर्येण सर्वस्य प्रेरकेण देवेन आदित्येभिरादित्यैश्च वसुभिश्च अंगिरोभिर्देवैः सह स्तोतव्यैर्ऋषिभिश्च संविदानः सम्यक् जानन् ऐकमत्यं माप्तइत्यर्थः ॥ ४ ॥

अथ पंचमी–

आनोदधिक्राःपथ्यामनक्त्वृतस्यपन्थामन्वेतवाउ ।
शृणोतुनोदैव्यंशर्धोअग्निःशृण्वन्तुविश्वेमहिषाअमूराः ॥५॥११॥

आ । नः । दधिऽक्राः । पथ्याम् । अनक्तु । ऋतस्य । पन्थाम् ।
अनुऽएतवै । ऊँ इति । शृणोतु । नः । दैव्यम् । शर्धः । अग्निः ।
शृण्वन्तु । विश्वे । महिषाः । अमूराः ॥ ५ ॥ ११ ॥

दधिक्राः अश्वरूपोदेवः ऋतस्य यज्ञस्य पंथां पंथानं मार्गं अन्वेतवै अनुगन्तुं प्रवृत्तानां नोस्माकं पथ्यां पदवीमानक्तु उदकेनासिंचतु उइतिपूरणः दैव्यं शर्धः देवसंबन्धिबलं ईदृग्भूतोग्निः नोस्मदीयं हवंशृणोतु अमूराः अमूढाः महिषा महान्तः विश्वे सर्वे देवाः अस्मदीयं हवं शृण्वन्तु ॥ ५ ॥

॥ इति पंचमस्य चतुर्थे एकादशोवर्गः ॥ ११ ॥

आदेवोयात्विति चतुर्ऋचं द्वादशं सूक्तं वसिष्ठस्यार्षं सवितृदेवताकं त्रैष्टुभं आदेवश्चतुष्कं सावित्रमित्यनुक्रान्तं । व्यूळ्हेदशरात्रे चतुर्थेहनि वैश्वदेवशस्त्रे इदंसावित्रनिविद्धानं सूत्र्यतेहि— चतुर्थेहन्यादेवोयात्विति । एषा वपानुवाक्या सूत्रितंच—आदेवोयातुसवितासुरत्नः सघानोदेवः सवितासहावेति । अश्वमेधे अनुसवनं तिस्रःसावित्र्यइष्टयः तत्रद्वितीयस्यामिष्टौ याज्येयं सूत्रितं- च—यइमाविश्वाजातान्यादेवोयात्विति ।

तत्र प्रथमा—

आदेवोयातुसवितासुरत्नोन्तरिक्षप्रावहमानोअश्वैः ।
हस्तेदधानोनर्यापुरूणिनिवेशयंञ्चप्रसुवंचभूम ॥ १ ॥

आ । देवः । यातु । सविता । सुऽरत्नः । अन्तरिक्षऽप्राः ।
वहमानः । अश्वैः । हस्ते । दधानः । नर्या । पुरूणि ।
निऽवेशयन् । च । प्रऽसुवन् । च । भूम ॥ १ ॥

सुरत्नः शोभनरत्नोपेतः अन्तरिक्षप्राः स्वकीयेन तेजसा अन्तरिक्षस्य पूरयिता अश्वैः स्वकीयैर्वाहैः वहमानः उह्यमानः सविता सर्वस्य प्रेरकोदेवो द्योतमानः आयातु आगच्छतु कीदृशः नर्या नर्याणि मनुष्यहितानि पुरूणि बहूनि धनानि हस्ते पाणौ दधानः दातुं धारयन् भूम भूतानि निवेशयञ्च रात्रिषु स्वेस्थाने स्थापयंश्च प्रसुवन् च अहःसु प्रेरयंश्च एवंभूतः स- विता देवआयातु ॥ १॥

अथ द्वितीया—

उदस्यबाहूशिथिराबृहन्ताहिरण्ययादिवोअन्ताँअनष्टाम् ।
नूनंसोअस्यमहिमापनिष्टसूरश्चिदस्माअनुदादपस्याम् ॥ २ ॥

उत् । अस्य । बाहूइति । शिथिरा । बृहन्ता । हिरण्यया ।
दिवः । अन्तान् । अनष्टाम् । नूनम् । सः । अस्य । महिमा ।
पनिष्ट । सूरः । चित् । अस्मै । अनु । दात् । अपस्याम् ॥ २ ॥

शिथिरा शिथिलौ दानार्थं प्रसारितौ पृहन्ता बृहन्तौ महान्तौ हिरण्यया हिरण्ययौ सुवर्णमयौ अस्यसवितुः संबंधिनौ बाहू हस्तौ दिवोन्तरिक्षस्य अन्तान् पर्यन्तान् उदनष्टां ऊर्ध्वौ सन्तौ व्याप्नुवतां नूनमद्य अस्य ईदृग्रूपस्य सवितुः सतादृशोमहिमा महत्त्वं पनिष्ट अस्माभिः स्तूयते सूरश्चित् सूर्योपि अस्मै सवित्रे अपस्यां कर्मेच्छां अनुदात् अनुददातु ॥ २ ॥

सावित्रेपशौ पुरोडाशस्य हविषोः सघानइविद्वे अनुवाक्ये सूत्रंपूर्वमुदाहृतं आश्वमेधिकीषु सावित्रेष्टिषु तृतीयस्यामिष्टौ इमे एव याज्यानुवाक्ये सूत्रितंच—सघानोदेवःसवितासहावेति द्वे इति ।

सेषा सूक्ते तृतीया—

सघानोदेवःसवितासहावासाविषद्वसुपतिर्वसूनि ।
विश्रयमाणोअमतिमुरूचींमर्तभोजनमधरासतेनः ॥ ३ ॥
सः । घ । नः । देवः । सविता । सहऽवा । आ । साविषत् ।
वसुऽपतिः । वसूनि । विऽश्रयमाणः । अमतिम् । उरूचीम् ।
मर्तऽभोजनम् । अध । रासते । नः ॥ ३ ॥

सहावा तेजोन्तराण्यभिभावुकं तेजोयस्य सः वसुपतिर्धनानां पालकः ससवितादेवः नोस्मभ्यं वसूनि धनानि आसाविषत् आसमन्तात् प्रेरयति घेतिपूरणः ससवितादेवः उरूचीं विस्तीर्णगमनां अमतिं रूपं दीप्तिमित्यर्थः विश्रयमाणः निषेवमाणः सन् अध अधुना नोस्मभ्यं मर्तभोजनं मनुष्याणां भोगयोग्यं धनं रासते ददातु ॥ ३ ॥

अथ चतुर्थी—

इमागिरःसवितारंसुजिह्वंपूर्णगभस्तिमीळतेसुपाणिम् ।
चित्रंवयोबृहदस्मेदधातुयूयंपातस्वस्तिभिःसदानः ॥ ४ ॥ १२ ॥
इमाः । गिरः । सवितारम् । सुऽजिह्वम् । पूर्णऽगभस्तिम् ।
ईळते । सुऽपाणिम् । चित्रम् । वयः । बृहत् । अस्मे इति ।
दधातु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ४ ॥ १२ ॥

इमा ईदृग्भूतागिरः गृणन्ति स्तुवन्तीति गिरः स्तोत्र्यः प्रजाः यद्वा इमाः स्तुतिरूपावाचः सुजिह्वं शोभनजिह्वं शोभनवाचमित्यर्थः पूर्णगभस्तिं संपूर्णधनं सुपाणिं शोभनहस्तं सवितारं

देवं ईळ्वे स्तुवन्ति सच सविता चित्रं चायनीयं वृहन्महत् वयोन्नं अस्मे अस्मासु दधातु यद्वा अस्मे अस्मभ्यं मयच्छतु हे सवितृप्रमुखादेवाः यूयं नोस्मान् स्वस्तिभिः कल्याणैः सदा सर्वदा पात पालयत ॥ ४ ॥

॥ इति पंचमस्य चतुर्थे द्वादशोवर्गः ॥ १२ ॥

इमारुद्रायेति चतुर्ऋचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं रुद्रदेवताकं अंत्यात्रिष्टुप् शिष्टाजगत्यः तथाचानुक्रमणिका—इमारौद्रंत्रिष्टुबन्तमिति शूलगवादिषुरौद्रयज्ञेषुअनेनसूक्तेन उदीचीदिक् उपस्थेया सूत्र्यतेहि—इमारुद्रायस्थिरधन्वनइति सर्वरुद्रयज्ञेषु दिशामुपस्थानमिति ।

तत्र प्रथमा—

इमारुद्रायस्थिरधन्वनेगिरःक्षिप्रेषवेदेवायस्वधान्ने ।
अषाळ्हायसहमानायवेधसेतिग्मायुधायभरताशृणोतुनः ॥ १ ॥

इमाः । रुद्राय । स्थिरऽधन्वने । गिरः । क्षिप्रऽइषवे । देवाय ।
स्वधाऽन्ने । अषाळ्हाय । सहमानाय । वेधसे ।
तिग्मऽआयुधाय । भरत । शृणोतु । नः ॥ १ ॥

हे अस्मदीयाः स्तोतारोयूयं इमागिरः स्तुतीः रुद्राय एतन्नामकाय देवाय भरत धारयत कीदृशाय स्थिरधन्वने दृढधनुष्काय क्षिप्रेषवे शीघ्रगामिबाणाय स्वधान्ने अन्नवते अषाळ्हाय केनाप्यनभिभूताय सहमानाय शत्रूणामभिभवित्रे वेधसे विधात्रे तिग्मायुधाय तीक्ष्णास्त्राय एवंभूताय रुद्रदेवाय स्तुतीर्भरत सच रुद्रः नोस्मदीयाः स्तुतीः शृणोतु ॥ १ ॥

अथ द्वितीया—

सहिक्षयेणक्षम्यस्यजन्मनः साम्राज्येनदिव्यस्यचेतति ।
अवन्नवन्तीरुपनोदुरश्चरानमीवोरुद्रजासुनोभव ॥ २ ॥

सः । हि । क्षयेण । क्षम्यस्य । जन्मनः । साम्ऽराज्येन ।
दिव्यस्य । चेतति । अवन् । अवन्तीः । उप । नः ।
दुरः । चर । अनमीवः । रुद्र । जासु । नः । भव ॥ २ ॥

सहि सखलु रुद्रोदेवः क्षम्यस्य क्षमायां पृथिव्यां भवः तस्य जन्मनोजनस्य क्षयेणे-श्वर्येण चेतति प्रज्ञायते दिव्यस्य जनस्यच साम्राज्येनैश्वर्येण प्रज्ञायते । शेषः प्रत्यक्षकृतः हे रुद्रदेव त्वंच अवन्तीः त्वां स्तोत्रैस्तर्पयन्तीः नोस्मदीयाः प्रजाः अवन् पालयन् दुरोदुर्याणि अस्मदीयानि गृहाणि उपचर उपगच्छ किंच त्वं नोस्मदीयासु प्रजासु अनमीवः अमीवा-रोगाः तानकुर्वन् भव ॥ २ ॥

अथ तृतीया–

यातेदि॒द्युदव॑सृष्टादि॒वस्परि॑क्ष्म॒याचर॑ति॒परि॒साव॑णक्तु॒नः ।
स॒हस्रं॑तेस्वपिवात॒भेष॒जामान॑स्तो॒केषु॒तन॑येषु॒रीरिषः ॥ ३ ॥

या । ते॒ । दि॒द्युत् । अव॑ऽसृष्टा । दि॒वः । परि॑ । क्ष्म॒या ।
चर॑ति । परि॑ । सा । वृ॒ण॒क्तु॒ । नः॒ । स॒हस्र॑म् । ते॒ ।
सु॒ऽअ॒पि॒वा॒त॒ । भे॒ष॒जा । मा । नः॒ । तो॒केषु॑ । तन॑येषु । रि॒रि॒षः ॥ ३॥

हे रुद्र ते वैद्युतात्मनस्तव संबन्धिनीदिवस्परि अन्तरिक्षसकाशादवसृष्टा विमुक्ता या दि-द्युत् अशनिरूपा हेतिः क्ष्मया क्षित्या क्षितौ वा चरति वर्तते सा दिद्युत् नोस्मान् परिवृणक्तु परित्यजतु अपिच हे स्वपिवात ते तव सहस्रं बहूनि भेषजा भेषजानि यान्यौषधानिसन्ति ता-न्यस्मभ्यं प्रयच्छेतिशेषः नोस्माकं तोकेषु पुत्रेषु तनयेषुच मा रिरिषः हिंसां माकृथाः ॥ ३ ॥

अथचतुर्थी–

मानो॑वधीरुद्रमापरा॑दा॒माते॑भूम॒प्रसि॑तौहीळि॒तस्य॑ ।
आनो॑भजब॒र्हिषि॑जीवशं॒सेयू॒यंपा॑तस्व॒स्तिभिः॒सदा॑नः ॥ ४ ॥१३॥

मा । नः॒ । व॒धीः॒ । रु॒द्र॒ । मा । परा॑ । दाः॒ । मा । ते॒ । भू॒म॒ ।
प्रऽसि॑तौ । ह्री॒ळि॒तस्य॑ । आ । नः॒ । भ॒ज॒ । ब॒र्हिषि॑ । जी॒वऽशं॒से ।
यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ४ ॥ १३ ॥

हे रुद्र त्वं नोस्मान् मावधीः माहिंसीः तथामापरादाः माअत्याक्षीः अपिच हीळितस्य क्रुद्धस्य ते तव प्रसितौ प्रकर्षेणबन्धने वयं च माभूम । किंच जीवशंसे जीवैराशंसनीये बर्हिषि

यन्ते नोस्मान् आभज भागिनः कुरु हे रुद्रप्रमुखादेवाः यूयं नोस्मान् कल्याणैः सर्वदा पालयत॥ ४ ॥

॥ इति पंचमस्य चतुर्थे त्रयोदशोवर्गः ॥ १३ ॥

आपोयंवइति चतुर्ऋचं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमब्देवताकं आपोयमापमित्यनुक्रान्तंच गतोविनियोगः ।

तत्र प्रथमा–

आपोयंवःप्रथमंदेवयन्तइन्द्रपानमूर्मिमकृण्वतेळः ।
तंवोवयंशुचिमरिप्रमद्यघृतप्रुषंमधुमन्तंवनेम ॥ १ ॥

आपः । यम् । वः । प्रथमम् । देवऽयन्तः । इन्द्रऽपानम् ।
ऊर्मिम् । अकृण्वत । इळः । तम् । वः । वयम् । शुचिम् ।
अरिप्रम् । अद्य । घृतऽप्रुषम् । मधुऽमन्तम् । वनेम ॥ १ ॥

देवयन्तोदेवानिच्छन्तोध्वर्यवः हे आपः हे अब्देवताः वोयुष्माकं कार्यभूतं इन्द्रपानं इंद्रेण पातव्यं इळः इळाया भूम्याः संभूतं यमूर्मिं सोमाख्यं यं रसं प्रथमं पुरा अकृण्वत अभि अभिषवणवचनादिभिः समस्कुर्वत अद्येदानीं वयमपि वोयुष्मदीयं तमूर्मिं वनेम। संभजेमहि कीदृशं शुचिं शुद्धं अरिप्रं पापरहितं घृतप्रुषं वृष्टिलक्षणमुदकं सिंचंतं मधुमन्तं मधुररसोपेतं एवंभूतं तं वनेमेति संबन्धः॥ १॥

अथ द्वितीया–

तमूर्मिमापोमधुमत्तमंवोपान्नपादवत्वाशुहेमा ।
यस्मिन्निन्द्रोवसुभिर्मादयातेतमश्यामदेवयन्तोवोअद्य ॥ २ ॥

तम् । ऊर्मिम् । आपः । मधुमत्ऽतमम् । वः । अपाम् ।
नपात् । अवतु । आशुऽहेमा । यस्मिन् । इन्द्रः । वसुऽभिः ।
मादयाते । तम् । अश्याम । देवऽयन्तः । वः । अद्य ॥ २ ॥

हे आपः एतत्संज्ञकादेवाः वोयुष्मदीयं मधुमत्तमं रसवत्तमं तमूर्मिं प्रसिद्धं सोमाख्यं रसं आशुहेमा शीघ्रगतिः अपांनपात् एतदाख्योदेवः अवतु पालयतु इन्द्रः यस्मिन्नूर्मौ वसुभिर्वा-

सर्कैर्देवैः सह मादयाते मादयेत् अद्यअस्मिन् दिने देवयन्तोदेवकामावयं वोयुष्मदीयं तमूर्मिं अश्याम प्राप्नुयाम ॥ २ ॥

अथ तृतीया–

शतपवित्राःस्वधयामदन्तीर्देवीर्देवानामपियन्तिपाथः ।
ताइन्द्रस्यनमिनन्तिव्रतानिसिन्धुभ्योहव्यंघृतवज्जुहोत ॥ ३ ॥

शतऽपवित्राः । स्वधया । मदन्तीः । देवीः । देवानाम् ।
अपि । यन्ति । पाथः । ताः । इन्द्रस्य । न । मिनन्ति ।
व्रतानि । सिन्धुऽभ्यः । हव्यम् । घृतऽवत् । जुहोत ॥ ३ ॥

शतपवित्राः शतं बहूनि पवित्राणि पावनानि रूपाणि यासां ताः स्वधया स्वकार्यभूतेनान्नेन मदन्तीर्जनान्मादयन्त्यः देवीर्देव्यः द्योतमानाआपः देवानामिन्द्रादीनां पाथः स्थानमपि यन्ति प्रविशन्ति तास्तादृश्यआपः इन्द्रस्य मीणनानि व्रतानि यज्ञादीनि कर्माणि नमिनन्ति नहिंसन्ति उत्पादयन्तीत्यर्थः हे अध्वर्यवोयूयं सिन्धुभ्यस्ताभ्योद्भ्यः घृतवत् उपस्तरणाभिघारणलक्षणाज्ययुक्तं हव्यं पुरोडाशादिकं हविर्जुहोत जुहुत ॥ ३ ॥

अथ चतुर्थी–

याःसूर्योरश्मिभिराततानयाभ्यइन्द्रोअरदद्गातुमूर्मिम् ।
तेसिन्धवोवरिवोधातनानोयूयंपातस्वस्तिभिःसदानः ॥ ४ ॥१४॥

याः । सूर्यः । रश्मिऽभिः । आऽततान । याभ्यः । इन्द्रः । अरदत् ।
गातुम् । ऊर्मिम् । ते । सिन्धवः । वरिवः । धातन ।
नः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ४ ॥ १४ ॥

सूर्योदेवः याआपः रश्मिभिः स्वकीयैः किरणैः आततान विस्तारयति सूर्योहि रश्मिभिरुदकसारमादाय वर्षतीत्यर्थः याभ्योद्भ्यश्च ऊर्मिं अर्तेरिदं रूपं गमनयोग्यं गातुं मेघेभ्योनिर्गमनसाधनं मार्गं इन्द्रोपि अरदत् वज्रेण मेघान् ताडयन् प्रयच्छति हे सिंधवः आपः ते यूयं नोस्मभ्यं वरिवोधनं धातन धत्त प्रयच्छत । ते इति सिंधुशब्देन समानाधिकरणत्वात् पुल्लिंगत्वं हे अब्देवताः यूयं सर्वदा नोस्मान् कल्याणैः पालयत ॥ ४ ॥

॥ इति पंचमस्य चतुर्थे चतुर्दशोवर्गः ॥ १४ ॥

ऋभुक्षणइति चतुर्ऋचं पंचदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं ऋभुदेवताकं अन्त्यायाविकल्पेन विश्वेदेवादेवता तथाचानुक्रान्तं— ऋभुक्षणआर्भवमंत्यावैश्वदेवीवेति। दशमेहनि वैश्वदेवशस्त्रेआर्भवनिविद्धानं सूत्र्यतेहि—ऋभुक्षणइत्यार्भवमिति।

तत्र प्रथमा—

ऋभुक्षणोवाजामादयध्वमस्मेनरोमघवानःसुतस्य।
आवोर्वाचःक्रतवोनयातांविभ्वोरथंनर्यंवर्तयन्तु ॥ १ ॥

ऋभुक्षणः। वाजाः। मादयध्वम्। अस्मे इति। नरः।
मघऽवानः। सुतस्य। आ। वः। अर्वाचः। क्रतवः। न।
याताम्। विऽभ्वः। रथम्। नर्यम्। वर्तयन्तु ॥ १ ॥

ऋभुक्षाइति ऋभूणां ज्येष्ठस्याख्या वाजइतितु कनिष्ठस्य अत्र ऋभुक्षणोवाजाइति बहुवचनेन ऋभवस्त्रयोगृह्यन्ते हे ऋभुक्षणोवाजा नरोनेतारः मघवानोधनवन्तः एवंभूताहेऋभवः यूयं अस्मे अस्मासु स्थितेन सुतस्याभिषुतेन सोमेन मादयध्वं तृप्ताभवत नेतिसंप्रत्यर्थे इदानीं यातां गच्छतां वोयुष्मदीयाः क्रतवः कर्मणां कर्तारः विभ्वः विभवः समर्थाअश्वाः अर्वाचोर्वाचः अस्मदभिमुखाः सन्तः नर्यं मनुष्यहितं रथं युष्मदीयं आवर्तयन्तु आगमयन्तु ॥ १ ॥

अथ द्वितीया—

ऋभुर्ऋभुभिरभिवःस्यामविभ्वोविभुभिःशवसाशवांसि।
वाजोअस्माँअवतुवाजसाताविन्द्रेणयुजातरुषेमवृत्रम् ॥ २ ॥

ऋभुः। ऋभुऽभिः। अभि। वः। स्याम। विऽभ्वः। विभुऽभिः।
शवसा। शवांसि। वाजः। अस्मान्। अवतु। वाजऽसातौ।
इन्द्रेण। युजा। तरुषेम। वृत्रम् ॥ २ ॥

हेऋभवः ऋभुभिःयुष्माभिः वयं ऋभुः उरुभवन्तीत्यृभवः सन्तः विभुभिर्युष्माभिः विभ्वोविभवश्च सन्तः शवांसि शत्रूणां बलानि वः शवसा युष्मदीयेन बलेन अभिस्याम अभिभवेम तथा वाजसातौ संग्रामे वाजः एतत्संज्ञकऋभुः अस्मानवतु पालयतु अपिच युजा सहायभूतेनेन्द्रेण वृत्रं शत्रुं वयं तरुषेम हनाम यायेण ऋभवोपीन्द्रेणसहस्तूयन्ते इति ॥ २ ॥

अथ तृतीया–

तेचिद्धिपूर्वीरभिसन्तिशासाविश्वाँअर्यउपरतातिवन्वन् ।
इन्द्रोविभ्वाँऋभुक्षावाजोअर्यःशत्रोर्मिथत्याकृणवन्विनृम्णम् ॥३॥

ते । चित् । हि । पूर्वीः । अभि । सन्ति । शासा । विश्वान् ।
अर्यः । उपरऽताति । वन्वन् । इन्द्रः । विऽभ्वा । ऋभुक्षाः ।
वाजः । अर्यः । शत्रोः । मिथत्या । कृणवन् । वि । नृम्णम् ॥ ३ ॥

तेतादृशा इन्द्रऋभवश्च पूर्वीर्बह्वीः अस्मच्छत्रुसेनाः शासा शासनेन स्वकीयया आज्ञया यद्वा विशस्यते हिंस्यतेनेनेति शासशब्दआयुधवाची तेन अभिसन्ति अभिभवन्ति चिद्धीती-मौ पूरणौ किंच उपरताति सप्तम्यालुक् उपरैरुपलैः पाषाणसदृशैरायुधैः स्तायते विस्तार्यइत्युपरतातिं युद्धं तस्मिन् विश्वान् समस्तान् अर्यअरीन् शत्रून् वन्वन् हिंसन्ति विभ्वाऋभुक्षा वाजः एतत्संज्ञकाऋभवश्चेन्द्रश्च अर्यः शत्रूणामभिगन्तारः सन्तः शत्रोः संबन्धिनृम्णं बलं मिथत्या मिथतेरिदं रूपं मिथतिर्हिंसा तया विकृण्वन् विकुर्वन्तु विनाशयन्त्वित्यर्थः ॥ ३ ॥

अथ चतुर्थी–

नूदेवासोवरिवःकर्तनानोभूतनोविश्वेवसेसजोषाः ।
समस्मेइषंवसवोददीरन्यूयंपातस्वस्तिभिःसदानः ॥ ४ ॥ १५ ॥

नु । देवासः । वरिवः । कर्तन । नः । भूत । नः । विश्वे । अवसे ।
सऽजोषाः । सम् । अस्मे इति । इषम् । वसवः । ददीरन् ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ४ ॥ १५ ॥

हे देवासोदेवाः द्योतमानाऋभवोयूयं नु अद्य नोस्मभ्यं वरिवोधनं कर्तन कुरुत प्रयच्छत तथा विश्वे सर्वे ऋभवोयूयं सजोषाः सहप्रीयमाणाः सन्तः नोस्माकं अवसे रक्षणाय भूत भवत । अपिच वसवः प्रशस्याऋभवः इषमन्नं अस्मेअस्मभ्यं संददीरन् संप्रयच्छेयुः हेऋभवोयूयं अस्मान् सर्वदा कल्याणैः रक्षत ॥ ४ ॥

॥ इति पंचमस्य चतुर्थे पंचदशोवर्गः ॥ १५ ॥

समुद्रज्येष्ठाइति चतुर्ऋचं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमब्देवताकं तथाचानुक्रान्तं—समुद्रज्येष्ठाआपमिति गतोविनियोगः।

तत्र प्रथमा—

समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायन्त्यनिविशमानाः।
इन्द्रोयावज्रीवृषभोरुरादताआपोदेवीरिहमामवन्तु ॥ १ ॥

समुद्रऽज्येष्ठाः। सलिलस्य। मध्यात्। पुनानाः। यन्ति।
अनिऽविशमानाः। इन्द्रः। याः। वज्री। वृषभः। ररादं। ताः।
आपः। देवीः। इह। माम्। अवन्तु॥ १ ॥

समुद्रज्येष्ठाः समुद्रोर्णवः ज्येष्ठः प्रशस्यतमोयासामपां ताः सलिलस्य अन्तरिक्षनामैतद् अन्तरिक्षस्य मध्याद् माध्यमिकात्स्थानाद् यन्ति गच्छन्ति कीदृश्यः पुनानाः विश्वं शोधयन्त्यः अनिविशमानाः सर्वदागच्छन्त्यः वज्री वज्रभृद् वृषभः कामानां वर्षितेन्द्रः याः निरुद्धाआपः ररादं लिखति देवीर्देव्यस्ताआपः इहास्मिन्प्रदेशेस्थितं मां अवन्तु रक्षन्तु अभिगच्छन्तु वा ॥ १ ॥

अथ द्वितीया—

याआपोदिव्याउतवास्रवन्तिखनित्रिमाउतवायाःस्वयंजाः।
समुद्रार्थायाःशुचयःपावकास्ताआपोदेवीरिहमामवन्तु ॥ २ ॥

याः। आपः। दिव्याः। उत। वा। स्रवन्ति। खनित्रिमाः।
उत। वा। याः। स्वयम्ऽजाः। समुद्रऽअर्थाः। याः। शुचयः।
पावकाः। ताः। आपः। देवीः। इह। माम्। अवन्तु॥ २ ॥

याआपः दिव्याः अन्तरिक्षभवाः सन्ति उतवा अपिच याआपः नद्यादिगताः सत्यः स्रवन्ति गच्छन्ति याश्च खनित्रिमाः खननेन निर्वृत्ताः उतवा अपिच याः स्वयंजाः स्वयमेव प्रादुर्भवंत्यः समुद्रएवार्थोगन्तव्योयासां ताः समुद्रार्थाः शुचयोदीप्तियुक्ताः पावकाः शोधयित्र्यश्च भवन्ति ताआपोमामवन्त्विति ॥ २ ॥

अथ तृतीया—

यासांराजावरुणोयातिमध्येंसत्यानृतेअंवपश्यञ्जनानाम् ।
मधुश्चुतःशुचयोयाःपावकास्ताआपोदेवीरिहमामवन्तु ॥ ३ ॥

यासाम् । राजा । वरुणः । याति । मध्ये । सत्यानृते इति ।
अवऽपश्यन् । जनानाम् । मधुश्चुतः । शुचयः । याः । पावकाः ।
ताः । आपः । देवीः । इह । माम् । अवन्तु ॥ ३ ॥

वरुणः यासामपां राजास्वामी मध्येमध्यमलोके याति गच्छति किंकुर्वन् जनानां प्रजानां सत्यानृते सत्यंचानृतंच अवपश्यन् जानन्नित्यर्थः याआपः मधुश्चुतः रसं क्षरंत्यः शुचयोदीप्तियुक्ताः पावकाः शोधयित्र्यः ताआपोदेव्योमां रक्षंत्विति ॥ ३ ॥

अथ चतुर्थी—

यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्जंमदन्ति ।
वैश्वानरोयास्वग्निःप्रविष्टस्ताआपोदेवीरिहमामवन्तु ॥४॥१६॥

यासु । राजा । वरुणः । यासु । सोमः । विश्वे । देवाः । यासु ।
ऊर्जम् । मदन्ति । वैश्वानरः । यासु । अग्निः । प्रऽविष्टः । ताः ।
आपः । देवीः । इह । माम् । अवन्तु ॥ ४ ॥ १६ ॥

अपांराजावरुणः यास्वप्सु वर्तते सोमः यास्वप्सु वर्तते यास्वप्सु स्थिताः विश्वे सर्वे देवाः ऊर्जमन्नं मदन्ति वैश्वानरोग्निः यासुप्रविष्टः ताआपोदेव्यःइहस्थितं मां अवन्तु ॥ ४ ॥

॥ इति पंचमस्य चतुर्थे षोडशोवर्गः ॥ १६ ॥

आमां मित्रावरुणेति चतुर्ऋचं सप्तदशं सूक्तं वसिष्ठस्यार्षं चतुर्थ्यंतिजगती न्यूहेनशक्करीवा आदितस्तिस्रोजगत्यः प्रथमा मैत्रावरुणी द्वितीयाग्नेयी तृतीयावैश्वदेवी चतुर्थी गंगादिनदीदेवताका तथाचानुक्रमणिका—आमांमैत्रावरुण्याग्नेयी वैश्वदेवी नदीस्तुतिर्जांगतमंत्यातिजगती शक्करीवेति । अस्यसूक्तस्य प्रत्यृचं विषादिहरणे विनियोगोलिंगादवगन्तव्यः ।

तत्र प्रथमा—

आमांमित्रावरुणेहरक्षतंकुलाययद्विश्वयन्मानआगन् ।
अजकावंदुर्दृशीकंतिरोदधेमामांपद्येनरपसाविदत्सरुः ॥ १ ॥

आ । माम् । मित्रावरुणा । इह । रक्षतम् । कुलायर्यत् ।
विऽश्वर्यत् । मा । नः । आ । गन् । अजकाऽवम् । दुःऽदर्शीकम् ।
तिरः । दधे । मा । माम् । पद्येन । रपसा । विदत् । त्सरुः ॥ १ ॥

हे मित्रावरुणा मित्रावरुणौ युवां इहास्मिंल्लोके मां आरक्षतं आभिमुख्येन पालयतं कुलाययत् कुलायं स्थानं तत्कुर्वत् विश्वयत् विशेषेण वर्धमानं विषं नोस्मान् आ आभिमुख्येन मागन् मागमत् मागच्छतु तथा अजकावं अजकानाम रोगविशेषः तद्वत् दुर्दर्शीकं दुर्दर्शनं विषं तिरोदधे तिरोधत्तां नश्यत्वित्यर्थः तथा त्सरुः छद्मगामी जिह्मगः सर्पइत्यर्थः मां पद्येन पादभवेन रपसा रपिः शब्दकर्मा शब्देन माविदत् माजानातु ॥ १ ॥

अथ द्वितीया–

यद्विजामन्परुषिवन्दनंभुवदष्ठीवन्तौपरिकुल्फौचदेहत् ।
अग्निष्टच्छोचन्नपबाधतामितोमामांपद्येनरपसाविदत्त्सरुः ॥२॥

यत् । विऽजामन् । परुषि । वन्दनम् । भुवत् । अष्ठीवन्तौ । परि ।
कुल्फौ । च । देहत् । अग्निः । तत् । शोचन् । अप । बाधताम् ।
इतः । मा । माम् । पद्येन । रपसा । विदत् । त्सरुः ॥ २ ॥

वन्दनं एतत्संज्ञकं यद्विषं विजामन् विविधजन्मनि परुषि वृक्षादीनां पर्वणि भुवत् उद्भवेत् यच्च विषं अष्ठीवन्तौ जानुनी कुल्फौ गुल्फौच परिदेहत् दिहउपचये उपचितंकुर्यात् अग्निर्देवः शोचन् दीप्यमानः सन् इतोस्माज्जनात् तद्विषं अपबाधतां अपहन्तु शिष्टं व्याख्यातं ॥ २ ॥

अथ तृतीया–

यच्छल्मलौभवतियन्नदीषुयदोषधीभ्य.परिजायतेविषम् ।
विश्वेदेवानिरितस्तत्सुवन्तुमामांपद्येनरपसाविदत्त्सरुः ॥ ३ ॥

यत् । शल्मलौ । भवति । यत् । नदीषु । यत् । ओषधीभ्यः । परि ।
जायते । विषम् । विश्वे । देवाः । निः । इतः । तत् । सुवन्तु । मा ।
माम् । पद्येन । रपसा । विदत् । त्सरुः ॥ ३ ॥

यद्विषं शल्मलौ एतत्संज्ञके वृक्षेभवति तद्विषं नदीषु तत्रस्थासु अप्सु प्रादुर्भवति परीति पंचम्यर्थानुवादी ओषधीभ्यः सकाशाद्यद्विषं जायते उत्पद्यते विश्वे सर्वे देवाः तद्विषं इतोस्माज्जनाद्देशाद्वा निः सुवन्तु निःशेषेण प्रेरयन्तु मामामितिशिष्टं व्याख्यातं ॥ ३ ॥

अथ चतुर्थी–

याःप्रवतोनिवतउद्वतउदन्वतीरनुदकाश्चयाः ।
ताअस्मभ्यंपयसापिन्वमानाःशिवादेवीरशिपदाभवन्तु
सर्वानद्योअशिमिदाभवन्तु ॥ ४ ॥ १७ ॥

याः । प्रऽवतः । निऽवतः । उत्ऽवतः । उदन्ऽवतीः । अनुदकाः । च ।
याः । ताः । अस्मभ्यम् । पयसा । पिन्वमानाः । शिवाः । देवीः ।
अशिपदाः । भवन्तु । सर्वाः । नद्यः । अशिमिदाः । भवन्तु॥४॥१७॥

यानद्यः प्रवतः प्रवणदेशे गच्छंत्यः या निवतः निम्नदेशे गच्छन्त्यः या उद्वतः उन्नतदेशेगच्छन्त्यः उदन्वतीः उदकवत्यः अनुदकाश्च उपकरहिताश्च यानद्यः यान्ति पयसोदकेन पिन्वमानाः विश्वमाप्याययन्त्यः देवीर्देव्योद्योतमानाः तास्ताहश्योनद्यः अस्मभ्यं अशिपदाः शिपदंनाम रोगविशेषः तदकुर्वत्यः सत्यः शिवाः कल्याण्योभवन्तु अपिच सर्वास्तानद्यः अशिमिदाः शिमिर्वधकर्मा अहिंसामदाभवन्तु ॥ ४ ॥

॥ इति पंचमस्य चतुर्थे सप्तदशोवर्गः ॥ १७ ॥

आदित्यानामिति तृचमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभंआदित्यदेवताकं अनुक्रम्यतेच– आदित्यानां तृचमादित्यं त्विति । गतःसूक्तविनियोगः । आदित्यदेवताकेपशौ आदित्यानामवसेति वपायाअनुवाक्या सूत्रितंच–आदित्यानामवसानूतनेनेमागिरआदित्येभ्यइति आदित्यग्रहस्यैपानुवाक्या सूत्रितं च–आदित्यानामवसानूतनेन होतायक्षदादित्यानिति ।

तत्र प्रथमा–

आदित्यानामवसानूतनेनसक्षीमहिशर्मणाशंतमेन ।
अनागास्त्वेअदितित्वेतुरासइमंयज्ञंदधतुश्रोषमाणाः ॥ १ ॥

आ॒दि॒त्याना॑म् । अव॑सा । नूत॑नेन । स॒क्षी॒महि॑ । शर्म॑णा ।
शम्ऽत॑मेन । अ॒ना॒गाः॒ऽत्वे । अ॒दि॒ति॒ऽत्वे । तु॒रासः॑ ।
इ॒मम् । य॒ज्ञम् । द॒ध॒तु॒ । श्रोप॑माणाः ॥ १ ॥

आदित्यानां अदितेःपुत्राणां एतत्संज्ञकानां देवानां अवसा रक्षणेन तद्धेतुभूतेनेत्यर्थः नूतनेनाद्यतनेन शंतमेन शंसुखं अतिशयेन तत्करणेन शर्मणा शर्मेति गृहनामैतत् गृहेण सक्षीमहि वयं संगच्छेमहि तुरासः तुराः त्वरिताआदित्याः श्रोपमाणाः अस्मदीयानि स्तोत्राणि शृण्वन्तः यज्ञं यष्टारमिमं जनं अनागास्त्वे अनपराधत्वेच अदितित्वे अदीनत्वेच दधतु स्थापयन्तु ॥ १

आदित्यासोअदितिरित्यादित्यग्रहस्य याज्या सूत्रितं च—आदित्यासोअदितिर्मादयन्तामिति नैतंग्रहमीक्षेत ह्रूयमानमिति ।

सैषा सूक्ते द्वितीया—

आ॒दि॒त्यासो॒अदि॑तिर्मादयन्तां॒मि॒त्रोअ॑र्य॒मावरु॑णो॒रजि॑ष्ठाः ।
अ॒स्माकं॑सन्तु॒भुव॑नस्य॒गो॒पाःपिब॑न्तु॒सोम॒मव॑सेनोअ॒द्य ॥ २ ॥

आ॒दि॒त्यासः॑ । अदि॑तिः । मा॒दय॑न्ता॒म् । मि॒त्रः । अ॒र्य॒मा ।
वरु॑णः । रजि॑ष्ठाः । अ॒स्माक॑म् । स॒न्तु॒ । भुव॑नस्य । गो॒पाः ।
पिब॑न्तु । सोम॑म् । अव॑से । नः॒ । अ॒द्य ॥ २ ॥

आदित्यासः आदित्यादेवाः अदितिस्तेषांमाताच यद्वा अदितिरिति देवविशेषणं अदितिः अदितयः अदीनाः रजिष्ठाः अतिशयेन ऋजवः मित्रः अर्यमा वरुणश्च एतत्संज्ञकाः मादयन्तां तृप्ताः सन्तु भुवनस्य सर्वस्य जगतः गोपाः रक्षकाः एवंभूतादेवाः अस्माकं सन्तु अस्माकमेव रक्षकाभवंत्वित्यर्थः अद्यास्मिन् दिने नोस्माकमवसे रक्षणाय सोममस्माभिरभिषुतं पिबन्तु ॥ २ ॥

अथ तृतीया—

आ॒दि॒त्याविश्वे॑म॒रुत॑श्च॒विश्वे॑दे॒वाश्च॒विश्व॑ऋ॒भव॑श्च॒विश्वे॑ ।
इन्द्रो॑अ॒ग्निर॒श्विना॑तुष्टु॒वा॒नायू॒यंपा॑तस्व॒स्तिभि॒ःसदा॑नः ॥३॥१८॥

आदित्याः । विश्वे । मरुतः । च । विश्वे । देवाः । च ।
विश्वे । ऋभवः । च । विश्वे । इन्द्रः । अग्निः । अश्विना ।
तुस्तुवानाः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥ १८ ॥

आदित्याः अदितेः पुत्राः विश्वे सर्वे द्वादशसंख्याकाअर्काः विश्वे मरुतश्च सर्वे एकोनपंचाशत् संख्योपेताश्च विश्वेदेवाश्च विश्वे ऋभवश्च इन्द्रोग्निः अश्विना अश्विनौ एतत् संज्ञकाः एवंभूतायेदेवाः तुष्टुवानाः अस्माभिः स्तुताः बभूवुः सर्वे ते देवाः यूयं सदा सर्वदा नोस्मान् स्वस्तिभिः कल्याणैः पात रक्षत ॥ ३ ॥

॥ इति पंचमस्य चतुर्थेष्टादशोवर्गः ॥ १८ ॥

आदित्यासोअदितयइति तृचात्मकमेकोनविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमादित्यदेवताकं आदित्यासइत्यनुक्रमणिका । गतोविनियोगः ।

तत्र प्रथमा—

आदित्यासोअदितयःस्यामपूर्देवत्रावसवोमर्त्यत्रा ।
सनेममित्रावरुणासनंतोभवेमद्यावापृथिवीभवन्तः ॥ १ ॥

आदित्यासः । अदितयः । स्याम । पूः । देवऽत्रा । वसवः ।
मर्त्यऽत्रा । सनेम । मित्रावरुणा । सनन्तः ।
भवेम । द्यावापृथिवी इति । भवन्तः ॥ १ ॥

हे आदित्यासः आदित्यादेवाः व्यत्ययेनाद्युदात्तत्वाभावः यद्वा आदित्यानामिमेआदित्याः तस्येदमित्यर्थे प्राग्दीव्यतीयोण्प्रत्ययः आदित्यानां शेषभूतावयं अदितयः अखंडनीयाः स्याम भवेम । देवत्रा देवेषु वसवोवासकादेवाः युष्मदीयं पूः पालनं मर्त्यत्रा मनुष्येष्वस्मासु भवतु हे मित्रावरुणा मित्रावरुणौ सनंतः युवां संभजन्तोवयं सनेम युवाभ्यां दत्तं धनं संभजेमहि हे द्यावापृथिवी द्यावापृथिव्यौ युवयोः प्रसादात् वयं भवन्तो भवेम भूतिमंतः स्याम ॥१॥

अथ द्वितीया—

मित्रस्तन्नोवरुणोमामहन्तशर्मतोकायतनयायगोपाः ।
मावोभुजेमान्यजातमेनोमातत्कर्मवसवोयच्चयध्वे ॥ २ ॥

मित्रः । तत् । नः । वरुणः । मुमहन्त । शर्म । तोकाय । तनयाय । गोपाः । मा । वः । भुजेम । अन्यऽजातम् । एनः । मा । तत् । कर्म । वसवः । यत् । चयध्वे ॥ २ ॥

मित्रोवरुणः अहर्निशाभिमानिनौ देवौ एतदाद्याः सर्वे आदित्याः नोस्मभ्यं तत् प्रसिद्धं शर्म सुखं ममहन्त मंहतिर्दानकर्मा ददतु गोपाः विश्वस्य रक्षकास्ते देवास्तोकायास्मदीयाय पुत्राय तनयाय तत्पुत्रायच शर्म प्रयच्छन्तु अथप्रत्यक्षस्तुतिः हे देवाः वोयुष्मदीयावयं अन्यजातमन्येनोत्पादितं एनः पापमाभुजेम माभुक्तवन्तः स्याम।हे वसवो वासकादेवाः यद्येन युष्मदप्रियेण कर्मणा चयध्वे यूयमस्मान्नाशयत तत्तादृशं कर्म वयं माकर्म माकार्ष्म लुङि करोतेरुत्तमस्य बहुवचनं मंत्रेघसह्वरेत्यादिना च्लेर्लोपः ॥ २ ॥

अथ तृतीया—

तुरण्यवोऽङ्गिरसोनक्षन्तरत्नंदेवस्यसवितुरियानाः । पिताचतन्नोमहान्यजत्रोविश्वेदेवाःसमनसोजुषन्त ॥३॥१९॥

तुरण्यवः । अङ्गिरसः । नक्षन्त । रत्नम् । देवस्य । सवितुः । इयानाः । पिता । च । तत् । नः । महान् । यजत्रः । विश्वे । देवाः । सऽमनसः । जुषन्त ॥ ३ ॥ १९ ॥

तुरण्यवः यज्ञादिकर्मसु त्वरिताः अंगिरसः एतन्नामकाऋषयः इयानाः सवितारं याचमानाः सन्तः सवितुः प्रेरकस्य देवस्य संबन्धिरत्नं रमणीयं यद्धनं नक्षन्त आश्नुवन्त उत्तरार्धगत तच्छब्दापेक्षया यच्छब्दोध्याह्रियते यजत्रः यजनशीलः महान् प्रभूतः पिताच वसिष्ठस्य पितृभूतोवरुणः यद्वा सर्वेषां पिता प्रजापतिः विश्वे सर्वे देवाः समनसः समानमनस्काः तत्तादृशं रत्नं नोस्मान् जुषन्त सेवयंतु यद्वा नोस्मभ्यं ददतु ॥ ३ ॥

॥ इति पंचमस्य चतुर्थे एकोनविंशो वर्गः ॥१९॥

प्रद्यावायज्ञैरिति तृचात्मकं विंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं द्यावापृथिव्यं अनुक्रम्यतेच— प्रद्यावा द्यावापृथिव्यमिति । चतुर्थेहनि वैश्वदेवशस्त्रे इदं द्यावापृथिव्यनिविद्धानं सूत्रितंच— आदेवोयातु प्रद्यावेति वासिष्ठमिति । द्यावापृथिव्येपशौ वपापुरोडाशयोः प्रद्यावेति द्वेऋचौयाज्ये सूत्रितं च—प्रद्यावायज्ञैःपृथिवीनमोभिरिति द्वे इति ।

तत्र प्रथमा—

प्रद्यावा॑यज्ञैः॑पृथि॒वीनमो॑भिःस॒बाध॑ईळेबृह॒तीयज॑त्रे ।
तेचि॒द्धिपूर्वे॑क॒वयो॑गृ॒णन्तः॑पु॒रोम॒हीद॑धि॒रेदे॒वपु॑त्रे ॥ १ ॥

प्र । द्यावा॑ । य॒ज्ञैः । पृ॒थि॒वी इति॑ । नम॑ःऽभिः । स॒ऽबाध॑ः ।
ई॒ळे । बृ॒ह॒ती इति॑ । यज॑त्रे॒ इति॑ । ते इति॑ । चि॒त् । हि । पूर्वे॑ । क॒वय॑ः ।
गृ॒णन्त॑ः । पु॒रः । म॒ही इति॑ । द॒धि॒रे । दे॒वपु॑त्रे॒ इति॑ दे॒वऽपु॑त्रे ॥ १ ॥

यजत्रे यजनीये बृहती बृहत्यौ महत्यौ द्यावापृथिवी द्यावापृथिव्यौ यज्ञैर्यागैः नमोभिः स्तोत्रैश्च अहं स्तोता सबाधोबाधासहितः ऋत्विजां संबाधयुक्तइत्यर्थः प्र ईळे प्रकर्षेण स्तौमि मही महत्यौ देवपुत्रे देवाः पुत्रायययोस्ते ते तव चिद्धि तादृश्यौ खल्वपि द्यावापृथिव्यौ पूर्वे पुरातनाः कवयः गृणन्तः स्तुवन्तः पुरोदधिरे पुरस्तात् स्थापयामासुः ॥ १ ॥

आग्रायणे द्यावापृथिव्यैककपालस्य प्रपूर्वजइतियाज्या सूत्रितं च—महीद्यौःपृथिवीचनः प्रपूर्वजेपितरानव्यसीभिरिति ।

सैषा सूक्ते द्वितीया—

प्रपू॑र्व॒जेपि॒तरा॒नव्य॑सीभि॒र्गी॒र्भिःकृ॑णु॒ध्वंसद॑नेऋ॒तस्य॑ ।
आनो॑द्यावापृथिवी॒दैव्ये॑न॒जने॑नयातं॒महि॑वां॒वरू॑थम् ॥ २ ॥

प्र । पू॒र्व॒जे इति॑ पू॒र्व॒ऽजे । पि॒तरा॑ । नव्य॑सीभिः । गी॒ःऽभिः ।
कृ॒णु॒ध्व॒म् । सद॑ने॒ इति॑ । ऋ॒तस्य॑ । आ । न॒ः । द्या॒वा॒पृ॒थि॒वी॒ इति॑ ।
दैव्ये॑न । जने॑न । या॒त॒म् । महि॑ । वा॒म् । वरू॑थम् ॥ २ ॥

हे अस्मदीयाः स्तोतारोयूयं नव्यसीभिर्नवतराभिः गीर्भिः स्तुतिरूपाभिर्वाग्भिः ऋतस्य यज्ञस्य सदने स्थानभूते पूर्वजे पूर्वं प्रजाते पितरा पितरौ विश्वस्य मातापितृभूते द्यावापृथिव्यौ प्रकृणुध्वं पुरस्कुरुत । अथ प्रत्यक्षस्तुतिः हे द्यावापृथिवी द्यावापृथिव्यौ युवां दैव्येन देवसंबन्धिना जनेन सह नोस्मानभि आयातं आगच्छतं किमर्थमायातमिति उच्यते वां युवयोः वरूथं अस्माभिर्वरणीयं महि महत् यद्धनमस्तीतिशेषः तद्धनमस्मभ्यं दीयतामित्यर्थः ॥ २ ॥

अथ तृतीया-

उतोहिवांरत्नधेयानिसन्तिपुरूणिद्यावापृथिवीसुदासे ।
अस्मेधत्तंयदसदस्कृधोयुयूयंपातस्वस्तिभिःसदानः ॥ ३ ॥२०॥

उतो इति । हि । वाम् । रत्नऽधेयानि । सन्ति । पुरूणि ।
द्यावापृथिवी इति । सुऽदासे । अस्मे इति । धत्तम् । यत् । असत् ।
अस्कृधोयु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥ २० ॥

उतोहि अपिच खलु हे द्यावापृथिवी द्यावापृथिव्यौ वां युवयोः सुदासे शोभनहविर्दानाय यजमानाय देयानि पुरूणि बहूनि रत्नधेयानि रमणीयानि धनानि सन्ति भवन्ति तेषां मध्ये यद्धनं अस्कृधोयु कृधुकोह्रस्वः अह्रस्वमनल्पं असत् भवेत् तद्धनमस्मे अस्मभ्यं धत्तं प्रयच्छत । हे द्यावापृथिव्यौ यूयं युवां नोस्मान् सर्वदा कल्याणैः पात पालयतं ॥ ३ ॥

॥ इति पंचमस्य चतुर्थे विंशोवर्गः ॥ २० ॥

वास्तोष्पतेइति तृचात्मकमेकविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वास्तोष्पत्यं तथाचानुक्रम्यते–वास्तोष्पतेवास्तोष्पत्यमिति।स्मार्तेगृहनिर्माणे वास्तोष्पतइति चतसृभिः प्रत्यृचं जुहुयात् सूत्रितं च–वास्तोष्पतेप्रतिजानीह्यस्मानिति चतसृभिः प्रत्यृचं हुत्वेति ।

तत्र प्रथमा-

वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः ।
यत्त्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे ॥ १ ॥

वास्तोः । पते । प्रति । जानीहि । अस्मान् । सुऽआवेशः ।
अनमीवः । भव । नः । यत् । त्वा । ईमहे । प्रति । तत् । नः ।
जुषस्व । शम् । नः । भव । द्विऽपदे । शम् । चतुःऽपदे ॥ १ ॥

हे वास्तोष्पते गृहस्यपालयितर्देव त्वं अस्मान् त्वदीयान् स्तोतॄनिति प्रतिजानीहि प्रबुध्यस्व तदनन्तरं नोस्माकं स्वावेशः शोभननिवेशः अनमीवः अरोगकृच्च भव किंच वयं त्वा त्वां यद्धनं ईमहे याचामहे त्वमपि तद्धनं नोस्मभ्यं प्रतिजुषस्व प्रयच्छ अपिच नोस्माकं द्विपदे पुत्रपौत्रादिजनाय शं सुखकरोभव चतुष्पदे अस्मदीयाय गवाश्वादिवर्गायच शं सुखकरोभव ॥ १ ॥

अथ द्वितीया—

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥ २ ॥

वास्तोः । पते । प्रऽतरणः । नः । एधि । गयऽस्फानः । गोभिः ।
अश्वेभिः । इन्दो इति । अजरासः । ते । सख्ये । स्याम ।
पिताऽइव । पुत्रान् । प्रति । नः । जुषस्व ॥ २ ॥

हे वास्तोष्पते गृहस्यपालयितर्देव त्वं नोस्माकं प्रतरणः प्रवर्धकः गयस्फानः गयस्या-स्मदीयस्य धनस्य स्फायविता प्रवर्धकः एधि भव। हे इन्दो सोमवदाह्लादक ते त्वयासह सख्ये सति वयं गोभिः पशुभिः अश्वेभिरश्वैश्च सहिता अजरासोजरारहिताः स्याम भवेम विनाशर-हिताइत्यर्थः। पितेव पुत्रान् यथा पिता पुत्रान् रक्षकत्वेन सेवते तथा त्वमपि नोस्मान् प्रति जुषस्व सेवस्व ॥ २ ॥

अथ तृतीया—

वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या ।
पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥ २१ ॥

वास्तोः । पते । शग्मया । सम्ऽसदा । ते । सक्षीमहि । रण्वया ।
गातुऽमत्या । पाहि । क्षेमे । उत । योगे । वरम् । नः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥ २१ ॥

हे वास्तोष्पते देव शग्मया सुखकर्या रण्वया रमणीयया गातुमत्या धनवत्या ते त्वया देयया संसदा स्थानेन सक्षीमहि वयं संगच्छेमहि। त्वमपि क्षेमे प्राप्तस्य रक्षणे उतापिच योगे अप्राप्तस्यप्रापणे वरं वरणीयं नोस्मदीयं धनं पाहि रक्ष। हे वास्तोष्पते यूयं त्वं नोस्मान् सर्वदा कल्याणैः पात पाहि ॥ ३ ॥

॥ इति पंचमस्य चतुर्थे एकविंशो वर्गः ॥ २१ ॥

अमीवहेत्यष्टर्चं द्वाविंशं सूक्तं आद्यागायत्री पंचम्याद्याश्चतस्रोनुष्टुभः द्वितीयाद्यास्तिस्र-उपरिष्टाद्बृहत्यः त्र्यष्टकाश्चतुर्थद्वादशकीबृहतीति तल्लक्षणयोगात् आद्यावास्तोष्पतिदेवताका

शिष्टाऐंद्यः तथाचानुक्रान्तं—अमीवहाष्टौ वास्तोष्पत्याद्या गायत्री शेषाण्युपरिष्टाद्बृहत्यादयोऽनुष्टुभः प्रस्वापिन्यउपनिषदिति । गतोविनियोगः। बृहद्देवतायां यदुक्तं तदिहलिख्यते—वरुणस्य गृहान्रात्रौवसिष्ठःस्वप्नमाचरन् । प्रविवेशाथतंतत्रश्वानदन्नभ्यवर्तत ॥ १ ॥ क्रन्दंतंसारमेयंप्रधावंतंदष्टुमुद्यतं । यदर्जुनेतिचद्वाभ्यांसांत्वयित्वाप्रसुष्वपत् ॥ २ ॥ एवंप्रस्थापप्यामामजनमन्यंचवारुणमिति ॥ ३ ॥ अत्रकेचित्पुनरेवमाहुः—आसांप्रस्वापिनित्वंतुकथासुपरिकल्प्यते । वसिष्ठस्तृषितोन्नार्थीत्रिरात्रालब्धभोजनः ॥ ४ ॥ चतुर्थरात्रौचोर्यार्थंवारुणंगृहमेत्यनु । कोष्ठागारेप्रवेशायपालकश्वादिसुप्तये ॥ ५ ॥ यदर्जुनेतिसप्तर्चैर्ददर्शचजजापचेति ॥ ६ ॥

तत्र प्रथमा—

अ॒मी॒व॒हा वा॑स्तोष्पते॒ विश्वा॑ रू॒पाण्या॑वि॒शन् । सखा॑ सु॒शेव॑ एधि नः ॥१॥

अ॒मी॒व॒ऽहा । वा॒स्तोः॒ । प॒ते॒ । विश्वा॑ । रू॒पाणि॑ ।
आ॒ऽवि॒शन् । सखा॑ । सु॒ऽशेवः॑ । ए॒धि॒ । नः॒ ॥ १ ॥

हे वास्तोष्पते गृहस्यपालक एतत्संज्ञकदेव अमीवहा अमीवानां रोगाणां नाशकरस्त्वं विश्वा विश्वानि बहूनि रूपाणि आविशन् प्रविशन् यद्यद्रूपं कामय ते तत्तद्देवाविशन्तीति यास्कः। नोस्माकं सखा मित्रभूतः सुशेवः सुष्ठु सुखकरः एधि भव ॥ १ ॥

अथ द्वितीया—

यद॑र्जुन सारमेय द॒तः पि॑शङ्ग॒ यच्छ॑से ।
वी॒व भ्रा॑जन्त ऋ॒ष्टय॒ उप॒ स्रक्के॑षु॒ बप्स॑तो॒ नि षु स्व॑प ॥ २ ॥

यत् । अ॒र्जु॒न॒ । सा॒र॒मे॒य॒ । द॒तः । पि॒शं॒ग॒ । यच्छ॑से । वि॒ऽइ॒व ।
भ्रा॒ज॒न्ते॒ । ऋ॒ष्टयः॑ । उप॑ । स्रक्के॑षु । बप्स॑तः । नि । सु । स्व॒प॒ ॥ २ ॥

हे अर्जुन श्वेत हे सारमेय सरमा नाम देवशुनी तस्याः कुलोद्भव हे पिशंग केषुचिदंगेषु पिंगलवर्ण एवंभूत हे शुनक त्वं दतो दन्तान् यद्यदा यच्छसे विवृणोषि अस्मान् दष्टुमित्यर्थः तदानीं वीव भ्राजन्त ऋष्टयः यथा आयुधानि विशेषेण भासन्ते तथा उपास्मत्समीपे बप्सतः भक्षयतस्तव दन्ता स्रक्केषु स्रक्कासु भासन्ते । स्रक्का शब्द ओष्ठप्रदेशविशेषवाचीत्यर्थः तथाभूतस्त्वं इदानीं सु सुष्ठु निस्वप नितरां निद्रां कुरु ॥ २ ॥

१ नि० १०. १० ।

अथ तृतीया—

स्तेनंरायसारमेयतस्करंवापुनःसर।
स्तोतॄनिन्द्रस्यरायसिकिमस्मान्दुच्छुनायसेनिपुस्वप ॥ ३ ॥

स्तेनम् । राय । सारमेय । तस्करम् । वा । पुनःऽसर ।
स्तोतॄन् । इन्द्रस्य । रायसि । किम् । अस्मान् ।
दुच्छुनऽयसे । नि । सु । स्वप ॥ ३ ॥

हे पुनःसर गतमेव देशं पुनः सरतीति पुनःसरः तादृग्भूत हे सारमेय, त्वं स्तेनं प्रच्छन्नधनापहारी स्तेनः तं तस्करं प्रत्यक्षधनापहारी तस्करः तं वारय गच्छ इन्द्रस्य स्तोतॄनस्मान् किं रायसि गच्छसि अस्मान् दुच्छुनायसे किं बाधसे निषुस्वप अत्यन्तं निद्रां कुरु ॥ ३ ॥

अथ चतुर्थी—

त्वंसूकरस्यदर्दृहितवदर्दर्तुसूकरः।
स्तोतॄनिन्द्रस्यरायसिकिमस्मान्दुच्छुनायसेनिपुस्वप ॥ ४ ॥

त्वम् । सूकरस्य । दर्दृहि । तवं । दर्दर्तु । सूकरः ।
स्तोतॄन् । इन्द्रस्य । रायसि । किम् । अस्मान् ।
दुच्छुनऽयसे । नि । सु । स्वप ॥ ४ ॥

हे सारमेय त्वं सूकरस्य वराहस्य द्वितीयार्थे षष्ठी दर्दृहि विदारय सूकरोपि तव दर्दर्तु विदारयतु युवयोर्नित्यवैरित्वात् अस्मान्मादशेत्यर्थः। स्तोतॄनित्यर्धर्चः पूर्वस्याम्व्याख्यातः॥४॥

अथ पंचमी—

सस्तुमातासस्तुपितासस्तुश्वासस्तुविश्पतिः।
ससन्तुसर्वेज्ञातयःसस्त्वयमभितोजनः ॥ ५ ॥

सस्तु । माता । सस्तु । पिता । सस्तु । श्वा । सस्तु । विश्पतिः ।
ससन्तु । सर्वे । ज्ञातयः । सस्तु । अयम् । अभितः । जनः ॥ ५ ॥

हे सारमेय माता त्वदीया जननी सस्तु स्वपतु पिताच सस्तु श्वा सारमेयोभवान् सस्तु विश्पतिर्जामाता यद्वा विशां जनानां पालकोगृही सस्तु सर्वेज्ञातयोबंधवोपि ससंतु स्वपन्तु अभितः परितःस्थितः अयमपि सर्वोजनः सस्तु स्वपतु ॥ ५ ॥

अथ षष्ठी—

यआस्तेयश्चचरंतियश्चपश्यंतिनोजनः ।
तेषांसंहन्मोअक्षाणियथेदंहर्म्यंतथा ॥ ६ ॥

यः । आस्ते । यः । च । चरंति । यः । च । पश्यंति । नः । जनः ।
तेषाम् । सम् । हन्मः । अक्षाणि । यथा । इदम् । हर्म्यम् । तथा ॥६॥

योजनः आस्ते अस्मिन् प्रदेशे तिष्ठति यश्च चरति गच्छति यश्च जनः नोस्मान् पश्यति एवं भूतानां तेषां जनानां अक्षाणीन्द्रियाणि संहन्मः संहनाम संहतिर्निमीलनं निमीलयामित्यर्थः। इदं प्रत्यक्षेणोपलभ्यमानं हर्म्यं प्रासादादिस्थावरात्मकं वस्तुजातं यथा निश्चलं भवति तथा इमे सर्वे जनाः निश्चलाभवंत्वित्यर्थः ॥ ६ ॥

अथ सप्तमी—

सहस्रशृङ्गोवृषभोयःसमुद्रादुदाचरत् ।
तेनासहस्येनावयंनिजनान्त्स्वापयामसि ॥ ७ ॥

सहस्रऽशृङ्गः । वृषभः । यः । समुद्रात् । उत्ऽआचरत् ।
तेन । सहस्येन । वयम् । नि । जनान् । स्वापयामसि ॥ ७ ॥

सहस्रशृंगः सहस्रकिरणः वृषभः कामानां वर्षिता यः सूर्यः समुद्रादंबुधेः सकाशादुदाचरत् उदागच्छति सहस्येन अभिभवित्रा तेन सूर्येण वयं स्तोतारः जनान् सर्वान् निष्वापयामसि नितरांस्वापयामः ॥ ७ ॥

अथाष्टमी—

प्रोष्ठेशयावह्येशयानारीर्यास्तल्पशीवरीः ।
स्त्रियोयाःपुण्यगन्धास्ताःसर्वाःस्वापयामसि ॥८॥२३॥

प्रोष्ठेऽशयाः । वह्येऽशयाः । नारीः । याः । तल्पऽशीवरीः ।
स्त्रियः । याः । पुण्यऽगन्धाः । ताः । सर्वाः । स्वापयामसि ॥८॥२२॥

ताः यादृश्यः नारीः नार्यः स्त्रियः प्रोष्ठेशयाः प्रांकणेशयानाः यावह्येशयाः वह्यं वाहनं तस्मिन् शयानाः यास्तल्पशीवरीः तल्पशयाः याः स्त्रियः पुण्यगंधाः मंगल्यगन्धाः तास्तादृशीः सर्वाः स्त्रीः स्वापयामसि वयं निद्रां कारयामः ॥ ८ ॥

॥ इति पंचमस्य चतुर्थे द्वाविंशोवर्गः ॥ २२ ॥

॥ इति सप्तमे मंडले तृतीयोनुवाकः ॥ ३ ॥

अथचतुर्थेनुवाके पंचदशसूक्तानि तत्र कईव्यक्तेति पंचविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं मरुद्देवताकं आद्याएकादशद्विपदाविंशत्यक्षराविराजः शिष्टाश्चतुर्दशत्रिष्टुभः तथाचानुक्रान्तं—कईपंचाधिका मारुतंह्याद्याएकादशद्विपदाइति । दशरात्रे चतुर्थेहनि आग्निमारुतशस्त्र इदं मारुतनिविद्धानं सूत्र्यतेहि—वैश्वानरस्यसुमतौ कईव्यक्तानरइति ।

तत्र प्रथमा—

कईंव्यक्तानरःसनीळारुद्रस्यमर्याअधास्वश्वाः ॥ १ ॥
के । ईम् । विऽअक्ताः । नरः । सऽनीळाः । रुद्रस्य ।
मर्याः । अध । सुऽअश्वाः ॥ १ ॥

व्यक्ताः कान्तियुक्ताः नरोनेतारः सनीळाः समानौकसः रुद्रस्य महादेवस्य पुत्राः मर्याः मर्येभ्योनृभ्योहिताः अध अपिच स्वश्वाः शोभनवाहाः ई इमे एवंभूताः के भवन्तीति रूपातिशयादृषिराश्चर्येणाह ॥ १ ॥

अथ द्वितीया—

नकिर्ह्येषांजनूंषिवेदतेअङ्गविद्रेमिथोजनित्रम् ॥ २ ॥
नकिः । हि । एषाम् । जनूंषि । वेद । ते ।
अङ्ग । विद्रे । मिथः । जनित्रम् ॥ २ ॥

एषां मरुतां जनूंषि जन्मानि नकिर्हि वेद कश्चिदपि नखलु जानाति ते तादृशाः मरुतः मिथः परस्परं जनित्रं रुद्रपृश्निभ्यां सकाशात् प्रादुर्भूतं स्वकीयं जन्म अंग विद्रे स्वयमेवविदन्ति ॥ २ ॥ अथ तृतीया—

अ॒भि स्व॒पूभि॑र्मि॒थो व॑पन्त॒ वात॑स्वनसः श्ये॒ना अ॑स्पृध्रन् ॥ ३ ॥

अ॒भि । स्व॒ऽपूभिः॑ । मि॒थः । व॒प॒न्त॒ ।
वात॑ऽस्वनसः । श्ये॒नाः । अ॒स्पृ॒ध्र॒न् ॥ ३ ॥

मरुतः स्वपूभिः स्वकीयैः पवनैः संचरणैः स्वयमेव संचरन्तः मिथः परस्परं अभिवपत संगच्छन्ते अपिच वातस्वनसः वायुवत्स्वनन्तः शब्दायमानाः श्येनाः श्येङ्गताविति धातोरूपं गमनशीलाः यद्वा श्येनाइति लुप्तोपममेतत् श्येनाः पक्षिणः तद्वद्गच्छन्तः अस्पृध्रन् परस्परं रूपसौंदर्यादिभिः स्पर्धन्ते ॥ ३ ॥

अथ चतुर्थी—

ए॒तानि॒ धीरो॑ नि॒ण्या चि॑केत॒ पृश्नि॒र्यदूधो॑ म॒ही ज॒भार॑ ॥ ४ ॥

ए॒तानि॑ । धीरः॑ । नि॒ण्या । चि॒के॒त॒ । पृश्निः॑ ।
यत् । ऊधः॑ । म॒ही । ज॒भार॑ ॥ ४ ॥

धीरोधीमान् शास्त्रज्ञोजनः निण्या निण्यानि श्वेतवर्णानि एतानि मरुदात्मकानि भूतानि चिकेत जानीयात् किंतु न सर्वे जना जानन्तीत्यर्थः मही महती पृश्निर्मरुतां जननी यत् यानि मरुदात्मकानि भूतानि ऊधः ऊधन्यन्तरिक्षे स्वकीये जठरे वा जभार बभार एतानि चिकेतेति पूर्वेण संबंधः ॥ ४ ॥

अथ पंचमी—

सा वि॒ट् सु॒वीरा॑ म॒रुद्भि॑रस्तु स॒नात्सह॑न्ती॒ पुष्य॑न्ती नृ॒म्णम् ॥ ५ ॥

सा । विट् । सु॒ऽवीरा॑ । म॒रुत्ऽभिः॑ । अ॒स्तु॒ ।
स॒नात् । सह॑न्ती । पुष्य॑न्ती । नृ॒म्णम् ॥ ५ ॥

सा विट् सा प्रजा मरुतः परिचरति सा प्रजा मरुद्भिः हेतुभिः सनात् चिरात् सहन्ती शत्रूनभिभवन्ती नृम्णं धनं बलं वा पुष्यन्ती लभन्ती सुवीरा शोभनपुत्रयुक्तास्तु भवतु ॥ ५ ॥

अथ षष्ठी–

यामंयेष्ठाःशुभाशोभिष्ठाःश्रियासंमिश्लाओजोभिरुग्राः ॥६॥

यामंम् । येष्ठाः । शुभा । शोभिष्ठाः । श्रिया ।
सम्ऽमिश्लाः । ओजःऽभिः । उग्राः ॥ ६ ॥

मरुतः यामं यातव्यं गंतव्यं प्रदेशं येष्ठाः यातृतमाः अतिशयेन गंतारः शुभाः अलंकारेण शोभिष्ठाः अतिशयेन शोभायुक्ताः श्रिया कांत्या संमिश्लाः संगच्छमाना ओजोभिर्बलैः उग्रा उद्गूर्णाः एवंभूताभवन्तीति शेषः ॥ ६ ॥

अथ सप्तमी–

उग्रंवओजःस्थिराशवांस्यधामरुद्भिर्गणस्तुविष्मान् ॥ ७ ॥

उग्रम । वः । ओजः । स्थिरा । शवांसि । अध ।
मरुत्ऽभिः । गणः । तुविष्मान्॥ ७ ॥

हे मरुतः वोयुष्माकं ओजस्तेजः उग्रमुद्गूर्णं भवतु शवांसि युष्मदीयानि बलानि स्थिरा स्थिराणि कैश्चिदनपहर्तव्यानि भवन्तु अध अपिच मरुद्भिः गणः मरुतां संघः तुविष्मान् वृद्धिमान् भवतु ॥ ७॥

अथाष्टमी–

शुभ्रोवःशुष्मःक्रुध्मीमनांसिधुनिर्मुनिरिवशर्धस्यधृष्णोः ॥ ८ ॥

शुभ्रः । वः । शुष्मः । क्रुध्मी । मनांसि ।
धुनिः । मुनिःऽइव । शर्धस्य । धृष्णोः ॥ ८ ॥

हे मरुतः वोयुष्माकं शुष्मोबलं शुभ्रः सर्वतः शोभमानं किंच वो मनांसि क्रुध्मी संग्रामेषु शत्रुहननार्थं क्रोधनशीलानि धृष्णोर्धर्षणशीलस्य शर्धस्य बलवतोयुष्मदीयस्य गणस्य

धुनिः वृक्षादीनां कंपयितुः वेगः मुनिरिव मननान्मुनिः स्तोता सयथा बहुविधं शब्दमुत्पादयति एवं बहुविधशब्दस्योत्पादकइत्यर्थः ॥ ८॥

अथ नवमी–

सनेम्यस्मद्युयोतदिद्युंमावोदुर्मतिरिहप्रणङ्नः ॥ ९ ॥

सनेमि । अस्मत् । युयोत । दिद्युम् । मा ।
वः । दुःऽमतिः । इह । प्रणक् । नः ॥ ९ ॥

हे मरुतः सनेमि सनातनं दिद्युं दीप्यमानं ऋष्ट्याख्यं युष्मदीयमायुधं अस्मद् अस्मत्तः सकाशात् युयोत पृथक्कुरुत तथा वः युष्मदीयादुर्मतिः निग्रहबुद्धिः नोस्मान् इह अस्मिन् लोके मा प्रणक् मा प्राप्नोतु ॥ ९॥

अथ दशमी–

प्रियावोनामहुवेतुराणामायत्तृपन्मरुतोवावशानाः ॥१०॥२३॥

प्रिया । वः । नाम । हुवे । तुराणाम् । आ । यत् । तृपत् ।
मरुतः । वावशानाः ॥ १० ॥ २३ ॥

हे मरुतः तुराणां यजमानार्थं त्वरया आगच्छतां वः युष्माकं नाम आहुवे आह्वयामि यद् येन आह्वानेन प्रियाः स्नेहयुक्ताः वावशानाः अस्माकं आह्वानं कृतमिति शब्दायमानाश्च सन्तः तृपद् संतुष्टा भविष्यथ तद् आह्वानमिति ॥ १० ॥

॥ इति पंचमस्य चतुर्थे त्रयोविंशोवर्गः ॥ २३ ॥

अथैकादशी–

स्वायुधासइष्मिणःसुनिष्काउतस्वयंतन्वः१शुम्भमानाः ॥११॥

सुऽआयुधासः । इष्मिणः । सुऽनिष्काः । उत ।
स्वयम् । तन्वः । शुंभमानाः ॥ ११ ॥

स्वायुधासः स्वायुधाः शोभनास्त्राः इष्मिणोगन्तारः सुनिष्काः शोभनालंकाराः उतापिच तन्वः स्वकीयानि शरीराणि शुंभमानाः स्वयमेव शोभयन्तोमरुतः एवंभूताभवंतीत्यर्थः॥ ११ ॥

मारुतेपशौ शुचीवोहव्याइति वपायाअनुवाक्या सूत्रितं च--शुचीवोहव्यामरुतःशुचीनां तूष्णीं मरुतइति ।

तत्रैषा द्वादशी—

शुचीवोहव्यामरुतःशुचीनांशुचिंहिनोम्यध्वरंशुचिभ्यः।
ऋतेनसत्यमृतसापआयञ्छुचिजन्मानःशुचयःपावकाः ॥१२॥

शुची । वः । हव्या । मरुतः । शुचीनाम् । शुचिम् । हिनोमि ।
अध्वरम् । शुचिऽभ्यः । ऋतेन । सत्यम् । ऋतऽसापः ।
आयन् । शुचिऽजन्मानः । शुचयः । पावकाः ॥ १२ ॥

हे मरुतः शुचीनां शुद्धानां वोयुष्माकं शुची शुचीनि हव्या हव्यानि हवींषि भवन्तु शुचिभ्यः प्रकाशमानेभ्योयुष्मभ्यं शुचिं शुद्धं अध्वरं यागं हिनोमि अहं प्रेरयामि ऋतसापः ऋतमुदकं स्पृशन्तोमरुतः ऋतेन सत्येनैव सत्यमायन् गच्छंति कीदृशाः शुचिजन्मानः शोभनजननाः शुचयोदीप्यमानाः पावकाः शोधकाः एवंभूतागच्छंतीत्यर्थः ॥ १२ ॥

अथ त्रयोदशी—

अंसेष्वामरुतःखादयोवोवक्षःसुरुक्माउपशिश्रियाणाः ।
विविद्युतोनवृष्टिभीरुचानाअनुस्वधामायुधैर्यच्छमानाः ॥१३॥

अंसेषु । आ । मरुतः । खादयः । वः । वक्षःऽसु । रुक्माः ।
उपऽशिश्रियाणाः । वि । विऽद्युतः । न । वृष्टिऽभिः ।
रुचानाः । अनु । स्वधाम् । आयुधैः । यच्छमानाः ॥ १३ ॥

हे मरुतः अंसेषु युष्मदीयेषु स्कंधप्रदेशेषु खादयोलंकारविशेषाः आमुक्ताभवन्तीतिशेषः सुरुक्माः सुष्ठु रोचमानाः हाराः वोयुष्मदीयं वक्षः उरःप्रदेशं उपशिश्रियाणाः आश्रिताभ-

वन्ति किंच हे मरुतः वृष्टिभिः वर्षैः सार्धं विद्युतोन तडितोयथा रुचानाः रोचमानाः तादृग्भू-तायूयं आयुधैर्मेघताडनैः स्वधामुदकं अनुयच्छमानाः प्रयच्छन्तोविचरथेति शेषः ॥ १३ ॥

गृहमेधीये प्रबुध्यावइति प्रधानस्ययाज्या सूत्रितंच—प्रबुध्यावईरतेमहांसीति पुष्टिमन्तो विराजौ संयाज्येइति ।

सैषा सूक्ते चतुर्दशी—

प्रबुध्यावईरतेमहांसिप्रनामानिप्रयज्यवस्तिरध्वम् ।
सहस्रियंदम्यंभागमेतंगृहमेधीयंमरुतोजुषध्वम् ॥ १४ ॥

प्र । बुध्या । वः । ईरते । महांसि । प्र । नामानि । प्रऽयज्यवः ।
तिरध्वम् । सहस्रियम् । दम्यम् । भागम् । एतम् ।
गृहऽमेधीयम् । मरुतः । जुषध्वम् ॥ १४ ॥

हेमरुतः वोयुष्मदीयानि बुध्यान्यन्तरिक्षेभवानि महांसि तेजांसि प्रेरते प्रकर्षेण गच्छन्ति किंच हे प्रयज्यवः प्रकर्षेण यष्टव्यामरुतोयूयं नामानि पांसून्नमयन्तीति नामान्युदकानि प्रतिरध्वं वर्धयत।हेमरुतोयूयं सहस्रियं सहस्रसंख्याकंदम्यं दमे गृहे भवंगृहमेधीयं गृहमेधिगुणेभ्योयुष्मभ्यं देयं एवं एतादृशं भागं जुषध्वं सेवध्वं एकं भागं सहस्रियमिति कथमाह तथाचश्रूयते—यावदेकादेवताकामयते यावदेकातावदाहुतिः प्रथते नहितदस्ति यत्तावदेवस्याद् यावज्जुहोतीति[1] ॥ १४ ॥

अथ पंचदशी—

यदिस्तुतस्यमरुतोअधीथेत्थाविप्रस्यवाजिनोहवीमन् ।
मक्षूरायःसुवीर्यस्यदातनूचिद्यमन्यआदभदरावा ॥१५॥ २४॥

यदि । स्तुतस्य । मरुतः । अधिऽइथ । इत्था । विप्रस्य ।
वाजिनः । हवीमन् । मक्षु । रायः । सुऽवीर्यस्य । दात ।
नु । चित् । यम् । अन्यः । आऽदभत् । अरावा ॥ १५ ॥ २४ ॥

---

1 तै० ब्रा० ३. २. ६. ।

वाजिनोहविर्लक्षणान्नवतः विप्रस्य मेधाविनोमम संबन्धिनि हवीमन् हविष्मति हविषा-
युक्ते स्तोत्रे क्रियमाणे सति हे मरुतोयूयं यदि यस्मात् कारणात् स्तुतस्य स्तुतं मदीयं स्तो-
त्रं इत्था इत्थमनेन प्रकारेण अग्रीथ अवगच्छथ तस्मात् कारणात् हे मरुतो यूयं सुवीर्यस्य
शोभनपुत्रोपेतस्य रायः रायं धनं द्वितीयार्थेषष्ठी मक्षु शीघ्रं दात दत्त अरावा अरातिः शत्रुभूतः
अन्योजनः यं रायं नूचिदादभत् नैवाभिहन्यात् तद्धनमस्मभ्यं दत्तेति संबन्धः ॥ १५ ॥

॥ इति पंचमस्य चतुर्थे चतुर्विंशोवर्गः ॥ २४ ॥

मरुद्भ्यः क्रीळिभ्यः सप्तकपालमित्यस्यासइतियाज्या सूत्रितंच—अत्यासोनयेमरुतःस्वंचो
जुषेदमूलाइति ।

सैषा सूक्ते षोडशी—

अत्यासोनयेमरुतःस्वञ्चोयक्षदृशोनशुभयन्तमर्याः ।
तेहर्म्येष्ठाःशिशवोनशुभ्रावत्सासोनप्रक्रीळिनःपयोधाः ॥१६॥

अत्यासः । न । ये । मरुतः । सुऽअञ्चः । यक्षऽदृशः । न ।
शुभयन्त । मर्याः । ते । हर्म्येऽस्थाः । शिशवः । न ।
शुभ्राः । वत्सासः । न । प्रऽक्रीळिनः । पयःऽधाः ॥ १६ ॥

अत्यासोन अत्याः सततगामिनोश्वाइव स्वंचः सुष्ठु गच्छन्तो ये मरुतः यक्षदृशोन मर्याः
यक्षस्योत्सवस्य द्रष्टारोमनुष्याइव शुभयन्त शोभन्ते हर्म्येष्ठाः हर्म्येस्थिताः शिशवोन कुमारा-
इव शुभ्राः शोभमाना वत्सासोन वत्साइव प्रक्रीळिनः प्रक्रीडिनःप्रकर्षेण क्रीडमानाः ते मरुतः
पयोधाः पयसउदकस्य धारयितारोदातारोवा भवन्ति ॥ १६ ॥

अथ सप्तदशी—

दशस्यन्तोनोमरुतोमृळन्तुवरिवस्यन्तोरोदसीसुमेके ।
आरेगोहानृहावधोवोअस्तुसुम्नेभिरस्मेवसवोनमध्वम् ॥१७॥

दशस्यन्तः । नः । मरुतः । मृळन्तु । वरिवस्यन्तः । रोदसी इति ।
सुमेके इति सुऽमेके । आरे । गोऽहा । नृऽहा । वधः । वः ।
अस्तु । सुम्नेभिः । अस्मे इति । वसवः । नमध्वम् ॥ १७ ॥

मरुतोनोस्मभ्यं दशस्यन्तः धनानि प्रयच्छन्तः सुमेके सुरूपे रोदसी द्यावापृथिव्यौ वरिवस्यन्तः स्वमहिम्ना पूरयन्तः मृळन्तु मृळयंतु अस्मान् सुखयुक्तान् कुर्वन्तु। अपिच हे वसवोवासकामरुतः गोहा गवां मेघस्थानामुदकानां भेदकः नृहा नृणां शत्रूणां हन्ता वोयुष्मदीयं वधः आयुधं आरे अस्तु अस्मत्तोदूरे भवतु। यूयमपि सुम्नेभिः सुम्नैः सुखैः सह अस्मे अस्मासु नमध्वं स्वयमेवाभिमुखाभवत ॥ १७ ॥

मारुतेपशौ आवोहोतेत्येषानुवाक्या सूत्रितंच—आवोहोताजोहवीतिसत्तः प्रचित्रमर्कंगृणतेतुरायेति।

सैषाष्टादशी—

आवोहोताजोहवीतिसत्तःसत्राचींरातिंमरुतोगृणानः।
यईवतोवृषणोअस्तिगोपाःसोअद्वयावीहवतेवउक्थैः ॥ १८ ॥

आ। वः। होता। जोहवीति। सत्तः। सत्राचीम्। रातिम्।
मरुतः। गृणानः। यः। ईवतः। वृषणः। अस्ति।
गोपाः। सः। अद्वयावी। हवते। वः। उक्थैः ॥ १८ ॥

हे मरुतः सत्तः होतृसदने निषण्णोस्मदीयोहोता सत्राचीं सर्वतोगमनशीलं रातिं त्वदीयं दानं गृणानःस्तुवन् वोयुष्मान् आजोहवीति भृशमाह्वयति। हे वृषणः कामानां वर्षितारोमरुतः योहोता ईवतोगच्छतोव्यापारवतोयजमानस्य गोपाअस्ति युष्मदाह्वाननिमित्तेन रक्षकोभवति सहोता अद्वयावी मायारहितः सन् वोयुष्मान् उक्थैः स्तोत्रैर्हवते स्तौति ॥ १८ ॥

अथैकोनविंशी—

इमेतुरंमरुतोरामयन्तीमेसहःसहसआनमन्ति।
इमेशंसंवनुष्यतोनिपान्तिगुरुद्वेषोअररुषेदधन्ति ॥ १९ ॥

इमे। तुरम्। मरुतः। रमयन्ति। इमे। सहः। सहसः। आ। नमन्ति।
इमे। शंसम्। वनुष्यतः। नि। पान्ति। गुरु।
द्वेषः। अररुषे। दधन्ति ॥ १९ ॥

इमे ईदृशोमरुतः तुरं कर्मसु क्षिप्रमन्तं यजमानं रमयन्ति क्रीडयन्ति इमे मरुतः सहः सहसा बलेन सहसोबलवतोजनान् आनमन्ति इमे मरुतः वनुष्यतोहिंसकात् पुरुषात् शंसं शंसकं स्तोतारं निपान्ति नितरांपालयन्ति अररुषे हविरप्रयच्छते जनाय गुरु महत् द्वेषः अप्रियं दधन्ति कुर्वन्ति ॥ १९ ॥

अथ विंशी–

इमेरध्रंचिन्मरुतोजुनन्तिभृमिंचिद्यथावसवोजुषन्त ।
अपबाधध्वंवृषणस्तमांसिधत्तविश्वंतनयंतोकमस्मे ॥ २० ॥२५॥

इमे । रध्रम् । चित् । मरुतः । जुनन्ति । भृमिम् । चित् ।
यथा । वसवः । जुषन्त । अप । बाधध्वम् । वृषणः । तमांसि ।
धत्त । विश्वम् । तनयम् । तोकम् । अस्मे इति ॥ २० ॥ २५ ॥

इमे मरुतः रध्रं चित् समृद्धमपि जनं जुनन्ति प्रेरयन्ति भृमिं चित् भ्रमणशीलमपि दरिद्रं जुनन्ति प्रेरयन्ति वसवोवासकादेवाः युष्मान् यथा जुषन्त कामयेरन् हे वृषणः कामानांवर्षितारस्ते यूयं तमांसि अपबाधध्वं नाशयत।अपिच अस्मे अस्मभ्यं विश्वं बहुलं तोकं पुत्रं तनयं पौत्रं च धत्त प्रयच्छत ॥ २० ॥

॥ इति पंचमस्यचतुर्थे पंचविंशोवर्गः ॥ २५ ॥

अथैकविंशी–

मावोदात्रान्मरुतोनिरराममापश्चाद्दघ्मरथ्योविभागे ।
आनःस्पार्हेभजतनावसव्येयदींसुजातंवृषणोवोअस्ति ॥२१॥

मा । वः । दात्रात् । मरुतः । निः । अराम । मा । पश्चात् ।
दघ्म । रथ्यः । विऽभागे । आ । नः । स्पार्हे । भजतन ।
वसव्ये । यत् । ईम् । सुऽजातम् । वृषणः । वः । अस्ति ॥ २१ ॥

हे मरुतः वोयुष्माकं दात्राद्दानात् मानिरराम वयंमानिर्गमाम यूयमस्मान् परित्यज्यान्येभ्योधनमादत्तेत्यर्थः हे रथ्योरथवन्तोमरुतः विभागे युष्मदीयस्य धनस्य दाने पश्चान्मादघ्म

दध्मतिर्गतिकर्मा वयं पश्चाद्भागिनोभाभूम यूयं प्रथममस्मभ्यमेव दत्तेति यावत्। स्पार्हे स्पृहणीये वसव्ये धनसमूहे यूयं नोस्मान् आभजतन भागिनः कुरुत। हे वृषणः वर्षितारोमरुतः वोयुष्माकं सुजातं शोभनजनं यद्वसव्ये वसव्यमस्ति तस्मिन् भागिनः कुरुतेति संबन्धः ईमितिपूरणः॥ २१ ॥

अथ द्वाविंशी–

संयद्धनन्तमन्युभिर्जनासःशूरायह्वीष्वोषधीषुविक्षु ।
अधस्मानोमरुतोरुद्रियासस्त्रातारोभूतपृतनास्वर्यः ॥ २२ ॥

सम् । यत् । हनन्त । मन्युऽभिः । जनासः । शूराः । यह्वीषु ।
ओषधीषु । विक्षु । अध । स्म । नः । मरुतः । रुद्रियासः ।
त्रातारः । भूत । पृतनासु । अर्यः ॥ २२ ॥

यद्यदा शूराविक्रान्ताः जनासोजनाः यह्वीषु महतीषु ओषधीषु विक्षु प्रजासु च जेतव्यासु मन्युभिः कोपैः अभिमानैर्वा संहनन्त संगच्छन्ते अध तदानीं हे रुद्रियासोरुद्रपुत्रा हेमरुतः यूयं पृतनासु युद्धेषु अर्यः अरेः शत्रोः सकाशात् नोस्माकं त्रातारो भूत रक्षकाभवत। स्मेतिपूरणः॥ २२ ॥

अथ त्रयोविंशी–

भूरिचक्रमरुतःपित्र्याण्युक्थानियावःशस्यन्तेपुराचित् ।
मरुद्भिरुग्रःपृतनासुसाह्लामरुद्भिरित्सनितावाजमर्वा ॥ २३ ॥

भूरि । चक्र । मरुतः । पित्र्याणि । उक्थानि । या । वः ।
शस्यन्ते । पुरा । चित् । मरुत्ऽभिः । उग्रः । पृतनासु ।
साह्ला । मरुत्ऽभिः । इत् । सनिता । वाजम् । अर्वा ॥ २३ ॥

हे मरुतोयूयं भूरि भूरीणि बहूनि पित्र्याणि अस्मत् पितृसंबन्धीनि धनदानादीनि कर्माणि चक्र कृतवन्तोभवत पुराचित् पूर्वकालेपि वोयुष्माकं उक्थानि प्रशस्यानि या यानि कर्माणि शस्यन्ते प्रख्याप्यन्ते तानि चक्रेति संबन्धः। उग्रओजस्वी पृतनासु युद्धेषु मरुद्भिर्यु-

ष्माभिर्हेतुभिः साह्ला शत्रूणामभिभविता भवति । मरुद्भिरिव मरुद्भिर्युष्माभिरेव हेतुभिः अर्वा स्तोत्रैरभिगन्ता वाजमन्नं सनिता संभक्ता भवति यद्वा अर्वा अश्वः वाजं युद्धं सनिता भवति ॥ २३ ॥

अथ चतुर्विंशी–

अस्मेवीरोमरुतःशुष्म्यस्तुजनानांयोअसुरोविधर्ता ।
अपोयेनसुक्षितयेतरेमाधस्वमोकोअभिवःस्याम ॥ २४ ॥

अस्मे इति । वीरः । मरुतः । शुष्मी । अस्तु । जनानाम् ।
यः । असुरः । विऽधर्ता । अपः । येन । सुऽक्षितये । तरेम ।
अध । स्वम् । ओकः । अभि । वः । स्याम ॥ २४ ॥

हे मरुतः अस्मे अस्माकं वीरः पुत्रः शुष्मी अस्तु बलवान् भवतु असुरः प्रज्ञावान् योजनानां शत्रूणां विधर्ता विधारकः येन पुत्रेण वयं सुक्षितये सुष्ठुनिवासाय अपः आमुवतः शत्रून् तरेम हिंसेम सपुत्रोबलवानस्त्विति पूर्वेणान्वयः । अधापिच वोयुष्मदीयावयं स्वमोकः आत्मीयं स्थानं अभिस्याम आतिष्ठेम ॥ २४ ॥

अथ पंचविंशी–

तन्नइन्द्रोवरुणोमित्रोअग्निरापओषधीर्वनिनोजुषन्त ।
शर्मन्त्स्याममरुतामुपस्थेयूयंपातस्वस्तिभिःसदानः ॥२५॥२६॥

तत् । नः । इन्द्रः । वरुणः । मित्रः । अग्निः । आपः । ओषधीः ।
वनिनः । जुषन्त । शर्मन् । स्याम । मरुताम् । उपऽस्थे । यूयम् ।
पात । स्वस्तिऽभिः । सदा । नः ॥ २५ ॥ २६ ॥

पूर्वं व्याख्यातेयं अक्षरार्थस्तु इन्द्रादयोदेवाः अस्मदीयं स्तोत्रं सेवन्तां मरुतामुपस्थाने वर्तमाना वयं सुखे स्याम हे मरुतोयूयं सर्वदास्मान् अविनाशैः पालयत ॥ २५ ॥

॥ इति पंचमस्य चतुर्थे षड्विंशोवर्गः ॥ २६ ॥

मध्वोयइति सप्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मरुद्देवताकं मध्वःसप्तेत्यनुक्रान्तं। दशरात्रे पष्ठेहनि आग्निमारुतेइदं मारुतनिविद्धानं सूत्रितंच–मध्वोवोनाम सप्तव्रयेत्याग्निमारुतमिति।

तत्र प्रथमा–

मध्वोवोनाममारुतंयजत्राःप्रयज्ञेषुशवसामदन्ति।
येरेजयन्तिरोदसीचिदुर्वीपिन्वन्त्युत्संयदयासुरुग्राः॥ १ ॥

मध्वः। वः। नाम। मारुतम्। यजत्राः। प्र। यज्ञेषु।
शवसा। मदन्ति। ये। रेजयन्ति। रोदसी इति। चित्।
उर्वी इति। पिन्वन्ति। उत्सम्। यत्। अयासुः। उग्राः॥ १ ॥

हे यजत्रा यजनीयामरुतः वोयुष्मदीयं मारुतं मरुत्संबन्धि नाम नामधेयं मध्वो मधवो मादयितारः स्तोतारः यज्ञेषु यागेषु शवसा बलेन प्रमदन्ति प्रकर्षेण स्तुवन्ति उच्चैः स्तुवन्तीत्यर्थः। ये मरुतः उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्यावपि रेजयन्ति कंपयन्ति। किंच उत्सं मेघं पिन्वन्ति वर्षयन्ति उग्रा उद्गूर्णा यत् ये मरुतः आयासुः यान्ति सर्वत्रगच्छंति तेषां मरुतां युष्माकं नाम प्रमदन्तीति पूर्वेणान्वयः॥ १ ॥

अथ द्वितीया–

निचेतारोहिमरुतोगृणन्तंप्रणेतारोयजमानस्यमन्म।
अस्माकमद्यविदथेषुबर्हिरावीतयेसदतपिप्रियाणाः॥ २ ॥

निऽचेतारः। हि। मरुतः। गृणन्तम्। प्रऽनेतारः। यजमानस्य।
मन्म। अस्माकम्। अद्य। विदथेषु। बर्हिः। आ।
वीतये। सदत। पिप्रियाणाः॥ २ ॥

ये मरुतः गृणंतं स्तुवन्तं जनं निचेतारोहि मृगयमाणाभवन्ति खलु। अपिच यजमानस्य मन्म अभिमतं कामं प्रणेतारश्च भवन्ति। अपरोर्धर्चः प्रत्यक्षकृतः हे मरुतोयूयं पिप्रियाणाः प्रीयमाणाः सन्तः अद्यास्मिन्दिवसे अस्माकं विदथेषु यज्ञेषु वीतये सोमस्य भक्षणाय बर्हिः बर्हिषि कुशमये आसदत आसीदत उपविशत॥ २ ॥

अथ तृतीया—

नैतावदन्येमरुतोयथेमेभ्राजन्तेरुक्मैरायुधैस्तनूभिः ।
आरोदसीविश्वपिशःपिशानाःसमानमञ्ज्यञ्जतेशुभेकम् ॥ ३ ॥

न । एतावत् । अन्ये । मरुतः । यथा । इमे । भ्राजन्ते ।
रुक्मैः । आयुधैः । तनूभिः । आ । रोदसी इति । विश्वऽपिशः ।
पिशानाः । समानम् । अञ्जि । अञ्जते । शुभे । कम् ॥ ३ ॥

इमे ईदृशामरुतोयथायत्परिमाणं धनादिकं ददति अन्ये मरुव्द्यतिरिक्तादेवाः एतावद्धना-दिकं नदद्युरित्यर्थः । तेच रुक्मैः रोचमानैरायुधैराभरणैः स्वकीयास्तैः तनूभिरात्मीयैः केवलैरं-गैश्च भ्राजन्ते सर्वदा भासन्ते । कश्चिदेकवाक्यतामाह यथेमे मरुतोरुक्मादिभिः भ्राजन्ते नैताव-देतव्द्यतिरिक्ताभ्राजन्तइति । अपिच रोदसी द्यावापृथिव्यौ पिशानाः प्रकाशयन्तः विश्वपिशः व्याप्तदीप्तयः एवंभूतामरुतः शुभे शोभायै समानं सदृशरूपं अंजि आभरणं आ अंजते स्व-कीयावयवेषु अभिव्यक्तीकुर्वन्ति । कमितिपूरणः ॥ ३ ॥

अथ चतुर्थी—

ऋधक्सावोमरुतोदिद्युदस्तुयद्वआगःपुरुषताकराम ।
मावस्तस्यामपिभूमायजत्राअस्मेवोअस्तुसुमतिश्चनिष्ठा ॥ ४ ॥

ऋधक् । सा । वः । मरुतः । दिद्युत् । अस्तु । यत् । वः । आगः ।
पुरुषता । कराम । मा । वः । तस्याम् । अपि । भूम । यजत्राः ।
अस्मे इति । वः । अस्तु । सुऽमतिः । चनिष्ठा ॥ ४ ॥

हे मरुतः वोयुष्मदीया सा प्रसिद्धा दिद्युत् हेतिः ऋधगस्तु अस्मत्तः पृथग्भवतु यत् यद्यपि वयं वोयुष्माकं आगःअपराधं पुरुषता पुरुषतया मनुष्यत्वेन कराम करवाम मनुष्याणां हि प्रमा-दः सुलभइत्यर्थः । हे यजत्रा यजनीयामरुतः वोयुष्मदीयायां तस्यां दिद्युति अपि ईषदपि माभूम चनिष्ठा अन्नवत्तमा अतिशयेनान्नदाइत्यर्थः वोयुष्मदीया सुमतिरनुग्रहबुद्धिः अस्मे अस्मास्वस्तु ॥ ४ ॥

अथ पंचमी—

कुतेचिदत्रमरुतोरणन्तानवद्यासःशुचयःपावकाः ।
प्रणोवतसुमतिभिर्यजत्राःप्रवाजेभिस्तिरतपुष्यसेनः ॥ ५ ॥

कृते । चित् । अत्रं । मरुतः । रणन्त । अनवद्यासः ।
शुचयः । पावकाः । प्र । नः । अवत । सुमतिऽभिः ।
यजत्राः । प्र । वाजेभिः । तिरत । पुष्यसे । नः ॥ ५ ॥

अत्रास्मिन्कृते चिद् अस्मदीये यज्ञकर्मण्येव मरुतोरणन्त रमन्तां । कीदृशामरुतः अनवद्यासः अनिंदिताः शुचयोदीप्तियुक्ताः पावकाः शोधकाः एवंभूताइति । किंच हेमरुतः यजत्राः यजनीया यूयं नोस्मान् सुमतिभिरनुग्रहबुद्धिभिः सुष्टुतिभिर्हेतुभिर्वा प्रावत प्रकर्षेण पालयत तथा नोस्मान्वाजेभिर्वाजैरन्नैः पुष्यसे पोष्यार्थं प्रतिरत प्रवर्धयत ॥ ५ ॥

अथ षष्ठी—

उतस्तुतासोमरुतोव्यन्तुविश्वेभिर्नामभिर्नरोहवींषि ।
ददातनोअमृतस्यप्रजायैजिगृतरायःसूनृतामघानि ॥ ६ ॥

उत । स्तुतासः । मरुतः । व्यन्तु । विश्वेभिः । नामऽभिः । नरः ।
हवींषि । ददात । नः । अमृतस्य । प्रऽजायै । जिगृत ।
रायः । सूनृता । मघानि ॥ ६ ॥

उतापिच स्तुतासः एवमस्माभिः स्तुताः मरुतः हवींषि व्यन्तु भक्षयन्तु कीदृशाः विश्वेभिर्विश्वैः नामभिरुदकैः सहिता नरोनेतारः । शेषः प्रत्यक्षकृतः हे मरुतः नोस्मदीयायै प्रजायै संततये अमृतस्य अमृतमुदकं ददात दत्त तथा हविर्दातुर्यजमानस्य सूनृता सूनृतानि सुष्ठु नृत्यन्ति शोभनयोगानि मघानि धनानि रायः जिगृत उद्गिरत प्रयच्छतेत्यर्थः ॥ ६ ॥

अथ सप्तमी—

आस्तुतासोमरुतोविश्वऊतीअच्छासूरीन्सर्वताताजिगात ।
येनस्त्मनाशतिनोवर्धयन्तियूयंपातस्वस्तिभिःसदानः ॥७॥ २७॥

आ । स्तुतासः । मरुतः । विश्वे । ऊती । अच्छ । सूरीन् ।
सर्वऽताता । जिगात । ये । नः । त्मना । शतिनः । वर्धयन्ति ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ २७ ॥

हे मरुतः स्तुतासः एवमस्माभिः स्तुताः विश्वे सर्वे यूयंऊती ऊत्या रक्षया सहिताः सूरीन् स्तोतॄन् अच्छाभिलक्ष्य सर्वताता सर्वतातौ यज्ञे आजिगात आगच्छत ये मरुतः त्मना आत्मनैव नोस्मान् शतिनः शतसंख्याकान् वर्धयन्ति यथा वयं पुत्रपौत्रादिभिः शतिनोभवेम तथावर्धयन्तीत्यर्थः ते यूयमाजिगातेति पूर्वेणसंबंधः एवंभूतामरुतोयूयं सर्वदास्मान् पालयत ॥ ७ ॥

॥ इति पंचमस्य चतुर्थे सप्तविंशोवर्गः ॥ २७ ॥

प्रसाकमुक्षेति षळृचं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मरुद्देवताकं अनुक्रान्तंच—प्रसाकमुक्षेषळिति । गतोविनियोगः ।

तत्र प्रथमा—

प्रसाकमुक्षेअर्चतागणाययोदैव्यस्यधाम्नस्तुविष्मान् ।
उतक्षोदन्तिरोदसीमहित्वानक्षन्तेनाकंनिर्ऋतेरवंशात् ॥ १ ॥

प्र । साकम्ऽउक्षे । अर्चत । गणाय । यः । दैव्यस्य ।
धाम्नः । तुविष्मान् । उत । क्षोदन्ति । रोदसी इति ।
महिऽत्वा । नक्षन्ते । नाकम् । निःऽऋतेः । अवंशात् ॥ १ ॥

हे स्तोतारोयूयं साकमुक्षे संततं वर्षित्रे गणाय मरुत्समूहाय प्रार्चत स्तोत्रं प्रोच्चारयत योमरुद्गणः दैव्यस्य देवसंबन्धिनः धाम्नः स्वर्गाख्यस्य स्थानस्य तुविष्मान् वृद्धिमान् भवति सर्वेभ्योदेवेभ्यः प्रवृद्धइत्यर्थः तस्मै गणायेति पूर्वेणसंबन्धः । उतापिच मरुतः महित्वा स्वकीयेन महत्वेन सहिताः रोदसी द्यावापृथिव्यौ क्षोदन्ति भंजंति तथा निर्ऋतेर्भूमेः अवंशादन्तरिक्षाच्च नाकं स्वर्गं नक्षन्ते व्याप्नुवन्ति ॥ १ ॥

अथ द्वितीया–

जनूश्चिद्वोमरुतस्त्वेष्येणभीमासस्तुविमन्यवोयासः।
प्रयेमहोभिरोजसोतसंतिविश्वोवोयामन्भयतेस्वर्दृक् ॥ २ ॥

जनूः। चित्। वः। मरुतः। त्वेष्येण। भीमासः।
तुविऽमन्यवः। अयासः। प्र। ये। महःऽभिः। ओजसा।
उत। सन्ति। विश्वः। वः। यामन्। भयते। स्वःऽदृक् ॥ २ ॥

हे भीमासोभीमाः तुविमन्यवः प्रवृद्धमतयः अयासोगन्तारः इति त्रीणिसंबोधनानि एवंभूता हे मरुतोवोयुष्माकं जनूर्जन्म त्वेष्येण दीप्तेन रुद्रेण बभूवेति शेषः। उताषिच ये मरुतः महोभिस्तेजोभिः ओजसा बलेनच प्रसन्ति प्रभवन्ति तेषां वोयुष्माकं यामन् यामनि गमने विश्वः स्वर्दृक् सूर्यस्य द्रष्टा सर्वोजीवसमूहः यद्वा स्वः अन्तरिक्षं तत्पश्यतीति वृक्षः स्वर्दृक् सर्वदाउत्तिष्ठन्नित्यर्थः भयते बिभेति॥ २॥

अथ तृतीया–

बृहद्वयोमघवंद्भ्योदधातजुजोषन्निन्मरुतःसुष्टुतिंनः।
गतोनाध्वाविनिरातिजन्तुंप्रणःस्पार्हाभिरूतिभिस्तिरेत ॥ ३ ॥

बृहत्। वयः। मघवत्ऽभ्यः। दधात। जुजोषन्। इत्।
मरुतः। सुऽस्तुतिम्। नः। गतः। न। अध्वा। वि। तिराति।
जन्तुम्। प्र। नः। स्पार्हाभिः। ऊतिऽभिः। तिरेत ॥ २ ॥

हे मरुतोयूयं मघवद्भ्योहविर्लक्षणान्नवद्भ्योस्मभ्यं बृहन्महत् वयोन्नं दधात प्रयच्छत नोस्मदीयां सुष्टुतिं शोभनं स्तोत्रं जुजोषन्निव सेवन्तामेव गतोमरुद्भिः प्राप्तः अध्वा मार्गः जंतुं प्राणिनं न वितिराति नाहन्ति उदकेनाप्यायपत्येव यद्वा वितिरातिर्वर्धनार्थः नेतिचार्थे मरुद्भिः गतोमार्गश्च जंतुं वर्धयति तथानोस्मान् स्पार्हाभिः स्पृहणीयाभिः ऊतिभिः रक्षाभिः प्रतिरेत प्रवर्धयते॥३॥

अथ चतुर्थी–

युष्मोतोविप्रोमरुतःशतस्वीयुष्मोतोअर्वासहुरिःसहस्री ।
युष्मोतःसम्राळुतहंतिवृत्रंप्रतद्वोअस्तुधूतयोदेष्णम् ॥ ४ ॥

युष्माऽऊतः । विप्रः । मरुतः । शतस्वी । युष्माऽऊतः ।
अर्वा । सहुरिः । सहस्री । युष्माऽऊतः । सम्ऽराट् ।
उत । हन्ति । वृत्रम् । प्र । तत् । वः । अस्तु । धूतयः । देष्णम् ॥ ४ ॥

हे मरुतः युष्मोतः युष्माभीरक्षितः विप्रः स्तोता शतस्वी शतसंख्योपेतधनवान् भवति- युष्मोतः युष्माभिः रक्षितः अर्वा अभिगन्ता सहुरिः शत्रूणामभिभविता स्तोता सहस्री सहस्र- धनवान् भवति । युष्मोतः युष्माभीरक्षितः सम्राट् साम्राज्ययुक्तोभवति । उतापिच वृत्रं शत्रुं हन्ति युष्मद्रक्षकोहिनस्ति । हे धूतयः कंपयितारोमरुतः वोयुष्माभिर्दत्तं तत्प्रसिद्धं देष्णं धनं प्रास्तु प्रभूतं भवतु ॥ ४ ॥

अथ पंचमी–

ताँआरुद्रस्यमीळ्हुषोविवासेकुविन्नंसन्तेमरुतःपुनर्नः ।
यत्सस्वर्ताजिहीळिरेयदाविरवतदेनईमहेतुराणाम् ॥ ५ ॥

तान् । आ । रुद्रस्य । मीळ्हुषः । विवासे । कुवित् । नंसन्ते ।
मरुतः । पुनः । नः । यत् । सस्वर्ता । जिहीळिरे । यत् ।
आविः । अव । तत् । एनः । ईमहे । तुराणाम् ॥ ५ ॥

मीळ्हुषः कामानांवर्षितुः रुद्रस्येश्वरस्य पुत्रान् तान्मरुतः आविवासे अहं होता परिचरा- मि ते मरुतः नःअस्मभ्यं कुवित् बहुकृत्वः पुनः भूयः नंसन्ते नमन्तां अभिमुखीभवन्तु । कुवित् शब्देनैव पुनः शब्दार्थस्य लब्धत्वात् पुनः शब्दग्रहणं किमर्थं आदरार्थं । सस्वर्ताअन्तर्निहितेन अप्रकाशेन यत् येन एनसा जिहीळिरे मरुतः क्रुध्येयुः आविः प्रकाशेन यत् येन एनसाच जिहीळिरे तुराणां क्षिप्राणां मरुतां संबन्धि तदुभयमेनोपराधं अवईमहे स्तोत्रेण वय- मपनयामः ॥ ५ ॥

अथ षष्ठी—

प्रसावाचिसुष्टुतिर्मघोनामिदंसूक्तंमरुतोजुषन्त ।
आराच्चिद्द्वेषोवृषणोयुयोतयूयंपातस्वस्तिभिःसदानः ॥ ६॥२८॥

प्र । सा । वाचि । सुऽस्तुतिः । मघोनाम् । इदम् । सुऽउक्तम् ।
मरुतः । जुषन्त । आरात् । चित् । द्वेषः । वृषणः । युयोत ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ २८ ॥

मघोनां धनवतां मरुतां संबंधिनी सुष्टुतिः या शोभना स्तुतिः अस्मिन् सूक्ते कृता सा स्तुतिः अस्माभिः प्रवाचि प्रोक्तासीत् । मरुतः इदमीदृग्भूतं सूक्तं जुषन्त सेवन्तां । हे वृषणः कामानां वर्षितारोयूयं द्वेषोद्वेषांसि शत्रून् आराच्चित् दूरादेव युयोत अस्मत्तः पृथक्कुरुत यूयं नोस्मान् स्वस्तिभिः सर्वदा रक्षत ॥ ६ ॥

॥ इति पंचमस्य चतुर्थेष्टाविंशोवर्गः ॥ २८ ॥

यंत्रायध्वइति द्वादशर्चं चतुर्थं सूक्तं अत्रेयमनुक्रमणिका—यंत्रायध्वेद्वादश त्रिप्रगाथादि नवम्याद्यास्तिस्रोगायत्र्योंत्यानुष्टुब्रौद्री मृत्युविमोचनीति । आद्यातृतीयापंचम्योबृहत्यः द्वितीयाचतुर्थीषष्ठ्यःसतोबृहत्यः सप्तम्यष्टम्यावनुक्तत्वात्त्रिष्टुभौ नवमीदशम्येकादश्योगायत्र्यः द्वादश्यनुष्टुप् साचरुद्रदेवताका शिष्टामारुत्यः । सूक्तविनियोगोलैंगिकः ।

तत्र प्रथमा—

यंत्रायध्वइदमिदंदेवासोयंचनयथ ।
तस्माअग्नेवरुणमित्रार्यमन्मरुतःशर्मयच्छत ॥ १ ॥

यम् । त्रायध्वे । इदमऽइदम् । देवासः । यम् । च । नयथ ।
तस्मै । अग्ने । वरुण । मित्र । अर्यमन् । मरुतः । शर्म । यच्छत॥१॥

हे देवासोदेवाः इदमिदं इनोभयहेतोः यं स्तोतारं त्रायध्वे पालयध्वे यं च स्तोतारं नयथ सन्मार्गं प्रापयथ हे अग्ने वरुण मित्र अर्यमन् हे मरुतः एवंभूता हे देवाः तस्मै स्तोत्रे शर्म सुखं यच्छत दत्त ॥ १ ॥

अथ द्वितीया–

युष्माकँदेवाअवसाहंनिप्रियईजानस्तरतिद्विषः ।
प्रसक्षयँतिरतेविमहीरिषोयोवोवरायदाशति ॥ २ ॥

युष्माकम् । देवाः । अवसा । अहंनि । प्रिये । ईजानः ।
तरति । द्विषः । प्र । सः । क्षयम् । तिरते । वि । महीः ।
इषः । यः । वः । वराय । दाशति ॥ २ ॥

हे देवाः युष्माकं युष्मदीयेन अवसा रक्षणेन प्रिये अहनि सर्वेषां देवानां प्रियभूते सुत्याभिधाने दिवसे ईजानः इष्टवान् जनः द्विषः शत्रून् तरति आक्रामति सयजमानः क्षयं स्वकीयं निवासं प्रतिरते प्रवर्धयति । योयजमानः वोयुष्मभ्यं महीः महान्ति इषः हविर्लक्षणान्यन्नानि वराय निवारणाय यूयं नान्यत्रगच्छत अस्मदीयान्येव हवींषि स्वीकुरुतेति निरोधनं कर्तुं विदाशति विशेषेण ददाति अतएव स्वकीयं निवासं वर्धयतीत्यर्थः ॥ २ ॥

अथ तृतीया–

नहिवंश्चरमंचनवसिष्ठःपरिमंसते ।
अस्माकमद्यमरुतःसुतेसचाविश्वेपिबतकामिनः ॥ ३ ॥

नहि । वः । चरमम् । चन । वसिष्ठः । परिऽमंसते । अस्माकम् ।
अद्य । मरुतः । सुते । सचा । विश्वे । पिबत । कामिनः ॥ ३ ॥

वसिष्ठऋषिः वोयुष्माकं मध्ये चरमं चन अवरमपि नहि परिमंसते वर्जयित्वा न स्तौति किंतु सर्वानेव युष्मान्स्तौतीत्यर्थः अद्यास्मिन् दिने अस्माकमस्मदीये सुते सोमे अभिषुते सति हे मरुतः कामिनः सोमं कामयमानाः विश्वे यूयं सचा संगत्य पिबत पानं कुरुत ॥३॥

अथ चतुर्थी–

नहिवंऊतिःपृतनासुमर्धतियस्माअराध्वंनरः ।
अभिवआवर्त्सुमतिर्नवीयसीतूयंयातपिपीषवः ॥ ४ ॥

नहि । वः । ऊतिः । पृतनासु । मर्धति । यस्मै । अराध्वम् । नरः ।
अभि । वः । आ । अवर्त् । सुऽमतिः । नवीयसी ।
तूयम् । यात । पिपीषवः ॥ ४ ॥

हे मरुतः वोयुष्मदीया ऊती रक्षा पृतनासु युद्धेषु नहि मर्धति न खलु हिनस्ति शत्रुभिः कृतां हिंसां सहतइत्यर्थः । हे नरोनेतारोयूयं यस्मै जनाय अराध्वं कामानदध्वं तं जनं न हिनस्तीति संबन्धः । नवीयसी नवतरा वोयुष्मदीया सुमतिरनुग्रहबुद्धिः अभ्यावर्त अस्मानभ्यावर्ततां तदा हे पिपीषवः सोमपानकामा यूयमपि तूयं क्षिप्रं यात आगच्छत ॥ ४ ॥

अथ पंचमी—

ओषुघृष्विराधसोयातनान्धांसिपीतये ।
इमावोहव्यामरुतोररेहिकंमोष्वन्यत्रगन्तन ॥ ५ ॥

ओ इति । सु । घृष्विऽराधसः । यातन । अन्धांसि । पीतये ।
इमा । वः । हव्या । मरुतः । ररे । हि । कम् । मो इति ।
सु । अन्यत्र । गन्तन ॥ ५ ॥

हे घृष्विराधसः परस्परं घृष्टानि सुसंहतानि राधांसि येषां ते हे मरुतः यूयमंधांसि सोमलक्षणानि हवींषि पीतये भक्षणार्थं सु सुष्ठु आयातन । आयात हि यस्मात् कारणात् हे मरुतोवोयुष्मदर्थं इमा इमानि हव्या हव्यानि हवींषि ररे अहं ददामि अतः कारणाद्यूयं अन्यत्र मोषुगन्तन मागच्छत कमितिपूरणः ॥ ५ ॥

अथ षष्ठी—

आचनोबर्हिःसदताविताचनःस्पार्हाणिदातवेवसु ।
अस्रेधन्तोमरुतःसोम्येमधौस्वाहेहमादयाध्वै ॥ ६ ॥ २९ ॥

आ । च । नः । बर्हिः । सदत । अविता । च । नः ।
स्पार्हाणि । दातवे । वसु । अस्रेधन्तः । मरुतः । सोम्ये ।
मधौ । स्वाहा । इह । मादयाध्वै ॥ ६ ॥ २९ ॥

हे मरुतोयूयं नोस्मदीयेबर्हिः कुशमयेबर्हिषि आसदत च उपविशत स्पार्हाणि स्पृहणीयानि वसु वसूनि धनानि दातवे अस्मभ्यं दातुं नोस्मान् अवित च आगच्छत च हे मरुतः अस्रेधन्तः अहिंसन्तोयूयं इहास्मिन्यज्ञे मधौ मदकरे सोम्ये सोमात्मके ह विषि स्वाहा स्वाहाकारेण मादयाध्वै मादयध्वं मायत ॥ ६ ॥

॥ इति पंचमस्य चतुर्थे एकोनत्रिंशोवर्गः ॥ २९ ॥

अथ सप्तमी–

सस्वश्चिद्धितन्व१ःशुंभमानाआहंसासोनीलपृष्ठाअपप्तन् ।
विश्वंशर्धोअभितोमानिषेदनरोनरण्वाःसवनेमदन्तः ॥ ७ ॥

सस्वरिति । चित् । हि । तन्वः । शुंभमानाः । आ । हंसासः ।
नीलऽपृष्ठाः । अपप्तन् । विश्वम् । शर्धः । अभितः । मा ।
नि । सेद । नरः । न । रण्वाः । सवने । मदन्तः ॥ ७ ॥

सस्वः अन्तर्हितामरुतः तन्वः स्वकीयान्यंगानि शुंभयानाः अलंकरणैः शोभयन्तो मरुतः नीलपृष्ठाः असितवर्णाः हंसाराश्चिव हंसाइव आपप्तन् आपतन्तु आगच्छन्तु । विश्वं शर्धः व्याप्तोमरुद्गणः मा मां अभितः समन्तात् निषेद निषीदतु तत्रदृष्टान्तः-सवनेस्मदीये यज्ञे मदन्तोहृष्यन्तः रण्वाः रमणीयाः नरोन मनुष्याइव तद्वत् ॥ ७ ॥

साकमेधेषु मरुद्भ्यः सान्तपनेभ्यइत्यस्य योनोमरुतइति पुरोनुवाक्या सान्तपनाइदमितियाज्या तथाचसूत्रितं–सान्तपनाइदंहविर्योनोमरुतोअभिदुर्हणायुरिति ।

सैषा सूक्तेष्टमी–

योनोमरुतोअभिदुर्हणायुस्तिरश्चित्तानिवसवोजिघांसति ।
द्रुहःपाशान्प्रतिसमुचीष्टतपिष्ठेनहन्मनाहन्तनातम् ॥ ८ ॥

यः । नः । मरुतः । अभि । दुःऽहृणायुः । तिरः । चित्तानि ।
वसवः । जिघांसति । द्रुहः । पाशान् । प्रति । सः ।
मुचीष्ट । तपिष्ठेन । हन्मना । हन्तन । तम् ॥ ८ ॥

हे वसवः प्रशस्या हे मरुतः नोस्मदीयानि चित्तानि दुर्हणायुः अशोभनं कुर्यन् तिरः सर्वैस्तिरस्कृतोपोजनः अभिजिघांसति आभिमुख्येन हन्तुमिच्छति सजनः द्रुहः पापानां द्रो-ग्धुर्वरुणस्य पाशान् अस्मासु प्रतिसमुचीष्ट बध्नीयात् यूयं तं जनं तपिष्ठेन तमृतमेन हन्मना हननसाधनेनायुधेन हन्तन हत हिंस्त ॥ ८ ॥

अथ नवमी—

सांतपनाइदंहविर्मरुतस्तज्जुजुष्टन । युष्माकोतीरिशादसः ॥ ९ ॥

साम्ऽतपनाः । इदम् । हविः । मरुतः । तत् ।
जुजुष्टन । युष्माकं । ऊती । रिशादसः ॥ ९ ॥

सांतपनाः शत्रूणां संतापकाः हे मरुतः इदं प्रत्यक्षेणोपलभ्यमानं हविः युष्मभ्यं कल्पित-मितिशेषः हे रिशादसः रिशतां हिंसतां असितारः रिशानामत्तारोवा यूयं युष्माक युष्माकं ऊती ऊत्या रक्षया तत्तादृशं हविर्जुजुष्टन सेवध्वम् ॥ ९ ॥

गृहमेधासइति गृहमेधीयस्य हविषोनुवाक्या सूत्रितंच— गृहमेधासआगत प्रबुध्यावई-रतेमहांसीति ।

अथ दशमी—

गृहमेधासआगतमरुतोमापभूतन । युष्माकोतीसुदानवः ॥ १० ॥

गृहऽमेधासः । आ । गत । मरुतः । मा । अप ।
भूतन । युष्माकं । ऊती । सुऽदानवः ॥ १० ॥

गृहमेधासः गृहेक्रियमाणोयज्ञोयेषां ते सुदानवः शोभनदाना हे मरुतोयूयं युष्माक युष्माकं ऊती ऊत्या रक्षया युक्ताः आगत अस्मदीयं यज्ञं प्रत्यागच्छत हे मरुतः मापभूतन अपगतामाभवत भूप्राप्तावितिधातुः ॥ १० ॥

वैश्वदेवपर्वणि मारुतस्यानुवाक्या इहेहवइत्येषा सूत्रितंच—इहेहवः स्वतवसः प्रचित्रमर्क-गृणतेतुरायेति ।

सैषा सूक्ते एकादशी–

इहेहवःस्वतवसःकवयःसूर्यत्वचः । यज्ञंमरुतआवृणे ॥ ११ ॥

इहऽइह । वः । स्वऽतवसः । कवयः । सूर्यऽत्वचः ।
यज्ञम् । मरुतः । आ । वृणे ॥ ११ ॥

हे स्वतवसः स्वायत्तबलाः स्वयं प्रवृद्धावा हे कवयः क्रान्तदर्शिनः सूर्यत्वचः सूर्यवर्णाः एवंभूता हेमरुतोवः यूयं इहेह इहैव अस्मदीयं यज्ञं आवृणे आभजामि कल्पयामि ॥ ११ ॥

अथ द्वादशी–

त्र्यंबकंयजामहेसुगन्धिंपुष्टिवर्धनम् ।
उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥१२॥३०॥

त्र्यंबकंयजामहेसुगन्धिंपुष्टिवर्धनम् ।
उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ १२ ॥ ३०॥

अत्र शौनकः त्रिरात्रंनियतोपोष्य अपयेत्पायसंचरुं । तेनाहुतिशतंपूर्णं जुहुयाच्छंसितव्रतः ॥ १ ॥ समुद्दिश्यमहादेवं त्र्यंबकंत्र्यंबकेत्यृचा । एतत्पर्वंशतंकृत्वाजीवेद्वर्षशतंसुखी ॥ २ ॥ त्रयाणां ब्रह्मविष्णुरुद्राणां अंबकं पितरं यजामहेइति शिष्यसमाहितोवसिष्ठोब्रवीति- किंविशिष्टमित्यतआह सुगन्धिं प्रसारितपुण्यकीर्तिं पुनः किंविशिष्टं पुष्टिवर्धनं जगद्बीजं उरुशक्तिमित्यर्थः उपासकस्य वर्धनं अणिमादिशक्तिवर्धनं अतस्त्वत्प्रसादादेव मृत्योर्मरणात् संसाराद्वा मुक्षीय मोचय यथा बंधनात् उर्वारुकं कर्कटीफलं मुच्यते तद्वन्मरणात्संसाराद्वा मोचय किं मर्यादीकृत्य आमृतात् सायुज्यतामोक्षपर्यन्तमित्यर्थः ॥ अथ तैत्तिरीयभाष्ये–शोभनः शरीरगंधः पुण्यगंधोवा यस्यासौ सुगंधिः । यथा वृक्षस्य संपुष्पितस्य दूराद्गंधोवात्येवं पुण्यस्य कर्मणोदूराद्गंधोवातीतिश्रुतेः । पुष्टिं शरीरं धनादिविषयां वर्धयतीति पुष्टिवर्धनस्तादृशं त्र्यंबकं यजामहे पूजयामः लोके यथोर्वारुकफलानि बंधनात् वृंतात्स्वयमेव मुच्यन्ते तद्वदहं त्र्यंबकप्रसादेन मृत्योर्मुक्षीय मोचयन् मुक्तोभूयासं अमृतात्चिरजीवितात् स्वर्गादेर्वा मामुक्षीय । चतुर्थ-

पादार्थमंत्रस्य तात्पर्यातिशयं दर्शयति—त्र्यंबकं यजामह इत्याह मृत्योर्मुक्षीयमामृतादिति यवि-वदाहेति ॥ १२ ॥

॥ इति पंचमस्य चतुर्थे त्रिंशोवर्गः ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके चतुर्थोऽध्यायः समाप्तः॥४॥

---

१ तै० ब्रा० १.६.१०.।

॥ श्रीगणेशाय नमः ॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत्। निर्ममेतमहंवंदे विद्यातीर्थमहेश्वरम् ॥ १ ॥
व्याख्यायनिगमाभिज्ञः पञ्चमस्यचतुर्थकम्। अध्यायंसायणाचार्यः पञ्चमंव्याकरोत्यथ ॥२॥

तत्र यदद्यसूर्येति द्वादशर्चं पञ्चमं सूक्तम् अत्रानुक्रमणिका—यदद्य मैत्रावरुणन्तु वै सौर्याद्येति। मण्डलद्रष्टा वसिष्ठऋषिः अनुक्तत्वात् त्रिष्टुपछन्दः तु वै इत्युक्तत्वादेतदादीनि सप्तसूक्तानि मित्रावरुणदेवत्यानि आद्यासूर्यदेवत्या विनियोगोलैङ्गिकः।

तत्र प्रथमा—

ॐम् यदद्यसूर्यंब्रवोनागाउद्यन्मित्रायवरुणायसत्यम्।
वयंदेवत्रादितेस्यामतवंप्रियासोअर्यमन्गृणन्तः ॥ १ ॥

यत्। अद्य। सूर्य। ब्रवः। अनागाः। उत्ऽयन्। मित्राय।
वरुणाय। सत्यम्। वयम्। देवऽत्रा। अदिते। स्याम।
तव। प्रियासः। अर्यमन्। गृणन्तः ॥ १ ॥

हे सूर्य सर्वस्यप्रेरक एतन्नामकदेव उद्यन् उदयंस्त्वं यद्यदि अद्यास्मिन् अनुष्ठानकालेस्मान् ब्रवः ब्रूयाः। किमिति अनागाः अनागसइति एते अपापाइति यदि देवेषु मध्ये ब्रूयाः तर्हि वयं हे अदिते अदीनदेव देवत्रा देवेषु देवानां मध्ये मित्राय वरुणाय च सत्यं अवितथं स्याम अनागसोभवेम। किञ्च हे अर्यमन् दातः त्वां गृणन्तः स्तुवन्तः तव प्रियासः प्रियाः स्याम त्वत्प्रेमविषयाभवेम। यद्वोत्तरार्धएकं वाक्यम्। हेअदिते हेअर्यमन उक्तलक्षण देव वयं देवेषु मध्ये त्वां गृणन्तः तवैव प्रियाः स्याम यदि मां देवेष्वपापं ब्रूयास्तर्हि तेरयमनपराधीत्यनुगृहीतस्त्वां स्तुत्वा तव प्रियोभवेयमित्यर्थः ॥ १ ॥

अथ द्वितीया—

एषस्यमित्रावरुणानृचक्षाउभेउदेतिसूर्योअभिज्मन्।
विश्वस्यस्थातुर्जगतश्चगोपाऋजुमर्तेषुवृजिनाचपश्यन् ॥ २ ॥

एषः । स्यः । मित्रावरुणा । नृऽचक्षाः । उभे इति । उत ।
एति । सूर्यः । अभि । ज्मन् । विश्वस्य । स्थातुः । जगतः । च ।
गोपाः । ऋजु । मर्तेषु । वृजिना । च । पश्यन् ॥ २ ॥

हे मित्रावरुणा मित्रावरुणौ एषः पुरतोदृश्यमानः स्यः सः सर्वस्तुत्यत्वे प्रसिद्धः नृचक्षाः नृणां मनुष्याणां द्रष्टा सूर्यः उभे द्यावापृथिव्यावभि अभिलक्ष्यउदेति ज्मन् अन्तरिक्षे गच्छन् सविशेष्यते विश्वस्य सर्वस्य स्थातुः स्थावरस्य जगतोजंगमस्यच गोपाः गोपायिता । किंकुर्वन् मर्तेषु मनुष्येषु स्थितानि ऋजु ऋजूनि सुकृतानि वृजिना वृजिनानि पापानि च पश्यन् ॥ २ ॥

अथ तृतीया—

अयुक्तसप्तहरितःसधस्थाद्याईंवहन्तिसूर्यंघृताचीः ।
धामानिमित्रावरुणायुवाकुःसंयोयूथेवजनिमानिचष्टे ॥ ३ ॥

अयुक्त । सप्त । हरितः । सधऽस्थात् । याः । ईम् । वहन्ति ।
सूर्यम् । घृताचीः । धामानि । मित्रावरुणा । युवाकुः ।
सम् । यः । यूथाऽइव । जनिमानि । चष्टे ॥ ३ ॥

हे मित्रावरुणा मित्रावरुणौ युवयोरागमनाय सधस्थात् सहस्थानादन्तरिक्षादन्तरिक्षे सप्त सर्पणस्वभावान् तत्संख्याकान्वा हरितोहरिद्वर्णानश्वानयुक्त युक्तवान् रथे हरितआदित्यस्येतिहिनिरुक्तम् । या हरित ईमेनं सूर्यं देवं घृताचीर्घृताञ्चना उदकवत्यःउदकप्रदाइत्यर्थः तादृश्यःसत्योवहन्ति ताअयुक्त । अथोदितः सन् धामानि स्थानानि लोकान् जनिमानि जन्मानि जन्मभाजः प्राणिनइत्यर्थः तांश्च युवाकुः युवां कामयमानोयोदेवः सञ्चष्टे सम्यक्पश्यति यूथेव गोयूथानीव यूथपाः सयथा सर्वयूथं तदवान्तरगोयुक्तिं च सम्यक् पश्यति तद्वत् लोकान्प्राणिनश्च पश्यति ॥ ३ ॥

अथ चतुर्थी—

उद्वांपृक्षासोमधुमन्तोअस्थुरासूर्योअरुहच्छुक्रमर्णः ।
यस्माआदित्याअध्वनोरदन्तिमित्रोअर्यमावरुणःसजोषाः ॥४॥

उत् । वाम् । पृक्षासः । मधुऽमन्तः । अस्थुः । आ । सूर्यः ।
अरुहत् । शुक्रम् । अर्णः । यस्मै । आदित्याः । अध्वनः ।
रदन्ति । मित्रः । अर्यमा । वरुणः । सऽजोषाः ॥ ४ ॥

हे मित्रावरुणौ वां युवयोरर्थाय पृक्षासोन्नानि चरुपुरोडाशादीनि मधुमन्तोमाधुर्येणोपेतानि तत्साधनान्योषध्यादीनिवा उदस्थुः संपादितान्यासन् सूर्यश्च शुक्रं दीप्तं अर्णः अर्णवमन्तरिक्षं आरुहत् आरोहति यस्मै सूर्याय तद्गमनार्थमादित्याअदितेः पुत्रादेवा अध्वनोमार्गान् रदन्ति विलिखन्ति साधयन्ति। के ते मित्रःअर्यमा वरुणश्चैते त्रयोपि देवाः सजोषसः समानप्रीतयः सन्तः सदैव आरुहदिति ॥ ४ ॥

अथ पंचमी–

इमेचेतारोअनृतस्यभूरेर्मित्रोअर्यमावरुणोहिसन्ति ।
इमऋतस्यवावृधुर्दुरोणेशग्मासःपुत्राअदितेरदब्धाः ॥ ५ ॥

इमे । चेतारः । अनृतस्य । भूरेः । मित्रः । अर्यमा ।
वरुणः । हि । सन्ति । इमे । ऋतस्य । ववृधुः । दुरोणे ।
शग्मासः । पुत्राः । अदितेः । अदब्धाः ॥ ५ ॥

इमे मित्रःअर्यमा वरुणश्च त्रयोपि अनृतस्य पापस्य भूरेः प्रभूतस्य चेतारोहन्तारः सन्ति भवन्ति हि इमे मित्रादय ऋतस्य यज्ञस्य दुरोणे गृहे ववृधुः वर्धन्ते हविषा स्तुत्याच कीदृशास्ते शग्मासः सुखकराः अदितेः पुत्राः अदब्धा अहिंसिताः ॥ ५ ॥

अथ षष्ठी–

इमेमित्रोवरुणोदूळभासोचेतसंचिच्चितयन्तिदक्षैः ।
अपिक्रतुंसुचेतसंवतन्तस्तिरश्चिदंहःसुपथानयन्ति ॥ ६ ॥ १ ॥

इमे । मित्रः । वरुणः । दुःऽदभासः । अचेतसम् । चित् ।
चितयन्ति । दक्षैः । अपि । क्रतुम् । सुऽचेतसम् । वतन्तः ।
तिरः । चित् । अंहः । सुऽपथा । नयन्ति ॥ ६ ॥ १ ॥

इमे आदित्याः मित्रोवरुणश्च एतद्द्वयं अर्यम्णोप्युपलक्षणं एते दूळभासः दुर्लभाः अनभिभाव्याः अचेतसंचिद् अप्रज्ञानं अनुष्ठानविषयज्ञानरहितमपि दक्षैः सामर्थ्यैः चितयन्ति अपि सुचेतसं प्रकृष्टज्ञानवन्तं पुरुषं क्रतुं कर्तारं कर्मानुष्ठानवन्तं यतन्तः गच्छन्तःअंहोदुष्कृतं तिरश्चिद् तिरोनयन्तोस्मान् सुपथा शोभनमार्गेण नयन्ति प्रापयन्ति अभिमतं यज्ञं स्वर्गादिकं वा ॥ ६ ॥

॥ इति पञ्चमस्य पञ्चमे प्रथमोवर्गः ॥ १ ॥

अथ सप्तमी–

इमेदिवोअनिमिषापृथिव्याश्चिकित्वांसोअचेतसंनयन्ति ।
प्रव्राजेचिन्नद्योगाधमस्तिपारंनोअस्यविष्पितस्यपर्षन् ॥ ७ ॥

इमे । दिवः । अनिऽमिषा । पृथिव्याः । चिकित्वांसः ।
अचेतसम् । नयन्ति । प्रऽव्राजे । चित् । नद्यः । गाधम् । अस्ति ।
पारम् । नः । अस्य । विष्पितस्य । पर्षन् ॥ ७ ॥

इमे मित्रादयोदिवोद्युलोकस्य पृथिव्याश्च संबन्धिनः अनिमिषा अनिमिषेण सर्वदा चिकित्वांसोजानन्तः कं अचेतसं अज्ञानं नयन्ति प्रापयन्ति कर्माणि प्रव्राजेचित् प्रवणेपि अत्यन्तनिम्नेपि देशे नद्योनद्याः गाधमस्ति भवति युष्मत्सामर्थ्यात् ते महान्तोनोस्माकं अस्य विष्पितस्य व्याप्तितस्य कर्मणः पारं पर्षन् पारयन्तु नयन्तु ॥ ७ ॥

अथाष्टमी–

यद्गोपावददितिःशर्मभद्रंमित्रोयच्छन्तिवरुणःसुदासे ।
तस्मिन्नातोकंतनयंदधानामाकर्मदेवहेळनंतुरासः ॥ ८ ॥

यत् । गोपावत् । अदितिः । शर्म । भद्रम् । मित्रः । यच्छन्ति ।
वरुणः । सुऽदासे । तस्मिन् । आ । तोकम् । तनयम् । दधानाः ।
मा । कर्म । देवऽहेळनम् । तुरासः ॥ ८ ॥

यच्छर्मसुखं गृहं वा गोपावद् रक्षणोपेतं भद्रं स्तुत्यं अदितिरदीनोर्य्यमा अदितिर्वा मित्रोवरुणश्चैतेत्रयोदेवाः सुदासे सुदानाय मह्यं यच्छन्ति प्रयच्छन्ति तस्मिन् शर्मणि तोकं पुत्रं तनयं तत्पुत्रादिकं अथवा तनयशब्दोपत्यसामान्यवचनः तोकं बलवन्तं पुत्रं आसर्वतोदधानाः धारयन्तोवयं हे तुरासोगमनाय त्वरमाणाः देवहेळनं देवानां मित्रादीनां कोपनं मा कर्म मा कार्ष्म ॥ ८ ॥

अथ नवमी—

अव॒ वेदिं॒ होत्रा॑भिर्यजेत॒ रिपः॒ काश्चि॑द्वरुण॒ध्रुतः॒ सः ।
परि॒ द्वेषो॑भिरर्य॒मा वृ॑णक्तू॒रुं सु॒दासे॑ वृषणा उ लो॒कम् ॥ ९ ॥

अव॑ । वेदि॑म् । होत्रा॑भिः । य॒जे॒त॒ । रिपः॑ । काः । चि॒त् ।
व॒रु॒ण॒ऽध्रु॑तः । सः । परि॑ । द्वेषः॑ऽभिः । अ॒र्य॒मा । वृ॒ण॒क्तु॒ ।
उ॒रुम् । सु॒ऽदासे॑ । वृ॒ष॒णौ॒ । ऊँ॒ इति॑ । लो॒कम् ॥ ९ ॥

हे मित्रादयः सोस्मद्द्वेषी वेदिं यागसाधनं होत्राभिः वाङ्नामैतद् वाग्रूपाभिः स्तुतिभिः सार्धं अवयजेत वेद्यां कर्माणि कुर्वन् देवान् न स्तुयादित्यर्थः अवपूर्वोयजतिस्त्यागार्थः सकिं मामुयादिति तत्राह वरुणध्रुतः वरुणेन त्वया हिंसितः सकाः कश्चिद्रिपोहिंसाः मामुयादिति शेषः। अस्मांस्त्वर्यमादेवोद्वेषोभिः द्वेष्टृभीरक्षःप्रभृतिभिः परिवृणक्तु वर्जयतु उरुं विस्तीर्णं लोकं स्थानं सुदासे शोभनदानाय मह्यं प्रयच्छतं हे वृषणौ वर्षकौ कामानां मित्रावरुणौ उःपूरणः ॥ ९ ॥

अथ दशमी—

स॒स्वश्चि॒द्धि सम॑ृतिस्त्वे॒ष्ये॑षामपी॒च्ये॑न॒ सह॑सा॒ सह॑न्ते ।
यु॒ष्मद्भि॒या वृ॑षणो॒ रेज॑माना॒ दक्ष॑स्य चिन्महि॒ना मृ॒ळता॑ नः ॥ १० ॥

स॒स्वः । चि॒त् । हि । सम्ऽऋ॑तिः । त्वे॒षी । ए॒षा॒म् । अ॒पी॒च्ये॑न ।
सह॑सा । सह॑न्ते । यु॒ष्मत् । भि॒या । वृ॒ष॒णः॒ । रेज॑मानाः ।
दक्ष॑स्य । चि॒त् । म॒हि॒ना । मृ॒ळत॑ । नः॒ ॥ १० ॥

एषां मित्रादीनांसप्ततिः संगतिः संहतिर्वा सखः अन्तर्हिता निगूढा त्वेषी दीप्ताच भवति तादृशाएते अपीच्येन एतदप्यन्तर्हितनाम निगूढेन सहसा बलेन सहन्ते अभि भवन्ति अस्मद्द्वेषून्। किञ्च हे वृषणोभिमतवर्षकामित्रादयो युष्मद्युष्मत्तोभिया भीत्या रेजमानाः कंपमानाभवन्ति विरोधिनः। यस्मादेवं तस्माद्दक्षस्य युष्माकं बलस्य महिना महिम्ना महत्त्वेन नोस्मभ्यं मृळत उपदयां कुरुत चिद्धिपूरणौ॥ १०॥

अथैकादशी–

योब्रह्मणेसुमतिमायजातेवाजस्यसातौपरमस्यरायः।
सीक्षन्तमन्युंमघवानोअर्यउरुक्षयायचक्रिरेसुधातु॥ ११॥

यः। ब्रह्मणे। सुऽमतिम्। आऽयजाते। वाजस्य। सातौ।
परमस्य। रायः। सीक्षन्त। मन्युम्। मघऽवानः। अर्यः।
उरु। क्षयाय। चक्रिरे। सुऽधातु॥ ११॥

यो यजमानोब्रह्मणे परिवृढस्वकर्मणे युष्मत्स्तोत्ररूपाय सुमतिं शोभनां बुद्धिं आयजाते आयजते यजतिरत्रदाने ददाति करोति। किमर्थं वाजस्यान्नस्य सातौ दाने निमित्ते परमस्योत्कृष्टस्य रायोधनस्य च सातौ तस्य अर्यः ईरयति स्तुतीः प्रेरयतीत्यरिः स्तोता तस्य मन्युं स्तोत्रं मघवानोदानवन्तोर्यमादयः सीक्षन्त सचन्ते सेवित्वाच तस्योरुक्षयाय विस्तीर्णनिवासाय सुधातु सुधाम शोभनस्थानं चक्रिरे कुर्वते॥ ११॥

अथ द्वादशी–

इयंदेवपुरोहितिर्युवभ्यांयज्ञेषुमित्रावरुणावकारि।
विश्वानिदुर्गापिपृतंतिरोनोयूयंपातस्वस्तिभिःसदानः॥ १२॥ २॥

इयम्। देवा। पुरःऽहितिः। युवऽभ्याम्। यज्ञेषु। मित्रावरुणौ।
अकारि। विश्वानि। दुःऽगा। पिपृतम्। तिरः। नः। यूयम्।
पात। स्वस्तिऽभिः। सदा। नः॥ १२॥ २॥

अनया स्तुतिमुपसंहरति हे देवा देवौ मित्रावरुणौ युवभ्यां युवाभ्यां यज्ञेषु इयं पुरोहितिः पुरस्क्रिया पूजा स्तुतिलक्षणा अकारि कृताभूत् तां सेवित्वा विश्वानि सर्वाणि दुर्गा दुः-

स्तेनगन्तव्यानि आपदः तिरः तिरस्कुरुतम् तथा कृत्वा नोस्मान् विपृतं पारयतं शिष्टो-गतः ॥ १२ ॥

॥ इति पंचमस्य पंचमे द्वितीयोवर्गः ॥ २ ॥

उद्वां चक्षुरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मैत्रावरुणं उद्वांसप्तेत्यनुक्रमणिका विनियोगोलैंगिकः ।

तत्र प्रथमा—

उद्वांचक्षुर्वरुणसुप्रतीकंदेवयोरेतिसूर्यस्ततन्वान् ।
अभियोविश्वाभुवनानिचष्टेसमन्युंमर्त्येष्वाचिकेत ॥ १ ॥

उत् । वाम् । चक्षुः । वरुणा । सुऽप्रतीकम् । देवयोः ।
एति । सूर्यः । ततन्वान् । अभि । यः । विश्वा । भुवनानि ।
चष्टे । सः । मन्युम् । मर्त्येषु । आ । चिकेत ॥ १ ॥

हे वरुणा मित्रावरुणौ देवयोर्द्योतमानयोर्वां युवयोश्चक्षुः प्रकाशकं तेजः सुप्रतीकं शोभनरूपं एवं रूपः सूर्यः ततन्वान् तेजोविस्तारयन्नुदेति उद्गच्छति अथोदितोयोदेवोविश्वा सर्वाणि भुवनानि भूतजातानि अभिचष्टे अभिपश्यति सदेवोमर्त्येषु प्रवृत्तं मन्युं स्तोत्रं कर्म वा आचिकेत आजानाति ॥ १ ॥

अथ द्वितीया—

प्रवांसमित्रावरुणावृतावाविप्रोमन्मानिदीर्घश्रुदियर्ति ।
यस्यब्रह्माणिसुक्रतूअवाथआयत्क्रत्वानशरदःपृणैथे ॥ २ ॥

प्र । वाम् । सः । मित्रावरुणौ । ऋतऽवा । विप्रः । मन्मानि ।
दीर्घऽश्रुत् । इयर्ति । यस्य । ब्रह्माणि । सुक्रतू इति सुऽक्रतू ।
अवाथः । आ । यत् । क्रत्वा । न । शरदः । पृणैथे इति ॥ २ ॥

हे मित्रावरुणौ वां युवयोर्मन्मानि मननीयानि स्तोत्राणि सः प्रसिद्धः विप्रोमेधावी ऋतवा यज्ञवान् दीर्घश्रुत् चिरकालं श्रोता एवमुक्तलक्षणोवसिष्ठः प्रेयर्ति प्रेरयति यस्य ऋषेः ब्रह्मा-

णि परिवृद्धानि स्तोत्राणि हे सुक्रतू शोभनकर्माणौ अवाथोरक्षथः यत्कृत्वा न कर्म शरदोबहून्संवत्सरान् आपृणैथे आपूरयेथे सउदियर्ति ॥ २ ॥

अथ तृतीया–

प्रोरोर्मित्रावरुणापृथिव्याःप्रदिवऋष्वाद्बृहतःसुदानू ।
स्पशोदधाथेओषधीषुविक्ष्वृधग्यतोअनिमिषंरक्षमाणा ॥ ३ ॥

प्र । उरोः । मित्रावरुणा । पृथिव्याः । प्र । दिवः । ऋष्वात् ।
बृहतः । सुदानू इति सुऽदानू । स्पशः । दधाथे इति । ओषधीषु ।
विक्षु । ऋधक् । यतः । अनिऽमिषम् । रक्षमाणा ॥ ३ ॥

हे मित्रावरुणा मित्रावरुणौ युवां उरोर्विस्तीर्णायाः पृथिव्याअपि प्रप्ररिरिचाथे अस्येदेव प्ररिरिचे इत्यादिषु प्रशब्दस्य रिरिच इत्यनेन सह संबन्धदर्शनादत्राप्युचितक्रियाध्याहारेण रिरिचेइतियोज्यम् ।तथा ऋष्वात् गुणैर्महतो बृहतः स्वरूपतोतिमहतोदिवोद्युलोकादपि प्ररिरिचाथे हे सुदानू शोभनदानौ किञ्च ओषधीषु विक्षु प्रजासु निमित्तभूतासु प्रजासु चेतिवा स्पशोरूपं दधाथे धारयेथे किंकुर्वन्तौ ऋधक् सत्येन यतः विवेकात् सत्येन गच्छतो जनान् अनिमिषं अव्यवधानेन सर्वदा रक्षमाणा पालयन्तौ ॥ ३ ॥

अथ चतुर्थी–

शंसामित्रस्यवरुणस्यधामशुष्मोरोदसीबद्बधेमहित्वा ।
अयन्मासाअयज्वनामवीराःप्रयज्ञमन्मावृजनंतिराते ॥ ४ ॥

शंस । मित्रस्य । वरुणस्य । धाम । शुष्मः । रोदसी इति ।
बद्बधे । महिऽत्वा । अयन् । मासाः । अयज्वनाम् ।
अवीराः । प्र । यज्ञऽमन्मा । वृजनम् । तिराते ॥ ४ ॥

हे ऋषे मित्रस्य वरुणस्य च धाम तेजः स्थानं शंस स्तुहि ययोर्देवयोः शुष्मोबलं रोदसी द्यावापृथिव्यौ सहवर्तमाने महित्वा स्वमहत्त्वेन बद्बधे प्रभाति पृथक्स्थापयति इयं पृथिवी इयं द्यौरिति पृथक्करोति द्यावापृथिवीसहास्तामितिश्रुतेः । अयज्वनांअननुष्ठातॄणां मासाः कालावयवाः

१ ऋ० सं० १. ४. २८. । २ तै० ब्रा० ३. २. ६. ।

अवीराअपुत्राएवायन् यन्तु गच्छन्तु तद्विपरीतो यज्ञमन्मा यज्ञार्थं मतिमान् यज्वा वृजनं बलं प्रतिराते प्रवर्धयतु प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ ४ ॥

अथ पंचमी–

अमूराविश्वावृषणाविमावांनयासुचित्रंददृशेनयक्षम् ।
द्रुहःसचन्तेअनृताजनानांनवांनिण्यान्यचितेअभूवन् ॥ ५ ॥

अमूरा । विश्वा । वृषणौ । इमाः । वाम् । न । यासु । चित्रम् ।
ददृशे । न । यक्षम् । द्रुहः । सचन्ते । अनृता । जनानाम् ।
न । वाम् । निण्यानि । अचिते । अभूवन् ॥ ५ ॥

हे अमूरा अमूढौ विश्वा व्याप्तौ हे वृषणौ वर्षितारौ वां युवाभ्यां इमा इमानि स्तुतिवचांसि क्रियन्ते यासु स्तुतिषु चित्रं आश्चर्यं न ददृशे न दृश्यते न यक्षं न पूजा दृश्यते युवाभ्यां महिम्नोपि महत्वात् प्रयत्नेन क्रियमाणमपि स्तोत्रं न चमत्करोतीत्यर्थः । जनानां अनृता असत्यविषयाणिस्तोत्राणि द्रुहोद्रोग्धारः राचन्ते सेवन्ते न महान्तः वां युवाभ्यां क्रियमाणानि निण्यानि अन्तर्हितानि रहस्यान्यपि स्तोत्राणि अचिते अज्ञानाय न अभूवन्न भवन्ति ॥ ५ ॥

अथ षष्ठी–

समुवांयज्ञंमहयन्नमोभिर्हुवेवांमित्रावरुणासबाधः ।
प्रवांमन्मान्यृचसेनवानिकृतानिब्रह्मजुजुषन्निमानि ॥ ६ ॥

सम् । ऊँ इति । वाम् । यज्ञम् । महयम् । नमःऽभिः । हुवे ।
वाम् । मित्रावरुणा । सऽबाधः । प्र । वाम् । मन्मानि ।
ऋचसे । नवानि । कृतानि । ब्रह्म । जुजुषन् । इमानि ॥ ६ ॥

हे मित्रावरुणौ वां युवयोर्यज्ञं नमोभिर्नमस्कारैः स्तुतिभिः समुमहयं संपूजयाम्यहं तदर्थं हे मित्रावरुणा मित्रावरुणौ वां सबाधोबाधायुक्तोहं हुवे आह्वयामि बाधापरिहाराय वां युवां ऋचसे सेवितुं नवानि नूतनानि स्तुत्यानि वा मन्मानि स्तोत्राणि प्रभवन्त्वित्यध्याहारः कृतानि मया समूहीकृतानि इमानीदानीं क्रियमाणानि ब्रह्म परिवृढानि स्तोत्राणि युवां जुजुषन् प्रीणयन्तु ॥ ६ ॥

अथ सप्तमी–

इयंदेवपुरोहितिर्युवभ्यांयज्ञेषुमित्रावरुणावकारि ।
विश्वानिदुर्गापिपृतंतिरोनोयूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ ३ ॥

इयम् । देवा । पुरःऽहितिः । युवऽभ्याम् । यज्ञेषु । मित्रावरुणौ ।
अकारि । विश्वानि । दुःऽगा । पिपृतम् । तिरः । नः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ ३ ॥

इयंदेवेतिसप्तमीगता ॥ ७ ॥

॥ इति पञ्चमस्य पञ्चमे तृतीयोवर्गः ॥ ३ ॥

उत्सूर्यइति षळृचं सप्तमं सूक्तं अत्रानुक्रमणिका–उत्सूर्यः षळाद्यास्तिस्रः सौर्यइति वसिष्ठऋषिः त्रिष्टुप्छन्दः आद्यास्तिस्रः सूर्यदेवत्याः शिष्टामित्रावरुणदेवत्याः सूक्तविनियोगोलैङ्गिकः ।

तत्र प्रथमा–

उत्सूर्योबृहदर्चींष्यश्रेत्पुरुविश्वाजनिममानुषाणाम् ।
समोदिवाददृशेरोचमानःक्रत्वाकृतःसुकृतःकर्तृभिर्भूत् ॥ १ ॥

उत् । सूर्यः । बृहत् । अर्चींषि । अश्रेत् । पुरु । विश्वा । जनिम ।
मानुषाणाम् । समः । दिवा । ददृशे । रोचमानः । क्रत्वा ।
कृतः । सुऽकृतः । कर्तृऽभिः । भूत् ॥ १ ॥

सूर्यः सर्वस्यप्रेरकोदेवः बृहत् अत्यधिकं पुरु पुरूणि बहूनि अर्चींषि तेजांसि उदश्रेत ऊर्ध्वं श्रयति किंप्रति मानुषाणां मनुष्याणां विश्वा सर्वाणि जनिमा जनिमानि जनान् जनशब्दःसंघवचनः तान् प्रत्युदश्रेत् सदेवोदिवा अहनि रोचमानः सन् समोददृशे एकरूपः प्रतिनियतः सन् दृश्यते यस्मात्पुरुषं पुरुषं प्रत्यादित्योभवतीति हिश्रुतिः । सदेवः क्रत्वा सर्वस्यकर्त्रा कृतः संपादितः प्रजापतिना कर्तृभिः स्तुतिकर्तृभिः सुकृतःस्तुत्या तीक्ष्णीकृतोभूत् भवति ॥१॥

अथ द्वितीया–

ससूर्यप्रतिपुरोनउद्गाएभिःस्तोमेभिरेतुशेभिरेवैः।
प्रनोमित्रायवरुणायवोचोनागसोअर्यम्णेअग्नयेच ॥ २ ॥

सः । सूर्य । प्रति । पुरः । नः । उत् । गाः । एभिः । स्तोमेभिः ।
एतुशेभिः । एवैः । प्र । नः । मित्राय । वरुणाय । वोचः ।
अनागसः । अर्यम्णे । अग्नये । च ॥ २ ॥

हे सूर्य सः प्रसिद्धस्त्वं नोस्मान् प्रति पुरः पुरस्तात् उद्गाः उद्गच्छ कैः साधनैः एभिः स्तोमेभिः स्तोमैः स्तुत्यैः एतशेभिः एतवर्णैः स्वार्थिकः शकारः। यो जरन्ता युवशा ता। पुरुषः कृष्णशवास्युत्तरतइत्यादिवत्। तादृशैः एवैर्गमनशीलैरश्वैरुद्गाः अथ तथा कृत्वा अस्माभिः स्तुतः सन् नोस्मान् अनागसःअपापान् प्रवोचः केभ्यः मित्राय वरुणायार्यम्णे अग्नये च। अत्र सौर्ये इतरेषां मित्रादीनां संकीर्तनं तेषामपि निपातभाक्त्वादविरुद्धं एवंपूर्वोत्तरत्रच मैत्रावरुणेर्यमादीनांसंकीर्तनमपि न विरुध्यते ॥ २ ॥

अथ तृतीया–

विनःसहस्रंशुरुधोरदन्त्वृतावानोवरुणोमित्रोअग्निः।
यच्छन्तुचन्द्राउपमंनोअर्कमानःकामंपूपुरन्तुस्तवानाः ॥ ३ ॥

वि । नः । सहस्रम् । शुरुधः । रदन्तु । ऋतऽवानः । वरुणः ।
मित्रः । अग्निः । यच्छन्तु । चन्द्राः । उपऽमम् । नः ।
अर्कम् । आ । नः । कामम् । पूपुरन्तु । स्तवानाः ॥ ३ ॥

नोस्मभ्यं शुरुधः शुचेर्दुःखस्य प्रतिरोद्धारः ऋतावानः सत्यवन्तोवरुणादयः सहस्रं सहस्रसंख्याकं धनं विरदन्तु वितरन्तु अथवा शुरुधउकलक्षणाः सहस्रसङ्ख्याकाः ओषधीरदन्तु। किञ्च ते चन्द्राः आह्लादकारिणो नोस्मभ्यं उपमं स्तुत्यं अर्कमर्चनीयं यच्छन्तु। किंच स्तवाना अस्माभिः स्तूयमानानोस्माकं काममपेक्षितं पूपुरन्तु पूरयन्तु। हे सूर्य त्वया अनुज्ञाताइति सूर्यस्य स्तुतिः ॥ ३ ॥

---

१ ऋ० सं० २. ३. ५. ।   १ ऐ० ब्रा० ५. १४. ।

अथ चतुर्थी–

द्यावांभूमीअदितेत्रासींथांनोयेवांजज्ञुःसुजानिमानऋष्वे।
माहेळेभूमवरुणस्यवायोर्मामित्रस्यंप्रियतंमस्यनृणाम् ॥ ४ ॥

द्यावांभूमी इति। अदिते। त्रासीथाम्। नः। ये। वाम्।
जज्ञुः। सुऽजनिमानः। ऋष्वे इति। मा। हेळे। भूम। वरुणस्य।
वायोः। मा। मित्रस्य। प्रियऽतमस्य। नृणाम् ॥ ४ ॥

हे द्यावाभूमी द्यावापृथिव्यौ हे अदिते अखण्डनीये एतत् द्यावाभूम्योरेवैकवचनेन संबोधनं हे ऋष्वे महन्नामैतत् हे महत्यौ नोस्मान् त्रासीथां रक्षतं। ये वयं सुजनिमानः शोभनजन्मानोवां युवां जज्ञुः ज्ञातवन्तः स्म। किञ्च वयं वरुणस्य हेळे क्रोधे माभूम तथा वायोर्माभूम तथा नृणां स्तुतिनेतॄणां मनुष्याणां प्रियतमस्य मित्रस्य हेळे माभूम ॥ ४ ॥

प्रवाहवेति पञ्चमी मैत्रावरुणे पशौ पुरोडाशस्य याज्या सूत्रितं च–प्रवाहवासिसृतंजीवसेनोयदंहिश्चनातिविधेसुदानूइति। तत्पाठस्तु।

अथ पञ्चमी–

प्रवाहवांसिसृतंजीवसेंनआनोगव्यूंतिमुक्षतंघृतेनं।
आनोंजनेंश्रवयतंयुवानाश्रुतंमेंमित्रावरुणाहवेमा ॥ ५ ॥

प्र। बाहवां। सिसृतम्। जीवसें। नः। आ। नः। गव्यूतिम्।
उक्षतम्। घृतेनं। आ। नः। जनें। श्रवयतम्। युवाना।
श्रुतम्। मे। मित्राऽवरुणा। हवां। इमा ॥ ५ ॥

हे मित्रावरुणा मित्रावरुणौ देवौ बाहवा युवाभ्यां बाहू प्रसिसृतं प्रसारयतं हविःस्वीकाराय धनप्रदानाय वा। किमर्थमिति नोजीवसे अस्माकं जीवनाय किञ्च नोस्माकं गव्यूतिं गावोयन्ति गच्छंति अत्रेति गव्यूतिर्गोमार्गभूमिः तां तृणादिप्ररोहाय घृतेनोदकेन आसमन्तात् उक्षतं सिञ्चतं किञ्च नोस्मान् जने अस्मत्समाने मनुष्यसमूहे वा नोस्मान् आश्रवयतं विश्रुतं कुरुतम्। हे युवाना नित्ययौवनौ सर्वत्रव्याप्तौ वा युवां मे मम इमा इमानि हवा आह्वानानि श्रुतं शृणुतम् ॥ ५ ॥

अथ षष्ठी–

नूमित्रोवरुणोअर्यमानस्त्मनेतोकायवरिवोदधन्तु।
सुगानोविश्वासुपथानिसन्तुयूयंपातस्वस्तिभिःसदानः ॥ ६ ॥४॥

नु। मित्रः। वरुणः। अर्यमा। नः। त्मने। तोकाय। वरिवः।
दधन्तु। सुऽगा। नः। विश्वा। सुऽपथानि। सन्तु। यूयम्।
पात। स्वस्तिऽभिः। सदा। नः ॥ ६ ॥ ४ ॥

मित्रोवरुणोर्यमाचैते त्रयोदेवा नु अद्य नोस्माकं त्मने आत्मने आत्महिताय तोकाय-पुत्राय च वरिवोधनं दधन्तु प्रयच्छन्तु नोस्माकं विश्वा सर्वाणि गन्तव्यानि सुगा सुगमनानि सुपथानि च सन्तु भवन्तु शिष्टं गतम् ॥ ६ ॥

॥ इति पंचमस्य पञ्चमे चतुर्थोवर्गः ॥ ४ ॥

उद्वेतीति पञ्चचमष्टमंसूक्तम् वसिष्ठस्यार्षं त्रैष्टुभम् आद्याश्चतस्रः पञ्चम्याःपूर्वार्धश्च सूर्य-देवत्याः अवशिष्टास्त्रयोर्धर्चोमित्रावरुणदेवत्याः तथाचानुक्रान्तम्–उद्वेतीतिचार्धपञ्चमाइति। विनियोगोलैङ्गिकः।

तत्र प्रथमा–

उद्वेतिसुभगोविश्वचक्षाःसाधारणःसूर्योमानुषाणाम्।
चक्षुर्मित्रस्यवरुणस्यदेवश्चर्मेवयःसमविव्यक्तमांसि ॥ १ ॥

उत्। ऊँ इति। एति। सुऽभगः। विश्वऽचक्षाः। साधारणः।
सूर्यः। मानुषाणाम्। चक्षुः। मित्रस्य। वरुणस्य। देवः।
चर्मऽइव। यः। सम्ऽअविव्यक्। तमांसि ॥ १ ॥

उद्वेति उद्गच्छत्ययंसूर्यः सुभगः शोभनभाग्यः सुष्ठु भजनीयोवा विश्वचक्षाः सर्वस्यद्र-ष्टा मानुषाणां सर्वेषां मनुष्याणां साधारणः साधारणत्वप्रतिपादकश्रुतिः पूर्वमुदाहृता मित्रस्य वरुणस्य च चक्षुः प्रकाशकः देवोद्योतमानः योदेवश्चर्मेव चर्माणीव तमांसि समविव्यक् सह विचति संवेष्टयति समहानुभावोदेवः उद्वेति ॥ १ ॥

(१०२८

अथ द्वितीया–

उद्वे॑ति प्रस॒वी॒ता जना॑नां म॒हान्के॒तुर॑र्ण॒वः सूर्य॑स्य ।
स॒मा॒नं च॒क्रं प॑र्या॒विव॑त्स॒न्यदे॑त॒शो वह॑ति धू॒र्षु यु॒क्तः ॥ २ ॥

उत् । ऊँ इति॑ । ए॒ति॒ । प्र॒ऽस॒वि॒ता । जना॑नाम् । म॒हान् । के॒तुः । अ॒र्ण॒वः । सूर्य॑स्य । स॒मा॒नम् । च॒क्रम् । प॒रि॒ऽआ॒विव॑त्सन् । यत् । ए॒त॒शः । वह॑ति । धूः॒ऽसु । यु॒क्तः ॥ २ ॥

अयं सूर्यस्य सूर्यः विभक्तिव्यत्ययः उद्वेति उद्गच्छति कीदृशोयं जनानां सर्वेषां प्रसविता सर्वेषु कर्मस्वनुज्ञाता महान् पूज्यः केतुः सर्वस्य प्रज्ञापकः अर्णवः उदकप्रदः। किं कुर्वन्नुदेतीति उच्यते समानं सर्वेषामेकरूपं एकमेवचक्रं रथाङ्गं चरणशीलं रथं वा पर्याविवृत्सन् पर्यावर्तयितुमिच्छन् यद्यथचक्रं धूर्षु रथस्य युक्त एतशः एतशवर्णो हरितवर्णोऽश्वोवहति एकोऽश्वोवहतिसप्तनामेत्येकम् ॥ २ ॥

अथ तृतीया–

वि॒भ्राज॑मान उ॒षसा॑मु॒पस्था॑द्रे॒भैरुदे॑त्यनु॒म॒द्यमा॑नः ।
ए॒ष मे॑ दे॒वः स॑वि॒ता च॑च्छन्द॒ यः स॑मा॒नं न प्र॑मि॒नाति॒ धाम॑ ॥ ३ ॥

वि॒ऽभ्राज॑मानः । उ॒षसा॑म् । उ॒पऽस्था॑त् । रे॒भैः । उत् । ए॒ति॒ । अ॒नु॒ऽम॒द्यमा॑नः । ए॒षः । मे॒ । दे॒वः । स॒वि॒ता । च॒च्छ॒न्द॒ । यः । स॒मा॒नम् । न । प्र॒ऽमि॒नाति॑ । धाम॑ ॥ ३ ॥

अयं सूर्योविभ्राजमानोविशेषेणदीप्यमानः उपसामुपस्थात् उपस्थे मध्ये रेभैः स्तोतृभिरनुमद्यमानः सन्नुदेति किञ्च एषदेवोद्योतमानः सविता मे मह्यं चच्छन्द उपच्छन्दयति कामान्। एषइत्युक्तं कइति योदेवः समानं सर्वेषां प्राणिनामेकरूपं धाम स्वीयं तेजः स्थानं न प्रमिनाति नहिनस्ति न संकोचयति सदैवउदेतीति ॥ ३ ॥

---

१ ऋ० सं० २. ३. १४.।

अथ चतुर्थी–

दिवोरुक्मउरुचक्षाउदेतिदूरेअर्थस्तरणिर्भ्राजमानः ।
नूनंजनाःसूर्येणप्रसूताअयन्नर्थानिकृणवन्नपांसि ॥ ४ ॥

दिवः । रुक्मः । उरुऽचक्षाः । उत् । एति । दूरेऽअर्थः ।
तरणिः । भ्राजमानः । नूनम् । जनाः । सूर्येण । प्रऽसूताः ।
अयन् । अर्थानि । कृणवन् । अपांसि ॥ ४ ॥

अयं सूर्योरुक्मोरोचमानः उरुचक्षाः प्रभूततेजाश्चसन् दिवोन्तरिक्षादुदेति यद्वा दिवो-न्तरिक्षस्य रुक्मआभरणस्थानीयः कीदृशोयं दूरेअर्थः दूरेगन्ता अर्थोर्तिः दूरे प्रार्थ्यमानोवा तरणिस्तारकः भ्राजमानोदीप्यमानः सन्नुदेति नूनं निश्चयं जनाः सर्वे प्राणिनः सूर्येण प्रेरकेण देवेन प्रसूताः अनुज्ञाताः प्रेरिताः सन्तःअयन् अर्थानि गंतव्यानि अनुष्ठेयानि अपांसि कर्माणि कृणवन् कुर्वन्ति ॥ ४ ॥

अथ पञ्चमी–

यत्राचक्रुरमृतागातुमस्मैश्येनोनदीयन्नन्वेतिपाथः ।
प्रतिवांसूरउदितेविधेमनमोभिर्मित्रावरुणोतहव्यैः ॥ ५ ॥

यत्र । चक्रुः । अमृताः । गातुम् । अस्मै । श्येनः । न ।
दीयन् । अनु । एति । पाथः । प्रति । वाम् । सूरे । उत्ऽइते ।
विधेम । नमःऽभिः । मित्रावरुणा । उत । हव्यैः ॥ ५ ॥

यत्र यस्मिन्नन्तरिक्षे अमृता अमरणधर्माणः पूर्वेदेवा अस्मै सूर्याय गातुं मार्गं चक्रुः अकुर्वन् तत्पाथोन्तरिक्षं अन्वेति अनुगच्छति कइव दीयन् गच्छन् श्येनोन शंसनीयगमनोगृध्रइव अयमर्धर्चः सौर्यइत्युक्तम् हे मित्रावरुणा मित्रावरुणौ वां युवां सूरे सूर्ये उदिते सति प्रातःसवने नमोभिर्नमस्कारैः स्तुतिभिः उतापिच हव्यैः हविर्भिश्च प्रतिविधेम परिचरेम ॥ ५ ॥

अथ षष्ठी–

नूमित्रोवरुणोअर्यमानस्त्मनेतोकायवरिवोदधन्तु ।
सुगानोविश्वासुपथानिसन्तुयूयंपातस्वस्तिभिःसदानः ॥६॥५॥

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः ।
दधन्तु । सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयम् ।
पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ ५ ॥

नूमित्रइतिषष्ठीगता ॥ ६ ॥

॥ इति पञ्चमस्य पञ्चमे पंचमोवर्गः ॥ ५ ॥

. दिविक्षयन्तेति पंचर्चं नवमं सूक्तं वसिष्ठस्यार्षं मैत्रावरुणम्। दिविपंचेत्यनुक्रमणिका। तृतीयेछन्दोमे प्रउगशस्त्रे आद्यस्तृचोमैत्रावरुणस्य सूत्रितं च–दिविक्षयन्तारजसः पृथिव्या माविश्ववाराश्विनागंतनइति। तत्र प्रथमा–

दिविक्षयन्तारजसःपृथिव्यांप्रवांघृतस्यनिर्णिजोददीरन् ।
हव्यंनोमित्रोअर्यमासुजातोराजासुक्षत्रोवरुणोजुषन्त ॥ १ ॥

दिवि । क्षयन्ता । रजसः । पृथिव्याम् । प्र । वाम् । घृतस्य ।
निःऽनिजः । ददीरन् । हव्यम् । नः । मित्रः । अर्यमा ।
सुऽजातः । राजा । सुऽक्षत्रः । वरुणः । जुषन्त ॥ १ ॥

दिवि द्युलोकेन्तरिक्षे पृथिव्यांच वर्तमानस्य रजसः उदकस्य क्षयन्ता क्षयतिरैश्वर्यकर्मा स्वामिनौ भवथः हे मित्रावरुणौ वां युवाभ्यां प्रेरितामेघाःघृतस्यनिर्णिजःउदकस्यरूपाणिददीरन् ददते प्रयच्छन्ति अथवा वां युवाभ्यां घृतस्य निर्णिजः रूपाणि घृतानीत्यर्थःतानि ददीरन् दीयन्ते नोस्माकं संबन्धि हव्यं मित्रः सुजातः सुष्ठुप्रादुर्भूतः अर्यमाराजा सर्वस्य स्वामी सुक्षत्रः शोभनबलोवरुणश्चैते जुषन्त सेवन्ताम् ॥ १ ॥

अथ द्वितीया–

आराजानामहऋतस्यगोपासिन्धुपतीक्षत्रियायातमर्वाक् ।
इळांनोमित्रावरुणोतवृष्टिमवदिवइन्वतंजीरदानू ॥ २ ॥

आ । राजाना । महः । ऋतस्य । गोपा । सिन्धुपती इति सिन्धुऽपती । क्षत्रिया । यातम् । अर्वाक् । इळाम् । नः ।
मित्रावरुणा । उत । वृष्टिम् । अव । दिवः । इन्वतम् ।
जीरदानू इति जीरऽदानू ॥ २ ॥

हे राजाना सर्वस्यस्वामिनौ हे महोमहत ऋतस्योदकस्य यज्ञस्य गोपा गोपायितारौ सुपामन्त्रिलेपराङ्गवत्स्वरेइति पराङ्गवद्भावात् पष्ठ्यामन्त्रितसमुदायस्य निघातत्वम् । हे सिन्धुपती नद्याः पालयितारौ हे क्षत्रिया बलवन्तौ युवां अर्वागस्मदभिमुखंआयातमागच्छतम् । किंच हे मित्रावरुणा मित्रावरुणौ हे जीरदानू क्षिप्रदानौ युवां नोस्मभ्यं इळामन्नं उतापिच वृष्टिं तत्साधकां वृष्टिं च दिवोन्तरिक्षात् अव अवस्तात् इन्वतं प्रेरयतम् ॥ २ ॥

अथ तृतीया—

मित्रस्तन्नोवरुणोदेवोअर्यःप्रसाधिष्ठेभिःपथिभिर्नयन्तु ।
ब्रवद्यथानआदरिःसुदासइषामदेमसहदेवगोपाः ॥ ३ ॥

मित्रः । तत् । नः । वरुणः । देवः । अर्यः । प्र । साधिष्ठेभिः ।
पथिऽभिः । नयन्तु । ब्रवत् । यथा । नः । आत् । अरिः ।
सुऽदासे । इषा । मदेम । सह । देवऽगोपाः ॥ ३ ॥

मित्रोवरुणोदेवोर्योर्यमा चैते त्रयोपि नोस्मान् तत् तदा यदास्माकं अपेक्षितं तदा साधिष्ठेभिः साधकतमैः पथिभिर्मार्गैः प्रणयन्तु प्रापयन्तु किंच नोस्मान् सुदासे शोभनदानाय जनाय अरिरर्यमा यथा ब्रवत् असौ अनुकंप्यइति ब्रूयात् तथा कुर्वन्तु अर्यम्णः पुनरभिधानमादरार्थं देवगोपाः देवायूयं गोपायितारोयेषामस्माकं ते वयं इषा युष्माभिर्दत्तेनान्नेन सह पुत्रादिसहिता मदेम हृष्येम ॥ ३ ॥

अथ चतुर्थी—

योवांगर्तंमनसातक्षदेतमूर्ध्वांधीतिंकृणवद्धारयंच ।
उक्षेथांमित्रावरुणाघृतेनताराजानासुक्षितीस्तर्पयेथाम् ॥ ४ ॥

यः । वाम् । गर्तम् । मनसा । तक्षत् । एतम् । ऊर्ध्वाम् ।
धीतिम् । कृणवत् । धारयत् । च । उक्षेथाम् । मित्रावरुणा ।
घृतेन । ता । राजाना । सुऽक्षितीः । तर्पयेथाम् ॥ ४ ॥

हे मित्रावरुणौ योवां युवयोरेतं गर्तं रथं मनसा तक्षत् स्तोमेन संकल्पयेत् तथा कृत्वा ऊर्ध्वां उन्नतां धीतिं कर्म स्तुतिरूपं कृणवत् कुर्यात् उच्चैःस्तुयात् एवं कृत्वा धारयच्च यागे धारयेत् हे राजाना स्वामिनौ मित्रावरुणा मित्रावरुणौ ता तौ युवां जनं घृतेनोदकेन उक्षेथां सिंचतं तस्मै सुक्षितीः शोभननिवासाः प्रजाः तर्पयेथां यथा सुक्षितयोभवन्ति तथातर्पयेथामिति ॥ ४ ॥

अथ पञ्चमी–

एषःस्तोमोवरुणमित्रतुभ्यंसोमःशुक्रोनवायवेयामि।
अविष्टंधियोजिगृतंपुरन्धीर्यूयंपातस्वस्तिभिःसदानः॥ ५॥ ६॥

एषः। स्तोमः। वरुण। मित्र। तुभ्यम्। सोमः। शुक्रः। न।
वायवे। अयामि। अविटम्। धियः। जिगृतम। पुरम्ऽधीः।
यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥ ६॥

अनया स्तुतिमुपसंहरति हे वरुण हे मित्र तुभ्यं युवयोः वायवे वायुर्गन्ता आदित्यः सएवार्यमा तस्मै च एषः स्तोमः स्तवः अयामि अकारि किमिव शुक्रः दीप्तः सोमोन युष्मभ्यं प्रीतिकरः सोमोयथा दीयते तद्वत् धियः कर्माण्यस्मदीयानि अविष्टं रक्षतम् पुरन्धीःस्तुतीःजिगृतं प्रबुध्यतम्। अन्यद्गतम्॥ ५॥

॥ इति पंचमस्य पञ्चमे षष्ठोवर्गः ॥ ६ ॥

प्रतिवां सूरइति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं मैत्रावरुणं प्रतिवामित्यनुक्रान्तम् द्वितीयेछन्दोमे प्रउगशस्त्रेप्येषस्तृचः सूत्रितंच–प्रतिवांसूरउदितेसूक्तैर्धेनुः प्रत्नस्येति।

तत्र प्रथमा–

प्रतिवांसूरउदितेसूक्तैर्मित्रंहुवेवरुणंपूतदक्षम्।
ययोरसुर्यमक्षितंज्येष्ठंविश्वस्ययामन्नाचिताजिगत्नु॥ १॥

प्रति। वाम्। सूरे। उत्ऽइते। सुऽउक्तैः। मित्रम्। हुवे।
वरुणम्। पूतऽदक्षम्। ययोः। असुर्यम्। आक्षितम्। ज्येष्ठम्।
विश्वस्य। यामन्। आऽचिता। जिगत्नु॥ १॥

सूरे सूर्ये उदिते प्रातःसवने मित्रं पूतदक्षं शुद्धबलं वरुणं वां सूक्तैः प्रतिहुवे आह्वये ययोर्मित्रावरुणयोः अक्षितं अक्षीणं अतएव ज्येष्ठं असुर्यं बलं आचिता आचिते उपाचिते शूररांवैरुपेते यामन्यामनि संग्रामे विश्वस्य शत्रुसंघस्य जिगत्नु जेतृ भवति ॥ १ ॥

अथ द्वितीया–

ताहिदेवानामसुरातावर्यातानःक्षितीःकरतमूर्जयन्तीः ।
अश्यामंमित्रावरुणावयंवांद्यावाचयत्रपीपयन्नहाच ॥ २ ॥

ता । हि । देवानाम् । असुरा । तौ । अर्या । ता । नः ।
क्षितीः । करतम् । ऊर्जयन्तीः । अश्याम । मित्रावरुणा ।
वयम् । वाम् । द्यावा । च । यत्र । पीपयन् । अहा । च ॥ २ ॥

ता हि तौ खलु देवौ देवानां मध्ये असुरा बलवन्तौ अर्या अर्यौ तौ सर्वस्येश्वरौ ता तौ नोऽस्माकं क्षितीः पुत्रादिरूपाः प्रजा ऊर्जयन्तीः प्रवृद्धाः करतं कुरुतम् । हे मित्रावरुणा मित्रावरुणौ वयं वां युवां अश्याम व्याप्नुयाम यत्र यस्यां युवयोर्व्याप्तौ द्यावा द्यावापृथिव्यौ सर्वदा तयोः सहभावादयमर्थोऽलभ्यते अहा च एतद्रात्रेरुपलक्षणम् अहोरात्राणि च पीपयन् अस्मान्प्याययेयुः ॥ २ ॥

अथ तृतीया–

ताभूरिपाशावनृतस्यसेतूदुरत्येतूरिपवेमर्त्याय ।
ऋतस्यमित्रावरुणापथावामपोननावादुरितातरेम ॥ ३ ॥

ता । भूरिऽपाशौ । अनृतस्य । सेतू इति । दुरत्येतू इति दुःऽअत्येतू ।
रिपवे । मर्त्याय । ऋतस्य । मित्रावरुणा । पथा । वाम् ।
अपः । न । नावा । दुःऽइता । तरेम ॥ ३ ॥

ता तौ मित्रावरुणौ भूरिपाशौ प्रभूतबन्धनसाधनपाशोपेतौ अनृतस्य यागरहितस्य सेतू सेतुवद्बन्धकौ रिपवे मर्त्याय वैरिजनाय दुरत्येतू दुरतिक्रमौ भवतः । हे मित्रावरुणा तादृशौ

मित्रावरुणौ वां युवयोर्ऋतस्य यज्ञस्य युवयोरर्थायानुष्ठीयमानस्य यागस्य पथा मार्गेण दुरिता दुःखानि तरेम नावा अपोन प्रभूतान्युदकानीव ॥ ३ ॥

मैत्रावरुणे पशावानोमित्रावरुणेत्येषा चतुर्थ्यनुवाक्या सूत्रितश्च—आनोमित्रावरुणाहव्यजुष्टिंयुवंवस्त्राणिपीवसावसाथेइति । तत्पाठस्तु—

अथ चतुर्थी—

आनोमित्रावरुणाहव्यजुष्टिंघृतैर्गव्यूतिमुक्षतमिळाभिः ।
प्रतिवामत्रवरमाजनायपृणीतमुद्नोदिव्यस्यचारोः ॥ ४ ॥

आ । नः । मित्रावरुणा । हव्यऽजुष्टिम् । घृतैः । गव्यूतिम् ।
उक्षतम् । इळाभिः । प्रति । वाम् । अत्र । वरम् । आ ।
जनाय । पृणीतम् । उद्नः । दिव्यस्य । चारोः ॥ ४ ॥

हे मित्रावरुणा मित्रावरुणौ नोस्माकं हव्यजुष्टिं हविःसेवनवन्तं यज्ञं आगच्छतमितिशेषः आगत्य चेच्छाभिरन्नैः सह घृतैरुदकैर्गव्यूतिमस्मदीयां भूमिं उक्षतं सिञ्चतम् वां युवां प्रति अत्रास्मिन् लोके वरं उत्कृष्टं हविः स्तोत्रं वा कः आयच्छेदितिशेषः अतः केवलं कृपयैव जनाय दिव्यस्य दिविभवस्य चारोश्चरणीयस्य उद्नः उदकस्य कर्मणिषष्ठी उक्तलक्षणमुदकं पृणीतम् प्रयच्छतम् ॥ ४ ॥

अथ पञ्चमी—

एषःस्तोमोवरुणमित्रतुभ्यंसोमःशुक्रोनवायवेयामि ।
अविष्टंधियोजिगृतंपुरंधीर्यूयंपातस्वस्तिभिःसदानः ॥ ५ ॥७॥

एषः । स्तोमः । वरुण । मित्र । तुभ्यम् । सोमः । शुक्रः । न ।
वायवे । अयामि । अविष्टम् । धियः । जिगृतम् । पुरम्ऽधीः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ ७ ॥

एषःस्तोमइति पञ्चमी गता ॥ ५ ॥

॥ इति पञ्चमस्य पञ्चमे सप्तमोवर्गः ॥ ७ ॥

प्रमित्रयोरित्येकोनविंशत्यृचमेकादशं सूक्तं वसिष्ठस्यार्षम् अत्रेयमनुक्रमणिका—प्रमित्रयोरेकोना गायत्रं दशम्याद्यास्त्रयः प्रगाथाः पुरउष्णिक् चतुर्थ्याद्यादशादित्यास्तिस्रःसौर्यइति। दशमीबृहती एकादशीसतोबृहती द्वादशीबृहती त्रयोदशीसतोबृहती चतुर्दशीबृहती पञ्चदशीसतोबृहती षोडशीपुरउष्णिक् शिष्टागायत्र्यः चतुर्थ्याद्यास्त्रयोदश्यन्ताः आदित्यदेवताः चतुर्दश्याद्याः तिस्रः सूर्यदेवत्याः आयन्तौष्टचौ पूर्ववन्मैत्रावरुणौ अग्निष्टोमेमाध्यन्दिनसवने मैत्रावरुणशस्त्रे आदितोनवर्चः शस्याः प्रमित्रयोर्वरुणयोरितिनवेति सूत्रितत्वात्। पृष्ठयाभिप्लवषडहयोः स्तोमवृद्धिनिमित्तमावापार्थो आद्याः षळृचः सूत्रितश्च—प्रमित्रयोर्वरुणयोरितिषळिति।

तत्र प्रथमा—

प्रमि॒त्रयो॒र्वरु॑णयो॒ःस्तोमो॑नएतुशू॒ष्यः॑। नमस्वान्तुविजातयोः॥ १ ॥

प्र। मि॒त्रयोः॑। वरु॑णयोः। स्तोमः॑। नः॒। ए॒तु॒। शू॒ष्यः॑।
नम॑स्वान्। तु॒वि॒ऽजा॒तयोः॑॥ १ ॥

मित्रयोर्वरुणयोः मित्रावरुणयोरित्यर्थः उभयत्रप्रीतियोगापेक्षया द्विवचनत्वम् तुविजातयोः बहुप्रादुर्भावयोर्देवयोः नोस्मदीयः शूष्यः सुखकरोनमस्वानन्नवान् हविर्भिर्युक्तः स्तोमः स्तोत्रं प्रैतु गच्छतु अहोरात्रैवैमित्रावरुणावितिश्रुतिः[1]। अनयोरहोरात्रापेक्षत्वात्तयोः पुनःपुनरागमनादनयोस्तुविजातत्वम् अथवा बहूनामुपकारायानयोः प्रादुर्भावात्तुविजातत्वम्॥ १ ॥

अथ द्वितीया—

याधा॒रय॑न्तदे॒वाःसु॒दक्षा॒दक्ष॑पितरा। अ॒सु॒र्या॑यप्रम॑हसा॥ २ ॥

या। धा॒रय॑न्त। दे॒वाः। सु॒ऽदक्षा॑। दक्ष॑ऽपितरा।
अ॒सु॒र्या॑य। प्रऽम॑हसा॥ २ ॥

या यौ युवां धारयन्त के देवाः आदिकर्तारः असुर्याय बलकरणाय कीदृशौ युवां सुदक्षा शोभनबलौ दक्षपितरा बलस्य पालकौ स्वामिनौ वा बलप्रदावित्यर्थः प्रमहसा प्रकृष्टतेजस्कौ तौ साधयतमित्युत्तरत्रान्वयः॥ २ ॥

---

1 तै० सं० २. ४. १०.।

अथ तृतीया–

तानःस्त्विपातनूपावरुणजरितॄणाम् । मित्रसाधयतंधियः ॥ ३ ॥

ता । नः । स्तिऽपा । तनूऽपा । वरुण ।
जरितॄणाम् । मित्र । साधयतम् । धियः ॥ ३ ॥

ता तौ स्तिपा स्त्यायन्तइति स्तयोमहाः तान्पातइतिस्तिपौ तनूपा तन्वः पातारौ हे वरुण हे मित्र उक्तलक्षणौ युवां जरितॄणां नोस्माकं धियः कर्माणि स्तुतिरूपाणि साधयतं सफलव- न्ति कुरुतम् ॥ ३ ॥

अथ चतुर्थी–

यदद्यसूरउदितेनागामित्रोअर्यमा । सुवातिसवितभगः ॥ ४ ॥

यत् । अद्य । सूरे । उत्ऽइते । अनागाः ।
मित्रः । अर्यमा । सुवाति । सविता । भगः ॥ ४ ॥

यद्धनमस्माकमपेक्षितं तदद्यास्मिन्काले सूरे उदिते सति प्रातःसवने अनागाः पापहन्ता मित्रः अर्यमा सविता भगश्चैते प्रत्येकं सुवाति प्रेरयेत अथवा अनागामित्रोर्यमा दाता भवतु तदीप्सितं धनं भगोभजनीयः सविता सुवाति प्रेरयतु ॥ ४ ॥

अथ पञ्चमी–

सुप्रावीरस्तुसक्षयःप्रनुयामन्त्सुदानवः । येनोअंहोतिपिप्रति ॥५॥८॥

सुप्रऽअवीः । अस्तु । सः । क्षयः । प्र । नु । यामन् ।
सुऽदानवः । ये । नः । अंहः । अतिऽपिप्रति ॥ ५ ॥ ८ ॥

सक्षयः सनिवासः सुप्रावीरस्तु सुष्ठु प्रकर्षेण रक्षितास्तु प्रशब्दआदरार्थः प्रकर्षेण नु क्षिप्रं भवत्विति शेषः कदेति उच्यते हे सुदानवः सुदानाः युष्माकं यामन् यामनि गमनेसति कीदृशानां गमने ये यूयमागत्य नोस्माकं अंहः पापमतिपिप्रति अतिपारयथ तेषां गमनेइति ॥५॥

॥ इति पञ्चमस्य पञ्चमेष्टमोवर्गः ॥ ८ ॥

अथ षष्ठी–

उतस्वराजोअदितिरदब्धस्यव्रतस्यये । महोराजानईशते ॥ ६ ॥

उत । स्वऽराजः अदितिः । अदब्धस्य ।
व्रतस्य । ये । महः । राजानः । ईशते ॥ ६ ॥

उतापिच ये मित्रादयस्त्रयः स्वराजः सर्वस्य स्वामिनः अदितिः तेषां माता च सन्ति अदब्धस्य अहिंसितस्य महोमहतोव्रतस्यास्य कर्मणोराजानः स्वामिनः ते ईशते समर्थाभवन्ति अभिमतंदातुमितिशेषः। अथवैवं योज्यम् ते मित्रादयोदितिश्च अदब्धस्य व्रतस्य स्वराजईश्वरास्ते महोमहतोस्मदभिमतधनस्य राजानः स्वामिनः सन्तईशते अस्मभ्यं तद्दातुम् ॥ ६ ॥

प्रतिवामित्येषतृचश्चातुर्विंशिकेहनि प्रातःसवने मैत्रावरुणस्य पर्यासार्थः सूत्रितश्च—प्रतिवांसूरउदितेव्यन्तरिक्षमतिरदिति ।

तत्र तृचे प्रथमा सूक्ते सप्तमी—

प्रतिवांसूरउदितेमित्रंगृणीषेवरुणम् । अर्यमणंरिशादसम् ॥७॥

प्रति । वाम् । सूरे । उतऽइते । मित्रम् । गृणीषे । वरुणम् ।
अर्यमणम् । रिशादसम् ॥ ७ ॥

हे मित्रावरुणौ मित्रं त्वां वरुणंच वां युवां रिशादसं शत्रूणामत्तारं अर्यमणं च प्रति प्रत्येकं गृणीषे स्तुवे कदेति उच्यते सूरे सूर्ये देवे उदिते सति प्रातरित्यर्थः ॥ ७ ॥

अथ तृचे द्वितीया सूक्ते अष्टमी—

रायाहिरण्ययामतिरियमवृकायशवसे । इयंविप्रामेधसातये ॥८॥

राया । हिरण्यऽया । मतिः । इयम् । अवृकाय ।
शवसे । इयम् । विप्राः । मेधऽसातये ॥ ८ ॥

हिरण्यया हितरमणीयेन राया धनेन सहिताय अवृकाय अहिंसाय शवसेस्माकं बलाय इयमिदानीं क्रियमाणामतिः स्तुतिर्भवत्विति शेषः हिरण्ययेत्यत्र सुपांसुलुगिति तृतीयैकवचनस्य याजादेशः। किञ्च हे विप्राःप्राज्ञाः इयमेवस्तुतिर्मेधसातये यज्ञलाभाय च भवतु॥८॥

अथ तृचे तृतीया सूक्ते नवमी—

तेस्यामदेववरुणतेमित्रसूरिभिःसह । इषंस्वश्चधीमहि ॥ ९ ॥

ते । स्याम । देव । वरुण । ते । मित्र । सूरिऽभिः ।
सह । इषम् । स्वःऽरिति स्वः । च । धीमहि ॥ ९ ॥

हे देव वरुण ते वयं तव स्तोतारः स्याम समृद्धाभवेम । न केवलं वयमेवयजमानाः किन्तु सूरिभिः स्तोतृभिर्ऋत्विग्भिः सह तथा हे मित्रदेव ते वयं सूरिभिः सह स्याम भवेम किञ्च इषमन्नं स्वरुदकं च धीमहि धारयामहे ॥ ९ ॥

आश्विनशस्त्रे बहवः सूरचक्षसइति प्रगाथः सूत्रितश्च—बहवःसूरचक्षसइति प्रगाथाइति । दशरात्रे पञ्चमेहनि प्रउगशस्त्रेप्ययंप्रगाथः सूत्रितश्च—बहवः सूरचक्षसइमाउवांदिविष्टयइति ।

सैषा प्रगाथे प्रथमा सूक्ते दशमी—

बहवःसूरचक्षसोग्निजिह्वाऋतावृधः ।
त्रीणियेयेमुर्विदथानिधीतिभिर्विश्वानिपरिभूतिभिः ॥१०॥९॥

बहवः । सूरऽचक्षसः । अग्निऽजिह्वाः । ऋतऽवृधः । त्रीणि ।
ये । येमुः । विदथानि । धीतिऽभिः । विश्वानि । परिभूतिऽभिः ॥१०॥९॥

बहवोमहान्तः सूरचक्षसः सूर्यसदृशप्रकाशाः सूरः प्रकाशकोयेषामितिवा अग्निजिह्वाः अग्निरेवजिह्वा अदनसाधनोयेषां तादृशाःऋतावृधोयज्ञस्य वर्धयितारोमित्रादयःकिञ्च येत्रीणि विश्वानि व्याप्तानि विदथानि क्षित्यादिस्थानानि क्षित्यादीनि परिभूतिभिः परिभावुकैः धीतिभिःकर्मभिः येमुः प्रयच्छन्ति ते क्षत्रमाशतेत्युत्तरत्र संबन्धनीयम् । अथवात्रैव ये त्रीणिस्थानानि प्रयच्छन्ति ते बहुत्वादि गुणोपेताआगच्छन्त्वित्यध्याहार्यम् ॥ १० ॥

॥ इति पञ्चमस्य पञ्चमे नवमोवर्गः ॥ ९ ॥

अथैकादशी—

वियेदधुःशरदंमासमादहर्यज्ञमक्तुंचादृचम् ।
अनाप्यंवरुणोमित्रोअर्यमाक्षत्रंराजानआशत ॥ ११ ॥

वि । ये । दुधुः । शरदम् । मासम् । आत् । अहः । युज्ञम् ।
अक्तुम् । च । आत् । ऋचम् । अनाप्यम् । वरुणः । मित्रः ।
अर्यमा । क्षत्रम् । राजानः । आशत ॥ ११ ॥

ये मित्रादयः शरदं संवत्सरं विदधुः अकुर्वन् आत् अनन्तरमेव मासं अनन्तरं अहः अनन्तरमहःसाध्यं यज्ञं आत् अनन्तरमक्तुं रात्रिञ्च ऋचं मन्त्रांश्च यद्वा सर्वत्र आदित्ययमपीत्यर्थे वर्तते तथा सति क्रमः अविवक्षितः ते वरुणोमित्रोर्यमा च त्रयः अनाप्यमन्यैरप्राप्तं क्षत्रं बलं राजानः राजमानाः आशत व्याप्तवन्तः ॥ ११ ॥

अथ द्वादशी—

तद्वोअद्यमनामहेसूक्तैःसूरउदिते ।
यदोहंतेवरुणोमित्रोअर्यमायूयमृतस्यरथ्यः ॥ १२ ॥

तत् । वः । अद्य । मनामहे । सुऽउक्तैः । सूरे । उत्ऽइते । यत् ।
ओहते । वरुणः । मित्रः । अर्यमा । यूयम् । ऋतस्य । रथ्यः ॥ १२ ॥

तत्प्रसिद्धमद्यास्मिन्यागकाले वोयुष्मान्मनामहे याचामहे कैः साधनैः सूक्तैः कस्मिन्काले सूरउदिते प्रातःकालइत्यर्थः यद्धनं हे ऋतस्योदकस्य रथ्यः नेतारोयूयं वरुणादयः ओहते यूयमित्यनेन सामानाधिकरण्यादोहतइत्यत्र पुरुषव्यत्ययः ओहध्वइत्यर्थः तद्धनं मनामहइति ॥ १२ ॥

अथ त्रयोदशी—

ऋतावानऋतजाताऋतावृधोघोरासोअनृतद्विषः ।
तेषांवःसुम्नेसुच्छर्दिष्टमेनरःस्यामयेचसूरयः ॥ १३ ॥

ऋतऽवानः । ऋतऽजाताः । ऋतऽवृधः । घोरासः । अनृतऽद्विषः ।
तेषाम् । वः । सुम्ने । सुच्छर्दिःऽतमे । नरः । स्याम । ये । च । सूरयः ॥ १३ ॥

ये यूयमृतावानः ऋतवन्तः यज्ञवन्तः उदकवन्तोवा ऋतजाताः उक्तः ऋतशब्दार्थः तदर्थमुत्पन्नाः अथवा ऋतात्प्रजापतेः सकाशादुत्पन्नाः ऋतावृधः उक्तार्थस्य ऋतस्य वर्धयितारः घोरासोघोराः अनृतद्विषः अयष्टृद्वेष्टारः हे नरः तेषां वोयुष्माकं सुच्छर्दिष्टमे सुखतमे सुम्ने धने अत्यन्तरमणीयगृहयुक्ते सुखे वा ये वयं येचान्ये सूरयः स्तोतारः ते सर्वे स्याम भवेम ॥ १३ ॥

स्तोमातिरेके माध्यन्दिनसवने नैमित्तिके शस्त्रे उदुत्यदित्ययं प्रगाथोनुरूपः सूत्रितश्च—त्र-णमहाँअसिसूर्योदुत्यदर्शतंवपुरिति प्रगाथौ स्तोत्रियानुरूपाविति । चातुर्विंशिकेहनि माध्यन्दिन-सवने अयमेवैकल्पिकः स्तोत्रियस्तृचः सूत्रितश्च—उदुत्यदर्शतंवपुरुदुत्येमधुमत्तमाइति ।

सैषा सूक्ते चतुर्दशी—

उदुत्यद्दर्शतंवपुर्दिवएतिप्रतिह्वरे ।
यदीमाशुर्वहतिदेवएतशोविश्वस्मैचक्षसेअरम् ॥ १४ ॥

उत् । ऊँ इति । त्यत् । दर्शतम् । वपुः । दिवः । एति ।
प्रतिऽह्वरे । यत् । ईम् । आशुः । वहति । देवः ।
एतशः । विश्वस्मै । चक्षसे । अरम् ॥ १४ ॥

त्यद् तद् दर्शतं दर्शनीयं वपुर्मण्डलं दिवोन्तरिक्षस्य प्रतिह्वरे समीपेउदु एति उदेति उइ-तिपूरणः यदीं यदेतन्मण्डलं आशुः शीघ्रगामी एतशो एतवर्णोश्वोवहति धारयति किमर्थं विश्वस्मै सर्वस्मै अरं चक्षसे सम्यक् सर्वलोकदर्शनाय ॥ १४ ॥

अथ प्रगाथे द्वितोया सूक्तेपञ्चदशी—

शीर्ष्णःशीर्ष्णोजगतस्तस्थुषस्पतिंसमयाविश्वमारजः ।
सप्तस्वसारःसुवितायसूर्यंवहन्तिहरितोरथे ॥ १५ ॥ १० ॥

शीर्ष्णःऽशीर्ष्णः । जगतः । तस्थुषः । पतिम् । समया ।
विश्वम् । आ । रजः । सप्त । स्वसारः । सुविताय ।
सूर्यम् । वहन्ति । हरितः । रथे ॥ १५ ॥ १० ॥

शीर्ष्णःशीर्ष्णः सर्वस्यापिशिरसः तृतीयार्थे पञ्चमी स्वस्वशिरसेत्यर्थः सूर्यं वहन्तीत्यने-न संबध्यते अथवा शिरःशब्देन वद्वान् पदार्थोलक्ष्यते वीप्सया तस्यकात्स्न्र्यमुच्यते सर्वस्य श्रेष्ठमित्यर्थः जगतोजङ्गमस्य तस्थुषः स्थावरस्य पतिं स्वामिनं रथे वर्तमानं सूर्यं सुविताय कल्याणाय विश्वं रजः समया सर्वलोकस्य समीपे अभितः परितः समयेत्यादिना समयाश-

ब्द्योगाद् द्वितीया। सप्त सप्तसङ्ख्याकाः स्वसारः अन्यनिरपेक्षेण स्वयमेव शरन्त्योहरितोहरिद्वर्णाअश्वा आवहन्ति ॥ १५ ॥

॥ इति पञ्चमस्य पञ्चमे दशमोवर्गः ॥ १० ॥

अथ षोडशी–

तच्चक्षुर्देवहितंशुक्रमुच्चरत् । पश्येमशरदःशतंजीवेमशरदःशतम्॥१६॥

तत् । चक्षुः । देवऽहितम् । शुक्रम् । उत्ऽचरत् ।
पश्येम । शरदः । शतम् । जीवेम । शरदः । शतम् ॥ १६ ॥

तत्प्रसिद्धं चक्षुः सर्वस्य प्रकाशकं देवहितं देवानां हितं तेषां हविः स्वीकारस्यैवदधीनत्वाद् अथवा देवेन हितं शुक्रं निर्मलं सूर्यमण्डलं उच्चरद् उद्गच्छति तच्छरदः शतं शतसंवत्सरं पश्येम जीवेम शरदः शतं पुनः श्रुतिरादरार्था ॥ १६ ॥

पृष्ठ्याभिप्लवषडहयोःस्तोमनिमित्ते आवापे काव्येभिरदाभ्येतितृचः काव्येभिरदाभ्येति तिस्रइति हि सूत्रितम्।

अत्र तृचे प्रथमा सूक्ते सप्तदशी–

काव्येभिरदाभ्यायातंवरुणद्युमत् । मित्रश्चसोमपीतये ॥ १७ ॥

काव्येभिः । अदाभ्या । आ । यातम् । वरुण । द्युऽमत् ।
मित्रः । च । सोमऽपीतये ॥ १७ ॥

हे अदाभ्या अदंभनीयौ हे वरुण त्वं मित्रश्च द्युमद् द्युतिमन्तौ युवां काव्येभिरस्मत्कृतैः स्तोत्रैरायातम् किमर्थं सोमपीतये सोमपानाय ॥ १७ ॥

तृचे द्वितीया सूक्ते अष्टादशी–

दिवोधामभिर्वरुणमित्रश्चायातमद्रुहा । पिबतंसोममातुजी ॥१८॥

दिवः । धामऽभिः । वरुण । मित्रः । च । आ । यातम् । अद्रुहा ।
पिबतम् । सोमम् । आतुजी इत्याऽतुजी ॥ १८ ॥

हे वरुण त्वं मित्रश्च अद्रुहा अद्रोग्धारौ युवां दिवोद्युलोकसम्बन्धिभ्योधामभिः धामभ्यः स्थानेभ्यः पञ्चम्यर्थेतृतीया अथवा धामभिस्तेजोभिः विभूतिभिः सार्धं आयातं अस्मद्यज्ञमागच्छतम् आगत्य च आतुजौ शत्रूणां सर्वतोहिंसकौ आदातारौ वा धनानां । एवं रूपौ सन्तौ सोमं पिबतम् । तुजि पिजि हिंसाबलादाननिकेतनेषु अत्र हिंसायां आदाने वा वर्तते ॥ १८ ॥

तृचे तृतीया सूक्ते एकोनविंशी—

आयातंमित्रावरुणाजुषाणावाहुतिंनरा । पातंसोममृतावृधा ॥१९॥११॥

आ । यातम् । मित्रावरुणा । जुषाणौ । आऽहुतिम् ।
नरा । पातम् । सोमम् । ऋतऽवृधा ॥ १९ ॥ ११ ॥

हे मित्रावरुणा मित्रावरुणौ हे नरा यागनेतारौ आहुतिं सोमलक्षणां जुषाणौ प्रीयमाणौ सन्तौ आयातं आगच्छतम् यज्ञम् आगत्य च हे ऋतावृधा यज्ञस्य वर्धकौ युवां सोमं पातं पिबतम् ॥ १९ ॥

॥ इति पंचमस्य पञ्चमे एकादशोवर्गः ॥ ११ ॥

प्रतिवां रथमिति दशर्चं द्वादशं सूक्तं प्रतिवां दशाश्विनंतुतदित्यनुक्रमणिका । ऋषिर्वसिष्ठः छन्दस्त्रिष्टुप् तुह्यादिपरिभाषयैवदादीन्यष्टसूक्तान्यश्विदेवत्यानि प्रातरनुवाके आश्विनेक्रतौ त्रैष्टुभेछन्दसि एतदादिसूक्तसप्तकं द्वितीयवर्जं शंस्यम् तथाचसूत्रम्—प्रतिवांरथमितिसप्तानां द्वितीयमुद्धरेदिति ।

तत्र प्रथमा—

प्रतिवांरथंनृपतीजरध्यैहविष्मतामनसायज्ञियेन ।
योवांदूतोनधिष्ण्यावजीगरच्छासूनुर्नपितराविवक्मि ॥ १ ॥

प्रति । वाम् । रथम् । नृपती इति नृऽपती । जरध्यै । हविष्मता ।
मनसा । यज्ञियेन । यः । वाम् । दूतः । न । धिष्ण्यौ ।
अजीगः । अच्छ । सूनुः । न । पितरा । विवक्मि ॥ १ ॥

हे नृपती नृणां ऋत्विग्यजमानानां स्वामिनावश्विनौ वां युवयोरथं जरध्यै जरा स्तुतिः स्तोतुं प्रतिगच्छामीतिशेषः केन साधनेनेति तदुच्यते हविष्मता हविर्युक्तेन यज्ञियेन यज्ञार्हेण

मनसा स्तोत्रेण योरथेवां हे धिष्ण्यौ धिषणार्हौ धिषणा स्तुतिः वां युवां दूतोन दूतइव अजी-गर्जागरयति प्रबोधयति अस्मान्प्रतिगन्तुं तं रथमच्छाविवक्मि आवच्मि प्रबोधनेदृष्टान्तः— सूनुर्न पितरा पुत्रोमातापितराविव अथवा अत्रयोरथोयुवामजीगः तेन रथेन गन्तुं बुध्यमानौ युवामच्छाविवक्मीति वा योज्यम्॥ १ ॥

अथ द्वितीया—

अशो॑च्य॒ग्निः स॑मिधा॒नो अ॒स्मे उपो॑ अदृश्र॒न्तम॑सश्चि॒दन्ताः॑ ।
अचे॑ति के॒तुरु॒षसः॑ पु॒रस्ता॑च्छ्रि॒ये दि॒वो दु॑हि॒तुर्जाय॑मानः ॥ २ ॥

अशो॑चि । अ॒ग्निः । स॒म्ऽइ॒धा॒नः । अ॒स्मे इति॑ । उपो॒ इति॑ । अ॒दृ॒श्र॒न् । तम॑सः । चि॒त् । अन्ताः॑ । अचे॑ति । के॒तुः । उ॒षसः॑ । पु॒रस्ता॑त् । श्रि॒ये । दि॒वः । दु॒हि॒तुः । जाय॑मानः ॥ २ ॥

अस्मे अस्माभिः समिधानः समिध्यमानः सन् अग्निः अशोचि दीप्यते तमसश्चित् तमसोपि अन्ताः पर्यन्ताः प्रदेशाः उपो अदृश्रन् उपदृश्यन्ते सर्वैः केतुः सर्वस्य प्रज्ञापकः सूर्योदिवोदुहितुरुषसः पुरस्तात्पूर्वस्यां दिशि श्रिये शोभायै जायमानः सन् अचेति ज्ञायते यस्मादेवं तस्मात् युवयोः आगमनसमयः अतआगच्छतमिति शेषः ॥ २ ॥

अथ तृतीया—

अ॒भि वां॑ नू॒नम॑श्विना॒ सुहो॑ता॒ स्तोमैः॑ सिषक्ति नासत्या विव॒क्वान् ।
पू॒र्वीभि॑र्यातं प॒थ्या॑भिर॒र्वाक्स्व॒र्विदा॒ वसु॑मता॒ रथे॑न ॥ ३ ॥

अ॒भि । वा॒म् । नू॒नम् । अ॒श्वि॒ना॒ । सुऽहो॑ता । स्तोमैः॑ । सि॒स॒क्ति॒ । ना॒स॒त्या॒ । वि॒व॒क्वान् । पू॒र्वीभिः॑ । या॒त॒म् । प॒थ्या॑भिः । अ॒र्वाक् । स्वः॒ऽविदा॑ । वसु॑ऽमता । रथे॑न ॥ ३ ॥

हे अश्विना अश्विनौ वां युवां सुहोता सुष्टु देवानां स्तोता विवक्वान् स्तुतीनां वक्ताहं हे नासत्या सत्यभूतौ इदमश्विनावित्यत्रयोज्यं नूनमद्य स्तोमैः अभिसिषक्ति सेवते अतो-र्वागस्मदभिमुखं पूर्वीभिः पथ्याभिः पूर्वैक्षुण्णैर्मार्गैः स्वर्विदा स्वर्गमुदकंवा जानता स्वरणवता वा वसुमता धनवता वा रथेन यातं गच्छतम् ॥ ३ ॥

अथ चतुर्थी–

अवोर्वांनूनमश्विनायुवाकुर्हुवेयद्वांसुतेमाध्वीवसूयुः ।
आवांवहन्तुस्थविरासोअश्वाःपिबाथोअस्मेसुषुतामधूनि ॥ ४ ॥

अवोः । वाम् । नूनम् । अश्विना । युवाकुः । हुवे । यत् । वाम् ।
सुते । माध्वी इति । वसुऽयुः । आ । वाम् । वहन्तु । स्थविरासः ।
अश्वाः । पिबाथः । अस्मे इति । सुऽसुता । मधूनि ॥ ४ ॥

हे अश्विना अश्विनौ अवोः रक्षित्रोः वां युवाभ्यां युवाकुः युवां कामयमानोहं नूनमद्य स्वभूतोभवामीतिशेषः यद्यस्मात् हे माध्वी मधुरस्य सोमस्यार्हौ मधुविद्यासंबन्धिनौ वा वां युवां सुते अभिषुते सोमे वसूयुर्वसुकामोहुवे स्तौमि अतोवां स्वभूतः वां युवां आवहन्तु के स्थविरासः स्थूलाः प्रवृद्धा अश्वाएतयोरतिप्रवृद्धत्वात् शीघ्रगतेरपेक्षितत्वाच्च स्थविरैरेव भाव्यम् आगमनानन्तरं अस्मे अस्माभिः सुषुता सुष्ठु अभिषुतानि मधूनि मधुररसान् पिबाथः पिबतम् ॥ ४ ॥

अथ पंचमी–

प्राचीमुदेवाश्विनाधियंमेमृध्रांसातयेकृतंवसूयुम् ।
विश्वाअविष्टंवाजआपुरंधीस्तानःशक्तंशचीपतीशचीभिः ॥५॥१२॥

प्राचीम् । ऊँ इति । देवा । अश्विना । धियम् । मे । अमृध्राम् ।
सातये । कृतम् । वसुऽयुम् । विश्वाः । अविष्टम् । वाजे । आ ।
पुरम्ऽधीः । ता । नः । शक्तम् । शचीपती इति शचीऽपती ।
शचीभिः ॥ ५ ॥ १२ ॥

हे अश्विना अश्विनौ देवा देवौ युवां प्राचीं ऋज्वीं अमृध्रां अहिंसितां वसूयुं धनमिच्छन्तीं मे मम धियं बुद्धिं स्तुतिं कर्मवा सातये लाभाय उचितां कृतम् कुरुतम् । उःपूरणः किञ्च वाजे आ सङ्ग्रामेपि विश्वाः पुरन्धीरस्मदीया बुद्धीरविष्टं रक्षतम् । हे शचीपती शचीति कर्म नाम कर्मणां पालकौ ता तौ युवां शचीभिः अस्मदीयैः स्तुत्यादिरूपैः कर्मभिर्नोस्मान् शक्तं प्रयच्छतं धनमितिशेषः ॥ ५ ॥

॥ इति पञ्चमस्य पञ्चमे द्वादशोवर्गः ॥१२॥

अथ षष्ठी–

अविष्टंधीष्वश्विनानआसुप्रजावद्रेतोअह्रयंनोअस्तु ।
आवांतोकेतनयेतूतुजानाःसुरत्नासोदेववीतिंगमेम ॥ ६ ॥

अविष्टम् । धीषु । अश्विना । नः । आसु । प्रजाऽवत् ।
रेतः । अह्रयम् । नः । अस्तु । आ । वाम् । तोके । तनये ।
तूतुजानाः । सुऽरत्नासः । देवऽवीतिम् । गमेम ॥ ६ ॥

हे अश्विना अश्विनौ नोस्मान् आसु धीषु एषु कर्मसु अविष्टं रक्षतम् नोस्मभ्यं अह्रयं अक्षीणं प्रजावत् पुत्राद्युपेतं पुत्रोत्पादनसमर्थं रेतोस्तु वां युवयोरनुग्रहात् लब्धे तोके पुत्रे तनये तत्पुत्रादौच तूतुजानाः अभिमतं धनं प्रयच्छन्तः सुरत्नासः शोभनधनाश्च सन्तोदेववीतिं देवानां वीतिः प्राप्तिर्यस्मिन् तादृशं यज्ञं आगमेम आगच्छेम ॥ ६ ॥

अथ सप्तमी–

एषस्यवांपूर्वगत्वेवसख्येनिधिर्हितोमाध्वीरातोअस्मे ।
अहेळतामनसायातमर्वागश्नन्ताहव्यंमानुषीषुविक्षु ॥ ७ ॥

एषः । स्यः । वाम् । पूर्वगत्वाऽइव । सख्ये । निऽधिः । हितः ।
माध्वी इति । रातः । अस्मे इति । अहेळता । मनसा । आ ।
यातम् । अर्वाक् । अश्नन्ता । हव्यम् । मानुषीषु । विक्षु ॥ ७ ॥

एषपुरतोदीयमानः स्यः सः युवयोः प्रियत्वेन प्रसिद्धः सोमो हे माध्वी मधुप्रियावश्विनौ वां युवयोः पुरतः निधिः निधिस्थानीयोहितः स्थापितोस्मेस्माभीरातोदत्तः संकल्पितः संनिहितः किमिव सख्ये सख्यार्थं पूर्वगत्वेव पुरतोगन्ता दूतइव सयथा प्रियं जनयन् स्वामिनः पुरतोवर्तते तद्वदित्यर्थः यस्मादेवं तस्मात् अहेळता अक्रुध्यता मनसा अनुग्रहयुक्तेन चेतसा अर्वागस्मदभिमुखं आयातम् आगच्छतम् । अश्नन्ता हव्यं हविः सोमादिकं अश्नन्तौ अभ्यवहरन्तौ कुत्र मानुषीषु विक्षु मनुष्यरूपासु प्रजासु वर्तमानम् ॥ ७ ॥

अथाष्टमी—

एकस्मिन्योगेभुरणासमानेपरिवांसप्तस्रवतोरथोगात् ।
नवायन्तिसुभ्वोदेवयुक्तायेवांधूर्षुतरणयोवहन्ति ॥ ८ ॥

एकस्मिन् । योगे । भुरणा । समाने । परि । वाम् । सप्त ।
स्रवतः । रथः । गात् । न । वायन्ति । सुऽभ्वः । देवऽयुक्ताः ।
ये । वाम् । धूःऽसु । तरणयः । वहन्ति ॥ ८ ॥

हे भुरणा सर्वस्य भर्तारौ युवयोरेकस्मिन्समाने उभयसाधारणे योगेस्मद्विषये सति वां युवयोः रथः सप्तस्रवतः सर्पणस्वभावाः सप्तसङ्ख्याकावा गङ्गायाः परिगात् परिगच्छति शीघ्रमागच्छतीत्यर्थः तद्यथाश्वाः सुभ्वः सुभवनाः देवयुक्ताः देवाभ्यां युवाभ्यां युक्ताः अश्वाः शीघ्रगमने न वायन्ति न शुष्यन्ति नश्राम्यन्ते येश्वाः वां धूर्षु रथस्य तरणयः तारकाः शीघ्रगन्तारोवहन्ति युवां ते न वायन्तीति ॥ ८ ॥

तत्रैषा नवमी—

असश्चतामघवद्भ्योहिभूतंयेरायामघदेयंजुनन्ति ।
प्रयेबन्धुंसूनृताभिस्तिरन्तेगव्यापृञ्चन्तोअश्व्यामघानि ॥ ९ ॥

असश्चता । मघवत्ऽभ्यः । हि । भूतम् । ये । राया ।
मघऽदेयम् । जुनन्ति । प्र । ये । बन्धुम् । सूनृताभिः । तिरन्ते । गव्या ।
पृञ्चन्तः । अश्व्या । मघानि ॥ ९ ॥

असश्चता कुत्राप्यसज्यमानौ युवां मघवद्भ्यो धनवद्भ्यो हविष्मद्भ्यो यजमानेभ्यः तेषामर्थाय भूतं हि भवतं तेभ्यएवानुरक्तौ भवतम् ।अनुग्राह्याएव विशेष्यन्ते ये राया धनेन निमित्तेन राया युक्तावा मघदेयं दातव्यं मघं धनं हविर्लक्षणं वा जुनन्ति प्रेरयन्ति प्रयच्छन्ति येच बन्धुं स्नेहेन बध्नातीति बन्धुः तं स्वसंबन्धिनं अथवा फलेन बध्नातीति बन्धुरध्वर्य्वादिः तं सूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भिः प्रतिरन्ते प्रवर्धयन्ति ।प्रपूर्वस्तिरतिर्वर्धनार्थः किं कुर्वन्तः गव्या गोरूपाणि अश्व्या अश्वरूपाणि च मघानि धनानि पृञ्चन्तोर्थिभ्यः प्रयच्छन्तः तेभ्योमघवद्भ्योभूतमिति ॥ ९ ॥

अथ दशमी--

नूमेहवमाशृणुतंयुवानायासिष्टंवर्तिरश्विनाविरावत् ।
धत्तंरत्नानिजरतंचसूरीन्यूयंपातस्वस्तिभिःसदानः ॥ १० ॥१३॥

नु । मे । हवम् । आ । शृणुतम् । युवाना । यासिष्टम् । वर्तिः ।
अश्विनौ । इराऽवत् । धत्तम् । रत्नानि । जरतम् । च ।
सूरीन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः १० ॥ १३ ॥

हे युवाना नित्ययौवनौ नु अद्य युवां मे हवमस्मदीयां स्तुतिं आशृणुतं श्रुत्वा च हे अश्विनौ इरावत हविर्युक्तं वर्तिर्गृहं यासिष्टं आगच्छतम् आगत्यच रत्नानि रमणीयानि धनानि धत्तं दत्तं सूरीन् स्तोतॄन् जरतं वर्धयतं धातूनामनेकार्थत्वात् । शिष्टं यूयं पातस्वस्तिभिः सदानः स्पष्टम् ॥ १० ॥

॥ इति पञ्चमस्य पंचमे त्रयोदशोवर्गः ॥ १३ ॥

आशुभ्रायातमिति नवर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं आश्विनम् आदितः सप्तविराजः अष्टमीनवम्यौ त्रिष्टुभौ अनुक्रम्यते च—आशुभ्रानव सप्ताद्याविराजइति सूक्तविनियोगोलैंगिकः ।

तत्रप्रथमा

आशुभ्रायातमश्विनास्वश्वागिरोदस्राजुजुषाणायुवाकोः ।
हव्यानिचप्रतिभृतावीतंनः ॥ १ ॥

आ । शुभ्रा । यातम् । अश्विना । सुऽअश्वा । गिरः ।
दस्रा । जुजुषाणा । युवाकोः । हव्यानि ।
च । प्रतिऽभृता । वीतम् । नः ॥ १ ॥

हे शुभ्रा दीप्तौ स्वश्वा शोभनाश्वौ हे अश्विना अश्विनौ आयातमस्मद्यज्ञमागच्छतम् दस्रा शत्रूणां उपक्षपयितारौ युवां युवाकोर्युवां कामयमानस्य मम गिरः स्तुतीर्जुजुषाणा सेवमानौ भवतमितिशेषः न केवलं स्तुतिं किंतु नोस्मदीयानि प्रतिभृता संभृतानि हव्यानि हवींषि च वीतं भक्षयतम् ॥ १ ॥

प्रवामन्धांसीत्येषा आश्विनशस्त्रयाज्या सूत्रितंच–प्रवामन्धांसिमद्यान्यस्थुरुभापिव-तमश्विनेति याज्येति ।

सैषा द्वितीया–

प्रवामन्धांसिमद्यान्यस्थुररंगन्तंहविषोवीतयेमे ।
तिरोअर्योहवनानिश्रुतंनः ॥ २ ॥

प्र । वाम् । अन्धांसि । मद्यानि । अस्थुः । अरम् ।
गन्तम् । हविषः । वीतये । मे । तिरः । अर्यः ।
हवनानि । श्रुतम् । नः ॥ २ ॥

हे अश्विनौ वां युवाभ्यां मद्यानि मदजनकानि अन्धांसि सोमलक्षणान्यन्नानि प्रास्थुः प्रास्थिषत गृहीतान्यासन्नित्यर्थः अतोयुवां मे मम हविषोवीतये पानाय अरं अत्यर्थं शीघ्रं गन्तं आगच्छतम अर्यः अरेः अस्मद्विरोधिनोहवनानि तिरस्तिरस्कृत्य नोस्मदाह्वानमित्यर्थः तद् श्रुतं शृणुतं श्रुतमित्यस्य वाक्यादित्वादनिघातः ॥ २ ॥

अथ तृतीया–

प्रवांरथोमनोजवाइयर्तितिरोरजांस्यश्विनाशतोतिः ।
अस्मभ्यंसूर्यावसूइयानः ॥ ३ ॥

प्र । वाम् । रथः । मनःऽजवाः । इयर्ति । तिरः । रजांसि ।
अश्विना । शतऽऊतिः । अस्मभ्यम् । सूर्यावसू इति । इयानः ॥ ३॥

हे सूर्यावसू सूर्यायाः सह रथे वसन्तौ हे अश्विना अश्विनौ वां युवयोरथः अस्मभ्यम-स्मदर्थं इयानोयाच्यमानः सन् इयर्ति आगच्छति अस्मद्यज्ञं अथवा वां प्रेरयति गमनाय । कीदृशोरथः मनोजवाः मनोवेगः शतोतिरपरिमितास्मद्विषयरक्षणः । किंकुर्वन् रजांसि लोकान् तिरस्तिरस्कृत्य अतिक्रम्य इयर्तीति ॥ ३ ॥

अथ चतुर्थी–

**अयंहयद्वांदेवयाउअद्रिरूर्ध्वोविवक्तिसोमसुद्युवभ्याम्।
आवल्गूविप्रोववृतीतहव्यैः ॥ ४ ॥**

अयम् । ह । यत् । वाम् । देवऽया: । ऊँ इति ।
अद्रिः । ऊर्ध्वः । विवक्ति । सोमऽसुत् । युवऽभ्याम् । आ ।
वल्गू इति । विप्रः । ववृतीत । हव्यैः ॥ ४ ॥

यद्यदा वां युवां प्रति देवयाः देवौ युवां कामयमानः हउ इति पूरणौ अयमद्रिरभिषवग्रावा सोमसुत् सोममभिषुण्वन् युवभ्यां युवाभ्यामर्थाय अभिषुण्वन्निति संबन्धः एवं कुर्वन् ऊर्ध्व-उन्नतः सन् विवक्ति उच्चैः शब्दयति तदानीं वल्गू सुन्दरौ युवां विप्रोमेधावी यजमानोहव्यैर्हविर्भिः आववृतीत आवर्तयति ॥ ४ ॥

अथ पञ्चमी–

**चित्रंहयद्वांभोजनंन्वस्तिन्यत्रयेमहिष्वन्तंयुयोतम्।
योवामोमानंदधतेप्रियःसन् ॥ ५ ॥ १४ ॥**

चित्रम् । ह । यत् । वाम् । भोजनम् । नु । अस्ति । नि ।
अत्रये । महिष्वन्तम् । युयोतम् । यः । वाम् ।
ओमानम् । दधते । प्रियः । सन् ॥ ५ ॥ १४ ॥

हे अश्विनौ वां युवयोश्चित्रं चायनीयं यद्भोजनं धनमस्ति ह अस्ति खलु न्विति पूरणः तदस्मभ्यं दत्तमित्यर्थः ।अथ तयोः स्तुतिः अत्रये एतन्नामकादृषेः पंचम्यर्थे चतुर्थी तस्मान्महिष्वन्तं ऋबीसं नियुयोतं पृथक्कुरुतम् योत्रिः प्रियः सन् स्तोतृत्वात् युवाभ्यां प्रियभूतः सन् वां युवाभ्यामेवकृतमोमानं रक्षणसुखं दधते धारयति ॥ ५ ॥

॥ इति पंचमस्य पंचमे चतुर्दशोवर्गः ॥ १४ ॥

अथ षष्ठी–

उत त्यद्वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे ।
अधि यद्वर्प इतऊति धत्थः ॥ ६ ॥

उत । त्यत् । वाम् । जुरते । अश्विना । भूत् ।
च्यवानाय । प्रतीत्यम् । हविःऽदे । अधि ।
यत् । वर्पः । इतःऽऊति । धत्थः ॥ ६ ॥

उतापिच हे अश्विना अश्विनौ वां युवयोः कर्म कुर्वते जुरते जूर्णाय हविर्दे हविर्दात्रे च्यवानायैतन्नामकाय महर्षये त्यत्तत्प्रतीत्यं प्रतिगमनं तस्य रूपस्य प्रत्याप्त्यै भूत् अभूत । किं तदिति यद्वर्पोरूपं इतऊति इतोगमनाख्यं मृत्योः सकाशादितः प्राप्तिरूपं अधि धत्थः अध्यधत्तम् । युवंच्यवानमश्विनाजरन्तंपुनर्युवानंचक्रथुःशचीभिरित्यादिषु[1] । च्यवानस्य युवयोः नवीकरणं प्रसिद्धम ॥ ६ ॥

अथ सप्तमी–

उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे ।
निरीं पर्षदरावा यो युवाकुः ॥ ७ ॥

उत । त्यम् । भुज्युम् । अश्विना । सखायः ।
मध्ये । जहुः । दुःऽएवासः । समुद्रे । निः । ईम् ।
पर्षत् । अरावा । यः । युवाकुः ॥ ७ ॥

उतापिच त्यं तं भुज्युं एतन्नामानं समुद्रमध्ये समुद्रोदकस्य मध्ये सखायो भुज्युसखिभूताः दुरेवासोदुष्टगमनाः जहुः त्यक्तवन्तः हे अश्विना अश्विनौ युवां ईमेनं समुद्रमध्ये क्षिप्तं निःपर्षत् निरपारयतम योभुज्युर्युवाकुः युवां कामयिता अरावा अरणवान् अभिगन्ताच तमेनं निरपारयतम् अत्राश्विनेषु सूक्तेषु कथाः सूच्यन्ते अत्रिभुज्य्वादीनामग्निजलादिभ्योरक्षणरूपास्ताः सर्वा महता प्रपञ्चेनास्माभिः नासत्याभ्यां वर्तिरिवेत्यत्र[2] प्रपञ्चिताः ताः तत्र द्रष्टव्याः ॥७॥

---

[1] ऋ० सं० १. ८. १५ । [2] ऋ० सं० १. ८. ८ ।

अथाष्टमी—

वृकायचिज्जसमानायशक्तमुतश्रुतंशयवेंहूयमाना ।
यावघ्न्यामपिन्वतमपोनस्तर्यंचिच्छक्त्यश्विनाशचीभिः ॥ ८ ॥

वृकाय । चित् । जसमानाय । शक्तम् । उत । श्रुतम् । शयवे ।
हूयमाना । यौ । अघ्न्याम् । अपिन्वतम् । अपः । नः । स्तर्यम् ।
चित् । शक्ती । अश्विना । शचीभिः ॥ ८ ॥

वृकाय धनादात्रे अभिलपतइत्यर्थः चिदितिपूरणः अथवा परेभ्योधनानि प्रयच्छते य-द्वा वृकाय वृकवद्धिंसकाय एतन्नामकाय जरमानाय कर्मभिरुपक्षीयमाणाय ऋषये शक्तं अभिमतं धनं अदत्तं शकेर्दानार्थस्य लुङ्येतद्रूपं अड्भावश्छान्दसः । उतापिच शयवे एतन्नामकाय ऋषये हूयमाना हूयमानौ युवां श्रुतं अशृणुतम् यौ युवांअघ्न्यां गां अपिन्वतं अपूरयतं क्षीरेण अपोन अद्भिरिव नदीं तां यथोदकेन पूरयतस्तद्वत् कीदृशीमघ्न्यां स्तर्यं चित् स्तरीमपि निवृत्तप्रसवां वृद्धामपि शक्ती शक्त्या सामर्थ्येन दोहनलक्षणेन युक्तां कृत्वा शचीभिर्युष्मदीयैः कर्मभिः हे अश्विनाविति । शयवेचिन्नासत्याशचीभिर्जसुरयेस्तर्यंपिप्यथुर्गामित्यादिरयुक्तम ॥ ८ ॥

अथ नवमी—

एषस्यकारुर्जरतेसूक्तैरग्रेबुधानउषसांसुमन्मा ।
इषातंवर्धदघ्न्यापयोभिर्यूयंपातस्वस्तिभिःसदानः ॥ ९ ॥ १५ ॥

एषः । स्यः । कारुः । जरते । सुऽउक्तैः । अग्रे । बुधानः ।
उषसाम् । सुऽमन्मा । इषा । तम् । वर्धत् । अघ्न्या । पयःऽभिः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ९ ॥ १५ ॥

एषःस्तोता स्यः सप्रसिद्धोवसिष्ठः कारुः स्तोता उषसामग्रे प्रातःसवने बुधानोबुध्यमानः सुमन्मा शोभनमतिः सुष्टुतिर्वा सूक्तैर्जरते स्तौति तं इषान्नेनवर्धेत् वर्धयतम् वचनव्यत्ययः अ-

---

1 ऋ० सं० १.८ १२ ।

ध्या अहन्तव्या गौश्च वर्धत वर्धयतु । अथवैकमेववाक्यम् अघ्या गौर्वसिष्ठस्य मतिनियताग्निहोत्रार्थागौरिषा अन्नेन घृतादिनेत्यर्थः पयोभिश्च तं वसिष्ठं वर्धत वर्धयतु एवं आत्मानं परोक्षेण निर्दिदेश शिष्टं स्पष्टम् ॥ ९ ॥

॥ इति पंचमस्य पश्चमे पंचदशोवर्गः ॥ १५ ॥

आवांरथइत्यष्टर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनं अनुक्रम्यतेच—आवांरथोष्टाविति । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगउक्तः ।

तत्र प्रथमा—

आवांरथोरोदसीवद्बधानोहिरण्ययोवृषभिर्यात्वश्वैः ।
घृतवर्तनिःपविभीरुचानइषांवोळ्हानृपतिर्वाजिनीवान् ॥ १ ॥

आ । वाम् । रथः । रोदसी इति । वद्बधानः । हिरण्ययः ।
वृषऽभिः । यातु । अश्वैः । घृतऽवर्तनिः पविऽभिः । रुचानः ।
इषाम् । वोळ्हा । नृऽपतिः । वाजिनीऽवान ॥ १ ॥

हे अश्विनौ वां रथोवृषभिः युवभिरश्वैः युक्तः सन्नायातु यज्ञमस्मदीयं कीदृशोरथः रथोविशेष्यते रोदसी द्यावापृथिव्यौ बद्बधानोबाधमानः हिरण्ययः हिरण्मयः घृतवर्तनिः घृतमुदकं वर्तन्यां यस्य तादृशः पविभीरथनेमिभिः मधुपात्रैर्वा रुचानोदीप्यमान इषां वोळ्हा यजमानैर्दत्तानां हविषां वाहकः दातव्यानां वान्नानां वोळ्हा नृपतिः नृणां यजमानानां स्वामी वाजिनीवानन्नवान् ॥ १ ॥

अथ द्वितीया—

सपप्रथानोअभिपंचभूमात्रिवन्धुरोमनसायातुयुक्तः ।
विशोयेनगच्छथोदेवयन्तीःकुत्राचिद्यामममश्विनादधाना ॥ २ ॥

सः । पप्रथानः । अभि । पंच । भूम । त्रिऽवन्धुरः । मनसा ।
आ । यातु । युक्तः । विशः । येन । गच्छथः । देवऽयन्तीः ।
कुत्र । चित् । यामम् । अश्विना । दधाना ॥ २ ॥

सरथः पञ्च भूम भूतानि सर्वप्राणिनः प्रथानः प्रथमानः त्रिवन्धुरः वन्धुरमुच्चावचं सारथ्यवस्थानं काष्ठमयं तादृशैस्त्रिभिर्युक्तः मनसास्मद्वस्तुया युक्तोऽभ्यायातु येन रथेन देवयन्तीः विशोयजमानान् प्रति गच्छथः हे अश्विना अश्विनौ कुत्राचित् यत्र क्वापि यामं गमनं दधाना धारयन्तौ येन विशोगच्छथः सयात्विति ॥ २ ॥

अथ तृतीया—

स्वश्वायशसायातमर्वाग्दस्रानिधिंमधुमन्तंपिबाथः ।
विवांरथोवध्वा३यादमानोऽन्तान्दिवोबाधतेवर्तनिभ्याम् ॥ ३ ॥

सुऽअश्वा । यशसा । आ । यातम् । अर्वाक् । दस्रा । निऽधिम् ।
मधुऽमन्तम् । पिबाथः । वि । वाम् । रथः । वध्वा । यादमानः ।
अन्तान् । दिवः । बाधते । वर्तनिऽभ्याम् ॥ ३ ॥

हे देवौ स्वश्वा शोभनाश्वेन यशसा च अर्वागस्मदभिमुखं यातमागच्छतं । हे दस्रा शत्रूणामुपक्षपयितारौ मधुमन्तं मधुररसोपेतं निधिं निधिवन्निहितं सोमं पिबाथः पिबतं वां युवयोरथोवध्वा सूर्यया सह यादमानोगन्तव्यान्प्रति गच्छन् गमयन्नित्यर्थः एवं कुर्वन् वर्तनिभ्यां स्वचक्राभ्यां दिवोअन्तान् पर्यन्तप्रदेशान् विबाधते शीघ्रगमनेन पीडयति ॥ ३ ॥

अथ चतुर्थी—

युवोःश्रियंपरियोषावृणीतसूरोदुहितापरितक्म्यायाम् ।
यद्देवयन्तमवथःशचीभिःपरिघ्रंसमोमनांवांवयोगात् ॥ ४ ॥

युवोः । श्रियम् । परि । योषा । अवृणीत । सूरः । दुहिता ।
परिऽतक्म्यायाम् । यत् । देवऽयन्तम् । अवथः । शचीभिः ।
परि । घ्रंसम् । ओमना । वाम् । वयः । गात् ॥ ४ ॥

युवोर्युवयोः श्रियं श्रयतइति श्रीः रथः तं सेवामेवया योषा सर्वदा मिश्रयन्ती योषित् सूरः सूर्यस्य दुहिता पर्यवृणीत कदा परितक्म्यायां रात्रौ परितस्तकनवति संग्रामे यत्तेना गन्तव्ये किञ्च यद्यदा देवयन्तं देवकामं यजमानं यज्ञं वा शचीभिः युवयोर्गमनादिलक्षणैः कर्मभि-

सरथः पञ्च भूम भूतानि सर्वप्राणिनः पप्रथानः प्रथमानः त्रिवन्धुरः वन्धुरग
रथ्यवस्थानं काष्ठमयं तादृशैस्त्रिभिर्युक्तः मनसास्मवस्तुल्या युक्तोऽप्यायातु येन
विशोयजमानान् प्रति गच्छथः हे अश्विना अश्विनौ कुत्राचित् यत्र क्वापि
धारयन्तौ येन विशोगच्छथः सयात्विति ॥ २ ॥   न्ता ॥ ७ ॥

अथ तृतीया–

.(। ऊहथुः ।
स्वश्वांयशसायांतमर्वाग्दस्त्रांनिधिंमधुम᳚न्तमैः । अन्यथिऽभिः ।
विवांरथोंवध्वा᳐यादंमानोन्तांन्दि ॥ ७ ॥

सुऽअश्वां । यशसां । आ एतन्नामकं अंबविद्धं विक्षिप्तं सखिभिः समुद्रे तन्म-
मधुऽमन्तम् । पिबाः किं कुर्वन्ताविति तदुच्यते असिधानैः अक्षीयमाणैः अश्र-
अन्तान् । भिः पतनवद्भिः गमनवद्भीरथेनियुक्तैरश्वैः दंसनाभिः शारीरैः कर्म-
हे देवौ स्व न्तौ समुद्रे अर्णस उदूहथुरिति। नासत्याभुज्युमूहथुःपतङ्गैरितित्युक्तम् ॥७॥

णामुपक्षपयितां   अथाष्टमी–

योरथोवध्वा स वमाभृणुतंयुवानायासिष्ंवर्तिरश्विनाविरावत् ।
स्वचक्राभ्यां दि त्नांनिजरंतंचसूरीन्यूयंपातस्वस्तिभिःसदांनः ॥ ८ ॥ १६ ॥

तत्र प्रथमा—

आविश्ववाराश्विनागतंनःप्रतत्स्थानमवाचिवांपृथिव्याम् ।
अश्वोनवाजीशुनपृष्ठोअस्थादायत्सेदथुर्ध्रुवसेनयोनिम् ॥ १ ॥

आ । विश्वऽवारा । अश्विना । गतम् । नः । प्र । तत् । स्थानम् ।
अवाचि । वाम् । पृथिव्याम् । अश्वः । न । वाजी । शुनऽपृष्ठः ।
अस्थात् । आ । यत् । सेदथुः । ध्रुवसे । न । योनिम् ॥ १ ॥

हे विश्ववारा सर्वैर्वरणीयावश्विनाश्विनौ नोस्माकं यद्यागमागतमागच्छतं वां युवयोस्तत्स्थानं पृथिव्यां वेद्यां प्रावाचि प्रोच्यते तदर्थं शुनपृष्ठः सुखकरपृष्ठभागः अत्यन्तविपुलत्वादारूढानां सुखकरपृष्ठभागइत्यर्थः वाजी वेगवानश्वोन अश्वोस्थात् तिष्ठतु युवयोः समीपे यत् यमित्यर्थः यमश्वं आसेदथुरासीदथः सोश्वः यद्वा यत्स्थानमासीदथः तत्स्थानं आश्रयतु । इतोगमनाय स्थितौ दृष्टान्तः ध्रुवसे ध्रुवाय निवासाय योनिं न योनिं स्थानमिव ॥ १॥

अथ द्वितीया—

सिषक्तिसावांसुमतिश्चनिष्ठातापिघर्मोमनुषोदुरोणे ।
योवांसमुद्रान्त्सरितःपिपर्त्येतग्वाचिन्नसुयुजायुजानः ॥ २ ॥

सिसक्ति । सा । वाम् । सुऽमतिः । चनिष्ठा । अतापि । घर्मः ।
मनुषः । दुरोणे । यः । वाम् । समुद्रान् । सरितः । पिपर्ति ।
एतऽग्वा । चित् । न । सुऽयुजा । युजानः ॥ २ ॥

सा सुमतिः अस्माभिः क्रियमाणा शोभना स्तुतिश्चनिष्ठा कमनीयतमा अतिशयेनान्नवती या वां युवां सिषक्ति सेवते किञ्च घर्मः प्रवर्ग्यश्च मनुषोमनुष्यस्य यजमानस्य दुरोणे यागगृहे अतापि तप्तोभूत् यद्घ्राँइत्यतपत्तद्घर्मस्यघर्मत्वमितिश्रुतिः । यज्ञस्य शिरःस्थानीयत्वादस्ययोवर्मोवां युवां प्राप्नुवन्निति शेषः समुद्रान् सरितश्च पिपर्ति पूरयति वृष्टिद्वारा एतग्वाचिन्न चिदितिपूरणः अश्वाविव यथा सुयुजा सुष्ठुयुक्तौ रथे भवतस्तथेत्यर्थः नेत्युपमार्थे तद्वद्युवां यज्ञे युजानोयोजयन्यज्ञः सएवं करोति ॥ २ ॥

---

१ तै० आ० पंचमप्रपाठके. ।

अथ तृतीया—

यानि॒स्थानान्य॑श्विनाद॒धाथे॑दि॒वोय॒ह्वीष्वोष॑धीषुवि॒क्षु ।
निपर्व॑तस्यमू॒र्धनि॒सद॒न्तेषं॒जना॑यदा॒शुषे॒वह॑न्ता ॥ ३ ॥

यानि॑ । स्थाना॑नि । अ॒श्विना॒ । द॒धाथे॒ इति॑ । दि॒वः । य॒ह्वीषु॑ ।
ओष॑धीषु । वि॒क्षु । नि । पर्व॑तस्य । मू॒र्धनि॑ । सद॑न्ता ।
इष॑म् । जना॑य । दा॒शुषे॑ । वह॑न्ता ॥ ३ ॥

हे अश्विनाऽश्विनौ युवां दिवोद्युलोकादागत्य यानि स्थानानि दधाथे कुरुथः कुत्रेति उच्यते यह्वीषु महतीषु ओषधीषु विक्षु यजमानेषु च। तौ युवां पर्वतस्य मेघस्यान्तरिक्षस्यवा मूर्धनि स्थाने निसदन्ता निषीदन्तौ इषमन्नं दाशुषे हविर्दात्रे जनाय यजमानाय वहन्ता प्रापयन्तौ भवतमितिशेषः ॥ ३ ॥

अथ चतुर्थी—

च॒नि॒ष्टंदे॑वा॒ओष॑धीष्व॒प्सुयद्यो॒ग्याअ॒श्नवै॑थे॒ऋषी॑णाम् ।
पु॒रूणि॒रत्ना॒दध॑तौ॒न्य॑१स्मेअ॒नुपूर्वा॑णिचख्यथु॒र्यु॒गानि॑ ॥ ४ ॥

च॒नि॒ष्टम् । दे॒वौ॒ । ओष॑धीषु । अ॒प्ऽसु । यत् । यो॒ग्याः ।
अ॒श्नवै॑थे॒ इति॑ । ऋषी॑णाम् । पु॒रूणि॑ । रत्ना॑ । दध॑तौ । नि । अ॒स्मे इति॑ ।
अनु॑ । पूर्वा॑णि । च॒ख्य॒थुः । यु॒गानि॑ ॥ ४ ॥

हे देवा देवौ युवां ओषधीषु ओषधिविकारान् चरुपुरोडाशादिकान् अप्सु सोमरसान् चनिष्टं अत्यन्तकमनीयतमं कामयेथामित्यर्थः। यद्यस्माद्योग्या युवयोरुचिता ओषधीरपश्च ऋषीणां संबन्धिनीः अश्नवैथे व्याप्नुथः तस्मादस्मदीयाअपि कामयेथामित्यर्थः। यद्वा ऋषीणामस्माकमिति पूजार्थं बहुवचनम्. यद्यस्मादोषधीष्वप्सु च चनिष्टं योग्याः स्तुतीश्चाश्नवैथे तस्मादस्मे अस्मासु पुरूणि बहूनि रत्ना रमणीयानि धनानि निदधतौ पूर्वाणि युगानि मिथुनानि जायापतीरूपाणि अनुचख्यथुः ख्यातवन्तौ अनुरुद्धवन्तावनुग्रहार्थम्. ॥ ४ ॥

अथ पंचमी–

शुश्रुवांसांचिदश्विनापुरूण्यभिब्रह्माणिचक्षाथेऋषींणाम् ।
प्रतिप्रयांतंवरमाजनांयास्मेवांमस्तुसुमतिश्चनिष्ठा ॥ ५ ॥

शुश्रुऽवांसा । चित् अश्विना । पुरूणि । अभि । ब्रह्माणि ।
चक्षाथे इति । ऋषीणाम् । प्रति । प्र । यातम् । वरम् । आ ।
जनाय । अस्मे इति । वाम् । अस्तु । सुऽमतिः । चनिष्ठा ॥ ५ ॥

हे अश्विना अश्विनौ चिदितिपूरणः युवां शुश्रुवांसा श्रुतवन्तौ सन्तौ पुरूणि बहूनि ब्रह्माणि परिवृद्धानि कर्माणि स्तुतिलक्षणानि ऋषीणामस्माकं संबन्धीनि अभिचक्षाथे अभिपश्यथोयुवाम् अतोजनाय यजमानस्य मम वरं यज्ञं प्रति प्रायातं वां । युवयोश्चनिष्ठा उत्कलक्षणा सुमतिरनुग्रहमतिरस्मे अस्मास्वस्तु भवतु ॥ ५ ॥

अथ षष्ठी–

योवांयज्ञोनांसत्याहविष्मान्कृतब्रंह्मासमर्योऽभवांनि ।
उपप्रयांतंवरमावसिंष्ठमिमाब्रह्माण्यृच्यन्तेयुवभ्याम् ॥ ६ ॥

यः । वाम् । यज्ञः । नासत्या । हविष्मान् । कृतऽब्रह्मा ।
सऽमर्यः । भवाति । उप । प्र । यातम् । वरम् । आ । वसिष्ठम् ।
इमा । ब्रह्माणि । ऋच्यन्ते । युवऽभ्याम् ॥ ६ ॥

हे नासत्या अश्विनौ वां युवयोर्योयज्ञोयजमानः समर्यः ऋत्विग्रूपैर्मर्त्यैः सहितः सन् हविष्मान् हविषायुक्तः कृतब्रह्मा कृतस्तोत्ररूपकर्मा भवाति भवति तं वरं वरणीयं वसिष्ठं आ उपप्रयातं प्रकर्षेणोपागच्छतम् । इमा इमानि ब्रह्माणि मन्त्रजातानि युवभ्यां युवाभ्यामर्थाय आगमनाय ऋच्यन्ते सूयन्ते क्रियन्ते इत्यर्थः ॥ ६ ॥

अथसप्तम्यास्तुतिमुपसंहरति–

इयंमंनीषाइयमंश्विनागीरिमांसुंवृक्तिंवृंषणाजुषेथाम् ।
इमाब्रह्माणियुवयून्यंग्मन्यूयंपातस्वस्तिभिःसदांनः ॥ ७ ॥१७॥

इयम् । मनीषा । इयम् । अश्विना । गीः । इमाम् ।
सुऽवृक्तिम् । वृषणा । जुषेथाम् । इमा । ब्रह्माणि । युवऽयूनि ।
अग्मन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ १७ ॥

हे अश्विना अश्विनौ इयं मनीषा स्तुतिः युवयोः कृतेति शेषः तदेवादरार्थं पुनरुच्यते इयङ्गीः स्तुतिः कृता हे वृषणा कामानां वर्षकौ इमामस्मत्कृतां सुवृक्तिं शोभनां स्तुतिं जुषेथां सेवेथां इमा इमानि ब्रह्माणि कर्माणि स्तुतिरूपाणि युवयूनि युवां कामयमानानि सन्ति अग्मन् गच्छन्तु युवां । यूयं पातेति सिद्धम् ॥ ७ ॥

॥ इति पञ्चमस्य पञ्चमे सप्तदशोवर्गः ॥ १७ ॥

॥ इति सप्तमे मण्डले चतुर्थोनुवाकः ॥ ४ ॥

पञ्चमेनुवाके एकविंशतिसूक्तानि तत्र अपस्वसुरिति षळृचं प्रथमं सूक्तं त्रैष्टुभमाश्विनम् अनुक्रम्यतेच—अपस्वसुःषळिति । गतोविनियोगः ।

तत्र प्रथमा—

अपस्वसुरुषसोनग्जिहीतेरिणक्तिकृष्णीररुषायपन्थाम् ।
अश्वामघागोमघावांहुवेमदिवानक्तंशरुमस्मद्युयोतम् ॥ १ ॥

अप । स्वसुः । उषसः । नक् । जिहीते । रिणक्ति । कृष्णीः ।
अरुषाय । पन्थाम् । अश्वऽमघा । गोऽमघा । वाम् ।
हुवेम । दिवा । नक्तम् । शरुम् । अस्मत् । युयोतम ॥ १ ॥

स्वसुः स्वसृस्थानीयाया उषसः सकाशात् नक् नक्तं रात्रिरपि जिहीते अपगच्छति तस्याः अवकाशं दत्वा स्वयमपगताइत्यर्थः । स्वसा स्वस्रे ज्यायस्यै योनिमारैगित्युक्तम् । कृष्णीः कृष्णवर्णा रात्रिररुषाय आरोचमानायाह्ने सूर्याय वा पन्थां पन्थानं मार्गं रिणक्ति रेचयति यस्मादेवं तस्माद्युवयोरागमनसमयत्वात् हे अश्वामघा अश्वधनौ हे गोमघा गोधनौ उभयोः प्रदातारावित्यर्थः ईदृशौ वां युवां हुवेम स्तुमः आह्वयामः दिवानक्तं सर्वदा शरुं हिंसकमस्मदस्मत्तोयुयोतं पृथक्कुरुतम् ॥ १ ॥

---

१ ऋ० सं० २.१.८.।

अथ द्वितीया-

उपायातंदाशुषेमर्त्यायरथेनवाममश्विनावहन्ता ।
युयुतमस्मदनिराममीवांदिवानक्तंमाध्वीत्रासीथांनः ॥ २ ॥

उपऽआयातम् । दाशुषे । मर्त्याय । रथेन । वामम् ।
अश्विना । वहन्ता । युयुतम् । अस्मत् । अनिराम् । अमीवाम् ।
दिवा । नक्तम् । माध्वी इति । त्रासीथाम् । नः ॥ २ ॥

हे अश्विना अश्विनौ युवां उपायातमुपागच्छतमस्मदाह्वानं प्रति । किमर्थं दाशुषे हविषां दात्रे मर्त्याय यजमानाय तदर्थं रथेन वामं वननीयं धनं वहन्ता वहन्तौ अस्मदस्मत्तो युयुतं पृथक्कुरुतं । किं अनिरां इरान्नं तद्रहितं दारिद्र्यमित्यर्थः अमीवां रोगश्च हे माध्वी मधुमन्तौ युवां नोस्मान् दिवानक्तं सर्वदा त्रासीथां रक्षतम् ॥ २ ॥

अथ तृतीया-

आवांरथमवमस्यांव्युष्टौसुम्नायवोवृषणोवर्तयन्तु ।
स्यूमंगभस्तिमृतयुग्भिरश्वैराश्विनावसुमन्तंवहेथाम् ॥ ३ ॥

आ । वाम् । रथम् । अवमस्याम् । विऽउष्टौ । सुम्नऽयवः ।
वृषणः । वर्तयन्तु । स्यूमऽगभस्तिम् । ऋतयुक्ऽभिः ।
अश्वैः । आ । अश्विना । वसुऽमन्तम् । वहेथाम् ॥ ३ ॥

अवमस्यां आसन्नायां व्युष्टौ व्युच्छने उषसि वां युवयोः रथं सुम्नायवः सुखेन योजयन्तोश्वाः वृषणोवर्षका युवां आवर्तयन्तु स्यूमगभस्तिं सुखरश्मिं स्यूतरश्मिं वसुमन्तं प्रदेयधनयुक्तं रथं हे अश्विनाश्विनौ ऋतयुग्भिः उदकयुक्तैरश्वैः उदकप्रदैरश्वैः आवहेथाम् ॥ ३ ॥

अथ चतुर्थी-

योवांरथोनृपतीअस्तिवोळ्हात्रिवन्धुरोवसुमाँउस्रयामा ।
आनएनानासत्योपयातमभियद्वांविश्वप्स्न्योजिगाति ॥ ४ ॥

यः । वाम् । रथः । नृपती इति नृऽपती । अस्ति । वोळ्हा ।
त्रिऽवन्धुरः । वसुंऽमान् । उस्रऽयामा । आ । नः । एना । नासत्या ।
उप । यातम् । अभि । यत् । वाम् । विश्वऽप्स्न्यः । जिगांति ॥ ४ ॥

हे नृपती नृणां यजमानानां पालकौ अश्विनौ वां युवयोर्योरथः वोह्ला युवयोर्वाहकोस्ति सर्वदा सन्निहितोवर्तते कीदृशोसौ त्रिवन्धुरः सारथ्यधिष्ठानस्थानत्रयोपेतः वसुमान् धनवान् उस्रयामा उस्रं दिवसं प्रतिगन्ता एना एनेन रथेन हे नासत्या अश्विनौ नोस्मानुपायातम् यद्रथोयश्चरथोवां विश्वप्स्न्योव्याप्तरूपोभिजिगाति अभिगच्छति अथवा ययस्माद्विश्वप्स्न्योवसिष्ठोवां जिगाति स्तौति अतउपायातम् ॥ ४ ॥

अथ पंचमी—

युवंच्यवानंजरसोमुमुक्तंनिपेदवंऊहथुराशुमश्वम् ।
निरंहसस्तमसस्पर्तमत्रिंनिजाहुषंशिथिरेधातमन्तः ॥ ५ ॥

युवम् । च्यवानम् । जरसः । अमुमुक्तम् । नि । पेदवे । ऊहथुः ।
आशुम् । अश्वम् । निः । अंहसः । तमसः । स्पर्तम् । अत्रिम् ।
नि । जाहुषम् । शिथिरे । धातम् । अन्तरिति ॥ ५ ॥

हे अश्विनौ युवं युवां च्यवानं जरसोजीर्णाद्रूपात् अमुमुक्तम् अमुञ्चतम् युवंच्यवानमश्विनाजरन्तंपुनर्युवानमित्यन्यत्र । तथा पेदवे एतन्नामकाय राज्ञे आशुं शीघ्रगामिनमश्वं निरूहथुः न्यवहतं युद्धे। युवंश्वेतंपेदवइर्विनिगमः।तथा अत्रिं महर्षिं अंहसः ऋबीसादग्नेः सकाशात्तमसश्च गुहान्तस्थिताच्च सकाशान्निष्पर्तं न्यपारयतम् । युवमत्रीसमुततमत्रयओमन्वन्तं चक्रथुरितिनिगमः। तथा जाहुषं शिथिरे शिथिले भ्रष्टे स्वराष्ट्रेन्तर्मध्ये पुनर्निधातं न्यधातम् परिविष्टं जाहुषंविश्वतःसीमितिह्युक्तम् ॥ ५ ॥

१ ऋ० सं० १.८.१५.। २ ऋ० सं० १. ८. १९।
३ ऋ० सं० ७. ८. १६.। ४ ऋ० सं० १.८. ११.।

अथ षष्ठी– .

इयंमनीषाइयमंश्विनागीरिमांसुंवृक्तिंवृंषणाजुषेथाम्।
इमाब्रह्माणियुवयून्यंग्मन्यूयंपांतस्वस्तिभिःसदानः ॥ ६ ॥१८॥

इयम् । मनीषा । इयम् । अश्विना । गीः । इमाम् । सुऽवृक्तिम् ।
वृषणा । जुषेथाम् । इमा । ब्रह्माणि । युवऽयूनि ।
अग्मन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ १८ ॥

इयंमनीषेति षष्ठी गता ॥ ६ ॥

॥ इति पञ्चमस्य पञ्चमेष्टादशोवर्गः ॥ १८ ॥

आगोमतेति पञ्चर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनं अनुक्रम्यतेच–आगोमतापञ्चेति । विनियोगः प्रातरनुवाकाश्विनशस्त्रयोरुक्तः । आश्विनेपशावाश्विनस्तोयाज्यानुवाक्याः । सूत्रितञ्च–आगोमतानासत्यारथेनेतिचतस्रइति ।

तत्र प्रथमा–

आगोमंतानासत्यारथेनाश्वांवतापुरुश्चन्द्रेणंयातम् ।
अभिवांविश्वांनियुतंःसचन्तेस्पार्हयांश्रियातन्वांशुभाना ॥ १ ॥

आ । गोऽमंता । नासत्या । रथेन । अश्वंऽवता । पुरुऽचन्द्रेणं ।
यातम् । अभि । वाम् । विश्वाः । निऽयुतः । सचन्ते ।
स्पार्हया । श्रिया । तन्वा । शुभाना ॥ १ ॥

हे नासत्या अश्विनौ गोमता गोयुक्तेन अश्वावता अश्वयुक्तेन अश्वैर्वृषभैश्चोढेनेत्यर्थः यद्वा गोमता गोप्रदेन पुरुश्चन्द्रेण बहुधनेन धनप्रदेनेत्यर्थः तादृशेन रथेन आयातं आगच्छतं वां विश्वा बह्वयोनियुतः स्तुतयः अभिसचन्ते सेवन्तेऽस्मत्प्रेरिताः।हे स्पार्हया स्पृहणीयया श्रिया शोभया तन्वा शरीरेणच शुभाना दीप्यमानौ युवाम ॥ १ ॥

अथ द्वितीया–

आनोदेवेभिरुपयातमर्वाक्सजोषसानासत्यारथेन ।
युवोर्हिनःसख्यापित्र्याणिसमानोवन्धुरुततस्यवित्तम् ॥ २ ॥

आ । नः । देवेभिः । उप । यातम् । अर्वाक् । सऽजोषसा ।
नासत्या । रथेन । युवोः । हि । नः । सख्या । पित्र्याणि ।
समानः । बन्धुः । उत । तस्य । वित्तम् ॥ २ ॥

हे नासत्या अश्विनौ युवां देवेभिरितरैर्देवैः सह सजोषसा समानप्रीतौ परस्परं सन्तौ नोस्माकमर्वागभिमुखं रथेन उपसमीपे आयातं आगच्छतम् । आगमने बन्धुत्वातिशयमाह युवोर्हि युवयोः खलु नोस्माकञ्च सख्या सख्यानि पित्र्याणि पितृतःप्राप्तानि नेदानीं स्तुत्याद्युपाधिना प्राप्तानि भवन्तीत्यर्थः तदेवाह उतापिच युवयोर्ममच बन्धुः बन्धकः पितामहः समानः एकएव तस्य वित्तं तस्येति कर्मणिषष्ठी तं बन्धुं तद्बन्धुत्वं वा वित्तं जानीतम्। विवस्वान् वरुणश्चोभावपि कश्यपावदितेर्जातौ विवस्वानश्विनोर्जनकः वरुणोवसिष्ठस्येतीत्येवं समानबन्धुत्वं तथाच बृहद्देवतायामुक्तम्– अभवन्मिथुनंत्वष्टुःसरण्यूस्त्रिशिराः सह । सवैसरण्युंप्रायच्छत्स्वयमेवविवस्वते ॥ १ ॥ ततःसरण्व्यांजातेतेयमयम्यौविवस्वतः । तावप्युभौयमावेवत्यास्तां यम्याचवैयमः ॥ २ ॥ सृष्ट्वाभर्तुःपरोक्षंतुसरण्यूःसदृशींस्त्रियम् । निक्षिप्यमिथुनंतस्यामश्वाभूत्वाप्रचक्रमे ॥ ३ ॥ अविज्ञानाद्विवस्वांस्तुतस्यामजनयन्मनुम् । राजर्षिरासीत्समनुर्विवस्वानिवतेजसा ॥ ४॥ सविज्ञायअपक्रान्तांसरण्यूमात्मरूपिणीम् । त्वाष्ट्रींप्रतिजगामाशुवाजीभूत्वासलक्षणः ॥ ५ ॥ सरण्यूस्तुविवस्वन्तंविज्ञायहयरूपिणम् । मैथुनायोपचक्रामतांश्चतत्रारुरोहसः ॥ ६ ॥ ततस्तयोस्तुवेगेनशुक्रंतदपतद्भुवि । उपाजिघ्रच्चसात्वश्वातंशुक्रंगर्भकाम्यया ॥ ७ ॥ आघ्राणमात्राच्छुक्रंतत्कुमारौसंबभूवतुः । नासत्यश्चैवदस्रश्चयौस्तुतावश्विनावपीति ॥ २ ॥

अथ तृतीया–

उदुस्तोमासोअश्विनोरबुध्रञ्जामिब्रह्माण्युषसश्चदेवीः ।
आविवासन्रोदसीधिष्ण्येमेअच्छाविप्रोनासत्याविवक्ति ॥ ३ ॥

उत् । ऊँ इति॑ । स्तोमा॑सः । अ॒श्विनौ॑ः । अ॒बु॒ध्र॒न् । जा॒मि ।
ब्रह्मा॑णि । उ॒षसः॑ । च॒ । दे॒वीः । आ॒ऽवि॒वास॑न् । रोद॑सी॒ इति॑ ।
धि॒ष्ण्ये॒ इति॑ । इ॒मे इति॑ । अच्छ॑ । विप्रः॑ । नास॑त्या । वि॒व॒क्ति॒ ॥३॥

स्तोमासः स्तोमाः स्तवाः अश्विना अश्विनौ उदु अबुध्रन् उत्कृष्टं बोधयन्ति उइति पूरणः जामि बन्धुनामैतत् बन्धुस्थानीयानि ब्रह्माणि परिवृढानि कर्माणि देवीर्द्योतमानाउषसश्चकारादश्विनौच अबुध्रन् विप्रोमेधावी वसिष्ठः इमे रोदसी द्यावापृथिव्यौ धिष्ण्ये धिषणार्हे स्तुत्ये आविवासन् परिचरन् नासत्या अश्विनौ अच्छ अभिमुखं विवक्ति स्तौति ॥३॥

अथ चतुर्थी–

विचेदु॒च्छन्त्य॑श्विनाउ॒षासः॒प्रवां॒ब्रह्मा॑णिका॒रवो॑भरन्ते ।
ऊ॒र्ध्वंभा॒नुंस॑वि॒तादे॒वोअ॑श्रेद्बृ॒हद॒ग्नयः॑स॒मिधा॑जरन्ते ॥ ४ ॥

वि । च॒ । इत् । उ॒च्छन्ति॑ । अ॒श्वि॒नौ॒ । उ॒षसः॑ । प्र । वा॒म् ।
ब्रह्मा॑णि । का॒रवः॑ । भ॒र॒न्ते॒ । ऊ॒र्ध्वम् । भा॒नुम् । स॒वि॒ता ।
दे॒वः । अ॒श्रे॒त् । बृ॒हत् । अ॒ग्नयः॑ । स॒म्ऽइधा॑ । ज॒र॒न्ते॒ ॥ ४ ॥

हे अश्विनौ उषासः उषसः व्युच्छन्ति चेत् तमांसि विवासयन्ति चेदितिपूरणश्चार्थेवा सच वक्ष्यमाणसूर्यापेक्षकः चेद्योगादनिघातः। अतोवां युवयोः स्तुतिसमयत्वाद्ब्रह्माणि स्तोत्राणि कारवः स्तोतारः प्रभरन्ते प्रकर्षेण संपादयन्ति ऊर्ध्वमश्रेत् आश्रयति भानुं तेजः सविता देवः अग्नयोपि समिधा समिन्धनेन बृहत् अतिमहत् जरन्ते स्तूयन्ते ॥ ४ ॥

आपश्चातादिति पञ्चमी आश्विने पशौ वपायाअनुवाक्या सूत्रितश्च–आपश्चतान्नासत्यापुरस्तादागोमतानासत्यारथेनेति । तत्पाठस्तु–

अथ पंचमी–

आप॒श्चाता॑न्नास॒त्यापु॒रस्ता॒दाश्वि॑नायातमध॒राद्दुद॑क्तात् ।
आवि॒श्वतः॒पाञ्च॑जन्येनरा॒यायू॒यंपा॑तस्व॒स्तिभिः॒सदा॑नः ॥५॥१९॥

आ । पश्चातात् । नासत्या । आ । पुरस्तात् । आ । अश्विना ।
यातम् । अधरात् । उदक्तात् । आ । विश्वतः । पाञ्चऽजन्येन ।
राया । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ १९ ॥

हे नासत्या अश्विनौ पश्चातात् पश्चाद्देशात् आयातम् तथा पुरस्तात्पूर्वस्माद्देशात् तथा अधरादधस्तनाद्देशात् दक्षिणतः उदक्तादुदग्देशात् सर्वत्रायातमिति संबन्धः किंबहुना विश्वतः सर्वस्माद्देशात्पाञ्चजन्येन पञ्चजनहितेन राया धनेन सहायातम् निषादपञ्चमाश्चत्वारोवर्णाः पञ्चजनाः शिष्टं स्पष्टम् ॥ ५ ॥

॥ इति पंचमस्य पञ्चमे एकोनविंशोवर्गः ॥ १९ ॥

अतारिष्मेति पञ्चर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम् अतारिष्मेत्यनुक्रमणिका प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्र प्रथमा—

अतारिष्मतमसस्पारमस्यप्रतिस्तोमंदेवयन्तोदधानाः ।
पुरुदंसापुरुतमापुराजामर्त्याहवतेअश्विनागीः ॥ १ ॥

अतारिष्म । तमसः । पारम् । अस्य । प्रति । स्तोमम् ।
देवऽयन्तः । दधानाः । पुरुऽदंसा । पुरुऽतमा । पुराऽजा ।
अमर्त्या । हवते । अश्विना । गीः ॥ १ ॥

अस्य तमसोऽज्ञानस्य तत्कार्यस्य जननमरणवतः संसारदुःखस्य अथवा प्रकृतत्वात् प्रयोगविषयाज्ञानस्य पारं अतारिष्म तीर्णाः स्म । किं कुर्वन्तः देवयन्तो देवकामाः स्तोमं स्तुतिं प्रतिदधानाः देवेषु कुर्वाणाः पुरुदंसा बहुकर्माणौ पुरुतमा प्रभूततमौ पुराजा पूर्वजातौ अतएवामर्त्या अमरणधर्माणावश्विनाश्विनौ गीर्गरिता स्तोता वसिष्ठोहवते स्तौति आह्वयति वा ॥ १॥

अथ द्वितीया—

न्यु॑प्रियोमनु॑षःसादिहोतानासत्यायोयजतेवन्दतेच ।
अश्नीतंमध्वोअश्विनाउपाकआवांवोचेविदथेषुप्रयस्वान् ॥ २ ॥

नि । ऊँ इति । प्रियः । मनुषः । सादि । होता । नासत्या ।
यः । यजते । वन्दते । च । अश्नीतम् । मध्वः । अश्विनौ ।
उपाके । आ । वाम् । वोचे । विदथेषु । प्रयस्वान् ॥ २ ॥

प्रियोयुवयोः प्रियभूतोमनुषोमानुषः मनुषः सकाशाज्जातोवा होता देवानामाह्वाता स्तोतायं निषादि न्यसादि निषण्णोभवति युवयोः कर्मणिवर्ततइत्यर्थः हे नासत्याश्विनौ योयजते यागंकरोति वन्दते स्तौति च तस्य संबन्धिनं मध्वोमधुरं सोमरसं हे अश्विनाश्विनौ उपाकेन्तिकएव समीपेस्थितवैवाश्नीतं पिबतमित्यर्थः विदथेषु यज्ञेषु वां युवां प्रयस्वान् अन्नवान्सन् आवोचे आह्वये । उपूरणः ॥ २ ॥

अथ तृतीया—

अहेमयज्ञंपथामुराणाइमांसुवृक्तिंवृषणाजुषेथाम् ।
श्रुष्टीवेवप्रेषितोवामबोधिप्रतिस्तोमैर्जरमाणोवसिष्ठः ॥ ३ ॥

अहेम । यज्ञम् । पथाम् । उराणाः । इमाम् । सुऽवृक्तिम् ।
वृषणा । जुषेथाम् । श्रुष्टीवाऽइव । प्रऽइषितः । वाम् ।
अबोधि । प्रति । स्तोमैः । जरमाणः । वसिष्ठः ॥ ३ ॥

उराणा उरुस्तोत्रंकुर्वाणाः स्तोतारोवयं पथां पततां आगच्छताम् देवानामर्थाय यज्ञं यागं तत्साधनं हविर्वा अहेम वर्धयेम हे वृषणा वर्षकौ कामानां इमां सुवृक्तिं शोभनस्तुतिं जुषेथां सेवेथाम् वां युवां श्रुष्टीवेव श्रुष्टीति क्षिप्रनाम क्षिप्रगन्ता दूतइव प्रेषितोहं अबोधि बोधयति शीघ्रं मन्तव्यमिति । किं कुर्वन् स्तोमैः स्तोत्रैः प्रतिजरमाणः प्रतिस्तुवन् कः वसिष्ठोहं अबोधीति ॥ ३ ॥

अथ चतुर्थी—

उपत्यावह्नीगमतोविशंनोरक्षोहणासंभृतावीळुपाणी ।
समन्धांस्यग्मतमत्सराणिमानोमर्धिष्टमागतंशिवेन ॥ ४ ॥

उप॑ । त्या । वह्नी इति॑ । गमतः । विश॑म् । नः । रक्षःऽहना॑ । सम्ऽभृ॑ता ।
वीळुपा॑णी इति॑ वीळुऽपा॑णी । सम् । अन्धां॑सि । अग्मत ।
म॒त्स॒रा॑णि । मा । नः । म॒र्धि॒ष्ट॒म् । आ । ग॒त॒म् । शि॒वेन॑ ॥ ४ ॥

त्या त्यौ तौ वह्नी हविषांवोढारौ नोस्माकं विशं प्रजां ऋत्विजं उपगमतः उपगच्छतां की-
दृशौ तौ रक्षोहणा रक्षसां हन्तारौ संभृता सम्यग्भृतौ पुष्टांगौ वीळुपाणी दृढपाणी यद्वायमर्ध-
चोंश्वपरतयाव्याख्येयः तथा सति तौ रथस्यवोढारौ दृढपादौ अश्विनोरश्वौ उपगच्छतामिति
तस्यार्थः । अन्धांस्यन्नानि मत्सराणि मदकराणि सोमाः समग्मत सुमगच्छन्त युवां नोस्मान्
मामर्धिष्टं माहिंस्तं किंतु शिवेन मङ्गलेन धनेन सार्धमागतमागच्छतम् ॥ ४ ॥

अथ पंचमी–

आप॒श्चाता॑न्नासत्या॒पुर॒स्ता॒दाश्वि॑ना॒यात॑मध॒राद॒ुद॑क्तात् ।
आवि॒श्वतः॒पाञ्च॑जन्येनरा॒याय॒ूयंपा॑तस्व॒स्तिभिः॒सदा॑नः ॥५॥२०॥

आ । पश्चाता॑त् । नास॑त्या । आ । पुरस्ता॑त् । आ । अश्वि॑ना ।
या॒त॒म् । अ॒ध॒रात् । उद॑क्तात् । आ । वि॒श्वतः॑ । पाञ्च॑ऽजन्येन ।
रा॒या । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः ॥ ५ ॥ २० ॥

आपश्चा दिति पञ्चम्याविनियोगोव्याख्यातचरः ॥ ५ ॥

॥ इति पंचमस्य पञ्चमे विंशो वर्गः ॥ २० ॥

इमाउवामिति षळृचं चतुर्थं सूक्तमाश्विनं वसिष्ठस्यार्षं आद्यातृतीयापञ्चम्योबृहत्यः
शिष्टाः सतोबृहत्यः तथाचानुक्रान्तम्–इमाउवां षट्प्रागाथमिति । प्रातरनुवाके आश्विनेक्रतौ
बार्हतेछन्दस्याश्विनशस्त्रेच सूक्तम् सूत्रितञ्च–इमाउवामयंवामिति । दशरात्रे पञ्चमेहनि प्रउग-
शस्त्रे इमाउवामित्ययमाश्विनस्तृचः सूत्रितञ्च–इमाउवांदिविष्टयःपिबासुतस्यरसिनइति ।

तत्र प्रथमा–

इ॒माउ॑वां॒दिवि॑ष्टय॒उ॒स्राह॑वन्ते॒अश्वि॑ना ।
अ॒यंवा॑म॒ह्वेव॑से॒शची॑वसू॒विशं॑विशं॒हिगच्छ॑थः ॥ १ ॥

इमाः । ॐ इति । वाम् । दिविष्टयः । उस्रा । हवन्ते । अश्विना ।
अयम् । वाम् । अह्वे । अवसे । शचीवसू इति शचीऽवसू ।
विशम्ऽविशम् । हि । गच्छथः ॥ १ ॥

इमा दिविष्टयोदिवमिच्छन्त्यः प्रजा ऋत्विजोपि उदस्विचार्थे हे अश्विना उस्रा वासकौ वां हवन्ते आह्वयन्ति अयं वसिष्ठोपि हे शचीवसू कर्मधनौ वां युवां अवसेस्मद्रक्षणाय युवयोस्तर्पणायवा अह्वे आह्वयामि किमर्थमेवं प्रजाअप्यहमपीत्यादरोक्तिरिति तत्राह हि यस्मात् कारणात् युवां विशंविशं प्रजांप्रजां प्रति गच्छथः ॥ १ ॥

अथ द्वितीया–

युवंचित्रंददथुर्भोजनंनराचोदेथांसूनृतावते ।
अर्वाग्रथंसमनसानियच्छतंपिबतंसोम्यंमधु ॥ २ ॥

युवम् । चित्रम् । ददथुः । भोजनम् । नरा । चोदेथाम् ।
सूनृताऽवते । अर्वाक् । रथम् । सऽमनसा । नि ।
यच्छतम् । पिबतम् । सोम्यम् । मधु ॥ २ ॥

हे नरा अश्विनौ युवं युवां चित्रं चायनीयं भोजनं धनं दधथुः धारयेथे तद्धनं सूनृतावते स्तुतिवते स्तोत्रे चोदेथां प्रेरयतं तदर्थं समनसा समानमनस्कौ सन्तौ रथं युवयोः संबन्धिनं अर्वागस्मदभिमुखं नियच्छतं नियमतम् । तथा कृत्वा सोम्यं सोमसंबन्धिनं मधु मधुररसं पिबतम् ॥ २ ॥

अथ तृतीया–

आयातमुपभूषतंमध्वःपिबतमश्विना ।
दुग्धंपयोवृषणाजेन्यावसूमानोमर्धिष्टमागतम् ॥ ३ ॥

आ । यातम् । उप । भूषतम् । मध्वः । पिबतम् । अश्विना ।
दुग्धम् । पयः । वृषणा । जेन्यावसू इति । मा ।
नः । मर्धिष्टम् । आ । गतम् ॥ ३ ॥

हे अश्विना युवां आयातमागच्छतं आगत्य चोपसमीपे भूपतं भवतं मध्वः मधुरं सोमरसं पिबतं पीत्वाच हे वृषणा वर्षकौ हे जेन्यावसू जेतव्यधनौ जितधनावित्यर्थः युवां पयोवृष्टयुदकं अन्तरिक्षाद् दुग्धं नोस्मान् मामर्धिष्टं माहिंस्तं ईदृशमार्थनाकरणमेवाहिंसा आगतमागच्छतं शीघ्रम् ॥ ३ ॥

अथ चतुर्थी–

अश्वा॑सो॒ये॒वा॒मु॒प॑दा॒शुषो॑गृ॒हंयु॒वांदीय॑न्ति॒बिभ्र॑तः ।
म॒क्षू॒यु॒भि॒र्न॑रा॒हये॑भिरश्वि॒नादे॑वा॒या॒त॒म॒स्म॒यू ॥ ४ ॥

अश्वा॑सः । ये । वा॒म् । उप॑ । दा॒शुषः॑ । गृ॒हम् । यु॒वाम् । दीय॑न्ति ।
बिभ्र॑तः । म॒क्षु॒यु॒ऽभिः॑ । न॒रा॒ । हये॑भिः । अ॒श्वि॒ना॒ । आ ।
दे॒वा॒ । या॒त॒म् । अ॒स्म॒यू इत्य॑स्म॒ऽयू ॥ ४ ॥

ये अश्वासोश्वाः वां युवयोः स्वभूता दाशुषोहविर्दातुर्गृहं युवां बिभ्रतोधारयन्तोदीयन्ति गमयन्तीत्यर्थः मक्षूयुभिः शीघ्रगन्तृभिर्हयेभिः हयैरश्वैः हे नरा नेतारौ अश्विना अश्विनौ देवा देवौ अस्मयू अस्मान्कामयमानौ आयातं अस्मयज्ञमागच्छतम् ॥ ४ ॥

अथ पंचमी–

अधा॑ह॒यन्तो॑अ॒श्विना॒पृक्षः॑सचन्त॒सूर॑यः ।
ता॒यं॑स॒तो॒म॒घव॑द्भ्यो॒ध्रु॒वंयशः॑छ॒र्दिर॒स्मभ्यं॒नास॑त्या ॥ ५ ॥

अध॑ । ह॒ । यन्तः॑ । अ॒श्विना॑ । पृक्षः॑ । स॒च॒न्त॒ । सूर॑यः ।
ता । यं॒स॒तः॒ । म॒घव॑त्ऽभ्यः । ध्रु॒वम् । यशः॑ ।
छ॒र्दिः । अ॒स्मभ्य॑म् । नास॑त्या ॥ ५ ॥

अधाह अपिच अश्विना अश्विनौ यन्तः स्तुतिभिर्गच्छन्तोयजमानाः सूरयोमेधाविनः स्तोतारं पृक्षोन्नं प्रभूतं सचन्त सेवन्ते संयन्तिवा ता तौ युवां मघवद्भ्योन्नवद्भ्योस्मभ्यं ध्रुवं अविचलितं यशोन्नं यशएववा छर्दिर्गृहं यंसतः प्रयच्छतम् हे नासत्याश्विनौ ॥ ५ ॥

अथ षष्ठी–

प्रयेययुरवृकासोरथाइवनृपातारोजनानाम् ।
उतस्वेनशवसाशूशुवुर्नरउतक्षियन्तिसुक्षितिम् ॥६॥२१॥

प्र । ये । ययुः । अवृकासः । रथाःऽइव । नृऽपातारः ।
जनानाम् । उत । स्वेन । शवसा । शूशुवुः । नरः । उत ।
क्षियन्ति । सुऽक्षितिम् ॥ ६ ॥ २१ ॥

ये यजमानाः अवृकासः परकीयधनस्यानादातारः जनानां मनुष्याणां मध्ये नृपातारः ऋत्विग्रूपाणां नृणां रक्षितारः सन्तोप्रययुः युवां प्राप्नुवन्ति हविर्भिः। प्राप्तौ दृष्टान्तः–रथाइव व्रीह्यादिपूर्णा रथायथा प्राप्नुवन्ति स्वामिगृहं । उतेत्ययमुत्तरवाक्यापेक्षः अपिच ते नरोयजमानाः स्वेन शवसा स्वीयेन बलेन शूशुवुः वर्धन्ते उतापिच सुक्षितिं सुनिवासं क्षियन्ति गच्छन्ति प्राप्नुवन्ति ॥ ६ ॥

॥ इति पंचमस्य पञ्चमे एकविंशोवर्गः ॥ २१ ॥

व्युषाआवइत्यष्टर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षम् अत्रानुक्रमणिका व्युषाअष्टाउपस्यंतुवाइति तुवाइत्युक्तत्वात्तुत्यादिपरिभाषयेदमादीनि सप्तसूक्तान्युषोदेवत्यानि प्रातरनुवाके उषस्येक्रतौ त्रैष्टुभेछन्दसि आश्विनशस्त्रे चेदमादीनिषट्सूक्तानि तथाचसूत्र्यते–व्युषाआवोदिविजाइतिषडिति त्रैष्टुभमिति ।ऋग्विधाने आख्यातोविनियोगोत्रलिख्यते–रात्र्याअपरकालेयउत्थायप्रयतःशुचिः । व्युषाइत्युपतिष्ठेतषड्भिःसूक्तैःकृताञ्जलिः ॥ १ ॥ प्राप्नुयात्सहिरण्यानिनानारूपंधनंबहु । गावोश्वान्पुरुषान्धान्यंस्त्रियोवासांस्यजाविकमिति ॥ २ ॥

तत्र प्रथमा–

व्यु१षाआवोदिविजाऋतेनाविष्कृण्वानामहिमानमागात् ।
अपद्रुहस्तमआवरजुष्टमङ्गिरस्तमापथ्याअजीगः ॥ १ ॥

वि । उषाः । आवः । दिविऽजाः । ऋतेन । आविःऽकृण्वाना ।
महिमानम् । आ । अगात् । अप । द्रुहः । तमः । आवः ।
अजुष्टम् । अङ्गिरःऽतमा । पथ्याः । अजीगरिति ॥ १ ॥

इयमुषाः दिविजाः दिव्यन्तरिक्षे प्रादुर्भूतासती व्यावः व्यौच्छत् विभानं कृतवतीत्यर्थः वसिर्निवासवाची अत्र विपूर्वोव्युच्छनेभवेत् छन्दस्यपिदृश्यतइत्याट् दृशिग्रहणस्य विध्यन्तरोपसंग्रहणार्थत्वादनजादेरप्याडागमः हल्ङ्याब्भ्यइतिलोपः सैवोषाः ऋतेन तेजसा महिमानं स्वमहत्त्वमाविष्कृण्वाना आगात् आगतवती आगत्यच द्रुहोस्मद्द्रोग्धॄन् अजुष्टं सर्वेषामप्रियं तमश्चअपावः अपवृणोति किञ्च अङ्गिरस्तमा अङ्गेर्गत्यर्थादङ्गिराः गन्तृतमाः पथ्याः पदवीरजीगः उद्गिरति प्राणिनांव्यवहाराय प्रकाशयतीत्यर्थः ॥ १ ॥

अथ द्वितीया—

म॒हे नो॑ अ॒द्य सु॑वि॒ताय॑ बोध्युषो॑ म॒हे सौभ॑गाय॒ प्रय॑न्धि ।
चि॒त्रं र॒यिं य॒शसं॑ धेह्य॒स्मे देवि॒ मर्ते॑षु मानुषि श्रव॒स्युम् ॥ २ ॥

म॒हे । न॒ः । अ॒द्य । सु॒वि॒ताय॑ । बो॒धि॒ । उषः॑ । म॒हे ।
सौऽभ॑गाय । प्र । य॒न्धि॒ । चि॒त्रम् । र॒यिम् । य॒शस॑म् । धे॒हि॒ । अ॒स्मे इति॑ । देवि॑ । मर्ते॑षु । मा॒नु॒षि॒ । श्र॒व॒स्युम् ॥ २ ॥

अद्य नोस्माकं महे महते सुविताय सुखप्राप्तये सुखगमनायवा बोधि भव । किञ्च हे उषः महे महते सौभगाय सौभाग्याय प्रयन्धि प्रयच्छ अस्मान् । किंच चित्रं चायनीयं यशसं यशोयुक्तं रयिं धनं धेहि धारय । अस्मे अस्मासु हे मानुषि मनुष्यहिते देवि मर्तेष्वस्मासु श्रवस्युं अन्नवन्तं पुत्रं धेहीत्यनुषङ्गः ॥ २ ॥

अथ तृतीया—

ए॒ते त्ये भा॒नवो॑ दर्श॒ताया॑श्चि॒त्रा उ॒षसो॑ अ॒मृता॑स॒ आगुः॑ ।
ज॒नय॑न्तो॒ दैव्या॑नि व्र॒तान्या॑पृ॒णन्तो॑ अ॒न्तरि॑क्षा॒ व्य॑स्थुः ॥ ३ ॥

ए॒ते । त्ये । भा॒नवः॑ । द॒र्श॒तायाः॑ । चि॒त्राः । उ॒षसः॑ ।
अ॒मृता॑सः । आ । अ॒गुः॒ । ज॒नय॑न्तः । दैव्या॑नि । व्र॒तानि॑ ।
आ॒ऽपृ॒णन्तः॑ । अ॒न्तरि॑क्षा । वि । अ॒स्थुः॒ ॥ ३ ॥

दर्शतायाः दर्शनीयायाः प्रकाशयुक्तायाउषसः एते पुरोदृश्यमानाः त्ये ते प्रसिद्धाश्चित्राः पूज्याआश्चर्यभूतावा अमृतासःअमरणा अनश्वरा भानवोरश्मयः आ अगुः आगच्छन्ति । किं कुर्वन्तः दैव्यानि देवानां संबन्धीनि व्रतानि कर्माणि जनयन्तः उत्पादयन्तः तदनुकूलप्रकाश-प्रदानात्तदुत्पादकत्वमेषां अन्तरिक्षाअन्तरिक्षाणि आपृणन्त आपूरयन्तः एकस्यैवान्तरिक्षस्य वायुमेघपक्षिणामालंबनोपाधिना त्रिविधत्वं अतोबहुवचनमुपपन्नं एवं कुर्वन्तोभानवोव्यस्थुः विविधं तिष्ठंति प्रसरंति ॥ ३ ॥

अथ चतुर्थी—

एषास्यायुजानापराकात्पंचक्षितीःपरिसद्योजिगाति ।
अभिपश्यन्तीवयुनाजनानांदिवोदुहिताभुवनस्यपत्नी ॥ ४ ॥

एषा । स्या । युजाना । पराकात् । पंच । क्षितीः । परि ।
सद्यः । जिगाति । अभिऽपश्यन्ती । वयुना । जनानाम् ।
दिवः । दुहिता । भुवनस्य । पत्नी ॥ ४ ॥

एषा स्या सोषाः पराकात् दूरदेशात् दूरे स्थितापि युजाना उद्योगं कुर्वाणा प्रकाशाय पञ्चक्षितीः निषादपञ्चमाश्चत्वारोवर्णाः सद्यः परिजिगाति परिगच्छति किंकुर्वती जनानां प्राणिनां वयुना प्रज्ञानानि अभिपश्यन्ती साक्षित्वेनावलोकयन्ती कीदृशी सादिवोदुहिता दुहितृस्थानीया भुवनस्य भूतजातस्य पत्नी पालयित्री परिजिगातीत्यन्वयः ॥ ४ ॥

अथ पंचमी—

वाजिनीवतीसूर्यस्ययोषाचित्रामघारायईशेवसूनाम् ।
ऋषिष्टुताजरयन्तीमघोन्युषाउच्छतिवह्निभिर्गृणाना ॥ ५ ॥

वाजिनीऽवती । सूर्यस्य । योषा । चित्रऽमघा । रायः ।
ईशे । वसूनाम् । ऋषिऽस्तुता । जरयन्ती । मघोनी ।
उषाः । उच्छति । वह्निऽभिः । गृणाना ॥ ५ ॥

वाजिनीवती बह्वन्ना यद्यप्युषोनामैतत् तथापि चित्रामघेत्यस्यापि उषोनामकस्य पृथग्विद्यमानत्वादत्रैकोयोगरूढोवगन्तव्यः। सूर्यस्य योषा योषित् चित्रामघा विचित्रधना विचित्ररश्म्याख्यधनावा रायोधनस्य अविशिष्टस्य तस्य वसूनां देवमनुष्यादिसर्वाश्रयाणां धनानां चेशे ईष्टे अथवा वसवोवासका रश्मयः तेषामपीष्टे। ऋषिष्टुता ऋषिभिः स्तुता जरयन्ती प्राणिजातानि उषाः खलु पुनः पुनरावर्तमाना प्राणिनामायुः क्षपयति। मघोनी धनवती उषाः वह्निभिः कर्मवोढृभिः यजमानैर्गृणाना स्तूयमाना उच्छति विभानं करोति ॥ ५॥

अथ षष्ठी–

प्रतिद्युतानामरुषासोअश्वाश्चित्राअदृश्रन्नुषसंवहन्तः।
यातिशुभ्राविश्वपिशारथेनदधातिरत्नंविधतेजनाय ॥ ६ ॥

प्रति। द्युतानाम्। अरुषासः। अश्वाः। चित्राः।
अदृश्रन्। उपसम्। वहन्तः। याति। शुभ्रा। विश्वऽपिशा।
रथेन। दधाति। रत्नम्। विधते। जनाय ॥ ६ ॥

द्युतानां द्योतमानामुषसं वहन्तोधारयन्तः अरुषासः आरोचमानाश्चित्राश्चायनीयाअश्वाः प्रत्यदृश्रन् प्रतिदृश्यन्ते सा चोषाः शुभ्रादीप्यमाना विश्वपिशा बहुरूपेण रथेन याति सर्वत्रगच्छति। विधते परिचरते जनाय रत्नं रमणीयं धनं दधाति ददाति च ॥ ६ ॥

अथ सप्तमी–

सत्यासत्येभिर्महतीमहद्भिर्देवीदेवेभिर्यजतायजत्रैः।
रुजद्दृळ्हानिदददुस्रियाणांप्रतिगावउषसंवावशन्त ॥ ७ ॥

सत्या। सत्येभिः। महती। महत्ऽभिः। देवी। देवेभिः।
यजता। यजत्रैः। रुजत्। दृळ्हानि। ददत्। उस्रियाणाम्।
प्रति। गावः। उपसम्। वावशन्त ॥ ७ ॥

सत्या अन्यैरबाध्या महती पूजनीया प्रवृद्धा वा गुणैः। देवी द्योतमाना यजता यजनीयोषाः सत्येभिः सत्यैर्महद्भिर्देवेभिर्देवैर्यजत्रैरुक्तलक्षणैः किरणैर्निपातभाग्भिरन्यैः देवैर्वा सहिता

सती दृह्णान्यत्यन्तं स्थिराणि तमांसि रुजव भिनत्ति उस्रियाणां गोनामैतत् उस्राविणआसां भोगाइति तद्व्युत्पत्तिः तासां सञ्चाराय ददव् ददाति सामर्थ्याव् प्रकाशमित्यर्थः अथवा उस्रियागाः ददव् ददाति स्तोतृभ्यः। किञ्च गावः उपलक्षणमेतत् सर्वेपि तमोवरुद्धाः प्राणिनउपसं प्रति वावशन्त उशन्ति कामयन्ते विशेषेण गवां प्रभावे सञ्चारार्थमुपसोपेक्षितत्वात्तासां प्राधान्येनोक्तिः॥ ७॥

अथाष्टमी—

नूनोगोमद्वीरवद्धेहिरत्नमुपोअश्वावत्पुरुभोजोअस्मे।
मानोबर्हिःपुरुपतानिदेकर्यूयंपातस्वस्तिभिःसदानः॥ ८॥२२॥

नु। नः। गोऽमत्। वीरऽवत्। धेहि। रत्नम्। उषः। अश्वऽवत्।
पुरुऽभोजः। अस्मे इति। मा। नः। बर्हिः। पुरुपता। निदे।
कः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ८॥ २२॥

हे उषः नोस्मभ्यं नु क्षिप्रं गोमद्बहुभिर्गोभिर्युक्तं वीरवद्वीरैः पुत्रैरुपेतं अश्ववव् बहुभिरश्वैरुपेतं रत्नं रमणीयं धनं पुरुभोजोबह्वन्नं चास्मे अस्मासु धेहि देहि पादभेदादस्मेइति पुनरभिधानं। नोस्माकं बर्हिर्यज्ञं पुरुपता पुरुपतायां पुरुषसमूहेष्वस्मत्सदृशेष्वित्यर्थः निदे निंदायै माकः माकार्षीः। यथा ते निन्दन्ति तथा मा कुर्वित्यर्थः॥ ८॥

॥ इति पञ्चमस्य पञ्चमे द्वाविंशो वर्गः॥ २२॥

उदुज्योतिरिति सप्तर्चं षष्ठं सूक्तं त्रैष्टुभमुषस्यं तथाचानुक्रान्तम्—उदुसप्तेति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

तत्र प्रथमा—

उदुज्योतिरमृतंविश्वजन्यंविश्वानरःसवितादेवोअश्रेत्।
क्रत्वादेवानामजनिष्टचक्षुराविरकर्भुवनंविश्वमुषाः॥ १॥

उत्। ऊँ इति। ज्योतिः। अमृतम्। विश्वऽजन्यम्। विश्वानरः।
सविता। देवः। अश्रेत्। क्रत्वा। देवानाम्। अजनिष्ट। चक्षुः।
आविः। अकः। भुवनम्। विश्वम्। उषाः॥ १॥

अमृतं अमृतत्वसाधकं अविनाशिवा विश्वजन्यं विश्वेषां जनानां हितकरं ज्योतिः विश्वानरः सर्वेषां नेता सविता देवः उदश्रेत् ऊर्ध्वं श्रयति उद्गतिपूरणः देवानां व्यवहर्तॄणां स्तोतॄणां वा यजमानानां क्रत्वा कर्मणा निमित्तेन यागानुष्ठानार्थमित्यर्थः। तदर्थं यद्वा देवानां चक्षुश्चक्षुःस्थानीयमौषसं तेजः क्रत्वा कर्मणा निमित्तेन अजनिष्ट प्रादुरभूत् उषस्त्वाचोषा विश्वं भुवनं भूतजातमाविरकः प्रादुरकः अकरोत् समस्तं जगदाविष्कृतवती ॥ १ ॥

अथ द्वितीया–

प्रमेपन्थांदेवयानांअदृश्रन्नमर्धन्तोवसुंभिरिष्कृतासः।
अभूंदुकेतुरुषसःपुरस्तात्प्रतीच्यागादधिहर्म्येभ्यः ॥ २ ॥

प्र। मे। पन्थाः। देवऽयानाः। अदृश्रन्। अमर्धन्तः। वसुऽभिः।
इष्कृतासः। अभूत्। ऊँ इति। केतुः। उषसः। पुरस्तात्। प्रतीची।
आ। अगात्। अधि। हर्म्येभ्यः॥ २ ॥

मे मया देवयानाः देवप्रापकाः पन्थाः पन्थानः प्रादृश्रन् प्रदृश्यन्ते। कीदृशाः पन्थानः अमर्धन्तःअहिंसन्तः वसुभिस्तेजोभिरिष्कृतासः संस्कृताः पुरस्तात् पूर्वस्यांदिशि उषसः केतुः प्रज्ञापकं तेजः अभूत् अचेति ज्ञायते। सोपाश्च प्रतीची प्रत्यगश्चना अस्मदभिमुखी हर्म्येभ्योधि उच्छ्रितेभ्यः प्रदेशेभ्यः हर्म्यशब्दउन्नतप्रदेशोपलक्षकः आगात् आगच्छति उःपूरणः॥२॥

अथ तृतीया–

तानीदहानिबहुलान्यासन्याप्राचीनमुदितासूर्यस्य।
यतःपरिजारइवाचरन्त्युषोददृक्षेनपुनर्यतीवं ॥ ३ ॥

तानि। इत्। अहानि। बहुलानि। आसन्। या। प्राचीनम्।
उत्ऽइता। सूर्यस्य। यतः। परि। जारःऽइव। आऽचरन्ती।
उषः। ददृक्षे। न। पुनः। यतीऽइव ॥ ३ ॥

हे उषः तानीत् तान्येव तव तेजांसि बहुलान्यहानि आसन् उषः प्रकाशयुक्तस्यैव कालस्याहःशब्दव्यवहारात्। तानीत्युक्तं कानीत्याह या यानि सूर्यस्य उदिता उदितौ उदये सति प्राचीनं तस्यप्राग्देशं प्रत्युदयन्ति यद्वा सूर्यस्य प्राचीनेदेशे या यान्युदिता उदितानि तानीत्यर्थः हे उषः यतोयैश्च तेजोभिः परिददृक्षे दृश्यसे त्वं जारइव पत्याविव आचरन्तीसमीपे

सञ्चरन्ती साध्वी नारीव सञ्चरन्ती त्वं दृश्यसे यथा लोके दुष्टं भ्रमणशीलमपि पतिमत्यज्यैव साध्वी संचरति तद्वत् तमविमुञ्चतीत्वमित्यर्थः। नपुनर्यवीव यवी पतिं परित्यज्य इतस्ततः सञ्चरन्तीव्यभिचारिणीव सूर्यमपरित्यजन्ती त्वं पुनरिवेत्ययं वैलक्षण्यद्योतनार्थः एवं येस्तेजोभिः युक्ता परिदृश्यसे तान्येवाहान्यासन्निति संबन्धः ॥ ३ ॥

अथ चतुर्थी—

तइद्देवानांसधमादआसन्नृतावानःकवयःपूर्व्यासः।
गूळ्हंज्योतिःपितरोअन्वविन्दन्त्सत्यमंत्राअजनयन्नुषासम् ॥ ४ ॥

ते । इत् । देवानाम् । सधऽमादः । आसन् । ऋतऽवानः ।
कवयः । पूर्व्यासः । गूळ्हम् । ज्योतिः । पितरः । अनु ।
अविन्दन् । सत्यऽमंत्राः । अजनयन् । उपसम् ॥ ४ ॥

तइत् तेङ्गिरसएव ऋषीणां मध्ये देवानां सधमादः सहमाद्यन्त आसन् अभवन् ते इत्युक्तं कइत्याह ये ऋतावानः सत्यवन्तः कवयोनूचानाः येवाअनूचानास्तेकवयइतिश्रुतेः। पूर्व्यासः पूर्वकालीनाः पितरः पालयितारः सर्वस्याङ्गिरसोगूळ्हं तमसा आवृतं ज्योतिः सौर्यं तेजोन्वविन्दन् लब्धवन्तोमन्त्रसामर्थ्यात्ते सत्यमन्त्राः सत्यस्तुतयः सन्तः उषासं उपसमजनयन् प्रादुरकुर्वन्। तुरीयेण ब्रह्मणा विन्ददेविः। अत्रयस्तमन्वविन्दन्निति निर्गमौ। अत्रांगिरसां स्तुत्योपसएव स्तुतिर्ज्ञातव्या ॥ ४ ॥

अथ पञ्चमी—

समानऊर्वेअधिसंगतासःसञ्जानतेनयतन्तेमिथस्ते।
तेदेवानांनमिनन्तिव्रतान्यमर्धन्तोवसुभिर्यादमानाः ॥ ५ ॥

समाने । ऊर्वे । अधि । सम्ऽगतासः । सम् । जानते । न ।
यतन्ते । मिथः । ते । ते । देवानाम् । न । मिनन्ति ।
व्रतानि । अमर्धन्तः । वसुऽभिः । यादमानाः ॥ ५ ॥

---

१ ऐ० ब्रा० २. ३८. २ ऋ० सं० ४. २ १२. । ३ ऋ० सं० ४. २. १२. ।

समाने सर्वेषां साधारणे ऊर्वे गोसमूहे पणिभिरपहृते पुनर्लब्धव्ये सविअधीत्यनर्थकः सङ्गतासोमिलिताः सन्तः ते सज्ञानते एकबुद्धयोभवन्ति न मिथः परस्परं यतंते सहैव साधनमनुतिष्ठन्तीत्यर्थः। तेंगिरसः देवानां व्रतानि कर्माणि यागलक्षणानि नमिनन्ति नहिंसन्ति किन्तु परिपालयन्तीत्यर्थः किंकुर्वन्तोअमर्धन्तोहिंसन्तः वसुभिर्वासकैस्तपसातेजोभिः यादमानाः गच्छन्तः॥ ५॥

अथ षष्ठी–

प्रतित्वास्तोमैरीळतेवसिष्ठाउषर्बुधःसुभगेतुष्टुवांसः।
गवांनेत्रीवाजपत्नीनउच्छोषःसुजातेप्रथमाजरस्व ॥ ६ ॥

प्रति। त्वा। स्तोमैः। ईळते। वसिष्ठाः। उषःऽबुधः।
सुऽभगे। तुस्तुऽवांसः। गवाम्। नेत्री। वाजऽपत्नी। नः।
उच्छ। उषः। सुऽजाते। प्रथमा। जरस्व ॥ ६ ॥

हे सुभगे देव्युषः त्वा त्वां प्रति उषर्बुधः उषसि बुध्यन्तः तुष्टुवांसः स्तुवन्तोवसिष्ठाः स्तोमैः स्तोत्रैः ईळते स्तुवन्ति गवां नेत्री मापयित्री वाजपत्नी अन्नस्य पालयित्री अन्नदात्रीत्यर्थः ईदृशी त्वं नोस्मदर्थं उच्छ विभाहि। हेउषः सुजाते सुप्रादुर्भावे प्रथमाइतरदेवेभ्योमुख्यभूता जरस्व॥ ६ ॥

अथ सप्तमी–

एषानेत्रीराधसःसूनृतानामुषाउच्छन्तीरिभ्यतेवसिष्ठैः।
दीर्घश्रुतंरयिमस्मेदधानायूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ २३ ॥

एषा। नेत्री। राधसः। सूनृतानाम्। उषाः। उच्छन्ती।
रिभ्यते। वसिष्ठैः। दीर्घऽश्रुतम्। रयिम्। अस्मे इति। दधाना।
यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७ ॥ २३ ॥

एषोषा राधसः स्तोतुः सूनृतानां स्तुतीनां नेत्री सती उच्छन्ती तमोविवासयन्ती वसिष्ठैर्वसिष्ठगोत्रोत्पन्नैः रिभ्यते स्तूयते दीर्घश्रुतं दीर्घे श्रूयमाणं सर्वत्र प्रसिद्धं रयिं धनमस्मे अस्मासु दधाना धारयन्ती शिष्टं गतम्॥ ७ ॥

॥इति पंचमस्य पञ्चमे त्रयोविंशोवर्गः ॥२३॥

उपोरुरुचेइति षळृचं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमुषस्यम् तथाचानुक्रान्तम्—उपोरुरुचेषळिति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः ।

तत्र प्रथमा—

उपोरुरुचेयुवतिर्नयोषाविश्वंजीवंप्रसुवन्तीचरायै ।
अभूदग्निःसमिधेमानुषाणामकर्ज्योतिर्बाधमानातमांसि ॥ १ ॥

उपो इति । रुरुचे । युवतिः । न । योषा । विश्वम् ।
जीवम् । प्रऽसुवन्ती । चरायै । अभूत् । अग्निः । सम्ऽइधे ।
मानुषाणाम् । अकः । ज्योतिः । बाधमाना । तमांसि ॥ १ ॥

इयमुषाः उपो समीपएव सूर्यस्य रुरुचे दीप्यते युवतिः यौवनोपेता योषान योषिदिव सा यथा वस्त्राभरणादिना पत्युः समीपे प्रदीप्यते तद्वत् किं कुर्वन्ती विश्वं सर्वं जीवंजीवसंघं चरायै सञ्चाराय प्रसुवन्ती प्रेरयन्ती। किञ्चाग्निः मानुषाणां मनुष्याणामर्थाय समिधे भूत् समिन्धनीयोभवत्। कृत्यार्थेकेन्। समिद्धःसन् तमांस्यन्धकारान् बाधमाना बाधमानं बाधकं ज्योतिस्तेजः सद्यः अकः अकार्षीत् अथवा औषसं ज्योतिस्तमांसि बाधमाना बाध्यमानानि अकः अकरोत् ॥ १ ॥

अथ द्वितीया—

विश्वंप्रतीचीसप्रथाउदस्थाद्रुशद्वासोबिभ्रतीशुक्रमश्वैत् ।
हिरण्यवर्णासुदृशीकसन्दृग्गवांमातानेत्र्यह्नामरोचि ॥ २ ॥

विश्वम् । प्रतीची । सऽप्रथाः । उत् । अस्थात् । रुशत् । वासः ।
बिभ्रती । शुक्रम् । अश्वैत् । हिरण्यऽवर्णा । सुदृशीकऽसंदृक् ।
गवाम् । माता । नेत्री । अह्नाम् । अरोचि ॥ २ ॥

विश्वं कृत्स्नं जगत् प्रति प्रतीची अभिमुखी सप्रथाः सर्वतः पृथुतरा उदस्थात् उदगच्छत् उदिता च रुशत् दीप्तं शुक्रं तेजोमयं वासोवसनीयं तेजःसमूहं बिभ्रती धारयन्ती अश्वैत् वर्धते हिरण्यवर्णा हितरमणीयवर्णोपेता सुदृशीकसंदृक् संदर्शयतीति संदृक्तेजः सुष्ठु दर्शनीयं

संदृक्तेजोयस्याः सा तादृशी गवांवाचां गवामेववा माता निर्मात्री उषःकालेहि पक्षिमनुष्यादीनां वाचोनिर्गच्छन्ति गवामपि तस्मिन्काले सञ्चारात्तन्निर्मातृत्वं अथवा रश्मीनांनिर्मात्री-अरोचि रोचते अह्नां नेत्री दिवसानां प्रापयित्री ॥ २ ॥

अथ तृतीया—

देवानांचक्षुःसुभगावहन्तीःश्वेतंनयन्तीसुदृशीकमश्वम् ।
उषाअदर्शिरश्मिभिर्व्यक्ताचित्रामघाविश्वमनुप्रभूता ॥ ३ ॥

देवानाम् । चक्षुः । सुऽभगा । वहन्ती । श्वेतम् । नयन्ती ।
सुऽदृशीकम् । अश्वम् । उषाः । अदर्शि । रश्मिऽभिः । विऽअक्ता ।
चित्रऽमघा । विश्वम् । अनु । प्रऽभूता ॥ ३ ॥

देवानां चक्षुश्चक्षुःस्थानीयं तेजोवहन्ती धारयन्ती सुभगा शोभनधना सुदृशीकं सुदर्शनं अश्वं सर्वदागन्तारं आदित्यं नयन्ती प्रापयन्ती किं श्वेतं श्वेतवर्णोपेतं सूर्यं प्रकाशयुक्तं कुर्वतीत्यर्थः । कीदृशी उषाः रश्मिभिः स्वकीयैर्व्यक्ता अदर्शि दृश्यतेच चित्रामघा चित्रधना विश्वमनु सर्वं जगदनुलक्ष्य प्रभूता प्रवृद्धा सर्वजगद्व्यवहारामेत्यर्थः ॥ ३ ॥

अथ चतुर्थी—

अन्तिवामादूरेअमित्रमुच्छोर्वीगव्यूतिमभयंकृधीनः ।
यावयद्वेषआभरावसूनिचोदयराधोगृणतेमघोनि ॥ ४ ॥

अन्तिऽवामा । दूरे । अमित्रम् । उच्छ । उर्वीम् । गव्यूतिम् ।
अभयम् । कृधि । नः । यवय । द्वेषः । आ । भर ।
वसूनि । चोदय । राधः । गृणते । मघोनि ॥ ४ ॥

हे उषः अन्तिवामा अन्ति अस्मदन्तिके वामं वननीयं धनं यस्याः सा अन्तिवामा त्वं अमित्रं अस्मच्छत्रुं दूरे अस्मत्तोविप्रकृष्टदेशे वर्तमानं कृत्वा व्युच्छ विभाहि यथा मित्रोदूरेभवति तथा व्युच्छेत्यर्थः तथा उर्वीं गव्यूतिं भूमिं अभयं नोस्माकं कृधि कुरु किञ्च द्वेषोसमद्द्वेष्टॄन् यावय अस्मत्तः पृथक्कुरु । वसूनि शत्रूणां धनानि आभर आहर । राधोधनं चोदय प्रेरय गृणते स्तुवते मह्यं हे मघोनि हेधनवति ॥ ४ ॥

अथ पञ्चमी–

अ॒स्मेश्रेष्ठे॑भिर्भा॒नुभि॒र्वि॑भा॒ह्युषो॑देविप्रति॒रन्ती॒न॒आयुः॑ ।
इषं॑चनो॒दध॑तीविश्ववारे॒गोम॒दश्वा॑व॒द्रथ॑वच्च॒राधः॑ ॥ ५ ॥

अ॒स्मे इति॑ । श्रेष्ठे॑भिः । भा॒नुऽभिः॑ । वि । भा॒हि॒ । उषः॑ ।
दे॒वि॒ । प्र॒ऽति॒रन्ती॑ । नः॒ । आयुः॑ । इष॑म् । च॒ । नः॒ । दध॑ती ।
वि॒श्व॒ऽवा॒रे॒ । गोऽम॑त् । अश्व॑ऽवत् । रथ॑ऽवत् । च॒ । राधः॑ ॥ ५ ॥

हे उषोदेवि अस्मे अस्मभ्यं श्रेष्ठेभिः प्रशस्यैर्भानुभीरश्मिभिः प्रकाशैर्विभाहि प्रकाशय किंकुर्वती नोस्माकमायुरायुष्यं प्रकर्षेण तिरन्ती प्रवर्धयन्ती । हे विश्ववारे विश्वैः संभजनीये देवि नोस्मभ्यमिषञ्च गोमत् गोभिर्बहुभिरुपेतं अश्वावत् अश्वैश्चोपेतं रथवद्रथैरुपेतं राधोध-नञ्च दधती विभाहीति ॥ ५ ॥

अथ षष्ठी–

यांत्वा॑दि॒वोदु॑हित॒र्व॒र्धय॒न्त्युष॑ःसुजा॒तेम॒तिभि॒र्वसि॑ष्ठाः ।
सास्मासु॑धारयि॒मृष्वं॑बृ॒हन्तं॑यू॒यंपा॑तस्व॒स्तिभिः॒सदा॑नः ॥ ६ ॥२४॥

याम् । त्वा॒ । दि॒वः । दु॒हि॒तः॒ । व॒र्धय॑न्ति । उषः॑ । सु॒ऽजा॒ते॒ ।
म॒तिऽभिः॑ । वसि॑ष्ठाः । सा । अ॒स्मासु॑ । धाः॒ । र॒यिम् । ऋ॒ष्वम् ।
बृ॒हन्त॑म् । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ६ ॥ २४ ॥

हे दिवोदुहितरुषः सुजाते शोभनजनने यां त्वा त्वां मतिभिः स्तोत्रैर्वसिष्ठाः वर्धयन्ति सा त्वमस्मासु वसिष्ठेषु ऋष्वं प्रदीप्तं बृहन्तं महान्तं रयिं धनं धाः धेहि । शिष्टं गतम् ॥ ६॥

॥ इति पंचमस्य पञ्चमे चतुर्विंशोवर्गः ॥ २४॥

प्रतिकेतवइति पञ्चर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमुषस्यं प्रतिपञ्चेत्यनुक्रमणिका । उक्तोविनियोगः ।

तत्र प्रथमा—

प्रतिकेतवःप्रथमाअदृश्रन्नूर्ध्वाअस्याअञ्जयोविश्रयन्ते।
उषोअर्वाचाबृहतारथेनज्योतिष्मतावाममस्मभ्यंवक्षि ॥ १ ॥

प्रति। केतवः। प्रथमाः। अदृश्रन्। ऊर्ध्वाः। अस्याः।
अञ्जयः। वि। श्रयन्ते। उषः। अर्वाचा। बृहता।
रथेन। ज्योतिष्मता। वामम्। अस्मभ्यम्। वक्षि ॥ १ ॥

अस्याः प्रथमाः प्रथमोत्पन्नाः केतवः प्रज्ञापकारश्मयः प्रत्यदृश्रन् प्रतिदृश्यन्ते अस्या अञ्जयोव्यञ्जकारश्मयः ऊर्ध्वा ऊर्ध्वमुखा विश्रयन्ते विविधं सर्वत्र श्रयन्ति हे उषोदेवि अर्वाचा अस्मदभिमुखेनागच्छता बृहता महता ज्योतिष्मता तेजोवता रथेन वामं वननीयं धनमस्मभ्यं वक्षि वहसि ॥ १॥

अथ द्वितीया—

प्रतिषीमग्निर्जरतेसमिद्धःप्रतिविप्रासोमतिभिर्गृणन्तः।
उषायातिज्योतिषाबाधमानाविश्वातमांसिदुरितापदेवी ॥ २ ॥

प्रति। सीम्। अग्निः। जरते। सम्ऽइद्धः। प्रति। विप्रासः।
मतिऽभिः। गृणन्तः। उषाः। याति। ज्योतिषा। बाधमाना।
विश्वा। तमांसि। दुःऽइता। अप। देवी ॥ २ ॥

अग्निः समिद्धः सन् सीं सर्वतः प्रतिजरते अभिवर्धते विप्रासोविप्रा मेधाविन ऋत्विजश्च मतिभिः स्तुतिभिरुषसंप्रति गृणन्तः स्तुवन्तोजरन्ते उषाश्च देवी ज्योतिषा विश्वा सर्वाणि तमांसिदुरितास्मद्दुरितानि अपबाधमाना याति ऊर्ध्वंगच्छति ॥ २ ॥

अथ तृतीया—

एताउत्याःप्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छन्तीरुषसोविभातीः।
अजीजनन्सूर्यंयज्ञमग्निमपाचीनंतमोअगादजुष्टम् ॥ ३ ॥

एताः । ऊँ इतिं । त्याः । प्रति । अदृश्रन् । पुरस्तांत् । ज्योतिः ।
यच्छन्तीः । उषसः । विऽभातीः । अजीजनन् । सूर्यम् । यज्ञम् ।
अग्निम् । अपाचीनंम् । तमंः । अगात् । अजुंष्टम् ॥ ३ ॥

एता उइतिपूरणः त्याः ताः प्रसिद्धा एता विभातीर्विभात्योविभानं कुर्वत्योज्योतिस्तेजः यच्छन्तीः प्रयच्छन्त्यः उषसः पुरस्तात्पूर्वस्यां दिशि प्रत्यदृश्रन् प्रतिदृश्यन्ते ताउषसः सूर्यं यज्ञं अग्निंच अजीजनन्प्रादुरकुर्वन् उषसउदयानन्तरं तेषां संभवात्तज्जनकत्वमुपचर्यते किञ्च अपाचीनं नीचीनमजुष्टमप्रियं सर्वेषां दृष्टिनिरोधकत्वादप्रियत्वं तादृशं तमःअगात् अपगतमभूत् ॥ ३ ॥

अथ चतुर्थी—

अचेंतिदिवोदुंहितामघोनीविश्वेंपश्यन्त्युषसंविभातीम् ।
आस्थाद्रथंस्वधयांयुज्यमानमायमश्वांसःसुयुजोवहंन्ति ॥ ४ ॥

अचेंति । दिवः । दुहिता । मघोनी । विश्वें । पश्यन्ति । उषसंम् ।
विऽभातीम् । आ । अस्थात् । रथंम् । स्वधयां । युज्यमांनम् ।
आ । यम् । अश्वांसः । सुऽयुजंः । वहंन्ति ॥ ४ ॥

दिवोदुहिता मघोनी धनवती उषाः अचेति सर्वैर्ज्ञायते विश्वे सर्वेपि प्राणिनोविभातीं उच्छन्तीं उषसं पश्यन्ति तादृशी देवी स्वधयान्नेन युज्यमानं रथं आस्थात् आतिष्ठत् आरोहति यं रथं सुयुजः शोभनयोजना अश्वासोऽश्वाः आवहन्ति अभिमतदेशं प्रापयन्ति तं रथमास्थादिति ॥ ४ ॥

अथ पञ्चमी—

प्रतित्वाद्यसुमनंसोबुधन्तास्माकांसोमघवांनोवयंचं ।
तिल्विलायध्वंमुषसोविभातीर्यूयंपांतस्वस्तिभिःसदांनः ॥५॥२५॥

प्रति । त्वा । अद्य । सुऽमनंसः । बुधन्त । अस्माकांसः ।
मघऽवांनः । वयम् । च । तिल्विलायध्वंम् । उषसः । विऽभातीः ।
यूयम् । पात । स्वस्तिऽभिंः । सदां । नः ॥ ५ ॥ २५ ॥

हे उपसस्त्वा त्वां अद्यास्मिन्काले सुमनसः शोभनस्तुतिका मघवानो हविर्लक्षणान्नवन्तो-स्माकासोस्माका अस्मदीयाः पुरुषा ऋत्विजः यद्वा मघवानइत्येतत् वयमित्येतस्य विशेषणं हविष्मन्तोवयं प्रतिबुधन्त प्रत्यबोधयन् स्तुतिभिः। हे उपसोयूयंच विभातीः व्युच्छंत्यः सत्य-स्तिल्विलायध्वं जगत् स्निग्धभूमिकं कुरुत तिलस्नेहने इत्यस्मात्तिलुः तिलुरिलाभूमिः यस्य तत्तिल्विलं तत्कुरुत। शिष्टं स्पष्टम् ॥ ५ ॥

॥ इति पञ्चमस्य पञ्चमे पञ्चविंशोवर्गः ॥ २५ ॥

व्युषाआवइति पञ्चर्चं नवमं सूक्तं वसिष्ठस्यार्षमुषस्यं त्रैष्टुभं व्युषाइत्यनुक्रमणिका प्रा-तरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

तत्र प्रथमा—

व्यु१षाआवःपथ्या३जनानांपञ्चक्षितीर्मानुषीर्बोधयन्ती।
सुसंदृग्भिरुक्षभिर्भानुमश्रेद्विसूर्योरोदसीचक्षसावः ॥ १ ॥

वि। उषाः। आवः। पथ्या। जनानाम्। पञ्च। क्षितीः।
मानुषीः। बोधयन्ती। सुसंदृक्ऽभिः। उक्षऽभिः। भानुम्। अश्रेत्।
वि। सूर्यः। रोदसी इति। चक्षसा। आवरित्यावः ॥ १ ॥

जनानां सर्वप्राणिनां पथ्या पथिहितोषाः व्यावः व्यौच्छत्। यद्वा जनानां हिताय व्यौ-च्छदिति योज्यम्। किंकुर्वती मानुषीर्मनुष्यरूपाःपञ्चक्षितीः निषादपञ्चमांश्चतुरोवर्णान्बोधयन्ती ईदृश्युषाः। सुसन्दृग्भिःसन्दृश्यते सन्दर्शयतीतिवा सन्दृक् तेजः सुतेजोभिः उक्षभिः गोभिर्भानु-मश्रेत्। अरुणैरुषाआजिमधावन्निति हिश्रुतिः। अरुण्योगावउषसामितिनिरुक्तम्। सूर्यश्च रो-दसी द्यावापृथिव्यौ तमोयुक्ते चक्षसा प्रकाशकेन तेजसा व्यावोविवृणोति ॥ १ ॥

अथ द्वितीया—

व्यंञतेदिवोअन्तेष्वक्तून्विशोनयुक्ताउपसोयतन्ते।
सन्तेगावस्तमआवर्तयन्तिज्योतिर्यच्छन्तिसवितेवबाहू ॥ २ ॥

---

१ ऐ० ब्रा० ४. ९। २ निघंटु १. १ ५।

वि । अ॒श्न॒ते॒ । दि॒वः । अन्ते॑षु । अ॒क्तून् । विशः॑ । न । यु॒क्ताः ।
उ॒षसः॑ । य॒त॒न्ते॒ । सम् । ते॒ । गावः॑ । तमः॑ । आ । व॒र्त॒य॒न्ति॒ ।
ज्योतिः॑ । य॒च्छ॒न्ति॒ । स॒वि॒ताऽइ॑व । बा॒हू इति॑ ॥ २ ॥

उषसः अक्तून् तेजांसि दिवोन्तरिक्षस्यान्तेषु पर्यन्तप्रदेशेषु व्यश्नते व्यक्तीकुर्वन्तीत्यर्थः युक्ताः परस्परं संयुक्ताः विशोन प्रजाइव सेनाइव यतन्ते प्रयतन्ते तमोनाशनायात्र गमनाय वा। अथ प्रत्यक्षवादः हे उषस्ते तव गावोरश्मयस्तमोन्धकारं समावर्तयन्ति नाशयन्ति ज्योतिस्तेजोयच्छन्ति प्रयच्छन्ति । सविता सूर्योबाहूइव ॥ २ ॥

अथ तृतीया–

अभू॑दु॒षाइन्द्र॑तमामघोन्य॑जीजनत्सुवि॒ताय॒श्रवां॑सि ।
विदि॒वोदे॒वीदु॑हि॒तादधा॒त्यङ्गि॑रस्तमासुकृते॒वसू॑नि ॥ ३ ॥

अभू॑त् । उ॒षाः । इन्द्र॑ऽतमा । म॒घोनी॑ । अजी॑जनत् । सु॒वि॒ताय॑ ।
श्रवां॑सि । वि । दि॒वः । दे॒वी । दु॒हि॒ता । द॒धा॒ति॒ ।
अङ्गि॑रःऽतमा । सु॒ऽकृते॑ । वसू॑नि ॥ ३ ॥

इन्द्रतमा सर्वस्येश्वरतमा मघोनी धनवती उषा अभूत् प्रादुरभूत् सुविताय कल्याणाय श्रवांस्यन्नानि अजीजनत् उदपादयत् प्रकाशितवतीत्यर्थः दिवोदुहिता देवीद्योतमाना अंगिरस्तमा गन्तृतमा यद्वा अङ्गिरोगोत्रैर्भरद्वाजैः सह रात्रेरप्युत्पत्तेः रात्र्यवसानस्योषारूपत्वादङ्गिरस्तमेत्युच्यते भारद्वाजैरात्रेः सहोत्पत्तिरनुक्रमण्यामुक्ता रात्रिःकुशिकः सौभरो रात्रिर्वाभारद्वाजीति तादृश्युषाः सुकृते यजमानाय वसूनि धनानि विदधाति करोति ॥ ३ ॥

अथ चतुर्थी–

ताव॑दुषो॒राधो॑अ॒स्मभ्यं॑रास्व॒याव॑त्स्तो॒तृभ्यो॒अर॑दोगृणा॒ना ।
यांत्वा॑ज॒ज्ञुर्वृ॑ष॒भस्या॒रवे॑ण॒विदृ॒ह्ळस्य॒दुरो॒अद्रे॑रौर्णोः ॥ ४ ॥

ताव॑त् । उ॒षः॒ । राधः॑ । अ॒स्मभ्य॑म् । रा॒स्व॒ । याव॑त् । स्तो॒तृऽभ्यः॑ ।
अर॑दः । गृ॒णा॒ना । याम् । त्वा॒ । ज॒ज्ञुः । वृ॒ष॒भस्य॑ । रवे॑ण ।
वि । दृ॒ह्ळस्य॑ । दुरः॑ । अद्रेः॑ । औ॒र्णोः॒ ॥ ४ ॥

हे उषोयावद्राधोधनं स्तोतृभ्यः पूर्वं अरदोदत्तवत्यसि तावद्राधोधनं गृणाना स्तूयमानाः अस्मभ्यमपि रास्व देहि यां त्वा त्वां वृषभस्य रवेण लुप्तोपमैषा वृषभस्येति कर्मणिषष्ठी वृषभं रवेणेव त्वां प्रकाशेन जज्ञुः जानन्ति प्राणिनः। अथवा वृषभस्यप्रवृद्धस्य स्तोत्रस्य रवेण शब्देन जज्ञुः ज्ञापयन्ति दृह्लस्य दृढस्याद्रेः दुरोद्वाराणि पणिभिर्गोः प्रवेश्य पिहितानि व्यौर्णोः विवृतान्यकरोः ॥ ४ ॥

अथ पञ्चमी–

देवंदेवंराधसेचोदयन्त्यस्मद्र्यक्सूनृताईरयन्ती।
व्युच्छन्तीनःसनयेधियोधायूयंपातस्वस्तिभिःसदानः ॥५॥२६॥

देवम्ऽदेवम्। राधसे। चोदयन्ती। अस्मद्र्यक्। सूनृताः।
ईरयन्ती। विऽउच्छन्ती। नः। सनये। धियः। धाः।
यूयम्। पात। स्वस्तिऽभिः। सदा। नः ॥ ५ ॥ २६ ॥

देवंदेवं सर्वमपिस्तोतारं राधसे धनाय चोदयन्ती प्रेरयन्ती अस्मद्र्यक् अस्मदभिमुखं सूनृता वचांसि ईरयन्ती प्रेरयन्ती व्युच्छन्ती व्युच्छनं कुर्वती नोस्माकं सनये दानाय धनलाभाय धियोबुद्धीः धाः धेहि शिष्टं स्पष्टम् ॥ ५॥

॥ इति पंचमस्य पञ्चमे षड्विंशोवर्गः ॥ २६ ॥

प्रतिस्तोमेभिरिति तृचात्मकं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमुषस्यम्. प्रतितृचमित्यनुक्रमणिका। प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

तत्र प्रथमा–

प्रतिस्तोमेभिरुषसंवसिष्ठागीर्भिर्विप्रासःप्रथमाअबुध्रन्।
विवर्तयन्तींरजसीसमन्तेआविष्कृण्वतींभुवनानिविश्वा ॥ १ ॥

प्रति। स्तोमेभिः। उषसम्। वसिष्ठाः। गीःऽभिः। विप्रासः। प्रथमाः।
अबुध्रन्। विऽवर्तयन्तीम्। रजसी इति। समन्ते इति समऽअन्ते।
आविःऽकृण्वतीम्। भुवनानि। विश्वा ॥ १ ॥

विप्रासोमेधाविनोवसिष्ठाः वसिष्ठगोत्राः स्तोमेभिः स्तोतृभिः प्रयुज्यमानागीर्भिः स्तुतिभिः प्रथमा इतरयजमानेभ्यः पूर्वभूताः सन्तः उषसं प्रत्यबुध्रन् प्रतिबोधयन्ति । कीदृशीमुषसं च रजसी द्यावापृथिव्यौ समन्ते समानपर्यन्ते एकीभूतप्रान्ते विवर्तयन्तीं व्यावर्तयन्तीं विश्वा सर्वाणि भुवनानि भूतजातान्याविष्कृण्वतीं प्रकटीकुर्वतीं स्वभासा ॥ १ ॥

अथ द्वितीया–

एषास्यानव्यमायुर्दधानागूढ्वीतमोज्योतिषोषाअबोधि ।
अग्रंएतियुवतिरह्रयाणाप्राचिकितत्सूर्यंयज्ञमग्निम् ॥ २ ॥

एषा । स्या । नव्यम् । आयुः । दधाना । गूढ्वी । तमः ।
ज्योतिषा । उषाः । अबोधि । अग्रे । एति । युवतिः ।
अह्रयाणा । प्र । अचिकितत् । सूर्यम् । यज्ञम् । अग्निम् ॥ २ ॥

एषोषाः स्या सा गतदिवसेषु प्रसिद्धा अदृश्यमानैषा नव्यं नवतरं आयुरायुष्यं यौवनमित्यर्थः तादृशं दधाना धारयन्ती गूढ्वी गूढंतमोन्धकारं ज्योतिषा स्वतेजसा निवारयन्ती अबोधि बुध्यते अग्रे पुरोदेशे सूर्यस्य पुरस्तात् देवानामग्रेवा इतरदेवेभ्यः पूर्वमित्यर्थः युवतिः नित्यतरुणी सर्वत्रमिश्रयन्ती वा अह्रयाणा लुप्तोपमैषा अलज्जा युवतिरिव सापथा पत्युरग्रे सञ्चरति तद्वत् सूर्यस्य पुरस्तादेति एवंभूतासती सूर्यं यज्ञमग्निं च प्राचिकितत् प्रज्ञापयति ॥२॥

अथ तृतीया–

अश्वावतीर्गोमतीर्नउषासोवीरवतीःसदमुच्छन्तुभद्राः ।
घृतंदुहानाविश्वतःप्रपीतायूयंपातस्वस्तिभिःसदानः ॥ ३ ॥२७॥

अश्वऽवतीः । गोऽमतीः । नः । उषसः । वीरऽवतीः । सदम् ।
उच्छन्तु । भद्राः । घृतम् । दुहानाः । विश्वतः । प्रऽपीताः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥ २७ ॥

अश्वावतीर्बहुभिर्नोस्मभ्यं प्रदेयैरश्वैस्तद्वत्यः तथा गोमतीर्गोमत्यो [illegible] वीरवत्यः पुत्रप्रदाः अतएवभद्राः स्तुत्याउषासउषसः सदं सर्वदा उच्छंतु [illegible] उदकं दुहानाः दोग्ध्र्यः विश्वतः प्रपीताः सर्वतः प्रवृद्धाः । यूयंपातेतिगतः । ३

॥ इति पंचमस्य पञ्चमे सप्तविंशोवर्गः ॥२७॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्वि[illegible]

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभू[illegible]

चार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमा[illegible]

॥ श्रीगणेशाय नमः ॥

यस्यनिःश्वसितं वेदा योवेदेभ्योखिलं जगत्। निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥१॥ अथ षष्ठोध्यायोव्याख्यायते। सप्तमे मण्डले पञ्चमेनुवाके दशसूक्तानि व्याकृतानि प्रत्युअदर्शीति षळृचमेकादशं सूक्तम् वसिष्ठस्यार्षमुषस्यम् प्रथमाद्या अयुजो बृहत्यः द्वितीयाद्यायुजः सतोबृहत्यः तथाचानुक्रान्तं—प्रत्युषड्भागाथमिति। प्रातरनुवाके उषस्येक्रतौ बार्हतेछन्दसि आश्विनशस्त्रेच इदंसूक्तं सूत्रितञ्च—प्रत्युअदर्शिसहवामेनेति बार्हतमिति।

तत्र प्रथमा—

ॐम् प्रत्युअदर्श्यायत्यु१च्छन्तीदुहितादिवः।
अपोमहिव्ययतिचक्षसेतमोज्योतिष्कृणोतिसूनरी ॥ १ ॥

प्रति। ॐ इति। अदर्शि। आऽयती। उच्छन्ती। दुहिता। दिवः।
अपो इति। महि। व्ययति। चक्षसे। तमः। ज्योतिः।
कृणोति। सूनरी ॥ १ ॥

आयती आगच्छन्ती व्युच्छन्ती तमांसि विवासयन्ती वर्जयन्ती दिवः द्युलोकस्य सूर्यस्यवा दुहिता पुत्री एवंभूताउषाःप्रत्यदर्शि सर्वैः प्रतिदृश्यते उइतिपूरकः सोषा महि महत् तमोनैशमन्धकारं अप उ इति निपातद्वयसमुदायः अपेत्यस्यार्थे अपोव्ययति अपवृणोति। किमर्थं चक्षसे दर्शनार्थं एवं कृत्वा सूनरी जनानां सुष्ठु नेत्री उषा ज्योतिः प्रकाशं कृणोति करोति॥१॥

अथ द्वितीया—

उदुस्रियाःसृजतेसूर्यःसचाँउद्यन्नक्षत्रमर्चिवत्।
तवेदुषोव्युषिसूर्यस्यचसंभक्तेनगमेमहि ॥ २ ॥

उत्। उस्रियाः। सृजते। सूर्यः। सचा। उत्ऽयन्।
नक्षत्रम्। अर्चिऽवत्। तव। इत्। उषः।
विऽउषि। सूर्यस्य। च। सम्। भक्तेन। गमेमहि ॥ २ ॥

सूर्यः सर्वस्य प्रेरकआदित्यः उस्रियाः रश्मीन् सचा सह युगपदेव उत्सृजते उद्गमयति तथा उद्यत् उद्गच्छत् प्रादुर्भवन्नक्षत्रं नभसि दृश्यमानं ग्रहनक्षत्रादिकं अर्चिवत् दीप्तिमत्करोति सौरेण तेजसाहि नक्तं चन्द्रप्रभृतीनि नक्षत्राणि भासन्ते। सुषुम्नः सूर्यरश्मिश्चन्द्रमागन्धर्वइति-हिनिगमः। एवञ्च सति हे उषः उषोदेवते तव सूर्यस्यच व्युषि विवासने प्रकाशने सति भक्तेनान्नेन सङ्गमेमहि वयं सगच्छेमहि इच्छब्दः पूरकः॥ २ ॥

अथ तृतीया–

प्रतित्वादुहितर्दिवउषोजीराअभुत्स्महि।
यावहसिपुरुस्पार्हंवनन्वतिरत्नंनदाशुषेमयः॥ ३ ॥

प्रति। त्वा। दुहितः। दिवः। उषः। जीराः। अभुत्स्महि।
या। वहसि। पुरु। स्पार्हम्। वनन्ऽवति।
रत्नम्। न। दाशुषे। मयः॥ ३ ॥

हे दिवोदुहितः दिवोन्तरिक्षाज्जायमाने हेउषः उषोदेवते त्वा त्वां जीराः क्षिप्रकारिणोवयं प्रत्यभुत्स्महि प्रतिबोद्धारोभवेम हे वनन्वति वननं संभजनं संभक्तव्यं धनं वा तद्वति या त्वं पुरु बहु स्पार्हं स्पृहणीयं धनं वहसि प्रापयसि दाशुषे हवींषि दत्तवते यजमानाय रत्नं न रमणीयं धनमिव मयः सुखंच या त्वं वहसि तां त्वां प्रत्यभुत्स्महीत्यन्वयः॥ ३ ॥

अथ चतुर्थी–

उच्छन्तीयाकृणोषिमंहनामहिप्रख्यैदेविस्वर्दृशे।
तस्यास्तेरत्नभाजईमहेवयंस्याममातुर्नसूनवः॥ ४ ॥

उच्छन्ती। या। कृणोषि। मंहना। महि। प्रऽख्यै।
देवि। स्वः। दृशे। तस्याः। ते। रत्नऽभाजः।
ईमहे। वयम्। स्याम। मातुः। न। सूनवः॥ ४ ॥

1 तै० सं० ३. २. २।

हे महि महति देवि दानादिगुणयुक्ते उषोदेवते व्युच्छन्ती तमांसि वर्जयन्ती मंहना महित्वायुक्ता यद्वा मंहतिर्दानकर्मा दानयुक्ता या त्वं स्वः सर्वंजगत् मख्ये प्रबोधनार्थं दृशे दर्शनार्थंश्च कृणोषि करोषि। तस्यास्तादृश्याः रत्नभाजः रत्नानां रमणीयानां धनानां भाजयित्र्याः सेवयित्र्याः ईमहे याचामहे किं रत्नभाजइति समभिव्याहारात् रत्नानीति गम्यते। अपिच वयंते तव प्रियतमाः स्याम भवेम मातुर्न सूनवः यथा मातुर्जनन्याः सूनवः पुत्राः प्रियतमाभवन्ति तद्वत् ॥ ४ ॥

अथ पञ्चमी–

तच्चित्रंराधआभरोषोयद्दीर्घश्रुत्तमम्।
यत्तेदिवोदुहितर्मर्तभोजनंतद्रास्वभुनजामहै ॥ ५ ॥

तत्। चित्रम्। राधः। आ। भर। उषः। यत्। दीर्घश्रुत्ऽतमम्।
यत्। ते। दिवः। दुहितः। मर्तऽभोजनम्। तत्। रास्व।
भुनजामहै ॥ ५ ॥

हे उषः तच्चित्रं चायनीयं राधोधनं आभराहर अस्मभ्यं प्रयच्छ। यद्धनं दीर्घ श्रुत्तमं देशकालयोर्विप्रकर्षेप्यतिशयेन श्रोतव्यम् अपिच हे दिवोदुहितः ते तव त्वया देयं मर्तभोजनं मर्तानां मनुष्याणां भोगयोग्यं यदन्नमप्यस्ति तद्रास्व देहस्मभ्यम् वयश्च त्वद्दत्तं धनमन्नञ्च भुनजामहै अभ्यवहरेम ॥ ५ ॥

अथ षष्ठी–

श्रवःसूरिभ्योअमृतंवसुत्वनंवाजाँअस्मभ्यंगोमतः।
चोदयित्रीमघोनःसूनृतावत्युषाउच्छदपस्रिधः ॥ ६ ॥ १ ॥

श्रवः। सूरिऽभ्यः। अमृतम्। वसुऽत्वनम्। वाजान्।
अस्मभ्यम्। गोऽमतः। चोदयित्री। मघोनः।
सूनृताऽवती। उषाः। उच्छत्। अप। स्रिधः ॥ ६ ॥ १ ॥

हे उषः सूरिभ्यः स्तोतृभ्योस्मभ्यं अमृतं मरणरहितं नित्यं वसुत्वनं वासकं वसुत्वयुक्तं वा श्रवः श्रवणीयं यशः रास्वेत्यनुषङ्गः तथा गोमतः बहुभिर्गोभिर्युक्तान् वाजान् अन्नानि चास्मभ्यं रास्व। शिष्टः परोक्षकृतः मघोनोहविष्मतोयजमानस्य चोदयित्री प्रेरयित्री सूनृतावती प्रियसत्यात्मिका वाक् सूनृता तद्वती उषाः स्त्रिधः शोषकान् शत्रून् अपोच्छत् अपगमयतु ॥ ६॥

॥ इति पंचमस्य षष्ठे प्रथमोवर्गः ॥ १ ॥

इन्द्रावरुणेति दशर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं जागतम् इदमादीनि चत्वारिसूक्तानीन्द्रावरुणदेवतानि तथाचानुक्रान्तम्—इन्द्रावरुणादशैन्द्रावरुणाह जागतंविति । तृतीयेसवने उक्थ्ये प्रशास्तुः शस्त्रे एतत्सूक्तम् सूत्रितंच—इन्द्रावरुणायुवमावांराजानाविति ।

तत्र प्रथमा—

इन्द्रा॑वरुणायु॒वम॑ध्व॒राय॑नोवि॒शेजना॑यम॒हिशर्म॑यच्छतम् ।
दी॒र्घप्र॑यज्यु॒मति॒योव॑नु॒ष्यति॑व॒यंज॑येमपृ॒त॑नासुदू॒ढ्य॑ः ॥ १ ॥

इन्द्रा॑वरुणा । यु॒वम् । अ॒ध्व॒राय॑ । नः॒ । वि॒शे । जना॑य ।
महि॑ । शर्म॑ । य॒च्छ॒त॒म् । दी॒र्घऽप्र॑यज्युम् । अति॑ । यः ।
व॒नु॒ष्यति॑ । व॒यम् । ज॒ये॒म । पृत॑नासु । दुः॒ऽध्यः॑ ॥ १ ॥

हे इन्द्रावरुणा इन्द्रावरुणौ युवं युवां नोस्माकं विशे निवेशयित्रे परिचारकाय जनाय पुत्रपौत्रादिलक्षणाय अध्वराय यज्ञानुष्ठानार्थं महि महत् शर्म गृहं सुखंवा यच्छतं प्रयच्छतम् अपिच दीर्घप्रयज्युं दीर्घप्रततयज्ञं अस्मदीयं जनं यः शत्रुरतिवनुष्यति अति जिघांसति पृतनासु संग्रामेषु दूढ्यः दुर्धियः दुष्टाभिसन्धीन् तान् शत्रून् वयं जयेमाभिभवेम ॥ १ ॥

अथ द्वितीया—

स॒म्राळ॒न्यःस्व॒राळ॒न्यउ॑च्यतेवांम॒हान्ता॒विन्द्रा॒वरु॑णाम॒हाव॑सू ।
विश्वे॑दे॒वासः॑पर॒मेव्यो॑मनि॒संवा॒मोजो॑वृषणा॒संबल॑ंदधुः ॥ २ ॥

स॒म्ऽराट् । अ॒न्यः । स्व॒ऽराट् । अ॒न्यः । उ॒च्य॒ते । वा॒म् । म॒हान्तौ॑ ।
इ॒न्द्रा॒वरु॑णा । म॒हाव॑सू॒ इति॑ म॒हाऽव॑सू । विश्वे॑ । दे॒वासः॑ । प॒र॒मे ।
विऽओ॑मनि । सम् । वा॒म् । ओजः॑ । वृ॒ष॒णा॒ । सम् । बल॑म् । द॒धुः॒ ॥ २ ॥

द्वितीयः पादःपरोक्षकृतः शिष्टाःप्रत्यक्षकृताः हे इन्द्रावरुणौ वां युवयोर्मध्ये अन्यएकोवरुणः सम्राट् सम्यग्राजमानइत्युच्यते । तासम्राजाघृतासुतीत्यादिषुकीर्त्यते[1]। अन्यइन्द्रः स्वराट् स्वयमेव अन्यनिरपेक्षयैव राजमानइत्युच्यते । स्वराळिन्द्रोदमइत्यादिषुकीर्त्यते[2]। तथाविधाविन्द्रावरुणा इन्द्रावरुणौ महान्तौ गुणैरधिकौ महावसू महाधनौ च भवतः । हे वृषणा कामानां वर्षिताराविन्द्रावरुणौ वां युवां परमे व्योमनि उत्कृष्टे आकाशे विश्वेदेवासः सर्वेदेवाः ओजः सन्दधुः समयोजयन् शरीरदार्ढ्याय तद्धेतुभूतं तदोजइत्युच्यते स्मर्यतेच ओजःसाष्टमीदशेति तथा बलं वृत्रवधादेः कार्यस्य हेतुभूतं सामर्थ्यंच युवाभ्यां सन्दधुः समयोजयन् ॥ २ ॥

अथ तृतीया–

अन्वपांखान्यतृन्तमोजसासूर्यमैरयतंदिविप्रभुम् ।
इन्द्रावरुणामदेअस्यमायिनोपिन्वतमपितःपिन्वतंधियः ॥ ३ ॥

अनु । अपाम् । खानि । अतृन्तम् । ओजसा । आ । सूर्यम् ।
ऐरयतम् । दिवि । प्रऽभुम् । इन्द्रावरुणा । मदे । अस्य ।
मायिनः । अपिन्वतम् । अपितः । पिन्वतम् । धियः ॥ ३ ॥

हे इन्द्रावरुणौ अपामुदकानां खानि द्वाराणि वृत्रेण पिहितानि ओजसा बलेन अन्वतृन्तं अन्वविध्यतं आवरकस्य वृत्रस्य वधेन वृष्टिप्रतिबन्धं निराकृतवन्तावित्यर्थः तथा सूर्यं सर्वस्य प्रेरकमादित्यं दिव्यंतरिक्षे प्रभुं प्रभूतं सन्तं ऐरयतं अभ्यगमयतम् स्वर्भानुना वृतं सूर्यं तद्वधेन प्रकाशितवन्तावित्यर्थः हे इन्द्रावरुणा इन्द्रावरुणौ मायिनः प्रज्ञाकरस्य अस्यसोमस्य पानेन मदे हर्षेसति अपितः जलरहितानदीः अपिन्वतं जलेनापूरयतम् । तथाच निविरपदमाम्नायते– अस्यमदेजरितरिंद्रोजिन्वदज्रुवोपिन्वदपितइति । अपिच धियः कर्माण्यस्माभिरनुष्ठितानि कर्माणि पिन्वतं सिञ्चतं फलेन पूरयतम् ॥३॥

अथ चतुर्थी–

युवामिद्युत्सुपृतनासुवह्नयोयुवांक्षेमस्यप्रसवेमितज्ञवः ।
ईशानावस्वउभयस्यकारवइन्द्रावरुणासुहवाहवामहे ॥ ४ ॥

---

१ ऋ० सं० २. ८. ८। २ ऋ० सं० १. ४. २८।

युवाम् । इत् । युत्ऽसु । पृतनासु । वह्नयः । युवाम् । क्षेमस्य ।
प्रऽसवे । मितऽज्ञवः । ईशाना । वस्वः । उभयस्य । कारवः ।
इन्द्रावरुणा । सुऽहवा । हवामहे ॥ ४ ॥

हे इन्द्रावरुणौ वह्नयोहविषां स्तोत्राणां वा वोढारः ऋत्विजः युत्सु युद्धेषु पृतनासु शत्रुसेनासु रक्षणार्थं युवामित् युवामेव हवन्ते आह्वयन्ति मितज्ञवः संकुचितजानुकाः अंगिरसोपि क्षेमस्य रक्षणस्य प्रसवे उत्पादने निमित्तभूते सति युवामेव हवन्ते अतः कारणात् हे इन्द्रावरुणौ कारवः स्तोतारोवयमपि उभयस्य दिव्यस्य पार्थिवस्य च वस्वोवसुनोधनस्य ईशाना ईश्वरौ सुहवा सुखेन ह्वातव्यौ युवामेव हवामहे आह्वयामहे ॥ ४ ॥

अथ पंचमी—

म॒हे । शु॒ल्काय॑ । वरु॑णस्य । नु । त्वि॒षे । ओजः॑ । मि॒मा॒ते॒ इति॑ ।
ध्रु॒वम् । अ॒स्य॒ । यत् । स्वम् । अजा॑मिम् । अ॒न्यः । श्र॒थय॑न्तम् ।
आ । अति॑रत् । द॒भ्रेभिः॑ । अ॒न्यः । प्र । वृ॒णो॒ति॒ । भूय॑सः ॥ ६ ॥

वरुणस्य उपलक्षणमेतत् इन्द्रस्य वरुणस्यच त्विषे दीप्त्यर्थं ओजोबलं नु क्षिप्रं मिमाते स्तोत्रेण निर्मिमाते यजमानपद्धयौ स्तोत्रेण हि बलं जायते किमर्थं महे महते शुल्काय धनाय ईदृशस्य धनस्य लाभार्थं अस्येन्द्रस्य वरुणस्यच ध्रुवं नित्यं स्वं स्वकीयं असाधारणं यदोजोविद्यते तदोजोमिमाते इत्यन्वयः तयोरिन्द्रावरुणयोः अन्यएकोवरुणः अजामिं अबन्धुं अस्तुवन्तं श्रथयन्तं हिंसन्तं कर्माण्यकुर्वन्तं अस्तोतारमयजमानं च आतिरत् अभिहन्ति अन्यएकः इन्द्रः दभ्रेभिः अल्पैरेवोपायैः भूयसः बहुतरान् शत्रून्प्रवृणोति प्रकर्षेणावृतान् बाधितान्करोति यद्वा भूयसोयजमानान् प्रवृणोति प्रवरानुत्कृष्टान् करोति ॥ ६ ॥

अथ सप्तमी—

नतमंहो॒नदु॑रि॒तानि॒मर्त्य॒मिन्द्रा॑वरुणा॒नतपः॑कु॒तश्च॒न ।
यस्य॑दे॒वा॒गच्छ॑थो॒वी॒थो॒अ॑ध्व॒रंनतंमर्त॑स्यनशते॒परि॑ह्वृतिः ॥ ७ ॥

न । तम् । अंहः॑ । न । दुः॒ऽइ॒तानि॑ । मर्त्य॑म् । इन्द्रा॑वरुणा ।
न । तपः॑ । कु॒तः॑ । च॒न । यस्य॑ । दे॒वा॒ । गच्छ॑थः । वी॒थः ।
अ॒ध्व॒रम् । न । तम् । मर्त॑स्य । न॒श॒ते॒ । परि॑ऽह्वृतिः ॥ ७ ॥

हे इन्द्रावरुणा इन्द्रावरुणौ तं मर्त्यं मनुष्यं अंहः पापं ननशते नव्याप्नोति नच दुरितानि दुर्गमनानि पापफलानि यं प्राप्नुवन्ति कुतश्चन कस्मादपि निमित्तात्तपः सन्तापश्च तं नप्राप्नोति हे देवादेवौ दानादिगुणयुक्ताविन्द्रावरुणौ यस्य मर्तस्य मनुष्यस्य अध्वरं यज्ञं गच्छथः प्राप्नुथोयुवाम् वीथः कामयेथेच यस्य हवींषि तं मनुष्यं परिह्वृतिः परिबाधा नशते उक्तप्रकारेण नव्याप्नोति ॥ ७ ॥

अथाष्टमी—

अ॒र्वाङ्न॑रा॒दैव्ये॒नाव॒सागत॒शृणु॒तंहवं॒यदि॑मे॒जुजो॑षथः ।
यु॒वोर्हि॒स॒ख्यमु॒तवा॒यदाप्यं॒मार्डी॒कमि॑न्द्रावरुणा॒नियच्छ॑तम् ॥८॥

अर्वाक् । नरा । दैव्येन । अवसा । आ । गतम् । शृणुतम् । हवम् ।
यदि । मे । जुजोषथः । युवोः । हि । सख्यम् । उत । वा । यत् ।
आप्यम् । मार्डीकम् । इन्द्रावरुणा । नि । यच्छतम् ॥ ८ ॥

हे नरा नेताराविन्द्रावरुणौ दैव्येन देवसंबन्धिना अवसा रक्षणेन सह अर्वागस्मदभिमुखं आगतमागच्छतम् आगत्यच मदीयं स्तोत्रं हवं शृणुतम् । यदि मे मम जुजोषथः प्रीयेथे मयिप्रीतिरस्तिचेत् युवाभ्यां आगन्तव्यं मदीयं स्तोत्रं श्रोतव्यञ्च भवतीत्यर्थः । युवोर्हि युवयोः खलु यत्सख्यं सखित्वं उतवा अपिच यदाप्यं आपित्वं बान्धवं मार्डीकं मृडीकस्य सुखस्य साधनं तदुभयं हे इन्द्रावरुणौ नियच्छतं अस्मभ्यं प्रयच्छतं ॥ ८ ॥

अथ नवमी—

अस्माकमिन्द्रावरुणाभरेभरेपुरोयोधाभवतंकृष्ट्योजसा ।
यद्वांहवन्तउभयेअधस्पृधिनरस्तोकस्यतनयस्यसातिषु ॥ ९ ॥

अस्माकम् । इन्द्रावरुणा । भरेऽभरे । पुरःऽयोधा । भवतम् ।
कृष्टिऽओजसा । यत् । वाम् । हवन्ते । उभये । अध ।
स्पृधि । नरः । तोकस्य । तनयस्य । सातिषु ॥ ९ ॥

हे कृष्ट्योजसा शत्रूणां कर्षणकं ओजोबलं ययोः तादृशौ हे इन्द्रावरुणौ भरेभरे संग्रामेसंग्रामे अस्माकं पुरोयोधा पुरस्ताद्योधारौभवतं यत् यौ वां युवां उभये उभयविधाः पूर्वकालीना इदानींतनाश्च नरो नेतारः स्तोतारः स्पृधि युद्धे यौ युवां हवन्ते अध अपिच तोकस्य पुत्रस्य तनयस्य पौत्रस्य सातिषु संभजनीयेषु निमित्तभूतेषुच यौ युवां हवन्ते तावस्माकं पुरोयोधा भवतमित्यन्वयः ॥ ९ ॥

अथ दशमी—

अस्मेइन्द्रोवरुणोमित्रोअर्यमाद्युम्नंयच्छन्तुमहिशर्मसप्रथः ।
अवध्रंज्योतिरदितेर्ऋतावृधोदेवस्यश्लोकंसवितुर्मनामहे ॥ १० ॥३॥

अस्मे इति । इन्द्रः । वरुणः । मित्रः । अर्यमा । द्युम्नम् ।
यच्छन्तु । महि । शर्म । सऽप्रथः । अवध्रम् । ज्योतिः । अदितेः ।
ऋतऽवृधः । देवस्य । श्लोकम् । सवितुः । मनामहे ॥ १० ॥ ३ ॥

अस्मे अस्मभ्यं इन्द्रादयः द्युम्नं द्योतमानं धनं यच्छन्तु प्रयच्छंतु तथा महि महत् सप्रथः सर्वतः पृथु विस्तीर्णं शर्म गृहं च प्रयच्छन्तु अपिच ऋतावृधः ऋतस्य यज्ञस्य वर्धयित्र्याः अदितेरदीनाया देवमातुः ज्योतिस्तेजश्च नोऽस्माकं अवध्रं अहिंसकमस्तु वयंच देवस्य दानादिगुणयुक्तस्य सवितुः सर्वस्य प्रेरकस्य श्लोकं स्तोत्रं मनामहे जानीमः कुर्मइत्यर्थः । यद्वा देवेन सवित्रा अस्मभ्यं देयं श्लोकं यशः मनामहे याचामहे ॥ १० ॥

॥ इति पञ्चमस्य षष्ठे तृतीयोवर्गः ॥३॥

युवांनरेति दशर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं जागतमैन्द्रावरुणं युवांनरेत्यनुक्रान्तम् । आभिप्लविकेषूक्थ्येषु स्तोमवृद्धौ प्रशास्तुः इदंसूक्तमावापार्थं सूत्रितंच—युवांनरापुनीषेवामिति ।

तत्र प्रथमा—

युवांनरापश्यमानासआप्यंप्राचागव्यन्तःपृथुपर्शवोययुः ।
दासाचवृत्राहतमार्याणिचसुदासमिन्द्रावरुणावसावतम् ॥ १ ॥

युवाम् । नरा । पश्यमानासः । आप्यम् । प्राचा । गव्यन्तः ।
पृथुऽपर्शवः । ययुः । दासा । च । वृत्रा । हतम् । आर्याणि ।
च । सुऽदासम् । इन्द्रावरुणा । अवसा । अवतम् ॥ १ ॥

हे नरा नेताराविन्द्रावरुणौ युवां षष्ठ्यर्थे द्वितीया युवयोः आप्यं बन्धुभावं पश्यमानासः पश्यन्तः युष्मद् बान्धवलाभार्थिनः गव्यन्तो गा आत्मनइच्छन्तोयजमानाः पृथुपर्शवः पृथुर्विस्तीर्णः पर्शुः पार्श्वास्थि येषां ते तथोक्ताः विस्तीर्णाश्वपर्शुहस्ताः सन्तः प्राचा प्राचीनं ययुः बर्हिराहरणार्थं गच्छन्ति पर्श्वाहि बर्हिराच्छिद्यते । तथाच तैत्तिरीयकम्—अश्वपर्श्वाबर्हिरच्छैतीति । हे इन्द्रावरुणौ युवां दासा दासानि उपक्षपयितॄणि च वृत्रा वृत्राण्यावरकाणि

---

१ तै० ब्रा० ३. २. २.।

शत्रुजातानि आर्याणि कर्मानुष्ठानपराणिच शत्रुजातानि हतं हिंस्तम् अपिच सुदासं असमद्याज्यं एतत्संज्ञं राजानं अवसा रक्षणेन सार्धं अवतमागच्छतम् ॥ १ ॥

अथ द्वितीया–

यत्रा॒नर॑ः स॒मय॑न्ते कृ॒तध्व॑जो॒ यस्मि॑न्ना॒जा भव॑ति॒ किं च॒न प्रि॒यम् ।
यत्रा॒ भय॑न्ते॒ भुव॑ना स्व॒र्दृश॒स्तत्रा॑ न इन्द्रावरुणा॒धि वो॑चतम् ॥ २ ॥

यत्र॑ । नर॑ः । सम्ऽअय॑न्ते । कृ॒तऽध्व॑जः । यस्मि॑न् । आ॒जा ।
भव॑ति । किम् । च॒न । प्रि॒यम् । यत्र॑ । भय॑न्ते । भुव॑ना ।
स्व॒ःऽदृश॑ः । तत्र॑ । नः॒ । इन्द्रा॒वरु॒णा॒ । अधि॑ । वो॒च॒त॒म् ॥ २ ॥

यत्र यस्मिन्संग्रामे नरोमनुष्याः कृतध्वजः उच्छ्रितध्वजाः समयन्ते युद्धार्थं संगच्छन्ते यस्मिंश्च आजा आजौ युद्धे चनेति निपातद्वयसमुदायोविभज्ययोजनीयः किञ्च किमपि प्रियमनुकूलं नभवति अपितु सर्वं दुष्करं भवति । यत्रच युद्धे भुवना भुवनानि भूतजातानि स्वर्दृशः शरीरपातादूर्ध्वं स्वर्गस्य द्रष्टारोवीताश्च भयन्ते बिभ्यति तत्र तादृशे संग्रामे हे इन्द्रावरुणौ नोस्मानधिवोचतं अस्मत्पक्षपातवचनौ भवतम् ॥ २ ॥

अथ तृतीया–

सं भूम्या॒ अन्ता॑ ध्व॒सि॒रा अ॑दृक्ष॒तेन्द्रा॑वरुणा दि॒वि घोष॒ आरु॑हत् ।
अस्थु॒र्जना॑नामुप॒ माम॑रा॑तयो॒ऽर्वागव॑सा हवनश्रुता॒ गत॑म् ॥ ३ ॥

सम् । भूम्याः॑ । अन्ताः॑ । ध्व॒सि॒राः । अ॒दृ॒क्ष॒त॒ । इन्द्रा॑वरुणा । दि॒वि ।
घोषः॑ । आ । अ॒रु॒ह॒त् । अस्थुः॑ । जना॑नाम् । उप॑ । माम् । अरा॑तयः
अ॒र्वाक् । अव॑सा । ह॒व॒न॒ऽश्रु॒ता॒ । आ । ग॒त॒म् ॥ ३ ॥

हे इन्द्रावरुणौ भूम्याअन्ताः पर्यन्ताः ध्वसिराः सैनिकैर्ध्वस्ताः समदृक्षत संदृश्यन्ते तथा दिवि द्युलोके घोषः सैनिकानां शब्दश्च आरुहत् आरूढोभवत् जनानामस्मदीयानां भटानां अरातयः शत्रवः मामुपास्थुः उपास्थिताः एवं प्रवर्तमानेस्मिन् युद्धे हे हवनश्रुता आह्वानश्रवणशीलाविन्द्रावरुणौ अर्वागस्मदभिमुखं अवसा रक्षणेन सह आगतमागच्छतम् ॥ ३ ॥

अथ चतुर्थी–

इन्द्रावरुणावधर्नाभिरप्रति भेदं वन्वन्ता प्रसुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥ ४ ॥

इन्द्रावरुणा । वधर्नाभिः । अप्रति । भेदम् । वन्वन्ता ।
प्र । सुऽदासम् । आवतम् । ब्रह्माणि । एषाम् । शृणुतम् । हवीमनि ।
सत्या । तृत्सूनाम् । अभवत् । पुरःऽहितिः ॥ ४ ॥

हे इन्द्रावरुणा इन्द्रावरुणौ वधनाभिर्वधकैरायुधैः अप्रतिगतं अप्राप्तं भेदम् एतत्संज्ञं सुदासः शत्रुं वन्वन्ता हिंसन्तौ युवां सुदासं शोभनं ददातीति सुदाः एतत्संज्ञं मम याज्यं राजानं प्रावतं प्रकर्षेणारक्षतम् एषां तृत्सूनां मम याज्यानां ब्रह्माणि स्तोत्राणि शृणुतं अशृणुतं कदा हवीमनि आहूयन्तेस्मिन्युद्धार्थं परस्परमिति हवीमा संग्रामः तस्मिन् यस्मादेवं तस्मात् तृत्सूनां एतत्संज्ञानां मम याज्यानां पुरोहितिः मम पुरोधानं सत्या सत्यफलमभवत् तेषु यन्ममपौरोहित्यं तत्सफलं जातमित्यर्थः ॥ ४ ॥

अथ पंचमी–

इन्द्रावरुणावभ्यातपन्ति माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥ ५ ॥ ४ ॥

इन्द्रावरुणौ । अभि । आ । तपन्ति । मा । अघानि । अर्यः ।
वनुषाम् । अरातयः । युवम् । हि । वस्वः । उभयस्य । राजथः ।
अध । स्म । नः । अवतम् । पार्ये । दिवि ॥ ५ ॥ ४ ॥

हे इन्द्रावरुणौ अर्यः अरेः शत्रोः संबन्धीनि अघान्याहन्तॄण्यायुधानि मा मां अभ्यातपन्ति अभितोबाधन्ते अपिच वनुषां हिंसकानां मध्ये अरातयः अभिगमनशीलाः शत्रवश्च मामभितपन्ति युवं हि युवां खलु उभयस्य पार्थिवस्य दिव्यस्यच वस्वोवसुनोधनस्य राजथः ईशाथे राजतिरैश्वर्यकर्मा अधस्म अतः कारणात् पार्ये तरणीये दिवि दिवसे युद्धदिने नोस्मानवतं रक्षतम् ॥ ५ ॥

॥ इति पञ्चमस्य षष्ठे चतुर्थोवर्गः ॥ ४ ॥

अथ षष्ठी—

युवांहवन्तउभयासआजिष्विन्द्रंचवस्वोवरुणंचसातये ।
यत्रराजभिर्दशभिर्निबाधितंप्रसुदासमावतंतृत्सुभिःसह ॥ ६ ॥

युवाम् । हवन्ते । उभयासः । आजिषु । इन्द्रम् । च । वस्वः ।
वरुणम् । च । सातये । यत्र । राजऽभिः । दशऽभिः ।
निऽबाधितम् । प्र । सुऽदासम् । आवतम् । तृत्सुऽभिः । सह ॥ ६ ॥

उभयासः उभयविधाः सुदाःसंज्ञोराजा तत्सहायभूतास्तृत्सवश्च एवं द्विप्रकाराजनाः आजिषु संग्रामेषु इन्द्रश्च वरुणश्च युवां हवन्ते आह्वयन्ते किमर्थं वस्वोधनस्य सातये संभजनार्थं यत्र येष्वाजिषु दशभिर्दशसंख्याकैः राजभिः शत्रुभूतैः नृपैः निबाधितं नितरां हिंसितं सुदासं तृत्सुभिः सहवर्तमानं प्रावतं युवां प्रकर्षेणारक्षतं तेष्वाजिष्वित्यन्वयः ॥ ६ ॥

अथ सप्तमी—

दशराजानःसमिताअयज्यवःसुदासमिन्द्रावरुणानयुयुधुः ।
सत्यानृणामद्मसदामुपस्तुतिर्देवाएषामभवन्देवहूतिषु ॥ ७ ॥

दश । राजानः । सम्ऽइताः । अयज्यवः । सुऽदासम् ।
इन्द्रावरुणा । न । युयुधुः । सत्या । नृणाम् । अद्मऽसदाम् ।
उपऽस्तुतिः । देवाः । एषाम् । अभवन् । देवऽहूतिषु ॥ ७ ॥

हे इन्द्रावरुणौ दशसंख्याकाः राजानः सुदासः शत्रवः समिताः संगताः परस्परं समवेताः अयज्यवः अयजमानाः एवंभूतास्ते सुदासं एतत्संज्ञं एकमपिराजानं न युयुधुः न सम्प्रजह्रुः युवाभ्यामनुगृहीतं तं प्रहर्तुं न शेकुः तदानीं अद्मसदां अद्मनि अन्ने हविषि सीदन्तीति अद्मसदऋत्विजः हविर्भिर्युक्तानां नृणां यज्ञस्य नेतॄणां ऋत्विजां उपस्तुतिः स्तोत्रं सत्या सफलाभूत् अपिच एषां देवहूतिषु देवाहूयन्तेयेषु इतिदेवहूतयोयज्ञाः तेषु सर्वे च देवाअभवन् युष्मदनुग्रहात्प्रादुर्भवन्ति ॥ ७ ॥

अथाष्टमी—

दाशराज्ञेपरियत्तायविश्वतःसुदासइन्द्रावरुणावशिक्षतम् ।
श्वित्यंचोयत्रनमसाकपर्दिनोधियाधीवन्तोअसपन्ततृत्सवः ॥८॥

दाशऽराज्ञे । परिऽयत्ताय । विश्वतः । सुऽदासे । इन्द्रावरुणौ ।
अशिक्षतम् । श्वित्यंचः । यत्र । नमसा । कपर्दिनः ।
धिया । धीऽवन्तः । असपन्त । तृत्सवः ॥ ८ ॥

हे इन्द्रावरुणौ दाशराज्ञे दशशब्दस्य छान्दसोदीर्घः विभक्तिव्यत्ययः दशभीराजभिः शत्रुभूतैः विश्वतः सर्वतः परियत्ताय परिवेष्टिताय सुदासे राज्ञे अशिक्षतं बलं प्रायच्छतम् यत्र यस्मिन्देशे श्वित्यञ्चः श्वितं श्वैत्यं नैर्मल्यं अञ्चन्तोगच्छन्तः कपर्दिनोजटिलाधीवन्तः कर्मभियुंक्तास्तृत्सवः वसिष्ठशिष्याः एतत्संज्ञाऋत्विजः नमसा हविर्लक्षणेनान्नेन धिया स्तुत्या च असपन्त पर्यचरन् तस्मिन्देशे युवां तस्मै राज्ञे बलं प्रायच्छतमित्यर्थः ॥ ८ ॥

अथ नवमी—

वृत्राण्यन्यःसमिथेषुजिघ्नतेव्रतान्यन्योअभिरक्षतेसदा ।
हवामहेवांवृषणासुवृक्तिभिरस्मेइन्द्रावरुणाशर्मयच्छतम् ॥ ९ ॥

वृत्राणि । अन्यः । सम्ऽइथेषु । जिघ्नते । व्रतानि । अन्यः ।
अभि । रक्षते । सदा । हवामहे । वाम् । वृषणा । सुवृक्तिऽभिः ।
अस्मे इति । इन्द्रावरुणा । शर्म । यच्छतम् ॥ ९ ॥

हे इन्द्रावरुणौ युवयोरन्यएकइन्द्रः वृत्राणि शत्रून् समिथेषु संग्रामेषु जिघ्नते हन्ति अन्यएकोवरुणः सदा सर्वदा व्रतानि कर्माणि अभिरक्षते अभितः सर्वतोरक्षति हे वृषणा कामानां वर्षिताराविन्द्रावरुणौ तथाविधौ वां युवां सुवृक्तिभिः सुप्रवृत्ताभिः स्तुतिभिः हवामहे आह्वयामहे आहूतौ च युवां अस्मे अस्मभ्यं शर्म सुखं यच्छतं दत्तम् ॥ ९ ॥

अथ दशमी—

अस्मेइन्द्रोवरुणोमित्रोअर्यमाद्युम्नंयच्छन्तुमहिशर्मसप्रथः ।
अवध्रंज्योतिरदितेॠतावृधोदेवस्यश्लोकंसवितुर्मनामहे ॥ १० ॥५॥

अस्मे इति । इन्द्रः । वरुणः । मित्रः । अर्यमा । द्युम्नम् । यच्छन्तु ।
महि । शर्म । सऽप्रथः । अवध्रम् । ज्योतिः । अदितेः ।
ऋतऽवृधः । देवस्य । श्लोकम् । सवितुः । मनामहे ॥ १० ॥ ५ ॥

अस्मे इन्द्रइति व्याख्यातेयम् अक्षरार्थस्तु इन्द्रादयोस्मभ्यं द्योतमानं धनंप्रयच्छंतु सर्वतोविस्तीर्णं महद्गृहञ्च यज्ञस्य वर्धयित्र्याः अदीनायादेवमातुः तजेश्च अस्माकमबाधकं भवतु यपञ्च प्रेरकस्य देवस्य स्तोत्रं मनामहे कुर्महे ॥ १०॥

॥ इति पञ्चमस्य षष्ठे पञ्चमोवर्गः ॥ ५ ॥

आवामिति पञ्चर्चं चतुर्दशं सूक्तम् वासिष्ठं त्रैष्टुभमैन्द्रावरुणम् अनुक्रान्तञ्च—आवांपञ्चेति । उक्थ्ये तृतीयसवने मैत्रावरुणशस्त्रे इदंसूक्तम् सूत्रितञ्च—आवांराजानाविन्द्रावरुणामधुमत्तमस्येति याज्येति ।

तत्र प्रथमा—

आवांराजानावध्वरेववृत्यांहव्येभिरिन्द्रावरुणानमोभिः ।
प्रवांघृताचीबाह्वोर्दधानापरित्मनाविषुरूपाजिगाति ॥ १ ॥

आ । वाम् । राजानौ । अध्वरे । ववृत्याम् । हव्येभिः ।
इन्द्रावरुणा । नमःऽभिः । प्र । वाम् । घृताची । बाह्वोः ।
दधाना । परि । त्मना । विषुऽरूपा । जिगाति ॥ १ ॥

हे राजानौ राजमानौ ईश्वरौवा इन्द्रावरुणौ अध्वरे हिंसारहितेस्मिन्यागे वां युवां हव्येभिर्हविर्भिर्नमोभिः स्तोत्रैश्च आववृत्यां आवर्तयामि अपिच बाह्वोर्हस्तयोर्दधाना धार्यमाणा विषुरूपा रूप्यतइति रूपं हविः विविधहविर्युक्ता घृताची घृतमञ्चन्ती जुहू त्मना आत्मना स्वयमेव वां युवां परि प्रजिगाति अभिप्रगच्छति यद्वा विषुरूपा नानाविधरूपौ वामिति योज्यम् ॥१॥

अथ द्वितीया–

युवोराष्ट्रंबृहदिन्वतिद्यौर्यौसेतृभिररज्जुभिःसिनीथः।
परिनोहेळोवरुणस्यवृज्याउरुंनइन्द्रःकृणवदुलोकम् ॥ २ ॥

युवोः। राष्ट्रम्। बृहत्। इन्वति। द्यौः। यौ। सेतृऽभिः।
अरज्जुऽभिः सिनीथः। परि। नः। हेळः। वरुणस्य। वृज्याः।
उरुम्। नः। इन्द्रः। कृणवत्। ॐ इति। लोकम् ॥ २ ॥

हे इन्द्रावरुणौ युवोर्युवयोः बृहन्महद् राष्ट्रं राज्यं द्यौः द्युलोकरूपं इन्वति वृष्ट्या सर्वान् प्रीणयति यौ युवां सेतृभिर्बन्धकैः अरज्जुभिः रज्जुरहितैः रोगादिभिः सिनीथः पापकृतोबध्नीथः षिञ् बन्धने इतिधातुः तयोर्मध्ये वरुणस्य वारयितुर्देवस्य हेळः क्रोधः नोस्मान्परिवृज्याः परिवृणक्तु परित्यज्यान्यत्रगच्छतु। इन्द्रउ इन्द्रश्च उरुं विस्तीर्णं लोकं स्थानं कृणवत्करोतु ॥ २ ॥

अथ तृतीया–

कृतंनोयज्ञंविदथेषुचारुंकृतंब्रह्माणिसूरिषुप्रशस्ता।
उपोरयिर्देवजूतोनएतुप्रणःस्पार्हाभिरूतिभिस्तिरेतम् ॥ ३ ॥

कृतम्। नः। यज्ञम्। विदथेषु। चारुम्। कृतम्। ब्रह्माणि।
सूरिषु। प्रऽशस्ता। उपो इति। रयिः। देवऽजूतः। नः।
एतु। प्र। नः। स्पार्हाभिः। ऊतिऽभिः। तिरेतम् ॥ ३ ॥

हे इन्द्रावरुणौ नोस्माकं विदथेषु गृहेषु क्रियमाणं यज्ञं चारुं शोभनं फलसहितं कृतं कुरुतम् तथा सूरिषु स्तोतृष्वस्मासु विद्यमानानि ब्रह्माणि परिवृढानि स्तोत्राणि प्रशस्ता प्रशस्तानि उत्कृष्टानि फलभाञ्जि कृतं कुरुतम्। अपिच देवजूतः देवाभ्यां युवाभ्यां प्रेरितोरयिर्धनं नोस्मानुपैतु प्राप्नोतु तथा स्पार्हाभिः स्पृहणीयाभिरूतिभिः रक्षाभिर्नोस्मान् प्रतिरेतं युवां वर्धयेथाम् प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ ३ ॥

अथ चतुर्थी–

अस्मेइन्द्रावरुणाविश्ववारंरयिंधत्तंवसुमन्तंपुरुक्षुम् ।
प्रयआदित्योअनृतामिनात्यमिताशूरोदयतेवसूनि ॥ ४ ॥

अस्मे इति । इन्द्रावरुणा । विश्वऽवारम् । रयिम् । धत्तम् ।
वसुऽमन्तम् । पुरुऽक्षुम् । प्र । यः । आदित्यः । अनृता ।
मिनाति । अमिता । शूरः । दयते । वसूनि ॥ ४ ॥

हे इन्द्रावरुणौ अस्मे अस्मभ्यं रयिं धनं धत्तं प्रयच्छतम् कीदृशं विश्ववारं विश्वैः सर्वैर्वरणीयं संभजनीयं वसुमन्तं निवासयुक्तं पुरुक्षुं बह्वन्नं पुरुभिर्बहुभिः प्रशस्यं वा आदित्यः अदितेः पुत्रोयोवरुणः अनृता अनृतानि सत्यरहितानि भूतानि प्रमिनाति प्रहिनस्ति मीञ् हिंहिंसायामितिधातुः शूरः शौर्यवान् सवरुणः अमिता अमितानि अपरिमितानि वसूनि धनानि दयते स्तोतृभ्योददाति ॥ ४ ॥

अथ पंचमी–

इयमिन्द्रंवरुणमष्टमेगीःप्रावत्तोकेतनयेतूतुजाना ।
सुरत्नासोदेववीतिंगमेमयूयंपातस्वस्तिभिःसदानः ॥ ५ ॥ ६ ॥

इयम् । इन्द्रम् । वरुणम् । अष्ट । मे । गीः । प्र । आवत् । तोके ।
तनये । तूतुजाना । सुऽरत्नासः । देवऽवीतिम् । गमेम ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ ६ ॥

मे मदीया इयं गीः स्तुतिः इन्द्रं वरुणंच अष्ट अश्नुतां व्याप्नोतु तथा तूतुजाना मया-प्रेर्यमाणा सा तोके पुत्रे तनये पौत्रे च विषये प्रावत् प्ररक्षत्वस्मान् वयञ्च सुरत्नासः शोभनधनाः सन्तोदेववीतिं देवैः कामयितव्यं यज्ञं गमेम प्राप्नुयाम । हे इन्द्रावरुणादयः सर्वेदेवाः यूयं स्वस्तिभिः कल्याणैर्नोस्मान्सदा सर्वदा पात रक्षत ॥ ५ ॥

॥ इति पञ्चमस्य षष्ठे षष्ठोवर्गः ॥ ६ ॥

पुनीषेवामिति पंचर्चं पञ्चदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रावरुणं पुनीषइत्यनुक्रान्तं। आभिप्लविकेपूक्थ्येषु तृतीयसवने स्तोमवृद्धौ प्रशास्तुः इदमावापार्थं सूत्रितंच—युवांनरापुनीषेवामिति।

तत्र प्रथमा--

पुनीषेवांमरक्षसंमनीषांसोममिन्द्रांयवरुणायजुह्वत्।
घृतप्रतीकामुषसंनदेवींतानोयामंन्नुरुष्यतामभीकें॥ १ ॥

पुनीषे। वाम्। अरक्षसम्। मनीषाम्। सोमम्। इन्द्राय।
वरुणाय। जुह्वत्। घृतऽप्रतीकाम्। उषसम्। न। देवीम्।
ता। नः। यामन्। उरुष्यताम्। अभीके॥ १ ॥

हे इन्द्रावरुणौ वां युवाभ्यां युवयोरर्थं अरक्षसं रक्षोरहितां राक्षसैरसंस्पृष्टां मनीषां स्तुतिं पुनीषे शोधयामि किंकुर्वन् इन्द्राय वरुणायच सोमं जुह्वत् इन्द्रंवरुणंचोद्दिश्य सोमं अग्नौप्रक्षिपन्। कीदृशीं मनीषाम् देवीं द्योतमानाम् उषसंन उषसमिव घृतप्रतीकांदीप्तावयवां शिष्टःपरोक्षकृतः ता ताविन्द्रावरुणौ अभीके अभिगते युद्धे यामन् यामनि युद्धार्थं गमनेसति नोस्मान् उरुष्यतां रक्षताम्॥ १ ॥

अथ द्वितीया—

स्पर्धन्तेवाउदेवहूयेअत्रयेषुध्वजेषुदिद्यवःपतन्ति।
युवंतांइन्द्रावरुणावमित्रान्हतंपराचःशर्वाविषूचः॥ २ ॥

स्पर्धन्ते। वै। ऊँ इति। देवऽहूये। अत्र। येषु। ध्वजेषु।
दिद्यवः। पतन्ति। युवम्। तान्। इन्द्रावरुणौ।
अमित्रान्। हतम्। पराचः। शर्वा। विषूचः॥ २ ॥

देवहूये देवाविजिगीषवोयोद्धारोहूयन्ते युद्धार्थं परस्परमाहूयन्ते इतिदेवहूयः सङ्ग्रामः अत्रास्मिन् देवहूये संग्रामे स्पर्धन्ते वै शत्रवोस्माभिः स्पर्धन्ते खलु उइतिपूरकः येषु संग्रामेषु

ध्वजेषु पताकासु दिद्यवः शत्रुक्षिप्तान्यायुधानि पतन्ति तान् तेषु संग्रामेषु विद्यमानान् अमित्रान् शत्रून् हे इन्द्रावरुणौ युवं युवां शर्वा शरुणा हिंसकेनायुधेन पराचः पराङ्मुखान् विषूचः विविधगतींश्च हतं हिंस्तं तथा ते शत्रवः पराङ्मुखाः इतस्ततः पलायमानाश्च भवन्ति तथा तान्बाधेथामित्यर्थः ॥ २ ॥

अथ तृतीया–

आप॑श्चि॒द्धि स्वय॑शसः॒ सदः॑सु दे॒वीरिन्द्रं॒ वरु॑णं दे॒वता॒ धुः ।
कृ॒ष्टीर॒न्यो धा॒रय॑ति॒ प्रवि॑क्ता वृ॒त्राण्य॒न्यो अ॑प्र॒तीनि॑ ह॒न्ति ॥ ३ ॥

आपः॑ । चि॒त् । हि । स्वऽय॑शसः । सदः॑ऽसु । दे॒वीः । इन्द्र॑म् ।
वरु॑णम् । दे॒वता॑ । धुरिति॑ धुः । कृ॒ष्टीः । अ॒न्यः । धा॒रय॑ति ।
प्रऽवि॑क्ताः । वृ॒त्राणि॑ । अ॒न्यः । अ॒प्र॒तीनि॑ । ह॒न्ति ॥ ३ ॥

आपश्चित् अब्विकाराः सोमाश्च स्वयशसः स्वायत्तयशस्काः देवीर्द्योतमानाः सन्तः सदःसु सदनेषु स्थानेषु इन्द्रं वरुणंच देवता एते द्वेदेवते धुः धारयन्ति अवस्थापयन्ति सोमेनाप्यायिताहि देवताः स्वेस्वेस्थानेवतिष्ठन्ते । यद्वा वसतीवर्याख्या आपएव सोमाभिषवद्वारा सदनेषु इन्द्रं वरुणञ्च धारयन्ति तयोरिन्द्रावरुणयोरन्यएकः प्रविक्ताः पृथकृताः पुण्यापुण्यविवेकेन विचित्रफलभोक्त्रीः कृष्टीः प्रजा असाङ्कर्येण धारयति अन्यइन्द्रः वृत्राणि शत्रुजातानि अप्रतीनि अन्यैरप्रतिगतानि हन्ति हिनस्ति ॥ ३ ॥

अथ चतुर्थी–

स सु॒क्रतु॑र्ऋ॒तचि॑दस्तु॒ होता॒ य आ॑दित्य॒ शव॑सा वां॒ नम॑स्वान् ।
आ॒व॒वर्त॒दव॑से वां ह॒विष्मा॒नस॒दित्स सु॑वि॒ताय॒ प्रय॑स्वान् ॥ ४ ॥

सः । सु॒ऽक्रतुः॑ । ऋ॒तऽचि॑त् । अ॒स्तु॒ । होता॑ । यः । आ॒दि॒त्या॒ ।
शव॑सा । वा॒म् । नम॑स्वान् । आ॒ऽव॒वर्त॑त् । अव॑से । वा॒म् ।
ह॒विष्मा॑न् । अस॑त् । इ॒त् । सः । सु॒वि॒ताय॑ । प्रय॑स्वान् ॥ ४ ॥

सुक्रतुः शोभनकर्मा शोभनप्रज्ञोवा सहोता स्तोता ऋतचिद् ऋतस्योदकस्य यज्ञस्यवा चेता निचेतास्तु भवतु हे आदित्याअदितेःपुत्राविन्द्रावरुणौ छान्दसः सांहितिकोह्रस्वः योनमस्वान् नमसा स्तुत्यानमस्कारेणवा युक्तःसन् शवसा बलेन युक्तौ वां युवां परिचरतीतिशेषः ससुक्रतुरित्यन्वयः।अपिच यो हविष्मान् हविर्भिर्युक्तः सन् अवसे तर्पणार्थं वां युवां आववर्तत् आवर्तयेत् सयजमानः मयस्वानन्नवान्भूत्वा सुविताय सुष्टु प्राप्तव्याय फलाय असदित् भवेदेव ॥ ४ ॥

अथ पंचमी–

इ॒यमिन्द्रं॒ वरु॑णमष्ट मे॒ गीः॒ प्राव॑त्तो॒के तन॑ये॒ तूतु॑जाना।
सु॒रत्ना॑सो दे॒ववी॑तिं गमेम यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ५ ॥ ७ ॥

इ॒यम्। इन्द्र॑म्। वरु॑णम्। अ॒ष्ट॒। मे॒। गीः। प्र। आ॒व॒त्।
तो॒के। तन॑ये। तूतु॑जाना। सु॒ऽरत्ना॑सः। दे॒वऽवी॑तिम्। ग॒मे॒म॒।
यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। सदा॑। नः॒ ॥ ५ ॥ ७ ॥

व्याख्यातेयं मदीयास्तुतिरिन्द्रं वरुणं चाष्टुतम् मया प्रेर्यमाणा सा पुत्रे पौत्रेच विषये अस्मान् प्ररक्षतु वयं शोभनधनाः सन्तः उत्तरोत्तरं यज्ञं प्राप्नुयाम हे इन्द्रावरुणादयोदेवाः अस्मान्सर्वदा कल्याणैः रक्षत ॥ ५ ॥

॥ इति पञ्चमस्य षष्ठे सप्तमोवर्गः ॥ ७ ॥

धीरात्वस्येत्यष्टर्चं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वरुणदेवत्यं तथाचानुक्रान्तम्–धीराष्टौवारुणंहेति । गतोविनियोगः ।

तत्र प्रथमा–

धीरा॒ त्व॑स्य महि॒ना ज॒नूंषि॒ वि यस्त॒स्तम्भ॒ रोद॑सी चिदु॒र्वी।
प्र नाक॑मृ॒ष्वं नु॑नुदे बृ॒हन्तं॑ द्वि॒ता नक्ष॑त्रं प॒प्रथ॑च्च॒ भूम॑ ॥ १ ॥

धीरा । तु । अस्य । महिना । जनूंषि । वि । यः । तस्तम्भ ।
रोदसी इति । चित् । उर्वी इति । प्र । नाकम् । ऋष्वम् ।
नुनुदे । बृहन्तम् । द्विता । नक्षत्रम् । पप्रथत् । च । भूम ॥ १ ॥

अस्य वरुणस्य जनूंषि जन्मानि महिना महिम्ना तु क्षिप्रं धीरा धीराणि धैर्यवन्ति भवन्ति योवरुणः उर्वी विस्तीर्णे रोदसी चिद् द्यावापृथिव्यावपि वितस्तंभ विविधं स्तम्भे स्वकीये स्थाने स्थिते अकरोद् यश्च बृहन्तं महान्तं नाकमादित्यं नक्षत्रं च ऋष्वं दर्शनीयं द्विता द्वैधं प्रनुनुदे प्रेरयतिस्म अहनि सूर्यं दर्शनीयं प्रेरयति रात्रौ नक्षत्रं तथेति द्विप्रकारः। भूम भूमिं च यः पप्रथद् अप्रथयद् विस्तारितवान् तस्यास्य वरुणस्येत्यन्वयः ॥१॥

अथ द्वितीया—

उतस्वयातन्वा३संवदेतत्कदान्व१न्तर्वरुणेभुवानि ।
किंमेहव्यमहृणानोजुषेतकदामृळीकंसुमनाअभिख्यम् ॥ २ ॥

उत । स्वया । तन्वा । सम् । वदे । तत् । कदा । नु । अन्तः ।
वरुणे । भुवानि । किम् । मे । हव्यम् । अहृणानः ।
जुषेत । कदा । मृळीकम् । सुऽमनाः । अभि । ख्यम् ॥ २ ॥

वरुणं शीघ्रं दिदृक्षमाणऋषिरनयावितर्कयति उतेति विचिकित्सायाम् उत किं स्वया तन्वा स्वीयेन आत्मीयेन शरीरेण संवदे सहवदनं करोमि आहोस्विद् तत्तेन वरुणेन सहसंवदे कदानु कदा खलु वरुणे देवे अन्तर्भूतोभवानि वरुणस्य चित्ते संलग्नोभवानीत्यर्थः अपिच मे मदीयं हव्यं स्तोत्रं हविर्वा अहृणानोक्रुध्यन् वरुणः किं केन हेतुना जुषेत सेवेत सुमनाः शोभनमनस्कः सन्नहं कदा कस्मिन्काले मृळीकं सुखयितारं वरुणं अभिख्यं अभिपश्येयम् ॥२॥

अथ तृतीया—

पृच्छेतदेनोवरुणदिदृक्षूपोएमिचिकितुषोविपृच्छम् ।
समानमिन्मेकवयश्चिदाहुरयंहतुभ्यंवरुणोहृणीते ॥ ३ ॥

पृच्छे । तत् । एनः । वरुण । दिदृक्षु । उपो इति । एमि ।
चिकितुषः । विऽपृच्छम् । समानम् । इत् । मे । कवयः ।
चित् । आहुः । अयम् । ह । तुभ्यम् । वरुणः । हृणीते ॥ ३ ॥

हे वरुण तदेनः पापं पृच्छे त्वां पृच्छामि दिदृक्षु छान्दसः सुलोपः द्रष्टुमिच्छन्नहं येन पापेन हेतुना त्वदीयैः पाशैर्बद्धोस्मि पृष्टःसन् तत्पापं कथय अहं विपृच्छं विविधं प्रष्टुं चिकितुषोविदुषोजनान् उपोएमि उपागाम् ते कवयश्चित् क्रान्तदर्शिनोजनाश्च मे मह्यं समानमित् समानमेव एकरूपमेव आहुः अकथयन् यदाहुस्तदाह हे स्तोतः तुभ्यं अयं ह अयमेव वरुणो हृणीते क्रुध्यतीति अतः क्रोधं परित्यज्य अस्मान्पाशेभ्योमोचय ॥ ३ ॥

अथ चतुर्थी–

किमागआसवरुणज्येष्ठंयत्स्तोतारंजिघांससिसखायम् ।
प्रतन्मेवोचोदूळभस्वधावोवत्वानेनानमसातुरइयाम् ॥ ४ ॥

किम् । आगः । आस । वरुण । ज्येष्ठम् । यत् । स्तोतारम् ।
जिघांससि । सखायम् । प्र । तत् । मे । वोचः । दुःऽदभ ।
स्वधाऽवः । अव । त्वा । अनेनाः । नमसा । तुरः । इयाम् ॥ ४ ॥

हे वरुण ज्येष्ठमधिकं किं आगः आस कोपराधोमयाकृतोबभूव यत् येन आगसा सखायं मित्रभूतं सन्तं स्तोतारं जिघांससि हन्तुमिच्छसि । हे दूळभ दुर्दभ अन्यैर्बाधितुमशक्य स्वधावस्तेजस्विन् हे वरुण तदागः मे मह्यं प्रवोचः प्रब्रूहि एवं सति तत्प्रायश्चित्तं कृत्वा अनेनाः अपापः सन्नहंतुरस्त्वरमाणः शीघ्रः नमसा नमस्कारेण हविषा वा त्वा त्वां अवेयाम् अवगच्छेयम् ॥ ४ ॥

अथ पञ्चमी–

अवद्रुग्धानिपित्र्यासृजानोवयावयंचकृमातनूभिः ।
अवराजन्पशुतृपंनतायुंसृजावत्संनदाम्नोवसिष्ठम् ॥ ५ ॥

अर्व । द्रुग्धानि । पित्र्यां । सृज । नः । अर्व । या । वयम् ।
चकृम । तनूभिः । अर्व । राजन् । पशुऽतृपम् । न । तायुम् ।
सृज । वत्सम् । न । दाम्नः । वसिष्ठम् ॥ ५ ॥

हे वरुण पित्र्या पितृतः प्राप्तानि नोस्मदीयानि द्रुग्धानि द्रोहान् बन्धनहेतुभूतान् अवसृज विमुञ्च अस्मत्तोविश्लेषय वयंच या यानि द्रोहजातानि तनुभिः शरीरैः चकृम कृतवन्तः स्म तानिच अवसृज । हे राजन् राजमान वरुण पशुतृपं न तायुं स्तैन्यप्रायश्चित्तं कृत्वा अवसाने घासादिभिः पशूनां तर्पयितारं स्तेनमिव दाम्नोरज्जोर्वत्सं न वत्समिव च वसिष्ठं मां बन्धकात्पापादवसृज विमुञ्च ॥ ५ ॥

अथ षष्ठी—

नसस्वोदक्षोवरुणध्रुतिःसासुरामन्युर्विभीदकोअचित्तिः ।
अस्तिज्यायान्कनीयसउपारेस्वप्नश्चनेदनृतस्यप्रयोता ॥ ६ ॥

न । सः । स्वः । दक्षः । वरुण । ध्रुतिः । सा । सुरा । मन्युः ।
विऽभीदकः । अचित्तिः । अस्ति । ज्यायान् । कनीयसः ।
उपऽअरे । स्वप्नः । चन । इत् । अनृतस्य । प्रऽयोता ॥ ६ ॥

हे वरुण सः स्वोदक्षः पुरुषस्य स्वरूपबलं पापप्रवृत्तौ कारणं न भवति किं तर्हि ध्रुतिः स्थिरा उत्पत्तिसमयएव निर्मिता दैवगतिः कारणम् । ध्रुगतिस्थैर्ययोरितिधातुः। साच ध्रुतिः वक्ष्यमाणरूपासुरा प्रमादकारिणी मन्युः क्रोधश्च गुर्वादिविषयः सन् अनर्थहेतुः विभीदकः द्यूतसाधनोक्षः सच द्यूतेषु पुरुषं प्रेरयन्ननर्थहेतुर्भवति अचित्तिः अज्ञानं अविवेककारणं अतईदृशी दैवकृतिरेव पुरुषस्य पापप्रवृत्तौ कारणम् अपिच कनीयसःअल्पस्य हीनस्य पुरुषस्य पापप्रवृत्तौ उपारे उपागते समीपे नियंतृत्वेनस्थितः ज्यायानधिकः ईश्वरोस्ति सएव तं पापेप्रवर्तयति तथाचाम्नातम्—एषह्येवासाधुकर्मकारयति तंयमधोनिनीषतइति । एवंच सतिस्वप्नश्चनस्वप्नोपि अनृतस्य पापस्य प्रयोता प्रकर्षेण मिश्रयिता भवति इदितिपूरकःस्वप्ने कृतैरपिकर्मभिर्बहूनि पापानि जायन्ते किमुवक्तव्यं जाग्रत्कृतैः कर्मभिः पापान्युत्पद्यन्तइति । अतोमन्नापराधोदैवागतइति हेवरुण त्वया क्षन्तव्य इतिभावः ॥ ६ ॥

१ बृहदारण्यके ।

अथ सप्तमी--

अरंदासोनमीळ्हुषेकराण्यहंदेवायभूर्णयेनागाः ।
अचेतयदचितोदेवोअर्योगृत्संरायेकवितरोजुनाति ॥ ७ ॥

अरम् । दासः । न । मीळ्हुषे । कराणि । अहम् । देवाय ।
भूर्णये । अनागाः । अचेतयत् । अचितः । देवः । अर्यः ।
गृत्सम् । राये । कविऽतरः । जुनाति ॥ ७ ॥

मीळ्हुषे सेक्त्रे कामानां वर्षित्रे भूर्णये जगतोभर्त्रे देवाय दानादिगुणयुक्ताय वरुणाय अनागाः तत्प्रसादात् अपापः सन्नहं अरं अलं पर्याप्तं कराणि परिचरणं करवाणि दासोन यथा भृत्यः स्वामिने सम्यक्परिचरति तद्वत् अर्यः स्वामी सच देवः अचितः अजानतोस्मान् अचेतयत् चेतयतु प्रज्ञापयतु गृत्सं स्तोतारंच कवितरः प्राज्ञतरोदेवः राये धनाय धनप्राप्त्यर्थं जुनाति जुनातु प्रेरयतु ॥ ७ ॥

एकादशिने वारुणे पशौ अयमितिपुरोडाशस्यानुवाक्या सूत्रितंच--अयंसुतुभ्यंवरुणस्वधावएवावन्दस्ववरुणंबृहन्तमिति ।

सैषाष्टमी--

अयंसुतुभ्यंवरुणस्वधावोहृदिस्तोमउपश्रितश्चिदस्तु ।
शंनःक्षेमेशमुयोगेनोअस्तुयूयंपातस्वस्तिभिःसदानः ॥ ८ ॥ ८ ॥

अयम् । सु । तुभ्यम् । वरुण । स्वधाऽवः । हृदि । स्तोमः ।
उपऽश्रितः । चित् । अस्तु । शम् । नः । क्षेमे । शम् । ऊँ इति ।
योगे । नः । अस्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥८॥८॥

हे स्वधावः अन्नवन्वरुण तुभ्यं त्वदर्थं क्रियमाणः अयं एतत्सूक्तात्मकः स्तोमः स्तोत्रं हृदि त्वदीये हृदये सु सुष्ठु उपश्रितः उपगतः समवेतोस्तु चिदितिपूरकः अप्राप्तस्य प्रापणं योगः प्राप्तस्य रक्षणं क्षेमः नोस्मदीये क्षेमे रक्षणे शं उपद्रवाणांशमनमस्तु योगेच नोस्मदीये प्रापणे शमु शमनमेवास्तु उपद्रवाणां हे वरुणादयोदेवाः यूयं नोस्मान्सर्वदा स्वस्तिभिरविनाशैः पात रक्षत ॥ ८ ॥

॥ इति पञ्चमस्य षष्ठेष्टमोवर्गः ॥ ८ ॥

रदत्पथइति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणं अनुक्रान्तञ्च–रदत्सप्तेति । गतोविनियोगः ।

तत्र प्रथमा–

रदत्पथोवरुणःसूर्यायप्रार्णांसिसमुद्रियानदीनाम् ।
सर्गोनसृष्टोअर्वतीर्ऋतायंचकारमहीरवनीरहभ्यः ॥ १ ॥

रदत् । पथः । वरुणः । सूर्याय । प्र । अर्णांसि । समुद्रियां ।
नदीनाम् । सर्गः । न । सृष्टः । अर्वतीः । ऋतऽयन् ।
चकार । महीः । अवनीः । अहऽभ्यः ॥ १ ॥

अयं वरुणोदेवः सूर्याय सर्वस्य प्रेरकायादित्याय पथोमार्गान् अन्तरिक्षप्रदेशान् प्ररदत् प्रापच्छत् समुद्रिया समुद्रे उदधौ भवानि यद्वा समुद्रवन्त्यस्मादापइति समुद्रमन्तरिक्षं तत्र भवान्यर्णांस्युदकानि नदीनां नदीः प्रति प्रासृजत् सर्गोन सृज्यते युद्धभूमौ सादिनाप्रेर्यतइति सर्गोश्वः सयथा सृष्टः प्रेरितः अर्वतीः वडवाः प्रति शीघ्रं गच्छति तद्वत् ऋतायन् ऋतं शीघ्रं गमनमात्मनइच्छन् महीर्महतीः अवनीरात्रीः अहभ्यः अहोभ्यः सकाशात् चकार भेदेन कृतवान् अस्तंगच्छन् सूर्यएव वरुणइत्युच्यते सहि स्वगमनेन रात्रीर्जनयति ॥ १ ॥

अथ द्वितीया–

आत्मातेवातोरजआनवीनोत्पशुर्नभूर्णिर्यवसेससवान् ।
अन्तर्महीबृहतीरोदसीमेविश्वातेधामवरुणप्रियाणि ॥ २ ॥

आत्मा । ते । वातः । रजः । आ । नवीनोत् । पशुः । न । भूर्णिः ।
यवसे । ससऽवान् । अन्तः । मही इति । बृहती इति ।
रोदसी इति । इमे इति । विश्वा । ते । धाम । वरुण । प्रियाणि ॥२॥

हे वरुण ते त्वदीयः त्वया अन्तरिक्षे प्रेर्यमाणो वातो वायुरात्मा सर्वस्य प्राणिजातस्य प्राणरूपेण धारयिता सच रजउदकं आनवीनोत् समन्तात्प्रेरयति वातेनहि वृष्टिर्जायते भूर्णिर्जगतोभर्ता सवायुर्यवसे घासे प्रक्षिप्ते सति पशुर्न यथा पशुरन्नवान्भवति तद्वत् ससवान् स-

समित्यन्ननाम तद्वान्भवति हविर्लक्षणमन्नमपि तस्मै प्रयच्छतीत्यर्थः यद्वा सनोतेः क्वसौ रूपं ततः ससवान् संभक्तवान वातः घासे सति पशुर्यथा भारवाहीभवति तद्वव् जगतोभर्ता । हे वरुण मही महत्यौ बृहती परिवृढे इमे रोदसी द्यावापृथिव्यौ अन्तर्मध्ये द्यावापृथिव्योर्मध्ये इत्यर्थः ते तव विश्वा सर्वाणि धाम धामानि स्थानानि तेजांसि वा प्रियाणि सर्वेषां प्रीतिकराणि भवन्ति ॥ २ ॥

अथ तृतीया—

परि॒स्पशो॒वरु॑णस्य॒स्मदि॑ष्टाउ॒भेप॑श्यन्ति॒रोद॑सीसु॒मेके॑ ।
ऋ॒तावा॑नःक॒वयो॑य॒ज्ञधी॑राः॒प्रचे॑तसो॒यइ॒षय॑न्त॒मन्म॑ ॥ ३ ॥

परि॑ । स्पशः॑ । वरु॑णस्य । स्मत्ऽइ॑ष्टाः । उ॒भे इति॑ । प॒श्य॒न्ति॒ ।
रोद॑सी॒ इति॑ । सु॒मेके॒ इति॑ सु॒ऽमेके॑ । ऋ॒तऽवा॑नः । क॒वयः॑ ।
य॒ज्ञऽधी॑राः । प्रऽचे॑तसः । ये । इ॒षय॑न्त । मन्म॑ ॥ ३ ॥

स्पशन्ति स्पृशंतीति स्पशश्चाराः वरुणस्य देवस्य स्पशश्चाराः स्मदिष्टाः स्मदित्येतत्प्रशस्यार्थे सहार्थेच वर्तते प्रशस्तगतयः यद्वा सहप्रेषिताः सन्तः सुमेके शोभनमेहने सुरूपेवा उभे रोदसी द्यावापृथिव्यौपरिपश्यन्ति परितईक्षन्ते उभयोर्लोकयोर्वर्तमानान् पुण्यापुण्यकारिणोजनान्पश्यन्तीत्यर्थः यस्मादेवंतस्माव तद्भीत्या ऋतावानः कर्मवन्तः यज्ञधीराः यज्ञेषु कृतबुद्धयः प्रचेतसः प्राज्ञाः कवयः क्रान्तदर्शिनोयेजनाः मन्म मन्मानि स्तोत्राणि इषयन्त गमयन्ति वरुणं प्रापयन्ति तानपि परिपश्यन्तीत्यर्थः अतोस्मानपि स्तोतॄन् ज्ञात्वा पापान्मुञ्चत्वित्यृषिराशास्ते ॥ ३॥

अथ चतुर्थी—

उ॒वाच॑मे॒वरु॑णो॒मेधि॑राय॒त्रिः॒स॒प्तनामाघ्न्या॑बिभर्ति ।
वि॒द्वान्प॒दस्य॒गुह्या॒नवो॑चद्यु॒गाय॒विप्र॒उप॑राय॒शिक्ष॑न् ॥ ४ ॥

उ॒वाच॑ । मे॒ । वरु॑णः । मेधि॑राय । त्रिः । स॒प्त । नाम॑ ।
अघ्न्या॑ । बि॒भ॒र्ति॒ । वि॒द्वान् । प॒दस्य॑ । गुह्या॑ । न । वो॒च॒त् ।
यु॒गाय॑ । विप्रः॑ । उप॑राय । शिक्ष॑न् ॥ ४ ॥

मेधिराय मेधाविने मे मह्यं वरुण उवाच उक्तवान् किमुक्तवान् तदाह त्रिः सप्त एकविंशतिसंख्याकानि नाम नामानि अघ्न्या गौर्बिभर्ति धारयतीति वागत्रगौरुच्यते साच उरसि कण्ठे शिरसिच बद्धानि गायत्र्यादीनि सप्तछन्दसां नामानि बिभर्ति । यद्वा वेदात्मिकावाक् एकविंशतिसंस्थानां यज्ञानां नामानि बिभर्ति धारयति। अपरआह गौः पृथिवी तस्या श्च गौःग्मा ज्मेति पठितान्येकविंशतिनामानीति । अपिच विद्वान् जानन् विप्रोमेधावी सवरुणः युगाय युक्ताय उपराय उपसमीपे रममाणाय अन्तेवासिने मह्यं शिक्षन् उपदिशन् पदस्योत्कृष्टस्य स्थानस्य ब्रह्मलोकलक्षणस्य संबन्धीनि गुह्या गुह्यानि रहस्यानि उपदेशगम्यानि नशब्दश्चार्थे नामानि च वोचत् उक्तवान् अतोहं वरुणस्यशिष्योस्मि तस्मात्सवरुणोस्मात् पापात् मोचयत्वित्यर्थः॥४॥

अथ पंचमी-

तिस्रोद्यावोनिहिताअन्तरस्मिन्तिस्रोभूमीरुपराःषड्विधानाः ।
गृत्सोराजावरुणश्चक्रएतंदिविप्रेङ्खंहिरण्ययंशुभेकम् ॥ ५ ॥

तिस्रः । द्यावः । निऽहिताः । अन्तः । अस्मिन् । तिस्रः ।
भूमीः । उपराः । षट्ऽविधानाः । गृत्सः । राजा । वरुणः ।
चक्रे । एतम् । दिवि । प्रऽईङ्खम् । हिरण्ययम् । शुभे । कम् ॥ ५ ॥

तिस्रः त्रिप्रकाराः उत्तममध्यमाधमभावेन त्रिविधाः द्यावोद्युलोकाः अस्मिन्वरुणे अन्तर्मध्ये निहिताः तिस्रः पूर्ववत्त्रिविधाः भूमीः भूम्यश्च षड्विधानाः विधानं विधा वसंताद्यृतुभेदेन षड्विधाः प्रकाराः यासु तादृश्यः उपराः अस्मिन्नेव वरुणे उप्ताः अन्तर्भूताः लोकानां त्रित्वंच त्रयोवाइमे-त्रिवृतोलोकाइत्यादिनाब्राह्मणेनावगम्यते । तिस्रोभूमीर्धारयन्निति निगमश्चभवति । इमौ लोकौ आवृत्य वरुणस्तिष्ठतीत्यर्थः अपिच गृत्सः स्तुत्यः राजा ईश्वरः सवरुणः दिव्यन्तरिक्षे हिरण्ययं हिरण्मयं सुवर्णमयं हितरमणीयं वा प्रेंखं दोलावत् दिग्द्वयसंस्पर्शिनं एतं सूर्यं शुभेकं दीप्त्यर्थं चक्रे कृतवान् दिविसूर्यमदधात्सोममद्राविति हि श्रूयते ॥ ५ ॥

वारुणे पशौ अवसिन्धुमितिरपायाअनुवाक्या सूत्रितश्च—अवसिन्धुंवरुणोद्यौरिवस्थाद्दयंशुतुभ्यंवरुणस्वधावइति ।

---

१ ऐ० ब्रा० २. १७. । २ ऋ० सं० २. ७. ७. । ३ ऋ० सं० ४. ४. ३०. ।

सेषा षष्ठी–

अवसिन्धुंवरुणोद्यौरिवस्थाद्द्रप्सोनश्वेतोमृगस्तुविष्मान् ।
गम्भीरशंसोरजसोविमानःसुपारक्षत्रःसतोअस्यराजा ॥ ६ ॥

अव । सिन्धुम् । वरुणः । द्यौःऽइव । स्थात् । द्रप्सः । न ।
श्वेतः । मृगः । तुविष्मान् । गंभीरऽशंसः । रजसः । विऽमानः ।
सुपारऽक्षत्रः । सतः । अस्य । राजा ॥ ६ ॥

द्यौरिव सूर्यइव दीप्तोवरुणः सिन्धुं समुद्रं अवस्थात् वेलायामवस्थापयति यथावेलां नातिक्रामति तथा करोतीत्यर्थः। कीदृशोवरुणः द्रप्सोन द्रवणशीलउदकबिन्दुरिव श्वेतः शुभ्रवर्णः मृगः लुप्तोपममेतत् गौरमृगइव तुविष्मान् बलवान्प्रवृद्धोवा गंभीरशंसः गंभीरोमहान् शंसः स्तोत्रं यस्य सतथोक्तः रजसः उदकस्य विमानोनिर्माता सुपारक्षत्रः सुष्ठु दुःखात् पारकं क्षत्रं बलं धनं वा यस्य तादृशोवरुणः सतोविद्यमानस्यास्य जगतोराजा ईश्वरोभवति ॥ ६ ॥

अथ सप्तमी–

योमृळयातिचक्रुषेचिदागोवयंस्यामवरुणेअनागाः ।
अनुव्रतान्यदितेर्ऋधन्तोयूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ ९ ॥

यः । मृळयाति । चक्रुषे । चित् । आगः । वयम् । स्याम ।
वरुणे । अनागाः । अनु । व्रतानि । अदितेः । ऋधन्तः ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ ९ ॥

आगोपराधं चक्रुषे चित् कृतवतेपि स्तोत्रे योवरुणः मृळयाति उपदयांकरोति तस्मिन्वरुणे अनागाः अनागसः अनपराधाः सन्तोवयं स्याम वर्तमानाभवेम । किंकुर्वन्तः अदितेरदीनस्य वरुणस्य सम्बन्धीनि व्रतानि कर्माणि अनु आनुपूर्व्येण ऋधन्तः समर्धयन्तः हे वरुणादयोदेवाः यूयं अस्मान् सर्वदा कल्याणैः पालयत ॥ ७ ॥

॥ इति पञ्चमस्य षष्ठे नवमोवर्गः ॥ ९ ॥

प्रशुन्ध्युवमिति सप्तर्चमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणं प्रशुन्ध्युवमित्यनुक्रान्तम्। गतोविनियोगः।

तत्र प्रथमा—

प्रशुन्ध्युवंवरुणायप्रेष्ठांमतिंवसिष्ठमीळ्हुषेभरस्व।
यईमर्वाञ्चंकरतेयजत्रंसहस्रामघंवृषणंबृहन्तम्॥ १॥

प्र। शुन्ध्युवम्। वरुणाय। प्रेष्ठाम्। मतिम्। वसिष्ठ।
मीळ्हुषे। भरस्व। यः। ईम्। अर्वाञ्चम्। करते। यजत्रम्।
सहस्रऽमघम्। वृषणम्। बृहन्तम्॥ १॥

ऋषिरात्मानमेव प्रत्यक्षीकृत्य स्तुतौ नियुंक्ते हे वसिष्ठ त्वं मीळ्हुषे सेक्त्रे वरुणाय शुन्ध्युवं शोधयित्रीं यद्वा स्वतएव शुद्धां प्रेष्ठां प्रियतमां मतिं मननीयामीदृशीं स्तुतिं प्रभरस्व प्रहर प्रापय। यो वरुणः ईमेनं सूर्यं अर्वाञ्चं अस्मदभिमुखं करते अन्तरिक्षे करोति तस्मै वरुणायेत्यन्वयः कीदृशं सूर्यं यजत्रं यष्टव्यं सहस्रामघं बहुधनं वृषणं कामानां वर्षकं बृहन्तं महान्तम्॥ १॥

अथ द्वितीया—

अधान्वस्यसंदृशंजगन्वानग्नेरनीकंवरुणस्यमंसि।
स्व१र्यदश्मन्नधिपाउअन्धोभिमावपुर्दृशयेनिनीयात्॥ २॥

अध। नु। अस्य। सम्ऽदृशम्। जगन्वान्। अग्नेः।
अनीकम्। वरुणस्य। मंसि। स्वः। यत्। अश्मन्। अधिऽपाः।
ऊँ इति। अन्धः। अभि। मा। वपुः। दृशये। निनीयात्॥ २॥

अथ अधुना अस्य वरुणस्य संदृशं सन्दर्शनं नु क्षिप्रं जगन्वान् गतवानहं अग्नेरनीकं ज्वालासंघं मंसि स्तवानि तं वरुणं यष्टुमितिशेषः यदा वरुणः स्वः सुखकरं अश्मन् अश्मनि अभिषवार्थे पाषाणे अवस्थितमभिषुतमित्यर्थः ईदृशं अन्धः सोमलक्षणमन्नं अधिपाः अधिकं पाता भवेत् छान्दसः पत्वभावः उइतिपूरकः तदानीं मा मां वपुः शरीरं स्वकीयं वपुरितिरूपनाम प्रशस्तं रूपं वा दृशये दर्शनार्थं अभिनिनीयादभिप्रापयेत्॥ २॥

अथ तृतीया–

आयद्रुहाववरुणश्चनावंप्रयत्समुद्रमीरयावमध्यम् ।
अधियदपांस्नुभिश्चरावप्रप्रेंखईंखयावहैशुभेकम् ॥ ३ ॥

आ । यत् । रुहावं । वरुणः । च । नावम् । प्र । यत् ।
समुद्रम् । ईरयाव । मध्यम् । अधि । यत् । अपाम् ।
स्नुऽभिः । चराव । प्र । प्रऽईंखे । ईंखयावहै । शुभे । कम् ॥ ३ ॥

यद्यदा वरुणे प्रसन्ने सति अहं वरुणश्चोभौ नावं द्रुममयीं तरणसाधनभूतां आरुहाव उभावारूढावभूविव तां च नावं यद्यदा समुद्रं मध्यं समुद्रस्य मध्यं प्रति प्रेरयाव प्रकर्षेण गमयाव यद्यदा च अपामुदकानां अधि उपरि स्नुभिः गन्त्रीभिरन्याभिरपि नौभिः चराव वर्तावहै तदानीं शुभे शोभार्थं प्रेंखे नौरूपायां दोलायामेव प्रेंखयावहै निम्नोन्नतैस्तरङ्गैरितश्चेतश्च प्रविचलन्तौ संक्रीडावहै कमितिपूरकः यद्वा क्रियाविशेषणं कं सुखं यथाभवति तथेत्यर्थः ॥ ३ ॥

अथ चतुर्थी–

वसिष्ठंहवरुणोनाव्याधादृषिंचकारस्वपामहोभिः ।
स्तोतारंविप्रःसुदिनत्वेअह्नांयान्नुद्यावस्ततनन्यादुषासः ॥ ४ ॥

वसिष्ठम् । ह । वरुणः । नावि । आ । अधात् । ऋषिम् ।
चकार । सुऽअपाः । महःऽभिः । स्तोतारम् । विप्रः । सुदिनऽत्वे ।
अह्नाम् । यात् । नु । द्यावः । ततनन् । यात् । उषसः ॥ ४ ॥

एवं वसिष्ठेनात्मनोक्ते मद्वरुणेन कृतं तद्दर्शयति वसिष्ठं ह वसिष्ठं खलु वरुणो नावि स्वकीयायां आ अधात् आरोहयत् तथा ऋषिं अवोभिः रक्षणैः स्वपां स्वपसं शोभनकर्माणं चकार वरुणः कृतवान् अपिच विप्रो मेधावी वरुणः अह्नां दिवसानां मध्ये सुदिनत्वे यत्फलत्वेन शोभनदिनत्वं तत्र स्तोतारं अस्थापयदिति शेषः। किंकुर्वन् याव् यातो गच्छतो यावोदिवसान् याव् यातीः उषासः उषसा उपलक्षिता रात्रीश्च नु क्षिप्रं ततनन् सर्वात्मना विस्तारयन् ॥४॥

अथ पंचमी—

क्व१॒त्यानि॑नौ॒सख्या॑बभूवु॒ःसचा॑वहे॒यद॑वृ॒कंपु॒राचि॑त्।
बृ॒हन्तं॒मानं॑वरुणस्वधावःस॒हस्र॑द्वारं॒जग॒मागृ॒हन्ते॑ ॥ ५ ॥

क्व॑ । त्यानि॑ । नौ॒ । स॒ख्या । ब॒भू॒वुः॒ । सचा॑वहे॒ इति॑ । यत् ।
अ॒वृ॒कम् । पु॒रा । चि॒त् । बृ॒हन्त॑म् । मान॑म् । व॒रु॒ण॒ । स्व॒धा॒ऽव॒ः ।
स॒हस्र॑ऽद्वारम् । ज॒ग॒म॒ । गृ॒हम् । ते॒ ॥ ५ ॥

हे वरुण त्यानि तानि पुरातनानि नौ आवयोः सख्या सख्यानि सखित्वानि क कुत्र बभूवुः पुरा पूर्वस्मिन् काले अवृकं अहिंस्यं आत्यन्तिकं यत्सख्यमस्ति तत्सचावहे आवां सेवावहे चिदिति पूरकः अपिच हे स्वधावः अन्नवन्वरुण ते त्वदीयं गृहं जगम गच्छानि लोडर्थे लिट् कीदृशं गृहं बृहन्तं महान्तं मानं मान्यस्मिन्सर्वाणि भूतानीति मानं सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः सहस्रद्वारं बहुद्वारम् ॥ ५ ॥

अथ षष्ठी—

यआ॒पिर्नि॒त्यो॑वरुणप्रि॒यःसन्त्वामागां॑सिकृ॒णव॒त्सखा॑ते ।
मात॒एन॑स्वन्तोयक्षिन्भुजेम॒यन्धि॑ष्मा॒विप्र॑स्तुव॒ते॑वरू॑थम् ॥ ६ ॥

यः । आ॒पिः । नित्यः॑ । व॒रु॒ण॒ । प्रि॒यः । सन् । त्वाम् । आगां॑सि ।
कृ॒णव॑त् । सखा॑ । ते॒ । मा । ते॒ । एन॑स्वन्तः । य॒क्षि॒न् ।
भु॒जे॒म॒ । य॒न्धि । स्म॒ । विप्रः॑ । स्तु॒व॒ते । वरू॑थम् ॥ ६ ॥

हे वरुण योवसिष्ठोनित्योध्रुवः आपिर्बन्धुः औरसः पुत्रइत्यर्थः यः पूर्वं प्रियःसन् त्वां प्रति आगांसि अपराधान्कृणवत् अकरोत् सइदानीं ते तव सखा समानस्थानः प्रियोस्तु । हे यक्षिन् यजनार्ह वरुण ते तव स्वभूतावयं एनस्वन्तः एनसा पापेन युक्ताः सन्तोमाभुजेम माभुंज्महि त्वत्प्रसादात् पापरहिताएव सन्तोभोगान् भुनजामहे विप्रोमेधावी त्वंच स्तुवते स्तोत्रं कुर्वते वसिष्ठाय वरूथं अनिष्टवारकं वरणीयं वा गृहं यन्धि प्रयच्छ स्मेतिपूरकः ॥ ६ ॥

सैषा सप्तमी–

ध्रुवासुत्वासुक्षितिषुक्षियन्तोव्य१स्मत्पाशंवरुणोमुमोचत् ।
अवोवन्वानाअदितेरुपस्थाद्यूयंपातस्वस्तिभिःसदानः ॥७॥१०॥

ध्रुवासु । त्वा । आसु । क्षितिषु । क्षियन्तः । वि । अस्मत् ।
पाशम् । वरुणः । मुमोचत् । अवः । वन्वानाः । अदितेः ।
उपऽस्थात् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ १० ॥

ध्रुवासु नित्यासु आसु दृश्यमानासु क्षितिषु भूमिषु क्षियन्तः निवसन्तोवयं हे वरुण त्वा त्वां स्तुमइतिशेषः सच वरुणः अस्मत् अस्मत्तः पाशं बन्धकं पापं विमुमोचत् मोचयेत् तथा अदितेः अखण्डनीयायाः पृथिव्याः उपस्थादुपस्थानात् अवोरक्षणं वरुणेन दत्तं वन्वानाः संभजमानावयं स्याम अन्यद्गतम् ॥ अत्र ऋग्विधानम्—ध्रुवासुत्वासुक्षितिषु जपन्बन्धात्प्रमुच्यते । तिष्ठन्त्रात्रौजपेदेतां पिशाचस्तंनगच्छतीति ॥ ७ ॥

॥ इति पञ्चमस्य षष्ठे दशमोवर्गः ॥ १० ॥

मोषुवरुणेति पञ्चचैमेकविंशं सूक्तं वसिष्ठस्यार्षंवारुणंअन्त्याजगती शिष्टाश्चतस्रोगायत्र्यः तथाचानुक्रान्तम् मोषुपञ्चगायत्रं जगत्यन्तमिति । गतोविनियोगः ।

तत्र प्रथमा–

मोषुवरुणमृन्मयंगृहंराजन्नहंगमम् । मृळासुक्षत्रमृळय ॥ १ ॥

मो इति । सु । वरुण । मृत्ऽमयम् । गृहम् । राजन् । अहम् ।
गमम् । मृळ । सुऽक्षत्र । मृळय ॥ १ ॥

हे राजन्नीश्वर वरुण त्वदीयं मृन्मयं मृदादिनिर्मितं गृहं मो माउ मैव अहं गमं गतोस्मि अपितु सुशोभनं सुवर्णमयमेव त्वदीयं गृहं प्रामवानि सर्वं मां मृळ सुखय हे सुक्षत्र शोभनधन वरुण मृळय उपदयाश्च कुरु ॥ १ ॥

अथ द्वितीया–

यदेमिप्रस्फुरन्निवदृतिर्नध्मातोअद्रिवः । मृळासुक्षत्रमृळय ॥२॥

यत् । एमि । प्रस्फुरन्ऽइव । दृतिः । न । ध्मातः ।
अद्रिऽवः । मृळ । सुऽक्षत्र । मृळय ॥ २ ॥

हे अद्रिवः आयुधवन्वरुण यद्यदा प्रस्फुरन्निव शैत्येन प्रविचलन्निव त्वद्भयाद्वेपमानः दृतिर्न दृतिरिव ध्मातो वायुना पूर्णः सन् त्वया बद्धोऽहं एमि गच्छामि तदानीं मृळ सुखय हे सुक्षत्र सुधन मृळय दयां कुरु ॥ २ ॥

अथ तृतीया–

क्रत्वःसमहदीनतांप्रतीपंजगमाशुचे । मृळासुक्षत्रमृळय ॥ ३ ॥

क्रत्वः । सुमह । दीनता । प्रतिऽईपम् । जगम ।
शुचे । मृळ । सुऽक्षत्र । मृळय ॥ ३ ॥

हे समह सधन शुचे स्वभावतोनिर्मल वरुण दीनता दीनतया अशक्तत्वेन क्रत्वः कर्मणः कर्तव्यत्वेन विहितस्य श्रौतस्मार्तादिलक्षणस्य प्रतीपं प्रतिकूलं अननुष्ठानं जगम प्राप्तवानस्मि अतएव त्वया बद्धः तादृशं मां मृळ सुखय अन्यद्गतम् ॥३॥

अथ चतुर्थी–

अपांमध्येतस्थिवांसंतृष्णाविदज्जरितारम् । मृळासुक्षत्रमृळय ॥ ४ ॥

अपाम् । मध्ये । तस्थिऽवांसम् । तृष्णा । अविदत् ।
जरितारम् । मृळ । सुऽक्षत्र । मृळय ॥ ४ ॥

अपां समुद्राणामुदकानां मध्ये तस्थिवांसं स्थितवन्तमपि जरितारं तव स्तोतारं मां तृष्णा पिपासा अविदत् आप्तवती लवणोत्कटस्य समुद्रजलस्य पानानर्हत्वात् अतस्तादृशं मां मृळ सुखय अन्यद्गतम् ॥ ४ ॥

देवसुवां हविःषु वारुणस्य हविषः यत्किञ्चेदमितियाज्या सूत्रितञ्च–यत्किञ्चेदंवरुणदैव्येजनउपतेस्तोमान्पशुपाइवाकरमिति द्वे इति ।

सैषात्र पञ्चमी–

यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरामसि ।
अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः ॥५॥११॥

सैषा सप्तमी–

ध्रुवासुत्वासुक्षितिषुंक्षियन्तोव्य१ंस्मत्पाशंवरुणोमुमोचत् ।
अवोवन्वानाअदितेरुपस्थाद्यूयंपातस्वस्तिभिःसदानः ॥७॥१०॥

ध्रुवासु । त्वा । आसु । क्षितिषु । क्षियन्तः । वि । अस्मत् ।
पाशम् । वरुणः । मुमोचत् । अवः । वन्वानाः । अदितेः ।
उपऽस्थात् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ १० ॥

ध्रुवासु नित्यासु आसु दृश्यमानासु क्षितिषु भूमिषु क्षियन्तः निवसन्तोवयं हे वरुण त्वा त्वां स्तुमइतिशेषः सच वरुणः अस्मत् अस्मत्तः पाशं बन्धकं पापं विमुमोचत् मोचयेत् तथा अदितेः अखण्डनीयायाः पृथिव्याः उपस्थादुपस्थानात् अवोरक्षणं वरुणेन दत्तं वन्वानाः संभजमानावयं स्याम अन्यद्गतम् ॥ अत्र ऋग्विधानम्–ध्रुवासुत्वासुक्षितिषु जपन्बन्धात्प्रमुच्यते । तिष्ठन्रात्रौजपेदेतां पिशाचस्तंनगच्छतीति ॥ ७ ॥

॥ इति पञ्चमस्य षष्ठे दशमोवर्गः ॥ १० ॥

मोषुवरुणेति पञ्चर्चमेकविंशं सूक्तं वसिष्ठस्यार्षंवारुणंअन्त्याजगती शिष्टाश्चतस्रोगायत्र्यः तथाचानुक्रान्तम् मोषुपञ्चगायत्रं जगत्यन्तमिति । गतोविनियोगः ।

तत्र प्रथमा–

मोषुवरुणमृन्मयंगृहंराजन्नहंगमम् । मृळासुक्षत्रमृळय ॥ १ ॥

मो इति । सु । वरुण । मृत्ऽमयम् । गृहम् । राजन् । अहम् ।
गमम् । मृळ । सुऽक्षत्र । मृळय ॥ १ ॥

हे राजन्नीश्वर वरुण त्वदीयं मृन्मयं मृदादिनिर्मितं गृहं मो माउ मैव अहं गमं गतोस्मि अपितु सुशोभनं सुवर्णमयमेव त्वदीयं गृहं प्राप्तवानि सर्वं मां मृळ सुखय हे सुक्षत्र शोभनधन वरुण मृळय उपद्रवाच्च कुरु ॥ १ ॥

अथ द्वितीया–

यदेमिप्रस्फुरन्निवदृतिर्नध्मातोअद्रिवः । मृळासुक्षत्रमृळय ॥२॥

यत्। एमि। प्रस्फुरन्ऽइव। दृतिः। न। ध्मातः।
अद्रिऽवः। मृळ। सुऽक्षत्र। मृळय॥ २॥

हे अद्रिवः आयुधवन्वरुण यद्यदा प्रस्फुरन्निव शैत्येन प्रविचलन्निव त्वद्भयाद्वेपमानः दृविर्न दृतिरिव ध्मातो वायुना पूर्णः सन् त्वया बद्धोऽहं एमि गच्छामि तदानीं मृळ सुखय हे सुक्षत्र सुधन मृळय दयां कुरु॥ २॥

अथ तृतीया–

क्रत्वःसमहदीनताप्रतीपंजगमाशुचे। मृळासुक्षत्रमृळय॥ ३॥
क्रत्वः। समह। दीनता। प्रतिऽईपम्। जगम।
शुचे। मृळ। सुऽक्षत्र। मृळय॥ ३॥

हे समह सधन शुचे स्वभावतोनिर्मल वरुण दीनता दीनतया अशक्तत्वेन क्रत्वः कर्मणः कर्तव्यत्वेन विहितस्य श्रौतस्मार्तादिलक्षणस्य प्रतीपं प्रतिकूलं अननुष्ठानं जगम प्राप्तवानस्मि अतएव त्वया बद्धः तादृशं मां मृळ सुखय अन्यद्गतम्॥३॥

अथ चतुर्थी–

अपांमध्येतस्थिवांसंतृष्णाविदज्जरितारम्। मृळासुक्षत्रमृळय॥ ४॥
अपाम्। मध्ये। तस्थिऽवांसम्। तृष्णा। अविदत्।
जरितारम्। मृळ। सुऽक्षत्र। मृळय॥ ४॥

*अपां समुद्राणामुदकानां मध्ये तस्थिवांसं स्थितवन्तमपि जरितारं तव स्तोतारं मां तृ*ष्णा पिपासा अविदत् आप्तवती लवणोत्कटस्य समुद्रजलस्य पानानर्हत्वात् अतस्तादृशं मां मृळ सुखय अन्यद्गतम्॥ ४॥

देवसुवां हविःषु वारुणस्य हविषः यत्किंचेदमितियाज्या सूत्रितश्च—यत्किंचेदंवरुणदैव्येजनउपतेस्तोमान्यथापाइवाकरमिति द्वे इति।

सैषात्र पञ्चमी–

यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्या३श्चरामसि।
अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः॥५॥११॥

यत् । किम् । च । इदम् । वरुण । दैव्ये । जने । अभिऽद्रोहम् ।
मनुष्याः । चरामसि । अचित्ती । यत् । तव । धर्म । युयोपिम ।
मा । नः । तस्मात् । एनसः । देव । रिरिषः ॥ ५ ॥ ११ ॥

हे वरुण दैव्ये देवसमूहरूपे जने यदिदं किञ्चनाभिद्रोहम् अपकारजातं मनुष्यावयं चरामसि चरामः निर्वर्तयामः तथा अचित्ती अचित्त्या अज्ञानेन तवत्वदीयं यद्धर्मकारकं कर्म युयोपिम वयं विमोहितवन्तः हे देव तस्मादेनसः पापात् नोस्मान् मारीरिषः माहिंसीः ॥ ५ ॥

॥ इति पञ्चमस्य षष्ठे एकादशोवर्गः ॥ ११ ॥

॥ इतिसप्तमे मण्डले पञ्चमोनुवाकः ॥ ५ ॥

षष्ठेनुवाके पञ्चदश सूक्तानि तत्र प्रवीरयेति सप्तर्चं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यम् यासुपञ्चम्याद्यासु द्विवचनमस्ति ताऐन्द्रवायव्यः तथाह्यानुक्रान्तम्—प्रवीरयासप्त वायव्यं त्वैन्द्रश्च या द्विवदुक्ताइति । तृतीयेछन्दोमे प्रउगशस्त्रे प्रवीरयेतिवायव्यस्तृचः सूत्रितञ्च प्रवीरयाशुचयोदद्रिरेवा तेसत्येनमनसादीध्यानाइति ।

तत्र प्रथमा—

प्रवीरयाशुचयोदद्रिरेवामध्वर्युभिर्मधुमन्तःसुतासः ।
वहवायोनियुतोयाह्यच्छापिबासुतस्यान्धसोमदाय ॥ १ ॥

प्र । वीरऽया । शुचयः । दद्रिरे । वाम् । अध्वर्युऽभिः ।
मधुऽमन्तः । सुतासः । वह । वायो इति । निऽयुतः । याहि ।
अच्छ । पिब । सुतस्य । अन्धसः । मदाय ॥ १ ॥

हे वायो वीरया वीराय विविधमीरयित्रे सुपांसुलुगिति चतुर्थ्यायाजादेशः वां ते व्यत्ययेन द्विवचनं तुभ्यं शुचयः शुद्धाः मधुमन्तः माधुर्योपेताः सुतासः अभिषुताः सोमाः ऐतरेयिभिः नवमेहनि प्रउगे अध्वर्युभिः अध्वरस्यनेतृभिः ऋत्विग्भिः प्रदद्रिरे प्रदीयन्ते ददद्दानेइत्यस्यैतद्रूपम् यतएवमतः कारणात् हे वायो नियुतोवडवाः वह रथं प्रापय तेन रथेन अच्छ याहि अस्मद्यज्ञमभिगच्छ अभिगत्यच सुतस्याभिषुतस्य अन्धसः अन्नस्य सोमलक्षणस्य स्वकीयं भागं पिब किमर्थम् मदाय मदोत्पत्यर्थं ॥ १ ॥

शुनासीरीयेपर्वणि वायव्यस्य हविषईशानायेति पुरोनुवाक्या सूत्रितश्च—सत्वंनोदेवमनसेशानायप्रहुतिंयस्तआनडिति । वायव्येपशावेषैवपशुपुरोडाशस्ययाज्या सूत्रितंच—ईशानाय प्रहुतिं यस्तआनट् प्रवोवायुंरथयुजं कृणुध्वमिति ।

सैपात्र द्वितीया—

ई॒शा॒नाय॒प्रहु॑तिं॒यस्त॒आन॑ट्छुचिं॒सोमं॑शुचिपा॒स्तुभ्यं॑वायो ।
कृ॒णोषि॒तंमर्त्ये॑षुप्रश॒स्तंजा॒तोजा॑तोजायतेवा॒ज्य॑स्य ॥ २ ॥

ई॒शा॒नाय॑ । प्रऽहु॑तिम् । यः । ते॒ । आन॑ट् । शुचि॑म् । सोम॑म् ।
शु॒चि॒ऽपाः॒ । तुभ्य॑म् । वा॒यो॒ इति॑ । कृ॒णोषि॑ । तम् । मर्त्ये॑षु ।
प्र॒ऽश॒स्तम् । जा॒तःऽजा॑तः । जा॒य॒ते॒ । वा॒जी । अ॒स्य॒ ॥ २ ॥

हे वायो ईशानाय ईश्वराय ते तुभ्यं त्वदर्थं प्रहुतिं प्रकृष्टामाहुतिं चरुपुरोडाशादिसाध्यां योयजमान आनट् व्याप्नोत् दद्यादित्यर्थः तथा हे शुचिपाः शुद्धस्य सोमस्य पातर्वायो तुभ्यं शुचिं शुद्धं सोमं च यः प्रयच्छति मर्त्येषु मनुष्येषु मध्ये तं यजमानं प्रशस्तं मुख्यं कृणोषि करोषि सच जातोजातः सर्वत्र प्रादुर्भूतः प्रख्यातः सन् वाजी अस्य प्राप्तस्य धनस्य प्राप्तये जायते अवकल्पते सर्वं धनं लभते इत्यर्थः ॥ २ ॥

नियुत्वद्गुणविशिष्टवायुदेवताके पशौ रायेनुयमिति पुरोडाशस्य याज्या सूत्रितश्च—रायेनुयंजज्ञतूरोदसीमे प्रवायुमच्छाबृहतीमनीषेति ।

सैपात्र तृतीया—

रा॒येनु॒यंज॒ज्ञतू॒रोद॑सी॒मेरा॒येदे॒वीधि॒षणा॑धातिदे॒वम् ।
अध॑वा॒युंनि॒युतः॑सश्चत॒स्वाउ॒तश्वे॒तंवसु॑धितिनिरे॒के ॥ ३ ॥

रा॒ये । नु । यम् । ज॒ज्ञतुः॑ । रोद॑सी॒ इति॑ । इ॒मे इति॑ । रा॒ये । दे॒वी । धि॒षणा॑ । धा॒ति॒ । दे॒वम् । अध॑ । वा॒युम् । नि॒ऽयुतः॑ । स॒श्च॒त॒ । स्वाः । उ॒त । श्वे॒तम् । वसु॑ऽधितिम् । नि॒रे॒के ॥ ३ ॥

इमे रोदसी द्यावापृथिव्यौ यं वायुं राये धनार्थं नु क्षिप्रं जजनतुर्जनयामासतुः तं देवं दाना-दिगुणयुक्तं वायुं देवी द्योतमाना धिषणा स्तुतिः राये धनार्थं धाति धारयति धनं यथा लभ्य-ते तथा प्रेरयतीत्यर्थः अध अधुना एवं स्तुतौ प्रवृत्तायां स्वाः स्वकीया नियुतोवडवाः रथवाहाः वायुं सश्चत सचन्ते सेवन्ते उतापिच श्वेतं शुभ्रवर्णं निरेके नितरां रेको रिक्तता निरेकः दारि-द्र्यमित्यर्थः तस्मिन् सति वसुधितिं वसूनां धातारं प्रदातारं तं वायुं नियुतोस्मद्यज्ञं प्रापयन्ती-तिशेषः ॥ ३ ॥

द्वितीये छन्दोमे प्रउगशस्त्रे वायव्यतृचस्य उच्छन्नुषसइति तृतीया सूत्रितश्च—उच्छन्नु-षसः सुदिनाअरिप्राइत्येकपातिन्यइति ।

सैषात्र चतुर्थी—

उच्छन्नुषसः सुदिनाअरिप्राउरुज्योतिर्विविदुर्दीध्यानाः ।
गव्यंचिदूर्वमुशिजोविववुस्तेषामनुप्रदिवःसस्रुरापः ॥ ४ ॥

उच्छन् । उषसः । सुऽदिनाः । अरिऽप्राः । उरु । ज्योतिः ।
विविदुः । दीध्यानाः । गव्यम् । चित् । ऊर्वम् । उशिजः ।
वि । वव्रुः । तेषाम् । अनु । प्रऽदिवः । सस्रुः । आपः ॥ ४ ॥

येङ्गिरसोवायुमस्तोषत तेषां अरिप्राः पापरहिता उषसः सुदिनाः शोभनदिनस्य हेतुभू-ताः सत्यः उच्छन् औच्छन् व्यवासयन् तेच दीध्यानाः दीप्यमानाःसन्तः उरु विस्तीर्णं ज्यो-तिः सूर्याख्यं विविदुः वायोः प्रसादादलभन्त । अपिच उशिजः कामयमानाः तेअंगिरसः गव्यं चित् गोसङ्घरूपमपि ऊर्वं धनं पणिभिरपहृतं विववुः व्यवृण्वन् अलभन्त । तथा तेषामङ्गिरसाम-र्थाय प्रदिवः पुराण्यः आपः अनुसस्रुः अन्वसरन् अन्वगच्छन् हिताः हिताचरणपरा आस-न्नित्यर्थः आवरकस्यासुरस्य वायुनाहननात् असुरेणाहृतानुषःप्रभृतीन् पुनर्लब्धवन्तइत्यर्थः ॥ ४ ॥

तृतीये छन्दोमे प्रउगशस्त्रे तेसत्येनेत्यैन्द्रवायवस्तृचः सूत्रितंच—तेसत्येनमनसादीध्याना-दिविक्षयन्तारजसः पृथिव्यामिति ।

तत्र प्रथमा सूक्ते पंचमी—

तेसत्येनमनसादीध्यानाःस्वेनयुक्तासःक्रतुनावहन्ति ।
इन्द्रवायूवीरवाहंरथंवामीशानयोरभिपृक्षःसचन्ते ॥ ५ ॥

ते । सत्येन । मनसा । दीध्यानाः । स्वेन । युक्तासः । क्रतुना ।
वहन्ति । इन्द्रवायू इति । वीरऽवाहम् ।
रथम् । वाम् । ईशानयोः । अभि । पृक्षः । सचन्ते ॥ ५ ॥

ते प्रसिद्धाः सत्येन यथार्थेन मनसा मननीयेन स्तोत्रेण युक्ताः दीध्याना दीप्यमानाः स्वेन स्वकीयत्वे विहितेन क्रतुना कर्मणा नित्यनैमित्तिकात्मना युक्तासोयुक्ताः एवंभूताः यजमानाः हे इन्द्रवायू वीरवाहं वीरैः विशेषेण ईरयितृभिः स्तोतृभिः वहनीयं प्रापणीयं । यद्वा वीरैरश्वैर्वहनीयं ईशानयोरीश्वरयोर्वां युवयोः स्वभूतं रथं वहन्ति स्वं स्वं यज्ञं प्रापयन्ति । तत्र च पृक्षोन्नानि हविर्लक्षणानि अभिसचन्ते युवामभिसेवन्ते ॥ ५ ॥

अथ षष्ठी–

ईशानासोयेदधतेस्वर्णोगोभिरश्वेभिर्वसुभिर्हिरण्यैः ।
इन्द्रवायूसूरयोविश्वमायुरर्वद्भिर्वीरैःपृतनासुसह्युः ॥ ६ ॥

ईशानासः । ये । दधते । स्वः । नः । गोभिः । अश्वेभिः ।
वसुऽभिः । हिरण्यैः । इन्द्रवायू इति । सूरयः । विश्वम् ।
आयुः । अर्वत्ऽभिः । वीरैः । पृतनासु । सह्युः ॥ ६ ॥

हे इन्द्रवायू ईशानासः ईश्वराः प्रभवोयेजनाः नोस्मभ्यं गोभिरश्वेभिरश्वैर्वसुभिर्निवासकैः हिरण्यैश्च सहितं स्वः सुखु अरणीयं सुखं दधते ददति प्रयच्छंति । यद्वा हिरण्यव्यतिरिक्तानि धनानि वसूनि तैर्हिरण्यैश्च सहेत्यर्थः । ते सूरयो दातारः विश्वं व्याप्तमायुरन्नं जीवनं वा शत्रूणां स्वभूतं पृतनासु संग्रामेषु अर्वद्भिरश्वैः वीरैः शूरभटैश्च साधनभूतैः सह्युः अभिभवेयुः यद्वा सहार्थे तृतीया अर्वद्भिः वीरैः पुत्रैश्च सहितं शत्रूणामायुरभिभवेयुरित्यर्थः ॥ ६ ॥

अथ सप्तमी–

अर्वन्तोनश्रवसोभिक्षमाणाइन्द्रवायूसुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तःस्ववसेहुवेमयूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ १२ ॥

अर्वन्तः । न । श्रवंसः । भिक्षंमाणाः । इन्द्रवायू इति ।
सुस्तुतिऽभिः । वसिष्ठाः । वाजऽयन्तः । सु । अवंसे । हुवेम ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७॥ १२ ॥

अर्वन्तोन अश्वाइव हविषां वोढारः श्रवसोन्नस्य द्वितीयार्थे षष्ठी अन्नं भिक्षमाणाः याचमानाः वाजयन्तः वाजं बलमात्मन इच्छन्तो वसिष्ठाः वयं स्ववसे शोभनरक्षणाय सुष्ठुतर्पणाय वा सुष्टुतिभिः शोभनाभिः स्तुतिभिः इन्द्रवायू इन्द्रं वायुं च हुवेम आह्वयेमहि । अन्यद्गतम् ॥७॥

॥ इति पञ्चमस्य षष्ठे द्वादशो वर्गः ॥ १२ ॥

कुविदङ्गेति सप्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यं कुविदङ्गेत्यनुक्रान्तम् । गतः सूक्तविनियोगः । वायव्ये पशौ कुविदङ्गेति वपायाज्या सूत्रितञ्च—कुविदङ्गनमसायेवृधासईशानायमहुतिंमस्तआनळिति ।

सैषा प्रथमा—

कुविदङ्गनमंसायेवृधासंःपुरादेवाअंनवद्यासआसंन् ।
तेवायवेमनंवेबाधितायावांसयन्नुषसंसूर्येण ॥ १ ॥

कुवित् । अङ्ग । नमंसा । ये । वृधासंः । पुरा । देवाः ।
अनवद्यासंः । आसंन् । ते । वायवे । मनंवे । बाधितायं ।
अवांसयन् । उपसंम् । सूर्येण ॥ १ ॥

दीर्व्यंति स्तुवन्तीति देवाः स्तोतारः पुरा पूर्वस्मिन्काले ये वृद्धासो वृद्धादेवाः स्तोतारः कुविदिति बहुनाम अङ्गेति क्षिप्र नाम कुविद्बहुशः अङ्ग क्षिप्रं कनेन नमसा वायुविषयेण स्तोत्रेण नमस्कारेण वा अनवद्यासः अवद्यरहिताः आसन् तेद्यापि वायवे हवींषि दातुं सूर्येण सह उषसं अवासयन् उषसो वृष्टिं सूर्योदयञ्च वायुभागार्थं कुर्वन्तीत्यर्थः । किमर्थं मनवे मनुष्याणां बाधिताय बाधितानां पुत्रादीनां रक्षणार्थमित्यर्थः यद्वा मनवे बाधितायेति षष्ठ्यर्थे चतुर्थी बाधितस्य मनोः प्रजापतेर्यागे वायवे हवींषि दातुमित्यन्वयः ॥ १ ॥

द्वितीये छन्दोमे प्रउगशस्त्रे ऐन्द्रवायवतृचस्य उशन्तेत्येषा प्रथमा सूत्रितञ्च—उशन्तादूतानदभायगोपायावस्तरस्तन्वोपावर्त्तोजइत्येकाह्नेचेति ।

सैषा द्वितीया—

उशन्तादूतानदभायगोपामासश्चपाथःशरदश्चपूर्वीः ।
इन्द्रवायूसुष्टुतिर्वामियानामार्डीकमीट्टेसुवितंचनव्यम् ॥ २ ॥

उशन्ता । दूता । न । दभाय । गोपा । मासः । च । पाथः ।
शरदः । च । पूर्वीः । इन्द्रवायू इति । सुऽस्तुतिः । वाम् ।
इयाना । मार्डीकम् । ईट्टे । सुवितम् । च । नव्यम् ॥ २ ॥

हे इन्द्रवायू उशन्ता उशन्तौ कामयमानौ दूता दूतौ देवतेर्गतिकर्मणो दूतशब्दः गन्तारौ गोपा गोपायितारौ ईदृशौ युवां दभाय हिंसायै नाभवतम् अपितु मासो मासांश्च पूर्वीर्बह्वीः शरदः संवत्सरांश्च चिरकालमस्मान्पाथो रक्षतम् । अपिच हे इन्द्रवायू सुष्टुतिरस्मदीया शोभना स्तुतिः वां युवां इयाना गच्छन्ती प्राप्नुवन्ती मार्डीकं सुखं ईट्टे याचते । यद्वा सुखं यथा भवति तथा युवामीट्टे स्तौति । तथा नव्यं प्रशस्यं सुवितं सुष्टुप्राप्यं धनञ्च ईट्टे ॥ २ ॥

नियुत्वद्वायुदेवताके पशौ पीवोअन्नानिति वपायायाज्या सूत्रितश्च—पीवोअन्नाँरयिवृधः सुमेधा रायेनुयंजज्ञतूरोदसीमेइति । तथा द्वितीये छन्दोमे प्रउगशस्त्रे वायव्यतृचस्य एषैव द्वितीया सूत्रितश्च—पीवोअन्नाँरयिवृधःसुमेधा उच्छन्नुषसःसुदिनाअरिप्राइति ।

सैषा तृतीया—

पीवोअन्नाँरयिवृधःसुमेधाःश्वेतःसिंसक्तिनियुतामभिश्रीः ।
तेवायवेसमनसोवितस्थुर्विश्वेन्नरःस्वपत्यानिचक्रुः ॥ ३ ॥

पीवःऽअन्नान् । रयिऽवृधः । सुऽमेधाः । श्वेतः । सिसक्ति ।
निऽयुताम् । अभिऽश्रीः । ते । वायवे । सऽमनसः । वि ।
तस्थुः । विश्वा । इत् । नरः । सुऽअपत्यानि । चक्रुः ॥ ३ ॥

पीवोअन्नान् पीवांसि स्थूलानि प्रभूतान्यन्नानि येषांतान् रयिवृधः रय्या धनेन वृद्धान् एवं भूतानाढ्यजनान् सुमेधाः शोभनप्रज्ञः नियुतां वडवानां वाहानां अभिश्रीरभिश्रयणीयः श्वेतः श्वेतवर्णोवायुः सिषक्ति सेवते । तेच जनाः समनसः समानमनस्काः सन्तः वायवे वायुमुद्दिश्य यष्टुं वितस्थुः विविधमवतिष्ठन्ते । स्थित्वा च ते नरः कर्मणां नेतारोजनाःविश्वेत् विश्वानि सर्वा-

ण्येव स्वपत्यानि शोभनापत्यहेतूनि यद्वा सुष्ठु अपतनकारणानि वायुदेवत्यानि कर्माणि चक्रुः कुर्वन्ति ॥ ३ ॥

द्वितीये छन्दोमे प्रउगशस्त्रे ऐन्द्रवायवतृचस्य यावत्तरइत्यादिके द्वे ऋचौ सूत्रं तु पूर्वमेवोदाहृतम्।

तयोः प्रथमा सूक्ते चतुर्थी—

यावत्तरस्तन्वो३यावदोजोयावन्नरश्चक्षसादीध्यानाः।
शुचिंसोमंशुचिपापातमस्मेइन्द्रवायूसदतंबर्हिरेदम् ॥ ४ ॥

यावत्। तरः। तन्वः। यावत्। ओजः। यावत्। नरः।
चक्षसा। दीध्यानाः। शुचिम्। सोमम्। शुचिऽपा। पातम्।
अस्मे इति। इन्द्रवायू इति। सदतम्। बर्हिः। आ। इदम् ॥ ४ ॥

हे इन्द्रवायू युवयोस्तन्वः शरीरस्य तरो वेगो यावदस्ति यावच्च ओजो बलं यावच्च नरः कर्मणां नेतार ऋत्विजः चक्षसा ज्ञानेन दीध्यानाः दीप्यमानाः भवन्ति तस्य सर्वस्यानुरूपं शुचिपा शुचेः सोमस्य पाताराविन्द्रवायू शुचिंशुद्धं सोमं अस्मे अस्मदीयं पातं पिबतम्। इदं वेद्यां स्तीर्णं बर्हिश्च आसदतं पानार्थमासीदतं बर्हिषि उपविशतमित्यर्थः ॥ ४ ॥

अथ पञ्चमी—

नियुवानानियुतःस्पार्हवीराइन्द्रवायूसरथंयातमर्वाक्।
इदंहिवांप्रभृतंमध्वोअग्रमधप्रीणानाविमुमुक्तमस्मे ॥ ५ ॥

निऽयुवाना। निऽयुतः। स्पार्हऽवीराः। इन्द्रवायू इति। सऽरथम्।
यातम्। अर्वाक्। इदम्। हि। वाम्। प्रऽभृतम्। मध्वः। अग्रम्।
अध। प्रीणाना। वि। मुमुक्तम्। अस्मे इति ॥ ५ ॥

हे इन्द्रवायू स्पार्हवीराः स्पृहणीयस्तोतृकान् नियुतआत्मीयानश्वान् सरथं उभयोः समानमेकं रथं नियुवाना निमिश्रयन्तौ युवां अर्वागस्मदभिमुखं यातम् गच्छतम्। इदं हि इदं खलु मध्वो मधुरस्य सोमस्य अग्रं ग्रहेष्वाद्यमैन्द्रवायवाख्यं ग्रहं वां युवयोरर्थं प्रभृतं प्रकर्षेण हृतं

होमार्थमुत्तरवेदिं प्रतिनीतम् अध अथ तादृशस्य सोमस्य पानानन्तरं मीणाना मीयमाणौ युवां अस्मे अस्मान् विमुमुक्तं पापाद्विमोचयतम् ॥ ५ ॥

प्रथमे छन्दोमे प्रउगशस्त्रे ऐन्द्रवायवतृचस्य यावांशतमिति तृतीया सूत्रितंच--यावांशतंनियुतोयाः सहस्रमित्येकपातिन्यइति ।

शेषात्र षष्ठी--

यावाँशतंनियुतोयाःसहस्रमिन्द्रवायूविश्ववाराःसचन्ते ।
आभिर्यातंसुविदत्राभिरर्वाक्पातंनराप्रतिभृतस्यमध्वः ॥ ६ ॥

याः । वाम् । शतम् । निऽयुतः । याः । सहस्रम् । इन्द्रवायू इति ।
विश्वऽवाराः । सचन्ते । आ । आभिः । यातम् । सुऽविदत्राभिः ।
अर्वाक् । पातम् । नरा । प्रतिऽभृतस्य । मध्वः ॥ ६ ॥

हे इन्द्रवायू या नियुतः शतं शतसंख्याकाः सत्यः वां युवां सचन्ते सेवन्ते याश्च विश्ववारा विश्वैर्वरणीया नियुतः सहस्रं सहस्रसंख्याकाः सत्यः युवां सचन्ते सुविदत्राभिः शोभनधनप्रदाभिराभिर्नियुद्भिरर्वाक् अस्मदभिमुखं आयातमागच्छतम् हे नरा नेतारौ प्रतिभृतस्य उत्तरवेदिं प्रतिनीतस्य मध्वोमधुरस्य सोमस्य द्वितीयार्थे षष्ठी ईदृशं सोमं पातं पिबतम् ॥६॥

अथ सप्तमी--

अर्वन्तोनश्रवसोभिक्षमाणाइन्द्रवायूसुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तःस्ववसेहुवेमयूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ १३ ॥

अर्वन्तः । न । श्रवसः । भिक्षमाणाः । इन्द्रवायू इति ।
सुस्तुतिऽभिः । वसिष्ठाः । वाजऽयन्तः । सु । अवसे । हुवेम ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ १३ ॥

व्याख्यातेयं अक्षरार्थस्तु अश्वाइव हविषां वोढारः अन्नं याचमानाः बलं कामयमानाः वसिष्ठाः वयं शोभनरक्षणाय शोभनैः स्तोत्रैः इन्द्रवायू आह्वयेमहीति ॥ ७ ॥

॥ इति पञ्चमस्य षष्ठे त्रयोदशोवर्गः ॥ १३ ॥

आवायोइति पञ्चर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यम् अनुक्रान्तञ्च—आवायो पञ्चेति । शुनासीरीये पर्वणि वायोर्नियुत्वतो यागस्य आवायो इत्यनुवाक्या सूत्रितश्च—आ वायोभूषशुचिपाउपनःमयाभिर्यासिदाश्वांसमच्छेति । नियुत्वद्वायुदेवताके पशावेपैव वपाया अनुवाक्या प्रथमे छन्दोमे प्रउगशस्त्रे वायव्यतृचस्यैषैवाद्या सूत्रितश्च—समुद्रादूर्मिरित्याज्यमा वायोभूषशुचिपाइति ।

सैषा प्रथमा—

आर्वायोभूषशुचिपाउर्पनःसहस्रंतेनियुतोविश्ववार ।
उपोतेअन्धोमद्यमयामियस्यदेवदधिषेपूर्वपेयम् ॥ १ ॥

आ । वायो इति । भूष । शुचिऽपाः । उर्प । नः । सहस्रम् ।
ते । निऽयुतः । विश्वऽवार । उपो इति । ते । अन्धः ।
मद्यम् । अयामि । यस्य । देव । दधिषे । पूर्वऽपेयम् ॥ १ ॥

हे शुचिपाः शुचेः शुद्धस्य सोमस्य पातर्वायो नोस्माकं उपसमीपे आभूष आगच्छ भू-प्राप्तावित्यस्यैतद्रूपम् हे विश्ववार विश्वैर्वरणीय ते तव वाहनभूताः नियुतोवडवाः सहस्रं सहस्र-सङ्ख्याका विद्यन्ते यतएवं अतः शीघ्रमागच्छ । ते तव मद्यं मदकरं सोमलक्षणमन्धोन्नं उपो उप उपायामि उपयतं पात्रे गृहीतमासीत् । हे देव वायो यस्य सोमस्य पूर्वपेयं प्रथमपानं द-धिषे दधासि धारयसि ऐन्द्रवायवग्रहे प्रथमे वषट्कारे केवलाय वायवे हूयते द्वितीये तु इ-न्द्रवायुभ्यामिति वायोः प्रथमपानं तादृशमन्धः उपायामीत्यन्वयः ॥ १ ॥

प्रथमे छन्दोमे प्रउगशस्त्रे ऐन्द्रवायवतृचस्य प्रसोतेत्याद्या सूत्रितश्च—प्रसोताजीरो अध्व-रेष्वस्थाद्येवायवइन्द्रमादनासइति ।

सैषा द्वितीया—

प्रसोताजीरोअध्वरेष्वस्थात्सोममिन्द्रायवायवेपिबध्यै ।
प्रयद्वांमध्वोअग्रियंभरन्त्यध्वर्यवोदेवयन्तःशचीभिः ॥ २ ॥

प्र । सोता । जीरः । अध्वरेषु । अस्थात् । सोमम् । इन्द्राय ।
वायवे । पिबध्यै । प्र । यत् । वाम् । मध्वः । अग्रियम् ।
भरन्ति । अध्वर्यवः । देवऽयन्तः । शचीभिः ॥ २ ॥

जीरः क्षिप्रकारी सोता अभिषोता अध्वर्युः इन्द्राय वायवे च पिबध्यै पानार्थं अध्वरेषु यागेषु सोमं मास्थात् पातिष्ठिपत् पुरस्तादुत्तरवेदिं मापितवान्। हे इन्द्रवायू यत् येषु यज्ञेषु मध्वः सोमस्य अग्रियं अग्रभवं प्रथमभागं देवयन्तो देवकामाः अध्वर्यवः शचीभिः कर्मभिः अभिषवादिलक्षणैः वां युवयोरर्थं प्रभरन्ति प्रकर्षेण भरन्ति संपादयन्ति तेष्वध्वरेष्वित्यन्वयः॥२॥

शुनासीरीये पर्वणि नियुत्वद्वायोर्यागस्य प्रयाभिरिति याज्या सूत्रितश्च—प्रयाभिर्यासिदाश्वांसमच्छसत्वंनोदेवमनसेति। तद्देवत्ये पशावेवैव पुरोडाशस्यानुवाक्या सूत्रितश्च—प्रयाभिर्यासिदाश्वांसमच्छानोनियुद्भिःशतिनीभिरिति। प्रथमे छन्दोमे प्रउगशस्त्रे एषैव वायव्यतृचस्य तृतीया सूत्रितश्च—आवायोभूषशुचिपाउपनःप्रयाभिर्यासिदाश्वांसमच्छेति।

सैषा तृतीया—

प्रयाभिर्यासिदाश्वांसमच्छानियुद्भिर्वायविष्टयेदुरोणे।
निनोरयिंसुभोजसंयुवस्वनिवीरंगव्यमश्व्यंचराधः॥ ३॥

प्र। याभिः। यासि। दाश्वांसम्। अच्छ। नियुत्ऽभिः।
वायो इति। इष्टये। दुरोणे। नि। नः। रयिम्। सुऽभोजसम्।
युवस्व। नि। वीरम्। गव्यम्। अश्व्यम्। च। राधः॥ ३॥

हे वायो दुरोणे यज्ञगृहे स्थितं दाश्वांसं हविषां दातारं यजमानं इष्टये यागाय याभिर्नियुद्भिर्वडवाभिरच्छ यासि अभिगच्छसि ताभिरस्मान् प्रत्यागच्छेति शेषः। आगत्य च नोस्मभ्यं सुभोजसं शोभनान्नयुक्तं रयिं धनं नियुवस्व नितरां मिश्रय प्रयच्छ। तथा वीरं पुत्रं गव्यं गोसंघं अश्व्यमश्वसंघं एतदुभयात्मकं राधो धनञ्च नियुवस्व प्रयच्छ॥ ३॥

प्रथमे छन्दोमे प्रउगशस्त्रे ऐन्द्रवायवतृचस्य येवायवइन्द्रेति द्वितीया सूत्रितश्च—येवायवइन्द्रमादनासोयावांशतंनियुतोयाःसहस्रमिति।

सैषा चतुर्थी—

येवायवइन्द्रमादनासआदेवासोनितोशनासोअर्यः।
घ्नन्तोवृत्राणिसूरिभिःष्यामसासह्वांसोयुधानृभिरमित्रान्॥ ४॥

ये । वायवे । इन्द्रऽमादनासः । आऽदेवासः । निऽतोशनासः ।
अर्यः । घ्नन्तः । वृत्राणि । सूरिऽभिः । स्याम ।
ससह्वांसः । युधा । नृऽभिः । अमित्रान् ॥ ४ ॥

ये सूरयः स्तोतारः इन्द्रमादनासः स्तोत्रैरिन्द्रस्य तर्पयितारः तथा वायवे वायोश्चमादनास्तर्पका भवन्ति येच आदेवासः आगतैः देवैरुपेताः अतएव अर्यः अरेः शत्रोर्नितोशनासो निहन्तारः वैरस्मदीयैः सूरिभिः स्तोतृभिः वृत्राणि शत्रून् घ्नन्तः हिंसन्तः स्याम भवेम । किंकुर्वन्तः अमित्रान् शत्रुभटान् नृभिरस्मदीयैः पुरुषैः युधा युद्धेभिः ससह्वांसोभिभवन्तः ॥ ४ ॥

नियुत्वद्वायुदेवताके पशौ आनोनियुद्भिरिति हविषोनुवाक्या सूत्रितश्च—आनोनियुद्भिः शतिनीभिरध्वरंपीवोअन्नाँरयिवृधःसुमेधाइति ।प्रथमे छन्दोमे प्रउगे वायव्यतृचस्यैषैव तृतीया सूत्रितश्च—आनोनियुद्भिःशतिनीभिरध्वरंप्रसोताजीरोअध्वरेष्वस्थादिति ।

सैषा सूक्ते पञ्चमी—

आनोनियुद्भिःशतिनीभिरध्वरंसहस्रिणीभिरुपयाहियज्ञम् ।
वायोअस्मिन्त्सवनेमादयस्वयूयंपातस्वस्तिभिःसदानः ॥५॥१४॥

आ । नः । नियुत्ऽभिः । शतिनीभिः । अध्वरम् । सहस्रिणीभिः ।
उप । याहि । यज्ञम् । वायो इति । अस्मिन् । सवने ।
मादयस्व । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥ १४ ॥

हे वायो नोस्माकं अध्वरं हिंसारहितं यज्ञं शतिनीभिः शतसंख्यावतीभिः सहस्रिणीभिः सहस्रसंख्यावतीभिश्च नियुद्भिर्वडवाभिः उपायाहि उपागच्छ तदनन्तरं अस्मिन् सवने प्रातः सवने मादयस्व सोमेन तृप्यस्व अन्यद्गतम् ॥ ५ ॥

॥ इति पञ्चमस्य षष्ठे चतुर्दशोवर्गः ॥ १४ ॥

शुचिंन्वित्यष्टर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्राग्नं अनुक्रम्यते हि शुचिंन्वष्टावैन्द्राग्नंरिवति । गतः सूक्तविनियोगः ऐन्द्राग्नस्य पशोर्वपायाः शुचिमित्येषायाज्या सूत्रितश्च—शुचिंनुस्तोमंनवजातमद्य गीर्भिर्विप्रःप्रमतिमिच्छमानइति ।

सैषा प्रथमा–

शुचिंनुस्तोमंनवंजातमद्येन्द्राग्नीवृत्रहणाजुषेथाम् ।
उभाहिवांसुहवाजोहवीमितावाजंसद्यउशतेधेष्ठा ॥ १ ॥

शुचिम् । नु । स्तोमम् । नवऽजातम् । अद्य । इन्द्राग्नी इति ।
वृत्रऽहना । जुषेथाम् । उभा । हि । वाम् । सुऽहवा ।
जोहवीमि । ता । वाजम् । सद्यः । उशते । धेष्ठा ॥ १ ॥

हे वृत्रहणा वृत्राणां शत्रूणां हन्ताराविन्द्राग्नी शुचिं शुद्धं निरवद्यं नवजातमिदानीमुत्पन्नं स्तोमं मदीयं स्तोत्रं अद्यास्मिन्काले नु क्षिप्रं जुषेथां सेवेथाम् हि यस्मात्सुहवा सुखमाह्वातुं शक्यौ उभा उभौ वां युवां जोहवीमि पुनः पुनराह्वयामि अतआगत्य सेवेथामित्यर्थः।किञ्च ता तौ तथाविधौ युवां उशते कामयमानाय यजमानाय वाजमन्नं बलं वा सद्यस्तदानीमेव शीघ्रं धेष्ठा धातृतमौ भवतम् ॥ १॥

अथ द्वितीया–

तासांनसीशवसानाहिभूतंसाकंवृधाशवसाशूशुवांसा ।
क्षयन्तौरायोयवसस्यभूरेःपृंक्तंवाजस्यस्थविरस्यघृष्वेः॥ २ ॥

ता । सानसी इति । शवसाना । हि । भूतम् । साकम्ऽवृधा ।
शवसा । शूशुऽवांसा । क्षयन्तौ । रायः । यवसस्य ।
भूरेः । पृंक्तम् । वाजस्य । स्थविरस्य । घृष्वेः ॥ २ ॥

हे इन्द्राग्नी ता तौ तादृशौ सानसी सर्वैः संभजनीयौ युवां शवसाना शवोबलं तद्वदाचरन्तौ हि खलु भूतं बलमिव शत्रूणां भंजकावास्तामित्यर्थः । कीदृशौ सन्तौ साकं वृधासह प्रवृद्धौ शवसा बलेन शूशुवांसा वर्धमानौ तथा रायोधनस्य भूरेर्बहुलस्य यवसस्य अन्नस्य क्षयन्तावीश्वरौ एवंविधौ युवां स्थविरस्य स्थूलस्य घृष्वेः शत्रूणां घर्षकस्य वाजस्यान्नस्य क्रियाग्रहणमपि कर्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थेषष्ठी । ईदृशमन्नं पृंक्तं संयोजयतं अस्मभ्यं प्रयच्छतमित्यर्थः ॥ २ ॥

अथ तृतीया–

उपो॒ह यद्वि॒दथं॑ वा॒जिनो॒ गुर्धी॒भि॒र्विप्राः॒ प्रम॑तिमि॒च्छमा॑नाः ।
अर्व॑न्तो॒ न काष्ठां॒ नक्ष॑माणा इन्द्रा॒ग्नी जोहु॑वतो॒ नर॒स्ते ॥ ३ ॥

उपो॒ इति॑ । ह॒ । यत् । वि॒दथ॑म् । वा॒जिन॑ः । गुः । धी॒भिः ।
विप्रा॑ः । प्रऽम॑तिम् । इ॒च्छमा॑नाः । अर्व॑न्तः । न । काष्ठा॑म् ।
नक्ष॑माणाः । इ॒न्द्रा॒ग्नी इति॑ । जोहु॑वतः । नर॑ः । ते ॥ ३ ॥

वाजिनो हविष्मन्तो विप्रा मेधाविनः प्रमतिं प्रकृष्टां मतिं इन्द्राग्न्योरनुग्रहबुद्धिं इच्छमाना आत्मनइच्छन्तः यत् ये यजमानाः विदथं विदंति जानन्ति देवान् तत्र यष्टव्यत्वेनेति विदथो-यज्ञः तं धीभिः कर्मभिः बुद्धिभिर्वा उपोगुः उपगच्छन्ति उइतिपूरकः ते नरः कर्मणां नेतारो-जनाः अर्वन्तो न काष्ठां । यथा अश्वाः शीघ्रं युद्धभूमिं व्याप्नुवन्ति तथा नक्षमाणा ऐन्द्राग्नानि कर्माणि व्याप्नुवन्तः इन्द्राग्नी इन्द्रमग्निं च जोहुवतः पुनःपुनराह्वयन्तोभवंति ॥ ३ ॥

अमावास्यायां ऐन्द्राग्नस्य हविषः गीर्भिरित्येषा याज्या सूत्रितंच–इन्द्राग्नीअवसागतं गीर्भिर्विप्रः प्रमतिमिच्छमानइति । ऐन्द्राग्नेपशौ पुरोडाशस्यैषैव याज्या सूत्रंतूदाहृतम् ।

अथ चतुर्थी–

गी॒र्भिर्विप्रः॒ प्रम॑तिमि॒च्छमा॑न॒ ईट्टे॑ र॒यिं य॒शसं॑ पूर्व॒भाज॑म् ।
इन्द्रा॑ग्नी वृत्रहणा सुवज्रा॒ प्र नो॒ नव्ये॑भिस्तिरतं दे॒ष्णैः ॥ ४ ॥

गीः॒ऽभिः । विप्र॑ः । प्रऽम॑तिम् । इ॒च्छमा॑नः । ईट्टे॑ । र॒यिम् ।
य॒शस॑म् । पू॒र्वऽभाज॑म् । इन्द्रा॑ग्नी॒ इति॑ । वृ॒त्र॒ऽह॒ना॒ ।
सु॒ऽव॒ज्रा॒ । प्र । नः॒ । नव्ये॑भिः । ति॒र॒त॒म् । दे॒ष्णैः ॥ ४ ॥

हे इन्द्राग्नी प्रमतिं युवयोरनुग्रहबुद्धिं इच्छमान इच्छन् विप्रोमेधावी वसिष्ठः यशसं यशसायुक्तं पूर्वभाजं पूर्वमेवसंभजनीयं रयिं धनमुद्दिश्य गीर्भिःस्तुतिभिः ईट्टे युवां स्तौति हे वृत्रहणा वृत्रस्याहन्तारौ सुवज्रा शोभनायुधाविन्द्राग्नी नव्येभिर्नवतरैः प्रशस्तैः देष्णैर्दात-व्यैर्धनैर्नोस्मान् प्रतिरतं प्रवर्धयतम् ॥ ४ ॥

अथ पंचमी–

संयन्मही॑मिथ॒तीस्पर्ध॑मानेतनू॒रुचा॒शूर॑साता॒यत॑ते ।
अदे॑वयुंवि॒दथे॑देव॒युभिः॑स॒त्राह॑तंसोम॒सुता॒जने॑न ॥ ५ ॥ १५ ॥

सम् । यत् । म॒ही इति॑ । मि॒थ॒ती इति॑ । स्पर्ध॑माने॒ इति॑ ।
त॒नू॒ऽरुचा॑ । शूर॑ऽसाता । यत॑ते । अदे॑वऽयुम् । वि॒दथे॑ ।
दे॒व॒युऽभिः॑ । स॒त्रा । ह॒त॒म् । सो॒म॒ऽसुता॑ । जने॑न ॥ ५ ॥ १५ ॥

मही महत्यौ मिथती परस्परं हिंसन्त्यौ यद्वा मेथतिराक्रोशकर्मा परस्परमाक्रोशंत्यौ स्पर्धमाने स्पर्धा कुर्वंत्यौ तनूरुचा आत्मीयेन तेजसा संपन्ने यत् ये शूरसाता शूरसातौ रणे यतेते जेतुं यत्नं कुर्वन्त्यौ वैरिसेने देवयुभिः देवान्कामयमानैः सह विदथे यज्ञे अदेवयुं सत्रा हतं संततं हिंस्तं । तथा सोमसुता सोममभिषुण्वता जनेन यजमानसंघेन असोमसुतं जनं हिंस्तं ॥ ५ ॥

॥ इति पंचमस्य षष्ठे पञ्चदशोवर्गः ॥ १५ ॥

अथ षष्ठी–

इ॒माम॑ु॒पुसोम॑सुति॒मुप॑न॒एन्द्रा॑ग्नीसौम॒नसा॑य॒यातम् ।
नू॒चि॒द्धिप॑रिम॒म्नाथे॑अ॒स्माना॒वां॒शश्व॑द्भि॒र्व॑वृतीय॒वाजैः॑ ॥ ६ ॥

इ॒माम् । ऊँ इति॑ । सु । सोम॑ऽसुतिम् । उप॑ । नः॒ । आ ।
इ॒न्द्रा॒ग्नी इति॑ । सौ॒म॒न॒साय॑ । या॒त॒म् । नु । चि॒त् । हि । प॒रि॒म॒म्नाथे॒ इति॑ प॒रि॒ऽम॒म्नाथे॑ । अ॒स्मान् । आ । वा॒म् । शश्व॑त्ऽभिः ।
व॒वृ॒ती॒य॒ । वाजैः॑ ॥ ६ ॥

हे इन्द्राग्नी इमामु इमामेव नोस्मदीयां सोमसुतिं सोमाभिषवक्रियां सौमनसाय सुमनसोभावाय सु सुष्ठु उपायातम उपागच्छतम्। अपिच युवां अस्मान् परित्यज्य नूचित् नैव मम्नाथे अन्यान् न मन्येथे । अस्मानेव सर्वदा बुध्येथे । हि यस्मादेवं तस्मात् वां युवां शश्वद्भिर्बहुभिर्वाजैरन्नैर्हविर्लक्षणैः आववृतीय आवर्तयामि ॥ ६ ॥

अथ सप्तमी–

सोअ॑ग्नएनानम॑सासमि॒द्धोच्छामि॒त्रंवरु॑णमिन्द्रं॑वोचेः ।
यत्सी॒माग॑श्चकृ॒मातत्सुमृ॑ळतद॑र्य॒मादि॑तिःशिश्रथन्तु ॥ ७ ॥

सः । अ॒ग्ने॒ । ए॒ना । नम॑सा । सम्ऽइ॑द्धः । अच्छ॑ । मि॒त्रम् ।
वरु॑णम् । इन्द्र॑म् । वो॒चेः । यत् । सी॒म् । आगः॑ । च॒कृ॒म ।
तत् । सु । मृ॒ळ । तत् । अ॒र्य॒मा । अदि॑तिः । शि॒श्र॒थ॒न्तु॒ ॥ ७॥

हे अग्ने सत्वं एना एनेन मनसा अन्नेन अस्मदीयेन हविषा समिद्धः सन् दीप्तः सन् मित्रं वरुणं इन्द्रं च अच्छवोचेः अभिब्रूयाः अयमस्मदीयोरक्षणीयइति कथय । वयं यदागोपराधं सीमिति परिग्रहार्थीयः सीं सर्वतोवाङ्मनःकायैश्चकृम कृतवन्तोवयं तत्तस्मादागसः सुमृळ अस्मान् सुष्टु रक्ष । तच्चागः अर्यमा अदितिः मित्रादयश्च शिश्रथन्तु अस्मत्तोवियोजयन्तु ॥ ७॥

अथाष्टमी–

ए॒ताअ॑ग्नआशु॒षा॒णासं॑इ॒ष्टीर्यु॒वोःसचा॒भ्यं॑श्याम॒वाजा॑न् ।
मेन्द्रो॑नो॒विष्णु॑र्म॒रुतः॒परि॑ख्यन्यू॒यंपा॑तस्व॒स्तिभि॒ःसदा॑नः ॥८॥१६॥

ए॒ताः । अ॒ग्ने॒ । आ॒शु॒षा॒णासः॑ । इ॒ष्टीः । यु॒वोः । सचा॑ । अ॒भि ।
अ॒श्या॒म॒ । वाजा॑न् । मा । इन्द्रः॑ । नः॒ । विष्णुः॑ । म॒रुतः॑ ।
परि॑ । ख्य॒न् । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ८ ॥ १६ ॥

हे अग्ने उपलक्षणमेतत् हे इन्द्राग्नी एताः इष्टीः इमान्यज्ञान् आशुषाणासः आशु शीघ्रं संभजमानावयं युवोर्युवयोः स्वभूतान्वाजानन्नानि सचासह युगपदेव अभ्यश्याम अभिप्राप्याम अपिच इन्द्रोविष्णुर्मरुतश्च नोस्मान् मापरिख्यन् अस्मान्परित्यज्यान्यान् माद्राक्षुः सर्वदास्मानेव पश्यन्तु । अन्यद्गतम् ॥ ८ ॥

॥ इति पञ्चमस्य षष्ठे षोडशोवर्गः ॥ १६ ॥

इयंवामिति द्वादशर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षमैन्द्राग्नं द्वादशी अनुष्टुप् शिष्टागायत्र्यः तथाचानुक्रान्तम्–इयंवांद्वादशगायत्रमन्त्यानुष्टुबिति । ज्योतिष्टोमे प्रातःसवनेच्छावाकशस्त्रे आ-

दितीनवर्चः शस्यन्ते सूत्रितेहि—इयंवामस्यमन्मनइति नवेति । आभिप्लविकेपृक्ष्येपु स्तोमेपु वृष्णवच्छावाकस्य प्रातःसवने इदंसूक्तमावापार्थम् उत्तमावर्जं । सूत्रितञ्च—इयंवामस्यमन्मन-इत्येकादशेति । चातुर्विंशिकेहनि प्रातःसवने एवस्यैवाद्यस्तृचः सूत्रितंच—इयंवामस्यमन्मनइ-न्द्राग्नीयुवामिमइति ।

तत्र प्रथमा—

इ॒यं वा॑म॒स्य मन्म॑न॒ इन्द्रा॑ग्नी पू॒र्व्यस्तु॑तिः । अ॒भ्राद्वृ॒ष्टिरि॑वाजनि ॥१॥

इ॒यम् । वा॒म् । अ॒स्य । मन्म॑नः । इन्द्रा॑ग्नी॒ इति॑ । पू॒र्व्यऽस्तु॑तिः ।
अ॒भ्रात् । वृ॒ष्टिःऽइ॑व । अ॒ज॒नि॒ ॥ १ ॥

हे इन्द्राग्नी इयं पूर्व्यस्तुतिः पूर्व्या मुख्यास्तुतिः अस्य मन्मनः स्तोतुः अस्मात्सकाशात् वां युवाभ्यां युवयोरर्थं अभ्रात् मेघात् वृष्टिरिव बह्वी सती अजनि प्रादुर्भूता तां शृणुतमित्युत्तरत्र संबन्धः ॥ १ ॥

अथ द्वितीया—

शृ॒णु॒तं ज॑रि॒तुर्हव॒मिन्द्रा॑ग्नी॒ वन॑तं॒ गिरः॑ । ई॒शा॒ना पि॑प्यतं॒ धियः॑ ॥ २ ॥

शृ॒णु॒तम् । ज॒रि॒तुः । हव॑म् । इन्द्रा॑ग्नी॒ इति॑ । वन॑तम् ।
गिरः॑ । ई॒शा॒ना । पि॒प्य॒त॒म् । धियः॑ ॥ २ ॥

हे इन्द्राग्नी जरितुः स्तोतुः हवमाह्वानं युवां शृणुतं श्रुत्वा च गिरस्तदीयास्तुतिर्वनतं सं-भजतम् तथा ईशाना ईश्वरौ युवां धियः अनुष्ठितानि कर्माणि पिप्यतं तत्स्थैः फलैः पूरयतम्॥२॥

अथ तृतीया—

मा पा॑प॒त्वाय॑ नो न॒रेन्द्रा॑ग्नी॒ माभिश॑स्तये । मा नो॑ रीरधतं नि॒दे ॥ ३ ॥

मा । पा॒प॒ऽत्वाय॑ । नः॒ । न॒रा॒ । इन्द्रा॑ग्नी॒ इति॑ । मा ।
अ॒भिऽश॑स्तये । मा । नः॒ । री॒र॒ध॒त॒म् । नि॒दे ॥ ३ ॥

हे नरानेताराविन्द्राग्नी नोस्मान् पापत्वाय पापवत्वाय हीनभावाय मारीरधतं मावशीकुरु-तम् । तथा अभिशस्तये शत्रुभिः कृताभिशंसनाय मारीरधतं मावशीकुरुतम् । तथा निदे निं-दकाय यजमानाय नोस्मान् मारीरधतं मावशीकुरुतम् ॥ ३ ॥

चातुर्विंशिकेहनि प्रातः सवनेच्छावाकस्य इन्द्रेअग्नेत्ययं पळहस्तोत्रियसंज्ञकस्तृचः सूत्रितश्च–इन्द्रेअग्नानमोबृहत्वाहुवेयोरिदमिति ।

तृचे प्रथमा सूक्ते चतुर्थी–

इन्द्रे॑अ॒ग्ना नमो॑बृ॒हत्सु॑वृ॒क्तिमेर॑यामहे । धि॒याधेना॑अव॒स्यवः॑ ॥४॥

इन्द्रे॑ । अ॒ग्ना । नमः॑ । बृ॒हत् । सु॒ऽवृ॒क्तिम् । आ । ई॒र॒या॒म॒हे॒ ।
धि॒या । धेनाः॑ । अ॒व॒स्यवः॑ ॥ ४ ॥

अवस्यवः रक्षणकामाः वयं इन्द्रे देवे अग्ना अग्नौ च बृहत् बृंहणं वर्धकं हविर्लक्षणमन्नं सुवृक्तिं सुप्रवृत्तां स्तुतिंच आ ईरयामहे अभिप्रेरयामः । तथा धिया कर्मणा युक्ताः धेनाः प्राङ्नामैतत् अप्रगीताः स्तुतिवाचश्च अभि प्रेरयामः ॥ ४ ॥

अथ पञ्चमी–

ताहिशश्व॑न्त॒ईळ॑तइ॒त्थाविप्रा॑सऊ॒तये॑ । स॒बाधो॒वाज॑सातये ॥ ५ ॥

ता । हि । शश्व॑न्तः । ईळ॑ते । इ॒त्था । विप्रा॑सः ।
ऊ॒तये॑ । स॒ऽबाधः॑ । वाज॑ऽसातये ॥ ५ ॥

ता हि तौ खलु इन्द्राग्नी शश्वन्तः बहवः विप्रासोमेधाविनोजनाः ऊतये रक्षणाय इत्था इत्थमनेन प्रकारेण ईळते स्तुवन्ति । तथा सबाधः समानं बाधमानाः परस्परं बाध्यमानाः जनाः वाजसातये अन्नलाभाय तावेवेन्द्राग्नी ईळते स्तुवन्ति यद्वा वाजसातिरिति सङ्ग्रामनाम सङ्ग्रामार्थम् ॥ ५ ॥ अथ षष्ठी–

तावां॑गी॒र्भिर्वि॑प॒न्यवः॒प्रय॑स्वन्तोहवामहे । मे॒धसा॑तासनि॒ष्यवः॑॥६॥१७॥

ता । वा॒म् । गीः॒ऽभिः । वि॒प॒न्यवः॑ । प्रय॑स्वन्तः ।
ह॒वा॒म॒हे॒ । मे॒धऽसा॑ता । स॒नि॒ष्यवः॑ ॥ ६ ॥ १७ ॥

विपन्यवः स्तोत्रमिच्छन्तः प्रयस्वन्तः हविर्लक्षणेनान्नेनोपेताः सनिष्यवः सनिं धनमात्मन इच्छन्तोवयं मेधसाता मेधानां यागानां सातौ संभजने निमित्तभूते सति हे इन्द्राग्नी ता तौ वां युवां गीर्भिः स्तुतिभिः हवामहे आह्वयामहे ॥ ६ ॥

॥ इति पञ्चमस्य षष्ठे सप्तदशोवर्गः ॥ १७ ॥

अमावास्यायामैन्द्राग्नस्यहविषः इन्द्राग्नीअवसेत्यनुवाक्या सूत्रितञ्च—इन्द्राग्नीअवसागतंगीर्भिर्विप्रः प्रमतिमिच्छमानइति ।

सैषा सप्तमी—

इन्द्रा॑ग्नी॒अव॑सागतम॒स्मभ्यं॑चर्षणीसहा । मानो॑दु॒ःशंसई॑शत ॥७॥

इन्द्रा॑ग्नी॒ इति॑ । अव॑सा । आ । ग॒त॒म् । अ॒स्मभ्य॑म् ।
च॒र्ष॒णि॒ऽस॒हा॒ । मा । न॒ः । दु॒ःऽशंस॑ः । ई॒श॒त॒ ॥ ७ ॥

हे चर्षणीसहा चर्षणीनां मनुष्याणां शत्रुभूतानामभिभवितारौ हे इन्द्राग्नी अस्मभ्यं स्तोतृभ्योदेयेन अवसा अन्नेनसह आगतं आगच्छतम् दुःशंसोदुष्टाभिशंसनः पारुष्यवादी शत्रुश्च नोस्मान् माईशत ईशिष्ट अस्मान् बाधितुं मा शक्नोतु ॥ ७ ॥

अथाष्टमी—

माकस्य॑नो॒अर॑रुषोधू॒र्तिःप्रण॒ङ्मर्त्य॑स्य । इन्द्रा॑ग्नी॒शर्म॑यच्छतम् ॥८॥

मा । कस्य॑ । न॒ः । अर॑रुषः । धू॒र्तिः । प्रण॑क् ।
मर्त्य॑स्य । इन्द्रा॑ग्नी॒ इति॑ । शर्म॑ । य॒च्छ॒त॒म् ॥ ८ ॥

हे इन्द्राग्नी कस्य कस्यचिदपि अररुषः अरेर्मर्त्यस्य मनुष्यसंबन्धिनी धूर्तिः हिंसा नोस्मान् माप्रणक् मा प्राप्नोति शर्मसुखं च अस्मभ्यं यच्छतं दत्तम् ॥ ८ ॥

अथ नवमी—

गोम॒द्धिर॑ण्यव॒द्वसु॒यद्वा॒मश्वा॑व॒दीम॑हे । इन्द्रा॑ग्नी॒तद्व॑नेमहि ॥ ९ ॥

गोऽम॑त् । हिर॑ण्यऽवत् । वसु॑ । यत् । वा॒म् । अश्व॑ऽवत् ।
ईम॑हे । इन्द्रा॑ग्नी॒ इति॑ । तत् । व॒ने॒म॒हि॒ ॥ ९ ॥

हे इन्द्राग्नी गोमत् गोभिर्युक्तं हिरण्यवत् हिरण्यैः सुवर्णैर्युक्तम् अश्वावत् अश्वैश्चोपेतं यद्वसु वां युवां ईमहे याचामहे तद्वसु युवयोः प्रसादात् वयं वनेमहि संभजेमहि ॥ ९ ॥

चातुर्विंशिकेहनि प्रातःसवने अच्छावाकशस्त्रे यत्सोमआसुतइत्यारंभणीया अहर्गणेषुच द्वितीयादिष्वहस्सु एषा प्रातःसवने तेनैवशंसनीया सूत्रितश्च--यत्सोमआसुतेनरइत्यारंभणीयाः शस्त्वेति ।

सैषा दशमी--

यत्सोमआसुतेनरइन्द्राग्नीअजोहवुः । सप्तीवन्तासपर्यवः ॥ १० ॥

यत् । सोमे । आ । सुते । नरः । इन्द्राग्नी इति ।
अजोहवुः । सप्तिऽवन्ता । सपर्यवः ॥ १० ॥

सोमे सुते अभिषुते सति नरः कर्मणां नेतारः ऋत्विजः सपर्यवः परिचरणकामाः सन्तः सप्तीवन्ता प्रशस्ताश्वौ इन्द्राग्नीइन्द्रमग्निं च यद्यदा अजोहवुरभिह्वयन्ते तदा युवामागच्छतमितिशेषः ॥ १० ॥

अथैकादशी--

उक्थेभिर्वृत्रहंतमायामन्दानाचिदागिरा । आङ्गूषैराविवासतः ॥ ११ ॥

उक्थेभिः । वृत्रहन्ऽतमा । या । मन्दाना । चित् ।
आ । गिरा । आङ्गूषैः । आऽविवासतः ॥ ११ ॥

वृत्रहन्तमा वृत्राणामावरकाणां हन्तृतमौ मन्दाना मोदमानौ या याविन्द्राग्नी उक्थेभिः शस्त्रैः गिरा च स्तुत्या च आविवासतः परिचर्येते व्यत्ययेन कर्मणि कर्तृप्रत्ययः चिदितिचार्थे आङ्गूषैरन्यैश्च स्तोत्रैः यावाविवासतः परिचर्येते तौ युवां आगच्छतमितिशेषः ॥ ११ ॥

अथ द्वादशी--

ताविद्दुःशंसंमर्त्यंदुर्विद्वांसंरक्षस्विनम् ।
आभोगंहन्मनाहतमुदधिंहन्मनाहतम् ॥ १२ ॥ ॥ १८ ॥

तौ । इत् । दुःऽशंसम् । मर्त्यम् । दुःऽविद्वांसम् । रक्षस्विनम् ।
आऽभोगम् । हन्मना । हतम् । उदऽधिम् । हन्मना । हतम् ॥ १२ ॥ १८ ॥

हे इन्द्राग्नी तौ युवां दुःशंसं दुष्टाभिशंसनं दुर्विद्वांसं दुर्विज्ञानं रक्षस्विनं बलवन्तं आभोगं आहत्यास्मत्तोपहृत्य भोकारंमर्त्यं मनुष्यं शत्रुं हन्मना हननसाधनेनायुधेन हतं हिंस्तं उक्तमेवार्थं दृष्टान्तेन दृढयति—उदधिं लुप्तोपममेतत् उदधानं कुंभमिव यथा कुंभअनायासेनभिद्यन्ते एवमनायासेनैव शत्रुं आयुधेन युवां हिंस्तम् ॥ १२ ॥

॥ इति पञ्चमस्य षष्ठेष्टादशोवर्गः ॥ १८ ॥

प्रक्षोदसेति षळृचं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सरस्वतीदेवताकम् तृतीयातु सरस्वद्देवताका अनुक्रम्यतेच—प्रक्षोदसाषट् सारस्वतंतु तृतीयासरस्वतइति । गतःसूक्तविनियोगः । प्रथमेछन्दोमे प्रउगशस्त्रे प्रक्षोदसाधायसासस्रएषेति प्रउगमिति।सारस्वतेपशौ प्रक्षोदसेति वपायायाज्या सूत्रितञ्च—प्रक्षोदसाधायसासस्रएषा पावीरवीकन्याचित्रायुरिति ।

तत्र प्रथमा—

प्रक्षोद॑सा॒धाय॑सासस्र॒एषासर॑स्वतीध॒रुण॒मायं॑सी॒पूः ।
प्र॒बाव॑धानार॒थ्ये॑वयाति॒विश्वा॑अ॒पोम॑हि॒नासिन्धु॑र॒न्याः ॥ १ ॥

प्र । क्षोद॑सा । धाय॑सा । स॒स्रे । ए॒षा । सर॑स्वती । ध॒रुण॑म् ।
आय॑सी । पूः । प्र॒ऽबाव॑धाना । र॒थ्या॑ऽइव । या॒ति॒ ।
विश्वाः॑ । अ॒पः । म॒हि॒ना । सिन्धुः॑ । अ॒न्याः ॥ १ ॥

सरस्वती एषा । नदीवन्निगमा एषा दृश्यमानानदीरूपा सरस्वती आयसी अयसानिर्मिता पूः पुरीव धरुणं लिङ्गव्यत्ययः धरुणा धारयित्री धायसा धारकेण क्षोदसा उदकेन प्रसस्रे प्रधावति शीघ्रं गच्छति । सिन्धुः स्यन्दनशीला नदीरूपा सा अन्या विश्वाः सर्वाअपः आपगाः महिना महिम्ना प्रबाधमाना भृशं बाधमाना रथ्येव मवोढीव विस्तीर्णासती याति गच्छति । यद्वा रथ्येव रथिनेव यथा रथी रथेन मार्गस्थं तरुगुल्मादिकं चूर्णीकृत्यगच्छति तद्वत्स्वकीयेन वेगेन सर्वं पिंषती गच्छतीत्यर्थः ॥ १ ॥

सारस्वतएवपशौ वपाया एकाचेतदित्यनुवाक्या सूत्रितं च—एकाचेतत्सरस्वतीनदीनामुतस्यानःसरस्वतीजुषाणेति ।

सैषा द्वितीया—

एकाचेतत्सरस्वतीनदीनांशुचिर्यतीगिरिभ्यआसमुद्रात् ।
रायश्चेतन्तीभुवनस्यभूरेर्घृतंपयोदुदुहेनाहुषाय ॥ २ ॥

एका । अचेतत् । सरस्वती । नदीनाम् । शुचिः । यती ।
गिरिऽभ्यः । आ । समुद्रात् । रायः । चेतन्ती । भुवनस्य ।
भूरेः । घृतम् । पयः । दुदुहे । नाहुषाय ॥ २ ॥

सहस्रवत्सरेण क्रतुना यक्ष्यमाणो नाहुषोनामराजा सरस्वतीं नदीं प्रार्थयामास सा च तस्मै सहस्रसंवत्सरपर्याप्तं पयोघृतंच प्रददौ अयमर्थोत्र प्रतिपाद्यते—नदीनामन्यासां मध्ये शुचिः शुद्धा गिरिभ्यः सकाशात् आसमुद्रात् समुद्रपर्यन्तं यती गच्छन्ती एका सरस्वती नदी अचेतत् नाहुषस्य प्रार्थनामज्ञासीत् तथा भुवनस्य भूतजातस्य भूरेर्बहुलस्य रायोधनानि चेतन्ती प्रज्ञापयन्ती प्रयच्छन्ती नाहुषाय राज्ञे घृतं पयश्च सहस्रसंवत्सरक्रतोः पर्याप्तं दुदुहे दुग्धवती दत्तवती ॥२॥

सरस्वद्देवताकेपशौ सवावृधइति पुरोडाशस्ययाज्या सूत्रितंच—सवावृधेनर्योयोषणासुप्रसतंपशवोयन्तिसर्वइति ।

सैषा तृतीया—

सवावृधेनर्योयोषणासुवृषाशिशुर्वृषभोयज्ञियासु ।
सवाजिनंमघवद्भ्योदधातिविसातयेतन्वंमामृजीत ॥ ३ ॥

सः । वावृधे । नर्यः । योषणासु । वृषा । शिशुः । वृषभः ।
यज्ञियासु । सः । वाजिनम् । मघवत्ऽभ्यः । दधाति । वि ।
सातये । तन्वम् । मामृजीत ॥ ३ ॥

समध्यमस्थानोवायुः सरस्वान् नर्योनरेभ्योहितः योषणासु यतः वृषा सेचनसमर्थः शिशुः अल्पः प्रादुर्भावसमये अल्पतया दृश्यमानः वृषभोवर्षिता एवंभूतः सरस्वान् यज्ञियासु यज्ञार्हासु योषणासु योषित्सु आत्मनः कलत्रभूतासु मध्यमस्थानास्वप्सु मध्ये ववृधे वर्धते सतादृशः सरस्वान् मघवद्भ्यो हविष्मद्भ्यो यजमानेभ्यः वाजिनं बलिनं पुत्रं दधाति ददाति

तथा सातये लाभार्थं तन्वं तेषां शरीरं विमावृजीत विमार्ष्टि लाभार्थं संस्करोतीत्यर्थः यद्यप्येषा सारस्वतःस्तुतिः तथापि सरस्वत्याः प्रीणनार्थं तत्स्तवनमिति छान्दोमिके सारस्वते तृचे अस्या उक्तोविनियोगोन विरुध्यते ॥ ३ ॥

दशरात्रेऽष्टमेहनि प्रउगे उतस्यानइति सारस्वतः सप्तमस्तृचः सूत्रितञ्च—उतस्यानःसरस्वतीजुषाणा सरस्वत्यभिनोनेषिवस्यइति ।

सैषा सूक्ते चतुर्थी—

उतस्यानःसरस्वतीजुषाणोपश्रवत्सुभगायज्ञेअस्मिन् ।
मितज्ञुभिर्नमस्यैरियानारायायुजाचिदुत्तरासखिभ्यः ॥ ४ ॥

उत । स्या । नः । सरस्वती । जुषाणा । उप । श्रवत् ।
सुऽभगा । यज्ञे । अस्मिन् । मितज्ञुऽभिः । नमस्यैः ।
इयाना । राया । युजा । चित् । उत्ऽतरा । सखिऽभ्यः ॥ ४ ॥

उतापिच जुषाणा प्रीयमाणा सुभगा शोभनधना स्या सा सरस्वती नोस्माकमस्मिन्यज्ञे उपश्रवत् अस्मदीयाःस्तुतीरुपशृणोतु ।कीदृशी सा मितज्ञुभिः प्रह्वैर्जानुभिः नमस्यैर्नमस्कारैर्देवैः इयाना उपगम्यमाना चिच्छब्दश्चार्थे युजा नित्ययुक्तेन राया धनेन च संगता सखिभ्यःउत्तरा उत्कृष्टतरा ईदृशी अस्मदीयाःस्तुतीः उपशृणोत्वित्यन्वयः ॥ ४ ॥

पवित्रेष्ट्यां सारस्वतस्य हविषोइमाजुह्वानाइतियाज्या सूत्रितञ्च—इमाजुह्वानायुष्मदानमोभिर्दधिक्राव्णोअकारिषमिति ।

सैषा पञ्चमी—

इमाजुह्वानायुष्मदानमोभिःप्रतिस्तोमंसरस्वतिजुषस्व ।
तवशर्मन्प्रियतमेदधानाउपस्थेयामशरणंनवृक्षम् ॥ ५ ॥

इमा । जुह्वानाः । युष्मत् । आ । नमःऽभिः । प्रति । स्तोमम् ।
सरस्वति । जुषस्व । तव । शर्मन् । प्रियऽतमे । दधानाः ।
उप । स्थेयाम । शरणम् । न । वृक्षम् ॥ ५ ॥

हे सरस्वति इमा इमान्यस्मदीयानि हवींषि जुह्वानास्तुभ्यं जुह्वतोवयं नमोभिः त्वद्विषयैर्नमस्कारैः युष्मद् त्वत्सकाशात् आ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः आददीमहि धनानीति शेषः स्तोमं चास्मदीयं प्रतिजुषस्व प्रतिसेवस्व वयश्च प्रियतमे अतिशयेन प्रिये तव त्वदीये शर्मन् शर्मणि सुखे दधानाः निधीयमानाः सन्तः शरणं न वृक्षं आश्रयभूतं वृक्षमिव उपस्थेयाम त्वां उपतिष्ठेम संगच्छेमहि ॥ ५ ॥

अथ षष्ठी–

अयमुतेसरस्वतिवसिष्ठोद्वारावृतस्यसुभगेव्यावः ।
वर्धशुभ्रेस्तुवतेरासिवाजान्यूयंपातस्वस्तिभिःसदानः ॥६ ॥१९॥

अयम् । ऊँ इति । ते । सरस्वति । वसिष्ठः । द्वारौ । ऋतस्य ।
सुऽभगे । वि । आवरित्यावः । वर्ध । शुभ्रे । स्तुवते । रासि ।
वाजान् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ १९ ॥

हे सुभगे शोभनधने सरस्वति अयं वसिष्ठः ते त्वां यन्तुः ऋतस्य यज्ञस्य संबन्धिन्यौ द्वारौ पूर्वापरे व्यावः विवृणोति उइतिपूरकः हे शुभ्रे शुभ्रवर्णे देवि वर्ध वर्धस्व तथा स्तुवते स्तोत्रं कुर्वते वसिष्ठाय वाजानन्नानि रासि प्रदेहि अन्यद्गतम् ॥ ६ ॥

॥ इति पंचमस्य षष्ठे एकोनविंशोवर्गः ॥ १९ ॥

बृहदुगायिषइति षळृचं सप्तमं सूक्तं वसिष्ठस्यार्षं आद्याबृहती द्वितीया सतोबृहती तृतीया प्रस्तारपंक्तिः शिष्टास्तिस्रोगायत्र्यः आद्यस्तृचः सरस्वतीदेवताकः अन्त्यश्च सरस्वद्देवताकः तथा चानुक्रान्तम्–बृहदुप्रगाथः प्रस्तारपंक्तिः परास्तिस्रोगायत्र्यः सरस्वतइति। पञ्चमेहनिप्रउगशस्त्रे आद्यः प्रगाथः सारस्वतस्तृचः सूत्रितश्च–बृहदुगायिषेवचइति बार्हतं प्रउगं प्रगाथानेकइति ।

तत्र प्रथमा–

बृहदुंगायिषेवचोसुर्यानदीनाम् ।
सरस्वतीमिन्महयासुवृक्तिभिःस्तोमैर्वसिष्ठरोदसी ॥ १ ॥

बृहत् । ऊँ इति । गायिषे । वर्चः । असुर्या । नदीनाम् ।
सरस्वतीम् । इत् । महय । सुवृक्तिऽभिः । स्तोमैः ।
वसिष्ठ । रोदसी इति ॥ १ ॥

अनया ऋषिरात्मानं संबोध्य सरस्वत्याःस्तुतौ प्रेरयति हे वसिष्ठ त्वं बृहदु बृहदेव महदेव वचः स्तोत्रं गायिषे गायसि किमर्थं नदीनां मध्ये असुर्या असुरशब्दाच्चतुर्थ्येकवचनस्यङ्या-देशः असुरायै बलवत्यै नदीरूपायै सरस्वत्यै अस्याः प्रीणनार्थमित्यर्थः तथा रोदसी द्यावा-पृथिव्योः स्थितां दिवि देवतारूपेण भूम्यांवाग्रूपेण निवसन्तीं सरस्वतीमित् सरस्वतीमेव सुवृक्तिभिः सुष्ठु दोषवर्जितैः स्तोमैः स्तोत्रैर्महय पूजय सर्वदा सरस्वतीमेव स्तुहि नान्यां देव-तामिति भावः ॥ १ ॥

अथ द्वितीया—

उभेयत्तेमहिनाशुभ्रेअन्धसीअधिक्षियन्तिपूरवः ।
सानोबोध्यवित्रीमरुत्सखाचोदराधोमघोनाम् ॥ २ ॥

उभे इति । यत् । ते । महिना । शुभ्रे । अन्धसी इति ।
अधिऽक्षियन्ति । पूरवः । सा । नः । बोधि । अवित्री ।
मरुत्ऽसखा । चोद । राधः । मघोनाम् ॥ २ ॥

हे शुभ्रे शुभ्रवर्णे सरस्वति यत् यस्यास्ते तव महिना महिम्ना उभे अन्धसी उभयविधं दिव्यं पार्थिवं चान्नं ग्राम्यमारण्यं वा पूरवः पूरयितव्या मनुष्याः अधिक्षियन्ति अधिगच्छन्ति सा त्वं अवित्री रक्षित्री सती नोस्मान् बोधि बुध्यस्व । अपिच मरुत्सखा मरुतोमाध्यमिकादे-वगणाः ते सखायोयस्या माध्यमिकाया वाचः तादृशी त्वं मघोनां हविर्लक्षणधनोपेतानाम-स्माकं राधोधनं चोद प्रेरय ॥ २॥

अथ तृतीया—

भद्रमिद्भद्राकृणवत्सरस्वत्यकवारीचेततिवाजिनीवती ।
गृणानाजमदग्निवत्स्तुवानाचवसिष्ठवत् ॥ ३ ॥

भद्रम् । इत् । भद्रा । कृणवत् । सरस्वती । अकवऽअरी ।
चेतति । वाजिनीऽवती । गृणाना ।
जमदग्निऽवत् । स्तुवाना । च । वसिष्ठऽवत् ॥ ३ ॥

भद्रा कल्याणी भजनीयावा सरस्वती भद्रमिव् भद्रमेव कल्याणमेव कृणवव् अस्माकं करोतु।तथा अकवारी अकुत्सितगमना वाजिनीवति चेतति अन्नवती चेतयतु अस्मान् प्रज्ञापयतु । यद्वा मदीयं स्तोत्रं चेतति जानातु। तथा जमदग्निवव् जमदग्निना ऋषिणेव मया गृणाना स्तूयमाना वसिष्ठवव् अर्हार्थेवतिप्रत्ययः वसिष्ठार्हं वसिष्ठस्यानुरूपं स्तुवाना स्तूयमाना च भव ॥ ३ ॥

सरस्वद्देवताके पशौ जनीयन्तइति तिस्रः पशुपुरोडाशहविषां क्रमेणानुवाक्याः सूत्रितञ्च-जनीयन्तोन्वग्रवइतितिस्रो दिव्यंसुपर्णवायसंबृहन्तमिति ।

अथ चतुर्थी—

जनीयन्तोन्वग्रवःपुत्रीयन्तःसुदानवः । सरस्वन्तंहवामहे ॥ ४ ॥

जनिऽयन्तः । नु । अग्रवः । पुत्रिऽयन्तः । सुऽदानवः ।
सरस्वन्तम् । हवामहे ॥ ४ ॥

जनीयन्तः जायन्तआस्वपत्यानीति जनयोजायाः ताइच्छन्तः पुत्रीयन्तः पुत्रान्कामयमानाः सुदानवः शोभनदानाः अग्रवः उपगन्तारोवयं नु अद्य सरस्वन्तं देवं हवामहे स्तुमहे आह्वयामहे वा ॥ ४ ॥

अथ पंचमी—

येतेसरस्वऊर्मयोमधुमन्तोघृतश्चुतः । तेभिर्नोविताभव ॥ ५ ॥

ये । ते । सरस्वः । ऊर्मयः । मधुऽमन्तः । घृतऽश्चुतः ।
तेभिः । नः । अविता । भव ॥ ५ ॥

हे सरस्वः सरस्वन् देव ते त्वदीयाः ये ऊर्मयोजलसंघा मधुमन्तोरसवन्तः घृतश्चुतः घृतस्य वृष्ट्युदकस्य क्षारिणोभवन्ति तेभिस्तैरूर्मिभिः नोस्माकमविता रक्षिताभव ॥ ५॥

अन्वारंभणीयायां सरस्वतोयागस्य पीपिवांसमित्यनुवाक्या सूत्रितञ्च—पीपिवांसंसरस्वतोदिव्यंसुपर्णवायसंबृहन्तमिति ।

सैषा षष्ठी—

पी॒पि॒वांसं॒सर॑स्वत॒:स्तनं॒यो॒वि॒श्वद॑र्शतः। भ॒क्षी॒महि॑प्र॒जामिषं॑म्॥६॥२०॥

पी॒पि॒ऽवांस॑म्। सर॑स्वतः। स्तन॑म्। यः। वि॒श्वऽद॑र्शतः।
भ॒क्षी॒महि॑। प्र॒ऽजाम्। इषं॑म्॥ ६ ॥ २० ॥

पीपिवासं प्रवृद्धं सरस्वतोदेवस्य स्तनं शब्दायमानं स्तनवद्रसाधारं वा मेघं भक्षीमहि भजेमहि प्राप्नुयाम। योविश्वदर्शतोविश्वैः सर्वैर्दर्शतोभवति दृश्यमानोभवति तं स्तनं मेघमित्यर्थः तथा प्रजां पुत्रादिरूपां इषमन्नंच सरस्वतः प्रसादाद्भक्षीमहि॥ ६॥

॥ इति पञ्चमस्य षष्ठे विंशोवर्गः ॥ २० ॥

यज्ञेदिवइति दशर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं प्रथमायाइन्द्रः तृतीयानवम्योरिन्द्राब्रह्मणस्पती देवता दशम्याइन्द्राबृहस्पती शिष्टानांतु बृहस्पतिः। तथाचानुक्रान्तम्—यज्ञेदशैंद्याद्यि बार्हस्पत्यमन्त्यैन्द्रीच तृतीयानवम्यावैन्द्राब्राह्मणस्पत्यइति। आभिप्लविकेपृष्ठ्येषु तृतीयसवने स्तोमवृद्धौ ब्राह्मणाच्छंसिनः इदमुत्तरंच सूक्तमावापार्थं सूत्रितञ्च यज्ञेदिवइति सूक्तेइति।

तत्र प्रथमा—

य॒ज्ञे दि॒वो नृ॒षद॑ने पृथि॒व्या नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति।
इन्द्रा॑य॒ यत्र॒ सव॑नानि सु॒न्वे गम॒न्मदा॑य प्रथ॒मं वय॑श्च॥ १॥

य॒ज्ञे। दि॒वः। नृ॒ऽसद॑ने। पृ॒थि॒व्याः। नरः॑। यत्र॑।
दे॒व॒ऽयवः॑। मद॑न्ति। इन्द्रा॑य। यत्र॑। सव॑नानि।
सु॒न्वे। गम॑त्। मदा॑य। प्र॒थ॒मम्। वयः॑। च॒॥ १॥

यत्र यस्मिन्यज्ञे देवयवोदेवान् कामयमाना नरोनेतारऋत्विजोमदन्ति हृष्यंति यत्र यस्मिंश्च सवनानि अभिषोतव्याः सोमाः इन्द्राय इन्द्रार्थं सुन्वे अभिषूयन्ते पृथिव्याः संबन्धिनि नृषदने नृणां नेतॄणां सदनभूते तस्मिन्यज्ञे प्रथमं सर्वेभ्योदेवेभ्यः पूर्वं दिवोद्युलोकात् इन्द्रः गमत् आगच्छतु किमर्थं मदाय मदार्थं सोमं पातुमित्यर्थः तथा वयश्च गन्तारः तदीयाअश्वाश्च गमत् आगच्छन्तु॥ १॥

अथ द्वितीया–

आदैव्यांवृणीमहेवांसिबृहस्पतिर्नोमहआसखायः ।
यथाभवेममीढुषेअनागायोनोदातापरावतःपितेव ॥ २ ॥

आ । दैव्यां । वृणीमहे । अवांसि । बृहस्पतिः । नः ।
महे । आ । सखायः । यथा । भवेम । मीढुषे । अनांगाः ।
यः । नः । दाता । पराऽवतः । पिताऽइव ॥ २ ॥

हे सखायः समानख्यानाः स्तोतारः वयं दैव्या दैव्यानि देवसंबन्धीनि अवांसि रक्षणानि आवृणीमहे अभिभजामहे प्रार्थयामहे नोस्माकं हविः बृहस्पतिःबृहतां पालयिता देवः आमहे महतिर्दानार्थः आमहते आदत्ते लोपस्तआत्मनेपदेष्विति तलोपः योबृहस्पतिः परावतोदूरदेशात् धनान्याहृत्य पुत्रेभ्यः पितेव नोस्मभ्यं दाताभवति तस्मै मीढुषे सेक्रे बृहस्पतये अनागाः अनागसः अनपराधा यथावयं भवेम हे सखायः तथा यूयं परिचरतेति शेषः ॥ २ ॥

अथ तृतीया–

तमुज्येष्ठंनमसाहविर्भिःसुशेवंब्रह्मणस्पतिंगृणीषे ।
इन्द्रंश्लोकोमहिदैव्यःसिषक्तुयोब्रह्मणोदेवकृतस्यराजा ॥ ३ ॥

तम् । ऊँ इति । ज्येष्ठम् । नमसा । हविःऽभिः । सुऽशेवम् ।
ब्रह्मणः । पतिम् । गृणीषे । इन्द्रम् । श्लोकः । महि । दैव्यः ।
सिसक्तु । यः । ब्रह्मणः । देवऽकृतस्य । राजा ॥ ३ ॥

ज्येष्ठं प्रशस्यतमं सुशेवं सुसुखं ब्रह्मणोमन्त्रस्य पतिं पालयितारं एततत्तं तमु तमेव, देवं नमसा नमस्कारेण हविर्भिश्चरुपुरोडाशादिभिश्च सार्धं गृणीषे गृणे स्तुवे । अपिच महि महान्तमिन्द्रं दैव्यः देवार्हः श्लोकः अस्मदीयः स्तावकोमन्त्रः सिषक्तु सेवतां ब्रह्मणोन्नस्य मन्त्रस्यवा देवकृतस्य देवैः स्तोतृभिः कृतस्य यइन्द्रोब्रह्मणस्पतिर्वा राजा ईश्वरोभवति तमिन्द्रं तं ब्रह्मणस्पतिमिति संबन्धः ॥ ३ ॥

अथ चतुर्थी—

सआनोयोनिंसदतुप्रेष्ठोबृहस्पतिर्विश्ववारोयोअस्ति।
कामोरायःसुवीर्यस्यतंदात्पर्षन्नोअतिसश्चतोअरिष्टान् ॥ ४ ॥

सः। आ। नः। योनिम्। सदतु। प्रेष्ठः। बृहस्पतिः। विश्वऽवारः।
यः। अस्ति। कामः। रायः। सुऽवीर्यस्य। तम्।
दात्। पर्षत्। नः। अति। सश्चतः। अरिष्टान् ॥ ४ ॥

प्रेष्ठः प्रियतमः सबृहस्पतिः नोस्माकं योनिं स्थानं वेदिलक्षणं आसदतु आसीदतु आगत्योपविशतु योबृहस्पतिः विश्ववारः विश्वैर्वरणीयोस्ति भवति। अपिच रायोधनस्य सुवीर्यस्य शोभनवीर्यस्य च यः कामोस्माकमभिलाषोस्ति तं कामं अस्मभ्यं दात् ददातु काम्यमानं यच्छत्वित्यर्थः। तथा सश्चतः उपद्रवैः संसक्तान् नोस्मानरिष्टानहिंसितान्कृत्वा अति पर्षत् अतिपारयतु शत्रून् ॥ ४ ॥

अथ पंचमी—

तमानोअर्कममृतायजुष्टमिमेधासुरमृतासःपुराजाः।
शुचिक्रन्दंयजतंपस्त्यानांबृहस्पतिमनर्वाणंहुवेम ॥ ५ ॥ २१ ॥

तम्। आ। नः। अर्कम्। अमृताय। जुष्टम्। इमे। धासुः।
अमृतासः। पुराऽजाः। शुचिऽक्रन्दम्। यजतम्। पस्त्यानाम्।
बृहस्पतिम्। अनर्वाणम्। हुवेम ॥ ५ ॥ २१ ॥

तं सर्वत्रभोक्तव्यतयाप्रसिद्धं अमृताय अमरणत्वाय जीवनाय जुष्टं पर्याप्तमर्कमर्चनसाधनमन्नं पुराजाः पुराजाताइमे अमृतासः अमरणादेवाः बृहस्पतेराज्ञया नोस्मभ्यं आधासुः प्रदधुः। वयं च शुचिक्रन्दं शुद्धस्तोत्रं पस्त्यानां पस्त्यमितिगृहनाम तेन तद्वन्तोलक्ष्यन्ते गृहिणां यजतं यष्टव्यं अनर्वाणं अमत्यृतं केनाप्यप्रतिगतं बृहस्पतिं बृहतां पालकं देवं हुवेम आह्वयाम स्तुमेम वा ॥ ५ ॥

॥ इति पञ्चमस्य षष्ठे एकविंशोवर्गः ॥ २१ ॥

अथ षष्ठी–

तंशग्मासोअरुपासोअश्वाबृहस्पतिंसहवाहोवहन्ति।
सहश्चिद्यस्यनीलवत्सधस्थंनभोनरूपमरुषंवसानाः ॥ ६ ॥

तम्। शग्मासः। अरुपासः। अश्वाः। बृहस्पतिम्। सहऽवाहः।
वहन्ति। सहः। चित्। यस्य। नीलऽवत्। सधऽस्थम्।
नभः। न। रूपम्। अरुषम्। वसानाः ॥ ६ ॥

शग्मासः शग्माः सुखकराः शक्तावा अरुपासः आरोचमानाः सहवाहः संहत्यवाहका-अश्वाः तं बृहस्पतिं वहन्ति वहन्तु। यस्य बृहस्पतेः सहश्चिद् बलंच भवति नीलवद् नीलं नि-लयोनिवासः तद्युक्तं सधस्थं सहस्थानंच यस्य तं बृहस्पतिमित्यन्वयः कीदृशाअश्वाः नभोन आदित्यमिव अरुषं आरोचमानं रूपं वसानाः धारयन्तः ॥ ६ ॥

अथ सप्तमी–

सहिशुचिःशतपत्रःसशुन्ध्युर्हिरण्यवाशीरिषिरःस्वर्षाः।
बृहस्पतिःसःस्वावेशऋष्वःपुरूसखिभ्यआसुतिंकरिष्ठः ॥ ७ ॥

सः। हि। शुचिः। शतऽपत्रः। सः। शुन्ध्युः। हिरण्यऽवाशीः।
इषिरः। स्वःऽसाः। बृहस्पतिः। सः। सुऽआवेशः। ऋष्वः।
पुरु। सखिऽभ्यः। आऽसुतिम्। करिष्ठः ॥ ७ ॥

सहि सखलु बृहस्पतिः शुचिः शुद्धः शतपत्रः बहुविधवाहनः सएवशुन्ध्युः सर्वेषां शो-धयिता हिरण्यवाशीः वाशीति वाङ्नाम हितरमणीयवाक् यद्वा वाशीभिस्तक्षताश्मन्मयीभिरिति निगमात्। वाशी आयुधं स्वर्णमयायुधः इषिरोगन्ता अन्वेषणीयोवा स्वर्षाः स्वर्गस्यसंभक्ता यद्वा सरणशीलस्योदकस्य सनिता दाता सएव बृहस्पतिः स्वावेशः सुनिवासः ऋष्वः दर्शनीयः ईदृशोदेवः सखिभ्यः स्तोतृभ्यः पुरु बहुलं आसुतिमन्नं करिष्ठः कर्तृतमो दातृतमो-भवति ॥ ७ ॥

१ ऋ० सं० ८. ५. १९.।

अथाष्टमी—

देवीदेवस्यरोदसीजनित्रीबृहस्पतिंवावृधतुर्महित्वा ।
दक्षाय्यायदक्षतासखायःकरद्ब्रह्मणेसुतरासुगाधा ॥ ८ ॥

देवी इति । देवस्य । रोदसी इति । जनित्री इति । बृहस्पतिम् ।
ववृधतुः । महिऽत्वा । दक्षाय्याय । दक्षत । सखायः ।
करत् । ब्रह्मणे । सुऽतरा । सुऽगाधा ॥ ८ ॥

देवी देव्यौ दानादिगुणयुक्ते देवस्य बृहस्पतेर्जनित्री जनयित्र्यौ रोदसी द्यावापृथिव्यौ महित्वा महत्वेन युक्तं बृहस्पतिं ववृधतुः वर्धयामासतुः हे सखायोयूयमपि दक्षाय्याय वर्धनीयाय द्वितीयार्थे चतुर्थी वर्धनीयं तं बृहस्पतिं दक्षत वर्धयत । सच बृहस्पतिः ब्रह्मणे बृंहिताय प्रभूतायान्नाय तदर्थं सुतरा सुतरणानि सुखेन तरणीयानि सुगाधा सुखेनावगाहनीयानि उदकानि करत करोतु ॥ ८ ॥

अथ नवमी—

इयंवांब्रह्मणस्पतेसुवृक्तिर्ब्रह्मेन्द्रायवज्रिणेअकारि ।
अविष्टंधियोजिगृतंपुरंधीर्जजस्तमर्योवनुषामरातीः ॥ ९ ॥

इयम् । वाम् । ब्रह्मणः । पते । सुऽवृक्तिः । ब्रह्म । इन्द्राय ।
वज्रिणे । अकारि । अविष्टम् । धियः । जिगृतम् । पुरम्ऽधीः ।
जजस्तम् । अर्यः । वनुषाम् । अरातीः ॥ ९ ॥

हे ब्रह्मणस्पते तुभ्यं वज्रिणे वज्रवतेइन्द्राय च वां युवाभ्यां तादर्थ्ये चतुर्थी ब्रह्म मंत्ररूपा इयं सुवृक्तिः सुप्रवृत्तास्तुतिः अकारि मया कृताभूत तौ युवां धियोस्मदीयानि कर्माणि अविष्टं रक्षतं । तथा पुरन्धीः पुरुधीः बह्वीःस्तुतीः जिगृतं निगिरतं शृणुतमितियावत । अर्यः अरीः अभिगन्त्रीः वनुषां संभक्तृणामस्माकं अरातीः शत्रुसेनाः जजस्तं उपक्षपयतम् ॥ ९ ॥

हे इन्द्र त्वं जज्ञानोजायमानएव सहसे बलाय सोमं पपाथ पीतवानसि ते तव महिमानं महत्त्वं माता त्वदीया जननी अदितिःप्रोवाच प्रोक्तवती संवादसूक्ते अयंपन्थाइत्यादिके।नहीन्वस्येत्यर्धर्चोदारभ्य अदित्याइन्द्रमहत्वस्योक्तत्वात्।अतः कारणात् हे इन्द्र त्वं उरु विस्तीर्णमन्तरिक्षं आपप्राथ स्वतेजसा आपूरितवानसि।अपिच युधा युद्धेन देवेभ्यः स्तोतृभ्योदेवेभ्यएववा वरिवोधनं चकर्थ कृतवानसि ॥ ३ ॥

अथ चतुर्थी—

यद्योधयामहतोमन्यमानान्त्साक्षामतान्बाहुभिःशाशदानान्।
यद्वानृभिर्वृतइन्द्राभियुध्यास्तंत्वयाजिंसौश्रवसंजयेम ॥ ४ ॥

यत्। योधयाः। महतः। मन्यमानान्। साक्षाम। तान्।
बाहुऽभिः। शाशदानान्। यत्। वा। नृऽभिः। वृतः। इन्द्र।
अभिऽयुध्याः। तम्। त्वया। आजिम्। सौश्रवसम्। जयेम ॥ ४ ॥

हे इन्द्र महतः प्रभूतान् मन्यमानान् शत्रून्यदा योधयाः अस्माभिर्योधयेः तैः सहयोद्धुं बलं प्रयच्छेरित्यर्थः तदानीं शाशदानान् हिंसतस्तान् शत्रून् बाहुभिः आयुधनिरपेक्षैः हस्तैरेव त्वत्प्रसादात् साक्षाम सहेम अभिभवेम। यद्वा यदिवा हे इन्द्र नृभिः नेतृभिर्मरुद्भिर्वृतः त्वमेवाभियुध्याः अस्मदीयान् शत्रूनभियुध्यस्व सौश्रवसं श्रवोन्नं यशोवा शोभनस्य श्रवसोहेतुं तमाजिं संग्रामं त्वया सहायेन वयं जयेम ॥ ४ ॥

अथ पञ्चमी—

प्रेन्द्रस्यवोचंप्रथमाकृतानिप्रनूतनामघवायाचकार।
यदेददेवीरसहिष्टमायाअथाभवत्केवलःसोमोअस्य ॥ ५ ॥

प्र। इन्द्रस्य। वोचम्। प्रथमा। कृतानि। प्र। नूतना।
मघऽवा। या। चकार। यदा। इत्। अदेवीः। असहिष्ट।
मायाः। अथ। अभवत्। केवलः। सोमः। अस्य ॥ ५ ॥

---

१ ऋ० सं० ३.५ २५।

इन्द्रस्य कृतानि वीर्यकर्माणि प्रथमा प्रथमानि पुरातनानि प्रवोचं प्रब्रवीमि। मघवा धनवानिन्द्रः या यानि चकार कृतवान् नूतना नूतनान्यभिनवानिच तानि प्रवोचं यदेव यदैव अदेवीः आसुरीर्मायाः तैः कृताः असहिष्ट अभ्यभूत् अथानन्तरमेव अस्येन्द्रस्य सोमः केवलः असाधारणोऽभवत् तदा प्रभृत्येव सोमस्येन्द्रस्य चासाधारणः संबन्धोजातइत्यर्थः ॥ ५ ॥

अथ षष्ठी—

तवेदंविश्वंमभितःपशव्यं१यत्पश्यसिचक्षसासूर्यस्य ।
गवामसिगोपतिरेकइन्द्रभक्षीमहितेप्रयतस्यवस्वः ॥ ६ ॥

तव । इदम् । विश्वम् । अभितः । पशव्यम् । यत् । पश्यसि ।
चक्षसा । सूर्यस्य । गवाम् । असि । गोऽपतिः । एकः ।
इन्द्र । भक्षीमहि । ते । प्रऽयतस्य । वस्वः ॥ ६ ॥

हे इन्द्र पशव्यं पशवोद्विविधाः द्विपादश्चतुष्पादश्च तेभ्योहितं अभितः सर्वतोविद्यमानं इदं विश्वं सर्वं जगत् तव तवैव स्वभूतं सूर्यस्य प्रेरकस्यादित्यस्य चक्षसा तेजसा यद्विश्वं पश्यसि त्वं प्रकाशयसि अपिच हे इन्द्र एकएव त्वं गोपतिरसि नकेवलमेकस्याएव गोपतिः अपितु सर्वासामित्याह गवामिति अतः कारणात् ते त्वया प्रयतस्य प्रत्तस्य द्वितीयार्थेषष्ठी प्रत्तं वस्वोधनं भक्षीमहि भजेमहि ॥ ६ ॥

अथ सप्तमी—

बृहस्पतेयुवमिन्द्रश्चवस्वोदिव्यस्येशाथेउतपार्थिवस्य ।
धत्तंरयिंस्तुवतेकीरयेचियूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ २३ ॥

बृहस्पते । युवम् । इन्द्रः । च । वस्वः । दिव्यस्य । ईशाथे इति ।
उत । पार्थिवस्य । धत्तम् । रयिम् । स्तुवते । कीरये ।
चित् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ २३ ॥

व्याख्यातेयं अक्षरार्थस्तु हे बृहस्पते त्वश्चेन्द्रश्च युवां दिव्यस्य पार्थिवस्य चोभयविधस्य धनस्येश्वरौभवथः। तौ युवां स्तुवते स्तोत्रे धनं दत्तमिति ॥ ७ ॥

॥ इति पंचमस्य षष्ठे त्रयोविंशोवर्गः ॥ २३ ॥

परोमात्रयेति सप्तर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं उरुंयज्ञायेत्याद्यास्तिस्रः ऐन्द्रावैष्णव्यः शिष्टाः केवलं विष्णुदेवताकाः तथाचानुक्रान्तम् परोवैष्णवंतूरुमित्यैंद्र्यश्चतिस्रइति। गतःसूक्तविनियोगः। विष्णुदेवताकेपशौ परोमात्रयेति पुरोडाशस्ययाज्या सूत्रितश्च—परोमात्रयातन्वावृधानेरावतीधेनुमतीहिभूतमिति।

सैषा प्रथमा—

परो॒मात्र॑या त॒न्वा॑ वृधान॒ न ते॑ महि॒त्वमन्व॑श्नुवन्ति।
उ॒भे ते॑ विद्म॒ रज॑सी पृथि॒व्या विष्णो॑ देव॒ त्वं प॑र॒मस्य॑ वित्से ॥ १ ॥

प॒रः। मात्र॑या। त॒न्वा॑। वृ॒धा॒न॒। न। ते॒। म॒हि॒ऽत्वम्।
अनु॑। अ॒श्नु॒व॒न्ति॒। उ॒भे इति॑। ते॒। वि॒द्म॒। रज॑सी॒ इति॑।
पृ॒थि॒व्याः। विष्णो॒ इति॑। दे॒व॒। त्वम्। प॒र॒मस्य॑। वि॒त्से॒ ॥ १ ॥

परइति सकारान्तं परस्तादित्यस्यार्थे परशब्दाच्छान्दसोसिप्पत्ययः परोदिवापरएनापृथिव्यैतियथा[1]। मात्रयेति पञ्चम्यर्थे व्यत्ययेन तृतीया मात्रायाः परः परस्ताद्वर्तमानया अपरिमितया तन्वा शरीरेण वृधान वर्धमान हे विष्णो ते तव महित्वं महत्त्वं नान्वश्नुवन्ति नानुव्यामुवन्ति त्रैविक्रमसमये यत्तवमाहात्म्यं तत्सर्वैरपि जनैर्ज्ञातुं नशक्यतइत्यर्थः। ते तव उभे रजसी उभौ लोकौ पृथिव्या आरभ्य पृथिवीमन्तरिक्षञ्च विद्म जानीमोवयं चक्षुषोपलभामहे नान्यत् हेदेव द्योतमान विष्णो त्वमेव परमस्य स्वर्गादेरुत्कृष्टलोकस्य द्वितीयार्थेषष्ठी परमं लोकं वित्से जानासि अतस्तव महत्वं नकेनापि व्याप्तुं शक्यमितिभावः ॥ १ ॥

पूर्वोक्तेएवपशौ नतेविष्णोइति वपायाअनुवाक्या सूत्रितश्च—नतेविष्णोजायमानोनजातस्तेविष्णोसुमतिंविश्वजन्यामिति।

---

१ ऋ० सं० ८. ३.१७।

सैषा द्वितीया—

नतेविष्णोजायमानोनजातोदेवमहिम्नःपरमन्तमाप ।
उदस्तभ्नानाकमृष्वंबृहन्तंदाधर्थप्राचींककुभंपृथिव्याः ॥ २ ॥

न । ते । विष्णो इति । जायमानः । न । जातः । देव । महिम्नः ।
परम् । अन्तम् । आप । उत् । अस्तभ्नाः । नाकम् । ऋष्वम् ।
बृहन्तम् । दाधर्थ । प्राचीम् । ककुभम् । पृथिव्याः ॥ २ ॥

हे देव दानादिगुणयुक्त विष्णो ते तव महिम्नः महत्त्वस्य परं विप्रकृष्टं अन्तमवसानं जायमानः प्रादुर्भवन् जनः नाप नप्राप्नोति । तथा जातः प्रादुर्भूतोपि जनोनैव प्राप्नोति तव महत्त्वस्यावसानं नास्ति अतएव सर्वैर्नज्ञायतइतिभावः कोसौ महिमा तमाह ऋष्वं दर्शनीयं बृहन्तं महान्तं नाकं द्युलोकं उदस्तभ्नाः त्वंऊर्ध्वमधारयः यथा अधोनपतति तथा पृथिव्याभूमेः संबंधिनीं प्राचीं ककुभञ्च दाधर्थ धारितवानसि उपलक्षणमेतत् सर्वस्य भूतजातस्य तथाचमंत्रान्तरम्—यउत्रिधातुपृथिवीमुतद्यामेकोदाधारभुवनानिविश्वेति ॥ २ ॥

पूर्वोक्तएवपशौ इरावतीइति हविषोयाज्या सूत्रितञ्च—इरावतीधेनुमतीहिभूतं विश्वकर्मन्हविषावावृधानइति द्वेइति ।

सैषा तृतीया—

इरावतीधेनुमतीहिभूतंसूयवसिनीमनुषेदशस्या ।
व्यस्तभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः ॥ ३ ॥

इरावती इतीरांऽवती । धेनुमती इति धेनुऽमती । हि । भूतम् ।
सुयवसिनी इति सुऽयवसिनी । मनुषे । दशस्या । वि । अस्तभ्नाः ।
रोदसी इति । विष्णो इति । एते इति । दाधर्थ ।
पृथिवीम् । अभितः । मयूखैः ॥ ३ ॥

---

१ ऋ० सं० २. २. २४. ।

हे द्यावापृथिव्यौ मनुषे स्तुवते मनुष्याय दशस्या दित्सया युक्ते युवां इरावती अन्नवत्यौ धेनुमती गोमत्यौ सूयवसिनी शोभनयवसेच भूतमभूतम् हिशब्दः प्रसिद्धौ विष्णुना विक्रान्तत्वात् युवामेव खलु पूर्वमभूतमित्यर्थः। हे विष्णो एते इमे रोदसी द्यावापृथिव्यौ व्यस्तभ्नाः विविधमधारयः पृथिवीमूर्ध्वमुखत्वेन द्यामधोमुखत्वेनेति विविधत्वम्।अपिच पृथिवीं प्रथितामिमां भूमिं अभितः सर्वत्रस्थितैर्मयूखैः पर्वतैर्दाधर्थ धारितवानसि यथा न चलति तथा दृढीकृतवानित्यर्थः पर्वताहि विष्णोः स्वभूताः विष्णुःपर्वतानामधिपतिरितिश्रुतेः ॥ ३ ॥

अथ चतुर्थी—

उ॒रुंय॒ज्ञाय॑चक्रथुरु॒लो॒कंज॒नय॑न्ता॒सूर्य॑मु॒पास॑म॒ग्निम्।
दास॑स्यचिद्वृषशि॒प्रस्य॑मा॒याज॒घ्नथु॑र्नरापृत॒नाज्ये॑षु ॥ ४ ॥

उ॒रुम्। य॒ज्ञाय॑। च॒क्र॒थुः। ऊँ इति॑। लो॒कम्। ज॒नय॑न्ता।
सूर्य॑म्। उ॒षस॑म्। अ॒ग्निम्। दास॑स्य। चि॒त्। वृ॒ष॒ऽशि॒प्रस्य॑।
मा॒याः। ज॒घ्नथुः। न॒रा॒। पृ॒त॒नाज्ये॑षु ॥ ४ ॥

हे इन्द्राविष्णू यज्ञाय यजमानाय उरुं विस्तीर्णं लोकं स्वर्गाख्यं चक्रथुरु कृतवन्तौखलु युवां। किं कुर्वन्तौ सूर्यं सर्वस्य प्रेरकमादित्यं उषसं तमोनिवारकमुषःकालं अग्निञ्च असुरैरावृतं जनयन्ता जनयन्तौ पुनः प्रादुर्भावयन्तौ हे नरा नेताराविन्द्राविष्णू वृषशिप्रस्य एतत्संज्ञकस्य दासस्य चित् उपक्षपयितुः असुरस्य मायाः पृतनाज्येषु संग्रामेषु जघ्नथुः जिहिंसथुर्युवां सूर्यादिकं जनयन्तावित्युच्यते ॥ ४ ॥

अथ पञ्चमी—

इन्द्रा॑विष्णू दृंहि॒ताःशम्ब॑रस्य॒नव॒पुरो॑नव॒तिंच॑श्नथिष्टम्।
श॒तंव॒र्चिनः॑स॒हस्रं॑चसा॒कंह॒थोअ॑प्र॒त्यसु॑रस्यवी॒रान् ॥ ५ ॥

इन्द्रा॑विष्णू॒ इति॑। दृंहि॒ताः। शम्ब॑रस्य। नव॑। पुरः॑।
न॒व॒तिम्। च॒। श्न॒थि॒ष्ट॒म्। श॒तम्। व॒र्चिनः॑। स॒हस्र॑म्। च॒।
सा॒कम्। ह॒थः। अ॒प्र॒ति। असु॑रस्य। वी॒रान् ॥ ५ ॥

१ तै० सं० ३. ४. ५.।

हे इन्द्राविष्णू दृंहिताः दृढीकृताः नव नवतिंच नवोत्तरनवतिसंख्याकाः पुरः पुराणि शंबरस्य स्वभूतानि श्नथिष्टम् अहिंसिष्टम्। श्नथहिंसायाम्। अपिच शतं सहस्रञ्च वर्चिनोअसुरस्यवीरान् अप्रति प्रतिद्वंद्विनोयथानभवन्ति तथा साकं सह संवशएव हथः अहिंसिष्टम्। योवर्चिनःशतमिन्द्रःसहस्रमितिहि निगमान्तरम् ॥ ५ ॥

अथ षष्ठी–

इ॒यंम॑नी॒षाबृ॑ह॒तीबृ॒हन्तो॑रुक्र॒मात॒वसा॑व॒र्धय॑न्ती।
र॒रेवां॒स्तोमं॑वि॒दथे॑षुविष्णो॒पिन्व॑त॒मिषो॑वृ॒जने॑ष्विन्द्र ॥ ६ ॥

इ॒यम्। म॒नी॒षा। बृ॒ह॒ती। बृ॒हन्ता॑। उ॒रु॒ऽक्र॒मा। त॒वसा॑।
व॒र्धय॑न्ती। र॒रे। वा॒म्। स्तोम॑म्। वि॒दथे॑षु। विष्णो॒ इति॑।
पिन्व॑तम्। इषः॑। वृ॒जने॑षु। इ॒न्द्र॒ ॥ ६ ॥

बृहती महती इयं मनीषा मननीया स्तुतिः बृहन्ता बृहन्तौ महान्तौ उरुक्रमा विस्तीर्णविक्रमौ विष्णुना सहैकार्थीभावात् इन्द्रस्याप्युरुक्रमत्वम् तवसा तवइति बलस्य वृद्धेर्वा नामधेयं तद्वन्तौ एवंभूतौ युवां वर्धयन्ती प्रवृद्धौ कुर्वती अस्माभिः कृता हे विष्णो हे इन्द्र विदथेषु यज्ञेषु वां युवाभ्यां स्तोमं उक्तलक्षणं स्तोत्रं ररे ददे रादानइतिधातुः तौ युवां वृजनेषु बलेषु निमित्तसप्तमी इषोन्नानि पिन्वतं अस्मभ्यं वर्धयतम् ॥ ६ ॥

अभ्युदयेष्टौ विष्णोः शिपिविष्टस्य वषट्तइत्येषानुवाक्या सूत्रितञ्च–भद्रावेहस्तासुकृतौतपाणी वषट्तेविष्णवासआकृणोमीति।

सैषा सप्तमी–

वष॑ट्तेविष्णवा॒सआकृ॑णोमि॒तन्मे॑जुषस्वशिपिविष्टह॒व्यम्।
वर्ध॑न्तुत्वासुष्टु॒तयो॒गिरो॑मेयू॒यंपा॑तस्व॒स्तिभिः॒सदा॑नः ॥ ७ ॥ २४ ॥

वष॑ट्। ते॒। विष्णो॒ इति॑। आ॒सः। आ। कृ॒णो॒मि॒। तत्।
मे॒। जु॒षस्व॒। शिपि॒ऽवि॒ष्ट॒। ह॒व्यम्। वर्ध॑न्तु। त्वा॒। सु॒ऽस्तु॒तयः॑।
गिरः॑। मे॒। यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः॑। सदा॑। नः॒ ॥ ७ ॥ २४ ॥

---

१ ऋ० सं० २. ६.१३.।

हे विष्णो ते तुभ्यं आसः आस्यात् आ अभिमुखं वषट्कृणोमि वषट्करोमि वषट्कारेण हविर्ददामि। हे शिपिविष्ट शिपयोरश्मयः तैराविष्ट विष्णो तव वषट्कृतं मे मदीयं हव्यं हविर्जुषस्व सेवस्व। सुष्टुतयः शोभनस्तुत्यात्मिका गिरोवाचश्च त्वा त्वां वर्धन्तु वर्धयन्तु। अन्यद्गतम्॥७॥

॥ इति पञ्चमस्य षष्ठे चतुर्विंशोवर्गः ॥२४॥

नूमर्तइति सप्तर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैष्णवम्, नूमर्तइत्यनुक्रान्तम्, उक्थ्येच्छावाकशस्त्रे इदंशंसनीयं सूत्रितश्च—ऋतुर्जनित्रीनूमर्तोभवामित्रइति।

तत्र प्रथमा—

नूमर्तोदयतेसनिष्यन्योविष्णवउरुगायायदाशत्।
प्रयःसत्राचामनसायजातएतावन्तंनर्यमाविवासात्॥ १॥

नु। मर्तः। दयते। सनिष्यन्। यः। विष्णवे। उरुऽगायाय।
दाशत्। प्र। यः। सत्राचा। मनसा। यजाते। एतावन्तम्।
नर्यम्। आऽविवासात्॥ १॥

समर्तोमनुष्यः सनिष्यन् धनमिच्छन् नु क्षिप्रं दयते धनमादत्ते दयतिराङ्पूर्वोर्थेद्रष्टव्यः योमनुष्यः उरुगायाय बहुभिः कीर्तनीयाय विष्णवे दाशत् हवींषि दद्यात् यश्च सत्राचा सहाञ्चता मनसा मननेन स्तोत्रेण प्रयजाते प्रकर्षेण पूजयेत् एतावन्तं एतावत् परिमाणं महान्तं नर्यं नरेभ्योहितं विष्णुं आविवासात् नमस्कारादिभिः परिचरेत् समर्तोदयतइत्यन्वयः। यद्वा सनिष्यन्निति सनतेर्लोभार्थस्य लटि रूपम् समर्तः सनिष्यन् धनादीनि लप्स्यमानोभवन्नेव हविरादिकं नु क्षिप्रं दयते विष्णवे ददातीति योज्यम्॥ १॥

विष्णुदेवत्येपशौ पुरोडाशस्य त्वंविष्णोइत्यनुवाक्या सूत्रितश्च—त्वंविष्णोसुमतिंविश्वजन्यां विचक्रमेपृथिवीमेषएतामिति।

सैषा द्वितीया—

त्वंविष्णोसुमतिंविश्वजन्यामप्रयुतामेवयावोमतिंदाः।
पर्चोयथानःसुवितस्यभूरेरश्वावतःपुरुश्चन्द्रस्यरायः॥ २॥

त्वम् । विष्णो इति । सुऽमतिम् । विश्वऽजन्याम् । अप्रऽयुताम् ।
एवऽयावः । मतिम् । दाः । पर्चः । यथा । नः ।
सुवितस्य । भूरेः । अश्वऽवतः । पुरुऽचन्द्रस्य । रायः ॥ २ ॥

हे एवयावः एवाः माप्तव्याः कामाः तान् यावयति मापयति स्तोतॄनित्येवयावः हे एवयावन् विष्णो त्वं विश्वजन्यां सर्वजनहितां अप्रयुतां दोषैर्वियुक्तां सुमतिं मतिं अनुग्रहबुद्धिं दाः अस्मभ्यं देहि सुवितस्य सुष्ठु प्राप्तव्यस्य भूरेर्बहुलस्य अश्वावतोऽश्वयुक्तस्य पुरुश्चन्द्रस्य पुरूणां बहूनां आह्लादकस्य रायो धनस्य पर्चः संपर्को नोऽस्माकं यथा भवति तथा देहीत्यन्वयः ॥ २ ॥

वैष्णव्यस्योपांशुयाजस्य त्रिर्देवइतियाज्या सूत्रितश्च—इदंविष्णुर्विचक्रमे त्रिर्देवःपृथिवीमेपएतामिति । वैष्णव्येपशावप्येषैव वपायाज्या सूत्रितश्च—त्रिर्देवःपृथिवीमेपएतां परोमात्रयातन्वावृधानेति ।

सैषा तृतीया—

त्रिर्देवःपृथिवीमेषएतांविचक्रमेशतर्चसंमहित्वा ।
प्रविष्णुरस्तुतवसस्तवीयान्त्वेषंह्यस्यस्थविरस्यनाम ॥ ३ ॥

त्रिः । देवः । पृथिवीम् । एषः । एताम् । वि । चक्रमे ।
शतऽअर्चसम् । महिऽत्वा । प्र । विष्णुः । अस्तु । तवसः ।
तवीयान् । त्वेषम् । हि । अस्य । स्थविरस्य । नाम ॥ ३ ॥

एषदेवो दानादिगुणयुक्तो विष्णुः शतर्चसं शतसंख्यान्यर्चींषि यस्यास्तादृशीं एतां पृथिवीं उपलक्षणमेतत् पृथिव्यादीन् त्रीन् लोकान् महित्वा महत्त्वेन त्रिर्विचक्रमे त्रिभिः पदैर्विक्रान्तवान् तवसः तवस्विनो वृद्धादपि तवीयान् तवस्वितरो विष्णुः प्रास्तु अस्माकं प्रभवतु स्वामीभवतु अस्य स्थविरस्य वृद्धस्य विष्णोर्नाम नामकं रूपं विष्णुरित्येतन्नामैव वा त्वेषं हि यस्माद्दीप्तं तस्मात् कारणात् स विष्णुः प्रभवत्वित्यर्थः ॥ ३ ॥

पूर्वोक्तएवपशौ विचक्रमइति वपायाअनुवाक्या सूत्रितश्च—विचक्रमेपृथिवीमेपएतां त्रिर्देवःपृथिवीमेपएतामिति ।

सैषा चतुर्थी—

विचक्रमेपृथिवीमेषएतांक्षेत्रायविष्णुर्मनुषेदशस्यन् ।
ध्रुवासोअस्यकीरयोजनासउरुक्षितिंसुजनिमाचकार ॥ ४ ॥

वि । चक्रमे । पृथिवीम् । एषः । एताम् । क्षेत्राय । विष्णुः ।
मनुषे । दशस्यन् । ध्रुवासः । अस्य । कीरयः । जनासः ।
उरुऽक्षितिम् । सुऽजनिमा । चकार ॥ ४ ॥

एषदेवोविष्णुः एतां पृथिवीं पृथिव्यादीनिमांस्त्रीन् लोकान् क्षेत्राय निवासार्थं मनुषे स्तुवते देवगणाय दशस्यन् असुरेभ्योपहृत्य प्रदास्यन् विचक्रमे विक्रान्तवान् अस्यच विष्णोः कीरयः स्तोतारोजनासोजनाः ध्रुवासो निश्चलाभवन्ति ऐहिकामुष्मिकयोर्लाभेन स्थिराभवन्तीत्यर्थः । सुजनिमा शोभनानि जनिमानि कीर्तनस्मरणादिना सुखहेतुभूतानि यस्य तादृशोविष्णुः उरुक्षितिं विस्तीर्णनिवासं चकार स्तोतृभ्यः करोति ॥ ४ ॥

तृतीयसवने अतिरात्रादूर्ध्वं सोमातिरेकेसति नैमित्तिके होतुःशस्त्रे प्रतत्तेअद्येति स्तोत्रियस्तृचः आभ्युदयेष्टौविष्णोः शिपिविष्टस्य प्रतत्तेअद्येतियाज्या सूत्रितश्च—वषट्तेविष्णवासआकृणोमि प्रतत्तेअद्यशिपिविष्टनामेति ।

सैषा पञ्चमी—

प्रतत्तेअद्यशिपिविष्टनामार्यःशंसामिवयुनानिविद्वान् ।
तंत्वागृणामितवसमतव्यान्क्षयन्तमस्यरजसःपराके ॥ ५ ॥

प्र । तत् । ते । अद्य । शिपिऽविष्ट । नाम । अर्यः । शंसामि ।
वयुनानि । विद्वान् । तम् । त्वा । गृणामि । तवसम् । अतव्यान् ।
क्षयन्तम् । अस्य । रजसः । पराके ॥ ५ ॥

हे शिपिविष्ट रश्मिभिराविष्ट विष्णो ते तव तत्प्रसिद्धं विष्णुरिति प्रख्यातं नाम अर्यः स्वामी स्तुतीनां हविषां वा तथा वयुनानि ज्ञातव्यान्यर्थजातानि विद्वान् जानन्नहं अद्येदानीं

प्रशंसामि प्रकर्षेण स्तौमि तवसं प्रवृद्धं तं त्वा त्वां विष्णुं अतव्यान् अतवीयान् अवृद्धतरोहं गृणामि स्तौमि कीदृशं अस्य रजसोलोकस्य पराके दूरदेशे क्षयन्तं निवसन्तम् ॥ ५ ॥

अथ षष्ठी–

किमित्तेंविष्णोपरिचक्ष्यंभूत्प्रयद्ववक्षेशिंपिविष्टोअस्मि ।
मावर्पोअस्मदपंगूहएतद्यदन्यरूपःसमिथेबभूथ ॥ ६ ॥

किम् । इत् । ते । विष्णो इति । परिऽचक्ष्यम् । भूत् । प्र । यत् ।
ववक्षे । शिपिऽविष्टः । अस्मि । मा । वर्पः । अस्मत् । अप ।
गूहः । एतत् । यत् । अन्यऽरूपः । सम्ऽइथे । बभूथ ॥ ६ ॥

पुरा खलु विष्णुः स्वं रूपं परित्यज्य कृत्रिमरूपान्तरं धारयन् संग्रामे वसिष्ठस्य साहाय्यंचकार तंजानन् ऋषिरनया प्रत्याचष्टे । अत्रनिरुक्तम्–शिपिविष्टोविष्णुरिति विष्णोर्द्वेनामनीभवतः कुत्सितार्थीयंपूर्वं भवतीत्यौपमन्यवः किंते विष्णो प्रख्यातमेतद्भवत्यप्रख्यापनीयं यन्नः प्रब्रूपे शेपइव निर्वेष्टितोस्मीत्यप्रतिपन्नरश्मिरपिवा प्रशंसानामैवाभिप्रेतंस्यात् किं ते विष्णो प्रख्यातमेतद्भवत्यप्रख्यापनीयं यदुत प्रब्रूपे शिपिविष्टोस्मीति प्रतिपन्नरश्मिः शिपयोत्ररश्मयउच्यन्ते तैराविष्टोभवति मावर्पोअस्मदपगूहएतत् वर्पइतिरूपनाम वृणोतीति सतोपदन्यरूपः समिथे संग्रामेभवसि संयतरश्मिरिति[1] । तत्र कुत्सितार्थपक्षे योजना हेविष्णो ते तव तन्नामास्मश्यं प्रववक्षे प्रब्रूपे शिपिविष्टोस्मीति अन्तर्णीतोपमानमेतत् शेपइवनिर्वेष्टितः तेजसा अनाच्छादितोभवामीति तदश्लीलार्थत्वादिदं नाम न प्रशस्तमित्यर्थः । तन्नाम किं परिचक्ष्यं वर्जनीयं परित्याज्यं विरुद्धार्थप्रतिपादकत्वात् स्वरूपं परित्यक्तं हि यत् । शिपिं समानंपूर्वेण अतउक्तरूपविलक्षणं यद्वैष्णवरूपमस्ति एतद्वर्पोरूपं अस्मत् अस्माकं मापगूहः अपगूढं संवृतं मा कुरु गुहूसंवरणे अपितु तदेवरूपं प्रकटय वैष्णवस्य रूपस्य गूहने का प्रसक्तिरिति चेत् यत् यस्मात्तु अन्यत् रूपान्तरमेव धारयन् समिथे संग्रामे बभूथ अस्माकं सहायोभवसि तस्मादिदं गूहनं न कार्यमिति । प्रशंसापक्षेतु हेविष्णो ते तव तन्नाम किं परिचक्ष्यं भूत् किं प्रख्यापनीयं भवति न प्रख्यापनीयं । किं तन्नाम । शिपिविष्टोरश्मिभिराविष्टोस्मीति यन्नाम प्रब्रूपे यतएवं प्रख्यातरूपस्त्वं अतोस्माकं एतद्वैष्णवं रूपं संवृतं माकार्षीः

---

१ नि० ५. ७. ।

इदानीं गूढरूपोपि यद्यस्मात्त्वं समिथे संग्रामे अन्यरूपः कृत्रिमरूपात् यदन्यद्वैष्णवं रूपं शौर्यादिलक्षणं तादृग्रुपः एव बभूथ भवसि तस्मात्त्वं गूढोपि ज्ञायसएवेति व्यर्थमेव तस्य रूपस्य गूहनं अतोबहुतेजस्कं यद्वैष्णवं रूपं तदस्माकं प्रदर्शयेति तात्पर्यार्थः ॥ ६ ॥

अथ सप्तमी—

वषंट्तेविष्णवासआकृंणोमितन्मेंजुषस्वशिपिविष्टहव्यम् ।
वर्धन्तुत्वासुष्टुतयोगिरोंमेयूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ २५ ॥

वषंट् । ते । विष्णो इति । आसः । आ । कृणोमि । तत् । मे । जुषस्व । शिपिऽविष्ट । हव्यम् । वर्धन्तु । त्वा । सुऽस्तुतयः । गिरः । मे । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥ २५ ॥

व्याख्यातेयम् अक्षरार्थस्तु हे विष्णो तुभ्यं आस्यात् आस्येन वषट्करोमि वषट्कृतं तन्मदीयं हविः हे शिपिविष्ट सेवस्व शोभनस्तुतिरूपामदीयावाचश्च त्वां वर्धयन्त्विति । शिष्टपादः सिद्धः ॥ ७ ॥

॥ इति पञ्चमस्य षष्ठे पञ्चविंशोवर्गः ॥ २५ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थाश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥
इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येपञ्चमाष्टकेपष्ठोध्यायः॥६॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा योवेदेभ्योखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अथ सप्तमोव्याख्यायते—सप्तममण्डलस्य षष्ठेनुवाके द्वादशसूक्तानि व्याख्यातानि । तिस्रोवाचइतिषळृचं त्रयोदशं सूक्तम् अत्रानुक्रम्यते—तिस्रःषट् पार्जन्यंत्विति । एते कुमारआग्नेयोपश्यद्वसिष्ठएववेति वक्ष्यमाणत्वादग्निपुत्रः कुमारऋषिः वसिष्ठोवा अनुक्तत्वात्त्रिष्टुप् इदमुत्तरञ्च पर्जन्यदैवत्यम् । अत्र शौनकः—आस्यदघ्नं विगात्यापःप्राङ्मुखः प्रयतः शुचिः । सूक्ताभ्यां तिस्रआदिभ्यामुपतिष्ठेत भास्करम् । अनश्नंस्तत्सप्ताहं वृष्टिकामेन यत्नतः । पंचरात्रेप्यतिक्रान्ते महतीं वृष्टिमाप्नुयादिति ॥

तत्र प्रथमा—

ॐ तिस्रोवाचःप्रवदज्योतिरग्रायाएतदुह्रेमधुदोघमूधः ।
सवत्संकृण्वन्गर्भमोषधीनांसद्योजातोवृषभोरोरवीति ॥ १ ॥

तिस्रः । वाचः । प्र । वद । ज्योतिःऽअग्राः । याः । एतत् ।
दुह्रे । मधुऽदोघम् । ऊधः । सः । वत्सम् । कृण्वन् ।
गर्भम् । ओषधीनाम् । सद्यः । जातः । वृषभः । रोरवीति ॥ १ ॥

ऋषिरात्मानं स्तुतौ प्रेरयति हे ऋषे तिस्रः त्रिविधाः ऋग्यजुःसामात्मिकाः स्तुतिरूपावाचःप्रवद प्रब्रूहि कीदृश्योवाचः ज्योतिर्द्योतमानः प्रणवःअग्रे प्रमुखोयासांतादृशीः यावाचः मधुदोघं मधुनउदकस्य दोहकं वृष्ट्युदकस्य कर्तारं एतत् नभसि दृश्यमानं ऊधः उद्धतं मेघं यद्वा लुप्तोपममेतत् ऊध इव पयसआश्रयभूतं मेघं दुह्रे दुहते दुहेर्लटिलोपस्तआत्मनेपदेष्विति तलोपः बाहुलकोरुट् स्तोत्रैः प्रीतोहि पर्जन्यः मेघैर्वर्षयति अतो वाचएव दुहन्तीत्युपचर्यते यद्वा वदेति व्यत्ययेन मध्यमः तिस्रइति द्रुतविलम्बितमध्यमभेदेन त्रिविधाः ज्योतिरग्राः विद्युत्प्रमुखावाचः प्रवदतेति याः गर्जितलक्षणावाचः वृष्टिप्रदमेतं मेघं दुह्रे उदकानि दुहन्ति एवंभूतः सच पर्जन्यः वत्सं सह निवसन्तं वैद्युताग्निं कृण्वन्प्रादुष्कुर्वन् तमेव ओषधीनां व्रीह्यादीनांच गर्भं कुर्वन् सद्यः शीघ्रं जातः प्रादुर्भूतो वृषभो वर्षितासन् रोरवीति भृशं शब्दायते ॥ १ ॥

अथ द्वितीया-

योवर्धनओषधीनांयोअपांयोविश्वस्यजगतोदेवईशे ।
सत्रिधातुशरणंशर्मयंसत्रिवर्तुज्योतिःस्वभिष्ट्य१स्मे ॥ २ ॥

यः । वर्धनः । ओषधीनाम् । यः । अपाम् । यः । विश्वस्य ।
जगतः । देवः । ईशे । सः । त्रिऽधातु । शरणम् । शर्म । यंसत् ।
त्रिऽवर्तु । ज्योतिः । सुऽअभिष्टि । अस्मे इति ॥ २ ॥

यः पर्जन्य ओषधीनां वर्धनो वर्धयिता यश्च अपामुदकानां वर्धकः यश्च देवोद्योतमानः पर्जन्यो विश्वस्य सर्वस्य जगतः ईशे ईष्टे लोपस्तआत्मनेपदेष्विति तलोपः अधीगर्थेति कर्मणि शेषत्वेन विवक्षिते षष्ठी अनुदात्तेत्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः यद्वृत्तान्नित्यमिति निघातप्रतिषेधः सपर्जन्यः त्रिधातु त्रिभूमिकं शरणं गृहं शर्म सुखं च यंसत् यच्छतु अस्मभ्यं ददात्वित्यर्थः । यमेर्लेटयडागमः सिब्बहुलमिति सिप् इतश्चलोपइतीकारलोपः तथा त्रिवर्तु त्रिष्वृतुषु अतिशयेन वर्तमानं श्रूयतेहि—त्रीणिवा आदित्यस्य तेजांसि वसन्तामातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णइति । एवंविधं स्वभिष्टि स्वभ्येषणं ज्योतिस्तेजश्च अस्मे अस्मभ्यं प्रयच्छतु ॥ २ ॥ अथ तृतीया-

स्तरीरुत्वद्भवतिसूतउत्वद्यथावशंतन्वंचक्रएषः ।
पितुःपयःप्रतिगृभ्णातिमातातेनपितावर्धतेतेनपुत्रः ॥ ३ ॥

स्तरीः । ऊँ इति । त्वत् । भवति । सूते । ऊँ इति । त्वत् ।
यथाऽवशम् । तन्वम् । चक्रे । एषः । पितुः । पयः । प्रति ।
गृभ्णाति । माता । तेन । पिता । वर्धते । तेन । पुत्रः ॥ ३ ॥

त्वदिति तकारान्तोन्यशब्दपर्यायोनुदात्तः सर्वनामसुपठितः अस्य पर्जन्यस्य त्वत् अन्यद्रूपं स्तरीः निवृत्तप्रसवागौः सा यथा नदोग्धी तद्वदफलकं न भवति उइति पूरकः द्वितीयउशब्दश्चार्थे त्वत् अन्यच्चरूपम् सूते धेनुवत्प्रसूते उदकानि प्रवर्षति एष पर्जन्यः तन्वं स्वकीयं शरीरं यथावशं यथाकामं स्तरीत्वेन धेनुत्वेन च चक्रे करोति अपिच पितुर्दिवः सकाशात् पयः वृष्ट्यु-

१ तै० सं० २. १. २. ।

दकं माता पृथिवी प्रतिगृह्णाति प्रतिगृह्णाति हमहोर्भइति भत्वम् प्रतिगृहीतेन तेन हविरात्मना परिणतेन पिता द्युलोकोवर्धते तेनैवोदकेन पुत्रः पृथिव्यां भवः प्राणिसंघोपि वर्धते ॥ ३ ॥

अथ चतुर्थी–

यस्मि॒न्विश्वा॑नि॒भुव॑नानित॒स्थुस्ति॒स्रोद्यावं॑स्त्रे॒धास॒स्रुराप॑ः ।
त्र॒यःकोशा॑सउ॒पसेच॑नासो॒मध्वं॑श्चोतन्त्य॒भितो॑वि॒र॒प्शम् ॥ ४ ॥

यस्मि॑न् । विश्वा॑नि । भुव॑नानि । त॒स्थुः । ति॒स्रः । द्याव॑ः । त्रे॒धा ।
स॒स्रुः । आप॑ः । त्रय॑ः । कोशा॑सः । उ॒प॒ऽसेच॑नासः । मध्व॑ः ।
श्चोत॑न्ति । अ॒भित॑ः । वि॒ऽर॒प्शम् ॥ ४ ॥

यस्मिन्पर्जन्ये विश्वानि भुवनानि सर्वाणि भूतजातानि तस्थुस्तिष्ठंति यदधीनवृत्तीनि भवन्तीत्यर्थः । यस्मिंश्च द्यावोद्युप्रभृतयोलोका अवतिष्ठन्ते यस्माच्च आपस्त्रेधा सस्रुः प्राच्यः प्रतीच्योवाच्यश्च सत्यो निर्गच्छन्ति उपसेचनासः उपसेकारः त्रयः पौरस्त्यः प्रतीच्यउदीच्यश्चेति त्रिप्रकाराः कोशासोमेघाः विरप्शं महान्तं पर्जन्यमभितः परितः मध्वः कर्मणिषष्ठी मधु उदकं श्चोतन्ति क्षारयन्ति वर्षन्ति ॥ ४ ॥

अथ पंचमी–

इ॒दंवच॑ःप॒र्जन्या॑यस्व॒राजे॑हृ॒दोअ॑स्त्वन्त॑रं॒तज्जु॑जोषत् ।
म॒यो॒भुवो॑वृ॒ष्टय॑ःसन्त्व॒स्मेसु॑पिप्प॒लाओष॑धीर्दे॒वगो॑पाः ॥ ५ ॥

इ॒दम् । वच॑ः । प॒र्जन्या॑य । स्व॒ऽराजे॑ । हृ॒दः । अ॒स्तु ।
अन्त॑रम् । तत् । जु॒जो॒ष॒त् । म॒यः॒ऽभुव॑ः । वृ॒ष्टय॑ः । स॒न्तु ।
अ॒स्मे इति॑ । सु॒ऽपि॒प्प॒लाः । ओष॑धीः । दे॒वऽगो॑पाः ॥ ५ ॥

इदं वचोवचनं स्तोत्रं स्वराजे स्वायत्तदीप्तये पर्जन्याय क्रियते एतच्च हृदस्तदीयस्य हृदयस्य अन्तरं अनागंवमस्तु सचतत्स्तोत्रं जुजोषत् सेवताम् जुषी प्रीतिसेवनयोः लेटयडागमः छान्दसः शपःश्लुः । मयोभुवः सुखस्य भावयित्र्यो वृष्टयः अस्मे अस्माकं तत्प्रसादात् सन्तु भवन्तु तथा देवगोपाः देवः पर्जन्यो गोपायिता रक्षिता यासां तथाविधाओषधीरोषधयश्च सुपिप्पलाः सुफलाअस्माकं भवन्तु ॥ ५ ॥

अथ षष्ठी—

सरेतोधावृषभःशश्वतीनांतस्मिन्नात्माजगतस्तस्थुषश्च ।
तन्मऋतंपातुशतशारदाययूयंपातस्वस्तिभिःसदानः ॥ ६ ॥ १ ॥

सः । रेतःऽधाः । वृषभः । शश्वतीनाम् । तस्मिन् । आत्मा ।
जगतः । तस्थुषः । च । तत् । मा । ऋतम् । पातु । शतऽशारदाय ।
यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥ १ ॥

सपर्जन्यः शश्वतीनां बह्वीनामोषधीनां रेतोधाः रेतसउदकस्य बीजभूतस्य धाता विनिधाता भवति वृषभइत्युपमा यथा कश्चिद्वृषभः बह्वीनां गवां गर्भस्याधाता भवति तद्वत् अतस्तस्मिन् पर्जन्ये जगतो जङ्गमस्य तस्थुषः स्थावरस्य च आत्मा देहो वर्तते तत्पर्जन्येन दत्तं ऋतमुदकं मा मां शतशारदाय शतसंवत्सरजीवनार्थं पातु रक्षतु माशब्दस्य ऋत्यकइति प्रकृतिभावो ह्रस्वत्वञ्च । अन्यद्गतम् ॥ ६ ॥

॥ इति पञ्चमस्य सप्तमे प्रथमो वर्गः ॥ १ ॥

पर्जन्यायेति तृचं चतुर्दशं सूक्तं गायत्रम् पूर्ववदृषिदेवते तथाचानुक्रान्तम्—पर्जन्यायतृचं गायत्रमिति वैश्वानरपार्जन्यायामन्वारंभणीयायां पार्जन्यस्य चरोः पर्जन्यायेत्यनुवाक्या सूत्र्यतेहि—पर्जन्यायप्रगायत प्रवातावान्तिपतयन्तिविद्युतइति ।

सैषा प्रथमा—

पर्जन्यायप्रगायतदिवस्पुत्रायमीळ्हुषे । सनोयवसमिच्छतु ॥ १ ॥

पर्जन्याय । प्र । गायत । दिवः । पुत्राय । मीळ्हुषे ।
सः । नः । यवसम् । इच्छतु ॥ १ ॥

हे स्तोतारः पर्जन्याय देवाय प्रगायत प्रकर्षेण स्तोत्रमुच्चारयत कीदृशाय दिवोन्तरिक्षस्य पुत्राय तत्र हि पर्जन्यः प्रादुर्भवति मीळ्हुषे सेक्त्रे सतादृशः पर्जन्यो नोस्मभ्यं यवसं ओषध्यादिलक्षणमन्नं दातुमिच्छतु ॥ १ ॥

अथ द्वितीया—

योगर्भमोषधीनांगवांकृणोत्यर्वताम् । पर्जन्यःपुरुषीणाम् ॥ २ ॥

यः । गर्भम् । ओषधीनाम् । गवाम् । कृणोति ।
अर्वताम् । पर्जन्यः । पुरुषीणाम् ॥ २ ॥

यः पर्जन्यः ओषधीनां व्रीह्यादीनां गवां अर्वतां अर्ववतीनां वडवानां पुरुषीणां नारीणां च यः पर्जन्यः गर्भं प्रसूतिहेतुं बीजं उदकरूपं कृणोतिकरोति तस्मै पर्जन्यायेत्युत्तरत्र संबन्धः ॥२॥

अथ तृतीया—

तस्माइदास्येहविर्जुहोतामधुमत्तमम् । इळांनःसंयतंकरत् ॥ ३ ॥ २ ॥

तस्मै । इत् । आस्ये । हविः । जुहोत । मधुमत्ऽतमम् ।
इळाम् । नः । सम्ऽयतम् । करत् ॥ ३ ॥ ॥ २ ॥

तस्माइत् तस्माएव पर्जन्याय आस्ये देवानामास्यभूते अग्नौ मधुमत्तमं रसवत्तमं हविर्जुहोत जुहुत हे ऋत्विजः । सच पर्जन्यो नोस्मभ्यं इळामन्नं संयतं सम्यक् नियतं यथाभवति तथा करत् करोतु ददात्विति यावत् ॥ ३ ॥

॥ इति पञ्चमस्य सप्तमे द्वितीयो वर्गः ॥ २ ॥

संवत्सरमिति दशर्चं पञ्चदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम् आद्यात्वनुष्टुप् मंडूकादेवता तथाचानुक्रान्तम्—संवत्सरं दश पर्जन्यस्तुतिसंस्तुष्टान्मण्डूकांस्तुष्टावाद्यानुष्टुबिति वृष्टिकामेनैतत्सूक्तं जप्यम् ।

तत्र प्रथमा—

संवत्सरंशशयानाब्राह्मणाव्रतचारिणः ।
वाचंपर्जन्यजिन्वितांप्रमण्डूकाअवादिषुः ॥ १ ॥

संवत्सरम् । शशयानाः । ब्राह्मणाः । व्रतऽचारिणः ।
वाचम् । पर्जन्यऽजिन्विताम् । प्र । मण्डूकाः । अवादिषुः ॥ १ ॥

अत्र निरुक्तम्—वसिष्ठोवर्षकामः पर्जन्यं तुष्टाव तं मण्डूका अन्वमोदन्त समण्डूकाननुमोदमानान्दृष्ट्वा तुष्टावेति मण्डूकामज्जूकामज्जनान्मदतेर्वामोदतिकर्मणोमन्दतेर्वातृप्तिकर्मणोमण्डयतेरिति वैय्याकरणामण्डएषामोकइतिवा मण्डो मदेर्वा मुदेर्वा तेषामेषाभवतीति । व्रतचारिणः सर्वं संवत्सरसत्रात्मकं कर्म आचरन्तोब्राह्मणाः लुप्तोपममेतत् एवं भूताब्राह्मणाइव संवत्सरं शरत्प्रभृति आवर्षर्तोरिकं संवत्सरं शशयानाः शिश्यानाः वर्षणार्थं तपश्चरन्तइव स्थिताएव सन्तः एते मण्डूकाः पर्जन्यजिन्विताः पर्जन्येन प्रीतां यया वाचा पर्जन्यः प्रीतोभवति तादृशीं वाचं प्रावादिषुः प्रवदन्ति ॥ १ ॥

अथ द्वितीया—

दि॒व्याआपो॑अ॒भियदे॑नमा॒यन्दृतिं॒नशुष्कं॑सर॒सीशया॑नम् ।
गवा॒मह॒नमा॒युर्व॒त्सिनी॑नांम॒ण्डूका॑नांव॒ग्नुरत्रा॒सम॑ेति ॥ २ ॥

दि॒व्याः । आपः॑ । अ॒भि । यत् । ए॒न॒म् । आय॑न् । दृतिम् । न । शुष्क॑म् । स॒र॒सी इति॑ । शया॑नम् । गवा॑म् । अह॑ । न । मा॒युः । व॒त्सिनी॑नाम् । म॒ण्डूका॑नाम् । व॒ग्नुः । अत्र॑ । सम् । ए॒ति॒ ॥ २ ॥

दिवा दिविभवाआपः दृतिं न दृतिमिव शुष्कं नीरसं सरसी महत्सरः सरसी गौरादित्वत्क्षणोङीष् सरस्यां सुपांसुलुगिति सप्तम्यालुक् । ईदूतौचसप्तम्यर्थइति प्रगृह्यसंज्ञा । महति सरसि निर्जले घर्मकाले शयानं निवसन्तं एनं मण्डूकगणं यद्यदा आयन् अभिगच्छन्ति तत्र अस्मिन् वर्षणे पर्जन्ये वा सति वत्सिनीनां वत्सयुक्तानां गवां न मायुः गवां शब्दइव मण्डूकानां वग्नुः शब्दः समेति सङ्गच्छते तथा वत्सैः सङ्गतासु गोषु महान्घोषो जायते तद्वद्दृष्टे पर्जन्ये महान्कलकलशब्दो जायते इत्यर्थः । अहेति पूरकः ॥ २ ॥

अथ तृतीया—

यदी॑मेनाँउश॒तोअ॒भ्यव॑र्षीत्तृ॒ष्याव॑तःप्रा॒वृष्यागता॑याम् ।
अ॒क्ख॒ली॒कृत्या॑पि॒तरं॒नपु॒त्रोअ॒न्योअ॒न्यमुप॒वद॑न्तमेति ॥ ३ ॥

---

१ नि० ९. ६. ।

यत् । ईम् । एनान् । उशतः । अभि । अवर्षीत् । तृष्याऽवतः ।
प्रावृषि । आऽगतायाम् । अक्खलीकृत्य । पितरम् । न ।
पुत्रः । अन्यः । अन्यम् । उप । वदन्तम् । एति ॥ ३ ॥

उशतः कामयमानान् तृष्यावतः तृष्णावत एनान्मण्डूकान्प्रावृषि वर्षर्तौ आगतायां आगते सति यद्यदा अभ्यवर्षीत् पर्जन्यो जलैरभिवर्षति ईमिति पूरणः तदानीं अक्खलीकृत्य अक्खलइति शब्दानुकरणम् अक्खलशब्दं कृत्वा पुनः पितरं न पितरमिव अन्यो मंडूकः वदन्तं शब्दयन्तमन्यं मण्डूकं उपैति प्राप्नोति ॥ ३ ॥

अथ चतुर्थी—

अन्योअन्यमनुगृभ्णात्येनोरपांप्रसर्गेयदमन्दिषाताम् ।
मण्डूकोयदभिवृष्टःकनिष्कन्पृश्निःसंपृंक्तेहरितेनवाचम् ॥ ४ ॥

अन्यः । अन्यम् । अनु । गृभ्णाति । एनोः । अपाम् । प्रऽसर्गे ।
यत् । अमन्दिषाताम् । मंडूकः । यत् । अभिऽवृष्टः ।
कनिस्कन् । पृश्निः । सम्ऽपृंक्ते । हरितेन । वाचम् ॥ ४ ॥

एनोः एनयोर्द्वयोर्मण्डूकयोः अन्योमण्डूकः अन्यं मण्डूकं अनुगम्य गृभ्णाति गृह्णाति अपां उदकानां प्रसर्गे प्रसर्जने वर्षणे सति यद्यदा अमन्दिषातां हृष्टावभूताम् यद्यदा च अभिवृष्टः पर्जन्येनाभिषिक्तः कनिष्कन् स्कन्दयतेर्यङ्लुडन्तस्य रूपम् भृशं स्कन्दं उत्प्लवं कुर्वन्पृश्निः पृश्निवर्णोमण्डूकः हरितेन हरितवर्णेनान्येन मण्डूकेन वाचं संपृङ्क्ते संयोजयत उभावपि एकविधं शब्दं कुर्वाते तदानीमन्यः अन्यमनुगृभ्णातीत्यन्वयः ॥ ४ ॥

अथ पञ्चमी—

यदेषामन्योअन्यस्यवाचंशाक्तस्येववदतिशिक्षमाणः ।
सर्वंतदेषांसमृधेवपर्वयत्सुवाचोवदथनाध्यप्सु ॥ ५ ॥ ३ ॥

यत् । एषाम् । अन्यः । अन्यस्य । वार्चम् । शाक्तस्यंऽइव ।
वदति । शिक्षमाणः । सर्वम् । तत् । एषाम् । समृधांऽइव ।
पर्व । यत् । सुऽवाचः । वदथन । अधि । अप्ऽसु ॥ ५ ॥ ३ ॥

हे मण्डूकाः यद्यदा एषां युष्माकं मध्ये अन्योमण्डूकः अन्यस्य मण्डूकस्य वाचं वदत्यनुवदति अनुकरोति शिक्षमाणः शिक्ष्यमाणः शिष्यः शाक्तस्येव शक्तिमतः शिक्षकस्य वाचं यथा अनुवदति तद्वत् । यत् यदा च सुवाचः शोभनवाचोयूयं सर्वे अप्सु वृष्टेपूदकेपु अध्युपरिप्लवन्तः वदथन वदत शब्दंकुरुत तत्तदा एषां युष्माकं सर्वं पर्व परुष्मत् शरीरं समृधेव समृद्धमेव अविकलावयवमेव भवति इव शब्दोवधारणे धर्मकाले मृद्भावमापन्नामण्डूकाः पुनर्वर्षणे सति अविकलांगाः प्रादुर्भवन्तीत्यर्थः ॥ ५ ॥

॥ इति पञ्चमस्य सप्तमे तृतीयो वर्गः ॥ ३ ॥

अथ षष्ठी—

गोमायुरेकोअजमायुरेकःपृश्निरेकोहरितएकएषाम् ।
समानंनामबिभ्रतोविरूपाःपुरुत्रावाचंपिपिशुर्वदन्तः ॥ ६ ॥

गोऽमायुः । एकः । अजऽमायुः । एकः । पृश्निः । एकः ।
हरितः । एकः । एषाम् । समानम् । नार्म । बिभ्रतः ।
विऽरूपाः । पुरुऽत्रा । वाचम् । पिपिशुः । वदन्तः ॥ ६ ॥

एषां मण्डूकानां मध्ये एकोमण्डूकः गोमायुः गोरिव मायुः शब्दोयस्य तादृशोभवति एकः अन्योमण्डूकः अजमायुः अजस्य मायुरिव मायुर्यस्य तादृशोभवति एकः पृश्निः पृश्निवर्णः एकोपरः हरितो हरितवर्णः एवं विरूपानानारूपाअपि समानमेकं मण्डूकाइति नाम बिभ्रतोधारयन्तः पुरुत्रा बहुषु देशेषु वाचं वदन्तः शब्दं कुर्वन्तः पिपिशुःअवयवी भवन्ति प्रादुर्भवन्ति पिशअवयवे पुरुशब्दाद्देवमनुष्येत्यादिनात्राप्रत्ययः ॥ ६ ॥

अथ सप्तमी—

ब्राह्मणासोअतिरात्रेनसोमेसरोनपूर्णमभितोवदन्तः ।
संवत्सरस्यतदहःपरिष्ठयन्मण्डूकाःप्रावृषीणंबभूव ॥ ७ ॥

ब्राह्मणासः । अतिऽरात्रे । न । सोमे । सरः । न । पूर्णम् ।
अभितः । वदन्तः । संवत्सरस्य । तत् । अहः । इति । परि ।
स्थ । यत् । मण्डूकाः । प्रावृषीणम् । बभूव ॥ ७ ॥

रात्रिमतीत्य वर्तते इत्यतिरात्रः अतिरात्रे न सोमे । यथा अतिरात्राख्ये सोमयागे ब्राह्मणासो ब्राह्मणाः रात्रौ स्तुतशस्त्राणि पर्यायेण शंसन्ति हे मण्डूकाः द्वितीयोनशब्दः संप्रत्यर्थे न सम्प्रति पूर्णं सरः अभितः सर्वतः तथा वदन्तः रात्रौ शब्दं कुर्वाणायूयं तदहः तद्दिनं परिष्ठ परितः सर्वतोभवथ यदहः प्रावृषीणं प्रावृषेण्यं प्रावृषिभवं बभूव तस्मिन्नहनि सर्वतोवर्तमानाभवथेत्यर्थः ॥ ७ ॥

अथाष्टमी—

ब्राह्मणासःसोमिनोवाचमक्रतब्रह्मकृण्वन्तःपरिवत्सरीणम् ।
अध्वर्यवोघर्मिणःसिष्विदानाआविर्भवन्तिगुह्यानकेचित् ॥ ८ ॥

ब्राह्मणासः । सोमिनः । वाचम् । अक्रत । ब्रह्म । कृण्वन्तः ।
परिवत्सरीणम् । अध्वर्यवः । घर्मिणः । सिष्विदानाः ।
आविः । भवन्ति । गुह्याः । न । के । चित् ॥ ८ ॥

सोमिनः सोमयुक्ताः परिवत्सरीणं सांवत्सरिकं गावामयनिकं ब्रह्मस्तुतशस्त्रात्मकं कृण्वन्तः कुर्वन्तो ब्राह्मणासः लुप्तोपममेतत् ब्राह्मणाइव वाचं शब्दं अक्रत अकृषत इमे मण्डूकाः अपिच घर्मिणो घर्मेण प्रवर्ग्येण चरन्तः अध्वर्यवः अध्वरस्य नेतारः ऋत्विजइव सिष्विदानाः स्विद्यद्गात्राः गुह्याः घर्मकाले बिले निगूढाः केचित् केचन मण्डूकाः न सम्प्रति वृष्टौ सत्यां आविर्भवन्ति जायन्ते ॥ ८ ॥

अथ नवमी—

देवहितिंजुगुपुर्द्वादशस्यऋतुंनरोनप्रमिनन्त्येते ।
संवत्सरेप्रावृष्यागतायांतप्ताघर्माअश्नुवतेविसर्गम् ॥ ९ ॥

देव॑ऽहितिम् । जु॒गु॒पुः॒ । द्वा॒द॒शस्य॑ । ऋ॒तुम् । नरः॑ । न ।
प्र । मि॒न॒न्ति॒ । ए॒ते । सं॒व॒त्स॒रे । प्रा॒वृषि॑ । आऽग॑तायाम् ।
त॒प्ताः । घ॒र्माः । अ॒श्नु॒व॒ते॒ । वि॒ऽस॒र्गम् ॥ ९ ॥

नरोनेतारएते मण्डूकाः देवहितिं देवैः कृतं विधानं अस्यर्तोरयं धर्मइत्येवं रूपं जुगुपुर्गोपायन्ति काले काले रक्षन्ति अतएव द्वादशस्य द्वादशमासात्मकस्य संवत्सरस्य ऋतुं तं तं वसन्तादिकं नप्रमिनन्ति न हिंसन्ति पर्जन्यस्तुतेरनुमोदनेन तत्तत्काले वृष्टिहेतवोभवन्तीत्यर्थः। संवत्सरे संपूर्णे प्रावृषि वर्षर्तौ आगतायामागते सति घर्माः पूर्वं घर्मकाले वर्तमानास्तप्ताः तापेन पीडिताः सम्प्रति विसर्गं विसर्जनं बिलान्मोचनं अश्नुवते प्राप्नुवन्ति ॥ ९ ॥

अथ दशमी—

गोमा॑युरदाद॒जमा॑युरदा॒त्पृश्नि॑रदा॒द्धरि॑तोनो॒वसू॑नि ।
गवां॑म॒ण्डूका॒दद॑तः॒श॒तानि॑सहस्रसा॒वेप्रति॑रन्त॒आयुः॑ ॥ १० ॥ ४ ॥

गोऽमा॑युः । अ॒दा॒त् । अ॒जऽमा॑युः । अ॒दा॒त् । पृश्निः॑ ।
अ॒दा॒त् । हरि॑तः । नः॒ । वसू॑नि । गवा॑म् । म॒ण्डूकाः॑ । दद॑तः ।
श॒तानि॑ । स॒ह॒स्र॒ऽसा॒वे । प्र । ति॒र॒न्ते॒ । आयुः॑ ॥ १० ॥ ४ ॥

गोमायुः गोरिव मायुः शब्दोयस्य तादृशोमण्डूकः वसूनि धनानि नोस्मभ्यं अदात् ददातु अजमायुश्च अदात् ददातु हरितो हरितवर्णश्च अदात् ददातु पृश्निः पृश्निवर्णश्च अदात् ददातु तथा सहस्रसावे सहस्रसंख्याकाः ओषधयः सूयन्ते उत्पद्यन्तइति वर्षर्तुः सहस्रसावः तस्मिन्सति सर्वे मण्डूकाः गवां शतानि अपरिमितागाः ददतोस्मभ्यं प्रयच्छन्तः आयुर्जीवनं प्रतिरन्ते प्रवर्धयन्तु ॥ १० ॥

॥ इति पञ्चमस्य सप्तमे चतुर्थोवर्गः ॥ ४ ॥

इन्द्रासोमेति पञ्चविंशत्यृचं षोडशं सूक्तं वसिष्ठस्यार्षं आद्याः षड्जगत्यः सप्तमी जगती त्रिष्टुबा अष्टादश्येकविंशीत्रयोविंश्योजगत्यः अन्त्या प्रतिचक्ष्वेत्यनुष्टुप् शिष्टाश्चतुर्दशत्रिष्टुभः नवमीद्वादशीत्रयोदश्यः सोमदेवत्याः एकादशी देवदेवत्या अष्टमीषोडश्याविन्द्रदेवताके सप्तदशी ग्रावदेवत्या अष्टादशी मरुद्देवताका दशमीचतुर्दश्यावग्निदेवताके प्रवर्तयेत्याद्याः पञ्चर्चइन्द्रदे-

वताकाः मानोरक्षइति त्रयोविंश्याः पूर्वोर्धर्चोवसिष्ठस्य प्रार्थनापरः अतस्तद्देवताकः उत्तरोर्धर्चः पृथिव्यन्तरिक्षदेवत्यः शिष्टानां रक्षोहणाविन्द्रासोमौ देवता।तथाचानुक्रान्तम्—इन्द्रासोमापञ्चाधिकैन्द्रासोमं राक्षोघ्नं शापाभिशापप्रायं पट्सप्तवाद्याजगत्यः एकविंशीत्रयोविंश्यौचाष्टादशी मारुतीच दशमी चतुर्दश्यावाग्नेय्यौ देव्यैकादश्यन्त्यानुष्टुप् नवमी त्रयोदशी द्वादशी सौम्यः सप्तदशी ग्राव्णी अष्टमीषोडश्यावैन्द्रौ प्रवर्तयेति पंचैन्द्रीवा मानोरक्षइत्यृपेरात्मनआशीरुत्तरोर्धर्चः पृथिव्यन्तरिक्षदेवतइति तत्रबृहद्देवतायामनुक्रम्यते—संवत्सरंतु मण्डूकानैन्द्रासोमं परंतु यत्र । ऋषिर्ददर्श रक्षोघ्नं पुत्रशोकपरिप्लुतः । हते पुत्रशतेक्रुद्धः सौदासैर्दुःखितस्तदेति ॥ अतोरक्षोनिबर्हणार्थमेतत्सूक्तं जाप्यम् ।

तत्र प्रथमा—

इन्द्रासोमातपतंरक्षउब्जतंन्यर्पयतंवृषणातमोवृधः ।
पराशृणीतमचितोन्योषतंहतंनुदेथांनिशिशीतमत्रिणः ॥ १ ॥

इन्द्रासोमा । तपतम् । रक्षः । उब्जतम् । नि । अर्पयतम् ।
वृषणा । तमःऽवृधः । परा । शृणीतम् । अचितः । नि ।
ओषतम् । हतम् । नुदेथाम् । नि । शिशीतम् । अत्रिणः ॥ १ ॥

हे इन्द्रासोमौ इन्द्रश्च सोमश्च इन्द्रासोमौ देवताद्वंद्वेचेति पूर्वपदस्यानङ् आमन्त्रिताद्युदात्तत्वम् रक्षोरक्षांसि जातावेकवचनम् युवां तपतं सन्तापयतम आमन्त्रितं पूर्वमविद्यमानवदिति अविद्यमानवत्त्वात् तपतमिति तिङन्तस्य निघाताभावः तथा उब्जतं हिंस्तं उब्जतिर्हिंसाकर्मा तिङ्परत्वान्निघाताभावः हे वृषणा वृषणौ कामानां वर्षितारौ न्यर्पयतं रक्षांसि नीचैर्ध्व प्रापयतं। तमोवृधः तमसा आवरकेण अन्धकारेण मायारूपेण वर्धमानान् तमसि रात्रौ वर्धमानान्वा अचितः ज्ञानरहितान् मूढान् राक्षसान् पराशृणीतम् पराङ्मुखा यथाभवंति तथा हिंस्तम् तथान्योषतं नितरां दहतम् उपदाहे हतं तान्मारयतम् नुदेथाम् अस्मत्तः हतांस्तान्प्रेरयेथां अत्रिणः अदनशीलांस्तान् राक्षसान् निशिशीतं नितरां तनूकुरुतम ॥ १ ॥

अथ द्वितीया—

इन्द्रासोमासमघशंसमभ्यघंतपुर्ययस्तुचरुरग्निवाँइव ।
ब्रह्मद्विषेक्रव्यादेघोरचक्षसेद्वेषोधत्तमनवायंकिमीदिने ॥ २ ॥

इन्द्रासोमा । सम् । अघऽशंसम् । अभि । अघम् । तपुः ।
ययस्तु । चरुः । अग्निवान्ऽइव । ब्रह्मऽद्विषे । क्रव्यऽअदे ।
घोरऽचक्षसे । द्वेषः । धत्तम् । अनवायम् । किमीदिने ॥ २॥

हे इन्द्रासोमौ अघशंसं अघस्यानर्थस्य शंसितारं अघमागत्य हन्तारं राक्षसं सं सहैव अभीतिश्रुतेर्योग्यक्रियाध्याहारःअभिभवतम् । सचतपुः युवयोस्तेजसातप्यमानोराक्षसः अग्निवाँइव अग्नियुक्तः अग्नौप्रक्षिप्तः चरुरिव ययस्तु यत्नुप्रयत्ने केवलोप्ययमाङ्पूर्वार्थोद्रष्टव्यः आयस्यतु आयासं प्राप्नोतु उपक्षीयतामित्यर्थः अपिच ब्रह्मद्विषे ब्राह्मणेभ्योसमर्थ्यं द्वेष्ट्रे क्रव्यादे क्रव्यं मांसं भक्षयित्रे घोरचक्षसे घोरदर्शनाय परुषभाषिणे वा किमीदिने किमिदानीमिति चरते पिशुनाय द्वेषः द्वेष्यभावं अनवायं अव्यवायं अनवयवं नैरन्तर्येण यथाभवति तथा धत्तं दत्तम् ॥ २ ॥

अथ तृतीया–

इन्द्रासोमादुष्कृतोवव्रेअन्तरनारंभणेतमसिप्रविध्यम् ।
यथानातःपुनरेकश्चनोदयत्तद्वामस्तुसहसेमन्युमच्छवः ॥ ३ ॥

इन्द्रासोमा । दुःऽकृतः । वव्रे । अन्तः । अनारम्भणे । तमसि ।
प्र । विध्यतम् । यथा । न । अतः । पुनः । एकः । चन ।
उत्ऽअयत् । तत् । वाम् । अस्तु । सहसे । मन्युऽमत् । शवः ॥ ३ ॥

हे इन्द्रासोमौ दुष्कृतः दुष्कर्मकारिणो राक्षसान् वव्रे वारके अन्तर्मध्ये अनारंभणे आलंबनरहिते तमस्यन्धकारे प्रविध्यतं प्रवेश्य ताडयतम् यथा येनप्रकारेण एषां मध्ये एकश्चन एकोपि राक्षसः अतः अस्मात्तमसः पुनर्नोदयत् उद्गच्छेत् तथा विध्यतमित्यर्थः । एतेर्लेटचडागमः इतश्चलोपइतीकारलोपः गुणायादेशौ । तत्प्रसिद्धम् मन्युमत् क्रोधयुक्तं वां युवयोः शवोबलं सहसे रक्षसामभिभवनाय अस्तु भवतु ॥ ३ ॥

अथ चतुर्थी–

इन्द्रासोमावर्तयतंदिवोवधंसंपृथिव्याअघशंसायतर्हणम् ।
उत्तक्षतंस्वर्यं१पर्वतेभ्योयेनरक्षोवावृधानंनिजूर्वथः ॥ ४ ॥

इन्द्रासोमा । वर्तयतम् । दिवः । वधम् । सम् । पृथिव्याः ।
अघऽशंसाय । तर्हणम् । उत् । तक्षतम् । स्वर्यम् ।
पर्वतेभ्यः । येन । रक्षः । वृवृधानम् । निऽजूर्वथः ॥ ४ ॥

हे इन्द्रासोमौ दिवोन्तरिक्षात् द्युलोकाद्वा वधं हननसाधनमायुधं संवर्तयतमुत्पादयतं पृथिव्याअस्मादपि लोकात्तर्हणं हिंसकमायुधं अघशंसाय अघशंसं अनर्थस्याशंसकं राक्षसं हन्तुमुत्पादयतम् तथा पर्वतेभ्यः पर्ववद्भ्योमेघेभ्यः सकाशात् स्वर्यं स्वृशब्दोपतापयोः उपतापकं अशनिं उत्तक्षतं उद्गतं कुरुतम् येनाशनिना वावृधानं वर्धमानं प्रवृद्धं वा रक्षोराक्षसं निजूर्वथः निहथः जुर्वी हिंसायाम् तमशनिम् उत्तक्षतमित्यर्थः ॥ ४ ॥

अथ पञ्चमी–

इन्द्रासोमावर्तयतंदिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः ।
तपुर्वधेभिरजरेभिरत्रिणोनिपर्शानेविध्यतंयन्तुनिस्वरम् ॥ ५ ॥५॥

इन्द्रासोमा । वर्तयतम् । दिवः । परि । अग्निऽतप्तेभिः । युवम् ।
अश्महन्मऽभिः । तपुःऽवधेभिः । अजरेभिः । अत्रिणः ।
नि । पर्शाने । विध्यतम् । यन्तु । निःऽस्वरम् ॥ ५ ॥ ५ ॥

हे इन्द्रासोमौ दिवोन्तरिक्षात् परितः सर्वतः वर्तयतम् आयुधानि प्रेरयतम् युवं तौ युवां अग्नितप्तेभिः अग्निनासन्तप्तैः तपुर्वधेभिस्तापकप्रहारैः अजरेभिर्जरारहितैः दृढैः अश्महन्मभिः अश्मसारभूतस्यायसोविकारैः हननसाधनैरस्तैरायुधैः अत्रिणोराक्षसस्य पर्शानेपार्श्वस्थानेनिविध्यतं निहतम् ते च राक्षसाः निःस्वरं निःशब्दं यन्तु अपयन्तु निर्गच्छन्तु ॥ ५ ॥

॥ इति पञ्चमस्य सप्तमे पञ्चमो वर्गः ॥ ५ ॥

अथ षष्ठी–

इन्द्रासोमापरिवांभूतुविश्वतइयंमतिःकक्ष्याश्वेववाजिना ।
यांवांहोत्रांपरिहिनोमिमेधयेमाब्रह्माणिनृपतीवजिन्वतम् ॥ ६ ॥

इन्द्रासोमा । परि । वाम् । भूतु । विश्वतः । इयम् । मतिः । कक्ष्या । अश्वाऽइव । वाजिना । याम् । वाम् । होत्राम् । परिऽहिनोमि । मेधया । इमा । ब्रह्माणि । नृपती इवेति नृपतीऽइव । जिन्वतम् ॥ ६ ॥

हे इन्द्रासोमौ इयमस्माभिः क्रियमाणा मतिर्मननीया स्तुतिः वाजिना वाजिनौ बलवन्तौ वां युवां विश्वतः सर्वतः परिभूतु परिगृह्णातु व्याप्नोतु वा । तत्र दृष्टान्तः—कक्ष्या कक्षसंबन्धिनी रज्जुः अश्वेव यथा अश्वं परिगृह्णाति तद्वत् यां होत्रां वाचं वां युवाभ्यां मेधया परिहिनोमि प्रेरयामि सेयं मतिरिति संबन्धः । अपिच इमा इमान्यस्माभिः कृतानि ब्रह्माणि स्तोत्राणि नृपतीव यथा नृपतयोधनैः पूरयन्ति तथा जिन्वतं फलैः पूरयतम् ॥ ६ ॥

अथ सप्तमी—

प्रतिस्मरेथांतुजयद्भिरेवैर्हतंद्रुहोरक्षसोभङ्गुरावतः ।
इन्द्रासोमादुष्कृतेमासुगंभूद्योनःकदाचिदभिदासतिद्रुहा ॥ ७ ॥

प्रति । स्मरेथाम् । तुजयत्ऽभिः । एवैः । हतम् । द्रुहः ।
रक्षसः । भङ्गुरऽवतः । इन्द्रासोमा । दुःऽकृते । मा । सुऽगम् ।
भूत् । यः । नः । कदा । चित् । अभिऽदासति । द्रुहा ॥ ७ ॥

हे इन्द्रासोमौ तुजयद्भिः त्वरमाणैः एवैर्गन्तृभिरश्वैः प्रतिस्मरेथां अभिगच्छतम् उपसर्गवशेनात्र स्मरतिरर्थांतरे वर्तते यथा प्रस्मरणं प्रस्थानमिति । अभिगत्यच द्रुहोद्रोग्धॄन्भंगुरावतः भञ्जनकर्मवतः रक्षसोराक्षसान् हतं हिंस्तम् । हे इन्द्रासोमौ दुष्कृते पापकारिणे राक्षसाय सुगं सुखं माभूत् माभवतु । द्रुहा द्रोहेण युक्तोयोनोस्मान् कदाचिदपि अभिदासति अभिहन्ति तस्मै दुष्कृतइत्यन्वयः ॥ ७ ॥

अथाष्टमी—

योमापाकेनमनसाचरन्तमभिचष्टेअनृतेभिर्वचोभिः ।
आपइवकाशिनासंगृभीताअसन्नस्त्वासतइन्द्रवक्ता ॥ ८ ॥

यः । मा । पाकेन । मनसा । चरन्तम् । अभिऽचष्टे ।
अनृतेभिः । वचःऽभिः । आपःऽइव । काशिना । सम्ऽगृभीताः ।
असन् । अस्तु । असतः । इन्द्र । वक्ता ॥ ८ ॥

पाकेन पक्वेन शुद्धेन मनसा चरन्तं वर्तमानं सत्यवादिनं योमां राक्षसः अनृतेभिरनृतैः असत्यैर्वचोभिर्वचनैः अभिचष्टे अभिशंसति मयि असत्यवचनमारोपयति हे इन्द्र काशिना मुष्टिना संगृभीताः सम्यक् गृहीताः आपइव यथा आपोविशीर्णाभवन्ति तथा असतःअसत्यस्य वक्ता सराक्षसः असन्नस्तु अविद्यमानोभवतु नश्यत्वित्यर्थः ॥ ८ ॥

अथ नवमी–

येपाकशंसंविहरन्तएवैर्येवाभद्रंदूषयन्तिस्वधाभिः ॥
अहयेवातान्प्रददातुसोमआवादधातुनिर्ऋतेरुपस्थे ॥ ९ ॥

ये । पाकऽशंसम् । विऽहरन्ते । एवैः । ये । वा । भद्रम् ।
दूषयन्ति । स्वधाभिः । अहये । वा । तान् । प्रऽददातु । सोमः ।
आ । वा । दधातु । निःऽऋतेः । उपऽस्थे ॥ ९ ॥

ये राक्षसाः पाकशंसं परिपक्ववचनं सत्यभाषिणं मां एवैः एतव्यैः प्राप्तव्यैः आत्मीयैः कामैर्हेतुभूतैः विहरन्ते विशेषेण हरन्ति उपक्षपयन्ति यथा कामं परिवदन्तीत्यर्थः येवा स्वधाभिर्बलैर्युक्ताः भद्रं कल्याणवर्तनं मां दूषयन्ति दुष्टं कुर्वन्ति तान्सर्वान्सोमः अहये वा सर्पाय वा प्रददातु । निर्ऋतेः पापदेवतायाः उपस्थे उत्सङ्गे वा आदधातु प्रक्षिपतु ॥ ९ ॥

अथ दशमी–

योनोरसंदिप्सतिपित्वोअग्नेयोअश्वानांयोगवांयस्तनूनाम् ।
रिपुःस्तेनस्तेयकृद्दभ्रमेतुनिषहीयतांतन्वातनाच ॥ १० ॥ ६ ॥

यः । नः । रसम् । दिप्सति । पित्वः । अग्ने । यः । अश्वानाम् ।
यः । गवाम् । यः । तनूनाम् । रिपुः । स्तेनः । स्तेयऽकृत् । दभ्रम् ।
एतु । नि । सः । हीयताम् । तन्वा । तना । च ॥ १० ॥ ६ ॥

हे अग्ने योराक्षसः नोस्माकं पितोन्नस्य रसं सारं दिप्सति जिघांसति यश्च अश्वानामस्मदीयानां रसं दिप्सति यश्च गवां रसं दिप्सति यश्च तनूनामस्मदीयानां शरीराणां रसं दिप्सति रिपुर्बाधकः स्तेनश्चौरः स्तेयकृत् धनस्यापहर्ता सस्तेजनः दभ्रं हिंसां एतु प्राप्नोतु अपिच सबाधकः तन्वा स्वकीयेन शरीरेण तना च तनयेन च निहीयतां निहीनोभवतु ॥ १०॥

॥ इति पञ्चमस्य सप्तमे षष्ठोवर्गः ॥ ६ ॥

अथैकादशी—

प॒रः सो अ॑स्तु त॒न्वा॒३॑ तना॑ च ति॒स्रः पृ॑थि॒वीर॒धो अ॑स्तु॒ विश्वाः॑ ।
प्रति॑ शुष्यतु॒ यशो॑ अस्य देवा॒ यो नो॒ दिवा॒ दिप्स॑ति॒ यश्च॒ नक्त॑म् ॥११॥

प॒रः । सः । अ॒स्तु॒ । त॒न्वा॑ । तना॑ । च॒ । ति॒स्रः । पृ॒थि॒वीः ।
अ॒धः । अ॒स्तु॒ । विश्वाः॑ । प्रति॑ । शु॒ष्य॒तु॒ । यशः॑ । अ॒स्य॒ ।
दे॒वाः॒ । यः । नः॒ । दिवा॑ । दिप्स॑ति । यः । च॒ । नक्त॑म् ॥ ११ ॥

सराक्षसः तन्वा तनाच व्यत्ययेन तृतीया तन्वाः शरीरस्य तनयस्य च परः परस्तात् अस्तु वर्तमानोभवतु उभाभ्यां वियुक्तोभवत्वित्यर्थः । विश्वा व्याप्तास्तिस्रः पृथिवीः त्रीन् लोकान् अधःअधोऽस्तु अधस्तात् भवतु लोकत्रयादपि प्रच्युतोभवत्वित्यर्थः । हे देवाः अस्य शत्रोः यशोन्नं कीर्तिर्वा प्रतिशुष्यतु योराक्षसोनोस्मान् दिवा अहनि दिप्सति जिघांसति यश्च नक्तं रात्रौ जिघांसति अस्योभयविधस्य यशः प्रतिशुष्यत्विति संबन्धः ॥ ११ ॥

अथ द्वादशी—

सु॒वि॒ज्ञा॒नं चि॑कि॒तुषे॒ जना॑य॒ सच्चास॑च्च॒ वच॑सी पस्पृधाते ।
तयो॒र्यत्स॒त्यं य॑त॒रदृजी॑य॒स्तदित्सोमो॑ऽवति॒ हन्त्यास॑त् ॥ १२ ॥

सु॒ऽवि॒ज्ञा॒नम् । चि॒कि॒तुषे॑ । जना॑य । सत् । च॒ । अस॑त् । च॒ ।
वच॑सी॒ इति॑ । प॒स्पृ॒धा॒ते॒ इति॑ । तयोः॑ । यत् । स॒त्यम् । य॒त॒रत् ।
ऋजी॑यः । तत् । इत् । सोमः॑ । अ॒व॒ति॒ । हन्ति॑ । अस॑त् ॥ १२ ॥

प्रायेणेदमादिभिर्ऋग्भिः राक्षसेन सह ऋषिणा शपथः क्रियते अत्रकेचिदाहुः—हत्वा पुत्रशतं पूर्वं वसिष्ठस्य महात्मनः। वसिष्ठं राक्षसोसित्वं वसिष्ठं रूपमास्थितः॥१॥ अहं वसिष्ठइत्येवं जिघांसुराक्षसोब्रवीत्। अत्रोत्तराऋचोदृष्टावसिष्ठेनेति नः श्रुतमिति॥२॥ चिकितुषे विदुषे जनाय इदं सुविज्ञानं विज्ञातुं सुशकं भवति। किं तत् सच्च सत्यं च असच्च असत्यं च वचसी सत्यासत्यरूपे वचने पस्पृधाते मिथः स्पर्धेते तयोः सदसतोर्मध्ये यत्सत्यं यथार्थं वचनं यतरत् यच्च ऋजीयः ऋजुतमं अकुटिलं तदित् तदेव अकुटिलं सत्यभाषिणं सोमोवति रक्षति असत् उक्तलक्षणमसत्यं हन्ति हिनस्ति एवं सति आवयोर्मध्ये कतरोनृतभाषीति विद्वद्भिः सुविज्ञानमित्यर्थः॥१२॥

अथ त्रयोदशी—

नवाउसोमोवृजिनंहिनोतिनक्षत्रियंमिथुयाधारयन्तम्।
हन्तिरक्षोहन्त्यासद्वदन्तमुभाविन्द्रस्यप्रसितौशयाते॥१३॥

न। वै। ॐ इति। सोमः। वृजिनम्। हिनोति। न। क्षत्रियम्। मिथुया। धारयन्तम्। हन्ति। रक्षः। हन्ति। असत्। वदन्तम्। उभौ। इन्द्रस्य। प्रऽसितौ। शयाते इति॥१३॥

वृजिनं पापकारिणं राक्षसं सोमोदेवः नवाउ नखलु हिनोति प्रेरयति गच्छत्वमिति न मुंचति यथा क्षत्रियं क्षत्रं बलं तद्वन्तं मिथुया मिथ्याभूतं वचनं धारयन्तं बिभ्रतं असत्यवादिनं पुरुषं नच हिनोति नविसृजति अपितु रक्षोराक्षसं हन्ति असत् असत्यं वदन्तंच हन्ति हिनस्ति उभौ राक्षसावनृतवादिनौ तौ सोमेन हतौ इन्द्रस्य सम्बन्धिनि प्रसितौ बन्धने शयाते निवसतः। यद्वा इन्द्रस्येति तृतीयार्थे षष्ठी इन्द्रेणेश्वरेण सोमेन प्रसितौ बद्धौ षिञ्बन्धने अस्मात्कर्मणिनिष्ठा गतिरनन्तरइति गतेःप्रकृतिस्वरत्वम्॥१३॥

अथ चतुर्दशी—

यदिवाहमनृतदेवआसमोघंवादेवाँअप्यूहेअग्ने।
किमस्मभ्यंजातवेदोहृणीषेद्रोघवाचस्तेनिर्ऋथंसचन्ताम्॥१४॥

यदि । वा । अहम् । अनृतऽदेवः । आस । मोघम् । वा । देवान् ।
अपिऽऊहे । अग्ने । किम् । अस्मभ्यम् । जातऽवेदः । हृणीषे ।
द्रोघऽवाचः । ते । निःऽऋथम् । सचन्ताम् ॥ १४ ॥

यदिवा अहं अनृतदेवः अनृताअसत्यभूताः देवायस्य तादृशोयदहं आस अस्मि अथ-वा मोघं वा निष्फलं वा देवानप्यूहे उपगच्छामि अहं यदि उक्तरूपोस्मि हे अग्ने तर्हि मां बाधस्व नह्यहं तथाविधोस्मि एवंसति हे जातवेदः जातानां वेदितरग्ने अस्मभ्यं किंकारणं हृणीषे क्रुध्यसि तव क्रोधोस्मासु न जायतां इत्यर्थः । द्रोघवाचः अनृतवाचोराक्षसास्ते तव निर्ऋथं निःपूर्वोर्तिर्हिंसायां वर्तते निःशेषेण अर्तिहिंसां सचन्तां सेवन्ताम् ॥ १४ ॥

अथ पञ्चदशी—

अद्यामुरीययदियातुधानोअस्मियदिवायुस्ततपपूरुषस्य ।
अधासवीरैर्दशभिर्वियूयायोमामोघंयातुधानेत्याह ॥ १५ ॥ ७ ॥

अद्य । मुरीय । यदि । यातुऽधानः । अस्मि । यदि । वा ।
आयुः । ततप । पुरुषस्य । अध । सः । वीरैः । दशऽभिः । वि ।
यूयाः । यः । मा । मोघम् । यातुऽधान । इति । आह ॥ १५ ॥ ७ ॥

इयमपि शपथरूपैव यद्यहं वसिष्ठोयातुधानोराक्षसोस्मि अद्यास्मिन्नेव दिने मुरीय म्रियै अपि वा पुरुषस्य मनुष्यस्य आयुर्जीवितं यद्यहं राक्षसोभूत्वा ततप हिंसितवानस्मि तर्ह्यप्यहमद्य म्रियेइत्यन्वयः अध अथैवं स्यात् अहं वसिष्ठस्त्वं राक्षसइति तर्हि सत्वं दशभिर्वीरैः पुत्रैः उपलक्षणमेतत् सर्वैर्बन्धुजनैर्वियूयाः वियुक्तोभवेः योराक्षसोमामां मोघं मृषैव हे यातुधान हे-राक्षसेति संबोध्य आह ॥ १५ ॥

॥ इति पञ्चमस्य सप्तमे सप्तमोवर्गः ॥ ७ ॥

अथ षोडशी—

योमायातुंयातुधानेत्याहयोवारक्षाःशुचिरस्मीत्याह ।
इन्द्रस्तंहन्तुमहतावधेनविश्वस्यजन्तोरधमस्पदीष्ट ॥ १६ ॥

यः । मा । अयातुम् । यातुऽधान । इति । आह । यः । वा ।
रक्षाः । शुचिः । अस्मि । इति । आह । इन्द्रः । तम् । हन्तु ।
महता । वधेन । विश्वस्य । जंतोः । अधमः । पदीष्ट ॥ १६ ॥

योराक्षसः मामयातुं अराक्षसं सन्तं हे यातुधान हेराक्षसेत्याह ब्रूते योवा यश्च रक्षाः राक्षसः शुचिरस्मि शुद्धोभवामि न राक्षसोस्मीत्याह ब्रूते तमुभयविधं राक्षसं इन्द्रोमहता मौढेन वधेनायुधेन वज्रेण हन्तु हिनस्तु सच सर्वस्य विश्वस्य जन्तोर्जनस्य अधमोनिकृष्टः सन् पदीष्ट पततु ॥ १६ ॥

अथ सप्तदशी—

प्रयाजिगातिखर्गलेवनक्तमपद्रुहातन्वं१गूहमाना ।
वव्राँअनन्ताँअवसापदीष्टग्रावाणोघ्नन्तुरक्षसउपब्दैः ॥ १७ ॥

प्र । या । जिगाति । खर्गलाऽइव । नक्तम् । अप । द्रुहा । तन्वम् ।
गूहमाना । वव्रान् । अनन्तान् । अव । सा । पदीष्ट । ग्रावाणः ।
घ्नन्तु । रक्षसः । उपब्दैः ॥ १७ ॥

या राक्षसी नक्तं रात्रौ द्रुहा द्रोहेण युक्ता खर्गलेव उलूकीव प्रजिगाति प्रगच्छति किंकुर्वती तन्वं स्वकीयं शरीरं अपगूहमाना अपवृण्वती नप्रकाशयन्ती सा राक्षसी अनन्तान् अपर्यन्तान् वव्रान्गर्तान् अवपदीष्ट अवाङ्मुखीपततु ग्रावाणः सोमाभिषवार्थाः पाषाणाश्च उपब्दैः अभिषवशब्दैः रक्षसोराक्षसान् घ्नन्तु हिंसन्तु ॥ १७ ॥

अथाष्टादशी—

वितिष्ठध्वंमरुतोविक्ष्वि१च्छतगृभायतरक्षसःसंपिनष्टन ।
वयोयेभूत्वीपतयन्तिनक्तभिर्येवारिपोदधिरेदेवेअध्वरे ॥ १८ ॥

वि । तिष्ठध्वम् । मरुतः । विक्षु । इच्छत । गृभायत । रक्षसः ।
सम् । पिनष्टन । वयः । ये । भूत्वी । पतयन्ति । नक्तऽभिः ।
ये । वा । रिपः । दधिरे । देवे । अध्वरे ॥ १८ ॥

हे मरुतोयूयं विक्षु प्रजासु वितिष्ठध्वं विविधं तिष्ठत तत्र गूढान् राक्षसान् हन्तुं इच्छत अन्विच्छत तदनन्तरं रक्षसस्तान् राक्षसान् गृभायत गृह्णीत गृहीत्वाच संपिनष्टन चूर्णयत ये राक्षसावयः पक्षिणोभूत्वी भूत्वा नक्तभिः रात्रिभिः रात्रिषु पतयन्ति आगच्छन्ति येवा येच देवे दीप्ते अध्वरे यागे रिपोहिंसादधिरे विदधिरे तान् राक्षसान् संपिनष्टनेत्यन्वयः ॥ १८ ॥

अथैकोनविंशी—

प्रवर्तयदिवोअश्मानमिन्द्रसोमशितंमघवन्त्संशिशाधि ।
प्राक्तादपाक्तादधरादुदक्तादभिजहिरक्षसःपर्वतेन ॥ १९ ॥

प्र । वर्तय । दिवः । अश्मानम् । इन्द्र । सोमऽशितम् । मघऽवन् ।
सम् । शिशाधि । प्राक्तात् । अपाक्तात् । अधरात् ।
उदक्तात् । अभि । जहि । रक्षसः । पर्वतेन ॥ १९ ॥

हे इन्द्र दिवोन्तरिक्षात् अश्मानं अशनिं प्रवर्तय प्रेरय राक्षसान् हन्तुं तथा सोमशितं सोमेनतीक्ष्णीकृतं यजमानं हे मघवन् धनवन्निन्द्र संशिशाधि संस्कुरु । अपिच प्राक्तात् प्राच्याः अपाक्तात् प्रतीच्याः अधरात् अवाच्याः उदक्तात् उत्तरतः सर्वस्मादपि दिग्भागात् रक्षसोराक्षसान् पर्वतेन पर्ववता वज्रेण अभिजहि मारय ॥ १९ ॥

अथ विंशी—

एतउत्येपतयन्तिश्वयातवइन्द्रंदिप्सन्तिदिप्सवोदाभ्यम् ।
शिशीतेशक्रःपिशुनेभ्योवधंनूनंसृजदशनिंयातुमद्भ्यः ॥ २० ॥८॥

एते । ऊँ इति । त्ये । पतयन्ति । श्वऽयातवः । इन्द्रम् ।
दिप्सन्ति । दिप्सवः । अदाभ्यम् । शिशीते । शक्रः । पिशुनेभ्यः ।
वधम् । नूनम् । सृजत् । अशनिम् । यातुमत्ऽभ्यः ॥ २० ॥ ८ ॥

त्ये ते एते राक्षसाश्वयातवः श्वभिः परिगतभूतैः हिंसन्तः श्वभिः सह यान्तोवा पतयन्ति पतन्ति येदिप्सवोजिघांसवः सन्तः अदाभ्यं अहिंस्यमिन्द्रं दिप्सन्ति जिघांसन्ति तेभ्यः पिशुनेभ्यः पिशुनान्कपटान् हन्तुं शक्रः इन्द्रोवधमायुधं अशनिरूपं शिशीते तीक्ष्णीकरोति यातुमद्भ्योराक्षसेभ्योनूनं क्षिप्रं अशनिं सृजत् विसृजतु हननार्थम् ॥ २० ॥

॥ इति पञ्चमस्य सप्तमेष्टमोवर्गः ॥ ८ ॥

अथैकविंशी—

इन्द्रो॑यातू॒नाम॑भवत्पराश॒रोह॑वि॒र्मथी॑नाम॒भ्या॒३॑विवा॑सताम् ।
अ॒भीदु॑श॒क्रः प॑र॒शुर्य॑था॒वनं॒पात्रे॑व भि॒न्दन्त्स॒तए॑ति र॒क्षसः॑ ॥२१॥

इन्द्रः॑ । या॒तू॒नाम् । अ॒भ॒व॒त् । प॒रा॒ऽश॒रः । ह॒वि॒ःऽमथी॑नाम् ।
अ॒भि । आ॒ऽवि॒वा॑सताम् । अ॒भि । इ॒त् । ऊँ॒ इति॑ । श॒क्रः ।
प॒र॒शुः । यथा॑ । वन॑म् । पात्रा॑ऽइव । भि॒न्दन् । स॒तः । ए॒ति॒ । र॒क्षसः॑ ॥२१॥

यातूनां हिंसकानां रक्षसां अयमिन्द्रः पराशरः पराशातयिता हिंसिता भवत् कीदृशीनां हविर्मथीनां हवींषि मथ्नताम् अभिमुखं आविवासतां आगच्छताम् अपिचायं शक्र इन्द्रः वनं वृक्षजातं परशुर्यथा छिंदन् कुठारइव पात्रेव मृन्मयानि पात्राणि भिन्दन् मुद्गरइवच सतः मात्रनामैतत् तदाहयास्कः—तिरः सतइतिप्राप्तस्येति[1] । प्राप्तान् रक्षसोराक्षसान् भिन्दन् हिंसन् अभ्येभिगच्छति इदुपूरणौ ॥ २१ ॥

अथ द्वाविंशी—

उलू॑कयातुं शुशु॒लूक॑यातुं ज॒हि श्वया॑तुमु॒त कोक॑यातुम् ।
सु॒प॒र्णया॑तुमु॒त गृध्र॑यातुं दृ॒षदे॑व॒ प्र मृ॑ण॒ रक्ष॑ इन्द्र ॥ २२ ॥

उलू॑कऽयातुम् । शु॒शु॒लूक॑ऽयातुम् । ज॒हि । श्वऽया॑तुम् । उ॒त ।
कोक॑ऽयातुम् । सु॒प॒र्णऽया॑तुम् । उ॒त । गृध्र॑ऽयातुम् ।
दृ॒षदा॑ऽइव । प्र । मृ॒ण॒ । रक्षः॑ । इ॒न्द्र॒ ॥ २२ ॥

उलूकयातुं उलूकैः परिकरभूतैः सहयातयति हिनस्तीति याति गच्छतीतिवा उलूकयातुः यद्वा उलूकरूपी यातीत्युलूकयातुः हे इन्द्र तादृशं राक्षसं जहि विनाशय । तथाच बृहद्देवतायामुक्तम्—उलूकयातुंजह्येतान्नानारूपान्निशाचरान् । स्त्रीपुंरूपांश्च विर्यञ्चोजिघांसन्निन्द्रमेजहीति ॥ एवमुत्तरत्रापियोज्यम् शुशुलूकयातुं उलूकाद्विविधाः बृहदुलूकाः अल्पोलूकाश्चेति तत्र उलूक-

1 नि० ३ २०.

यातुमिति बृहदुलूकाभिप्रायेणोक्तं शिशुरल्पउलूकः शुशुलूकः तद्रूपेण वर्तमानं राक्षसं श्वयातुं श्वरूपेण वर्तमानं राक्षसं उतापिच कोकयातुं कोकश्चक्रवाकः तद्रूपेण वर्तमानं राक्षसं सुपर्णयातुं सुपर्णः श्येनः तदाकारं यातुधानं उतापिच गृध्रयातुं गृध्ररूपं च यातुधानं एतान्सर्वान् नानाकारान् हे इन्द्र जहि किंबहुना दृषदेव पाषाणेनेव वज्रेण रक्षः राक्षसमात्रं प्रमृण मारय॥२२॥

अथ त्रयोविंशी—

मानोरक्षोअभिनंड्यातुमावंतामपोच्छतुमिथुनायाकिमीदिनां।
पृथिवीनःपार्थिवात्पात्वंहंसोन्तरिक्षंदिव्यात्पात्वस्मान्॥ २३ ॥

मा। नः। रक्षः। अभि। नट्। यातुऽमावंताम्। अपं। उच्छतु।
मिथुना। या। किमीदिनां। पृथिवी। नः। पार्थिवात्।
पातु। अंहंसः। अन्तरिक्षम्। दिव्यात्। पातु। अस्मान्॥ २३॥

रक्षोराक्षसजातिर्नोस्मान् माभिनट् माभिव्याप्नोतु नशतेर्व्याप्तिकर्मणोलुङि मन्त्रेघसेतिच्लेर्लुक् नमाङ्योगइत्यडभावः यथा यातुमावतां यातनावतां राक्षसानां मिथुना मिथुनानि स्त्रीपुंसरूपाणि युगलानि अपोच्छतु उच्छीविवासे अपविवासयतु अपवर्जयतु या यानि मिथुनानि किमीदिना किमीदिनानि किमिदंकिमिदमिति जिघांसया वर्तमानानि भवन्ति अपिच पृथिवी प्रथितेयं भूमिश्च नोस्मान्पार्थिवात् पृथिव्याअन्तरिक्षस्य संबन्धिनःअंहसः पापात्पातु रक्षतु अन्तरिक्षंच दिव्यात् दिविभवात् पापात् अस्मान्पातु रक्षतु॥ २३॥

अथ चतुर्विंशी—

इन्द्रंजहिपुमांसंयातुधानमुतस्त्रियंमायया्शाशदानाम्।
विग्रीवासोमूरदेवाऋदन्तुमातेदृशन्त्सूर्यमुच्चरंन्तम्॥ २४॥

इन्द्र। जहि। पुमांसम्। यातुऽधानम्। उत। स्त्रियम्।
मायया। शाशदानाम्। विऽग्रीवासः। मूरऽदेवाः।
ऋदन्तु। मा। ते। दृशन्। सूर्यम्। उत्ऽचरन्तम्॥ २४॥

हे इन्द्र पुमांसं पुंरूपधारिणं यातुधानं राक्षसं जहि मारय । उतापिच मायया वञ्चनया शाशदानां हिंसन्तीं स्त्रियं राक्षसीं च जहि । अपिच मूरदेवाः मारणक्रीडाराक्षसाः विग्रीवासः विच्छिन्नग्रीवाः सन्तः ऋदन्तु नश्यन्तु ते तथाविधा राक्षसाः उच्चरन्तं उद्यन्तं सूर्यमादित्यं मा-दृशन् माद्राक्षुः ॥ २४ ॥

उपाकरणोत्सर्जनयोः मण्डलाद्यन्तहोमेप्रतिचक्ष्वेत्येषा सप्रिवश्च—योनःस्वोमिंनरःप्रतिच-क्ष्वेति ।

सैषा पञ्चविंशी—

प्रतिंचक्ष्व॒विच॒क्ष्वेन्द्र॑श्चसोमजागृतम्।
रक्षो॑भ्योव॒धम॑स्यतम॒शनिं॑यातु॒मद्भ्यः॑ ॥ २५ ॥ ९ ॥

प्रतिं । च॒क्ष्व॒ । वि । च॒क्ष्व॒ । इन्द्रः॑ । च॒ । सो॒म॒ । जा॒गृ॒तम् ।
रक्षः॑ऽभ्यः । व॒धम् । अ॒स्य॒त॒म् । अ॒शनि॑म् । या॒तु॒मत्ऽभ्यः॑ ॥२५॥९॥

हे सोम त्वमिन्द्रश्च प्रतिचक्ष्व प्रत्येकं पश्य राक्षसान् तथा विचक्ष्व विविधं पश्य यथास्मान् न बाधेरन् तथा पश्येत्यर्थः । युवां च संहतौ जागृतं जागरूकौ रक्षोवधोद्युक्तौ भव-तम् । यातुमद्भ्योहिंसावद्भ्योरक्षोभ्योराक्षसेभ्यः अशनिं अशनिरूपं वधमायुधं अस्यतं क्षिप-तम् ॥ २५ ॥

॥ इति पञ्चमस्य सप्तमे नवमोवर्गः ॥ ९ ॥

॥ इति सप्तमे मण्डले षष्ठोनुवाकः ॥ ६ ॥

॥ इति वासिष्ठं सप्तमं मण्डलं समाप्तम् ॥ ७ ॥

॥ अथप्रगाथमष्टमंमण्डलम् ॥

अष्टमेमण्डले दशानुवाकाः तत्र प्रथमेनुवाके पञ्चसूक्तानि तेषांमाचिदन्यदिति चतुस्त्रिंशदृचं प्रथमं सूक्तम् अत्रानुक्रम्यते—माचिच्चतुस्त्रिंशन्मेधातिथिमेध्यातिथी ऐन्द्रं बार्हतं द्विप्रगाथादि द्वित्रिष्टुबन्तमाद्यं द्वृचं प्रगाथोपश्यत्सघोरः सन्भ्रातुः कण्वस्य पुत्रतामगात् प्लायोगिश्चासंगोयः स्त्रीभूत्वा पुमानभूत् समेध्यातिथये दानं दत्वा स्तुहिस्तुहीति चतसृभिरात्मानं तुष्टाव पत्नीचास्याङ्गिरसी शश्वती पुंस्त्वमुपलभ्यैनं प्रीतान्त्ययातुष्टावेति । अस्यायमर्थः—अस्यसूक्तस्य मेधातिथिमेध्यातिथिनामानौ द्वावृषी तौच कण्वगोत्रौ ऋषिश्चानुक्तगोत्रः प्राङ्मत्स्यात्काण्वइति परिभाषितत्वात् । आद्यस्य द्वृचस्यतु घोरस्यपुत्रः स्वकीयभ्रातुः कण्वस्य पुत्रतांप्राप्तत्वात् काण्वः प्रगाथाख्यऋषिः प्लायोगिनाम्नोराज्ञः पुत्रःआसङ्गाभिधानोराजा देवशापात् स्त्रीत्वमनुभूय पश्चात्तपोबलेन मेधातिथेः प्रसादात् पुमान्भूत्वा तस्मै बहुधनं दत्त्वा स्वकीयमन्तरात्मानं दत्तदानं स्तुहिस्तुहीत्यादिभिश्चतसृभिर्ऋग्भिः अस्तौत् अतस्तासां आसङ्गाख्योराजाऋषिः अस्यासङ्गस्यभार्याङ्गिरसः सुता शश्वत्याख्या भर्तुः पुंस्त्वमुपलभ्य प्रीतासती स्वभर्तारं अन्वस्यस्थूरमित्यनया स्तुतवती अतस्तस्याऋचः शश्वती ऋषिका । अन्त्ये द्वे त्रिष्टुभौ द्वितीयाचतुर्थ्यौसतोबृहत्यौ शिष्टाबृहत्यः कृत्स्नस्यसूक्तस्येन्द्रोदेवता स्तुहिस्तुहीत्याद्याश्चतस्रआत्मकृतस्य दानस्य स्तूयमानत्वात्तद्देवताकाःअन्वस्येत्यस्याआसंगाख्योराजा देवता यातेनोच्यतेसादेवतेति न्यायात् । महाव्रते निष्केवल्ये बार्हततृचाशीतौ आदितएकोनत्रिंशोविनियुक्ताः तथैवपञ्चमारण्यकेसूत्रितम्—माचिदन्यद्विशंसतेत्येकयानत्रिंशदिति । चातुर्विंशिकेहनि माध्यन्दिनेसवने मैत्रावरुणस्य माचिदन्यदिति वैकल्पिकः स्तोत्रियः प्रगाथः । सूत्रितञ्च—माचिदन्यद्विशंसतयच्चिद्धित्वाजनाइमइति स्तोत्रियानुरूपाविति । ग्रावस्तोत्रेप्याद्याविनियुक्ता सूत्रितंच—आतूनइन्द्रक्षुमन्तं माचिदन्यद्विशंसतेति । उपाकर्मोत्सर्जनयोर्मण्डलादिहोमेप्येषा सूत्र्यतेहि—माचिदन्यदाग्नेयाहि स्वादिष्ठयेति ।

तत्र प्रथमा—

माचिदन्यद्विशंसतसखायोमारिषण्यत ।
इन्द्रमित्स्तोतावृषणंसचासुतेमुहुरुक्थाचशंसत ॥ १ ॥

मा । चित् । अन्यत् । वि । शंसत । सखायः । मा । रिषण्यत । इन्द्रम् ।
इत् । स्तोत । वृषणम् । सचा । सुते । मुहुः । उक्था । च । शंसत ॥ १ ॥

हे सखायः समानख्यानाः स्तोतारः इन्द्रस्तोत्रादन्यत्स्तोत्रं माचिद्विशंसत मैवोच्चारयत मारिषण्यत माहिंसितारोभवत अन्यदीयस्तोत्रोच्चारणेन वृथोपक्षीणा माभवत। सुतेभिषुते सोमे वृषणं कामानां वर्षितारमिन्द्रमित इन्द्रमेव हे प्रस्तोत्रादयः सचा सह संघीभूय स्तोत स्तुत। हे प्रशास्त्रादयः उक्थाच उक्थानि शस्त्राणि चेन्द्रविषयाणि यूयं मुहुः पुनः पुनः शंसत ॥ १ ॥

अथ द्वितीया—

अवक्रक्षिणंवृषभंयथाजुरंगांनचर्षणीसहम् ।
विद्वेषणंसंवननोभयंकरंमंहिष्ठमुभयाविनम् ॥ २ ॥

अवऽक्रक्षिणम् । वृषभम् । यथा । अजुरम् । गाम् । न । चर्षणिऽसहम् ।
विऽद्वेषणम् । सम्ऽवननो । उभयम्ऽकरम् । मंहिष्ठम् । उभयाविनम् ॥ २ ॥

वृषभं यथा वृषभमिव अवक्रक्षिणं अवकर्षणशीलं शत्रूणां हिंसितारं अजुरं जरारहितं अहिंसितं वा गां न गामिव वृषभमिव चर्षणीसहं चर्षणीनां मनुष्याणां शत्रुभूतानामभिभवितारं विद्वेषणं विद्वेष्टारं शत्रूणां संवनना संवननं सम्यक्संभजनीयं स्तोतृभिः उभयंकरं निग्रहानुग्रहयोरुभयोः कर्तारम् मंहिष्ठं दातृतमम् उभयाविनं दिव्यपार्थिवलक्षणेन उभयविधधनेनोपेतं यद्वा स्थावरजङ्गमरूपेण द्विप्रकारेण रक्षितव्येनोपेतं अथवा उभयविधैः स्तोतृभिः यष्टृभिश्चोपेतं । एवंविधमिन्द्रमित स्तोतेत्यन्वयः ॥ २ ॥

चातुर्विंशिकेहनि माध्यन्दिनसवने यच्चिद्धिलेति प्रशास्तुर्वैकल्पिकोनुरूपःप्रगाथः सूत्रन्तूदाहृतम् ।

तत्राद्या सूक्ते तृतीया—

यच्चिद्धित्वाजनाइमेनानाहवन्तऊतये ।
अस्माकंब्रह्मेदमिन्द्रभूतुतेहाविश्वाचवर्धनम् ॥ ३ ॥

यत् । चित् । हि । त्वा । जनाः । इमे । नाना । हवन्ते ।
ऊतये । अस्माकम् । ब्रह्म । इदम् । इन्द्र । भूतु । ते ।
अहा । विश्वा । च । वर्धनम् ॥ ३ ॥

इमे दृश्यमानाः सर्वेजनाः हे इन्द्र त्वां ऊतये रक्षणाय तर्पणायवा नाना पृथक्पृथक् यच्चित् यद्यपि हवन्ते स्तुवन्ति हीतिपूरणः तथापि अस्माकं इदं ब्रह्म स्तोत्रमेव हेइंद्र ते तव वर्धनं वर्धकं भूतु भवतु न केवलमिदानीमेव अपितु विश्वाहा सर्वाण्यहानि सर्वेष्वहस्सुप इदमेव स्तोत्रं त्वां वर्धयत्वित्यर्थः ॥ ३ ॥

अथ चतुर्थी—

वितर्तूर्यन्तेमघवन्विपश्चितोर्योविपोजनानाम् ।
उपक्रमस्वपुरुरूपमाभरवाजन्नेदिष्ठमूतये ॥ ४ ॥

वि । तर्तूर्यन्ते । मघऽवन् । विपःऽचितः । अर्यः । विपः ।
जनानाम् । उप । क्रमस्व । पुरुऽरूपम् । आ । भर ।
वाजम् । नेदिष्ठम् । ऊतये ॥ ४ ॥

हे मघवन् धनवन्निन्द्र विपश्चितोविद्वांसः त्वदीयाः स्तोतारः अर्यः अभिगन्तारः जनानां शत्रूणां विपोवेपयितारः सन्तः वितर्तूर्यन्ते भृशं आपदोवितरन्ति अतिक्रामन्ति तादृशस्त्वं उपक्रमस्व उपगच्छास्मान् पुरुरूपं बहुरूपं नेदिष्ठं अंतिकतमं वाजमन्नं ऊतये तर्पणाय आभरास्मभ्यम् ॥ ४ ॥

अथ पञ्चमी—

महेचनत्वामद्रिवःपराशुल्कायदेयाम् ।
नसहस्रायनायुतायवज्रिवोनशतायशतामघ ॥ ५ ॥ १० ॥

महे । चन । त्वाम् । अद्रिऽवः । परा । शुल्काय । देयाम् । न ।
सहस्राय । न । अयुताय । वज्रिऽवः । न । शताय । शतऽमघ ॥ ५ ॥ १० ॥

हे अद्रिवोवज्रवन्निन्द्र त्वा त्वां चनेति निपातद्वयसमुदायोविभज्ययोजनीयः महेच महतेपि शुल्काय मूल्याय न परादेयां न विक्रीणानि। हे वज्रिवोवज्रहस्तेन्द्र सहस्राय सहस्रसंख्यायच धनाय न परादेयाम। अयुताय दशसहस्रायच शुल्काय न परादेयाम्। हे शतामघ बहुधनेन्द्र शताय बहुनामैतत् अपरिमितायच धनाय न परादेयां नविक्रीणानि उक्तसंख्याद्धनादपि त्वं ममप्रियतमोसीत्यर्थः ॥ ५॥

॥ इति पंचमस्य सप्तमे दशमोवर्गः ॥ १० ॥

अथ षष्ठी–

वस्याँइन्द्रासिमेपितुरुतभ्रातुरभुंजतः।
मातार्चमेछदयथःसमावसोवसुत्वनायराधसे ॥ ६ ॥

वस्यान्। इन्द्र। असि। मे। पितुः। उत। भ्रातुः। अभुंजतः।
माता। च। मे। छदयथः। समा। वसो इति।
वसुऽत्वनाय। राधसे ॥ ६ ॥

हे इन्द्र त्वं मे मदीयात्पितुर्जनकादपि वस्यान् वसीयान् वसुमत्तरोसि उतापिच अभुंजतः अपालयतोमम भ्रातुरपि वसीयान् त्वमधिकोसि हे वसोवासकेन्द्र मे मदीया माता च त्वञ्च समा समौ समानौ सन्तौ। पुमान्स्त्रियेति पुंसः शेषः। छदयथः अर्चतिकर्मायम् मां पूजितं कुरुथः। किमर्थं वसुत्वनाय व्यापनाय राधसे धनायच उभयोर्लाभायेत्यर्थः॥ ६ ॥

अथ सप्तमी–

क्वेयथक्वेदसिपुरुत्राचिद्धितेमनः।
अलर्षियुध्मखजकृत्पुरन्दरप्रगायत्राअगासिषुः ॥ ७ ॥

क्व। इयथ। क्व। इत्। असि। पुरुऽत्रा। चित्। हि। ते।
मनः। अलर्षि। युध्म। खजऽकृत्। पुरम्ऽदर। प्र। गायत्राः।
अगासिषुः ॥ ७ ॥

हे इन्द्र क कुत्रदेशे इयथ गतवानसि पुरा क्वेऽ कुत्रचासि भवसि इदानीं वर्तसे पुरुत्रा-चिद्धि बहुषु हि यजमानेषु ते त्वदीयं मनः संचरति । हे युध्म युद्धकुशल खजकृत् युद्धस्य क-र्तः हे पुरन्दर आसुरीणां पुरां दारयितः हे इन्द्र अन्वर्षि आगच्छ गायत्राः गानकुशलाः अस्म-दीयाः स्तोतारः प्रागासिषुः प्रगायन्ति स्तुवन्ति अल्र्षीत्येतद् दाधर्त्यादावियर्तेर्निपात्यते ॥ ७ ॥

अथाष्टमी–

प्रास्मै॑ गा॒य॒त्रम॑र्चत वा॒वातु॒र्यः पु॑र॒न्द॒रः ।
या॒भिः का॒ण्वस्योप॑ ब॒र्हिरा॒सदं॒ यास॑द्व॒ज्री भि॒नत्पुरः॑ ॥ ८ ॥

प्र । अ॒स्मै॒ । गा॒य॒त्रम् । अ॒र्च॒त॒ । व॒वातुः॑ । यः । पु॒र॒म्ऽद॒रः ।
या॒भिः॑ । का॒ण्वस्य॑ । उप॑ । ब॒र्हिः । आ॒ऽसद॑म् । यास॑त् ।
व॒ज्री । भि॒नत् । पुरः॑ ॥ ८ ॥

अस्मा इन्द्राय गायत्रं गातव्यं साम गायत्रसंज्ञं वा प्रार्चत प्रगायत पुरन्दरः पुरांदारयिता य-इन्द्रः ववातुर्वननीयः संभजनीयः यद्वा वावातुः संभक्तुः स्तोतुः यइन्द्रः पुरन्दरः शत्रुपुराणां दा-रयिता याभिर्ऋग्भिः काण्वस्य कण्वपुत्रस्य मेधातिथेर्मेध्यातिथेश्च बर्हिर्यज्ञं उपासदं उपास-त्तुं उपगन्तुं यासत् गच्छेत् वज्री वज्रयुक्तः सन् याभिश्च ऋग्भिः स्तूयमानः सन् पुरः शात्रवीः भिनत् भिन्द्यात् तास्वृक्षु गायत्रं साम गायतेत्यर्थः ॥ ८ ॥

अथ नवमी–

अथ दशमी—

आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥ १० ॥ ११ ॥

आ । तु । अद्य । सबःऽदुघाम् । हुवे । गायत्रऽवेपसम् ।
इन्द्रम् । धेनुम् । सुऽदुघाम् । अन्याम् । इषम् ।
उरुऽधाराम् । अरम्ऽकृतम् ॥ १० ॥ ११ ॥

अनया इन्द्रं धेनुरूपेण वृष्टिरूपेणाच निरूपयन् स्तौति अद्येदानीं धेनुं धेनुरूपमिन्द्रं नु क्षिप्रं आहुवे आह्वये कीदृशीं धेनुं सबर्दुघां पयसोदोग्ध्रीं गायत्रवेपसं प्रशस्यवेगां सुदुघां सुखेन दोग्धुं शक्यां अन्यामुक्तविलक्षणां उरुधारां बहूदकधारां इषं एषणीयां वृष्टिं एतद्रूपेण वर्तमानं अरंकृतं अलंकर्तारं पर्याप्तकारिणं येन्द्रं चाह्वये ॥ १० ॥

॥ इति पञ्चमस्य सप्तमे एकादशोवर्गः ॥ ११ ॥

अथैकादशी—

यत्तुदत्सूर एतशं वङ्कू वातस्य पर्णिना ।
वहत्कुत्समार्जुनेयं शतक्रतुः त्सरद्गन्धर्वमस्तृतम् ॥ ११ ॥

यत् । तुदत् । सूरः । एतशम् । वङ्कू इति । वातस्य ।
पर्णिना । वहत् । कुत्सम् । आर्जुनेयम् । शतऽक्रतुः ।
त्सरत् । गन्धर्वम् । अस्तृतम् ॥ ११ ॥

सूरः सूर्यः एतशं एतत्संज्ञं राजर्षिं यद्यदा तुदत् अव्यथयत् तदानीं एतशं रक्षितुं वंकू वक्रगामिनौ वातस्य वायोः सदृशौ पर्णिना पर्णिनौ पतनवन्तौ ईदृशावश्वौ शतक्रतुः बहुविधकर्मेन्द्रः आर्जुनेयं अर्जुन्याः पुत्रं कुत्सर्षिं वहत् अवहत् आनयत् कुत्सेन सार्धं समानं रथमारुह्य एतशरक्षणायागच्छदित्यर्थः । तथाच निगमान्तरम्—[१]मैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रइति । गन्धर्वं गवां रश्मीनां धर्तारं सूर्यं अस्तृतं केनाप्यहिंसितं त्सरत् अत्सरत् छद्मगत्या अगच्छत् सूर्येण योद्धुं गतवानित्यर्थः ॥ ११ ॥

---

१ ऋ० सं० १. ४. २९. ।

अथ द्वादशी–

यऋतेचिदभिश्रिषःपुराजत्रुभ्यआतृदः ।
सन्धातासन्धिंमघवापुरूवसुरिष्कर्ताविह्रुतंपुनः ॥ १२ ॥

यः । ऋते । चित् । अभिऽश्रिषः । पुरा । जत्रुऽभ्यः ।
आऽतृदः । सम्ऽधाता । सम्ऽधिम् । मघऽवा ।
पुरुऽवसुः । इष्कर्ता । विऽह्रुतम् । पुनरिति ॥ १२ ॥

यइन्द्रः अभिश्रिषः अभिश्लिषः अभिश्लेषणान् सन्धानद्रव्यान् ऋतेचिद् विनापि जत्रुभ्योग्रीवाभ्यः सकाशाद् आतृदः आतर्दनाद् आरुधिरनिःस्रवणाद् पुरा पूर्वमेव संधिं संधातव्यं तं संधाता संयोजयिता भवति मघवान् धनवान् पुरुवसुः बहुधनः सइन्द्रः विह्रुतं विच्छिन्नं तं पुनरिष्कर्ता संस्कर्ता भवति ॥ १२ ॥

अथ त्रयोदशी–

माभूमनिष्ट्याइवेन्द्रत्वदरणाइव ।
वनानिनप्रजहितान्यद्रिवोदुरोषासोअमन्महि ॥ १३ ॥

मा । भूम । निष्ट्याःऽइव । इन्द्र । त्वत् । अरणाःऽइव ।
वनानि । न । प्रऽजहितानि । अद्रिऽवः । दुरोषासः । अमन्महि ॥१३॥

हे इन्द्र त्वत् त्वत्तः त्वत्प्रसादात् निष्ट्याइव नीचैः भूताः हीना निष्ट्याः तइव वयं माभूम तथा अरणाइव अरमणाः दुःखिनइव वयं माभूम अपिच प्रजहितानि प्रक्षीणानि शाखादिभिर्वियुक्तानिन वनानि वृक्षजातानीव वयं पुत्रादिभिः वियुक्तामाभूम। हे अद्रिवोवज्रवन्निन्द्र दुरोषासः ओषितुमन्यैर्दग्धुमशक्याः दुर्येषु गृहेषु निवसन्तोवा वयं अमन्महि त्वां स्तुमः॥१३॥

अथ चतुर्दशी–

अमन्महीदनाशवोनुग्रासश्चवृत्रहन् ।
सकृत्सुतेमहताशूरराधसानुस्तोमंमुदीमहि ॥ १४ ॥

अमन्महि । इत् । अनाशवः । अनुमासः । च । वृत्रऽहन् । सकृत् ।
सु । ते । महता । शूर । राधसा । अनु । स्तोमम् । मुदीमहि ॥ १४ ॥

हे वृत्रहन् वृत्रस्यासुरस्य हन्तरिन्द्र अनाशवः अशीघ्राः अत्वरमाणाः अनुमासः अनुमाः अनुद्धर्णाश्च सन्तोवयं भक्तिश्रद्धापुरःसरं शनैस्त्वां अमन्महीव स्तुमएव । हे शूर वीर्यवन्निन्द्र ते त्वदर्थं सकृत् एकवारमपि महता प्रभूतेन राधसा धनेन हविर्लक्षणेन सह शोभनं स्तोमं स्तोत्रं अनुमुदीमहि अनुमोदेमहि अनुब्रवामेत्यर्थः ॥ १४ ॥

अथ पंचदशी–

यदिस्तोमंममश्रवदस्माकमिन्द्रमिन्दवः ।
तिरःपवित्रंससृवांसआशवोमन्दन्तुतुग्र्यावृधः ॥ १५ ॥ १२ ॥

यदि । स्तोमम् । मम । श्रवत् । अस्माकम् । इन्द्रम् । इन्दवः । तिरः ।
पवित्रम् । ससृऽवांसः । आशवः । मन्दन्तु । तुग्र्यऽवृधः ॥ १५ ॥ १२ ॥

अयमिन्द्रोमम मदीयं स्तोत्रं यदि श्रवत् शृणुयात् तदानीं तमिन्द्रं अस्माकं अस्मदीया इन्दवः सोमाः मन्दन्तु मादयन्तु हर्षयन्तु । कीदृशाः सोमाः तिरः तिर्यगवस्थितं पवित्रं पवनसाधनं दशापवित्रं ससृवांसः प्राप्तवन्तः दशापवित्रेण पूताइत्यर्थः आशवः शीघ्रं मदजनकाः तुग्र्यावृधः तुग्र्याभिः वसतीवर्येकधनाख्याभिरद्भिर्वर्धमानाः ॥ १५ ॥

॥ इति पञ्चमस्य सप्तमे द्वादशो वर्गः ॥ १२ ॥

४६७

अथ षोडशी–

आत्वद्यसधस्तुतिंवावातुःसख्युरागहि ।
उपस्तुतिर्मघोनांप्रत्वावत्वधातेवश्मिसुष्टुतिम् ॥ १६ ॥

आ । तु । अद्य । सधऽस्तुतिम् । ववातुः । सख्युः ।
आ । गहि । उपऽस्तुतिः । मघोनाम् । प्र । त्वा ।
अवतु । अध । ते । वश्मि । सुऽस्तुतिम् ॥ १६ ॥

हे इन्द्र वावातुः संभक्तुः त्वां सेवमानस्य सख्युः स्तोतुः सधस्तुतिं अन्यैर्ऋत्विग्भिः सह क्रियमाणां स्तुतिं अद्येदानीं तु क्षिप्रमागहि आगच्छ । मघोनां हविष्मतां अन्येषामपि यजमानानामुपस्तुतिः स्तोत्रं त्वा त्वां प्रावतु प्रगच्छतु प्रतर्पयतु वा । अध अधुना सुष्टुतिं त्वद्विषयां शोभनां स्तुतिं अहमपि वश्मि कामये ॥ १६ ॥

अथ सप्तदशी—

सोता॒हिसोम॒मद्रि॑भि॒रेमे॑नम॒प्सुधा॑वत ।
ग॒व्याव॒स्त्रेव॑वा॒सय॑न्त॒इन्नरो॒निर्धु॑क्षन्व॒क्षणा॑भ्यः ॥ १७ ॥

सोत॑ । हि । सोम॑म् । अद्रि॑ऽभिः । आ । ई॒म् । ए॒न॒म् । अ॒प्ऽसु ।
धा॒व॒त॒ । ग॒व्या । वस्त्रा॑ऽइव । वा॒सय॑न्तः । इत् । नरः॑ ।
निः । धु॒क्ष॒न् । व॒क्षणा॑भ्यः ॥ १७ ॥

हेअध्वर्यवः अद्रिभिर्ग्रावभिः सोमं सोत । हिरवधारणे अभिषुणुतैव एनमिमं अप्सु वसतीवरीषु आधावत अस्य सोमस्याधानं कुरुत । अदाभ्यग्रहेहिमांदासुतइत्यादिभिर्मन्त्रैः । वसतीवरीष्वाधवनं सोमस्य क्रियते तत्कुरुतेत्यर्थः । गव्या गविभवानि वस्त्रेव वस्त्राणि आच्छादकानि चर्माणीव मेघान्वासयन्तइत् आच्छादयन्तएव नरोनेतारइन्द्रस्यानुचरामरुतः वक्षणाभ्योनदीभ्यः नदीनामर्थाय निर्धुक्षन् उदकानि निर्दुहन्ति क्षमयन्ति यतएवं अतः कारणात् इन्द्रपानाय सोममद्रिभिरभिषुणुतैव मोदासिपतेत्यर्थः ॥ १७ ॥

अथाष्टादशी—

अध॒ज्मोअध॑वादि॒वोबृ॑ह॒तोरो॑च॒नादधि॑ ।
अ॒यावर्ध॑स्वत॒न्वा॑गि॒राममाजा॒तासु॑क्रतोपृण ॥ १८ ॥

अध॑ । ज्मः । अध॑ । वा॒ । दि॒वः । बृ॒ह॒तः । रो॒च॒नात् । अधि॑ ।
अ॒या । व॒र्ध॒स्व॒ । त॒न्वा॑ । गि॒रा । मम॑ । आ । जा॒ता ।
सु॒क्र॒तो॒ इति॑ सुऽक्रतो । पृ॒ण ॥ १८ ॥

हे इन्द्र अध अधुना ज्मः जमन्ति गच्छत्यस्यामिति ज्मा पृथिवी तस्याः सकाशात् अथवा अपिवा दिवोन्तरिक्षात् बृहतोमहतोरोचनात् नक्षत्रैर्दीप्यमानात्स्वर्गाद्वा आगत्य अधिः

पञ्चम्यर्थानुवादी अया अनया तन्वा तया विस्तृतया मम मदीयया गिरा स्तुत्या वर्धस्व वृद्धो-भव हे सुक्रतो शोभनकर्मवन्निन्द्र जाता जातान् अस्मदीयान् जनान् आपृण अभिलषितैः फलैरापूरय ॥ १८ ॥

अथैकोनविंशी–

इन्द्रा॑यसु॒म॒दिन्त॑म॒ंसोमं॑सोता॒वरे॑ण्यम् ।
श॒क्रए॑णंपीपय॒द्विश्वं॑याधि॒या॑हिन्वा॒नंन॑वा॒ज॒युम् ॥ १९ ॥

इन्द्रा॑य । सु । म॒दिन्ऽत॑मम् । सोम॑म् । सो॒त॒ । वरे॑ण्यम् ।
श॒क्रः । ए॒न॒म् । पी॒प॒य॒त् । विश्व॑या । धि॒या । हि॒न्वा॒नम् ।
न । वा॒ज॒ऽयुम् ॥ १९ ॥

हे अध्वर्यवः इन्द्रायेन्द्रार्थं मदिन्तमं मादयितृतमं वरेण्यं वरणीयं भजनीयं सोमं सु सोत सुष्ठु अभिषुणुत । कुतइत्यत आह शक्र इन्द्रः विश्वया धिया सर्वया क्रिययाभिष्टोमादिलक्षणया हिन्वानं प्रीणयन्तं वाजयुं अन्नमात्मनइच्छन्तं एनं यजमानं नेति सम्प्रत्यर्थीयः संप्रति पीपयत् वर्धयति अतःकारणात् तस्माइन्द्राय सोमं सुनुतेत्यर्थः ॥ १९ ॥

अथ विंशी–

मात्वा॒सोम॑स्य॒गल्द॑या॒सदा॒याच॑न्न॒हंगि॒रा ।
भूर्णि॑मृ॒गंनसव॑नेषु॒चुक्रु॒धंकई॑शा॑नं॒नया॑चिषत् ॥ २० ॥ १३ ॥

मा । त्वा॒ । सोम॑स्य । गल्द॑या । सदा॑ । याच॑न् । अ॒हम् ।
गि॒रा । भूर्णि॑म् । मृ॒गम् । न । सव॑नेषु । चु॒क्रु॒ध॒म् । कः ।
ई॑शा॑नम् । न । या॒चि॒ष॒त् ॥ २० ॥ १३ ॥

हे इन्द्र त्वां सवनेषु यज्ञेषु सोमस्य गल्दया गालनेन आस्रावणेन गिरा स्तुत्या च युक्तो-हं सदा सर्वदा याचन् याचमानः सन् माचुक्रुधं माक्रोधयानि बहुशोयाच्यमाने त्वयि क्रोधोजायते तं सोमस्यगालनेन स्तुत्याचापनयामीत्यर्थः । कीदृशं त्वां भूर्णिं भर्तारं मृगंन सिंहमिव भीमं । स्वामिनइन्द्रस्य याचने लौकिकन्यायं दर्शयति लोके कोवापुरुषः ईशानं ईश्वरं स्वामिनं न याचिषत् न याचेत सर्वएवहि याचते अतोहमपि त्वां स्वामिनं याचइति भावः ॥ २० ॥

॥ इति पञ्चमस्य सप्तमे त्रयोदशोवर्गः ॥ १३ ॥

अथैकविंशी—

मदेनेषितंमदमुग्रमुग्रेणशवसा ।
विश्वेषांतरुतारंमदच्युतंमदेहिष्मादतिनः ॥ २१ ॥

मदेन । इषितम् । मदम् । उग्रम् उग्रेण । शवसा । विश्वेषाम् ।
तरुतारम् । मदऽच्युतम् । मदे । हि । स्म । ददाति । नः ॥ २१ ॥

मदेन मादयित्रा स्तोत्रा इषितं प्रेषितं मदं मदकरं उग्रं सोमं उद्गूर्णरसं उग्रेण उद्गूर्णेनाधिकेन शवसा बलेन युक्तइन्द्रः पिबत्विति शेषः । पीत्वाच विश्वेषां सर्वेषां शत्रूणां तरुतारं तरीतारं जेतारं मदच्युतं मदस्य शत्रूणां गर्वस्य च्यावयितारं पुत्रं मदे सोमपानेन जनितेहर्षेसति नोस्मभ्यंददातिहिष्म ददाति खलु अतः सोमं पिबत्वित्यर्थः ॥ २१ ॥

अथ द्वाविंशी—

शेवारेवार्यापुरुदेवोमर्तायदाशुषे ।
ससुन्वतेचस्तुवतेचरासतेविश्वगूर्तोअरिष्टुतः ॥ २२ ॥

शेवारे । वार्या । पुरु । देवः । मर्ताय । दाशुषे । सः । सुन्वते । च ।
स्तुवते । च । रासते । विश्वऽगूर्तः । अरिऽस्तुतः ॥ २२ ॥

शेवारे शेवं सुखं तस्यगमके यज्ञे दाशुषे चरुपुरोडाशादीनिदत्तवते यजमानाय पुरु पुरूणि बहूनि वार्या वरणीयानि धनानि देवोदानादिगुणयुक्तइन्द्रः रासते ददाति सएव सुन्वते च सोमाभिषवं कुर्वते च स्तुवते च स्तोत्रं कुर्वते च धनानि रासते ददाति । कीदृशः सः विश्वगूर्तः विश्वेषु सर्वेषु कार्येषूद्यतः स्वतः प्रवृत्तः अरिष्टुतः अरिभिः प्रेरयिद्भिः प्रशस्तः ॥ २२॥

अथ त्रयोविंशी—

एन्द्रयाहिमत्स्वचित्रेणदेवराधसा ।
सरोनप्रास्युदरंसपीतिभिरासोमेभिरुरुस्फिरम् ॥ २३ ॥

आ । इन्द्र । याहि । मत्स्व । चित्रेण । देव । राधसा । सरः । न ।
प्रासि । उदरम् । सपीतिऽभिः । आ । सोमेभिः । उरु । स्फिरम् ॥ २३॥

हे इन्द्र आयाहि आगच्छ हे देव द्योतमान चित्रेण दर्शनीयेन राधसा धनेनसोमलक्षणेन मत्स्व माद्य सपीतिभिः मरुद्भिः सह पीयमानैः सोमेभिः सोमैः उरु विस्तीर्णं स्फिरं वृद्धं उदरं आत्मीयं जठरं सरोन सरइव आपप्रासि आपूरय। प्रापूरणे आदादिकः ॥ २३ ॥

चातुर्विंशिकेहनि माध्यन्दिने ब्रह्मशस्त्रे आत्वेति वैकल्पिकः स्तोत्रियस्तृचः सूत्र्यतेहि-आत्वासहस्रमाशतं ममत्वासुरउदितेइति ब्राह्मणाच्छंसिनइति।

तत्र प्रथमा सूक्ते चतुर्विंशी—

आत्वा॒स॒ह॒स्र॒माश॒तंयु॒क्तार॒थे॑हि॒र॒ण्यये॑।
ब्र॒ह्म॒यु॒जो॒हर॑यइन्द्रके॒शिनो॒वह॑न्तु॒सोम॑पीतये ॥ २४ ॥

आ। त्वा॒। स॒ह॒स्र॑म्। आ। श॒तम्। यु॒क्ताः। रथे॑। हि॒र॒ण्यये॑।
ब्र॒ह्म॒ऽयुज॑ः। हर॑यः। इ॒न्द्र॒। के॒शिन॑ः। वह॑न्तु। सोम॑ऽपीतये॥२४॥

हे इन्द्र त्वा त्वां सहस्रं सहस्रसंख्याका हरयस्त्वदीयाअश्वाः आवहन्तु आनयंतस्मद्यज्ञं तथा शतं शतसंख्याकाश्च भवदीयाः अश्वाः त्वामावहन्तु। यद्यपि द्वावेवास्यहरी तथापि तद्विभूतयोन्येपि बहवोश्वाः सन्ति। ननु युगपदनेकैरश्वैः कथं यातुं शक्यतइत्यतआह युक्ताइति हिरण्यये हिरण्मये स्वर्णविकारे हिरण्यशब्दाद्विकारार्थे विहितस्यमयटः ऋत्व्यवास्त्वेत्यादौ मलोपोनिपात्यते तादृशे रथे युक्ताः संबद्धाः बहूनामश्वानां शीघ्रगमनाय रथेविनियुक्तत्वात् युगपदेव सर्वैरश्वैर्गन्तुं शक्यतइतिभावः। कीदृशाहरयः ब्रह्मयुजः ब्रह्मणापरिवृढेनेन्द्रेण युक्ताः यद्वा ब्रह्मणास्मदीयेनस्तोत्रेण अस्माभिर्दत्तेन हविषा वा युक्ताः केशिनः केशाः केसराः तैर्युक्ताः। किमर्थमिन्द्रस्य वहनं तत्राह सोमपीतये सोमस्य पानाय यथास्मदीयं सोमं पिबेत् अतआवहन्त्वित्यर्थः ॥ २४ ॥

अथ पञ्चविंशी—

आत्वा॒रथे॑हि॒र॒ण्यये॒हरी॑म॒यूर॑शेप्या।
शि॒ति॒पृ॒ष्ठाव॑हतां॒मध्वो॒अन्ध॑सोवि॒वक्ष॑णस्यपी॒तये॑॥२५॥१४॥

आ। त्वा। रथे। हिरण्यये। हरी इति। मयूरऽशेप्या।
शितिऽपृष्ठा। वहताम्। मध्वः। अन्धसः।
विवक्षणस्य। पीतये॥ २५॥ १४॥

पूर्वं हर्योर्विभूतिरूपा अश्वाइन्द्रमावहन्त्विति प्रार्थितम् अधुना तावेवेन्द्रमावहतामितिप्रार्थ्यते हिरण्यये हिरण्मये रथे युक्तौ मयूरशेप्या मयूरशेपौ मयूरवर्णे शेपे ययोस्तौ सुपांसुलुगिति विभक्तेडर्चादेशः शितिपृष्ठा श्वेतपृष्ठौ एवंभूतौ अश्वौ हे इन्द्र त्वामावहतां। किमर्थं मध्वोमधुररसस्य विवक्षणस्य वक्तुमिष्टस्य स्तुत्यस्य यद्वा वोढव्यस्य प्राप्तव्यस्य अन्धसोन्नस्य सोमरूपस्य पीतये पानार्थम्॥ २५॥

॥ इति पञ्चमस्य सप्तमे चतुर्दशोवर्गः॥ १४॥

अथ षड्विंशी—

पिबात्व१ंस्यगिर्वणःसुतस्यपूर्वपाइंव।
परिष्कृतस्यरसिनंइयमासुतिश्चारुर्मदायपत्यते॥ २६॥

पिब। तु। अस्य। गिर्वणः। सुतस्य।
पूर्वपाःऽइव। परिऽकृतस्य। रसिनः। इयम्। आऽसुतिः।
चारुः। मदाय। पत्यते॥ २६॥

हे गिर्वणः गीर्भिर्वननीय स्तुतिभिः संभजनीयेन्द्र सुतस्याभिषुतस्य अस्यसोमस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः सम्प्रदानत्वात् चतुर्थ्यर्थे षष्ठी इममभिषुतं सोमं तु क्षिप्रं पिब अत्र दृष्टान्तः—पूर्वपाइव पूर्वः सर्वेभ्योदेवेभ्यः प्रथमभावीसन् पिबतीति पूर्वपा वायुः सत्येन्द्रवायवे मुख्येमहे सर्वेभ्योदेवेभ्यः पूर्वं पिबति तद्वत्पूर्वं पिबेत्यर्थः कीदृशस्य सोमस्य परिष्कृतस्य अभिषवादिभिः संस्कृतस्य संपर्युपेभ्यइति करोतेर्भूषणेसुट्। परिनिविभ्यइतिसुटःषत्वं रसिनोरसवतः अपिच इयमासुतिः अयमासवोमदकरः चारुः शोभनः सोमरसः मदाय हर्षाय हर्षजननाय पत्यते संपद्यते। पत्लृगतौ यद्वा पत्यतिरैश्वर्यकर्मा मदाय मदस्य पत्यते ईष्टे-मदोत्पादने··शक्तइत्यर्थः॥ २६॥

अथ सप्तविंशी—

यएकोअस्तिदंसनामहाँउग्रोअभिव्रतैः ।
गमत्सशिप्रीनसयोषदागमद्धवंनपरिवर्जति ॥ २७॥

यः । एकः । अस्ति । दंसना । महान् । उग्रः ।
अभि । व्रतैः । गमत् । सः । शिप्री । न । सः । योषत् ।
आ । गमत् । हवम् । न । परि । वर्जति ॥ २७ ॥

यइन्द्रएकः केवलः असहायएव व्रतैरात्मीयैः कर्मभिः अभ्यस्ति शत्रूनभिभवति यश्च दंसना कर्मणा महान् अधिकः अएव उग्र उद्गूर्णबलः शिप्री शिप्रं शिरस्त्राणं प्रशंसायामिनिः शोभनशिरस्त्राणः यद्वा शिप्रे हनूनासिकेवा तद्वान् सइन्द्रः गमत् गच्छतु प्राप्नोतु । सर्वदा स-तादृशो न योषत् नपृथग्भवतु न वियुक्तोभवतु । गमेर्यौतेश्चलेट्यडागमः इतश्चलोपइतीकारलोपः गमेर्बहुलंछन्दसीति शपोलुक् यौतेः सिब्बहुलमितिसिप् । हवमस्मदीयं स्तोत्रंच आगमत् अ-भिगच्छतु प्राप्नोतु नपरिवर्जति नपरिवर्जयतु नपरित्यजतु सर्वदा अस्मानस्मदीयं स्तोत्रं चेन्द्रः प्राप्नोत्वितियावत् ॥ २७ ॥

अथाष्टाविंशी—

त्वंपुरंचरिष्ण्वंवधैःशुष्णस्यसंपिणक् ।
त्वंभाअनुचरोअधद्वितायदिन्द्रहव्योभुवः ॥ २८ ॥

त्वम् । पुरम् । चरिष्ण्वम् । वधैः । शुष्णस्य ।
सम् । पिणक् । त्वम् । भाः । अनु । चरः । अध ।
द्विता । यत् । इन्द्र । हव्यः । भुवः ॥ २८ ॥

हे इन्द्र त्वं शुष्णस्य शोषकस्यासुरस्य चरिष्ण्वं चरणशीलं वाछन्दसीति अमिपूर्वरूप-त्वस्यविकल्पितत्वाद्यणादेशः । पुरं निवासस्थानं वधैर्वज्रादिभिरायुधैः संपिणक् समचूर्णयः अभांक्षीरित्यर्थः पिनष्टेर्लङि मध्यमैकवचनेरूपमेतत् । अध अपिच भाः भासमानस्त्वं अनुचरः तं शुष्णं हन्तुं अन्वगच्छः । यद्वा अध शुष्णस्य पुरभेदनानन्तरं भाः दीप्तीस्त्वमनुचरः अन्वगच्छः प्राप्तवानित्यर्थः । हे इन्द्र त्वं यद्यदा द्विता द्विधा द्विविधैः स्तोतृभिर्यष्टृभिश्च हव्योह्वातव्यो-

भुवः भवेः तदानीं त्वं शुष्णस्य पुरं संपिणगित्यन्वयः भवतेर्लेटिसिप्यडागमः छान्दसः शपोलुक् भूसुवोस्तिङीतिगुणप्रतिषेधादुवङ् ॥ २८॥

चातुर्विंशिकेहनि माध्यन्दिनेसवने ब्रह्मशस्त्रे ममत्वेति वैकल्पिकोनुरूपस्तृचः सूत्रन्तु पूर्वमुदाहृतम् ।

तत्र प्रथमा सूक्ते एकोनविंशी–

ममं॑त्वा॒सूर॒उदि॑ते॒मम॑म॒ध्यन्दि॑नेदि॒वः ।
मम॑प्रपि॒त्वेअ॑पिशर्व॒रेव॑स॒वास्तोमा॑सोअवृत्सत ॥ २९॥

मम॑ । त्वा॒ । सूरे॑ । उत्ऽइ॑ते । मम॑ । म॒ध्यन्दि॑ने । दि॒वः ।
मम॑ । प्र॒ऽपि॒त्वे । अ॒पि॒ऽश॒र्व॒रे । व॒सो॒ इति॑ । आ ।
स्तोमा॑सः । अ॒वृ॒त्स॒त॒ ॥ २९ ॥

सूरे सूर्ये उदिते उदयं प्राप्ते पूर्वाह्णसमये मम स्तोमासः स्तोत्राणि हे वसो वासकेन्द्र त्वां आवृत्सत आवर्तयन्तु अस्मदभिमुखं गमयन्तु । तथा दिवोदिवसस्य मध्यन्दिने मध्याह्नेपि मदीयाः स्तोमासः स्तोमाः त्वामावर्तयन्तु । तथा प्रपित्वे प्राप्ते दिवसस्यावसाने सायाह्नेपि मदीयाः स्तोमाः त्वामावर्तयन्तु । अपिशर्वरे शर्वरीं रात्रिमपि गतः कालोपि शर्वरः शार्वरेकालेपि मदीयाः स्तोमाः त्वामावर्तयन्तु ॥ २९ ॥

अथ त्रिंशी–

स्तु॒हिस्तु॒हीदे॒तेघा॑ते॒मंहि॑ष्ठासोम॒घोना॑म् ।
नि॒न्दि॒ताश्वः॑प्रप॒थीप॑र॒म॒ज्याम॒घस्य॑मेध्यातिथे ॥३०॥१५॥

स्तु॒हि । स्तु॒हि । इत् । ए॒ते । घ॒ । ते॒ । मंहि॑ष्ठासः ।
म॒घोना॑म् । नि॒न्दि॒तऽअ॑श्वः । प्र॒ऽप॒थी । प॒र॒म॒ऽज्याः ।
म॒घस्य॑ । मे॒ध्य॒ऽअ॒ति॒थे॒ ॥ ३० ॥ १५ ॥

आसङ्गोराजर्षिर्मेध्यातिथये बहुधनं दत्वा तमृषिं दत्तदानस्य स्वस्य स्तुतौ प्रेरयति हे मेध्यातिथे मप्राहातिथे एतत्संज्ञकर्षे स्तुहिस्तुहीत् पुनःपुनरस्मान्प्रशंसैव मोदस्व औदासीन्यं माकार्षीः एते घ एतेखलु वयं मघोनां धनवतां मध्ये ते तुभ्यं मघस्य धनस्य मंहिष्ठासोदातृत-

माः अतोस्मान्स्तुहीत्यर्थः। कासौ स्तुतिः तामाह निन्दिताश्वः यस्यवीर्येण परेषामश्वानिन्दिताः कुत्सिताभवन्ति तादृशः प्रपथीः प्रकृष्टः पन्थाः प्रपथः तद्वान् सन्मार्गवर्तीत्यर्थः परमज्याः उत्कृष्टज्यः अनेन धनुरादिकं लक्ष्यते उत्कृष्टायुधइत्यर्थः यद्वा परमानुत्कृष्टान् शत्रून् जिनाति हिनस्तीति परमज्याः ज्यावयोहानौ अस्माद्दातोमनिन्निति विच् एवंभूतोहमासङ्गइति स्तुहीत्यर्थः ॥ ३० ॥

॥ इति पञ्चमस्य सप्तमे पञ्चदशोवर्गः ॥ १५ ॥

अथैकत्रिंशी–

आयदश्वान्वनन्वतःश्रद्धयाहंरथेंरुहम् ।
उतवामस्यवसुनश्चिकेततियोअस्तियाद्वःपशुः ॥ ३१ ॥

आ । यत् । अश्वान् । वनन्ऽवतः । श्रद्धया । अहम् ।
रथे । रुहम् । उत । वामस्य । वसुनः । चिकेतति ।
यः । अस्ति । याद्वः । पशुः ॥ ३१ ॥

वनन्वतोवननवतः संभक्तवतः अश्वांस्तुरगान् अहं मायोगिः श्रद्धया आदरातिशयेन युक्तःसन् यद्यदा हे मेध्यातिथे त्वदीयेरथे आरुहं आरोहयं रुहेरन्तर्भावितण्यर्थात् लुङि कृमृदृरुहिभ्यइति च्लेरङादेशः। तदानीं मामेवं स्तुहि। उतापिच प्रकृतस्तुत्यपेक्षएषसमुच्चयः वामस्य वननीयस्य वसुनोधनस्य पूर्ववत्कर्मणिषष्ठी ईदृशं धनं चिकेतति एषआसङ्गोदातुंजानाति याद्वः यदुवंशोद्भवः यद्वा यदवोमनुष्याः तेषु प्रसिद्धः पशुः लुप्तमत्वर्थमेतत् पशुमान् यद्वा पशुः पश्यते सूक्ष्मस्य द्रष्टा यआसङ्गोस्ति विद्यते एषचिकेततीत्यन्वयः॥ ३१ ॥

अथ द्वात्रिंशी–

यआत्मामह्यंमामहेसहत्वचाहिरण्ययां ।
एषविश्वान्यभ्यंस्तुसौभगासंगस्यस्वनद्रथः ॥ ३२ ॥

यः । ऋज्रा । मह्यम् । मुमहे । सुह । त्वचा ।
हिरण्ययां । एषः । विश्वानि । अभि । अस्तु । सौभंगा ।
आऽसंगस्य । स्वनत्ऽरथः ॥ ३२ ॥

एवमेवं मां स्तुहीत्यासंगोमेध्यातिथिंब्रूते यः आसङ्गस्यात्मा ऋज्रा गमनशीलानि धनानि हिरण्यया हिरण्मय्या त्वचा चर्मणा आस्तरणेन सह सहितानि मह्यं मेध्यातिथये ममहे ददौ मंहतिर्दानकर्मा एषआसङ्गस्यात्मा स्वनद्रथः शब्दायमानरथः सन् विश्वानि व्याप्तानि सौभगानि धनानि शत्रूणां स्वभूतानि अभ्यस्तु अभिभवतु ॥ ३२ ॥

अथ त्रयस्त्रिंशी–

अधप्लायोगिरतिदासदन्यानासङ्गोअग्नेदशभिःसहस्रैः ।
अधोक्षणोदशमह्यंरुशन्तोनळाइवसरसोनिरतिष्ठन् ॥३३॥

अध । प्लायोगिः । अति । दासत् । अन्यान् । आऽसङ्गः । अग्ने ।
दशऽभिः । सहस्रैः । अध । उक्षणः । दश । मह्यम् । रुशन्तः ।
नळाःऽइव । सरसः । निः । अतिष्ठन् ॥ ३३ ॥

अध अपिच प्लायोगिः प्लयोगनाम्नः पुत्रआसङ्गोनामराजा दशभिः दशगुणितैः सहस्रैः सहस्रसंख्याकैः गवादिभिः अन्यान् दातॄन् अतिदासत् अतिक्रम्य ददाति अधानन्तरं उक्षणः सेचनसमर्थाः मह्यं आसंगेनदत्ताः रुशन्तोदीप्यमानाः दश दशगुणितसहस्रसंख्याकाः ते गवादयः नळाइव नळास्तटाकोद्भवास्तृणविशेषाः ते यथा सरसः तटाकात् संघशोनिर्गच्छन्ति तथैव मह्यं दत्तागवादयः अस्मादासङ्गान्निरतिष्ठन् निर्गत्य अवास्थिषत एवमेवंप्रकारेण मां स्तुहीति मेध्यातिथिं प्रत्युक्तत्वात् एतासां चतसृणामृचां प्लायोगिरासङ्गऋषिः सएवदेवतेत्येतदुपपन्नं भवति ॥ ३३ ॥

अथ चतुस्त्रिंशी–

अन्वस्यस्थूरंददृशेपुरस्तादनस्थऊरुरवरम्बमाणः ।
शश्वतीनार्यभिचक्ष्याहसुभद्रमर्यभोजनंबिभर्षि ॥ ३४ ॥ १६ ॥

अनु । अस्य । स्थूरम् । दहशे । पुरस्तात् । अनस्थः । ऊरुः ।
अवऽरम्बमाणः । शश्वती । नारी । अभिऽचक्ष्य । आह ।
सुऽभद्रम् । अर्य । भोजनम् । बिभर्षि ॥ ३४ ॥ १६ ॥

अयमासंगोराजा कदाचिद्देवशापेन नपुंसकोबभूव तस्यपत्नी शश्वती भर्तुर्नपुंसकत्वेन खिन्नासती महत्तपस्तेपे तेन च तपसा सच पुंस्त्वं प्राप प्राप्तपुंव्यंजनंतं रात्रावुपलभ्य प्रीता शश्वती अनया तं अस्तौत् अस्यासंगस्य पुरस्तात्पुरोभागे गुह्यदेशे स्थूरं स्थूलं वृद्धं सत् पुंव्यंजनं अनु ददृशे अनुदृश्यते अनस्थः अस्थिरहितः सचावयवः ऊरुः उरुर्विस्तीर्णः अवरम्बमाणः अतिदीर्घत्वेन अवाङ्मुखं लंबमानः यद्वा ऊरुः सुपांसुलुगिति द्विवचनस्यलुः ऊरू प्रति अवलम्बमानोभवति शश्वती नामाङ्गिरसःसुता नारी तस्यासंगस्य भार्याभिचक्ष्य एवं भूतमवयवं निशि दृष्ट्वा हे अर्य स्वामिन् भर्तः सुभद्रं अतिशयेन कल्याणं भोजनं भोगसाधनं बिभर्षि धारयसीत्याह ब्रूते ॥ ३४ ॥

॥ इति पञ्चमस्य सप्तमे षोडशोवर्गः ॥ १६ ॥

इदंवसोइति द्विचत्वारिंशदृचं द्वितीयं सूक्तं काण्वस्य मेध्यातिथेःआङ्गिरसस्यच प्रियमेधस्यार्षं शिक्षाविभिन्दइत्यादिके द्वे मेधातिथेरेव । स्वादवःसोमाइत्येषानुष्टुप् शिष्टागायत्र्यः इन्द्रोदेवता अंत्येद्वेऋचौ विभिन्दोर्दानस्तुतित्वात्तद्देवताके तथाचानुक्रान्तम्—इदंवसोद्विचत्वारिंशान्मेध्यातिथिराङ्गिरसश्च प्रियमेधः स्वादवोनुष्टुबन्त्याभ्यां मेधातिथिर्विभिन्दोर्दानं तुष्टावेति । गतःसूक्तविनियोगः । ज्योतिष्टोमे मरुत्वतीये आद्यस्तृचोनुचरः सूत्र्यतेहि—इदंवसोसुतमन्धइति मरुत्वतीयस्य प्रतिपदनुचराविति । द्वितीये रात्रिपर्याये ब्रह्मशस्त्रे अयमेवस्तोत्रियस्तृचः सूत्रितश्च—इदंवसोसुतमन्धइन्द्रेहिमत्स्यन्धसइति अयमेवचतुर्थेहन्यपि मरुत्वतीयस्यानुचरस्तृचः सूत्रितश्च—तंत्वायज्ञेभिरीमहइदंवसोसुतमन्धइति मरुत्वतीयस्यप्रतिपदनुचराविति ।

तत्र प्रथमा—

इदंवसोसुतमन्धःपिबासुपूर्णमुदरम् । अनाभयिन्ररिमाते ॥ १ ॥

इदम् । वसो इति । सुतम् । अन्धः । पिब । सुऽपूर्णम् ।
उदरम् । अनाभयिन् । ररिम । ते ॥ १ ॥

हे वसो वासयितरिन्द्र इदं पुरोवर्तमानं सुतमभिषुतं अन्धोन्नं सोमलक्षणं पिब यथा उदरं त्वदीयं जठरं सुपूर्णं अतिशयेन संपूर्णं भवति तथेत्यर्थः। हे अनाभयिन् आसमन्ताद्बिभेतीत्याभयी बिभेतेरौणादिकइनिः न आभयी अनाभयी तादृश हे इन्द्र ते तुभ्यं त्वदर्थं ररिम उक्तलक्षणं सोमं दद्मः रादाने छान्दसोलिट् ॥ १ ॥

अथ द्वितीया–

नृभिर्धूतःसुतोअश्नैरव्योवारैःपरिपूतः। अश्वोननिक्तोनदीषु ॥२॥

नृऽभिः। धूतः। सुतः। अश्नैः। अव्यः। वारैः।
परिऽपूतः। अश्वः। न। निक्तः। नदीषु ॥ २ ॥

नृभिः अध्वरस्य नेतृभिः ऋत्विग्भिः धूतः आधूतः अदाभ्यग्रहे आधवनेन संस्कृतः अश्नैः अश्मभिर्ग्रावभिः करणभूतैः सुतः अध्वर्युभिरभिषुतः अव्यः अवेर्मेषस्य वारैर्वालैः परिपूतः। दशापवित्रस्य नाभिं कुरुते शुल्कं वलक्ष्याः पवित्रममोतं भवतीति । नदीषु नदनास्वप्सु अश्वोन अश्वइव निक्तः निर्णिक्तः शोधितः यथा अप्सुस्नातोश्वः अपगतमलः सन् दीप्तोभवति एवं वसतीवर्याख्याभिरद्भिः अभिषुतः सोमः दीप्तोभवतीत्यर्थः ईदृशोयः सोमः तंतेयवमित्युत्तरया संबन्धः ॥ २ ॥

अथ तृतीया–

तंतेयवंयथागोभिःस्वादुमकर्मश्रीणन्तः। इन्द्रत्वास्मिन्त्सधमादे ॥३॥

तम्। ते। यवम्। यथा। गोभिः। स्वादुम्। अकर्म।
श्रीणन्तः। इन्द्र। त्वा। अस्मिन्। सधऽमादे ॥ ३ ॥

तं पूर्वोक्तगुणं सोमं हे इन्द्र ते त्वदर्थं यवं यथायवमयं सवनीयपुरोडाशमिव गोभिर्गविभवैः क्षीरादिभिः श्रयणद्रव्यैः श्रीणन्तः मिश्रीकुर्वन्तः स्वादुं रसत्वेन स्वादनीयमकर्म अकार्ष्म करोतेर्लुङि मन्त्रेघसेति च्लेर्लुक्। यस्मादेवं तस्मात् हे इन्द्र त्वा त्वां तादृशं सोमं पातुं अस्मिन्वर्तमाने सधमादे सहमदने यज्ञे आह्वयामीतिशेषः ॥ ३ ॥

महाव्रतेनिष्केवल्ये गायत्रतृचाशीतौ इन्द्रइत्सोमपाइत्येतदादि सूक्तशेषः शंसनीयः अ-न्त्यास्तिस्रोवर्जयित्वा तत्रापि स्वादवइत्येतांपरित्यज्य तत्रस्थाने नव्य१न्यंचळाकरमित्येतामाव-पेत् तथैव पञ्चमारण्यके सूत्रितम्—इन्द्रइत्सोमपाएकइत्येतत्प्रभृतीनां तिस्रउत्तमाउद्धरति ता-सां स्वादवःसोमाआयाहीत्येतामुद्धृत्य नव्य१न्यंचळाकरमित्येतां प्रत्यवदधातीति । पञ्चमेहनि मरुत्वतीये इन्द्रइदित्यनुचरस्तृचः सूत्र्यतेहि—इन्द्रइत्सोमपाएकइति मरुत्वतीयस्य प्रतिपदनु-चराविति ।

तत्र प्रथमा सूक्ते चतुर्थी—

इन्द्रइत्सोमपाएकइन्द्रःसुतपाविश्वायुः । अन्तर्देवान्मर्त्यांश्च ॥४॥

इन्द्रः । इत् । सोमऽपाः । एकः । इन्द्रः । सुतऽपाः ।
विश्वऽआयुः । अन्तः । देवान् । मर्त्यान् । च ॥ ४ ॥

इन्द्रइत् इन्द्रएकएव देवान्मर्त्यान्मनुष्यांश्च अन्तर्मध्ये देवेषु मनुष्येषु च मध्ये सोमपाः कृत्स्नस्य सोमस्य पाता नान्ये । तेत्वेकदेशभाजः अतएव सुतपाः सुतस्याभिषुतस्यास्मदीयस्य सोमस्य कार्त्स्न्येन पाता इन्द्रएकएव विश्वायुः सचेन्द्रः सर्वान्नोभवति धानाकरंभादिहवींषि सावनेष्विन्द्रायैव हूयन्ते तदभिप्रायेणेदमुच्यते अतएवंविधइन्द्रः अस्मदीयं हविः स्वीकरोत्वि-त्यर्थः ॥ ४ ॥

अथ पञ्चमी—

नयंशुक्रोनदुराशीर्नतृप्राउरुव्यचसम् । अपस्पृण्वतेसुहार्दम् ॥५॥१७॥

न । यम् । शुक्रः । न । दुःऽआशीः । न । तृप्राः ।
उरुऽव्यचसम् । अपऽस्पृण्वते । सुऽहार्दम् ॥ ५ ॥ १७ ॥

उरुव्यचसं विस्तीर्णव्यापनं सुहार्दं सुहृदयं यमिन्द्रं शुक्रः रसाधिक्येन दीप्तः सोमः नापस्पृणुते स्पृप्रीतिबलयोः अत्रोपसर्गवशात् प्रीत्यभावे वर्तते नञाच प्रीत्यभावोनिवार्यते न-प्रीणयतीति न अपितु प्रीणयत्येव । तथा दुराशीः दुःखेन निष्पाद्याआशीः आश्रयणद्रव्यं यस्य

तार्तीयसवनिकस्य सोमस्य सोपि यमिन्द्रं नापस्पृणुते प्रीणयत्येव तृप्ताः तर्पकाः अन्ये चरुपुरोडाशादयश्च यमिन्द्रं नापस्पृण्वते न न प्रीणयन्ति अपितु प्रीणयन्त्येव । तमिन्द्रं स्तुमइति शेषः । यद्वा अपेत्युपसर्गोधात्वर्थानुवादकः यमिन्द्रंशुक्रादयोनापस्पृण्वते न प्रीणयन्ति उरुव्यचसमिति हेतुगर्भविशेषणं यतोयमिन्द्र उरुव्यचाः विस्तीर्णव्याप्तिकः अतः कारणात् अपर्याप्ताः सन्तः शुक्रादयः प्रीणयितुं नशक्नुवन्तीति भावः ॥ ५ ॥

॥ इति पञ्चमस्य सप्तमे सप्तदशोवर्गः ॥१७॥

अथ षष्ठी—

गोभिर्यदीमन्येअस्मन्मृगंनव्रामृगयन्ते । अभित्सरन्तिधेनुभिः ॥ ६ ॥

गोभिः । यत् । ईम् । अन्ये । अस्मत् । मृगम् । न । व्राः ।
मृगयन्ते । अभिऽत्सरन्ति । धेनुऽभिः ॥ ६ ॥

यत् ये अस्मत् अस्मत्तोन्ये ऋत्विग्यजमानाः ईमेनमिन्द्रं गोभिः गविभवैः क्षीरादिभिः संस्कृतैः सोमैः सहिताः सन्तोमृगयन्तेअन्विष्यन्ते तत्रदृष्टान्तः—व्राः वरीतारः जालादिभिरुपायैर्निरुन्धाना व्याधाः मृगं न यथा मृगं अन्विष्यन्ति तद्वदनधिकारिणएव बलादिन्द्रस्यान्वेषणे वर्तन्तइत्यर्थः । मृगअन्वेषणे इति धातुः येच जनाः धेनुभिः धेनुरिति वाङ्नाम वाग्भिः स्तुतिभिश्च अभित्सरन्ति अभिमुखं कुत्सितं गच्छन्ति सम्यक् स्तोतुं नशक्नुवन्तीत्यर्थः त्सर छद्मगतौ तथाविधाजनायमिन्द्रं नोपलभन्तइत्यर्थः ॥ ६ ॥

दशरात्रेतृतीयेहनि मरुत्वतीयस्य त्रयइन्द्रस्येतितृचोनुचरः सूत्र्यतेहि—तन्तमिद्राधसेमहे त्रयइन्द्रस्यसोमाइति मरुत्वतीयस्य प्रतिपदनुचराविति ।

तृचे प्रथमा सूक्ते सप्तमी—

त्रयइन्द्रस्यसोमाःसुतासःसन्तुदेवस्य । स्वेक्षयेसुतपाव्नः ॥ ७ ॥

त्रयः । इन्द्रस्य । सोमाः । सुतासः । सन्तु ।
देवस्य । स्वे । क्षये । सुतऽपाव्नः ॥ ७ ॥

देवस्य दानादिगुणयुक्तस्येन्द्रस्य पानार्थं त्रयः सवनत्रयरूपेण त्रिधा वर्तमानाः सोमाः स्वेक्षये स्वकीये यज्ञगृहे सुतासोऽभिषुताः सन्तु भवन्तु सुतपावः हेतुगर्भविशेषणमेतत् यस्माद्यमिन्द्रः अभिषुतस्यैव सोमस्य पाता तस्मादभिषुताः सन्त्वित्यर्थः ॥ ७॥

अथाष्टमी—

त्रयः॑कोशा॑सश्श्चोतन्ति॒ति॒स्रश्च॒म्व१॑ःसु॒पूर्णाः॑ । स॒मा॒नेअधि॒भार्म॑न् ॥ ८॥

त्रयः॑ । कोशा॑सः । श्चो॒त॒न्ति॒ । ति॒स्रः । च॒म्वः॑ ।
सु॒ऽपूर्णाः॑ । स॒मा॒ने । अधि॑ । भार्म॑न् ॥ ८ ॥

त्रयः त्रिसंख्याकाः कोशासः कोशाः सोमस्याश्रयभूताः द्रोणकलशपूतभृदाधवनीयाख्याः श्चोतन्ति क्षरन्ति इन्द्रार्थं सोमं स्रावयन्ति तिस्रः त्रिविधाः सवनत्रयेवर्तमानाः चम्वः चमसाश्च सुपूर्णाः इन्द्रयागाय सोमैः सुपूरिता आसन् एतत्सर्वं कुत्रेतिचेत् उच्यते समाने एकस्मिन्नेव भार्मन् भर्मणि भरे ऋत्विग्भिर्भ्रियमाणे यज्ञे अधिः सप्तम्यर्थानुवादी ॥ ८ ॥

अथ नवमी—

शुचि॑रसिपुरु॒नि॒ष्ठाःक्षी॒रैर्म॑ध्य॒तआशी॑र्तः । द॒ध्नामन्दि॑ष्ठ॒ःशूर॑स्य ॥ ९॥

शुचि॑ः । अ॒सि॒ । पु॒रु॒नि॒ःऽस्थाः । क्षी॒रैः । म॒ध्य॒तः ।
आऽशी॑र्तः । द॒ध्ना । मन्दि॑ष्ठः । शूर॑स्य ॥ ९ ॥

हे सोम त्वं शुचिरसि दशापवित्रेण शोधितोभवसि सत्वं पुरुनिष्ठाः पुरुषु बहुषु पात्रेषु ग्रहचमसादिषु निःशेषेणस्थाता मध्यतोमध्ये मैत्रावरुणग्रहादौ क्षीरैः पयःप्रभृतिभिः श्रयणद्रव्यैः आशीर्तः मिश्रणेन संस्कृतः तृतीयसवने दध्नाच आशीर्तः एवंभूतस्त्वं शूरस्य विक्रान्तस्येन्द्रस्य मन्दिष्ठः मादयितृतमोभव ॥ ९ ॥

अथ दशमी—

इ॒मेत॑इन्द्र॒सोमा॑स्ती॒व्राअ॒स्मेसु॒तास॑ः । शु॒क्राआ॒शिर॑ंयाचन्ते ॥१०॥१८॥

इ॒मे । ते॒ । इ॒न्द्र॒ । सोमा॑ः । ती॒व्राः । अ॒स्मे इति॑ ।
सु॒तास॑ः । शु॒क्राः । आ॒ऽशिर॑म् । या॒च॒न्ते॒ ॥ १० ॥ १८ ॥

हे इन्द्र ते त्वदीया इमे सोमाः तीव्रास्तीव्रमदाः अस्मे अस्माभिरध्वर्युभिः सुतासोभिषुताः शुक्राः शुद्धाः सन्तः आशीरं क्षीरादिकं श्रयणद्रव्यं त्वां याचन्ते तान् श्रीणीहीत्युत्तरत्रान्वयः ॥ १० ॥

॥ इति पञ्चमस्य सप्तमेष्टादशोवर्गः ॥ १८ ॥

अथैकादशी—

ताँआ॒शिरँ॑पुरो॒ळाश॒मिन्द्रे॒मंसोमँ॑श्रीणीहि । रे॒वन्तं॒हित्वा॑शृणोमि ॥११॥

तान् । आ॒ऽशिर॑म् । पु॒रो॒ळाश॑म् । इन्द्र॑ । इ॒मम् ।
सोम॑म् । श्री॒णी॒हि॒ । रे॒वन्त॑म् । हि । त्वा॒ । शृ॒णोमि॑ ॥ ११ ॥

हे इन्द्र तान्पूर्वोक्तान् सोमान् आशिरं श्रयणद्रव्यञ्च क्षीरादिकं श्रीणीहि मिश्रय यागार्थं तदनन्तरं पुरोळाशं धानाकरंभादिलक्षणं सवनीयपुरोडाशं इमं अस्मदीयं सोमं च श्रीणीहि मिश्रय प्रथमं भक्षितं पुरोळाशं पश्चात्पीतेन सोमेन संयोजयेत्यर्थः तवप्रार्थने कोहेतुरिति चेत् हि यस्मात् रेवन्तं रयिमन्तं रयेर्मतौबहुलमिति सम्प्रसारणम् बहुलधनं त्वां शृणोमि त्वं बहुधनइति सर्वत्रश्रूयते अतः कारणात् त्वामेव प्रार्थयामहे ॥ ११ ॥

अथ द्वादशी—

हृ॒त्सुपी॒तासो॑युध्यन्ते॒दु॒र्मदा॑सो॒नसुरा॑याम् । ऊध॒र्नन॒ग्नाज॑रन्ते ॥ १२॥

हृ॒त्ऽसु । पी॒तास॑ः । यु॒ध्य॒न्ते॒ । दुः॒ऽमदा॑सः ।
न । सुरा॑याम् । ऊध॑ः । न । न॒ग्नाः । ज॒र॒न्ते॒ ॥ १२ ॥

हे इन्द्र पीतासस्त्वयापीताः सोमाः हृत्सु हृदयेषु त्वदीयेषु युध्यन्ते परस्परं सम्प्रहारं कुर्वते तत्रदृष्टान्तः—सुरायां पीतायां जायमानाः दुर्मदासोन दुष्टमदाः यथा पातारं मादयन्ति तद्वत् त्वां मादयितुं परस्परं युध्यन्तइत्यर्थः अपिच नग्नाः छन्दांसि तानि न जहतीति नग्नाः स्तोतारः तेच ऊधर्न पयसा पूर्णं गवादेरूधइव सोमपूर्णं त्वां जरन्ते स्तुवन्ति जरतिः स्तुतिकर्मा ॥१२ ॥

षष्ठेहनि यदि रैवतसामसाध्यंपृष्ठस्तोत्रं तदा निष्केवल्ये रेवाँइद्रियमनुरूपस्तृचः स्तूयतेहि—रेवतीर्नःसधमादेरेवाँइद्रेवतःस्तोतेति स्तोत्रियानुरूपाविति ।

तृचे प्रथमा सूक्ते त्रयोदशी—

रेवाँइद्रेवतःस्तोता।स्यात्त्वावतोमघोनः। प्रेदुंहरिवःश्रुतस्य ॥१३॥

रेवान् । इत् । रेवतः । स्तोता । स्यात् । त्वाऽवतः ।
मघोनः । प्र । इत् । ऊँ इति । हरिऽवः । श्रुतस्य ॥ १३ ॥

हे हरिवः हरिवन् मतुवसोरुरिति नकारस्य रुत्वं । हरी अश्वौ तद्वन्निन्द्र रेवतोरयिमतः बहुधनोपेतस्य अतएव स्तोता रेवान् स्याद रयिमान् भवेत् इच्छब्दोवधारणे धनवान् भवेदेव नतु दारिद्र्यमाप्नोति । उक्तमेवार्थं कैमुतिकन्यायेन द्रढयति त्वावतः त्वत्सदृशस्य युष्मदस्मद्भ्यां छन्दसिसादृश्यमुपसंख्यानमितिवतुप् । मघोनोधनवत्तोधनाढ्यस्य श्रुतस्य सर्वत्रमख्यातस्य अन्यस्यापि स्तोता प्रेदु स्यादित्यनुषज्यते प्रस्यात् प्रभवेदेव नतु निहीयते किमुवक्तव्यं तवस्तोता धनवान् भवेदिति ॥ १३ ॥

अथ चतुर्दशी—

उक्थंचनशस्यमानमगोरिराचिकेत । नगायत्रंगीयमानम् ॥१४॥

उक्थम् । चन । शस्यमानम् । अगोः । अरिः ।
आ । चिकेत । न । गायत्रम् । गीयमानम् ॥ १४ ॥

गायतेर्गोः अगोः अस्तोतुः अरिः शत्रुरिन्द्रः शस्यमानं होत्रापठ्यमानं उक्थं चन शस्त्रमपि आचिकेत अभिजानाति । कितज्ञाने छान्दसोलिट् नेतिसम्प्रत्यर्थे न सम्प्रति मस्तोत्रादिभिर्गीयमानं गायत्रं गातव्यं साम यद्वा गायत्राख्यं अपिचिकेतेत्येव अतःकारणाद वयमपि तमिन्द्रं स्तुमइत्यर्थः ॥ १४ ॥

अथ पञ्चदशी—

मानइन्द्रपीयत्नवेमाशर्धतेपरादाः । शिक्षाशचीवःशचीभिः ॥१५॥१९॥

मा । नः । इन्द्र । पीयत्नवे । मा । शर्धते । परा ।
दाः । शिक्ष । शचीऽवः । शचीभिः ॥ १५ ॥ १९ ॥

हे इन्द्र त्वं पीयत्नवे पीयतिर्वधकर्मा वधशीलाय हिंसाकारिणे शत्रवे नोस्मान् मापरादाः मापरित्याक्षीः माच शर्धते अभिभवित्रे अस्मान्मापरादाः। शृधुप्रसहने इतिधातुः अपितु हे शचीवः शक्तिमन्निन्द्र शचीभिरात्मीयैः कर्मभिः शिक्षास्माननुशाधि यद्वा शिक्षतिर्दानकर्मा अभीष्टं धनमस्मभ्यं देहि यद्वा शत्रून् जेतुं शिक्ष शक्तान् कर्तुमिच्छ शकेः सन्नन्तस्य सनिमीमेति इसादेशेभ्यासलोपे च कृते लोटिरूपमेतत् ॥ १५ ॥

॥ इति पञ्चमस्य सप्तमे एकोनविंशोवर्गः ॥ १९ ॥

प्रथमेरात्रिपर्याये ब्रह्मशस्त्रे वयमुत्वेति स्तोत्रियस्तृचः सूत्रितञ्च—वयमुत्वातदिदर्थावयमिन्द्रत्वायवोभीति।

तत्र प्रथमा सूक्ते षोडशी—

व॒यमु॑त्वात॒दिद॑र्था॒इन्द्र॑त्वा॒यन्त॒ःसखा॑यः। कण्वा॑उ॒क्थेभि॑र्जरन्ते ॥१६॥

व॒यम्। ऊँ॒ इति॑। त्वा॒। त॒दित्ऽअ॑र्थाः। इ॒न्द्र॒।
त्वा॒ऽयन्तः॑। सखा॑यः। कण्वाः॑। उ॒क्थेभिः॑। ज॒र॒न्ते॒॥ १६ ॥

हे इन्द्र त्वायन्तः त्वामात्मनइच्छन्तः सखायः समानख्यानाः वयं तदिदर्थाःयत्तत्वद्विषयं स्तोत्रं तदित् तदेव अर्थः प्रयोजनं येषां तादृशाः सन्तः त्वा त्वां जरामहे स्तुमहे। उइति पूरणः कण्वाः कण्वगोत्रोत्पन्नाः अस्मदीयाः पुत्रादयश्च उक्थेभिरुक्थैः शस्त्रैर्जरन्ते त्वां स्तुवन्ति॥१६॥

अथ सप्तदशी—

नघे॑म॒न्यदाप॑पन॒वज्रि॑न्न॒पसो॒नवि॑ष्टौ। तवेदु॒स्तोम॑ञ्चिकेत ॥ १७॥

न। घ॒। ई॒म्। अ॒न्यत्। आ। प॒प॒न॒। वज्रि॑न्। अ॒पसः॑।
नवि॑ष्टौ। तव॑। इत्। ऊँ॒ इति॑। स्तोम॑म्। चि॒के॒त॒॥ १७॥

हे वज्रिन् वज्रवन्निन्द्र अपसः अपस्विनः कर्मवतस्तव सम्बन्धिनि नविष्टौ अभिनवे यागे वर्तमानोहं अन्यत् त्वद्विषयादन्यत् स्तोत्रं नघेम् नैव आपपन अभिष्टौमि पनतेः स्तुतिकर्मणउत्तमे णलि लिटि रूपम्। अपितु तवेदु तवैव स्तोमं स्तोत्रं चिकेत अभिजानामि त्वामेव सर्वदा स्तौमीत्यर्थः॥ १७ ॥

अथाष्टादशी—

इच्छन्तिदेवाःसुन्वन्तंनस्वमायस्पृहयन्ति । यन्तिप्रमादमतन्द्राः॥१८॥

इच्छन्ति । देवाः । सुन्वन्तम् । न । स्वमाय ।
स्पृहयन्ति । यन्ति । प्रऽमादम् । अतन्द्राः ॥ १८ ॥

सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानं देवाः इन्द्रादयः सर्वे इच्छन्ति रक्षितुं स्वमाय न स्पृहयन्ति स्वमावस्थांगतस्य सुन्वतोनेच्छन्ति सर्वदा प्रबुद्धमेव कुर्वन्तीत्यर्थः स्पृहेरीप्सित-इतिकर्मणि चतुर्थी स्पृहईप्सायां चुरादिरदन्तः यतएवं अतःकारणात् अतन्द्राः अनलसादेवाः प्रमादं प्रकर्षेण मदकरं तदीयं सोमं यन्ति प्राप्नुवन्ति ॥ १८॥

अथैकोनविंशी—

ओषुप्रयाहिवाजेभिर्माहृणीथाअभ्यस्मान् । महाँइवयुवजानिः॥१९॥

ओ इति । सु । प्र । याहि । वाजेभिः । मा । हृणीथाः ।
अभि । अस्मान् । महान्ऽइव । युवऽजानिः ॥ १९ ॥

हे इन्द्र वाजेभिर्वाजैः अस्मभ्यं दातव्यैरन्नैः सार्धं अस्मानाभिमुख्येन सु सुष्ठु प्रकर्षेण ओ आउ याहि शीघ्रमायात्येव आगच्छैव माहृणीथाः माक्रुध्यस्व हृणीयतिः क्रुध्यतिकर्मा यद्वा मा लज्जां प्राप्नुहि हृणीङ् लज्जायामिति कंड्वादौ पठ्यते । तत्रदृष्टान्तः—महाँइव युवजानिः युवतिर्जाया यस्यसतथोक्तः जायायानिङिति समासान्तोनिङादेशः । ईदृशोमहान् गुणैरधिकोपि यथा स्वभार्यां प्रति निर्लज्जःसन् शीघ्रं गच्छति तद्वत् ॥ १९ ॥

अथ विंशी—

मोष्व१द्यदुर्हणावान्त्सायंकरदारेअस्मत् । अश्रीरइवजामाता॥२०॥२०॥

मो इति । सु । अद्य । दुःऽहनावान् । सायम् । करत् ।
आरे । अस्मत् । अश्रीरःऽइव । जामाता ॥ २० ॥ २० ॥

दुर्हणावान् परैर्दुःसहहननं दुर्हणं तद्वान् इन्द्रः अथेदानीं अस्मदारे अस्माकं समीपे आगच्छतु सु सुष्ठु अतिशयेन सायं दिवसस्यावसानं सायंकालं मोकरद् माकार्षीत् करोते-र्माङिलुङि कृमृदृरुहिभ्यइति च्लेरङादेशः । जामाता जायत इतिजा अपत्यं तस्यानिर्माता दुहि-तुः पतिः अश्रीरइव नश्रीरश्रीः तदस्यास्तीत्यश्रीरः मत्वर्थीयोरः गुणैर्विहीनः कुत्सितोजामाता सयथा असकृदाहूयमानोपि आसायंकालं विलंबते तद्वत् त्वं कालविलंबं माकृथाइत्यर्थः ॥२०॥

॥इति पंचमस्य सप्तमे विंशोवर्गः ॥ २०॥

अथैकविंशी—

विद्माह्यस्यवीरस्यंभूरिदावरींसुमतिम् । त्रिपुजातस्यमनांसि ॥ २१ ॥

विद्म । हि । अस्य । वीरस्यं । भूरिऽदावरीम् ।
सुऽमतिम् । त्रिपु । जातस्यं । मनांसि ॥ २१ ॥

अस्येन्द्रस्य वीरस्य विक्रान्तस्य भूरिदावरीं बहुधनस्य दात्रीं सुमतिं कल्याणीं मतिं अनुग्रहबुद्धिं विद्माहि जानीमः खलु । तथा त्रिपु भूम्यादिपु त्रिपु लोकेपु जातस्य तत्कार्यार्थं प्रादुर्भूतस्य मनांसि हृदयानि च जानीमः अतस्तस्येन्द्रस्य यथा प्रीतिर्जनिष्यते तथा स्तोत्रं कुर्मइत्यर्थः ॥ २१ ॥

अथ द्वाविंशी—

आतूषिंचकण्वमन्तंनघाविद्मशवसानात् । यशस्तरंशतमूतेः॥२२॥

आ । तु । सिञ्च । कण्वंऽमन्तम् । न । घ । विद्म ।
शवसानात् । यशःऽतरम् । शतम्ऽऊतेः ॥ २२ ॥

हे अध्वर्यो कण्वमन्तं कणतिः शब्दकर्मा कण्वाः स्तोतारः यद्वा कण्वगोत्राऋषयः तैर्यु-क्तमिन्द्रमुद्दिश्य तु क्षिप्रं आसिञ्च सोमं जुहुधि । शवसानात् शवोबलं तदिवाचरतः अतिबलात् शतमूतेः शतं बहुनामैतत् बह्वयऊतयोरक्षायस्मिन् सशतमूतिः तादृशादस्मादिन्द्रात् यशस्तरं य-शस्वितरं पुरुषं नघ नैव विद्म जानीमः अतस्तमेवोद्दिश्य सोमं जुहुधीत्यर्थः ॥ २२ ॥

अथ त्रयोविंशी—

ज्येष्ठेनसोतरिन्द्रायसोमंवीरायशक्राय । भरापिबन्नर्याय ॥ २३ ॥

ज्येष्ठेन । सोतः । इन्द्राय । सोमम् । वीराय ।
शक्राय । भर । पिबत् । नर्याय ॥ २३॥

हे सोतरभिषोतरध्वर्यो वीराय विक्रान्ताय शक्राय शक्तियुक्ताय नर्याय नृभ्योहितायेन्द्राय ज्येष्ठेन मुख्येन ऐन्द्रवयवग्रहेण सहि धाराग्रहाणांमध्ये ज्येष्ठः तेन सोमं भर हर आहर वीर्यं प्रापय । सचेन्द्रः पिबत् तं सोमं पिबतु ॥ २३ ॥

अथ चतुर्विंशी—

योवेदिष्ठोअव्यथिष्वश्वावन्तंजरितृभ्यः । वाजंस्तोतृभ्योगोमन्तम्॥२४॥

यः । वेदिष्ठः । अव्यथिषु । अश्वऽवन्तम् ।
जरितृऽभ्यः । वाजम् । स्तोतृऽभ्यः । गोऽमन्तम् ॥ २४ ॥

यइन्द्रः अव्यथिषु अव्यथयितृषु सुखकरेषु स्तोतृषु वेदिष्ठःअतिशयेन वेदिता कृतस्य स्तोत्रस्य ज्ञाता सइन्द्रोजरितृभ्यः शंसितृभ्योहोत्रादिभ्यः प्रस्तोत्रादिभ्यश्च अश्वावन्तं बहुभिरश्वैरुपेतं गोमन्तं बहुभिर्गोभिरुपेतं सन्तं वाजमन्नं बलं वा ददातीतिशेषः ॥ २४ ॥ अहीनान्तर्गतेतिरात्रे प्रथमेपर्याये होतुःशस्त्रे पन्यंपन्यमितिस्तोत्रियस्तृचः छन्दोगैरस्य तृचस्य स्तूयमानत्वात् छन्दोगमत्यर्थं स्तोमस्तोत्रियइतिहि स्मर्यते ।

तत्राद्या सूक्ते पञ्चविंशी—

पन्यंपन्यमित्सोतारआधावतमद्याय । सोमंवीरायशूराय ॥२५॥२१॥

पन्यम्ऽपन्यम् । इत् । सोतारः । आ । धावत ।
मद्याय । सोमम् । वीराय । शूराय ॥ २५ ॥ २१ ॥

हे सोतारः अभिषोतारोध्वर्यवः मद्याय मादयितव्याय वीराय विक्रान्ताय शूरायशौर्यवइन्द्राय पन्यंपन्यमित् सर्वत्र स्तुत्यमेव सोमं आधावत अभिगमयत प्रयच्छतेत्यर्थः ॥ २५ ॥

॥ इति पञ्चमस्य सप्तमे एकविंशोवर्गः ॥ २१ ॥

अथ षड्विंशी—

पातावृत्रहासुतमाघागमन्नारेअस्मत् । नियमतेशतमूतिः ॥ २६ ॥

पाता । वृत्रऽहा । सुतम् । आ । घ । गमत् ।
न । आरे । अस्मत् । नि । यमते । शतम्ऽऊतिः ॥ २६ ॥

सुतमभिषुतं सोमं पाता पानशीलः ताच्छीलिकस्तृन् नलोकाव्ययेति कर्मणिषष्ठ्याःप्रतिषेधः वृत्रः वृत्रस्यासुरस्यहन्ता इन्द्रः आगमत् घेत्यवधारणे आगच्छत्वेव अस्मत् अस्मत्तः आरे-दूरदेशे माभवतु आगत्यच शतमूतिः बहुविधरक्षणः इन्द्रः नियमते अस्मदीयान् शत्रून् नियच्छतु तिरस्करोतु यद्वा धनान्यस्मभ्यं नियच्छतु ददातु ॥ २६ ॥

अथ सप्तविंशी—

एहहरीब्रह्मयुजाशग्मावक्षतःसखायम् । गीर्भिःश्रुतंगिर्वणसम् ॥ २७ ॥

आ । इह । हरी इति । ब्रह्मऽयुजा । शग्मा । वक्षतः ।
सखायम् । गीःऽभिः । श्रुतम् । गिर्वणसम् ॥ २७ ॥

ब्रह्मयुजा अन्नवन्तौ शग्मा सुखमदौ हरी एतादृशौ अश्वौ युवां इहअस्मद्यज्ञे इन्द्रं आ-वक्षतः आवहतम् । कीदृशं इन्द्रं अस्मत्सखायं गीर्भिः अस्मत्कृतैः स्तोत्रैः श्रुतं प्रख्यातं गिर्वणसं गिरां संभक्तारम् ॥ २७ ॥

अथाष्टाविंशी—

स्वादवःसोमाआयाहिश्रीताःसोमाआयाहि ।
शिप्रिन्नृषीवःशचीवोनायमच्छासधमादम् ॥ २८ ॥

स्वादवः । सोमाः । आ । याहि । श्रीताः । सोमाः ।
आ । याहि । शिप्रिन् । ऋषिऽवः । शचीऽवः । न ।
अयम् । अच्छ । सधऽमादम् ॥ २८ ॥

हे शिप्रिन् शिप्रं शिरस्त्राणं यद्वा शिप्रेहनूनासिकेवा तद्वन् हे ऋषीवः ऋषिभिः स्तोतृभि-र्युक्त शचीवः शक्तिमन् एवंभूत हेइन्द्र अस्मदीयाः इमे सोमाः स्वादवः अभिषवादिभिः सं-

स्कृतत्वेन आस्वदनार्हा जाताः अतस्त्वमायाहि आगच्छ।तथा ते सोमाः श्रीताः पयआदिभिः श्रपणद्रव्यैः मिश्रिताः संस्कृताः अतोप्यायाह्यागच्छ नेतिसम्प्रत्यर्थे न सम्प्रत्ययं स्तोता सधमादं सहमादयितव्यं त्वां अच्छाभिमुखं स्तौतीतिशेषः अतोप्यायाहीत्यर्थः॥ २८ ॥

अथैकोनत्रिंशी–

स्तुतश्चयास्त्वावर्धन्तिमहेराधसेनृम्णाय। इन्द्रकारिणंवृधन्तः॥२९॥

स्तुतः। च। याः। त्वा। वर्धन्ति। महे।
राधसे। नृम्णाय। इन्द्र। कारिणम्। वृधन्तः॥ २९ ॥

हे इन्द्र कारिणं कर्मणां कर्तारं वृधन्तोवर्धयन्तः ये स्तुतः स्तोतारः याश्च तदीयाः स्तुतयः त्वा त्वां वर्धन्ति वर्धयन्ति किमर्थं महे महते राधसे धनाय नृम्णाय बलाय च उभयोर्लाभार्थं तदुभयं लभन्तइत्यध्याहारः यद्वोत्तरत्र ते सत्रादधिरेशवांसीतिसबन्धः॥ २९ ॥

अथ त्रिंशी–

गिरश्चयास्तेगिर्वाहउक्थाचतुभ्यंतानि। सत्रादधिरेशवांसि॥३०॥२२॥

गिरः। च। याः। ते। गिर्वाहः। उक्था। च।
तुभ्यम्। तानि। सत्रा। दधिरे। शवांसि॥ ३०॥ २२॥

हे गिर्वाहः गीर्भिःस्तुतिभिर्वहनीयेन्द्र ते तुभ्यं क्रियमाणाः गिरश्च स्तुतिरूपाश्च वाचोयाः सन्ति उक्थाच उक्थानिच शस्त्ररूपाणिच वचांसि तुभ्यं त्वदर्थं क्रियमाणानि यानि सन्ति तानि सर्वाणि सत्रासहैव शवांसि बलानि दधिरे विदधिरे॥ ३०॥

॥ इति पञ्चमस्य सप्तमे द्वाविंशोवर्गः॥ २२॥

अथैकत्रिंशी–

एवेदेषतुविकूर्मिर्वाजाँएकोवज्रहस्तः। सनादमृक्तोदयते॥३१॥

एव। इत्। एषः। तुविऽकूर्मिः। वाजान्। एकः।
वज्रऽहस्तः। सनात्। अमृक्तः। दयते॥ ३१॥

एष एवेन्द्रः तुविकूर्मिः बहुकर्मा इदिनिपूरकः एकः सर्वेषु देवेषु मुख्यः वज्रहस्तोवज्रबाहुः सनात् चिरकालादारभ्य अघृक्तः शत्रुभिरबाधितः एवंभूतः सइन्द्रः वाजानन्नानि बलानि वा दयते स्तोतृभ्योददाति ॥ ३१ ॥

अथ द्वात्रिंशी–

हन्तावृत्रंदक्षिणेनेन्द्रःपुरूपुरुहूतः । महान्महीभिःशचीभिः॥३२॥

हन्ता । वृत्रम् । दक्षिणेन । इन्द्रः । पुरु । पुरुऽहूतः ।
महान् । महीभिः । शचीभिः ॥ ३२ ॥

अयमिन्द्रोदक्षिणेन हस्तेन एकेनैव वृत्रमावरकमसुरं हन्ता साधु हतवान् हन्तेः साधुकारिणि तृन् नलोकाव्ययेति षष्ठीप्रतिषेधः। पुरु पुरुषु सुपांसुलुगिति विभक्तेर्लुक् बहुषु देशेषु पुरुहूतः बहुभिराहूतः महीभिर्महतीभिः शचीभिः क्रियाभिः शक्तिभिर्वा महान् सर्वेभ्यउत्कृष्टएवंभूतइन्द्रोस्मान् रक्षत्वित्यर्थः ॥ ३२ ॥

अथ त्रयस्त्रिंशी–

यस्मिन्विश्वाश्चर्षणयउतच्यौत्नाज्रयांसिच । अनुघेन्मन्दीमघोनः॥३३॥

यस्मिन् । विश्वाः । चर्षणयः । उत । च्यौत्ना ।
ज्रयांसि । च । अनु । घ । इत् । मन्दी । मघोनः ॥ ३३ ॥

विश्वाः सर्वाः चर्षणयः प्रजाः यस्मिन्निन्द्रे वर्तन्ते यदधीनाभवन्ति उतापिच च्यौत्ना च्यौत्नानि बलनामैतत् प्रच्युतसाधनानि बलानिच ज्रयांसि शत्रुविषयाण्यभिभवनानि यस्मिन्निन्द्रे वर्तन्ते जिज्रि अभिभवे इतिधातुः। सइन्द्रः मघोनः मघं हविर्लक्षणधनं तद्वतोयजमानान् अनुमन्दी अनुमोदकोभवति घेदितिपूरकौ यद्वा मन्दी स्तुत्यः सइन्द्रः तान् अनुगृह्णातीतिशेषः अथवा यस्य मघोनोधनवतइन्द्रस्य मन्दी स्तोतानुकूलोभवति एषएतानीत्युत्तरत्रैकवाक्यता॥३३॥

अथ चतुस्त्रिंशी–

''एषएतानिचकारेन्द्रोविश्वायोतिशृण्वे । वाजदावामघोनाम् ॥३४॥

एषः । एतानि । चकार । इन्द्रः । विश्वा ।
यः । अति । शृण्वे । वाजऽदावा । मघोनाम् ॥ ३४ ॥

एषइन्द्रः विश्वा विश्वानि व्याप्तानि एतानि वृत्रवधादीनि वीर्याणि यद्वा पृथिव्यादीनि भूतजातानि चकार कृतवान् यइन्द्रोवलैरतिशयितः शृण्वे श्रूयते सर्वत्र स्तूयते अपिच सइन्द्रो-मघोनां हविष्मतां यजमानानां वाजदावा वाजस्यान्नस्य दाता भवति ॥ ३४ ॥

अथ पञ्चत्रिंशी—

प्रभर्तारथंगव्यन्तमपाकाच्चिद्यमवति । इनोवसुसहिवोळ्हा ॥ ३५ ॥२३॥

प्रऽभर्ता । रथम् । गव्यन्तम् । अपाकात् । चित् ।
यम् । अवति । इनः । वसु । सः । हि । वोळ्हा ॥३५॥२३॥

प्रभर्ता प्रहर्ता प्रहरणशीलइन्द्रः रथं रंहणं गव्यन्तं गाइच्छन्तं यं स्तोतारं अपाकात् अ-विपक्वप्रज्ञात् शत्रोः चिच्छब्दोनुक्तसमुच्चयार्थः विपक्वप्रज्ञादपि अवति रक्षति सहि सखलु स्तोता इनईश्वरः सन् वसु धनं वोळ्हा साधुवाही भवति। वहेः साधुकारिणितृन् अतोनलोका-व्ययेतिकर्मणिषष्ठ्याः प्रतिषेधः ॥ ३५ ॥

॥ इति पञ्चमस्य सप्तमे त्रयोविंशोवर्गः ॥ २३ ॥

अथ षट्त्रिंशी—

सनिताविप्रोअर्वद्भिर्हन्तावृत्रंनृभिःशूरः । सत्योविताविधन्तम् ॥३६॥

सनिता । विप्रः । अर्वत्ऽभिः । हन्ता । वृत्रम् ।
नृऽभिः । शूरः । सत्यः । अविता । विधन्तम् ॥ ३६ ॥

विप्रोमेधावी सइन्द्रः अर्वद्भिरश्वैः वाहनभूतैः सनिता गन्तव्यं संभक्ता तथा शूरः शौ-र्योपेतः सन् नृभिर्नेतृभिर्मरुद्भिः सार्धं वृत्रमावरकमसुरं हन्ता साधुघाती अपिच विधन्तं प-रिचरन्तं यजमानः सत्यः साधुः अवितथस्वभावोवा सइन्द्रः अविता परिचरतोयजमानस्य र-क्षिता भवति । सर्वविधीनां छन्दसिविकल्पितत्वादत्रकर्मणिषष्ठी न प्रवर्तते ॥ ३६ ॥

अथ सप्तत्रिंशी—

यजध्वैनंप्रियमेधाइन्द्रंसत्राचामनसा। योभूत्सोमैःसत्यमद्वा ॥३७॥

यजध्व । एनम् । प्रियऽमेधाः । इन्द्रम् । सत्राचा ।
मनसा । यः । भूत् । सोमैः । सत्यऽमद्वा ॥ ३७ ॥

हे प्रियमेधाः प्रियः अनुकूलः मेधोयज्ञोयेषां ते तथोक्ताः आत्मनि पूजार्थं बहुवचनं प्रियमेधाख्यऋषिरात्मानं संबोध्य ब्रूते हे प्रियमेधाः सत्राचा सहांचता स्तोतव्येनेन्द्रेण सह वर्तमानेन मनसा चित्तेन यएनमिन्द्रं यजध्व यजध्वं बुद्धिपूर्वकं यजेत्यर्थः यजध्वैनमिति निपातनाद्वर्णलोपः यइन्द्रः सोमैः करणभूतैः सत्यमद्वा भूत सत्यमदः अवितथमदोभवति ॥ ३७ ॥

अथाष्टत्रिंशी—

गाथश्रवसंसत्पतिंश्रवस्कामंपुरुत्मानम् । कण्वासोगातवाजिनम् ॥३८॥

गाथऽश्रवसम् । सत्ऽपतिम् । श्रवःऽकामम् ।
पुरुऽत्मानम् । कण्वासः । गात । वाजिनम् ॥ ३८ ॥

हे कण्वासः कण्वपुत्राः मेधातिथयः पूर्ववद्बहुवचनमात्मनः संबोधनंच हे कण्वस्यपुत्राः मेधातिथयोयूयं गाथश्रवसं गातव्ययशसं सत्पतिं सतां पालयितारं श्रवस्कामं श्रवस्सु अन्नेषु हविष्षु कामोभिलाषोयस्य तादृशं पुरुत्मानं बह्वात्मानं यद्वा पुरुषु बहुषु प्रदेशेषु अतन्तं सततं गच्छन्तं वाजिनं वेगवन्तं एवं गुणकमिन्द्रं गात गायत स्तुध्वम् ॥ ३८ ॥

अथैकोनचत्वारिंशी—

यऋतेचिद्गास्पदेभ्योदात्सखानृभ्यःशचीवान् ।
येअस्मिन्काममश्रियन् ॥ ३९ ॥

यः । ऋते । चित् । गाः । पदेभ्यः । दात् । सखा ।
नृऽभ्यः । शचीऽवान् । ये । अस्मिन् । कामम् । अश्रियन् ॥ ३९ ॥

पणिभिर्देवगवीष्वपहृतासु पदेभ्योगवतानां गवां मार्गे संलग्नेभ्यः अन्वेषणसाधनभूतेभ्यः ऋतेचित् ऋतेपि विनापि सखा मित्रभूतः शचीवान् कर्मवान् प्रशस्तकर्मा यइन्द्रोनृभ्योनेतृभ्योदे-

वेभ्यः गाः पणिभिरपहृतादाव् पुनर्दत्तवान्। येदेवाः अस्मिन्निन्द्रे कामं अभिलाषं अश्रियन् असेवन्त प्रापुवन् तेभ्योनृभ्यइत्यन्वयः तमिन्द्रं गातेति पूर्वेणसहैकवाक्यता ॥ ३९॥

अथ चत्वारिंशी–

इत्थाधीवन्तमद्रिवःकाण्वंमेध्यातिथिम्।
मेषोभूतो३ऽभियन्नयः ॥ ४० ॥

इत्था। धीऽवन्तम्। अद्रिऽवः। काण्वम्।
मेध्यऽअतिथिम्। मेषः। भूतः। अभि। यन्। अयः ॥ ४० ॥

इत्था इत्थमनेनोक्तप्रकारेण धीवन्तं स्तुतिमन्तं काण्वं कण्वपुत्रं मेध्यातिथिं यज्ञार्हातिथिं एतत्संज्ञमृषिं हे अद्रिवोवज्रवन्निन्द्र मेषभूतः मेषरूपतां प्राप्तः अभियन् अभिगच्छन् यइत्यनुवर्तते तद्योगाच्च तिङोनिघाताभावः यस्त्वं अयः अगमयः तं त्वां स्तुमइत्यर्थः। मेधातिथिर्मेषेति सुब्रह्मण्यामन्त्रैकदेशस्य व्याख्यानरूपं ब्राह्मणं छन्दोगैरेवमाम्नायते–मेधातिथिंहिकाण्वायनिं मेषोभूत्वोदजहारेति। तदभिप्रायेणेयं स्तुतिः कृता ॥ ४० ॥

अथैकचत्वारिंशी–

शिक्षांविभिन्दोअस्मैचत्वार्ययुतादद॑त्।
अष्टापरःसहस्रा ॥ ४१ ॥

शिक्ष॑। विभिन्दो इति विऽभिन्दो। अस्मै।
चत्वारि। अयुता। दद॑त्। अष्टा। परः। सहस्रा ॥ ४१ ॥

विभिन्दुनाम्नोराज्ञः सकाशाद्बहुधनं लब्ध्वा तदीयं दानं इदमादिकेन तृचेन प्रशंसति हे-विभिन्दोराजन् ददत् दाता त्वं अस्मै महाम्मेधये चत्वारि अयुता अयुतानि दशसहस्राणि चत्वारिंशत्सहस्राणि शिक्ष अशिक्षः दत्तवानसि परः परस्तात् ऊर्ध्वमपि अष्टसंख्याकानि सहस्रा सहस्राणि च दत्तवानसि ॥ ४१ ॥

अथ द्वाचत्वारिंशी–

उतसुत्येपयोवृधामाकीरणस्यनप्त्या।
जनित्वनायमामहे ॥ ४२ ॥ २४ ॥

उत । सु । त्ये इति । पयःऽवृधा । माकी इति । रणस्य ।
नप्त्या । जनिऽत्वनाय । ममहे ॥ ४२ ॥ २४ ॥

उतापिच सु सुष्टु त्ये ते सर्वत्र प्रसिद्धे पयोवृधा पयसउदकस्य वर्धयित्र्यौ माकी निर्मात्र्यौ भूतजातस्य रणस्य स्तोतृनामैतत् स्तोतुर्नप्त्या नप्त्यौ न पातयित्र्यौ सर्वदा अनुग्रहशीले द्यावापृथिव्यौ जनित्वनाय पूर्वोक्तधनस्य जननाय प्रादुर्भावाय लाभाय ममहे स्तुतवानस्मि द्यावापृथिव्योः प्रसन्नयोरेवेदं दानं लभ्यते नान्यदेति दानमाहात्म्यप्रशंसाधिगंतव्या ॥४२॥

॥ इति पञ्चमस्य सप्तमे चतुर्विंशोवर्गः ॥ २४ ॥

पिबासुतस्येति चतुर्विंशत्यृचं तृतीयं सूक्तम् काण्वस्य मेधातिथेरार्षम् अयुजो बृहत्योयुजः सतोबृहत्यः एकविंश्यनुष्टुप् द्वाविंशीत्रयोविंश्यौ गायत्र्यौ चतुर्विंशीबृहती एताश्चतस्रः कुरुयाणस्यपुत्रस्य पाकस्थामनाम्नोराज्ञोदानस्तुतिप्रतिपादिकाः अतस्तद्देवताकाः शिष्टाऐन्द्र्यः तथाचानुक्रान्तम्—पिबचतुर्विंशतिर्मेध्यातिथिः प्रागाथं त्वनुष्टुप् गायत्र्यौ बृहतीचान्त्याः कौरयाणस्यपाकस्थाम्नोदानस्तुतिरिति । महाव्रते निष्केवल्ये बार्हततृचाशीतौ दानस्तुतीर्विनेदंसूक्तं सप्तम्यष्टम्ययोश्चोद्धारः तथैवपञ्चमारण्यकेसूत्रितम्—पिबासुतस्यरसिनइतिविंशतेःसप्तमींचाष्टमींचोद्धरतीति । ज्योतिष्टोमे निष्केवल्ये आद्योरथंतरसामप्रगाथः शंसनीयः सूत्र्यतेहि—पिबासुतस्यरसिनइतिसामप्रगाथइति । चातुर्विंशिकेहनि निष्केवल्येप्ययंप्रगाथः सूत्र्यतेहि—उक्तोरथन्तरस्यउभयंशृणवचनइतिबृहतइति । एवमन्यत्रापि यदि रथन्तरं पृष्ठं भवति तत्र सर्वत्रायं प्रगाथोद्रष्टव्यः पञ्चमेहनिप्रउगशस्त्रेपि पिबासुतस्येत्ययमैन्द्रःप्रगाथः सूत्रितश्च—पिबासुतस्यरसिनोदेवंदेवंवोवसइति ।

तत्र प्रथमा—

पिबा॑सु॒तस्य॑र॒सिनो॒मत्स्वा॑नइन्द्र॒गोम॑तः ।
आ॒पिर्नो॑बोधिसध॒माद्यो॑वृ॒धे॒३॑ऽस्माँअ॑वन्तु॒तेधियः॑ ॥ १ ॥

पिब॑ । सु॒तस्य॑ । र॒सिनः॑ । मत्स्व॑ । नः॒ । इन्द्र॑ । गोऽम॑तः । आ॒पिः । नः॒ ।
बो॒धि॒ । स॒ध॒ऽमाद्यः॑ । वृ॒धे । अ॒स्मान् । अ॒व॒न्तु॒ । ते॒ । धियः॑ ॥ १ ॥

हे इन्द्र रसिनोरसवतः गोमतोगोविकारैः पयः प्रभृतिभिः श्रयणद्रव्यैः युक्तस्य नोस्मदीयस्य सुतस्याभिषुतस्य क्रियाग्रहणंकर्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थेषष्ठी ईदृशं सोमं पिब पीत्वा च मत्स्व तृप्तोभव । अपिच सधमाद्यः सहमादयितव्यः सहितैरस्माभिस्तर्पयितव्यस्त्वं आपिरापयिता बन्धुः सन् नोस्माकं वृधे वर्धनाय बोधि बुध्यस्व । ते त्वदीयाधियः बुद्धयः अनुग्रहात्मिकाः अस्मान् स्तोतॄन् अवन्तु रक्षन्तु ॥ १ ॥

अथ द्वितीया—

भूयामतेसुमतौवाजिनोवयंमानस्तरभिमातये ।
अस्माञ्चित्राभिरवतादभिष्टिभिरानःसुम्नेषुयामय ॥ २ ॥

भूयाम । ते । सुऽमतौ । वाजिनः । वयम् । मा । नः । स्तः ।
अभिऽमातये । अस्मान् । चित्राभिः । अवतात् । अभिष्टिऽभिः ।
आ । नः । सुम्नेषु । यमय ॥ २ ॥

हे इन्द्र ते तव सुमतौ शोभनायां मतौ अनुग्रहबुद्धौ वाजिनोहविष्मन्तोवयं भूयाम वर्तमानाभवेम अभिमातये अभिमन्यतइत्यभिमातिः शत्रुः तस्मै तदर्थं नोस्मान् मा स्तः माहिंसीः स्तृञ् हिंसायाम् माङिलुङि छान्दसश्लेर्लुक् । अपितु अभिष्टिभिः अभ्येषणीयाभिः प्रार्थनीयाभिश्चित्राभिश्चायनीयाभिः बहुविधाभिर्वा त्वदीयाभिरूतिभिः अस्मानवतात् अव रक्ष । तथा नोस्मान् सुम्नेषु सुखेषु आयामय आयतान् कुरु सर्वदा सुखिनएव कुरु ॥ २ ॥

अथ तृतीया—

इमाउत्वापुरूवसोगिरोवर्धन्तुयाममं ।
पावकवर्णाःशुचयोविपश्चितोभिस्तोमैरनूषत ॥ ३ ॥

इमाः । ऊँ इति । त्वा । पुरुवसो इति पुरुऽवसो । गिरः ।
वर्धन्तु । याः । मम । पावकऽवर्णाः । शुचयः । विपःऽचितः ।
अभि । स्तोमैः । अनूषत ॥ ३ ॥

हे पुरूवसो बहुधनेन्द्र मम मदीया याइमागिरः शस्त्ररूपावाचः त्वा त्वां वर्धन्तु वर्धयन्तु तथा पावकवर्णाः अग्निसमानतेजस्काः अतएव शुचयः शुद्धाः विपश्चितोविद्वांसः उद्गातारश्च स्तोमैःस्तोत्रैर्बहिष्पवमानादिभिः अभ्यनूषत त्वामभिष्टुवन्ति । नू स्तुतौ कुटादिः ॥ ३ ॥

अथ चतुर्थी—

अयंसहस्रमृषिभिःसहस्कृतःसमुद्रइंवपप्रथे ।
सत्यःसोअंस्यमहिमागृणेशवोयज्ञेषुविप्रराज्ये ॥ ४ ॥

अयम् । सहस्रम् । ऋषिऽभिः । सहःऽकृतः । समुद्रःऽइंव ।
पप्रथे । सत्यः । सः । अस्य । महिमा । गृणे । शवः ।
यज्ञेषु । विप्रऽराज्ये ॥ ४ ॥

अयमिन्द्रः सहस्रं सहस्रसंख्याकैः ऋषिभिरतीन्द्रियार्थदर्शिभिः स्तोतृभिः सहस्कृतः सहसा बलेनयुक्तःकृतः स्तुत्याहि देवताया बलं वर्धते। सच एवंभूतःसन् समुद्रइव उदधिरिव पप्रथे प्रथितोविस्तीर्णोबभूव अस्यचेन्द्रस्य सत्यःअवितथः समस्तिद्धोमहिमा महत्वं शवोबलंच यज्ञेषु यागेषु विप्रराज्ये राज्ञः कर्म राज्यं विप्राणां स्तोतॄणां राज्ये स्तुतशस्त्रसंघे गृणे स्तूयते ॥४॥

चातुर्विंशिकेहनि निष्केवल्ये इन्द्रमिद्देवतातयइति रैवतसाममगाथः शंसनीयः पृष्ठ्येहनि निष्केवल्ये त्वयं प्रगाथः सूत्र्यतेहि—इन्द्रमिद्देवतातयइतीतरेषां पृष्ठ्यएकैकमन्वहमिति ।

तृचे प्रथमा सूक्ते पञ्चमी—

इन्द्रमिद्देवतांतयइन्द्रंप्रयत्यंध्वरे ।
इन्द्रंसमीकेवनिनोंहवामहइन्द्रंधनंस्यसातयें ॥ ५ ॥२५॥

इन्द्रंम् । इत् । देवऽतांतये । इन्द्रंम् । प्रऽयति । अध्वरे । इन्द्रंम् ।
समऽईके । वनिनंः । हवामहे । इन्द्रंम् । धनंस्य । सातयें ॥५॥२५॥

देवतातये देवैः स्तोतृभिःतायते विस्तार्यतेइति देवतातिर्यज्ञः तदर्थं इन्द्रमित् देवेषु मध्ये इन्द्रमेवाह्वयामहे अध्वरे यज्ञे प्रयति प्रगच्छति उपक्रान्ते सति इन्द्रं हवामहे। तथा समीके सम्यग्गते संपूर्णे च यागे वनिनः संभजमानावयं इन्द्रमेवाह्वयामहे । यद्वा समीकमिति संग्रामनाम समीके संग्रामे इन्द्रमेवाह्वयामहे धनस्य सातये लाभाय इन्द्रमेवाह्वयामहे । अतः शीघ्रमिन्द्रआगच्छत्वित्यर्थः ॥ ५ ॥

॥ इति पञ्चमस्य सप्तमे पञ्चविंशोवर्गः ॥२५॥

अथ षष्ठी—

इन्द्रोमह्नारोदसीपप्रथच्छवइन्द्रःसूर्यमरोचयत् ।
इन्द्रेहविश्वाभुवनानियेमिरइन्द्रेसुवानासइन्दवः ॥६॥

इन्द्रः । मह्ना । रोदसी इति । पप्रथत् । शवः । इन्द्रः । सूर्यम् ।
अरोचयत् । इन्द्रे । ह । विश्वा । भुवनानि । येमिरे ।
इन्द्रे । सुवानासः । इन्दवः ॥ ६ ॥

अयमिन्द्रः शवः शवसः आत्मीयस्य बलस्य मह्ना महिम्ना महत्त्वेन रोदसी द्यावापृथिव्यौ पप्रथत् अप्रथयत् विस्तारितवान् तथा स्वर्भानुना वृतं सूर्यं अयमेवेन्द्रः अरोचयददीपयत् तस्यासुरस्य वधेन प्रकाशितवान् । अपिच इन्द्रेह अस्मिन्नेवेन्द्रे विश्वा विश्वानि व्याप्तानि भुवनानि भूतजातानि येमिरे उपरमन्ते इन्द्रेण नियम्यन्तइत्यर्थः । तथा सुवानासः सूयमानाः अभिषूयमाणाः इन्दवः सोमाश्च अस्मिन्नेवेन्द्रे नियम्यन्ते अन्तर्भवन्तीत्यर्थः ॥ ६ ॥

ज्योतिष्टोमेमाध्यंदिनेरथन्तरपृष्ठः तदा निष्केवल्ये अभित्वापूर्वपीतयइतिप्रगाथोनुरूपः सूत्र्यतेहि—अभित्वापूर्वपीतयइति प्रगाथौ स्तोत्रियानुरूपाविति । महाव्रते निष्केवल्ये दक्षिणपक्षेप्ययं प्रगाथः सूत्रितश्च—अभित्वापूर्वपीतयइतिरथन्तरस्यस्तोत्रियानुरूपौ प्रगाथाविति ।

तत्र प्रथमा सूक्ते सप्तमी—

अभित्वापूर्वपीतयइन्द्रस्तोमेभिरायवः ।
समीचीनासऋभवःसमस्वरन्रुद्रागृणन्तपूर्व्यम् ॥ ७ ॥

अभि । त्वा । पूर्वऽपीतये । इन्द्र । स्तोमेभिः । आयवः ।
सम्ऽईचीनासः । ऋभवः । सम् । अस्वरन् । रुद्राः ।
गृणन्त । पूर्व्यम् ॥ ७ ॥

हे इन्द्र आयवोमनुष्याः स्तोतारः स्तोमेभिः स्तोत्रैः त्वां अभिष्टुवन्ति किमर्थं पूर्वपीतये सर्वेभ्योदेवेभ्यः पूर्वं प्रथमतएव सोमस्य पानाय । सवनमुखेहि चमसगणेरिन्द्रस्यैव सोमोहूयते तथा समीचीनासः सङ्गताः ऋभवः प्रथमधाचकेन शब्देन त्रयोप्युपलक्ष्यन्ते ऋभुर्विभ्वावाजइत्येतेच

समस्वरन् त्वामेव सम्यक् अस्तुवन्। स्वृशब्दोपतापयोः रुद्राः रुद्रपुत्राः मरुतश्च पूर्व्यं पुरातनं वृद्धं त्वामेवगृणन्त अभ्यस्तुवन् वृत्रवधसमये प्रहरभगवोजहिवीरयस्वेत्येवंरूपया वाचा त्वां स्तुतवन्तइत्यर्थः ॥ ७ ॥

अथाष्टमी—

अस्येदिन्द्रोवावृधेवृष्ण्यंशवोमदेसुतस्यविष्णवि।
अधातमस्यमहिमानमायवोनुष्टुवन्तिपूर्वथा ॥ ८ ॥

अस्य। इत्। इन्द्रः। वृवृधे। वृष्ण्यम्। शवः। मदे।
सुतस्य। विष्णवि। अध। तम्। अस्य। महिमानम्।
आयवः। अनु। स्तुवन्ति। पूर्वऽथा ॥ ८ ॥

अस्येत् अस्यैव यजमानस्य वृष्ण्यं वृषत्वं वीर्यं शवोबलं च इन्द्रोवावृधे वर्धयति सुतस्याभिषुतस्य सोमस्य पानेन विष्णवि कृत्स्नदेहस्यव्यापके मदे हर्षे सति तस्यैव यजमानस्य बलं वर्धयतीत्यर्थः। अधास्मिन्काले अस्येन्द्रस्य तं उक्तगुणं महिमानं महत्त्वं आयवोमनुष्याः अनुष्टुवन्ति आनुपूर्व्येण स्तुवन्ति। पूर्वथा पूर्वशब्दादिवार्थे प्रत्नपूर्वेत्यादिना थाल् प्रत्ययः यथा पूर्वस्मिन् काले अस्तुवन् एवमिदानीमपि तेनैवक्रमेण स्तुवन्तीत्यर्थः ॥ ८ ॥

ज्योतिष्टोमे माध्यन्दिनसवने ब्रह्मशस्त्रे तत्त्वायामीति प्रगाथोनुरूपः सूत्रितंच—तत्त्वायामिसुवीर्यमिति प्रगाथौ स्तोत्रियानुरूपाविति। चातुर्विंशिकेहनि माध्यन्दिनसवनेप्ययंप्रगाथस्तस्यैवानुरूपः सूत्रितंच—तत्त्वायामिसुवीर्यमभिप्रवःसुराधसमिति।

तत्र प्रथमा सूक्ते नवमी—

तत्त्वायामिसुवीर्यंतद्ब्रह्मपूर्वचित्तये।
येनायतिभ्योभृगवेधनेहितेयेनप्रस्कण्वमाविथ ॥ ९ ॥

तत्। त्वा। यामि। सुऽवीर्यम्। तत्। ब्रह्म। पूर्वऽचित्तये।
येन। यतिऽभ्यः। भृगवे। धने। हिते। येन।
प्रस्कण्वम्। आविथ ॥ ९ ॥

---

१ ऐ० ब्रा० ३. १७.।

हे इन्द्र तत्सुवीर्यं शोभनवीर्यं त्वा त्वां यामि याचामि छान्दसोवर्णलोपः। तथा तद्रक्षपरिवृढमन्नं पूर्वचित्तये पूर्वप्रज्ञानाय अन्येभ्यः पूर्वमेव लाभाय त्वां याचामि धने हिते अभीष्टे राति येन सुवीर्येण यतिभ्यः कर्मसूपरतेभ्यः अयष्टृभ्योजनेभ्यः सकाशाद्धनमाहृत्य भृगवे महर्षये प्रयच्छसि। यद्वा कर्मसु नियताअङ्गिरसोयतयः तेषामर्थं धनं प्रयच्छसि तादर्थ्येचतुर्थी येनच ब्रह्मणा प्रस्कण्वं कण्वप्रभवं कण्वस्य पुत्रमृषिं आविथ ररक्षिथ तदुभयं याचामीत्यन्वयः॥९॥

अथ दशमी—

येनासमुद्रमसृजोमहीरपस्तदिन्द्रवृष्णितेशवः।
सद्यःसोअस्यमहिमानसंनशेयंक्षोणीरनुचक्रदे॥ १० ॥ २६॥

येन। समुद्रम्। असृजः। महीः। अपः। यत्। इन्द्र। वृष्णि।
ते। शवः। सद्यः। सः। अस्य। महिमा। न। सम्ऽनशे।
यम्। क्षोणीः। अनुऽचक्रदे॥ १०॥ २६॥

हे इन्द्र येनात्मीयेनबलेन समुद्रं अब्धिं प्रति महीर्महतीः अपउदकानिअसृजः व्यसृजः महान्समुद्रोयावद्भिर्जलैः पूर्यते तावन्ति जलानि पुरा त्वं सृष्टवानित्यर्थः। ते त्वदीयं तच्छवोबलं वृष्णि वर्षकं अभीष्टफलदमित्यर्थः अस्येन्द्रस्य महिमा न संनशे न सम्यग्व्यापनीयः परैरप्रधृष्यइत्यर्थः। नशेःकृत्यार्थेकिन्प्रत्ययः। यं महिमानं क्षोणीः क्षोणी पृथिवी अनुचक्रदे अनुगच्छति क्रदिरत्रगत्यर्थः यदधीनावर्ततइत्यर्थः॥१०॥

॥ इति पंचमस्य सप्तमे षड्विंशोवर्गः॥ २६॥

अथैकादशी—

शग्धीनइन्द्रयत्त्वारयिंयामिसुवीर्यम्।
शग्धिवाजायप्रथमंसिषासतेशग्धिस्तोमायपूर्व्य॥ ११॥

शग्धि। नः। इन्द्र। यत्। त्वा। रयिम्। यामि। सुऽवीर्यम्।
शग्धि। वाजाय। प्रथमम्। सिसासते। शग्धि।
स्तोमाय। पूर्व्य॥ ११॥

हे इन्द्र सुवीर्यं शोभनवीर्योपेतं बहुव्रीहौ वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वं यद्रयिं धनं त्वा त्वां यामि याचामि छान्दसोवर्णलोपः नोस्मभ्यं तद्धनं शग्धि देहि शक्तिरत्र दानार्थः त-स्माल्लोटि हौ छान्दसोविकरणस्यलुक् । हुझल्भ्यइतिहेर्धित्वं । तथा सिषासते संभक्तुमिच्छते सनतेः सनि सनीवन्तर्धेति विकल्पनादिड्भावे जनसनखनामित्यात्वम् । वाजाय वाजइत्यन्ननाम तेनच तद्वान् लक्ष्यते हविष्मते यजमानाय प्रथमं सर्वेभ्यः पूर्वमेव शग्धि धनं प्रयच्छ । यद्वा वाजा-येति द्वितीयार्थे चतुर्थी कर्मभिस्त्वां संभक्तुमिच्छते जनाय प्रथमं वाजाय वाजमन्नं शग्धि दे-हि पश्चात् स्तोमाय स्तोत्रे हे पूर्व्य पूर्वस्मिन्काले भव चिरन्तनेन्द्र शग्धि देहि स्तौतेः कर्तरि अर्तिस्तुस्वित्यादिना मन्प्रत्ययः ॥ ११ ॥

अथ द्वादशी—

शग्धीनोअस्ययद्धपौरमाविथधियंइन्द्रसिषासतः ।
शग्धियथारुशमंश्यावकंकृपमिन्द्रप्रावःस्वर्णरम् ॥ १२ ॥

शग्धि । नः । अस्य । यत् । ह । पौरम् । आविथ । धियः ।
इन्द्र । सिषासतः । शग्धि । यथा । रुशमम् । श्यावकम् ।
कृपम् । इन्द्र । प्र । आवः । स्वःऽनरम् ॥ १२ ॥

हे इन्द्र धियः कर्माणि स्तोत्राणि वा सिषासतः संभक्तवतः नोस्माकं सम्बन्धिनोस्य य-जमानस्य तद्धनं शग्धि प्रदेहि । यद्ध येन खलु धनेन पौरं पुरुर्नामराजा तस्य पुत्रं आविथ रर-क्षिथ। अपिच हे इन्द्र रुशमं श्यावकं कृपं एतन्नामकांस्त्रीन्राजर्षीन् यथा येन प्रकारेण प्रावः प्रारक्षः तथा स्वर्णरं सर्वस्य हविषोनेतारं प्रापयितारं यद्वा स्वः स्वर्गं प्रति नेतव्यं इमं यजमानं शग्धि शक्तं कुरु धनादिसंपत्त्या यागानुष्ठानाय यथाशक्तोभवति तथाकुर्वित्यर्थः । इन्द्रेत्यामन्त्रित-स्य पादादित्वेनाष्टमिकनिघाताभावे षाष्ठिकमामन्त्रिताद्युदात्तत्वम् ॥ १२ ॥

चातुर्विंशिकेहनि माध्यन्दिने सवने ब्रह्मशस्त्रे कन्नव्यइति कद्वत्प्रगाथः सूत्रितश्च-कन्नव्योअत-सीनांकद्वन्वस्याकृतमिति कद्वन्तःप्रगाथाइति अहर्गणेषु द्वितीयादिष्वहःसु तस्मिन्शस्त्रे तस्यैवा-यं प्रगाथः सूत्र्यतेहि—आरंभणीयाः पर्यासानकद्वतोहरहःशस्यानीति होत्रकाद्वितीयादिष्वेवेति।

तत्राया सूक्ते त्रयोदशी—

कन्नव्योंअतसीनांतुरोगृणीतमर्त्यः ।
नहीन्वस्यमहिमानमिन्द्रियंस्वंर्गृणन्तंआनशुः ॥ १३ ॥

कत् । नव्यः । अतसीनाम् । तुरः । गृणीत । मर्त्यः । नहि । नु ।
अस्य । महिमानम् । इन्द्रियम् । स्वः । गृणन्तः । आनशुः ॥ १३ ॥

अतसीनां अतीतानां सन्ततगामिनीनां स्तुतीनां तुरः प्रेरयिता मर्त्योमरणधर्मा नव्योभिनवः इदानींतनः कत् कोनाम स्तोता गृणीत इन्द्रं स्तुयात् अल्पमतेरिदानींतनैरिन्द्रः स्तोतुं नशक्यत-इत्यर्थः । गृशब्दे क्र्यादिकः प्वादीनांह्रस्वइतिह्रस्वत्वम् । नु पुरा पूर्वस्मिन्नपिकाले विद्यमानाः स्वः सर्वे गृणन्तः स्तोतारः यद्वा स्वः सुष्ठु अरणीयं प्राप्तव्यमिन्द्रं गृणन्तः स्तुवन्तोजनाः इन्द्रियं इन्द्र-स्यलिङ्गं इन्द्रस्यैवासाधारणं अस्येन्द्रस्य महिमानं महत्त्वं नत्वानशुः न खलु प्रापुवन् अश्नो-तेर्लिटि व्यत्ययेनपरस्मैपदम् अतआदेरित्यभ्यासस्यात्वम् अश्नोतेश्चेतिनुट् हिचेति निघातप्र-तिषेधः ॥ १३ ॥

अथ चतुर्दशी—

कदुंस्तुवन्तंऋतयन्तदेवतऋषिःकोविप्रंओहते ।
कदाहवंमघवन्निन्द्रसुन्वतःकदुंस्तुवतआगमः ॥ १४ ॥

कत् । ऊँ इति । स्तुवन्तः । ऋतऽयन्त । देवता । ऋषिः । कः ।
विप्रः । ओहते । कदा । हवम् । मघऽवन् । इन्द्र ।
सुन्वतः । कत् । ऊँ इति । स्तुवतः । आ । गमः ॥ १४ ॥

हे इन्द्र स्तुवन्तः स्तोत्रं कुर्वन्तः कदु के खलु जनाः देवतादेवात्तलिति स्वार्थिकस्तल्प्र-त्ययः व्यत्ययेन प्रथमा देवं त्वामुद्दिश्य ऋतयन्त ऋतं यज्ञमैच्छन् त्वदीययागेच्छापि दुर्लभा दूरे-त्वद्यागकथा ऋषिर्द्रष्टा विप्रोमेधावी कः स्तोता ओहते वहति त्वां स्तुतीः प्रापयति न कश्चि-दपि त्वां स्तोतुं शक्नोतीत्यर्थः । यतएवमतः कारणात् हे मघवन् धनवन्निन्द्र अनुग्रहीतात्वये-वागन्तव्यं सत्वं कदा कस्मिन्काले सुन्वतः सोमाभिषवं कुर्वतोयजमानस्य हवमाह्वानं आगमः आगच्छः । कदु कदाच कस्मिंश्चकाले स्तुवतः केवलं स्तोत्रं कुर्वतो यजनमानस्यहवमाह्वानं आगमः

अभ्यगच्छः सुन्वतः स्तुवतइत्युभयत्र शतुरनुमइतिविभक्तेरुदात्तत्वम् गमेर्लुङि लृदित्वात् च्लेर-ङादेशः ॥ १४ ॥

ज्योतिष्टोमे माध्यन्दिनसवने ब्रह्मशस्त्रे उदुत्यइतिप्रगाथोनुरूपानन्तरं शंसनीयः सूत्रितश्च-उदुत्येमधुमत्तमा इन्द्रःपूर्भिदिति । चातुर्विंशिके माध्यन्दिने सवने तस्मिन्नेवशस्त्रे अयं प्रगाथोवैकल्पिकोनुरूपः सूत्रितश्च-उदुत्येमधुमत्तमास्त्वमिन्द्रप्रतूर्तिष्विति ।

तत्राद्या सूक्ते पञ्चदशी-

उदुत्येमधुमत्तमागिरःस्तोमासईरते ।
सत्राजितोधनसाअक्षितोतयोवाजयन्तोरथाइव ॥ १५ ॥ २७ ॥

उत् । ऊँ इति । त्ये । मधुमत्ऽतमाः । गिरः । स्तोमासः ।
ईरते । सत्राऽजितः । धनऽसाः । अक्षितऽऊतयः ।
वाजऽयन्तः । रथाःऽइव ॥ १५ ॥ २७ ॥

त्ये ते प्रसिद्धाः मधुमत्तमा अतिशयेन मधुराः गिरः अप्रगीताः शस्त्ररूपावाचः स्तोमासः प्रगीतानि बहिष्पवमानादीनि स्तोत्राणि च उदीरते हे इंद्र त्वामुद्दिश्योद्गच्छन्ति ऊर्ध्वं प्रसरन्ति ईरगतौ आदादिकः । तत्रदृष्टान्तः-सत्राजितः सहैव शत्रून् जयन्तः अतएव धनसाः धनानि संभजन्तः वनषणसंभक्तौ जनसनखनक्रमगमोविट् विड्वनोरनुनासिकस्यादित्यात्वं अक्षितोतयः अक्षिताः क्षयरहिता ऊतयो रक्षा येषां ते तथोक्ताः क्षियोभावेनिष्ठा निष्ठायामण्यदर्थइति पर्युदासाद्दीर्घाभावः अतएव क्षियोदीर्घादिति निष्ठानत्वाभावश्च । वाजयन्तः वाजमन्नमिच्छन्तः क्यचि न छन्दस्यपुत्रस्येति इत्वदीर्घयोः प्रतिषेधः एवंगुणविशिष्टाः रथाइव ते यथा विविधमितस्ततउत्तिष्ठन्ति तद्वदुदीरत इत्यर्थः ॥ १५ ॥

॥ इति पंचमस्य सप्तमे सप्तविंशोवर्गः ॥ २७ ॥

अथ षोडशी-

कण्वाइवभृगवःसूर्याइवविश्वमिद्धीतमानशुः ।
इन्द्रंस्तोमेभिर्महयन्तआयवःप्रियमेधासोअस्वरन् ॥ १६ ॥

कण्वाःऽइव । भृगवः । सूर्याःऽइव । विश्वम् । इत् ।
धीतम् । आनशुः । इन्द्रम् । स्तोमेभिः । महयन्तः ।
आयवः । प्रियऽमेधासः । अस्वरन् ॥ १६ ॥

कण्वाइव कण्वगोत्रोत्पन्नाऋषयइव स्तुवन्तो भृगवो भृगुगोत्रोत्पन्नाऋषयः धीतमाध्यातं विश्वमिव व्याप्तं तमेवेन्द्रं आनशुः व्यापुः सूर्याइव यथा सूर्यरश्मयः सर्वं जगद्व्याप्नुवन्ति तद्वत् । अपिच प्रियमेधासः प्रियप्रज्ञाः एतत्संज्ञका आयवोमनुष्याः तमेवेन्द्रं महयन्तः पूजयन्तः स्तोमेभिः स्तोत्रैरस्वरन् अस्तुवन् स्वृशब्दोपतापयोः भौवादिकः ॥ १६ ॥

अथ सप्तदशी–

युक्ष्वाहिवृत्रहन्तमहरीइन्द्रपरावतः ।
अर्वाचीनोमघवन्त्सोमपीतयउग्रऋष्वेभिरागहि ॥ १७ ॥

युक्ष्व । हि । वृत्रहन्ऽतम । हरी इति । इन्द्र । पराऽवतः ।
अर्वाचीनः । मघऽवन् । सोमऽपीतये । उग्रः । ऋष्वेभिः । आ । गहि ॥ १७ ॥

हे वृत्रहन्तम वृत्रंहतवान् वृत्रहा अतिशयेन हतवान् वृत्रहन्तमः यथा पुनर्नोत्तिष्ठति तथा हतवानित्यर्थः । आनोनुडिति तमपोनुट् । हे तादृशेन्द्र हरी त्वदीयावश्वौ युक्ष्व हिरवधारणे आत्मीये रथे योजयैव । हे मघवन् धनवन् उग्र उद्गूर्णस्त्वं सोमपीतये सोमपानार्थं दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् अर्वाचीनोऽस्मदभिमुखः ऋष्वेभिः ऋष्वैर्दर्शनीयैर्मरुद्भिः सार्धं परावतः दूरनामैतत् दूरेवर्तमानात् द्युलोकात् आगहि आगच्छ । गमेः लोटः सेर्हिः छान्दसः शपोलुक् अनुदात्तोपदेशेत्यनुनासिकलोपः तस्यासिद्धवदत्राभादित्यसिद्धत्वाद्धेर्लुगभावः ॥ १७ ॥

अथाष्टादशी–

इमेहितेकारवोवावशुर्धियाविप्रासोमेधसातये ।
सत्वंनोमघवन्निन्द्रगिर्वणोवेनोनशृणुधीहवम् ॥ १८ ॥

इमे । हि । ते । कारवः । वावशुः । धिया । विप्रासः ।
मेधऽसातये । सः । त्वम् । नः । मघऽवन् । इन्द्र ।
गिर्वणः । वेनः । न । शृणुधि । हवम् ॥ १८ ॥

कारव कर्मणा कर्तार विप्रासोमेधाविन इमे इमे खलु यजमाना विप्रा स्तुत्या हे इन्द्र-ते त्वा वावशु पुन पुनरस्तुवन् वाश्रृ शब्दे इत्यस्माद्यङ्लुङन्ताद्रूपमेतत् । यद्वा वावशु पुन पुन-रकामयन्त वशकान्तौ अस्माद्यङ्लुङन्ताद् लङि सिजभ्यस्तेतिझेर्जुस् बाहुल्कोऽडभाव लिटि वा तुजादित्वादभ्यासदीर्घत्व हिचेतिनिघातप्रतिषेध । किमर्थम् मेधसातये मेधस्य यागस्य स-भजनार्थं सनते किनि जनसनखनामित्यात्वम् दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् । हे मघ-वन् धनवन्गिर्वणोगीर्भिर्वननीय नोस्माक हव स्तोत्र सपूर्वोक्तगुणस्त्व शृणुधि शृणु बुध्यस्व वे-नोन वेनति कान्तिकर्मा यथा कान्त जाताभिलाष पुरुष कामयितव्य एकाग्रेण शृणोति तद्वत् । श्रुशृणुपृकृवृभ्यइति हेर्धित्वम् अन्येषामपीतिसाहितिकोदीर्घ ॥ १८ ॥

अथैकोनविंशी—

निरिन्द्रबृहतीभ्योवृत्रंधनुभ्योअस्फुर ।
निरर्बुदस्यमृगयस्यमायिनोनि पर्वतस्यगाआज ॥ १९॥

नि । इन्द्र । बृहतीभ्यः । वृत्रम् । धनुऽभ्यः । अस्फुर । नि ।
अर्बुदस्य । मृगयस्य । मायिनः । नि । पर्वतस्य । गाः । आज ॥१९॥

हे इन्द्र वृत्रमावरकमसुर बृहतीभ्यो महद्भ्यो लिङ्गव्यत्यय धनुभ्यो धनुर्भ्य कोदण्डेभ्य छान्दसोरेफलोप हेतौ पञ्चमी महद्भिर्धनुर्भिर्हेतुभि निरस्फुर स्फुरतिर्वधकर्मा निरवधी नि शे-षेण हतवानसि । यद्वा वृत्रमावरक मेघ धनुभ्य धन्वन्ति गच्छन्तीति धनवआप महतीभ्योऽद्भ्य तादर्थ्येचतुर्थी ईदृशीनामपा लाभार्थ निरवधी अपिच मायिनोमायाविन अर्बुदस्य एतत्स-ञ्ज्ञकस्यासुरस्य मृगयस्य एतत्सञ्ज्ञकस्यच उभयत्र कर्मणि षष्ठी इमावप्यसुरौ निरस्फुर नि शे-षेणावधी मायाशब्दस्य व्रीह्यादिषुपाठात् व्रीह्यादिभ्यश्चेति मत्वर्थीयइनि यथा पर्वतस्य ब-लनाम्नासुरेण गवामदर्शनाय निहितस्य गिरे सकाशान्निर्गमनलेनापहता निराज निरग मय अजगतिक्षेपणयो ॥ १९ ॥

अथ विंशी—

निरग्नयोरुरुचुर्निरुसूर्योनि सोमइन्द्रियोरस ।
निरन्तरिक्षादधमोमहामहिंकृपेतदिन्द्रपौंस्यम् ॥ २० ॥ २८॥

निः । अग्रयः । रुरुचुः । निः । ऊँ इति । सूर्यः ।
निः । सोमः । इन्द्रियः । रसः । निः । अन्तरिक्षात् । अधमः ।
महाम् । अहिम् । कृपे । तत् । इन्द्र । पौंस्यम् ॥ २० ॥ २८ ॥

हे इन्द्र महां महान्तं कृत्स्नस्य जगतो व्यापकं अहिं आहननशीलं वृत्रं यदा त्व-मन्तरिक्षादाकाशात् निरधमोनिरगमयः धमतिर्गतिकर्मा तत्तदानीं पौंस्यं वृत्रहननहेतुभूतं बलं कृपे कुरुषे पुरस्कुरुषे करोतेश्छान्दसोविकरणस्य लुक् । अग्नयश्च त्रिस्थानगताः नीरुरुचुः निः शेषेण दिदीपिरे सूर्यः प्रेरकआदित्योपि निःशेषेण दिदीपे इन्द्रियः इन्द्रेण सेव्योरसः रसा-त्मकः अमृतमयः सोमश्च निःशेषेण दिदीपे अग्न्यादयः सर्वे पूर्वं वृत्रेणावृतत्वान्निःप्रभाः सन्तः इदानीं तस्मिन्नावरके हते सम्यक् प्राकाशिषतेत्यर्थः ॥ २० ॥

॥ इति पञ्चमस्य सप्तमेष्टाविंशो वर्गः ॥ २८ ॥

अथैकविंशी—

यंमेदुरिन्द्रोमुरुतःपाकस्थामाकौरयाणः ।
विश्वेषांत्मनाशोभिष्ठमुपेवदिविधावंमानम् ॥ २१ ॥

यम् । मे । दुः । इन्द्रः । मरुतः । पाकऽस्थामा । कौरयाणः ।
विश्वेषाम् । त्मना । शोभिष्ठम् । उपऽइव । दिवि । धावमानम् ॥२१॥

इदमादिकेन चतुर्कचेन कुरुयाणपुत्रात् पाकस्थामनाम्नोराज्ञो दानं लब्ध्वा मेध्यातिथि-स्तदीयं दानं स्तौति । यं यादृशं धनसंघं मे मह्यं इन्द्रो मरुतश्च दुः दत्तवन्तः तादृशमेव धनस-मूहंकौरयाणः शत्रून्प्रति युद्धाभिमुख्येन कृतं यानं हस्त्यश्वादिकं येन असौ कुरयाणः तस्य पुत्रः कौरयाणः पाकस्थामा तिष्ठत्यनेनेति स्थाम बलं परिपक्वबलः एतत्संज्ञो राजा मह्यं प्रादात् ददातेर्लुङि गातिस्थेति सिचोलुक् अडभावश्छान्दसः कीदृशं धनसंघं विश्वेषां सर्वेषां धनानां मध्ये त्मना आत्मना स्वतएव शोभिष्ठं अतिशयेन शोभावन्तम् मन्त्रेष्वाङ्यादेरित्यात्मनआका-रलोपः शोभावच्छब्दादातिशायनिकइष्ठन् विन्मतोर्लुक् यस्येतिलोपः अतिशयेन शोभावत्वे दृष्टान्तः—दिव्याकाशे उपेव धावमानं प्रभाभिरुपेतं शीघ्रगामिनं सूर्यमिव शोभावन्त-मित्यर्थः ॥ २१ ॥

अथ द्वाविंशी–

रोहि॑तं मे पाक॑स्थामा सु॒धुरं॑ कक्ष्य॒प्राम् । अदा॑द्रा॒यो वि॒बोध॑नम् ॥ २२ ॥

रोहि॑तम् । मे॒ । पाक॑ऽस्थामा । सु॒ऽधुर॑म् ।
क॒क्ष्य॒ऽप्राम् । अदा॑त् । रा॒यः । वि॒ऽबोध॑नम् ॥ २२ ॥

पाकस्थामा राजा रोहितं लोहितवर्णं वृषभमश्वं वा मे मह्यं अदात् दत्तवान् कीदृशं सुधुरं शोभनधुरं शोभनवहनप्रदेशं ऋक्पूरब्धूरित्यकारः समासान्तः क्रत्वादयश्चेति बहुव्रीहावुत्तरपदाद्युदात्तत्वम् । कक्ष्यप्रां कक्ष्या कक्षयोर्बाहुमूलयोर्बध्यमाना रज्जुः तां प्रातारं पूरयितारं पीवरमित्यर्थः । प्रा पूरणे रायो धनस्य विबोधनं विशेषेण बोधकं बहुधनप्राप्तिहेतुमित्यर्थः । ऊडिदमित्यादिना रायो विभक्तिरुदात्ता ॥ २२ ॥

अथ त्रयोविंशी–

यस्मा॑ अ॒न्ये दश॒ प्रति॒ धुरं॒ वह॑न्ति॒ वह्न॑यः । अस्तं॒ वयो॒ न तुग्र्य॑म् ॥ २३ ॥

यस्मै॑ । अ॒न्ये । दश॑ । प्रति॑ । धुर॑म् । वह॑न्ति ।
वह्न॑यः । अस्त॑म् । वयः॑ । न । तुग्र्य॑म् ॥ २३ ॥

पूर्वोक्त एवाश्वो विशेष्यते यस्मै षष्ठ्यर्थे चतुर्थी यस्याश्वस्य वृषभस्य वा धुरं वोढव्यं युगधुरं अन्ये प्रकृतादस्मात् विलक्षणा दशसङ्ख्याकाः वह्नयो वोढारोऽश्वाः बलीवर्दा वा प्रतिनिधयः सन्तः मां वोढुं वहन्ति । विभर्ति बहूनामेकत्र वहने दृष्टान्तः–अस्तं अस्यते क्षिप्यते तस्मिन् पदार्थजातमित्यस्तं गृहं प्रति वयो न गन्तारोऽश्वाः यथा तुग्र्यं तुग्रपुत्रं भुज्युं समुद्रतीराद्वहन् तद्वत् तादृशमश्वं मह्यं प्रादादिति पूर्वस्याम्नच्यन्वयः । भुज्योर्वहनं च नासत्याभुज्युमूहथुरित्यादावगन्तव्यम् । यद्वा यस्मा इति कर्मणि चतुर्थी यं रथं अन्ये दशसंख्याका वह्नयो वोढारोऽश्वाः धुरं वहनप्रदेशं प्रतिगताः सन्तो वहन्ति तादृशं रथमपि मह्यं दत्तवानित्यर्थः ॥ २३ ॥

अथ चतुर्विंशी–

आ॒त्मा पि॒तुस्त॒नूर्वास॑ ओजो॒दा अ॒भ्यञ्ज॑नम् ।
तु॒रीय॒मिद्रोहि॑तस्य॒ पाक॑स्थामानं भो॒जं दा॒तार॑मब्रवम् ॥ २४ ॥ २९ ॥

१ ऋ० सं० १. ८. ८.

आ॒त्मा । पि॒तुः । त॒नूः । वासः॑ । ओ॒जः॒ऽदाः ।
अ॒भि॒ऽअञ्ज॑नम् । तु॒रीय॑म् । इत् । रोहि॑तस्य ।
पाक॑ऽस्थामानम् । भो॒जम् । दा॒तार॑म् । अ॒ब्र॒व॒म् ॥ २४ ॥ २९ ॥

अयं पाकस्थामा आत्मा स्वयं पितुः जनकस्य तनूः तनयः पिता यथासन्मार्गवर्तितया प्रशस्तः एवमयमपीत्यर्थः । तथा वासः वासयिता निवासयिता वासयतेरौणादिकःअसुन् अभ्यञ्जनं अभिव्यक्तं यथा भवति तथा ओजोदाः ओजसो बलस्य दाता धारयिता वा यद्वा आत्मा सततगामी पितुरित्यन्ननाम प्राप्तमन्नं येन दत्तं तनूर्विस्तृतं वासो वस्त्रम् अभ्यंजनं अभ्यंजनसाधनं घृततैलादिकं च येन दत्तम् यश्च ओजोदाः बलस्य दाता तं पाकस्थामानं तुरीयं स्वकीयप्रपितामहापेक्षया चतुर्थं । यद्वा तुरीयं शत्रूणां तूर्वकं हिंसितारं भोजं शत्रूणां भोजयितारं रोहितस्य लोहितवर्णस्य पूर्वोक्ताश्वस्य दातारम् एवंगुणकं पाकस्थामानं अब्रवं उक्तेन प्रकारेणास्तौषम् इदिति पूरकः ॥ २४ ॥

॥ इति पञ्चमस्य सप्तमे एकोनत्रिंशो वर्गः ॥ २९ ॥

यदिन्द्रेति एकविंशर्चं चतुर्थं सूक्तं काण्वगोत्रस्य देवातिथेरार्षं बृहत्यादिभिः ... अद्ययेषा पुरउष्णिक् शिष्टासु अयुजो बृहत्यः युजः सतोबृहत्यः स्थूरं राधइत्यादिभिस्तिसृभिः कुरुङ्गदानस्य स्तूयमानत्वात् तास्तद्देवताकाः तत्पूर्वाः पञ्चदशाद्याश्चतस्रः पूषदेवताका इन्द्रदेवताका वा शिष्टा ऐन्द्र्यः तथा चानुक्रान्तम्—यदिन्द्र सैका देवातिथिस्तृचोन्त्यः पुरउष्णिगन्तः कुरुङ्गस्य दानस्तुतिस्तत्पूर्वाश्चतस्रः पौष्ण्यो वेति । महाव्रते निष्केवल्ये बार्हततृचाशीतौ आद्याश्चतुर्दशर्चः शंसनीयाः तथैव पञ्चमारण्यके—यदिन्द्र प्रागपागुदगिति । चतुर्दशेति चातुर्विंशिकेहनि माध्यन्दिनसवने च्छावाकशस्त्रे आद्यः प्रगाथो वैकल्पिकः स्तोत्रियः सूत्र्यते हि—यदिन्द्र प्रागपागुदग्यथा गौरो अपा कृतमिति ।

तत्र प्रथमा—

यदि॑न्द्र॒ प्रागपा॒गुद॒ङ्न्य॑ग्वा हू॒यसे॒ नृभिः॑ ।
सिमा॑ पु॒रू नृषू॑तो अ॒स्यान॒वेऽसि॑ प्रशर्ध तु॒र्वशे॑ ॥ १ ॥

यत् । इन्द्र । प्राक् । अपाक् । उदक् । न्यक् । वा ।
हूयसे । नृऽभिः । सिमं । पुरु । नृऽसूतः । असि । आनवे ।
असि । प्रऽशर्ध । तुर्वशे ॥ १ ॥

हे इन्द्र यद् यदि प्राक् प्राच्यांदिशि वर्तमानैः सप्तम्यन्ताद्दिक्शब्दाद्दिग्वस्यास्तातेरच्छेर्लुगिति लुक्। अपाक् प्रतीच्यां दिशि वर्तमानैः यद्विवा उदक् उदीच्यां दिशि वर्तमानैः यद्वा न्यक् नीच्यां दिशि अधस्ताद्वर्तमानैः न्यधीचेति नेःप्रकृतिस्वरत्वम् उदात्तस्वरितयोर्यणइति परस्यानुदात्तस्य स्वरितत्वम् एवंभूतैर्नृभिः स्तोतृभिः त्वं हूयसे स्वस्वकार्याय आहूयसे हे सिम श्रेष्ठेन्द्र । सिमइति वैश्रेष्ठमाचक्षतइति वाजसनेयकम्। यद्यप्येवं बहुभिराहूयसे तथापि आनवे आनुर्नामराजा तस्यपुत्रे राजर्षौ पुरु बहुलं नृपूतः नृभिस्तदीयैःस्तोतृभिः प्रेरितोसि भवसि राज्ञोहितकरणे त्वां स्तोवारः प्रेरयन्तीत्यर्थः पूप्रेरणे अस्मात्कर्मणि निष्ठा। तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरत्वम्। अपिच हे प्रशर्ध प्रकर्षेण शर्धयितरभिभवितरिन्द्र तुर्वशेएतत्संज्ञे च राजनि नृपूतोसि नृभिः प्रेरितोभवसि ॥ १ ॥

अथ द्वितीया—

यद्वारुमेरुशमेश्यावकेकृपइन्द्रमादयसेसचा ।
कण्वासस्त्वाब्रह्मभिःस्तोमवाहसइन्द्रायच्छन्त्यागहि ॥ २ ॥

यत् । वा । रुमे । रुशमे । श्यावके । कृपे । इन्द्र । मादयसे ।
सचा । कण्वासः । त्वा । ब्रह्मऽभिः । स्तोमऽवाहसः ।
इन्द्र । आ । यच्छन्ति । आ । गहि ॥ २ ॥

यद्वा यद्यपि रुमादिषु चतुर्षु राजसु हे इन्द्र त्वं सचा सह मादयसे माद्यसि तथापि स्तोमवाहसः स्तोमानां स्तोत्राणां वोढारः कण्वासः कण्वगोत्राऋषयः ब्रह्मभिः परिवृढैर्मन्त्रैर्हविर्भिर्वा हे इन्द्र त्वां आयच्छन्ति आगमयन्ति । यद्वा द्वितीयार्थे तृतीया। ब्रह्मभिः ब्रह्माणि हवींषि आभिमुख्येन प्रयच्छन्ति ददति दाणदाने पाघ्रेत्यादिना यच्छादेशः अतस्त्वं आगहि शीघ्रमागच्छ गमेर्लोटिछान्दसः शपोलुक् ॥ २ ॥

चातुर्विंशिकेऽहनि माध्यन्दिनसवनेच्छावाकशस्त्रे यथेति प्रगाथोनुरूपः सूत्रितश्च—यथा गौरोअपाकृतमित्यच्छावाकस्येति ।

तत्र प्रथमा सूक्ते तृतीया—

यथांगौरोअपाकृतंतृष्यन्नेत्यवेरिणम् ।
आपित्वेनःप्रपित्वेतूयमागंहिकण्वेषुसुसचापिंब ॥ ३ ॥

यथा । गौरः । अपा । कृतम् । तृष्यन् । एति । अव ।
इरिणम् । आऽपित्वे । नः । प्रऽपित्वे । तूयम् । आ ।
गहि । कण्वेषु । सु । सचा । पिब ॥ ३ ॥

गौरोगौरमृगः तृष्यन् पिपासन् अपा अद्भिरुदकैः व्यत्ययेनैकवचनं ऊडिदमित्यादिना विभक्तेरुदात्तत्वम् कृतं संपूर्णत्वंकृतम् इरिणं निस्तृणं तटाकदेशं यथा येनप्रकारेण अवेति अवगच्छति अवशब्दःअभिशब्दस्यार्थे अभिमुखः सन् शीघ्रं गच्छति तथा आपित्वे बन्धुत्वे प्रपित्वे प्राप्ते सति हे इन्द्र त्वं नोस्मान् तूयं क्षिप्रनामैतत् शीघ्रमागह्यागच्छ आगत्यच कण्वेषु कण्वपुत्रेष्वस्मासु सचा सह एकयत्नेनैव विद्यमानं सर्वं सोमं सु सुष्ठु पिब ॥ ३ ॥

अथ चतुर्थी—

मन्दंन्तुत्वामघवन्निन्द्रेन्दंवोराधोदेयायसुन्वते ।
आमुष्यासोमंमपिवश्चमूसुतंज्येष्ठंतद्दंधिषेसहंः ॥ ४ ॥

मन्दन्तु । त्वा । मघऽवन् । इन्द्र । इन्दवः । राधःऽदेयाय ।
सुन्वते । आऽमुष्य । सोमम् अपिबः । चमू इति । सुतम् ।
ज्येष्ठम् । तत् । दधिषे । सहः ॥ ४ ॥

हे मघवन् धनवन्निन्द्र इन्दवः क्लेदनाः सोमाः त्वां मन्दन्तु मादयन्तु हर्षयन्तु मन्देर्व्यत्ययेन परस्मैपदम् । किमर्थं सुन्वते सोमाभिषवं कुर्वते यजमानाय राधोदेयाय राधोधनस्य च दानार्थम् ददातेरचोयदिति भावेयत् ईद्यतीतीकारः यतोनावइत्याद्युदात्तत्वात्त्थद्युत्तरपदमन्तिस्वरत्व-

म् शत्रुरनुमइति सुन्वच्छब्दात्परा विभक्तिरुदात्ता। अपिच त्वं सोमं आमुष्य आमोषणं कृत्वा अदत्तमपि बलादपहृत्य अपिबः पीतवानसि। सयज्ञवेशसं कृत्वा प्रासहासोममपिबदितिश्रुतिः। कीदृशं सोमं चमू चम्वोः अधिषवणफलकयोः सुतमभिषुतम्। यद्वा चमूभ्यां चमसाभ्यां होतुर्मैत्रावरुणस्य च संबन्धिभ्यां संस्कृताभिः वसतीवरीभिः सुतमभिषुतं यस्मादेवं तस्मात्कारणात् ज्येष्ठं प्रशस्यतमं वृद्धतमं वा सहोबलं दधिषे हेइन्द्र त्वं धारयसि अतोमदीयाअपि सोमास्त्वां मादयन्त्विति प्रार्थ्यते ॥ ४ ॥

अथ पञ्चमी–

प्रचक्रेसहसासहोबभंजमन्युमोजसा।
विश्वेतइन्द्रपृतनायवोयहोनिवृक्षाइवयेमिरे ॥ ५ ॥ ३०॥

प्र। चक्रे। सहसा। सहः। बभञ्ज। मन्युम्। ओजसा। विश्वे।
ते। इन्द्र। पृतनाऽयवः। यहो इति। नि। वृक्षाःऽइव। येमिरे ॥५॥३०॥

सइन्द्रः सहसा आत्मीयेनाभिभवेन वीर्यकर्मणा सहः शत्रूणामभिभवनं प्रचक्रे प्रकर्षेण कृतवान् तथा ओजसा बलेन मन्युं परकीयं क्रोधं बभञ्ज भग्नवान् उत्तरोर्धर्चः प्रत्यक्षकृतः हे यहो महन्नामैतत् हे महन्निन्द्र विश्वे सर्वे पृतनायवः युद्धकामाः शत्रवः ते त्वया वृक्षाइव महीरुहाइव नियेमिरे नियताआसन् यथा वृक्षानिश्चलास्तिष्ठन्ति तद्वन्निर्व्यापारा अभूवन्नित्यर्थः ॥ ५ ॥

॥ इति पञ्चमस्य सप्तमे त्रिंशोवर्गः ॥ ३० ॥

अथ षष्ठी–

सहस्रेणेवसचतेयवीयुधायस्तआनळुपस्तुतिम्।
पुत्रंप्रावर्गंकृणुतेसुवीर्येदाश्नोतिनमउक्तिभिः ॥ ६ ॥

सहस्रेणऽइव। सचते। यविऽयुधा। यः। ते। आनट्।
उपऽस्तुतिम्। पुत्रम्। प्रावर्गम्। कृणुते। सुऽवीर्ये।
दाश्नोति। नमउक्तिऽभिः ॥ ६ ॥

---

१ तै० सं० २. ४.१२.१

हे इन्द्र ते तव उपस्तुतिं स्तोत्रं यः पुरुष आनट् प्राप्नोति त्वां प्रापयति अश्नोतेर्लङि व्यत्ययेन परस्मैपदम्। सचते समवैति षच समवाये सहस्रेणेव यथा सहस्रसंख्येन बलेन तथेत्यर्थः यश्च यजमानो नमउक्तिभिः नमस्कारवचनैः स्तोत्रैः सार्धं दाशोति हवींषि तुभ्यं ददाति दाशृदाने सयजमानः सुवीर्ये शोभनवीर्ययुक्ते सङ्ग्रामे प्रावर्गं प्रकर्षेण शत्रूणां वर्जयितारं पुत्रं कृणुते करोत्युत्पादयति त्वत्प्रसादाल्लभतइत्यर्थः प्रपूर्वाद्वृजेः कृत्यल्युटोबहुलमिति कर्तरि घञ् उपसर्गस्य घञ्यमनुष्यइति दीर्घः थाथादिनोत्तरपदान्तोदात्तत्वम्। यद्वा सुवीर्येइत्येतत्पुत्रस्य विशेषणं द्वितीयार्थे सप्तमी शोभनवीर्यं पुत्रम् बहुव्रीहौ वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् ॥ ६॥

अथ सप्तमी–

मा॒भे॒म॒ मा श्र॑मिष्मो॒ग्रस्य॑ स॒ख्ये तव॑।
म॒हत्ते॒ वृष्णो॑ अभि॒चक्ष्यं॑ कृ॒तं पश्ये॑म तु॒र्वशं॒ यदु॑म् ॥ ७ ॥

मा। भे॒म॒। मा। श्र॒मि॒ष्म॒। उ॒ग्रस्य॑। स॒ख्ये। तव॑।
म॒हत्। ते॒। वृष्णः॑। अ॒भि॒ऽचक्ष्य॑म्। कृ॒तम्। पश्ये॑म।
तु॒र्वश॑म्। यदु॑म् ॥ ७ ॥

हे इन्द्र उग्रस्योद्गूर्णबलस्य तव सख्ये सखित्वे सति वयं माभेम माभैष्म कुतश्चिदपि शत्रोर्भीता माभूम। माश्रमिष्म श्रान्ताः पीडिताश्च माभूम वृष्णः कामानां वर्षितुस्ते तव संबन्धि महत् प्रभूतं कृतं वृत्रवधादिलक्षणं कर्म अभिचक्ष्यं अभितः ख्यापनीयं स्तोतव्यं अतोमहानुभावस्य तव सख्यं प्राप्तानां भीतिश्रमौ न जायेते इत्यर्थः। तत्कथमवगम्यतइतिचेत् उच्यते तुर्वशं एतत्संज्ञं राजर्षिं यदुं एतत्संज्ञं च त्वत्प्रसादात्सुखेन जीवन्तौ पश्येम दृष्टवन्तः खलु वयं अतःकारणात् त्वत्सख्यं प्राप्तस्य भयादिकं न जायतइत्येतदुपपन्नमित्यर्थः ॥ ७॥

अथाष्टमी–

स॒व्याम॑नु स्फि॒ग्यं॑ वावसे॒ वृषा॒ न दा॒नो अ॑स्य रोषति।
मध्वा॒ संपृ॑क्ताः सार॒घेण॑ धे॒नव॒स्तूय॒मेहि॒ द्रवा॒ पिब॑ ॥ ८ ॥

सव्याम् । अनु । स्फिग्यम् । वुवसे । वृषा । न । दानः । अस्य ।
रोपति । मध्वा । सम्ऽपृक्ताः । सारघेण । धेनवः । तूयम् ।
आ । इहि । द्रव । पिब ॥ ८ ॥

वृषा कामानांवर्षितेन्द्रः सव्यां दक्षिणेतरां स्फिग्यं कटिप्रदेशमनु तृतीयार्थे अनोः कर्मप्रवचनीयत्वम् सव्ययास्फिग्या शरीरैकदेशेनैव ववसे वस्ते सर्वभूतजातमाच्छादयति स्वयं कृत्स्नं जगद्व्तीत्यवर्तत इत्यर्थः। निगमान्तरश्च भवति—यदन्ययास्फिग्याक्षामवस्थाइति। अपिच दानः अवखण्डयिता दानअवखण्डने पचाद्यच् सच अस्य इममिन्द्रं नरोपति न हिनस्ति रुप-रिषहिंसायाम्। इन्द्रं हिंसितुं शक्तः कश्चिदपि नास्तीत्यर्थः। यद्वा दानो हविषां दाता यजमानस्य अस्येन्द्रस्य न रोपति रोपं नजनयति सर्वदा हविर्भिः परिचरतीत्यर्थः। उत्तरोर्धर्चः प्रत्यक्षकृतः सारघेण सरघा मधुमक्षिका तत्संबन्धिना मध्वा मधुना लुप्तोपममेतत् मधुनेव रसवता क्षीरादिना श्रयणद्रव्येण संपृक्ताः संसृष्टाः संस्कृताः धेनवः धेनुवत् प्रीतिजनकाअस्मदीयाः सोमाः यद्वा धिवेः प्रीणनार्थाद्धेनवः प्रीणयितारइत्यर्थः अथवा धेट्पाने धेटइच्चेत्यौणादिको-नुप्रत्ययः तत्संनियोगेन इकारान्तादेशश्च पातव्याः सोमाइत्यर्थः। यतएवमतःकारणात् हे इन्द्र तूयं क्षिप्रं एहि अस्मत्समीपं आगच्छ आगत्यच द्रव सोमाः यस्मिन्नुत्तरवेदिलक्षणे स्थाने वर्तन्ते तं देशं शीघ्रं गच्छ द्रुगताविति धातुः द्व्यचोतस्तिङइति सांहितिकोदीर्घः। तदनन्तरं अध्वर्युणा दत्तं सोमं पिब तेन सोमेन सम्यक्स्वोदरं पूरयेत्यर्थः॥ ८ ॥

अथ नवमी—

अ॒श्वीर॒थीसु॑रू॒पइद्गोमाँ॒इदि॑न्द्रते॒सखा॑ ।
श्वा॒त्रभाजा॒वय॑सासचते॒सदा॒चन्द्रोया॑तिस॒भामुप॑ ॥ ९ ॥

अ॒श्वी । र॒थी । सु॒ऽरू॒पः । इत् । गोऽमा॑न् । इत् । इ॒न्द्र॒ । ते॒ ।
सखा॑ । श्वा॒त्रऽभाजा॑ । वय॑सा । स॒च॒ते॒ । सदा॑ । च॒न्द्रः ।
या॒ति॒ । स॒भाम् । उप॑ ॥ ९ ॥

१ ऋ० सं० ३.२.११।

हे इन्द्र ते तव सखा मित्रभूतः पुरुषः अश्व्यादिगुणविशिष्टएव भवति इच्छन्दः मत्येकमभिसंबध्यते अश्वीइव बहुभिरश्वैरुपेतएव भवति नकदाचिदश्वैर्वियुज्यते रथी रथवानेव सभवति सुरूपइव शोभनरूपः शोभनानयवएव सभवति गोमाँइव बह्वीभिर्गोभिर्युक्तएव सभवति नकदाचिदेतैर्वियुज्यतइत्यर्थः । अपिच श्वात्राभाजा श्वात्रमिति धननाम आशु अतनीयं शीघ्रं माप्तव्यं शोभनं धनं संभजता इदृग्धनसंयुक्तेन वयसा अन्ननामैतत् अन्नेन ससर्वदा सचते समवैति सश्चच्छवे पचसमवाये अतएव चन्द्रः सर्वेषामाह्लादकः सन् सभां जनसंसदं उपयात्युपगच्छति ॥ ९ ॥

अथ दशमी—

ऋश्योनतृष्यन्नवपानमागहिपिबासोमंवशाँअनु ।
निमेघमानोमघवन्दिवेदिवओजिष्ठंदधिषेसहः ॥१०॥३१॥

ऋश्यः । न । तृष्यन् । अवऽपानम् । आ । गहि । पिब ।
सोमम् । वशान् । अनु । निऽमेघमानः । मघऽवन् । दिवेऽदिवे ।
ओजिष्ठम् । दधिषे । सहः ॥ १० ॥ ३१ ॥

हे इन्द्र ऋश्योन ऋश्यारव्योमृगइव तृष्यन् पिपासंस्त्वं अवपानं अवनीतं महचमसादिषु पात्रेषु आनीतं पातव्यं सोमं आगहि अभिगच्छ गत्वाच तमस्मदीयं सोमं वशां अनुकामं यथाकामं पिब यावता पीतेन पर्याप्तिर्जायते तावता सोमेन स्वोदरं पूरयेत्यर्थः । अतएव सोमपानात्माप्तबलस्त्वं दिवेदिवे प्रतिदिवसं निमेघमानः न्यंचिअवाङ्मुखानि वृष्ट्युदकानि सिञ्चन् हे मघवन्निन्द्र ओजिष्ठं ओजस्वितमं उद्गूर्णतमं सहोबलं दधिषे धारयसि ओजस्विशब्दादिष्ठनि विन्मतोर्लुगितिविनोलुक् टेरिति टिलोपः ॥१०॥

॥ इति पञ्चमस्य सप्तमे एकत्रिंशोवर्गः ॥ ३१ ॥

अथैकादशी—

अध्वर्योद्रावयात्वंसोममिन्द्रःपिपासति ।
उपनूनंयुयुजेवृषणाहरीआचजगामवृत्रहा ॥ ११ ॥

अध्व॑र्यो॒ इति॑ । द्रवय॑ । त्वम् । सोम॑म् । इन्द्रः॑ । पि॒पा॒स॒ति॒ ।
उप॑ । नू॒नम् । यु॒यु॒जे॒ । वृष॑णा । हरी॒ इति॑ । आ । च॒ ।
ज॒गा॒म॒ । वृ॒त्र॒ऽहा ॥ ११ ॥

हे अध्वर्यो अध्वरस्य नेतः त्वं सोमं द्रावय उत्तरवेदिलक्षणं स्थानं प्रापय यद्वा रसात्मना द्रवणशीलं कुरु अभिषुणिवत्यर्थः । किंकारणमितिचेत् इन्द्रः पिपासति इमं सोमं पातुमिच्छति त्वयैतत्कथमवगतमिति चेत् तत्राह वृषणा वर्षितारौ युवानौ वा हरी अश्वौ नूनमद्य उपयुयुजे उपगम्यसारथियोंजितवान्रथे वृत्रहा वृत्रस्य हन्ता इन्द्रश्च आजगाम आगतवान् ॥ ११ ॥

अथ द्वादशी–

स्व॒यं॒चि॒त्सम॑न्यते॒दाशु॑रि॒र्जनो॒यत्रा॒सोम॑स्यतृ॒म्पसि॑ ।
इ॒दंते॒अन्नं॒युज्यं॒समु॑क्षि॒तं॒तस्येहि॒प्रद्र॑वा॒पिब॑ ॥ १२ ॥

स्व॒यम् । चि॒त् । सः । म॒न्य॒ते॒ । दाशु॑रिः । जनः॑ । यत्र॑ ।
सोम॑स्य । तृ॒म्पसि॑ । इ॒दम् । ते॒ । अन्न॑म् । यु॒ज्य॑म् ।
सम्ऽउ॑क्षितम् । तस्य॑ । आ । इ॒हि॒ । प्र । द्र॒व॒ । पिब॑ ॥ १२ ॥

दाशुरिर्दाश्वान् दाशतेरौणादिकउरिन् हविषां दाता सयजमानलक्षणोजनः स्वयंचित्स्वयमेव आत्मनैव मन्यते सर्वं जानाति परायत्तप्रज्ञोनभवतीत्यर्थः यत्र यस्मिन् जने सोमस्य पानेन हे इन्द्र त्वं तृम्पसि तृप्तोभवसि । तृपतेृपत्तौ तौदादिकः शेतृंफादीनामिति नुम् । ते त्वदीयं युज्यं योग्यं इदमस्मदीयं सोमलक्षणमन्नं समुक्षितं सम्यक् पात्रेष्वासिक्तम् उक्षसेचने कर्मणि गतिरनन्तरइति गतेः प्रकृतिस्वरत्वम् अतस्तं तादृशं सोमं एत्यभिगच्छ प्रद्रव शीघ्रं प्राप्नुहि तदनन्तरं पिब पानं कुरु ॥ १२ ॥

अथ त्रयोदशी–

र॒थे॒ष्ठाया॑ध्वर्यवः॒सोम॒मिन्द्रा॑यसोतन ।
अधि॑ब्र॒ध्नस्याद्र॑यो॒विच॑क्षतेसु॒न्वन्तो॑दा॒श्व॑ध्वरम् ॥ १३ ॥

रथेऽस्थार्य । अध्वर्यवः । सोमम् । इन्द्राय । सोतन । अधि ।
ब्रध्नस्यं । अद्रयः । वि । चक्षते । सुन्वन्तः । दाशुऽअध्वरम् ॥ १३ ॥

रथेष्ठाय रथेतिष्ठतीतिरथेष्ठः सुपिस्थइतिकप्रत्ययः तत्पुरुषेकृतिबहुलमिति सप्तम्याऽलुक् एवं लक्षणाय इन्द्राय हे अध्वर्यवः सोमं सोतन अभिषुणुत । षुञ्अभिषवे तप्तनप्तनथनाश्चेति तनादेशः । ब्रध्नस्य मूलस्य अभिषवार्थं चर्मणि स्थापितस्य उपराख्यस्य विस्तृतस्याश्मनः अध्युपरि अद्रयः अन्ये ग्रावाणः चतसृषु दिक्षु वर्तमानाः दाश्वध्वरं दाशोदातुर्यजमानस्य अध्वरो यागः येन निष्पद्यते तादृशं सोमं सुन्वन्तः ऋत्विग्भिरपेक्षं स्वयमेवाभिषुण्वन्तो विचक्षते विशेषेण प्रकाशन्ते सोमाभिषवे अतिशयेनानुकूलावर्तन्तइत्यर्थः। अथवा उक्तलक्षणा येऽद्रयस्तैरद्रिभिः हे अध्वर्यवः सोममभिषुण्वतेति योज्यम् ॥ १३ ॥

अथ चतुर्दशी–

उपब्रध्नंवावातावृषणाहरीइन्द्रमपसुवक्षतः ।
अर्वाञ्चंत्वासप्तयोध्वरश्रियोवहन्तुसवनेदुप ॥ १४ ॥

उप । ब्रध्नम् । वावाता । वृषणा । हरी इति । इन्द्रम् ।
अपऽसु । वक्षतः । अर्वाञ्चम् । त्वा । सप्तयः ।
अध्वरऽश्रियः । वहन्तु । सवना । इत् । उप ॥ १४ ॥

ब्रध्नमन्तरिक्षं वावाता संभक्तवन्तौ वनतेर्निष्ठायां छान्दसं द्विर्वचनं इडभावः आत्वं धातुस्वरश्च अन्येषामपिदृश्यतइति सांहितिकोभ्यासदीर्घः। यद्वा वावाता पुनःपुनर्गच्छन्तौ वा गतिगन्धनयोः अस्माद्यङ्लुगन्तात्कर्तरिनिष्ठा । वृषणा वृषणौ सेक्तारौ हरी हरणशीलावश्वौ उक्तगुणौ सन्तौ अपसु अस्मदीयेषु कर्मसु अपसशब्दः सकारान्तः कर्मवचनः पीवोपवसनानां छन्दसि लोपोवक्तव्यइतीहसकारोलुप्यते । तत्रेममिन्द्रं उपवक्षतः उपवहतां उपानयताम् वहतेर्लेटचडागमः सिब्बहुलमिति सिप् । अपिच अध्वरश्रियोध्वरं सेवमानाः सप्तयः सर्पणशीलाः अन्येपि त्वदीयाअश्वाः सवना सवनानि प्रातःसवनादीन्यस्मद्यागसम्बन्धीनि प्रति हे इन्द्र त्वां अर्वाञ्चं अभिमुखं उपवहन्तु उपगमयन्तु इदिति पूरकः॥ १४॥

अथ पंचदशी—

प्रपूपणंवृणीमहेयुज्यायपुरूवसुम् ।
सशक्रशिक्षपुरुहूतनोधियातुजेरायेविमोचन ॥१५॥३२॥

प्र । पूषणम् । वृणीमहे । युज्याय । पुरुऽवसुम् ।
सः । शक्र । शिक्ष । पुरुऽहूत । नः । धिया ।
तुजे । राये । विऽमोचन ॥ १५ ॥ ३२ ॥

इदमाद्यासु चतसृषु पूष्णइन्द्रस्य च लिङ्गसद्भावात् एताउभयथा व्याख्यायन्ते पुरुवसुं बहुधनं पूषणं पोषकमिन्द्रं यद्वैतत्संज्ञं देवं प्रवृणीमहे प्रकर्षेण संभजामहे। किमर्थं युज्याय युक्इति युङ् सखा तस्य भावाय सखित्वायेत्यर्थः हे शक्र शक्त पुरुहूत बहुभिराहूत हे विमोचन पापाद्विमोचयितरिन्द्र पूषन्वा सत्वं नोस्मान् धिया आत्मीयया बुध्या शिक्ष शक्तान्कर्तुमिच्छ। किमर्थं राये धनाय धनप्राप्त्यर्थं तुजे शत्रून् तोजयितुं हिंसितुम् तुज हिंसायाम् अस्मात्कृत्यार्थे केन्प्रत्ययः। यद्वा रायइति क्रियाग्रहणं कर्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थी जातावेकवचनम् रायोधनानि धिया स्तुत्या प्रीतःसन् नोस्मभ्यं शिक्ष देहि शिक्षतिर्दानकर्मा ऊडिदमिति रायोविभक्तिरुदात्ता ॥ १५॥

॥ इति पञ्चमस्य सप्तमे द्वात्रिंशो वर्गः ॥ ३२ ॥

अथ षोडशी—

सन्नःशिशीहिभुरिजोरिवक्षुरंरास्वरायोविमोचन ।
त्वेतन्नःसुवेदमुस्रियंवसुयंत्वंहिनोपिमर्त्यम् ॥ १६ ॥

सम् । नः । शिशीहि । भुरिजोःऽइव । क्षुरम् । रास्व । रायः ।
विऽमोचन । त्वे इति । तत् । नः । सुऽवेदम् । उस्रियम् ।
वसु । यम् । त्वम् । हिनोषि । मर्त्यम् ॥ १६ ॥

हे आघृणे आगतदीप्ते पूषन्निन्द्र वा कश्चित् कस्मिंश्चित्काले अस्मदीयागावः यवसं तृणं भक्षितुं परागच्छन्ति हे अमर्त्य अमरण देव तदानीं रेक्णस्तद्गोरूपं धनं नित्यं अस्माकं ध्रुवमस्तु चोरव्याघ्रादिभिः हिंसितं माभूत्। अपिच हे पूषन् पोषयितः अस्माकं अविता रक्षिता भूत्वा शिवः सुखकरोभव तथा वाजसातये वाजस्यान्नस्य बलस्य वा संभजनार्थं मंहिष्ठोदातृतमो भव ॥ १८ ॥

अथैकोनविंशी—

स्थूरंराधःशताश्वंकुरुङ्गस्यदिविष्टिषु ।
राज्ञस्त्वेषस्यसुभगस्यरातिषुतुर्वशेष्वमन्महि ॥ १९ ॥

स्थूरम् । राधः । शतऽअश्वम् । कुरुङ्गस्य । दिविष्टिषु । राज्ञः ।
त्वेषस्य । सुऽभगस्य । रातिषु । तुर्वशेषु । अमन्महि ॥ १९ ॥

इदमादिकेन तृचेन देवातिथिः कुरुंगनाम्नोराज्ञो दानं स्तौति कुरुङ्गस्य कुरून् जेतुं गच्छति कुलं गच्छतीति वा कुरुङ्गः ड्डोन्यत्रापि दृश्यते इति गमेर्डः पृषोदरादिः एतत्संज्ञस्य त्वेषस्य दीप्तस्य सुभगस्य शोभनधनस्य एवंभूतस्य राज्ञः संबन्धिनीषु दिविष्टिषु दिवः स्वर्गस्य एषणेषु प्राप्तिहेतुभूतासु यागक्रियासु रातिषु दानेषु दक्षिणारूपेषु सत्सु तुर्वशेषु मनुष्यनामैतत् निर्धारणे सप्तमी मनुष्येषु मध्ये वयं स्थूरं स्थूलं प्रभूतं शताश्वं अश्वानां शतेन युक्तं राधो धनं अमन्महि अज्ञासिष्म अलभामहीत्यर्थः ॥ १९ ॥

अथ विंशी—

धीभिःसातानिकाण्वस्यवाजिनःप्रियमेधैरभिद्युभिः ।
षष्टिंसहस्रानुनिर्मजामजेनिर्यूथानिगवामृषिः ॥ २० ॥

धीभिः । सातानि । काण्वस्य । वाजिनः । प्रियऽमेधैः ।
अभिद्युऽभिः । षष्टिम् । सहस्रा । अनु । निःऽमजाम् ।
अजे । निः । यूथानि । गवाम् । ऋषिः ॥ २० ॥

काण्वस्य कण्वपुत्रस्य वाजिनो हविष्मतो मेधातिथेः संवन्धिभिः धीभिः ध्यातृभिः स्तोतृभिः सातानि संभक्तानि अभियुभिरभिगतदीप्तिभिः मियमेधैः एतत्संज्ञैश्च ऋषिभिः सेवितानि निर्मजां निःशेषेण शुद्धानां गवां षष्टिं सहस्रा षष्टिसंख्याकानि सहस्राणि यूथानि ऋषिर्देवातिथिरहं अनु पश्चात् निरजे निःशेषेणागच्छं साकल्येन प्राप्तवानस्मि अजगतिक्षेपणयोः यथा मियमेधानां कण्वानां च गवां यूथानि राज्ञा दत्तानि तैः प्रतिगृहीतानि एवं तेन दत्तानि मया प्रतिगृह्यन्तइत्यर्थः ॥ २० ॥

अथैकविंशी—

वृक्षाश्चिन्मेअभिपित्वेअंरारणुः ।
गांभंजन्तमेहनाश्वंभजन्तमेहनां ॥ २१ ॥ ३३ ॥

वृक्षाः । चित् । मे । अभिऽपित्वे । अररणुः । गाम् ।
भजन्त । मेहना । अश्वम् । भजन्त । मेहना ॥ २१ ॥ ३३ ॥

मे मया अभिपित्वे पूर्वोक्ते धनेभिप्राप्ते सति वृक्षाश्चित् वृक्षाअपि अरारणुः अशब्दयन् कथमिति तदाह इमे ऋषयः मेहना मंहनीयां प्रशस्यां गां भजन्त असेवन्त अलभन्त मेहना मंहनीयं अश्वं च भजन्त अलभन्तेति गामश्वमिति जात्यभिप्रायमेकवचनम्। यद्वा मेहनइति मे इह नेति पदत्रयात्मकमेकं पदं यदाह यास्कः—यदिन्द्रचित्रंचायनीयंमंहनीयंधनमस्तियन्मइहनास्तीतिवा त्रीणि मध्यमानि पदानि। तदेवं व्याख्येयं इमे ऋषयो गामश्वंचालभन्त इहास्मिन्राजनि प्रशस्तधनस्य वदान्ये ममनास्तीत्यस्य नास्तीदिति वृक्षप्रमुखाः सर्वेपि जनाः प्रोचुरित्यर्थः ॥ २१ ॥

॥ इति पंचमस्य सप्तमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

वेदार्थस्य प्रकाशेन तमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥
इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टके सप्तमोध्यायः समाप्तः ॥७॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा योवेदेभ्योखिलंजगत्। निर्ममे तमहं वन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

अथाष्टमोध्यायाख्यातुमारभ्यते। अष्टमेमण्डले प्रथमेनुवाके चत्वारिसूक्तानि व्याख्यातानि। दूरादित्येकोनचत्वारिंशदृचं पञ्चमं सूक्तं कण्वगोत्रस्य ब्रह्मातिथेरार्षं। आदितः षड्विंशत्यृचः। ततोद्वे बृहत्यौ। अन्तिमानुष्टुप्। अन्त्येषु पञ्चस्वर्धर्चेषु चेदिपुत्रस्य कशुनाम्नोराज्ञोदानं स्तूयते। अतस्तद्देवताकाः। शिष्टाआश्विन्यः तथाचानुक्रान्तम्—दूरादेकान्नचत्वारिंशद्ब्रह्मातिथिराश्विनं द्विबृहत्यनुष्टुबन्तं अन्त्याः पञ्चार्धर्चाश्चैद्यस्य कशोर्दानस्तुतिरिति। प्रातरनुवाकाश्विनशस्त्रयोराश्विने क्रतौ गायत्रे छन्दसि अन्त्यतृचवर्जमिदं सूक्तम्। सूत्र्यतेहि—दूरादिहेवेतितिसउद्धरेदिति।

तत्र प्रथमा—

ओम् दूरादिहेवयत्सत्यरुणप्सुरशिश्वितत्। विभानुंविश्वधातनत्॥१॥

दूरात्। इहऽइव। यत्। सती। अरुणऽप्सुः। अशिश्वितत्।
वि। भानुम्। विश्वधा। अतनत्॥ १ ॥

दूरात् दूरतएव विप्रकृष्टएव नभसः प्राक्प्रदेशे वर्तमाना इहेवसती इहसमीपे विद्यमानेव अस्तेः शतरि श्नसोरल्लोपे उगितश्चेतिङीप् शतुरनुमइतिनद्याउदात्तत्वम्। अरुणप्सुः आरोचमानरूपा ईदृशीउषाः यद्यदा अशिश्वितत् अश्वेतयत् श्वितावर्णे अस्मात् ण्यन्तात् लुङिचङि रूपम् यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः। तदा भानुं दीप्तिं विश्वधा बहुविधां व्यतनत् विस्तारितवती तनोतेर्व्यत्ययेन शप् ईदृशीमुषसम् हे अश्विनौ सचेथे इति उत्तरयैकवाक्यता। यद्वा प्रातरनुवाके उपस्येन काण्डेन उषाः स्तुता सती प्रादुर्बभूव हे अश्विनौ संशिष्यमाणमाश्विनं क्रतुं श्रोतुं युवामपि प्रादुर्भवतमिति अध्याहारेण वाक्यं पूरणीयम्॥ १ ॥

अथ द्वितीया—

नृवद्दस्रामनोयुजारथेनपृथुपाजसा। सचेथेअश्विनोषसम् ॥ २ ॥

नृऽवत् । दस्रा । मनःऽयुजा । रथेन पृथुऽपाजसा ।
सचेथे इति । अश्विना । उपसंम् ॥ २ ॥

हे दस्रा दर्शनीयौ शत्रूणामुपक्षपयितारौ वा सुपांसुलुगित्याकारः । ईदृशौ हे अश्विना अश्विनौ नृवत् नृभिर्नेतृभिस्तुल्यं वर्तमानौ युवां तेनतुल्यमिति प्रथमार्थेवतिः यद्वा नेतृमतीं नृशब्दान्मतुप्छान्दसंवत्वम् रश्रुतिसामान्यात्र वा छन्दसीरइतिवत्वम् ङीपश्छान्दसोलुक् ह्रस्वनुड्भ्यांमतुबिति मतुपउदात्तत्वम् ईदृशीमुपसं रथेनात्मीयेन वाहनेन सचेथे सम्यग्गच्छथः । पचसमवाये यद्वा सचतिः सेवनार्थः सचेथे सेवेथे तदाहयास्कः–सचस्वानःस्वस्तये सेवस्व नः स्वस्तयइति । कीदृशेन रथेन मनोयुजा मनसैव व्यापारान्तरनिरपेक्षेण स्मरणमात्रेणाश्वैर्युज्यमानेन पृथुपाजसा विस्तीर्णबलेन यद्वाऽनेनया उपसोनन्तरमश्विनोः स्तूयमानत्वात् तामश्विनौ गच्छतइत्युच्यते ॥ २ ॥

अथ तृतीया –

युवाभ्यांवाजिनीवसूप्रतिस्तोमाअदृक्षत । वाचंदूतोयथोहिषे॥३॥

युवाभ्याम् । वाजिनीवसू इति वाजिनीऽवसू । प्रति ।
स्तोमाः । अदृक्षत । वाचम् । दूतः । यथा । ओहिषे ॥ ३ ॥

हे वाजिनीवसू वाजं हविर्लक्षणमन्नं तद्युक्तयागक्रिया वाजिनी तस्यां वसु धनं ययोरस्ति तौ तथोक्तौ यद्वा अन्नयुक्तं स्तोतृभ्योदेयं वसु धनं ययोरस्ति तादृशौ हे अश्विनौ युवाभ्यां स्तोमाः अस्माभिः कृतानि स्तोत्राणि प्रत्यदृक्षत प्रतिदृश्यन्ताम् दृशेश्छान्दसः कर्मणिलुङ् लिङ्सिचावात्मनेपदेष्विति किद्वात्सृजिदृशोरित्यमभावः पत्वकत्वपत्वानि अहं च यथा येनप्रकारेण दूतः प्रेष्योवाचं स्वामिनोवाक्यं याचते तथा युवयोः प्रीतिपूर्विकां वाचं ओहिषे पुरुषव्यत्ययः याचे ऊहिरर्दने याचने इत्यर्थः व्यत्ययेनात्मनेपदम् । यद्वा दूतो यथास्वामिनोक्तां वाचं विदेशस्थमन्यं प्रापयति एवमहमपि स्तुतिरूपां वाचं ओहिषे वहे युवां प्रापयामि वहेर्व्यत्ययेनमध्यमः छान्दसं सम्प्रसारणम् छन्दस्युभयथेत्यार्धधातुकत्वादिडागमः शबभावोलघूपधगुणश्च एङिपररूपमिति पररूपत्वम् ॥ ३ ॥

१ नि० ३. २१.।

अथ चतुर्थी–

पुरुप्रियाणंऊतयेंपुरुमन्द्रापुरुवसू। स्तुपेकण्वासोअश्विना॥ ४॥

पुरुऽप्रिया। नः। ऊतये। पुरुऽमन्द्रा। पुरुवसू इति। पुरुऽवसू। स्तुपे। कण्वासः। अश्विना॥ ४॥

पुरुप्रिया बहूनां प्रियौ पुरुमन्द्रा बहुमदौ बहूनां मादयितारौ वा यद्वा पुरु बहुलं माद्यन्तौ पुरुवसू बहुधनौ ईदृशौ अश्विना अश्विनौ नोस्माकमूतये रक्षणाय कण्वासः कण्वगोत्रावयं स्तुपे स्तुमहे पुरुषवचनयोर्व्यत्ययः। यद्वा कण्वासइति पूजार्थं बहुवचनम् ऋषिरात्मानं संबोध्य ब्रूते हे अन्तरात्मन् कण्वासः कण्वगोत्रस्त्वं स्तुपे अश्विनौ स्तुहि॥ ४॥

अथ पंचमी–

मंहिष्ठावाजसातमेषयन्ताशुभस्पती। गन्तारादाशुषोगृहम्॥५॥१॥

मंहिष्ठा। वाजऽसातमा। इषयन्ता। शुभः।
पती इति। गन्तारा। दाशुषः। गृहम्॥ ५॥ १॥

मंहिष्ठा मंहिष्ठौ मंहनीयौ पूजनीयौ यद्वा दातृतमौ वाजसातमा वाजोन्नं बलं वा तस्यातिशयेन दातारौ यद्वा वाजोन्नं हविर्लक्षणमन्नं तस्य संभक्तृतमौ सनोतेः सनतेर्वा जनसनेतिविट् विड्वनोरनुनासिकस्यात्वम्। इषयन्ता स्तोतृभ्यइषमन्नं कुर्वन्तौ इषूशब्दात्तत्करोतीतिणिच् णेरिष्ठवद्भावेनटिलोपे प्राप्ते प्रकृत्यैकाजितिप्रकृतिभावः। यद्वा एषयन्ता इषयन्तौ श्रेयांसि प्रापयन्तौ इषगतौ अस्माद्धेतुमतिचेति णिच् संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणाभावः शुभः शोभनस्य धनस्य उदकस्य वा पती स्वामिनौ षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वम् दाशुषः चरुपुरोडाशादीनि दत्तवतोयजमानस्य गृहं गन्तारा गमनशीलौ गमेस्ताच्छीलिकस्तृन् अतोनलोकाव्ययेति कर्मणि षष्ठ्याः प्रतिषेधः। ईदृशावश्विनौ स्तुमइति शेषः॥ ५॥

॥ इति पञ्चमस्याष्टमे प्रथमो वर्गः॥ १॥

अथ षष्ठी–

तासुदेवायदाशुषेसुमेधामवितारिणीम्। घृतैर्गव्यूतिमुक्षतम्॥६॥

ता । सुऽदेवार्य । दाशुर्षे । सुऽमेधाम् । अविंऽतारिणीम् ।
घृतैः । गव्यूतिम् । उक्षतम् ॥ ६ ॥

हे अश्विनौ ता तौ तादृशौ युवाम् सुदेवाय शोभनादेवा येनयष्टव्याः सतथोक्तः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् तस्मै दाशुषे हविर्दत्तवते यजमानाय तादर्थ्येचतुर्थी ईदृग्यजमानार्थं सुमेधां शोभनयज्ञां अवितारिणीं वितरणं विगमनम् अपायः अनपायिनीम् नञ्समासः अव्ययपूर्वपदप्रकृतिस्वरत्वम् ईदृशीं गव्यूतिं गावोयूयन्ते संयुज्यन्तेनेति गव्यूतिर्गोसञ्चारभूमिः गोर्यूतौछन्दसीत्यवादेशः तां घृतैः क्षरणशीलैः उदकैः उक्षतम् सिञ्चतम् । उक्षसेचने ॥ ६ ॥

अथ सप्तमी—

आनः॒स्तोम॒मुप॑द्र॒वत्तू॒यं॑श्ये॒नेभि॑रा॒शुभिः॑ । या॒तमश्वे॑भिरश्विना॥७॥

आ । नः॒ । स्तोम॑म् । उप॑ । द्र॒वत् । तू॒यम् । श्ये॒नेभिः॑ ।
आ॒शुऽभिः॑ । या॒तम् । अश्वे॑भिः । अ॒श्वि॒ना ॥ ७ ॥

हे अश्विना अश्विनौ नोस्माकं स्तोमं स्तोत्रं अश्वेभिरश्वैः द्रवत् तूयमिति उभे क्षिप्रनामनी एकः पूरकः तूयम् क्षिप्रं उपायातं उपागच्छतं । यद्वा द्रवदिति स्तोमविशेषणं द्रवत् शीघ्रं प्रवर्तमानं स्तोममित्यर्थः कीदृशैरश्वैः श्येनेभिः शंसनीयगतिभिः प्रशस्यगमनैः आशुभिः शीघ्रैः ॥ ७ ॥

अथाष्टमी—

येभि॑स्ति॒स्रः प॑रा॒वतो॑दि॒वोविश्वा॑निरोच॒ना । त्रीँर॒क्तून्प॑रि॒दीय॑थः॥८॥

येभिः॑ । ति॒स्रः । प॒रा॒ऽवतः॑ । दि॒वः । विश्वा॑नि ।
रो॒च॒ना । त्रीन् । अ॒क्तून् । प॒रि॒ऽदीय॑थः ॥ ८ ॥

हे अश्विनौ तिस्रोदिवः त्रीन् दिवसान् त्रीन् अक्तून् तिस्रोरात्रीश्च अत्यन्तसंयोगे द्वितीया एतावन्तंकालं विश्वानि सर्वाणि व्याप्तानि वा रोचमानानि नक्षत्ररूपाणि देवगृहाणि परावतो दूरदेशात् येभिर्येरश्वैः परिदीयथः परिगच्छथः दीयतिर्गतिकर्मा तैरस्माकं स्तोत्रमुपायातमिति पूर्वत्रान्वयः॥ ८ ॥

अथ नवमी–

उतनोगोमतीरिषउतसातीरहर्विदा । विपथःसातयेसितम् ॥९॥

उत । नः । गोऽमतीः । इषः । उत । सातीः ।
अहःऽविदा । वि । पथः । सातये । सितम् ॥ ९ ॥

उतापिच हे अहर्विदा अह्नोलम्भयितारौ यद्वा अह्नि प्रभातसमये वेदितव्यौ स्तोतव्यौ नोस्मभ्यं गोमतीर्बहुभिर्गोभिर्युक्ता इषोन्नानि दत्तमितिशेषः उतापिच सातीः सम्भजनीयाः दातव्यावा रायश्च अस्मभ्यं दत्तम् सनतेः सनोतेर्वा कर्मणि क्तिन् जनसनखनामित्यात्वम् ऊतियूतीत्यादिना क्तिनउदात्तत्वं निपात्यते अपिचास्माकं सातये उक्तानां गवादीनां लाभाय सम्भजनाय वा पथः तदुपायरूपान्मार्गान्विसितं विशेषेण बध्नीतं यथा अन्ये न प्रविशन्ति तथा कुरुतमित्यर्थः। षिञ्बन्धने छान्दसोविकरणस्यलुक् यद्वा उपसर्गवशादयंधातुः स्वार्थविपरीतबन्धनाभावेवर्तते प्रस्मरणं प्रस्थानमिति यथा पथोमार्गान् विसितं विमुञ्चतं प्रदर्शयतमित्यर्थः। पथिन्शब्दोन्तोदात्तः तस्य शसि टिलोपे उदात्तनिवृत्तिस्वरेणशसउदात्तत्वम्॥ ९ ॥

अथ दशमी–

आनोगोमन्तमश्विनासुवीरंसुरथंरयिम् । वोळ्हमश्वावतीरिषः॥१०॥२॥

आ । नः । गोऽमन्तम् । अश्विना । सुऽवीरम् । सुऽरथम् ।
रयिम् । वोळ्हम् । अश्वऽवतीः । इषः ॥ १० ॥ २ ॥

हे अश्विना अश्विनौ नोस्मभ्यं रयिं धनं आवोळ्हं आवहतम् आहरतम् वहेर्लोटि छान्दसःशपोलुक् ढत्वधत्वष्टुत्वढलोपु कृतेषु सहिवहोरोदवर्णस्येत्योत्वम् कीदृशं रयिम् गोमन्तं बहुभिर्गोभिर्युक्तम् सुवीरं वीर्यान्नायन्तइति वीराः पुत्राः शोभनैस्तैरुपेतम् विविधमीरयन्ति

शत्रूनितिवीराः शूराः तैरुपेतम् सुरथम् शोभनरथेनयुक्तम् अपिच अश्वावतीः अश्वयुक्ताः मन्त्रे-सोमाश्वेतिमतोदीर्घः इषः इष्यमाणान्यन्नानिच अस्मभ्यं आवहतम् ॥ १० ॥

॥ इति पञ्चमस्याष्टमे द्वितीयोवर्गः ॥ २ ॥

द्विदेवत्यस्याश्विनग्रहस्य वावृधानेत्येषा याज्या सूत्र्यतेहि—होतायक्षदश्विनानासत्यावा-वृधानाशुभस्पती इतीति ।

सैषैकादशी—

वावृधानाशुभस्पतीदस्राहिरण्यवर्तनी । पिबतंसोम्यंमधु ॥ ११ ॥

ववृधाना । शुभः । पती इति । दस्रा ।
हिरण्यवर्तनी इति हिरण्यऽवर्तनी । पिबतम् । सोम्यम् । मधु ॥ ११ ॥

हे शुभस्पती शुभः शोभनस्यालङ्कारस्योदकस्य वा पती स्वामिनौ हेअश्विनौ सुबाम-न्त्रितइतिषष्ठ्यन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्याष्टमिकंसर्वानुदात्तत्वम् । दस्रा द-र्शनीयौ शत्रूणामुपक्षपयितारो वा हिरण्यवर्तनी हिरण्मयमार्गौ यद्वा वर्ततेस्मिन्निति वर्तनीरथः हिरण्मयोरथोययोस्तौ यद्वा वर्तनिर्वर्तनमाचरणं हितरमणीयाचरणौ ववृधाना ववृद्धौ वृधेः लिटः कानच् ईदृशौ युवां सोम्यं सोममयं मधु माधुर्योपेतं मदकरं वा रसं पिबतम् ॥ ११ ॥

अथ द्वादशी—

अस्मभ्यंवाजिनीवसूमघवद्भ्यश्चसप्रथः । छर्दिर्यन्तमदाभ्यम् ॥ १२ ॥

अस्मभ्यम् । वाजिनीवसू इति वाजिनीऽवसू । मघवत्ऽभ्यः ।
च । सऽप्रथः । छर्दिः । यन्तम् । अदाभ्यम् ॥ १२ ॥

हे वाजिनीवसू वाजिनी हविर्युक्ता यागक्रियातस्यां वसु धनं हविर्भागलक्षणं ययोस्तथा विधौ हे अश्विनौ अस्मभ्यं स्तोतृभ्यः मघवद्भ्यः मघं धनं हविर्लक्षणं तद्वद्भ्योयजमानेभ्यश्च सप्रथः सर्वतः पृथुविस्तीर्णं अदाभ्यं केनाप्यहिंस्यं छर्दिः गृहनामैतत् गृहं यन्तं नियच्छतं दत्तमित्यर्थः यमेश्छान्दसःशपोलुक् छन्दस्युभयथेत्यार्धधातुकत्वेन ङित्त्वाभावात् अनुना-सिकलोपाभावः ॥ १२ ॥

अथ त्रयोदशी—

निपुब्रह्मजनानांयाविष्टंतूयमागंतम् । मोष्वं१न्याँउपारतम् ॥ १३ ॥

नि । सु । ब्रह्म । जनानाम् । या । अविष्टम् । तूर्यम् ।
आ । गतम् । मो इति । सु । अन्यान् । उप । अरतम् ॥ १३ ॥

हे अश्विनौ या यौ युवां जनानां प्राणिनां मध्ये ब्रह्म ब्राह्मणजातिं सु सुष्ठु नि नितरां अविष्टं अरक्षिष्टम् यद्वा जनानां यजमानानां ब्रह्म परिवृढं स्तोत्रं हविर्लक्षणमन्नं वा यौ युवाम् न्यविष्टं न्यगच्छतम् अवतिर्गत्यर्थः तौ युवां तूयं क्षिप्रं आगतं अस्मानप्यागच्छतम् अन्यान् अस्मद्व्यतिरिक्तान्यजमानान् मो मैव सूपारतम् उपगच्छतं कदाचिदपि मैव प्राप्नुतमित्यर्थः अर्तेर्माङि लुङि सर्तिशास्त्यर्तिभ्यश्चेतिच्लेरङादेशः ॥ १३ ॥

आपराह्णिकेप्रवर्ग्ये घर्मस्यहविषोस्यपिबतमिति द्वितीया याज्या सूत्रितश्च—अस्यपिबतमश्विनेतिचाप्रेपितोहोतेति ।

सैषा सूक्ते चतुर्दशी—

अस्यपिंबतमश्विनायुवंमदस्यचारुंणः । मध्वौरातस्यंधिष्ण्या ॥ १४ ॥

अस्य । पिबतम् । अश्विना । युवम् । मदस्य ।
चारुणः । मध्वः । रातस्य । धिष्ण्या ॥ १४ ॥

हे अश्विना अश्विनौ हे धिष्ण्या धिषणा स्तुतिः तदर्हौ युवं युवां मदस्य मदकरस्य चारुणः शोभनस्य रातस्यास्माभिर्दत्तस्य अस्य मध्वोमधुरस्य सोमस्य स्वांशलक्षणं भागं पिबतम् । यद्वा द्वितीयार्थेषष्ठी इमं सोमं पिबतम् ॥ १४ ॥

अथ पञ्चदशी—

अस्मेआवंहतंरयिंशतवंन्तंसहस्रिणम् । पुरुक्षुंविश्वधायसम् ॥ १५ ॥ ३ ॥

अस्मे इति । आ । वहतम् । रयिम् । शतऽवन्तम् ।
सहस्रिणम् । पुरुऽक्षुम् । विश्वऽधायसम् ॥ १५ ॥ ३ ॥

हे अश्विनौ अस्मे अस्मभ्यं रयिं धनं आवहतम् आनयतम् कथंभूतं शतवन्तं शत-संख्योपेतं सहस्रिणं सहस्रसंख्योपेतंच पुरुक्षुम् बहुनिवासं यद्वा पुरुभिर्बहुभिः स्तुत्यं विश्वधायसं विश्वेषां सर्वेषामस्मदीयानां धारकं वहिहाधाञ्भ्यश्छन्दसीति दधातेरसुन् णिदित्यनुवृत्तेर्णिद्वद्भावेनयुगागमः ॥ १५ ॥

॥ इति पञ्चमस्याष्टमे तृतीयोवर्गः ॥ ३ ॥

अथ षोडशी—

पुरुत्राचिद्धिवांनराविह्वयन्तेमनीषिणः । वाघद्भिरश्विनागतम् ॥ १६॥

पुरुऽत्रा । चित् । हि । वाम् । नरा । विऽह्वयन्ते ।
मनीषिणः । वाघत्ऽभिः । अश्विना । आ । गतम् ॥ १६ ॥

हे नरा नरौ स्तोतॄणां धनस्य नेतारौ अश्विनौ मनीषिणोमनसईशितारः स्तोतारः वां युवां पुरुत्राचिद्धि बहुषु देशेषु विह्वयन्ते विविधमाह्वयन्ति तथासति हे अश्विनौ वाघद्भिः वाहकैरश्वैः आगत अस्मानेवागच्छतम् ॥ १६ ॥

अथ सप्तदशी—

जनासोवृक्तबर्हिषोहविष्मन्तोअरंकृतः । युवांहवन्तेअश्विना ॥ १७॥

जनासः । वृक्तऽबर्हिषः । हविष्मन्तः । अरम्ऽकृतः ।
युवाम् । हवन्ते । अश्विना ॥ १७ ॥

वृक्तबर्हिषः वृक्तं छिन्नं बर्हिर्यैस्ते तथोक्ताः हविष्मन्तो हविर्भिर्युक्ताः अरंकृतः पर्याप्तकारिणः यद्वा हविरादीनामलंकर्तारोजनासः ऋत्विग्लक्षणाजनाः हे अश्विना अश्विनौ युवां हवन्ते आह्वयन्ति अतआगच्छतमितिशेषः ॥ १७ ॥

अथाष्टादशी—

अस्माकमद्यवामयंस्तोमोवाहिष्ठोअन्तमः । युवाभ्यांभूत्वश्विना ॥१८॥

अस्माकम् । अद्य । वाम् । अयम् । स्तोमः । वाहिष्ठः ।
अन्तमः । युवाभ्याम् । भूतु । अश्विना ॥ १८ ॥

अथेदानीं अस्माकं अयं स्तोमः अस्मदीयं स्तोत्रं हे अश्विनौ वां युवयोः वाहिष्ठः वाहयितृतमः प्रापयितृतमः सन् युवाभ्यां अन्तमः अन्तिकतमः अतिशयेन समीपवर्ती भूतु भवतु तमेतादेश्चेति अन्तिकशब्दस्य तादिर्लुप्यते भवतेश्छान्दसः शपोलुक् ॥ १८ ॥

अथैकोनविंशी–

योर्हवांमधुनोदृतिराहितोरथचर्षणे । ततःपिबतमश्विना ॥ १९ ॥

यः । ह । वाम् । मधुनः । दृतिः । आऽहितः । रथऽचर्षणे ।
ततः । पिबतम् । अश्विना ॥ १९ ॥

हे अश्विना अश्विनौ रथचर्षणे रथस्य चर्षणे द्रष्टव्ये मध्यदेशे योदृतिः मधुनः मधुरस्यास्माभिर्दत्तस्य सोमस्य संबन्धी तेन मधुना पूर्णः आहितः स्थापितोवर्तते ततोदृतेः सकाशात् सोमं पिबतं ॥ १९ ॥

अथ विंशी–

तेनंनोवाजिनीवसूपश्वेतोकायशंगवे । वहंतंपीवरीरिषः॥२०॥४॥

तेन । नः । वाजिनीवसू इति वाजिनीऽवसू । पश्वे ।
तोकाय । शम् । गवे । वहतम् । पीवरीः । इषः ॥ २० ॥ ४ ॥

हे वाजिनीवसू वाजोन्नं बलं वा तद्युक्तधनौ नोस्माकं पश्वे पशवे अश्वादिलक्षणाय जसादिषु छन्दसिवावचनमिति घेर्ङितीति गुणस्य विकल्पितत्वाद्यण् तोकाय पुत्राय गवेच जात्यभिप्रायं सर्वत्रैकवचनं पशुप्रभृतिभ्यः शं सुखं यथाभवति तथा पीवरीः प्रवृद्धानि इषोन्नानि तेन भवदीयेन रथेन वहतं आवहतं प्रापयतं दत्तमित्यर्थः ॥ २० ॥

॥ इति पञ्चमस्याष्टमे चतुर्थोवर्गः ॥ ४ ॥

त्यावित्यौर्णवाभः सत्यस्यप्रणेतारावित्याग्रायणोनासिकाप्रभवौवेति । तौ युवं कण्वाय एतत्संज्ञाय ऋषये हर्म्ये हर्म्यतले अपिरिप्ताय असुरैर्बाधिताय शश्वत् शश्वतीर्बह्वीः ऊतीः रक्षाः दशस्यथः दत्तवंतौ । युवंकण्वायापिरिप्तायचक्षुःप्रत्यधत्तमित्यत्रेतिहासउक्तःसोत्रद्रष्टव्यः ॥२३॥

अथ चतुर्विंशी—

ताभि॒रा या॑तमू॒तिभि॒र्नव्य॑सीभिः सुश॒स्तिभिः॑ । यद्वां॑ वृषण्वसू हु॒वे ॥२४॥

ताभिः॑ । आ । या॒त॒म् । ऊ॒तिऽभिः॑ । नव्य॑सीभिः । सु॒श॒स्तिऽभिः॑ ।
यत् । वा॒म् । वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू । हु॒वे ॥ २४ ॥

हे वृषण्वसू वर्षणधनौ वृषण्वस्वश्वयोरुपसंख्यानमिति वृषण्भावोनिपात्यते तदानीं ताभिः पूर्वोक्ताभिर्नव्यसीभिर्नवतराभिः सुशस्तिभिः सुप्रशस्याभिः ऊतिभीरक्षाभिः सार्धं आयातं आगच्छतम् यद्यदा वां हुवे स्तुतिभिराह्वयामि ॥ २४ ॥

अथ पञ्चविंशी—

यथा॑ चि॒त्कण्व॒माव॑तं प्रि॒यमे॑धमुपस्तु॒तम् ।
अत्रिं॑ शि॒ञ्जार॑मश्विना ॥ २५ ॥ ५ ॥

यथा॑ । चि॒त् । कण्व॑म् । आव॑तम् । प्रि॒यऽमे॑धम् ।
उ॒प॒ऽस्तु॒तम् । अत्रि॑म् । शि॒ञ्जार॑म् । अ॒श्वि॒ना॒ ॥ २५ ॥ ५ ॥

हे अश्विना अश्विनौ यथाचित् येन खलु प्रकारेण कण्वं एतत्संज्ञमृषिं आवतम् अरक्षतम् प्रियमेधं प्रिययज्ञं एतत्संज्ञंच उपस्तुतं एतदाख्यंच शिञ्जारं शब्दयन्तं स्तुवन्तं अत्रिं एतान्मृषींश्च येनप्रकारेणारक्षतं तथास्मानपि रक्षतमिति शेषः यद्वा एतावद्वांवृषण्वसू इत्यनयैकवाक्यता ॥ २५॥

॥ इति पञ्चमस्याष्टमेपञ्चमोवर्गः ॥ ५ ॥

अथ षड्विंशी—

यथो॒त कृ॒त्व्ये धने॒ंऽशुं गोष्व॒गस्त्य॑म् ।
यथा॒ वाजे॑षु॒ सोभ॑रिम् ॥ २६ ॥

१ नि० ६. १३. । २ ऋ० स० १. ८. १९. ।

यथा । उत । कृत्व्ये । धने । अंशुम् । गोषु । अगस्त्यम् ।
यथा । वाजेषु । सोभरिम् ॥ २६ ॥

उतापि च यथा येनप्रकारेण धने कृत्व्ये कर्तव्ये प्राप्तव्ये सति अंशुं एतत्संज्ञं स्तोतारं आवतं अरक्षतं । गोषु च लब्धव्यासु यथा अगस्त्यमृषिं अरक्षतम् वाजेष्वन्नेषु लब्धव्येषु यथा येन प्रकारेण सोभरिं एतत्संज्ञमृषिंचारक्षतम् अत्रापि पूर्ववद्वाक्यशेषः उत्तरेणैकवाक्यता वा ॥२६॥

अथ सप्तविंशी—

एतावद्वांवृषण्वसूअतोवाभूयोअश्विना ।
गृणन्तःसुम्नमीमहे ॥ २७ ॥

एतावत् । वाम् । वृषण्वसू इति वृषण्ऽवसू । अतः । वा ।
भूयः । अश्विना । गृणन्तः । सुम्नम् । ईमहे ॥ २७ ॥

हे वृषण्वसू वर्षणधनौ अश्विना अश्विनौ गृणन्तः स्तुवन्तोवयं एतावत् यथाचित्क-ण्वमित्यादिना यावदनुक्रान्तम् एतत्परिमाणं सुम्नं सुखं अतोवा अस्माद्वा भूयोबहुतरमधिकं सुम्नं वां युवां ईमहे याचामहे ॥ २७॥

अथाष्टाविंशी—

रथंहिरण्यवन्धुरंहिरण्याभीशुमश्विना ।
आहिस्थाथोदिविस्पृशम् ॥ २८ ॥

रथम् । हिरण्यऽवन्धुरम् । हिरण्यऽअभीशुम् ।
अश्विना । आ । हि । स्थाथः । दिविऽस्पृशम् ॥ २८ ॥

हे अश्विना अश्विनौ हिरण्यवन्धुरं सारथिस्थानं वन्धुरं हिरण्मयसारथिस्थानं हि-रण्याभीशुं हिरण्मयप्रग्रहं दिविस्पृशं अत्युन्नतत्वाद्दिवं स्पृशन्तम् स्पृशेः क्विन् दिवृशब्दाद्

द्वितीयार्थेसप्तमी इयुग्यांडेरुपसंख्यानमितिलुक् ईदृशं रथं आहिस्थाथः युवामातिष्ठथ एव हिरवधारणे अस्मदीयां स्तुतिं श्रोतुं शीघ्रं रथमास्थायागतमितिभावः । छागतिनिवृत्ती छ- टि छान्दसः शपोलुक् ॥ २८ ॥

अथैकोनत्रिंशी—

हि॒र॒ण्ययीं॑वां॒रभि॒रीषा॒अक्षो॑हि॒र॒ण्ययः॑ ।
उ॒भाच॒क्राहि॑र॒ण्ययां ॥ २९ ॥

हि॒र॒ण्ययी॑ । वा॒म् । रभिः॑ । ई॒षा । अक्षः॑ ।
हि॒र॒ण्ययः॑ । उ॒भा । च॒क्रा । हि॒र॒ण्ययां॑ ॥ २९ ॥

हे अश्विनौ वां युवयोः रभिः आरंभणीया आलम्बनभूता रथस्य ईषा हिरण्ययी हिर- ण्मयी हिरण्यविकारा अक्षश्च हिरण्ययः हिरण्मयः हिरण्यनिर्मितः ईषा अक्षादिषु छन्द- सीति प्रकृतिभावः । अपिच उभा उभे द्वे अपि चक्रा चक्रे रथचरणे हिरण्यया हिरण्म- ये सुवर्णनिर्मिते सुपांसुलुगिति द्विवचनस्याकारः ऋत्व्यवास्त्व्यवास्त्वेत्यादिना हिरण्यश- ब्दान्मयटोमलोपोनिपात्यते ॥ २९ ॥

अथ त्रिंशी—

तेन॑नोवाजिनीवसूप॒रा॒वत॑श्चि॒दाग॑तम् ।
उपे॒मांसु॑ष्टुतिं॒मम॑ ॥ ३० ॥ ६ ॥

तेन॑ । नः॒ । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू । प॒रा॒ऽवतः॑ । चि॒त् ।
आ । ग॒त॒म् । उप॑ । इ॒माम् । सु॒ऽस्तु॒तिम् । मम॑ ॥ ३० ॥ ६ ॥

हे वाजिनीवसू अन्नवद्धनावश्विनौ यजको हिरण्मयसर्वावयवोरथः तेन रथेन नो- स्मान् परावतश्चित् दूरदेशादपि आगतमागच्छतम् गमेश्छान्दसः शपोलुक् अनुदात्तोपदे- शेत्यनुनासिकलोपः इदानीमृषिरेकवदाह मम मदीयां इमां इदानीं क्रियमाणां सुष्टुतिं शो- भनां स्तुतिं चोपगच्छतम् ॥ ३० ॥

॥ इति पञ्चमस्याष्टमे षष्ठोवर्गः ॥ ६ ॥

अथ त्रयस्त्रिंशी—

एहवांमुषितप्सवोवयोवहन्तुपर्णिनः ।
अच्छासध्वरंजनम् ॥ ३३ ॥

आ । इह । वाम् । मुषितऽप्सवः । वयः । वहन्तु ।
पर्णिनः । अच्छ । सुऽअध्वरम् । जनम् ॥ ३३ ॥

हे अश्विनौ इहास्मिन्यागे वां युवां मुषितप्सवः मुषि स्नेहनकर्मा स्निग्धरूपाः पर्णिनः पक्षोपेताः यद्वा लुप्तोपममेतत् पक्षिणइव शीघ्रगामिनोवयो गन्तारोश्वाः स्वध्वरं शोभनयज्ञं जनं यजमानलक्षणं अच्छाभिमुखं आवहन्तु आनयन्तु ॥ ३३ ॥

अथ चतुस्त्रिंशी—

रथंवामनुगायसंयइषावर्ततेसह । नचक्रमभिबाधते॥ ३४॥

रथम् । वाम् । अनुऽगायसम् । यः । इषा । वर्तते ।
सह । न । चक्रम् । अभि । बाधते ॥ ३४ ॥

हे अश्विनौ योरथः अस्मभ्यं देयेनान्नेन सहवर्तते वां युवयोःस्वभूतं अनुगायसं स्तोतृभिरनुगातव्यं तं रथं चक्रं परसैन्यं नाभिबाधते नाभिहन्ति । यद्वा चक्रं वीर्यकर्मसाधनं घञर्थेकविधानमितिकः कृञादीनांकइतिद्विर्वचनम् अस्मिन्पक्षे अन्यः शत्रुरिति कर्तृपदमध्याहर्तव्यम् ॥ ३४ ॥

अथ पञ्चत्रिंशी—

हिरण्ययेनरथेनद्रवत्पाणिभिरश्वैः ।
धीजवनानासत्या ॥ ३५ ॥ ७ ॥

हिरण्ययेन । रथेन । द्रवत्पाणिऽभिः । अश्वैः ।
धीऽजवना । नासत्या ॥ ३५ ॥ ७ ॥

हे धीजवना मनोवद्वेगवन्तौ आमन्त्रितायुदात्तत्वम् हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा आमन्त्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानवत्त्वेन पदादपरत्वात् आष्टमिकनिघाताभावः न च नामन्त्रितइत्यविद्यमानवत्त्वनिषेधः धीजवनेत्यस्यविशेषणत्वेन सामान्यवचनत्वाभावात् व्यावर्तकंहि विशेषणम् ईदृशौ युवां द्रवत्पाणिभिः शीघ्रगमनपादैरश्वैर्युक्तेन हिरण्ययेन हिरण्मयेन स्वर्णमयेन रथेनागच्छतमितिशेषः। यद्वा धीजवना नासत्येत्येतत् द्वयमपि प्रथमांतमेव नामन्त्रितम् धियोजवइव जवोययोस्तौ बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। ईदृशेन रथेन शीघ्रगमनौ अश्विनौ आगच्छतमिति शेषः॥ ३५॥

॥ इति पञ्चमस्याष्टमे सप्तमोवर्गः ॥ ७ ॥

अथ षट्त्रिंशी—

युवंमृगंजागृवांसंस्वदथोवावृषण्वसू।
तानःपृंक्तमिषारयिम्॥ ३६ ॥

युवम्। मृगम्। जागृऽवांसम्। स्वदथः। वा। वृषण्वसू इति।
वृषण्ऽवसू। ता। नः। पृङ्क्तम्। इषा। रयिम्॥ ३६ ॥

वाशब्दः समुच्चये अपिच हे वृषण्वसू वर्षणधनावश्विनौ युवं युवां जागृवांसं जागरणशीलं स्वकार्ये मदजननेऽव्ययं मृगं मृग्यमन्वेषणीयं सोमं स्वदथः आस्वादयथः। यद्वा जागृवांसं जाग्रतं मृगं मृगनामानमसुरं स्वदथः स्वादयथः हिंस्थइत्यर्थः। ता तौ युवां नोस्मदर्थं इषा अन्नेन रयिं धनं पृङ्क्तं संपृक्तं कुरुतं ईदृशं धनं अस्मभ्यं प्रयच्छतमित्यर्थः॥ ३६॥

अथ सप्तत्रिंशी—

तामेअश्विनासनीनांविद्यातंनवानाम्।
यथाचिच्चैद्यःकशुःशतमुष्ट्रानांददत्सहस्रादशगोनाम्॥ ३७॥

ता। मे। अश्विना। सनीनाम्। विद्यातम्। नवानाम्। यथा।
चित्। चैद्यः। कशुः। शतम्। उष्ट्रानाम्।
ददत्। सहस्रा। दश। गोनाम्॥ ३७ ॥

हे अश्विना अश्विनौ ता तादृशौ युवां नवानां अभिनवानां श्रेष्ठानां सनीनां संभजनीयानां धनानां कर्मणि षष्ठी ईदृशानि धनानि मे मत्यं दापयितुं विद्यातं जानीतं यथाचिव येन खलु प्रकारेण चैद्यः चेदिपुत्रः कशुः एतत्संज्ञोराजा उष्ट्रानां शतं तथा गोनां गवां दशसहस्रा दशसंख्यानि सहस्राणि ददत् दद्यात् तथा विद्यातमिति पूर्वत्रान्वयः ॥ ३७ ॥

अथाष्टत्रिंशी–

योमेहिरण्यसन्दृशोदशराज्ञोअमंहत ।
अधस्पदाइच्चैद्यस्यकृष्टयश्चर्मम्नाअभितोजनाः ॥ ३८ ॥

यः । मे । हिरण्यऽसंदृशः । दश । राज्ञः । अमंहत । अधःऽपदाः ।
इत् । चैद्यस्य । कृष्टयः । चर्मऽम्नाः । अभितः । जनाः ॥ ३८ ॥

यः कशुसंज्ञोराजा मे मत्यं हिरण्यसन्दृशः हिरण्यसंदर्शनान् हिरण्यसमानतेजस्कान् दशराज्ञः अमंहत परिचरणार्थं दत्तवान् दशसंख्याकान् राज्ञोयुद्धे पराजितान् गृहीत्वा दासत्वेन अस्मै दत्तवानित्यर्थः । ननु ईदृशानां बहुविधानां राज्ञां दाने एकः कथं शक्नुयादिति तत्राह कृष्टयः सर्वाः प्रजाः तस्य चैद्यस्य चेदिपुत्रस्य कशोः अधस्पदा इत् पादयोरधस्तादेव वर्तन्ते नकश्चिदपि तत्समानस्तदधिकोवा विद्यते । अभितः सर्वतोवर्तमानाजनाः चर्मम्नाः चर्ममयस्यकवचादेर्धारणे कृताभ्यासाः । यद्वा चर्माणि चरणसाधनान् पश्वादीनि वाहनानि तेषु मननपश्यस्यन्तीति चर्मम्नाः म्नाअभ्यासे आतोमनिन्निनिविच् सर्वेमनुष्यास्तस्य भटाइत्यर्थः ॥ ३८ ॥

अथैकोनचत्वारिंशी–

माकिरेनापथागाद्येनेमेयन्तिचेदयः ।
अन्योनेत्सूरिरोहतेभूरिदावत्तरोजनः ॥ ३९ ॥ ८ ॥

माकिः । एना । पथा । गात् । येन । इमे । यन्ति । चेदयः । अन्यः ।
न । इत् । सूरिः । ओहते । भूरिदावत्ऽतरः । जनः ॥ ३९ ॥ ८ ॥

येन मार्गेण इमे चेद्यः अस्य राज्ञः पितृपितामहादयोयन्ति गच्छन्ति एना अनेन पथा मार्गेण माकिर्गात् अन्योगन्तुं शक्नोति अपिचास्माद्राज्ञः अन्यः भूरिदावत्तरः बहुदातृतमः सूरिर्विद्वान् सन् जनः नेव नेव ओहते वहति स्तोतृभ्योधनं प्रापयति। यद्वा बहुदातृतमोयोजनः करुनाम अस्मादन्यः व्यत्ययेन प्रथमा अन्यं सूरिः स्तोता नेवोहते नेव याचते ओहिर्याञ्चाकर्मा यथान्यं न याचते तथा बहुधनं प्रयच्छतीत्यर्थः॥ ३९॥

॥ इति पञ्चमस्याष्टमेष्टमोवर्गः॥ ८॥

इति अष्टमे मण्डले प्रथमोनुवाकः॥ १॥

द्वितीयानुवाके सप्त सूक्तानि। तत्र महाँइन्द्रइति अष्टाचत्वारिंशदृचं प्रथमं सूक्तं काण्वस्य वत्सस्यार्षं गायत्रं अन्त्यतृचवर्जमैन्द्रं तस्मिन्परशुनाम्नोराज्ञः पुत्रस्य तिरिन्दिरस्य दानं स्तूयते अतःतत्तृचस्तद्देवताकः। तथाचानुक्रान्तम्—महाँइन्द्रोष्टाचत्वारिंशद्वत्सस्तृचोन्त्यस्तिरिन्दिरस्य पारशव्यस्य दानस्तुतिरिति। महाव्रते गायत्रतृचाशीतौ अन्त्यतृचवर्जमिदं सूक्तम् तथैवपञ्चमारण्यकेसूत्र्यते—महाँइन्द्रोयओजसेति तिस्रउत्तमाउद्धरतीति। प्रातःसवने सोमातिरेके महानिरप्रादिकाःस्तोमानिशंसनार्थाःसूत्रितश्च—महाँइन्द्रोयओजसा अवोदेवाअवन्तुनःस्त्यैन्द्रीभिर्वैष्णवीभिश्च स्तोममतिशस्येति। तृतीयेपर्याये होतुःशस्त्रे महाँइन्द्रइति तृचोनुरूपः सूत्रितं च महाँइन्द्रोयओजसातमस्यमन्यवेविशइतीति। अतोर्यामे ब्रह्मणोतिरिक्तोक्थ्ये अयमेव तृचोनुरूपः सूत्र्यतेहि—महाँइन्द्रोयओजसानूनमश्विनोरिति। दर्शयागे महेन्द्रयाजिनः सान्नाय्यस्य महानिरेषानुवाक्या सूत्र्यतेहि—महाँइन्द्रोयओजसाभुवस्त्वमिन्द्रब्रह्मणामहानिति।

सेयं प्रथमा—

म॒हाँ इन्द्रो॒ य ओज॑सा प॒र्जन्यो॑ वृष्टि॒माँ इ॑व।
स्तोमै॑र्व॒त्सस्य॑ वावृधे॥ १॥

म॒हान्। इन्द्रः॑। यः। ओज॑सा। प॒र्जन्यः॑। वृ॒ष्टि॒मान्ऽइ॑व।
स्तोमैः॑। व॒त्सस्य॑। व॒वृ॒धे॥ १॥

यइन्द्रः ओजसा बलेन महान् सर्वेभ्योधिकः कइव वृष्टिमानइव यथा वृष्ट्यायुक्तः पर्जन्यः रसानां प्रार्जयिता देवोमहान् तद्वदित्यर्थः सइन्द्रः वत्सस्य पुत्रस्थानीयस्य स्तोतुः वत्सनाम्नएवऋषेः स्तोमैः स्तोत्रैः ववृधे प्रवर्धते॥ १॥

अथ द्वितीया—

प्रजामृतस्यपिप्रतःप्रयद्भरन्तवह्नयः ।
विप्राऋतस्यवाहसा ॥ २ ॥

प्रऽजाम् । ऋतस्य । पिप्रतः । प्र । यत् । भरन्त ।
वह्नयः । विप्राः । ऋतस्य । धारया ॥ २ ॥

ऋतस्य यज्ञस्य सत्यस्य प्रजां प्रकर्षेण जातमिन्द्रं पिप्रतः नभसः प्रदेशान् पूरयन्तोवह्नयोवाहकाअश्वाः यद्यदा प्रभरन्त प्रकर्षेण भरन्ति वहन्ति तदा विप्रामेधाविनः ऋतस्य यज्ञस्य वाहसा प्रापकेण स्तोत्रेण तमिन्द्रं स्तुवन्तीति शेषः ॥ २ ॥

सैषा तृतीया—

कण्वाइन्द्रंयदक्रतस्तोमैर्यज्ञस्यसाधनम् ।
जामिब्रुवतआयुधम् ॥ ३ ॥

कण्वाः । इन्द्रम् । यत् । अक्रत । स्तोमैः । यज्ञस्य ।
साधनम् । जामि । ब्रुवते । आयुधम् ॥ ३ ॥

कण्वाः स्तोतृनामैतत् स्तोतारः कण्वगोत्रावा इन्द्रं स्तोमैः स्तोत्रैः यज्ञस्य यागस्य साधनं साधयितारं निष्पादकं यद्यदा अक्रत अकुर्वत करोतेर्लुङि मन्त्रेघसेति च्लेर्लुक् तदानीं आयुधं शत्रूणां हिंसकं बाणादिकं जामि अतिरेकनामैतत् अतिरिक्तं अहितं प्रयोजनरहितं ब्रुवते कथयन्ति आयुधसाध्यस्य सर्वकार्यस्येन्द्रेण कृतत्वात् आयुधं निष्प्रयोजनमित्यर्थः । यद्वा आयुधमायोधनशीलमिन्द्रं जामि जामिं भ्रातरं ब्रुवते वदन्ति सर्वकार्येषु भ्रातृवद्वर्तत इत्यर्थः ॥३॥

तृतीये पर्याये होतुः शस्त्रे समस्यमन्यवइत्याद्याद्विचत्वारिंशदृचः सूत्र्यतेहि—समस्यमन्यवेविशइति द्विचत्वारिंशद्विश्वजितइति ।

तत्र प्रथमा सूक्ते चतुर्थी—

समस्यमन्यवेविशोविश्वानमन्तकृष्टयः ।
समुद्रायेवसिन्धवः ॥ ४ ॥

सम् । अस्य । मन्यवे । विशः । विश्वाः । नमन्त ।
कृष्टयः । समुद्रायऽइव । सिन्धवः ॥ ४ ॥

विशोविशन्त्यः विश्वाः सर्वाः कृष्टयः प्रजाः अस्येन्द्रस्य मन्यवे क्रोधाय यद्वा मन्युर्मननसाधनं स्तोत्रं तदर्थं सन्नमन्त सम्यक्स्वतएव नमन्ति नमतेः कर्मकर्तरि छान्दसोलङ् नदुहस्नुनमामितियक्चिणोः प्रतिषेधः प्रह्वीभवन्ति । तत्रदृष्टान्तः—समुद्रायेव यथा समुद्रं अब्धिं प्रति सिन्धवः स्यन्दनशीलानद्यः स्वयमेव नमन्ते तद्वत् ॥ ४ ॥

अथ पञ्चमी—

ओजस्तदस्यतित्विषउभेयत्समवर्तयत् ।
इन्द्रश्चर्मेवरोदसी ॥ ५ ॥ ९ ॥

ओजः । तत् । अस्य । तित्विषे । उभे इति । यत् ।
सम्ऽअवर्तयत् । इन्द्रः । चर्मऽइव । रोदसी इति ॥ ५ ॥ ९ ॥

अस्येन्द्रस्य तदोजोबलं तित्विषे दिदीपे त्विष दीप्तौ यत् येनौजसा अयमिन्द्रः उभे रोदसी द्यावापृथिव्यौ चर्मेव समवर्तयत् सम्यग्वर्तयति यथा कश्चित्किञ्चिच्चर्म कदाचिद्विस्तारयति कदाचित्संकोचयति एवं तदधीने अभूतामित्यर्थः ॥ ५ ॥

॥ इति पञ्चमस्याष्टमे नवमोवर्गः ॥ ९ ॥

अथ षष्ठी—

विचिद्वृत्रस्यदोधतोवज्रेणशतपर्वणा ।
शिरोबिभेदवृष्णिना ॥ ६ ॥

वि । चित् । वृत्रस्य । दोधतः । वज्रेण । शतऽपर्वणा ।
शिरः । बिभेद । वृष्णिना ॥ ६ ॥

चिच्छब्दोप्यर्थे सच भिन्नक्रमः वृत्रस्यचित् आवरकस्यापि दोधतः अत्यर्थं जगत्कम्पयतोऽसुरस्य शिरः मूर्धानं शतपर्वणा शतसंख्यानि पर्वाणि धारायस्य तादृशेन वृष्णिना वीर्यवता वज्रेण इन्द्रोविबिभेद विचिच्छेद ॥ ६ ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने प्रशास्तुः शस्त्रे इमाअभीतितृचो वैकल्पिकोनुरूपः सूत्रितश्च—इमाअभिप्रणोनुमइत्यथब्राह्मणाच्छंसिनइति।

तत्र प्रथमा सूक्ते सप्तमी—

इमाअभिप्रणोनुमोविपामग्रेषुधीतयः।
अग्नेःशोचिर्नदिद्युतः॥ ७॥

इमाः। अभि। प्र। नोनुमः। विपाम्। अग्रेषु।
धीतयः। अग्नेः। शोचिः। न। दिद्युतः॥ ७॥

विपां स्तोतॄणामग्रेषु पुरस्तात् इमा अस्मदीयाः धीतयोधियः स्तोत्राणि अभिप्रणोनुमः आभिमुख्येन पुनःपुनः प्रवदामः। णुशब्दे। कीदृशीः स्तुतीः अग्नेः शोचिर्न दीप्तिरिव दिद्युतोदीप्यमाना वेदरूपाः॥ ७॥

अथाष्टमी—

गुहासतीरुपत्मनाप्रयच्छोचन्तधीतयः।
कण्वाऋतस्यधारया॥ ८॥

गुहा। सतीः। उप। त्मना। प्र। यत्। शोचन्त।
धीतयः। कण्वाः। ऋतस्य। धारया॥ ८॥

गुहा गुहायां सतीः सत्योभवंत्यः यत् याः धीतयः स्तुतयः कर्माणि वा त्मना आत्मना स्वेनेन्द्रेणोपगम्यमानाः प्रशोचन्त प्रादीप्यन्त यद्वा आत्मना स्वतएवेन्द्रमुपगच्छन्त्यः प्रदीप्यन्ते ताः स्तुतीः कण्वाः कण्वगोत्राऋषयः ऋतस्योदकस्य सोमात्मकस्य धारया सहिताः कुर्वन्तीति शेषः॥ ८॥

अथ नवमी—

प्रतमिन्द्रनशीमहिरयिंगोमन्तमश्विनम्।
प्रब्रह्मपूर्वचित्तये॥ ९॥

प्र । तम् । इन्द्र । नशीमहि । रयिम् । गोऽमन्तम् ।
अश्विनम् । प्र । ब्रह्म । पूर्वऽचित्तये ॥ ९ ॥

हे इन्द्र गोमन्तं गोभिर्युक्तं अश्विनं अश्वैरुपेतं तं प्रसिद्धं रयिं त्वदीयं धनं प्रनशीमहि प्राप्नुयाम तथा ब्रह्म परिवृढमन्नं च पूर्वचित्तयेऽन्येभ्यः पूर्वमेव ज्ञानाय प्राप्नुयाम ॥ ९ ॥

अथ दशमी–

अहमिद्धिपितुष्परिमेधामृतस्यजग्रभं ।
अहंसूर्यइवाजनि ॥ १० ॥ १० ॥

अहम् । इत् । हि । पितुः । परि । मेधाम् । ऋतस्य ।
जग्रभं । अहम् । सूर्यःऽइव । अजनि ॥ १० ॥ १० ॥

पितुः पालकस्य ऋतस्य सत्यस्यावितथस्येंद्रस्य मेधामनुग्रहात्मिकां बुद्धिं अहमित् अहमेव परिजग्रभ परिगृहीतवानस्मि नान्यः । हि यस्मादेवं तस्मादहं सूर्यइवाजनि सूर्यो यथा प्रकाशमानः सन् प्रादुर्भवति तथा अजनिषं प्रादुरभूवम् ॥ १० ॥

॥ इति पञ्चमस्याष्टमे दशमोवर्गः ॥ १० ॥

अथैकादशी–

अहंप्रत्नेनमन्मनागिरःशुंभामिकण्ववत् ।
येनेन्द्रःशुष्ममिद्दधे ॥ ११ ॥

अहम् । प्रत्नेन । मन्मना । गिरः । शुंभामि ।
कण्वऽवत् । येन । इन्द्रः । शुष्मम् । इत् । दधे ॥ ११ ॥

कण्ववत् मम जनकः कण्वइवाहं प्रत्नेन नित्येन वेदरूपेण मन्मना मननसाधनेनेन्द्रविषयस्तोत्रेण गिरोवाचः शुंभामि अलंकरोमि यदाहि इन्द्रविषये प्रयुज्यंते तदानीं यथार्थत्वात् वाचोऽलंकृताभवन्ति येन खलु स्तोत्रेण इन्द्रः शुष्मं शत्रूणां शोषकं बलं दधेइत् धत्तएव धारयत्येव यत्स्तोत्रमिन्द्रे ईदृशं बलमवश्यं जनयति तेन मन्मनेत्यर्थः ॥ ११ ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने प्रशास्तुः शस्त्रे इमाअभीतितृचो वैकल्पिकोनुरूपः सूत्रितश्च—इमाअभिप्रणोनुमइत्यथत्राह्मणाच्छंसिनइति ।

तत्र प्रथमा सूक्ते सप्तमी—

इमाअभिप्रणोनुमोविपामग्रेषुधीतयः ।
अग्नेःशोचिर्नदिद्युतः ॥ ७ ॥

इमाः । अभि । प्र । नोनुमः । विपाम् । अग्रेषु ।
धीतयः । अग्नेः । शोचिः । न । दिद्युतः ॥ ७ ॥

विपां स्तोतृणामग्रेषु पुरस्तात् इमा अस्मदीयाः धीतयोधियः स्तोत्राणि अभिप्रणोनुमः आभिमुख्येन पुनःपुनः प्रवदामः । णुशब्दे । कीदृशीः स्तुतीः अग्नेः शोचिर्न दीप्तिरिव दिद्युतोदीप्यमाना वेदरूपाः ॥ ७ ॥

अथाष्टमी—

गुहासतीरुपत्मनाप्रयच्छोचन्तधीतयः ।
कण्वाऋतस्यधारया ॥ ८ ॥

गुहा । सतीः । उप । त्मना । प्र । यत् । शोचन्त ।
धीतयः । कण्वाः । ऋतस्य । धारया ॥ ८ ॥

गुहा गुहायां सतीः सत्योभवन्त्यः यत् याः धीतयः स्तुतयः कर्माणि वा त्मना आत्मना स्वेनेन्द्रेणोपगम्यमानाः प्रशोचन्त प्रादीप्यन्त यद्वा आत्मना स्वतएवेन्द्रमुपगच्छन्त्यः प्रदीप्यन्ते ताः स्तुतीः कण्वाः कण्वगोत्राऋषयः ऋतस्योदकस्य सोमात्मकस्य धारया संहिताः कुर्वन्तीति शेषः ॥ ८ ॥

अथ नवमी—

प्रतमिन्द्रनशीमहिरयिंगोमन्तमश्विनम् ।
प्रब्रह्मपूर्वचित्तये ॥ ९ ॥

प्र । तम् । इन्द्र । नशीमहि । रयिम् । गोऽमन्तम् ।
अश्विनम् । प्र । ब्रह्म । पूर्वऽचित्तये ॥ ९ ॥

हे इन्द्र गोमन्तं गोभिर्युक्तं अश्विनं अश्वैरुपेतं तं प्रसिद्धं रयिं त्वदीयं धनं प्रनशीमहि प्राप्नुयाम तथा ब्रह्म परिवृढमन्नं च पूर्वचित्तयेऽन्येभ्यः पूर्वमेव ज्ञानाय प्राप्नुयाम ॥ ९ ॥

अथ दशमी—

अहमिद्धिपितुष्परिमेधामृतस्यजग्रभ ।
अहंसूर्यइवाजनि ॥ १० ॥ १० ॥

अहम् । इत् । हि । पितुः । परि । मेधाम् । ऋतस्य ।
जग्रभ । अहम् । सूर्यःऽइव । अजनि ॥ १० ॥ १० ॥

पितुः पालकस्य ऋतस्य सत्यस्यावितथस्येंद्रस्य मेधामनुग्रहात्मिकां बुद्धिं अहमित् अहमेव परिजग्रभ परिगृहीतवानस्मि नान्यः । हि यस्मादेवं तस्मादहं सूर्यइवाजनि सूर्योयथा प्रकाशमानः सन् प्रादुर्भवति तथा अजनिषं प्रादुरभूवम् ॥ १० ॥

॥ इति पञ्चमस्याष्टमे दशमोवर्गः ॥ १० ॥

अथैकादशी—

अहंप्रत्नेनमन्मनागिरःशुंभामिकण्ववत् ।
येनेन्द्रःशुष्ममिद्दधे ॥ ११ ॥

अहम् । प्रत्नेन । मन्मना । गिरः । शुंभामि ।
कण्वऽवत् । येन । इन्द्रः । शुष्मम् । इत् । दधे ॥ ११ ॥

कण्ववत् मम जनकः कण्वइवाहं प्रत्नेन नित्येन वेदरूपेण मन्मना मननसाधनेनेन्द्रविषयस्तोत्रेण गिरोवाचः शुंभामि अलंकरोमि यदाहि इन्द्रविषये प्रयुज्यंते तदानीं यथार्थत्वाद्वाचोऽलंकृताभवन्ति येन खलु स्तोत्रेण इन्द्रः शुष्मं शत्रूणां शोषकं बलं दधेइत् धत्तएव धारयत्येव यत्स्तोत्रमिन्द्रे ईदृशं बलमवश्यं जनयति तेन मन्मनेत्यर्थः ॥ ११ ॥

अथ द्वादशी–

येत्वामिन्द्रनतुंष्टुवुर्ऋषयोयेचतुष्टुवुः ।
ममेद्वर्धस्वसुष्टुतः ॥ १२ ॥

ये । त्वाम् । इन्द्र । न । तुस्तुवुः । ऋषयः । ये । च ।
तुस्तुवुः । मम । इत् । वर्धस्व । सुऽस्तुतः ॥ १२ ॥

हे इन्द्र ये जनाः त्वां न तुष्टुवुः न स्तुवन्ति ये च ऋषयोमन्त्राणां द्रष्टारोजनाः तुष्टुवुः त्वां स्तुवन्ति उभयेषां मध्ये ममेत् ममैव स्तोत्रेण सुष्टुतः शोभनं स्तुतः सन् वर्धस्व वर्धयस्व वृद्धोभव ॥ १२ ॥

अथ त्रयोदशी–

यदस्यमन्युरध्वनीद्विवृत्रंपर्वशोरुजन् ।
अपःसमुद्रमैरयत् ॥ १३ ॥

यत् । अस्य । मन्युः । अध्वनीत् । वि । वृत्रम् ।
पर्वऽशः । रुजन् । अपः । समुद्रम् । ऐरयत् ॥ १३ ॥

अस्येन्द्रस्य मन्युः क्रोधः वृत्रं आवृत्य तिष्ठन्तमसुरं मेघं वा पर्वशः पर्वणि पर्वणि परुषि परुषि विरुजन् विभञ्जन् यद्यदा अध्वनीत् स्तनयित्नुलक्षणं शब्दमकरोत् तदानीं समुद्रं समुन्दनीयं उदधिं प्रति अपोवृष्ट्युदकानि ऐरयत् सइन्द्रः प्रेरितवान् ॥ १३ ॥

अथ चतुर्दशी–

निशुष्णंइन्द्रधर्णसिंवज्रंजघन्थदस्यवि ।
वृषाह्युग्रशृण्विषे ॥ १४ ॥

नि । शुष्णे । इन्द्र । धर्णसिम् । वज्रम् । जघन्थ ।
दस्यवि । वृषा । हि । उग्र । शृण्विषे ॥ १४ ॥

हे इन्द्र शुष्णे शोषके एवत्संज्ञे दस्यवि उपक्षपयितर्यसुरे धर्णसिं धारयितव्यं वज्रं कुलिशं त्वं निजघन्थ निहतवानसि वज्रेण तमसुरं न्यवधीरित्यर्थः। हे उग्रोदूर्णवलेन्द्र वृषा कामानां वर्षितेति हि श्रुणिषे श्रूयसे अतोस्मदपेक्षितं धनं देहीति शेषः ॥ १४ ॥

अथ पञ्चदशी–

न॒द्याव॒ इन्द्र॒मोज॑सा॒नान्तरि॑क्षाणिव॒ज्रिण॑म्।
नवि॑व्यचन्त॒भूम॑यः ॥ १५ ॥ ११ ॥

न। द्याव॑ः। इन्द्र॑म्। ओज॑सा। न। अ॒न्तरि॑क्षाणि।
व॒ज्रिण॑म्। न। वि॒व्य॒च॒न्त॒। भूम॑यः ॥ १५ ॥ ११ ॥

द्यावोद्युलोकाः इममिन्द्रं ओजसा बलेन न विव्यचन्त न व्याप्नुवन्ति द्युलोकेभ्योप्ययम् बलमधिकमित्यर्थः। तथा अन्तरिक्षाणि अन्तराक्षान्तानि द्यावापृथिव्योर्मध्ये वर्तमानाः लोकाः वज्रिणं वज्रवन्तमिन्द्रं न व्याप्नुवन्ति तथा भूमयोभूलोकाश्च तमिन्द्रं न व्याप्नुवन्ति त्रयोवाइमे-त्रिवृतोलोकाइति ब्राह्मणादेकैकस्यलोकस्य त्रित्वम्। तिस्रोभूमीरित्यादि निगमाच्च ॥ १५ ॥

॥ इति पञ्चमस्याष्टमे एकादशोवर्गः ॥ ११ ॥

अथ षोडशी–

यस्तइन्द्रम॒हीर॒पस्त॑भू॒यमा॑न॒आश॑यत्।
नितंप॒द्या॑सुशि॒श्नथः ॥ १६ ॥

यः। ते॒। इ॒न्द्र॒। म॒हीः। अ॒पः। स्त॒भु॒ऽयमा॑नः।
आ। अश॑यत्। नि। तम्। प॒द्या॑सु। शि॒श्नथः ॥ १६ ॥

हे इन्द्र ते तव संबन्धिनीः महीर्महतीः अपः आन्तरिक्ष्याण्युदकानि योवृत्रः स्तभूयमानः स्तम्भयन् यथा अधोनपतन्ति तथाकुर्वन् आशयत् आवृत्याशेत तमसुरं पद्यासु गमनशीलास्वप्सु मध्ये निशिश्नथः न्यहिंसीः श्नथिर्हिंसार्थः वज्रेण तमसुरं हत्वा नदीषु पातितवानित्यर्थः ॥ १६ ॥

---

१ ऐ० ब्रा० २. १७। २ ऋ० सं० २. ७. ७.।

अथ सप्तदशी–

यइमेरोदंसीमहीसंमीचीसमजंग्रभीत् ।
तमोभिरिन्द्रतंगुहः ॥ १७ ॥

यः । इमे इति । रोदंसी इति । मही इति । समीची इति सम्ऽईची ।
सम्ऽअजंग्रभीत् । तमःऽभिः । इन्द्र । तम् । गुहः ॥ १७ ॥

योवृत्रः मही महत्यौ विस्तीर्णे समीची सङ्गते इमे प्रत्यक्षतउपलभ्यमाने रोदसी द्यावापृथिव्यौ समजग्रभीत सम्यगग्रहीत् आवृणोदित्यर्थः तमसुरं हे इन्द्र त्वं तमोभिरन्धकारैः गुहः संवृतमकरोः अनाद्यनन्तं मरणलक्षणं तमः प्रावेशयइत्यर्थः ॥ १७ ॥

अथाष्टादशी–

यइन्द्रयतंयस्त्वाभृगवोयेचंतुष्टुवुः ।
ममेदुंग्रश्रुधीहवंम् ॥ १८ ॥

ये । इन्द्र । यतंयः । त्वा । भृगवः । ये । च ।
तुस्तुवुः । ममं । इत् । उग्र । श्रुधि । हवंम् ॥ १८ ॥

हे इन्द्र ये यतयः नियताः अंगिरसः त्वा त्वां तुष्टुवुः ये च भृगवोभृगुगोत्रास्त्वां तुष्टुवुः स्तुवन्ति तेषु मध्ये ममेत् ममैव हवं स्तोत्रं हे उग्र ओजस्विन्निन्द्र श्रुधि शृणु ॥ १८ ॥

अथैकोनविंशी–

इमास्तंइन्द्रपृश्नयोघृतंदुंहतआशिरंम् ।
एनामृतस्यपिप्युषीः ॥ १९ ॥

इमाः । ते । इन्द्र । पृश्नयः । घृतम् । दुहते । आऽशिरंम् ।
एनाम् । ऋतस्यं । पिप्युषीः ॥ १९ ॥

हे इन्द्र ते त्वदीयाइमाः पृश्नयः माष्टवर्णागावः घृतं क्षरणशीलं एनां एनं आशिरं आश्रयणं पयः दुहते दुहन्ति क्षारयन्ति। कीदृश्यः पृश्नयः ऋतस्य सत्यस्य अवितथस्येन्द्रस्य यज्ञस्य वा पिप्युषीः वर्धयित्र्यः॥ १९॥

अथ विंशी—

याइन्द्रप्रस्वस्त्वासागर्भमचंक्रिरन्।
परिधर्मेवसूर्यम्॥ २०॥ १२॥

याः। इन्द्र। प्रऽस्वः। त्वा। आसा। गर्भम्।
अचंक्रिरन्। परि। धर्मऽइव। सूर्यम्॥ २०॥ १२॥

हे इन्द्र प्रस्वः प्रसुवते गर्भं विमुञ्चन्तीति प्रस्वः सूतेः सत्सूद्विषेतिक्विप् ईदृश्योमागावः आसा आस्येन त्वा त्वदीयं वीर्यं वृत्रवधानन्तरं ओषध्यादिरूपेण परिणतं भक्षयित्वा गर्भमचक्रिरन् अकुर्वन् त्वदीयं वीर्यमन्तरधारयन् तत्र दृष्टान्तः—सूर्यं परितः सूर्यमण्डलस्योपरि धर्मेव धारकं पोषकमुदकं यथा रश्मयः गर्भरूपेण बिभ्रति तद्वत्। यद्वा परिधर्मेव परितोधारयितारं सूर्यमिव यथा सूर्यः परितः सर्वं जगद्धत्ते तद्वत् कृत्स्नस्य जगतोधारकमिन्द्रस्य वीर्यमित्यर्थः। ओषध्यादिरूपेण परिणतस्येन्द्रवीर्यस्य गोभिरात्मनि धारणं। इन्द्रस्य वृत्रं जघ्नुषइत्यारभ्य तैत्तिरीयके विस्पष्टमाम्नातम्—तत्पशवओषधीभ्योध्यात्मन् समनयन् तत्प्रत्यदुहन्निति। पयोरूपेण परिणतम् तद्वीर्यं इमागावः आशिरार्थं दुहतइति पूर्वस्यामृच्यन्वयः॥ २०॥

॥ इति पञ्चमस्याष्टमे द्वादशोवर्गः॥ १२॥

वाजपेयेतिरिक्तोक्थे त्वामिच्छवसस्पतइत्येषा सूत्रितश्च—त्वामिच्छवसस्पतेतंपत्नयेति।

सैषैकविंशी—

त्वामिच्छवसस्पतेकण्वाउक्थेनवावृधुः।
त्वांसुतासइन्दवः॥ २१॥

१ तै० सं० २. ५. ३.।

त्वाम् । इत् । शवसः । पते । कण्वाः । उक्थेन ।
वृवृधुः । त्वाम् । सुतासः । इन्दवः ॥ २१ ॥

हे शवसस्पते बलस्य स्वामिन्निन्द्र त्वामिव् त्वामेव कण्वाःस्तोतारः कण्वगोत्रावा ऋषयः उक्थेन शस्त्रेण वव्रुधुः वर्धयन्ति सुतासोध्वर्युभिरभिपुताः इन्दवः सोमाश्च त्वामेव वर्धयन्ति ॥ २१ ॥

अथ द्वाविंशी—

तवेदिन्द्रप्रणीतिषूतप्रशंस्तिरद्रिवः ।
यज्ञोवितन्तसाय्यंः ॥ २२ ॥

तव । इत् । इन्द्र । प्रऽनीतिषु । उत ।
प्रऽशंस्तिः । अद्रिऽवः । यज्ञः । वितन्तसाय्यः ॥ २२ ॥

उतापि च हे अद्रिवः आदृणात्यनेनेत्यद्रिर्वज्रः तद्वन्निन्द्र तवेद् तवैव प्रणीतिषु प्रकृष्टेषु नयनेषु धनप्रदानेषु सत्सु प्रशस्तिः प्रकृष्टा स्तुतिः क्रियते । तथा वितन्तसाय्यः विस्तृततमः तनोतेश्छान्दसमेतद्रूपम् यद्वा तंतसिः कंड्वादिर्वृध्यर्थः तस्मादौणादिकआय्यप्रत्ययः प्रवृद्धोयज्ञश्चतवैव क्रियते ॥ २२ ॥

अथ त्रयोविंशी—

आनइन्द्रमहीमिषंपुरंनदर्षिगोमतीम् ।
उतप्रजांसुवीर्यम् ॥ २३ ॥

आ । नः । इन्द्र । महीम् । इषम् । पुरम् । न ।
दर्षि । गोऽमतीम् । उत । प्रऽजाम् । सुऽवीर्यम् ॥ २३ ॥

हे इन्द्र नोस्मभ्यं अस्मदर्थं महीं महतीं गोमतीं गोभिर्युक्तां इषमन्नं आदर्षि आद्रियस्व दातुं कामयस्व नशब्दश्चार्थे पुरं न पालनं पूःपालनं रक्षणं चास्मभ्यं कर्तुमाद्रियस्व । उतापिच सुवीर्यं शोभनवीर्योपेतां प्रजां संततिं दातुं कामयस्व ॥ २३ ॥

अथ चतुर्विंशी–

उतत्यदाश्वश्व्यंयदिन्द्रनाहुंषीष्वा ।
अग्रेंविक्षुप्रदीदंयत् ॥ २४ ॥

उत । त्यत् । आशुऽअश्व्यम् । यत् । इन्द्र ।
नाहुंषीषु । आ । अग्रे । विक्षु । प्रऽदीदंयत् ॥ २४ ॥

हे इन्द्र नाहुषीषु नहुषाइति मनुष्यनाम तत्सम्बन्धिनीषु यद्वा नाहुषोनाम कश्चिद्राजा तदीयासु विक्षु प्रजासु अग्रे पुरस्तात् यत् आश्वश्व्यं शीघ्रगाम्यश्वसंघात्मकं बलं प्रदीदयत् प्रादीप्यत उतापिच त्यत् तदपि अस्मभ्यं देहीतिशेषः । आकारः पूरकः ॥ २४ ॥

अथ पञ्चविंशी–

अभिव्रजंनतंत्निषेसूरंउपाकचंक्षसम् ।
यदिन्द्रमृळयासिनः ॥ २५ ॥ १३ ॥

अभि । व्रजम् । न । तत्निषे । सूरः । उपाकऽचंक्षसम् ।
यत् । इन्द्र । मृळयासि । नः ॥ २५ ॥ १३ ॥

न सम्प्रत्यर्थे सम्प्रति इदानीं हे सूरः प्राज्ञस्त्वं व्रजं गोष्ठं उपाकचक्षसं उपाकइत्यन्तिकनाम अन्तिके द्रष्टव्यं अभितत्निषे अभितनोषि अभिविस्तारयसि गोभिः पूर्णं करोषीत्यर्थः । तनोतेश्छान्दसे लिटि तनिपत्योश्छन्दसीत्युपधालोपः यद्यदा हे इन्द्र त्वं नोस्मान् मृळयासि मृळयसि सुखयसि ॥ २५ ॥

॥ इति पञ्चमस्याष्टमे त्रयोदशोवर्गः ॥ १३ ॥

अथ षड्विंशी–

यदुङ्गतंविषीयसइन्द्रंप्रराजंसिक्षितीः । महाँअंपारओजंसा ॥ २६ ॥

यत् । अङ्ग । तविषीऽयसें । इन्द्रं । प्रऽराजंसि । क्षितीः ।
महान् । अपारः । ओजंसा ॥ २६ ॥

अङ्गेत्यभिमुखीकरणे हे इन्द्र यत् यस्त्वं तविषीयसे तविषीति बलनाम बलमिवाचरसि हस्त्यश्वरथादिकं बलं यथा सर्वं शत्रुजातं भनक्ति तद्वत् त्वमसहायएव सन् सर्वमेव शत्रुजातं मारयसीत्यर्थः यश्च त्वं क्षितीः मनुष्यनामैतत् मनुष्यान् पराजसि प्रकर्षेणशिषे राजतिरैश्वर्यकर्मा अस्यापि यद्वृत्तयोगान्ननिघातः सइन्द्रः ओजसा बलेन महान् सर्वेभ्योधिकः अतएव अपारः पाररहितः केनाप्यवसानं प्रापयितुमशक्यइत्यर्थः ॥ २६ ॥

अथ सप्तविंशी–

तंत्वांहविष्मंतीर्विशउपंब्रुवतऊतये।
उरुज्रयंसमिन्दुंभिः ॥ २७ ॥

तम् । त्वा । हविष्मंतीः । विशंः । उपं । ब्रुवते । ऊतये ।
उरुऽज्रयसम् । इन्दुंऽभिः ॥ २७ ॥

हे इन्द्र तं पूर्वोक्तगुणं उरुज्रयसं विस्तीर्णं व्यापिनं त्वा त्वां हविष्मतीर्हविर्भिश्चरुपुरोडाशादिभिर्युक्ताः विशः प्रजाः उपब्रुवते उपेत्यस्तुवन्ति किमर्थं इन्दुभिः सोमैः ऊतये तर्पणाय। यद्वा इन्दुभिः सोमैरुरुज्रयसं विस्तीर्णजवं ऊतये रक्षणाय स्तुवन्ति ॥ २७ ॥

अथाष्टाविंशी–

उपह्वरेगिरीणांसंङ्गथेचंनदीनांम् ।
धियाविप्रोंअजायत ॥ २८ ॥

उपऽह्वरे । गिरीणाम् । सम्ऽगथे । च । नदीनाम् । धिया ।
विप्रंः । अजायत ॥ २८ ॥

गिरीणां पर्वतानां उपह्वरे उपह्वर्तव्ये नदीनां सरितां संगथे संगमने च ईदृग्विधे देशे क्रियमाणया धिया यागक्रियया स्तुत्या वा विप्रोमेधावी इन्द्रः अजायत प्रादुर्भवति अतोवयमपि तादृशेदेशे यजामः स्तुमोवेतिभावः। गिरीणामित्यत्र नामन्यतरस्यामिति नामउदात्तत्वम् ॥२८॥

अथैकोनत्रिंशी–

अतंःसमुद्रमुद्वतंश्चिकित्वाँअवंपश्यति ।
यतोंविपानएजंति ॥ २९ ॥

अद्रेत्यभिमुखीकरणे हे इन्द्र यत् यस्त्वं तविषीयसे तविषीति बलनाम बलमिवाचरसि हस्त्यश्वरथादिकं बलं यथा सर्वं शत्रुजातं भनक्ति तद्वत् त्वमसहायएव सन् सर्वमेव शत्रुजातं मारयसीत्यर्थः यश्च त्वं क्षितीः मनुष्यनामैतत् मनुष्यान् प्रराजसि प्रकर्षेणैशिषे राजतिरैश्वर्यकर्मा अस्यापि यद्वृत्तयोगान्ननिघातः सइन्द्रः ओजसा बलेन महान् सर्वेभ्योधिकः अतएव अपारः पाररहितः केनाप्यवसानं प्रापयितुमशक्यइत्यर्थः ॥ २६ ॥

अथ सप्तविंशी–

तंत्वाहविष्मतीर्विशउपब्रुवतऊतये ।
उरुज्रयसमिन्दुभिः ॥ २७ ॥

तम् । त्वा । हविष्मतीः । विशः । उप । ब्रुवते । ऊतये ।
उरुऽज्रयसम् । इन्दुऽभिः ॥ २७ ॥

हे इन्द्र तं पूर्वोक्तगुणं उरुज्रयसं विस्तीर्णं व्यापिनं त्वा त्वां हविष्मतीर्हविर्भिश्चरुपुरोडाशादिभिर्युक्ताः विशः प्रजाः उपब्रुवते उपेत्यस्तुवन्ति किमर्थं इन्दुभिः सोमैः ऊतये तर्पणाय । यद्वा इन्दुभिः सोमैरुरुज्रयसं विस्तीर्णजवं ऊतये रक्षणाय स्तुवन्ति ॥ २७ ॥

अथाष्टाविंशी–

उपह्वरेगिरीणांसंगथेचनदीनाम् ।
धियाविप्रोअजायत ॥ २८ ॥

उपऽह्वरे । गिरीणाम् । सम्ऽगथे । च । नदीनाम् । धिया ।
विप्रः । अजायत ॥ २८ ॥

गिरीणां पर्वतानां उपह्वरे उपह्वर्तव्ये नदीनां सरितां संगथे संगमने च ईदृग्विधे देशे क्रियमाणया धिया यागक्रियया स्तुत्या वा विप्रोमेधावी इन्द्रः अजायत प्रादुर्भवति अतोवयमपि तादृशेदेशे यजामः स्तुमोवेतिभावः । गिरीणामित्यत्र नामन्यतरस्यामिति नामउदात्तत्वम् ॥ २८ ॥

अथैकोनत्रिंशी–

अतःसमुद्रमुद्वतश्चिकित्वाँअवपश्यति ।
यतोविपानएजति ॥ २९ ॥

अर्तः । सुमुद्रम् । उत्ऽवर्तः । चिकित्वान् । अवं । पश्यति ।
यर्तः । विपानः । एजति ॥ २९ ॥

यतोयस्मिन् द्युलोके विपानोव्याप्नुवन् विशिष्टपानयुक्तोवा इन्द्रएजति चेष्टते उद्वतः उद्वतान् उपसर्गाच्छन्दसिधात्वर्थइतिवतिः अतोस्मात् द्युलोकात् चिकित्वान् जानन् सइन्द्रः समुद्रं समुन्दनशीलं यजमानैर्दीयमानं सोमं अवपश्यति अवाङ्मुखःसन् ईक्षते । यद्वा सूर्यात्मनेन्द्रः स्तूयते यस्मिन्नभसि विपानोव्याप्नुवन् सूर्यात्मा इन्द्रः एजति वर्तते चिकित्वान् जानन् विद्वान्वा सः इन्द्रः उद्वतः उद्वतात् अतोस्मादन्तरिक्षात्समुद्रम् उपलक्षणमेतत् समुद्रोपलक्षितं सर्वं जगदवपश्यति अवाङ्मुखं प्रसृतैः किरणैः प्रकाशयति ॥ २९ ॥

अथ त्रिंशी–

आदित्प्रत्नस्यरेतसोज्योतिष्पश्यन्तिवासरम् ।
परोयदिध्यतेदिवा ॥ ३० ॥ १४ ॥

आत् । इत् । प्रत्नस्य । रेतसः । ज्योतिः । पश्यन्ति । वासरम् ।
परः । यत् । इध्यते । दिवा ॥ ३० ॥ १४ ॥

परोदिवा दिवःपरस्तात् द्युलोकस्योपरि यद्यदा अयमिन्द्रः सूर्यात्मना इध्यते दीप्यते आदित् अनन्तरमेव प्रत्नस्य चिरन्तनस्य रेतसः गन्तुः री गतिरेषणयोः अस्मात् स्रुरीभ्यांतुट्चेत्यसुन् तुडागमश्च । यद्वा रेतइत्युदकनाम रेतस्विनः उदकवतः सामर्थ्यान्मत्वर्थोलक्ष्यते ईदृशस्येन्द्रस्य सूर्यात्मनः वासरं निवासकं वासरस्य निवासस्य हेतुभूतं वा ज्योतिर्द्योतमानं तेजः पश्यन्ति सर्वेजनाः । यद्वा वासरमित्यत्यन्तसंयोगे द्वितीया कृत्स्नमहः उदयप्रभृत्यस्तमयनं यावत् ज्योतिष्पश्यन्तीत्यर्थः इसुसोःसामर्थ्यइति विसर्जनीयस्यषत्वम् ॥ ३० ॥

॥ इति पञ्चमस्याष्टमे चतुर्दशोवर्गः ॥ १४ ॥

अथैकत्रिंशी–

कण्वासइन्द्रतेमतिंविश्वेवर्धन्तिपौंस्यम् ।
उतोशविष्ठवृष्ण्यम् ॥ ३१ ॥

कण्वा॑सः । इ॒न्द्र॒ । ते॒ । म॒तिम् । विश्वे॑ । व॒र्धन्ति॒ । पौंस्य॑म् ।
उ॒तो इति॑ । श॒वि॒ष्ठ॒ । वृष्ण्य॑म् ॥ ३१ ॥

हे इन्द्र ते त्वदीयां मतिं बुद्धिं पौंस्यं बलनामैतत् बलं च विश्वे सर्वे कण्वासः कण्वाः स्तोतारः कण्वगोत्रावा ऋषयः वर्धन्ति वर्धयन्ति छन्दस्युभयथेति शप् आर्धधातुकत्वात् णेरनिटीति णिलोपः । उतो अपिच हे शविष्ठ शवस्वितम बलवत्तम विन्मतोर्लुक् टेरिति टिलोपः ईदृशेन्द्र वृष्ण्यं त्वदीयं वीर्यं बलकर्म च कण्वासोवर्धयन्तीत्येव ॥ ३१ ॥

अथ द्वात्रिंशी–

इ॒मांम॑इन्द्रसुष्टु॒तिंजु॒षस्व॒प्रसु॒मामव॑ ।
उ॒तप्रव॑र्धयाम॒तिम् ॥ ३२ ॥

इ॒माम् । मे॒ । इ॒न्द्र॒ । सु॒ऽस्तु॒तिम् । जु॒षस्व॑ । प्र । सु । माम् ।
अव॑ । उ॒त । प्र । व॒र्ध॒य॒ । म॒तिम् ॥ ३२ ॥

हेइन्द्र इमां पुरोवर्तिनीं मे मदीयां सुष्टुतिं शोभनां स्तुतिं जुषस्व सेवस्व । सेवित्वा च स्तोतारं मां सुशोभनं माव प्रकर्षेण रक्ष । उतापिच मतिं अस्मदीयां बुद्धिं प्रवर्धय प्रवृद्धां कुरु । यथा बह्वर्थदर्शिनी भवति तथा कुर्वित्यर्थः ॥ ३२ ॥

अथ त्रयस्त्रिंशी–

उ॒तब्र॒ह्मण्या॑व॒यंतुभ्यं॑प्रवृद्धवज्रिवः ।
विप्रा॑अतक्ष्मजी॒वसे॑ ॥ ३३ ॥

उ॒त । ब्र॒ह्मण्या॑ । व॒यम् । तुभ्य॑म् । प्र॒ऽवृ॒द्ध॒ । व॒ज्रि॒ऽवः॒ ।
विप्राः॑ । अ॒त॒क्ष्म॒ । जी॒वसे॑ ॥ ३३ ॥

उतापिच हे प्रवृद्ध स्तुतिभिः प्रकर्षं वृद्धिं प्राप्त हे वज्रिवः वज्रवन्निन्द्र एकोमत्वर्थीयोनुप्राद्यः यद्वा वज्रोस्यास्तीति वज्रहस्तः तद्वन् छन्दसीरइति मतुपोवत्वम् मतुवसोरुरिति नकारस्यरुत्वम् ईदृशेन्द्र तुभ्यं त्वदर्थं विप्रामेधाविनोवयं ब्रह्मण्या ब्रह्माणि स्तोत्राणि हविर्लक्षणान्यन्नानिवा सुपांसुलुगिति सुपोयाजादेशः जीवसे जीवनार्थं अतक्ष्म अकार्ष्म तक्षू त्वक्षू तनूकरणे लङि छान्दस.शपोलुक् ॥ ३३ ॥

अथ चतुस्त्रिंशी–

अभिकण्वाअनूषतापोनप्रवतायतीः ।
इन्द्रंवनन्वतीमतिः ॥ ३४ ॥

अभि । कण्वाः । अनूषत । आपः । न । प्रऽवता ।
यतीः । इन्द्रम् । वनन्ऽवती । मतिः ॥ ३४ ॥

कण्वाः कण्वगोत्राऋषयः अभ्यनूषत इन्द्रम् अभिष्टुवन्ति नू स्तुवौ कुटादिः प्रवता प्रवणेन मार्गेण यतीर्गच्छन्त्यः आपोन आपइव मतिः मननीया कण्वैः क्रियमाणा स्तुतिः स्तुत्यमिन्द्रं वनन्वती स्वयमेव सम्भजनवती भवति ॥ ३४ ॥

अथ पञ्चत्रिंशी–

इन्द्रमुक्थानिवावृधुःसमुद्रमिवसिन्धवः ।
अनुत्तमन्युमजरम् ॥ ३५ ॥ १५ ॥

इन्द्रम् । उक्थानि । ववृधुः । समुद्रम्ऽइव ।
सिन्धवः । अनुत्तऽमन्युम् । अजरम् ॥ ३५ ॥ १५ ॥

उक्थानि शस्त्राण्यस्माभिः शस्यमानानि इन्द्रं ववृधुर्वर्धयन्ति । सिन्धवः स्यन्दनशीला नद्यः समुद्रमिव समुद्रं जलधिं यथा वर्धयन्ति तद्वत् कीदृशमिन्द्रं अनुत्तमन्युम् अनुत्तः अप्रेरितः. परैरनभिभूतोमन्युः क्रोधोयस्य तादृशम् शत्रुविषयेतन्मन्योरप्रतिहत। निष्फलत्वमुपरतिमिथ।-नत्वाभावः । अजरं जरारहितं बहुव्रीहौ नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम् ॥ ३५ ॥

॥ इति पञ्चमस्याष्टमे पञ्चदशोवर्गः ॥ १५ ॥

अथ षट्त्रिंशी–

आनोयाहिपरावतोहरिभ्यांहर्यताभ्याम् ।
इममिन्द्रसुतंपिब ॥ ३६ ॥

आ । नः । याहि । पराऽवतः । हरिऽभ्याम् ।
हर्यताभ्याम् । इमम् । इन्द्र । सुतम् । पिब ॥ ३६ ॥

हे इन्द्र परावतः परागतात् दूरेवर्तमानात् द्युलोकात् हर्यताभ्यां कान्ताभ्यां हरिभ्यां अश्वाभ्यां नोस्माना याहि आगच्छ आगत्यच इममस्मदीयं सुतमभिषुतं सोमं पिब ॥ ३६ ॥

अथ सप्तत्रिंशी–

त्वामिद्वृ॑त्रहन्तम॒ जना॑सो वृ॒क्तब॑र्हिषः ।
हव॑न्ते॒ वाज॑सातये ॥ ३७ ॥

त्वाम् । इत् । वृ॒त्र॒ह॒न्ऽत॒म॒ । जना॑सः । वृ॒क्तऽब॑र्हिषः ।
हव॑न्ते । वाज॑ऽसातये ॥ ३७ ॥

हे वृत्रहन्तम अतिशयेन वृत्राणां आवृण्वतां शत्रूणां हन्तः त्वामित् त्वामेव वृक्तबर्हिषः वृक्तं मागार्थं छिन्नं बर्हिर्येषां तथाविधोकाः मवृत्तयज्ञाः जनासोजनाः ऋत्विग्लक्षणाः हवन्ते आह्वयन्ति ह्वेञः शपि बहुलंछन्दसीति सम्प्रसारणम् किमर्थं वाजसातये वाजस्यान्नस्य बलस्यवा सातये लाभाय यद्वा संग्रामनामैतत् वाजस्य सातिर्यस्मिन्संग्रामे तत्र साहाय्याय त्वामाह्वयन्तीत्यर्थः ॥ ३७ ॥

अथाष्टत्रिंशी–

अनु॑ त्वा॒ रोद॑सी उ॒भे च॒क्रं न व॒र्त्येत॑शम् ।
अनु॑ सुवा॒नास॒ इन्द॑वः ॥ ३८ ॥

अनु॑ । त्वा॒ । रोद॑सी॒ इति॑ । उ॒भे इति॑ । च॒क्रम् । न ।
व॒र्ति॒ । एत॑शम् । अनु॑ । सु॒वा॒नासः॑ । इन्द॑वः ॥ ३८ ॥

हे इन्द्र त्वा त्वां उभे रोदसी द्यावापृथिव्यौ अनुवर्तेते त्वदधीने भवतइत्यर्थः तत्र दृष्टान्तः–चक्रं न यथा रथचक्रं एतशं अश्वनामैतत् पुरोगच्छन्तमश्वं अनुवर्ति अनुवर्तते तद्वत्। अपिच सुवानासः ऋत्विग्भिरभिषूयमाणाइन्दवः सोमाश्च त्वामनुवर्तन्ते ॥ ३८ ॥

अथैकोनचत्वारिंशी–

मन्द॑स्वा॒ सु स्व॑र्णर उ॒तेन्द्र॑ शर्य॒णाव॑ति ।
मत्स्वा॒ विव॑स्वतो म॒ती ॥ ३९ ॥

मन्दस्व । सु । स्वःऽनरे । उत । इन्द्र । शर्यणाऽवति ।
मत्स्व । विवस्वतः । मती ॥ ३९ ॥

उतापिच हे इन्द्र शर्यणावति शर्यणानाम कुरुक्षेत्रवर्तिनोदेशाः तेषामदूरभवं सरःशर्यणावत् मध्वादिभ्यश्चेति स्वार्थिकोमतुप् मतौबह्वचइतिदीर्घः संज्ञायामितिवत्वम् । तस्मिन् सरसि विद्यमाने स्वर्णरे सर्वैर्ऋत्विग्भिर्नेतव्ये यज्ञे सु सुष्ठु मन्दस्व माद्य तृप्तोभव अपिच विवस्वतः परिचरणवतोयजमानस्य मती मत्याच मत्स्व मदं प्राप्नुहि मतिशब्दात्तृतीयायाः सुपांसुलुगिति पूर्वसवर्णदीर्घः ॥ ३९॥

अथ चत्वारिंशी–

वावृधानउपद्यविवृषावज्र्यरोरवीत् ।
वृत्रहासोमपातमः ॥ ४० ॥ १६ ॥

वावृधानः । उप । द्यवि । वृषा । वज्री ।
अरोरवीत् । वृत्रऽहा । सोमऽपातमः ॥ ४० ॥ १६ ॥

वावृधानोवृद्धः वज्री वज्रवान् अतएववृत्रहा वृत्रस्य मेघस्यासुरस्य वा हन्ता सोमपातमः अतिशयेन सोमस्य पातेन्द्रः वृषा उदकानां वर्षिता द्यवि द्युलोके अन्तरिक्षे उपसमीपे यथास्माभिः श्रूयते तथा अरोरवीत् भृशं स्तनयित्नुलक्षणं शब्दमकरोत् मेघेन वज्रहतेन ईदृशं शब्दमचीकरदित्यर्थः ॥ ४० ॥

॥ इति पञ्चमस्याष्टमे षोडशोवर्गः ॥ १६ ॥

अथैकचत्वारिंशी–

ऋषिर्हिपूर्वजाअस्येकईशानओजसा ।
इन्द्रचोष्कूयसेवसु ॥ ४१ ॥

ऋषिः । हि । पूर्वऽजाः । असि । एकः । ईशानः ।
ओजसा । इन्द्र । चोष्कूयसे । वसु ॥ ४१ ॥

हे इन्द्र पूर्वजाः सर्वेभ्योदेवेभ्यः पूर्वं जातउत्पन्नः यद्वा यज्ञेषु प्रथममेव प्रादुर्भूतः त्वं ऋषिर्हि द्रष्टा सर्वतः खल्वसि भवसि। अपिच सर्वेषु देवेषु मध्ये एकोमुख्यः ओजसा बलेन ईशानईश्वरोभवसि। यद्वा एकः असहायएव सन् ओजसा आत्मीयेनैव बलेन ईशानः सर्वस्य जगतईश्वरोभवसि। सत्वं वसु धनं चोष्कूयसे पुनःपुनः स्तोतृभ्योददासि। स्कुञ्आप्रवणे इह दानार्थः। तथाचोक्तम्—चोष्कूयमाणमिन्द्रभूरिवामं देदिन्द्रबहुवननीयमिति॥ ४१॥

अथ द्वाचत्वारिंशी—

अस्माकंत्वासुताँउपवीतपृष्ठाअभिप्रयः।
शतंवहन्तुहरयः॥ ४२॥

अस्माकम्। त्वा। सुतान्। उप। वीतऽपृष्ठाः। अभि।
प्रयः। शतम्। वहन्तु। हरयः॥ ४२॥

हे इन्द्र अस्माकमस्मदीयान् सुतान्सोमानुपलक्ष्य प्रयः अन्नानामेतत् धानाकरम्भादिहविर्लक्षणमन्नं चाभिलक्ष्य वीतपृष्ठाः प्रशस्तोपरिभागाः शतं शतसंख्याकाहरयोश्वाः त्वा त्वां वहन्तु प्रापयन्तु॥ ४२॥

अथ त्रिचत्वारिंशी—

इमांसुपूर्व्यांधियंमधोर्घृतस्यपिप्युषीम्।
कण्वाउक्थेनवावृधुः॥ ४३॥

इमाम्। सु। पूर्व्याम्। धियम्। मधोः। घृतस्य।
पिप्युषीम्। कण्वाः। उक्थेन। ववृधुः॥ ४३॥

इमामिदानीं क्रियमाणां सु सुष्ठु पूर्व्यां पूर्वैःपित्रादिभिः कृतां मधोर्मधुरस्य घृतस्य क्षरणशीलस्योदकस्य पिप्युषीं वर्धयित्रीं यद्वा मधुरेण घृतेनाज्येन प्रवृद्धां धियं यागक्रियां कण्वाःकण्वगोत्राऋषयः उक्थेन शस्त्रेण वावृधुरिन्द्रार्थं वर्धयन्ति उक्थैर्हि यागोवर्धते अत्यग्निष्टोमादिपूत्तरासु संस्थासु शस्त्रवृद्धेर्दृष्टत्वात् यद्वा पूर्व्यां चिरन्तनीं इमामिन्द्रस्य धियं अनुग्रहबुद्धिं क्षरणशीलेन मधुरेण स्तोमेन पिप्युषीं वर्धनीयां उक्थेन स्तोत्रेण वावृधुः वर्धयन्ति॥ ४३॥

---

१ नि० ६.२२।

अथ चतुश्चत्वारिंशी—

इन्द्रमिद्विमहीनांमेधेवृणीतमर्त्यः ।
इन्द्रंसनिष्युरूतये ॥ ४४ ॥

इन्द्रम् । इत् । विऽमहीनाम् । मेधे । वृणीत । मर्त्यः ।
इन्द्रम् । सनिष्युः । ऊतये ॥ ४४ ॥

विमहीनां विशेषेण महतां देवानां मध्ये इन्द्रमिव इन्द्रमेव मेधे यज्ञे मर्त्योमनुष्योहोता वृणीत स्तुतिभिः संभजेत । तथा सनिष्युः धनकामश्च स्तोता ऊतये रक्षणाय इन्द्रमेव वृणीते स्तुत्या संभजते ॥ ४४ ॥

अथ पञ्चचत्वारिंशी—

अर्वाञ्चन्त्वापुरुष्टुतप्रियमेधस्तुताहरी ।
सोमपेयायवक्षतः ॥ ४५ ॥

अर्वाञ्चम् । त्वा । पुरुऽस्तुत । प्रियमेधऽस्तुता ।
हरी इति । सोमऽपेयाय । वक्षतः ॥ ४५ ॥

हे पुरुष्टुत बहुभिः स्तुतेन्द्र प्रियमेधस्तुता प्रियमेधैः प्रिययज्ञैः ऋषिभिः स्तुतौ तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वम् सुपां सुलुगित्याकारः ईदृशौ हरी अश्वौ सोमपेयाय सोमपानार्थं त्वा त्वां अर्वाञ्चं अस्मदभिमुखं वक्षतः वहताम् ॥ ४५ ॥

अथ षट्चत्वारिंशी—

शतमहंतिरिन्दिरेसहस्रंपर्शावाददे ।
राधांसियाद्वानाम् ॥ ४६ ॥

शतम् । अहम् । तिरिन्दिरे । सहस्रम् । पर्शौ ।
आ । ददे । राधांसि । याद्वानाम् ॥ ४६ ॥

इदमादिकेन तृचेन तिरिन्दिरस्य राज्ञोदानं स्तूयते पर्शौ परशुनाम्नः पुत्रे उपचाराज्जन्ये जनकशब्दः तिरिन्दिरे एतत्संज्ञे राजनि यादानां यदुरिति मनुष्यनाम यदव एव यादाः स्वार्थिकस्तद्धितः तेषां मध्ये अहं शतं शतसंख्याकानि सहस्रं सहस्रसंख्याकानिच राधांसि धनानि आददे स्वीकरोमि। यद्वा यादानां यदुकुलजातानामन्येषां राज्ञां स्वभूतानि राधांसि बलादपहृतानि तिरिन्दिरे वर्तमानान्यहं प्राप्नोमि॥ ४६॥

अथ सप्तचत्वारिंशी—

त्रीणि॑ श॒तान्यर्व॑तां स॒हस्रा॒ दश॒ गोना॑म्।
द॒दुष्प॒ज्राय॒ साम्ने॑॥ ४७॥

त्रीणि॑। श॒तानि॑। अर्व॑ताम्। स॒हस्रा॑। दश॑। गोना॑म्।
द॒दुः। प॒ज्राय॑। साम्ने॑॥ ४७॥

पूर्वस्यामृचि स्वसम्प्रदानकं दानमुक्तं अधुना अन्येभ्योप्यृषिभ्यस्तिरिन्दिरोबहुधनं दत्तवानित्याह अर्वतां गन्तॄणामश्वानां त्रीणि शतानि गोनां दश शतगुणितानि सहस्रा साहस्राणि च पज्राय स्तुतीनां मार्जकाय साम्ने एतत्संज्ञाय ऋषये यद्वा साम्ने सामस्तोत्रं तद्वते पज्राय पज्रकुलजाताय कक्षीवते ददुः तिरिन्दिराख्याराजानोदत्तवन्तः॥ ४७॥

अथाष्टाचत्वारिंशी—

उदा॑नट् क॒कुहो॒ दिव॑मु॒ष्ट्रा॑ञ्चतु॒र्युजो॒ दद॑त्।
श्रव॑सा या॒द्वं जन॑म्॥ ४८॥ १७॥

उत्। आ॒न॒ट्। क॒कु॒हः। दिव॑म्। उ॒ष्ट्रा॑न्। च॒तुः॒ऽयुजः॑।
दद॑त्। श्रव॑सा। या॒द्व॑म्। जन॑म्॥ ४८॥ १७॥

अयं राजा ककुहः उच्छ्रितः सन् श्रवसा कीर्त्या दिवं स्वर्गं उदानट् उत्कृष्टतरं व्याप्नोत् किंकुर्वन् चतुर्युजः चतुर्भिः स्वर्णभारैः युक्तान् उष्ट्रान् ददत् प्रयच्छत् तथा याद्वं जनं च दासत्वेन प्रयच्छन्॥ ४८॥

॥ इति पञ्चमस्याष्टमे सप्तदशोवर्गः॥ १७॥

प्रयद्वइति षट्त्रिंशदृचं द्वितीयं सूक्तं कण्वगोत्रस्य पुनर्वत्सस्यार्षं मारुतं गायत्रं । तथा चानुक्रांतम्—प्रयद्वःषट्त्रिंशत्पुनर्वत्सोमारुतमिति । व्यूह्ळे दशरात्रे प्रथमेछन्दोमे आग्निमारुतशस्त्रे इदंसूक्तं मारुतनिविद्धानं सूत्रितश्च—प्रयद्वस्त्रिष्टुभं दूतंवइत्याग्निमारुतमिति ।

तत्र प्रथमा—

प्रयद्वंस्त्रिष्टुभमिषंमरुतोविप्रोअक्षरत् ।
विपर्वतेपुराजथ ॥ १ ॥

प्र । यत् । वः । त्रिऽस्तुभंम् । इषंम् । मरुतः ।
विप्रः । अक्षरत् । वि । पर्वतेषु । राजथ ॥ १ ॥

हे मरुतः मरुतो मितराविणोवा मितरोचिनोवा महद्द्रवन्तीतिवा एतत्संज्ञामाध्यमिकादेवगणाः पादादित्वात् अपादादावित्ति पर्युदासात् आष्टमिकनिघाताभावः षाष्ठिकमामन्त्रिताद्युदात्तत्वम् वोयुष्मभ्यं विप्रोमेधावी स्तोता त्रिष्टुभं त्रिषु सवनेषु प्रशस्यां त्रिभिर्देवैः स्तुतां वा यद्वा त्रिष्टुप्छन्दसा संबद्धां माध्यन्दिनसवनिकीं इषं सोमलक्षणमन्नं यद्यदा प्राक्षरत् प्रासिञ्चत् अग्नौ प्राक्षिपत् । यद्वा त्रिष्टुभं त्रिष्टुप्छन्दस्कं स्तोत्रं इषं सोमं चेति योज्यं तदानीं यूयं पर्वतेषु पर्ववत्सु शिलोच्चयेषु विराजथ तेन सोमेन लब्धबलाः सन्तोविशेषेण दीप्ताभवथ ॥ १ ॥

अथ द्वितीया—

यदुङ्गत्तविषीयवोयामंशुभ्राअचिंध्वम् ।
निपर्वताअहासत ॥ २ ॥

यत् । अङ्ग । तविषीऽयवः । यामंम् । शुभ्राः । अचिंध्वम् ।
नि । पर्वताः । अहासत ॥ २ ॥

हे तविषीयवः तविषीति बलनाम तां कामयमानाः यद्वा बलयुक्ताः हेशुभ्राः शोभमानाः अंग हे मरुतः यामं याति गच्छतीति यामोरथः तं यद्यदा अचिध्वं समचिनुध्वं अश्वादिभिः साधनैः सञ्चितं संश्लिष्टं कुरुथ गमनार्थं तदानीं पर्वता गिरयोपि न्यहासत नितरांगच्छन्ति युष्मदर्थवेगाद्भीताःसन्तः स्वस्थानात् प्रचलन्ति । ओहाङ् गतौ छान्दसोलुङ् ॥२॥

अथ तृतीया—

उदीरयन्तवायुभिर्वाश्रासःपृश्निमातरः ।
धुक्षन्तपिप्युषीमिषम् ॥ ३ ॥

उत् । ईरयन्त । वायुऽभिः । वाश्रासः । पृश्निऽमातरः ।
धुक्षन्त । पिप्युषीम् । इषम् ॥ ३ ॥

वाश्रासोवाशनशीलाः शब्दकारिणः पृश्निमातरः पृश्निर्माध्यमिका वाक् सा माता जननी येषांते तथोक्ताः ऋतश्छन्दसीति कपःप्रतिषेधः ईदृशा मरुतः वायुभिः वान्ति गच्छन्तीति वायवः पृषत्यः पृषतीभिर्वाहनभूताभिः स्वावयवभूतैर्वायुभिरेव वा उदीरयन्त उद्गमयन्ति मेघादिकं तथा पिप्युषीं वर्धयित्रीं इषमन्नं च स्तोतृभ्योधुक्षंत दुहन्ति ॥ ३॥

अथ चतुर्थी—

वपन्तिमरुतोमिहंप्रवेपयन्तिपर्वतान् ।
यद्यामंयान्तिवायुभिः ॥ ४ ॥

वपन्ति । मरुतः । मिहम् । प्र । वेपयन्ति । पर्वतान् । यत् ।
यामम् । यान्ति । वायुऽभिः ॥ ४ ॥

मरुतः एतत्संज्ञादेवाः मिहं वृष्टिं वपन्ति विकिरन्ति विक्षिपन्ति तथा पर्वतान् गिरीन् प्रवेपयन्ति प्रकंपयन्ति अयमर्थः कदेतिचेत् यद्यदा वायुभिः सार्धं यामं रथं गमनं वा यांति प्राप्नुवन्ति तदानीमित्यर्थः ॥ ४॥

अथ पंचमी—

नियद्यामायवोगिरिर्निसिन्धवोविधर्मणे ।
महेशुष्माययेमिरे ॥ ५ ॥ १८ ॥

नि । यत् । यामाय । वः । गिरिः । नि । सिन्धवः । विऽधर्मणे ।
महे । शुष्माय । येमिरे ॥ ५ ॥ १८ ॥

हे मरुतोवोयुष्माकं यामाय रथाय गमनायवा गिरिः सुपांसुलुगिति जसःसुः गिरयः पर्वताः यद्यदा नियेमिरे स्वयमेव नियम्यन्ते तथा सिन्धवः स्यन्दनशीलाः समुद्राः नद्योवा विधर्मणे विधरणाय महे महते शुष्माय शोषकाय युष्मदीयाय बलाय नियेमिरे स्वयमेव नियम्यन्ते गिरयोनद्यश्च युष्मद्यामाद्बलाच्च भीत्या एकत्रैव स्थाने नियता वर्तन्तइत्यर्थः तदानीं वर्पन्ति मरुतोमिहमितिशेषः । यमेः कर्मकर्तरि लिट् यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः ॥ ५ ॥

॥ इति पञ्चमस्याष्टमेष्टादशोवर्गः ॥ १८ ॥

अथ षष्ठी—

युष्माँउनक्तमूतयेयुष्मान्दिवाहवामहे ।
युष्मान्प्रयत्यध्वरे ॥ ६ ॥

युष्मान् । ऊँ इति । नक्तम् । ऊतये । युष्मान् । दिवा । हवामहे ।
युष्मान् । प्रऽयति । अध्वरे ॥ ६ ॥

हे मरुतो युष्मां उ युष्मानेव नक्तं रात्रौ ऊतये रक्षणार्थं हवामहे दिवा अह्निच युष्मानेवाह्वयामहे अध्वरे ध्वरोनास्त्यस्मिन्नित्यध्वरोयागः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। यागे प्रयति प्रगच्छति प्रवर्तमाने सति रक्षणार्थं युष्मानेवाह्वयामहे ॥ ६॥

अथ सप्तमी—

उदुत्येअरुणप्सवश्चित्रायामेभिरीरते ।
वाश्राअधिष्णुनादिवः ॥ ७ ॥

उत् । ऊँ इति । त्ये । अरुणऽप्सवः । चित्राः । यामेभिः । ईरते ।
वाश्राः । अधि । स्नुना । दिवः ॥ ७ ॥

त्ये ते पूर्वोक्तगुणाः अरुणप्सवः अरुणवर्णरूपाः चित्राश्चायनीयाः आश्चर्यभूतावा वाश्राः शब्दकारिणः एवंभूतामरुतः यामेभिर्यामैर्यानैः दिवोधि द्युलोकस्योपरि स्नुना सानुना समुच्छ्रितप्रदेशेन उदीरते उद्गच्छन्ति उइति पूरणः पदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति सानुशब्दस्य स्नुभावः ॥ ७ ॥

कारीर्यां सौर्यस्य हविषः सृजन्तिरश्मिमित्येषानुवाक्या सूत्र्यतेहि—सृजन्तिरश्मिमोजसावहिष्ठेभिर्विहरन्यासितन्तुमिति ।

सैषाष्टमी—

सृजन्तिरश्मिमोजसापन्थांसूर्याययातवे ।
तेभानुभिर्वितस्थिरे ॥ ८ ॥

सृजन्ति । रश्मिम् । ओजसा । पन्थाम् । सूर्याय । यातवे । ते ।
भानुऽभिः । वि । तस्थिरे ॥ ८ ॥

तच्छन्दश्श्रुतेर्यच्छब्दाध्याहारः ये मरुतः सूर्याय सूर्यस्य षष्ठ्यर्थेचतुर्थीवक्तव्येति चतुर्थी । यातवे गन्तवे गन्तुं रश्मिं व्याप्तं अशेरशचेति अश्नोतेरौणादिकोमिमत्ययः रशादेशश्च । यद्वा रश्मिभिस्तेजोभिर्युक्तं पन्थां पन्थानं ओजसा बलेन सृजन्ति उत्पादयन्ति वृत्रादिभिरावृतं सूर्यपथं आवरकस्य वृत्रादेरपनयनेन जनयन्तीत्यर्थः । ते मरुतः भानुभिस्तेजोभिः वितस्थिरे कृत्स्नं जगद्व्याप्यावतिष्ठंते ॥ ८ ॥

अथ नवमी—

इमांमेमरुतोगिरमिमंस्तोममृभुक्षणः ।
इमंमेवनताहवम् ॥ ९ ॥

इमाम् । मे । मरुतः । गिरम् । इमम् । स्तोमम् । ऋभुक्षणः । इमम् ।
मे । वनत । हवम् ॥ ९ ॥

हे मरुतः इमां पुरोवर्तिनीं मे मम गिरं शस्त्ररूपां वाचं वनत संभजत ऋभुक्षणः महान्तःएतद्‌ महान्तः जसि इतोत्सर्वनामस्थानइत्यकारः वापपूर्वस्यनिगमइतिदीर्घाभावः । ते यूयं इमं स्तोमं स्तोत्रं प्रगीतमन्त्रसाध्यं मे मम इमं पुरोवर्तिनं हवमाह्वानरूपं च याजुषं मन्त्रं वनत संभजत सेवध्वम् ॥ ९ ॥

अथ दशमी—

त्रीणिसरांसिपृश्नयोदुदुह्रेवज्रिणेमधु ।
उत्संकवन्धमुद्रिणम् ॥ १० ॥ १९ ॥

त्रीणि । सरांसि । पृश्नयः । दुदुह्रे । वज्रिणे । मधु । उत्सम् ।
कवन्धम् । उद्रिणम् ॥ १० ॥ १९ ॥

पृश्नयोमरुन्मातृभूतागावः वज्रिणे वज्रवतइन्द्राय तादर्थ्येचतुर्थी इन्द्रार्थं मधु मधुरं क्षीरादिकमाश्रयणद्रव्यं त्रीणि सरांसि सरइव सोमैः पूरितानि त्रीणि सवनानि त्रिष्वपि सवनेषु श्रयणार्थं दुदुह्रे दुदुहिरे । यद्वा मधु मधुरं सोमं वज्रिणे वज्रयुक्ताय मरुद्गणाय त्रीणि सरांसि द्रोणकलशाधवनीयपूतभृल्लक्षणानि प्रति पृश्नयोमाध्यमिकावाचः दुदुह्रे वृष्टिद्वारा दुहन्ति । यद्वा पृश्नयइति मातृवाचिना शब्देन पुत्राउच्यन्ते पृश्निमातरोमरुतः इन्द्रार्थं त्रीणि सरांसि द्रोणकलशादीनि मधु मधुना सोमेन पूरयितुं उत्सं उत्स्रवणशीलं कवन्धमुदकं उद्रिणं उदकवन्तं मेघं दुदुह्रे दुहते । दुहेश्छान्दसोलिट् इरयोरेइति रेभावः पादादित्वादनिघातः ॥ १० ॥

॥ इति पञ्चमस्याष्टमे एकोनविंशोवर्गः ॥ १९ ॥

अथैकादशी–

मरुतोयद्धवोदिवःसुम्नायन्तोहवामहे ।
आतूनउपगन्तन ॥ ११ ॥

मरुतः । यत् । ह । वः । दिवः । सुम्नऽयन्तः । हवामहे । आ ।
तु । नः । उप । गन्तन ॥ ११ ॥

हे मरुतः यद्ध यदा खलु वो युष्मान् सुम्नायन्तः सुम्नं सुखं आत्मनइच्छन्तोवयं दिवः द्युलोकात् हवामहे स्तुतिभिराह्वयामहे । आतु अनन्तरमेव शीघ्रं नोस्मान् उपगन्तन उपगच्छत गमेर्लोटि तप्तनप्तनथनाश्चेतितनबादेशः ॥ ११ ॥

अथ द्वादशी–

यूयंहिष्ठासुदानवोरुद्राऋभुक्षणोदमे ।
उतप्रचेतसोमदे ॥ १२ ॥

यूयम् । हि । स्थ । सुऽदानवः । रुद्राः । ऋभुक्षणः । दमे । उत ।
प्रऽचेतसः । मदे ॥ १२ ॥

उतापिच हे सुदानवः शोभनदाना हे रुद्राः रुद्रपुत्राः पादादित्वादामंत्रितनिघाताभावः हे ऋभुक्षणः महान्तः उरुतेजस्कावा ईदृशा हे मरुतः यूयं हि खलु दमे यज्ञगृहे मदे मदकरे सोमे पीतेसति प्रचेतसः स्थ प्रकृष्टज्ञानाभवथ ॥ १२ ॥

अथ त्रयोदशी—

आनोरयिंमदच्युतंपुरुक्षुंविश्वधायसम् ।
इयर्तामरुतोदिवः ॥ १३ ॥

आ । नः । रयिम् । मदऽच्युतम् । पुरुऽक्षुम् । विश्वऽधायसम् ।
इयर्त । मरुतः । दिवः ॥ १३ ॥

हे मरुतः नोस्माकं रयिं धनं दिवोद्युलोकात् आइयर्त आगमयत ऋगतावित्यस्मादन्त-र्भावितण्यर्थाज्जोहोत्यादिकाल्लोटि तस्य तप्तनप्तनथनेति तबादेशः अनुदात्ते चेत्यभ्यस्तायुदात्तत्वम् कीदृशं रयिं मदच्युतं मदंस्रवन्तं यद्वा शत्रवस्य मदस्य च्यावयितारं पुरुक्षुं बहुनिवासं बहु-भिः स्तूयमानंवा विश्वधायसं विश्वेषां सर्वेषामस्मदीयानां धारणाय पोषणाय पर्याप्तम् ॥ १३॥

अथ चतुर्दशी—

अधीवयद्गिरीणांयामंशुभ्राअचिध्वम् ।
सुवानैर्मन्दध्वइन्दुभिः ॥ १४ ॥

अधिऽइव । यत् । गिरीणाम् । यामम् । शुभ्राः । अचिध्वम् । सुवानैः ।
मन्दध्वे । इन्दुऽभिः ॥ १४ ॥

हे शुभ्राः शोभमानामरुतः गिरीणां पर्वतानां अधीव उपरीव यद्यदा यामं युष्मदीयं रथं अचिध्वं गमनसाधनैरश्वादिभिरुपचितं कुरुथ तदानीं सुवानैरभिषूयमाणै-रिन्दुभिः सोमैर्मन्दध्वे मादयध्वे ॥ १४॥

अथ पञ्चदशी—

एतावतश्चिदेषांसुम्नंभिक्षेतमर्त्यः ।
अदाभ्यस्यमन्मभिः ॥ १५ ॥ २० ॥

एतावतः । चित् । एषाम् । सुम्नम् । भिक्षेत । मर्त्यः । अदाभ्यस्य ।
मन्मऽभिः ॥ १५ ॥ २० ॥

मर्त्यो मनुष्यः स्तोता मन्मभिः स्तोत्रैः सुम्नं सुखं धनं वा एषां मरुतां स्वभूतं भिक्षेत याचेत । इदानीं गणाभिप्रायेणैकवदाह एतावतश्चित् यत्परिमाणस्यच अदाभ्यस्य केनापि हिंसितुमशक्यस्य मरुद्गणस्य सुम्नं भिक्षेत एतच्छब्दात् यत्तदेतेभ्यइति परिमाणेर्थेवतुप् आसर्वनाम्नइत्यात्वम् ॥ १५ ॥

॥ इति पञ्चमस्याष्टमे विंशो वर्गः ॥ २० ॥

अथ षोडशी–

येद्रप्साइ॑वरोद॑सीधम॒न्त्यनु॑वृष्टिभिः॑ ।
उत्सं॑दु॒हन्तो॒अक्षि॑तम् ॥ १६ ॥

ये । द्र॒प्साःऽइ॑व । रोद॑सी॒ इति॑ । धम॑न्ति । अनु॑ । वृ॒ष्टिऽभिः॑ ।
उत्स॑म् । दु॒हन्तः॑ । अक्षि॑तम् ॥ १६ ॥

ये मरुतः द्रप्साइव उदबिन्दवइव रोदसी द्यावापृथिव्यौ वृष्टिभिर्वर्षणैः अनुधमन्ति अनुगच्छन्ति साकल्येन व्याप्नुवन्ति । यद्वा अनुध्माते उच्छ्वसितावयवे कुर्वन्ति । किंकुर्वन्तः अक्षितं अक्षीणमुदकं उत्सं मेघं दुहन्तः पूरयन्तः मेघादवाङ्मुखं पातयन्तः दुहेर्लक्षणहेत्वोरिति हेतौ शतृप्रत्ययः यत एवं दुहन्ति ततो रोदसी अनुधमन्तीत्यर्थः ॥ १६ ॥

अथ सप्तदशी–

उदु॒स्या॒नेभि॑रीरत॒उद्रथै॑रु॒दु॑वा॒यु॒भिः॑ ।
उत्स्तोमैः॒पृश्नि॑मातरः ॥ १७ ॥

उत् । ऊँ॒ इति॑ । स्या॒नेभिः॑ । ई॒र॒ते॒ । उत् । रथैः॑ । उत् । ऊँ॒ इति॑ ।
वा॒यु॒ऽभिः॑ । उत् । स्तोमैः॑ । पृश्नि॑ऽमातरः ॥ १७ ॥

स्वानेभिः स्वानैः शब्दैः मरुतउदीरते उद्गच्छन्ति । स्वनशब्दे स्वनहसोर्वेति अपोविकल्पितत्वात् पक्षेघञ् कर्षात्वतइत्यन्तोदात्तत्वम् बहुलंछन्दसीतिभिसऐसभावः उइतिपूरणः । तथा रथैः रथमुखैर्वायुभिर्वाहनैश्च उदीरते पृश्निमातरः मरुतः यथा स्तोभिः स्तोत्रैः उदीरते॥१७॥

अथाष्टादशी—

येनावतुर्वशंयदुंयेनकण्वंधनस्पृतम् ।
रायेसुतस्यंधीमहि ॥ १८ ॥

येन । आव । तुर्वशम् । यदुम् । येन । कण्वम् । धनऽस्पृतम् ।
राये । सु । तस्य । धीमहि ॥ १८ ॥

येनात्मीयेन रक्षणेन तुर्वशं एतत्संज्ञं यदुं एतत्संज्ञञ्च राजर्षिं आव यूयं रक्षितवन्तः स्थ अवतेर्लेटि मध्यमबहुवचनेरूपमेतत् । येनच धनस्पृतं धनकामं कण्वमृषिं रक्षितवन्तः स्थ । तस्य युष्मदीयं रक्षणं राये धनार्थं सुधीमहि शोभनं ध्यायेम ॥ १८ ॥

अथैकोनविंशी—

इमाउंवःसुदानवोघृतंनपिप्युषीरिषः ।
वर्धान्काण्वस्यमन्मभिः ॥ १९ ॥

इमाः । ऊँ इति । वः । सुऽदानवः । घृतम् । न । पिप्युषीः ।
इषः । वर्धान् । काण्वस्य । मन्मऽभिः ॥ १९ ॥

हे सुदानवः शोभनदानामरुतः घृतंन घृतमिव पिप्युषीः वर्धयित्र्यः शरीरतुष्टिहेतुभूताः इमा इमानि प्रदीयमानानि इषोन्नानि सोमलक्षणानि काण्वस्य कण्वगोत्रस्य मम संबन्धिभिः मन्मभिः स्तोत्रैः सार्धं वोयुष्मान्वर्धान् वर्धयन्तु वृधेर्ण्यन्ताद् लेटिरूपमेतत् उइतिपूरणः ॥ १९ ॥

अथ विंशी—

क्वनूनंसुदानवोमदथावृक्तबर्हिषः ।
ब्रह्माकोवःसपर्यति ॥ २० ॥ २१ ॥

क्वं । नूनम् । सुऽदानवः । मदंथ । वृक्तऽबर्हिषः । ब्रह्मा । कः । वः । सपर्यति ॥ २० ॥ २१ ॥

मरुदागमनस्य विलंबमसहमान ऋषिरनया वितर्कयति सुदानवः शोभनदानाः हे वृक्तबर्हिषः वृक्तं वृक्णं छिन्नं बर्हिर्येषां यागाय यद्वा बर्हिरिति यज्ञनाम वृक्तः प्रवृक्तोयज्ञोयेषां ते तथोक्ताः ईदृशामरुतः क्व कुत्र देशे नूनमिदानीं मदथ माद्यथ मदीहर्षे व्यत्ययेन शप् । कश्च ब्रह्मा ब्राह्मणः स्तोता वोयुष्मान् सपर्यति परिचरति किंकारणं बहुशः स्तुतैरपि भवद्भिरिदानीं नागम्यत इति न जानीमः ॥ २० ॥

॥ इति पञ्चमस्याष्टमे एकविंशोवर्गः ॥ २१ ॥

अथैकविंशी—

नहिष्मयद्धंवःपुरास्तोमेभिर्वृक्तबर्हिषः ।
शर्धाँऋतस्यजिन्वथ ॥ २१ ॥

नहि । स्म । यत् । ह । वः । पुरा । स्तोमेभिः ।
वृक्तऽबर्हिषः । शर्धान् । ऋतस्यं । जिन्वथ ॥ २१ ॥

पूर्वया वितर्क्येदानीं निश्चिनोति हे वृक्तबर्हिषः प्रवृत्तयज्ञकामरुतः नहिष्म तत्खलु संभवति वोयूयं पुरा अस्मत्तः पूर्वमेव स्तवैः स्तोमेभिः अन्यदीयैः स्तोत्रैः ऋतस्योदकस्य सत्यस्य यज्ञस्यवा संबन्धिनः शर्धान् आत्मीयानि बलानि जिन्वथ प्रीणयथेति यद्ध यत खलु तन्न संभवत्येव अतः शीघ्रमागच्छतेत्यर्थः । यद्वा वृक्तबर्हिषइति ऋत्विङ्नाम हे ऋत्विजः वोयुष्माकं संबन्धिभिः स्तोमेभिः स्तोत्रैः ऋतस्य यज्ञस्य संबन्धिनोयागार्हान् शर्धान् मारुतानि बलानि पुरा अन्येभ्यः स्तोतृभ्यः पूर्वं यस्मात्कारणात् जिन्वथ यूयं प्रीणयथ जिविः प्रीणनार्थः तस्मादन्यदीयैः स्तोत्रैः नहिष्म न खलु ते मरुतोवशीभवन्तीत्यर्थः ॥ २१ ॥

प्रवर्ग्ये महावीरे पयसोरासिक्तयोः सतोः समुत्येमहतीरपइत्येषानुवक्तव्या सूत्र्यतेहि— आसिक्तयोः समुत्येमहतीरपइति महावीरमादायोत्तिष्ठत्स्विति ।

सेषा द्वाविंशी—

समुत्येमहतीरपःसंक्षोणीसमुसूर्यम् ।
संवज्रंपर्वशोदधुः ॥ २२ ॥

सम् । ऊँ इति । त्ये । महतीः । अपः । सम् । क्षोणी इति ।
सम् । ऊँ इति । सूर्यम् । सम् । वज्रम् । पर्वऽशः । दधुः ॥ २२ ॥

त्ये ते पूर्वोक्तगुणामरुतः महतीर्वह्वीः अपोवृष्ट्युदकानि समुदधुः सन्दधति ओषध्यादिभिः संयोजयन्ति यद्वा धर्मकाले सूर्यरश्मिभिराहताउपरि सम्यक् धारयन्ति बृहन्महतोरुपसंख्यानमिति महतः परस्य ङीपउदात्तत्वम् ऊडिदमित्यादिना अप्शब्दात् परःशसुदात्तः तथा क्षोणी क्षोण्यौ द्यावापृथिव्यौ च ते मरुतः सन्दधुः यथा स्वे स्वे स्थाने अवतिष्ठेते तथा धारयन्ति सूत्रात्मना वायुना सर्वं जगद्धार्यते । तथाचश्रूयते—वायुर्वै गौतमतत्सूत्रं वायुनावै गौतमसूत्रेणायं च लोकः परश्चलोकः सर्वाणि भूतानि संदृब्धानि भवन्तीति । तथा सूर्यं सर्वस्य प्रेरकमादित्यं चांतरिक्षे संदधुः सम्यग्धारयन्ति उशब्दः समुच्चये ईदृशास्ते मरुतः वज्रमात्मीयमायुधं पर्वशः पर्वणि पर्वणि वृत्रस्य सर्वेष्ववयवसन्धिषु हननार्थं सन्दधुः समपूपुजन् ॥ २२ ॥

अथ त्रयोविंशी—

विवृत्रंपर्वशोययुर्विपर्वतांअराजिनः ।
चक्राणावृष्णिपौंस्यम् ॥ २३ ॥

वि । वृत्रम् । पर्वऽशः । ययुः । वि । पर्वतान् ।
अराजिनः । चक्राणाः । वृष्णि । पौंस्यम् ॥ २३ ॥

अराजिनः राज्ञा केनचित् स्वामिना अनधिष्ठिताः यद्वा राजा स्वामी अस्य नविद्यते इत्यराजा इन्द्रः तद्युक्ता वृष्णि वीर्यवत् पौंस्यं बलं चक्राणाः कुर्वाणामरुतः वृत्रं आवरकमसुरं मेघं वा पर्वशः पर्वणि पर्वणि भेदेन विययुः विशिष्टं वधमगमयन् तथा पर्वतान् गिरींश्च विशिष्टं वधं मापयन् ॥ २३ ॥

अथ चतुर्विंशी—

अनु॑ त्रि॒तस्य॒ युध्य॑तः॒ शुष्म॑मावन्नु॒त क्रतु॑म् ।
अन्विन्द्रं॑ वृत्र॒तूर्ये॑ ॥ २४ ॥

अनु॑ । त्रि॒तस्य॑ । युध्य॑तः । शुष्म॑म् । आ॒व॒न् । उ॒त ।
क्रतु॑म् । अनु॑ । इन्द्र॑म् । वृ॒त्र॒ऽतूर्ये॑ ॥ २४ ॥

त्रितस्याप्यस्य एतत्संज्ञस्य युध्यतः शत्रून्संप्रहरतोराजर्षेः शुष्मं परेषां शोषकं बलं मरुतः अन्वावन् साहाय्यार्थमन्वगच्छन् यद्वा अनुगुणमरक्षन् उतापिच क्रतुं तदीयं कर्म चारक्षन् अपिच वृत्रतूर्ये वृत्रवधार्थे सङ्ग्रामे इन्द्रं च अन्वावन् अरक्षन् ॥ २४ ॥

अथ पञ्चविंशी—

वि॒द्युद्ध॑स्ता अ॒भिद्य॑वः॒ शिप्राः॑ शी॒र्षन्हि॑र॒ण्ययीः॑ ।
शु॒भ्रा व्य॑ञ्जत श्रि॒ये ॥ २५ ॥ २२ ॥

वि॒द्युत्ऽह॑स्ताः । अ॒भिऽद्य॑वः । शिप्राः॑ ।
शी॒र्षन् । हि॒र॒ण्ययीः॑ । शु॒भ्राः । वि । अ॒ञ्ज॒त॒ । श्रि॒ये ॥ २५ ॥ २२ ॥

विद्युद्धस्ताः विद्योतमानायुधबाहवः अभियवःअभिगतदीप्तयः शुभ्राः शोभमानामरुतः शीर्षन् शीर्ष्णि शिरसि आत्मीयेषु शिरःसु हिरण्ययीः हिरण्मयीः स्वर्णमयानि शिप्राः शिरस्त्राणानि श्रिये शोभनार्थं व्यंजत व्यंजयन्ति व्यक्तीकुर्वन्ति धारयन्तीत्यर्थः ॥ २५ ॥

॥ इति पंचमस्याष्टमे द्वाविंशोवर्गः ॥ २२ ॥

अथ षड्विंशी—

उ॒शना॒ यत्प॑रा॒वत॑ उ॒क्ष्णो रन्ध्र॒मया॑तन ।
द्यौर्न च॑क्रदद्भि॒या ॥ २६ ॥

उ॒शना॑ । यत् । प॒रा॒ऽवतः॑ । उ॒क्ष्णः । रन्ध्र॑म् ।
अया॑तन । द्यौः । न । च॒क्र॒द॒त् । भि॒या ॥ २६ ॥

हे मरुतः उशनाः व्यत्ययेन प्रथमा उशनसा काव्येन ऋषिणा स्तूयमाना यूयम् यद्वा उशनस्शब्दात् सुपांसुलुगिति जसःसुः उशनसः स्तोतॄन् कामयमाना यूयं उक्षणः सेक्तुः कामानां वर्षितुः आत्मीयस्यरथस्य वृष्टिहेतोरन्तरिक्षस्यवा रन्ध्रं मध्यं परावतोदूरदेशात् यद्यदा अयातनागच्छत यातेर्लङि मध्यमबहुवचनस्य तप्तनप्तनथनाश्चेति तनबादेशः तदानीं द्यौर्नि अत्र द्युशब्देन तत्रत्योजनसंघोलक्ष्यते द्युलोके वर्तमानोजनसङ्घइव पार्थिवमपि सर्वं भूतजातं भिया युष्मद्वेगजनितया भीत्या चक्रदत् अशब्दयत् अकम्पत वा ॥ २६ ॥

अथ सप्तविंशी–

आनोमुखस्यदावनेश्वैर्हिरण्यपाणिभिः ।
देवासउपगन्तन ॥ २७ ॥

आ । नः । मखस्यं । दावने । अश्वैः । हिरण्यपाणिऽभिः ।
देवासः । उप । गन्तन ॥ २७ ॥

हे देवासः दानादिगुणयुक्तामरुतः नोस्माकं मखस्य यज्ञस्य दावने दानाय ददातेरौणादिकोभावेवनिः हिरण्यपाणिभिः स्वर्णमयपादैः स्वर्णालंकृतैः हितरमणीयपादैर्वा अश्वैः आ उपगन्तन उपागच्छत प्राप्नुत गमेर्लोटि छान्दसःशपोलुक् तप्तनप्तनथनाश्चेतितनबादेशः अतएव ङित्वाभावादनुनासिकलोपोनक्रियते ॥ २७ ॥

अथाष्टाविंशी–

यदेषांपृषतीरथेप्रष्टिर्वहतिरोहितः ।
यान्तिशुभ्रारिणन्नपः २८ ॥

यत् । एषाम् । पृषतीः । रथे । प्रष्टिः । वहति ।
रोहितः । यान्ति । शुभ्राः । रिणन् । अपः ॥ २८ ॥

एषां मरुतां रथे पृषतीः पृषद्भिः श्वेतबिन्दुभिर्युक्तामृग्योयद्यदा वहन्ति यदाच प्रष्टिः प्राशुः शीघ्रगामी यद्वा प्रमुखे युज्यमानः सन् रोहितः पृषतः पृषद्भिर्युक्तोमृगः वहति तदानीं शुभ्राः शोभमानामरुतो यान्ति गच्छन्ति तेषां गमनेच सति अपउदकानि वृष्टिलक्षणानि रिणन्

अरिणन् अगच्छन् सर्वत्र प्रवहन्ति रीगतिरेषणयोः क्र्यादिकः प्यादीनांह्रस्वःछान्दसोऽभावः समानवाक्ये निघातयुष्मदस्मदादेशावक्तव्याइति वचनादत्रपूर्वपदस्य वाक्यान्तरगतत्वात्ति-ङ्ङतिङइति निघाताभावः ॥ २८ ॥

अथैकोनत्रिंशी—

सुषोमेशर्यणावत्यार्जीकेपस्त्यावति ।
ययुर्निचक्रयानरः ॥ २९ ॥

सुऽसोमे । शर्यणाऽवति । आर्जीके । पस्त्यऽवति ।
ययुः । निऽचक्रया । नरः ॥ २९ ॥

सुषोमे शोभनसोमयुक्ते आर्जीके ऋजीकानामदेशाः तत्संबन्धि शर्यणावति कुरुक्षेत्रस्य जघनार्धे शर्यणावत्संज्ञे सरसि पस्त्यावति पस्त्यमिति गृहनाम यज्ञगृहोपेते सोमपानाय नरोने-तारो मरुतः निचक्रया नीचीनचक्रया अवाङ्मुखं प्रवर्तमानया रथकट्यया ययुर्यान्ति गच्छन्ति यातेश्छांदसोलिट् यद्वा नरोनेतारऋत्विजः उक्तगुणविशिष्टे शर्यणावति मरुद्यागाय सोममाहर्तुं निचक्रया नीचीनचक्रया शकट्या ययुर्गच्छन्ति ॥ २९ ॥

अथ त्रिंशी—

कदागच्छाथमरुतइत्थाविप्रंहवमानम् ।
मार्डीकेभिर्नाधमानम् ॥ ३० ॥ २३ ॥

कदा । गच्छाथ । मरुतः । इत्था । विप्रम् ।
हवमानम् । मार्डीकेभिः । नाधमानम् ॥ ३० ॥ २३ ॥

हे मरुतः इत्था इत्थमनेन प्रकारेण हवमानं आह्वयन्तं स्तुवन्तं नाधमानं याचमानं विप्रं मेधाविनं स्तोतारं मां कदा कस्मिन्काले मार्डीकेभिः सुखहेतुभिर्धनैः सार्धं गच्छाथ ग-च्छथ विलम्बं माकृथत शीघ्रमागच्छतेति भावः ॥ ३० ॥

॥ इति पञ्चमस्याष्टमे त्रयोविंशोवर्गः ॥ २३ ॥

अथैकत्रिंशी—

कद्धंनूनंकंधप्रियोयदिन्द्रमजंहातन।
कोवंःसखित्वओंहते॥ ३१॥

कत्। ह्व। नूनम्। कुधऽप्रियः। यत्। इन्द्रंम्।
अजंहातन। कः। वः। सखिऽत्वे। ओहते॥ ३१॥

हे कधप्रियः कथया स्तुत्या प्रीयमाणाः कथवाक्यप्रबन्धने अस्माद्भावे चिन्तिपूजील्यादिना अङ् ततष्टाप् उत्तरपदे ङ्यापोः संज्ञाछन्दसोरितिह्रस्वत्वम् धत्वंछान्दसं ईदृशा हे मरुतः वृत्रेणसह युध्यमानं इन्द्रं नूनं सत्यं अजहातन पर्यत्यजतेति यदेतत् तत् कद्ध कदाखलु कस्मिन्काले जातं नकदाचिदपीत्यर्थः। तथाच ब्राह्मणम्—मरुतोहैनंनाजहुरिति[1]। वृत्रस्यत्वाश्वसथादीषमाणाइत्योदिनिगमान्तरम्। यतएवमतःकारणात् वोयुष्माकं सखित्वे व्यत्ययेन सप्तमी सखिभावं कःस्तोता ओहते याचते यद्वा वहते प्राप्नोति ईदृशमनपायं युष्मत्सखित्वं दुर्लभमित्यर्थः॥ ३१॥

अथ द्वात्रिंशी—

सुहोषुणोवज्रंहस्तैःकण्वांसोअग्निंमरुद्भिंः।
स्तुपेहिरंण्यवाशीभिः॥ ३२॥

सुहो इतिं। सु। नः। वज्रंऽहस्तैः। कण्वांसः।
अग्निम्। मुरुत्ऽभिंः। स्तुषे। हिरंण्यऽवाशीभिः॥ ३२॥

वज्रहस्तैर्वज्रबाहुभिः हिरण्यवाशीभिः हिरण्मयी वाशी तक्षणसाधनमायुधं येषामस्ति तादृशैर्मरुद्भिः सहो सहैव वर्तमानमग्निं नोस्मदीयाः हे कण्वासः कण्वाः स्तोतारः कण्वगोत्रावा ऋषयः यूयं स्तुषे स्तुध्वम् यद्वा नइति प्रथमार्थेद्वितीया नोवयं कण्वगोत्राः अस्मदोद्वयोश्चेत्येकस्मिन्बहुवचनम् सविशेषणस्यप्रतिषेधइतितु व्यत्ययेन प्रवर्तते स्तुषे स्तुवे स्तौतेरुत्तमैकवचने सिब्बहुलमितिसिप्॥ ३२॥

---

१ ऐ० ब्रा० ३.२०.। २. ऋ० सं० ६.६.३३.।

अथ त्रयस्त्रिंशी–

ओ॒षु वृ॑ष्णः॒ प्रय॑ज्यू॒ना नव्य॑से सुवि॒ताय॑ ।
व॒वृ॒त्यां चि॒त्रवा॑जान् ॥ ३३ ॥

ओ इति॑ । सु । वृ॒ष्णः॒ । प्रऽय॑ज्यून् । आ ।
नव्य॑से । सु॒वि॒ताय॑ । व॒वृ॒त्याम् । चि॒त्रऽवा॑जान् ॥ ३३ ॥

वृष्णोवर्षितॄन् अभीष्टफलदान्प्रयज्यून् प्रकर्षेण यष्टव्यान् चित्रवाजान् विचित्रगमनान् विचित्रयशान्विचित्रधनान्वा एवंभूतान् मरुतः सु सुष्टु ओ आ उ ववृत्यां आवर्तयामि अस्मदभिमुखं यथागच्छन्ति तथाकरोमि । अपिच नव्यसे नवीयसे नवतराय अत्यन्तं प्रशस्ताय सुविताय सुष्टुप्राप्तव्याय धनायच तानाववृत्यां आवर्तयामि ॥ ३३ ॥

अथ चतुस्त्रिंशी–

गि॒रय॑श्चि॒न्नि जि॑हते॒ पर्शा॑नासो॒ मन्य॑मानाः ।
पर्व॑ताश्चि॒न्नि ये॑मिरे ॥ ३४ ॥

गि॒रय॑ः । चि॒त् । नि । जि॒ह॒ते॒ । पर्शा॑नासः ।
मन्य॑मानाः । पर्व॑ताः । चि॒त् । नि । ये॒मि॒रे॒ ॥ ३४ ॥

मरुत्स्वागच्छत्सु गिरयश्चित् गिरयोपि शिलोच्चयाअपि पर्शानासः पीड्यमानाः यद्वा मरुद्भिः स्पृश्यमानाः अतएव मन्यमानाः अभिमन्यमानाः वा बध्यमाना सन्तः निजिहते नितरां गच्छन्ति मरुद्वेगेन स्थानात्प्रच्यवन्ते । तथा पर्वताश्चित् पर्ववन्तोमेघाअपि तदीयेन गमनेन नियेमिरे नियम्यन्ते यद्वा गिरयः क्षुद्राः शिलोच्चयाः । महान्तः पर्वताः ॥ ३४ ॥

अथ पञ्चत्रिंशी–

आ॒क्ष्ण॒या॒वानो॑ वहन्त्य॒न्तरि॑क्षेण॒ पत॑तः ।
धाता॑रः स्तुव॒ते वय॑ः ॥ ३५ ॥

आ । अक्षणऽयावानः । वहन्ति । अन्तरिक्षेण ।
पतंतः । धातारः । स्तुवते । वयः ॥ ३५ ॥

अक्षणयावानः अक्षणं व्याप्तं गच्छन्तः यद्वा अक्षणः चक्षुषोपि शीघ्रं यान्तीत्यक्षणयावानः यातेरातोमनिन्क्वनिपू इतिवनिप् ईदृशाअश्वाः अन्तरिक्षेण आकाशमार्गेण पततः गच्छतोमरुतः आवहन्ति आनयन्ति यद्वा पततइत्यश्वानां विशेषणम् अन्तरिक्षे नभसि पततोगच्छन्तःछान्दसो-नुमभावः किंकुर्वन्तः स्तुवते स्तोत्रं कुर्वते जनाय वयोन्नं धातारोविधातारः कुर्वाणाः ॥ ३५॥

अथ षट्त्रिंशी–

अग्निर्हिजानिपूर्व्यश्छन्दोनसूरोअर्चिषा ।
तेभानुभिर्वितस्थिरे ॥ ३६ ॥ २४ ॥
अग्निः । हि । जनि । पूर्व्यः । छन्दः । न । सूरः ।
अर्चिषा । ते । भानुऽभिः । वि । तस्थिरे ॥ ३६ ॥ २४ ॥

अग्निर्हि अग्निःखलु आर्चिषा तेजसा पूर्व्यः सर्वेषु देवेषु मुख्योजनि अजायत दीपजने-त्यादिना कर्तरिलुङि च्लेश्चिणादेशः । तत्रदृष्टान्तः–छन्दः उपच्छन्दनीयः सूरोन सूर्यइव तदनंतरं ते पूर्वोक्तगुणामरुतः भानुभिर्दीप्तिभिर्वितस्थिरे विविधमवतिष्ठन्ते आग्निमारुतेहि अग्निः पूर्वं स्तूयते पश्चान्मरुतः तदपेक्षया च पूर्वोत्तरयोरर्धर्चयोः क्रमेण अग्निर्मरुतश्च स्तूयन्ते ॥ ३६ ॥

॥ इति पञ्चमस्याष्टमे चतुर्विंशोवर्गः ॥ २४ ॥

आनोविश्वाभिरिति त्रयोविंशत्यृचं तृतीयं सूक्तं सध्वंसाख्यस्य काण्वस्यार्षं आनुष्टुभं एतदादीनि त्रीणि सूक्तानि अश्विदेवत्यानि तथाचानुक्रान्तम्–आनस्त्र्यधिका सध्वंसआ-श्विनंत्वानुष्टुभमिति । प्रातरनुवाके आश्विने क्रतौ आनुष्टुभेछन्दसि आश्विनशस्त्रे चैतत्सूक्तम् सूत्र्यतेहि–आनोविश्वाभिस्त्यश्चिदत्रिमित्यानुष्टुभमिति । अप्तोर्यामप्रशास्तुरतिरिक्तोक्थेप्येतत् सूत्रितञ्च–आनोविश्वाभिः प्रातर्यावाणेति । चतुर्थेहनि प्रउगशस्त्रे आनोविश्वाभिरित्याश्विन-स्तृचः सूत्रितंच–आनोविश्वाभिरूतिभिरित्यमुवोअग्रहणमिति ।

तत्र प्रथमा–

आनोविश्वाभिरूतिभिरश्विनागच्छतंयुवम् ।
दस्राहिरण्यवर्तनीपिबतंसोम्यंमधु ॥ १ ॥

आ । नः । विश्वाभिः । ऊतिऽभिः । अश्विना । गच्छतम् ।
युवम् । दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
पिबतम् । सोम्यम् । मधु ॥ १ ॥

हे अश्विनाऽश्विनौ अश्नुवानौ सर्वंजगद्व्यामुवन्तौ यद्वा अश्वैर्युक्तौ युवं युवां विश्वाभिः सर्वाभिर्व्याप्ताभिर्वा ऊतिभीरक्षाभिर्दातव्याभिः सार्धं नोस्मान् आगच्छतम् आगत्य च हे दस्रा दस्रौ दर्शनीयौ शत्रूणामुपक्षपयितारौ वा हे हिरण्यवर्तनी हिरण्मयरथौ हितरमणीयाचरणौ वा ईदृशौ हे अश्विनौ सोम्यं सोममयं मधु पिबतम् ॥ १ ॥

अथ द्वितीया—

आनूनंयातमश्विनारथेनसूर्यत्वचा ।
भुजीहिरण्यपेशसाकवीगंभीरचेतसा ॥ २ ॥

आ । नूनम् । यातम् । अश्विना । रथेन । सूर्यऽत्वचा ।
भुजी इति । हिरण्यऽपेशसा । कवी इति । गंभीरऽचेतसा ॥ २ ॥

हे भुजी हविषां भोक्तारौ यद्वा स्तोतृभिरस्मानां भोजयितारौ सर्वस्य जगतः पालकौ वा हे हिरण्यपेशसा हिरण्मयालङ्कारौ हिरण्मयावयवौ वा हे कवी क्रान्तदर्शिनौ स्तोतव्यौ वा हे गंभीरचेतसा प्रशस्तज्ञानौ ईदृशौ अश्विना अश्विनौ सूर्यत्वचा सूर्यवद्भासमानेन रथेन नूनमवश्यमस्मानायातमागच्छतम् ॥ २॥

अथ तृतीया—

आयातंनहुषस्पर्यान्तरिक्षात्सुवृक्तिभिः ।
पिबाथोअश्विनामधुकण्वानांसवनेसुतम् ॥ ३ ॥

आ । यातम् । नहुषः । परि । आ । अन्तरिक्षात् । सुवृक्तिऽभिः ।
पिबाथः । अश्विना । मधु । कण्वानाम् । सवने । सुतम् ॥ ३ ॥

हे अश्विनौ नहुषस्परि नहुषइति मनुष्यनाम सामर्थ्याचात्र तत्संबद्धोलोकोलक्ष्यते मानुषात्तस्माल्लोकात् परिःपञ्चम्यर्थानुवादी सुवृक्तिभिः सुष्ठु दोषवर्जिताभिः सुप्रवृत्ताभिर्वा स्तु-

तिभिः हेतुभूताभिः आयातमागच्छतम् । तथा अन्तरिक्षात् अन्तराक्षान्तात् मध्यमाल्लोकात् अप्यागच्छतम् आगत्यच कण्वानां कण्वगोत्राणामस्माकं सवने यज्ञे प्रातःसवनादौ सुतमभिषुतं मधु मधुरं सोमं हे अश्विनौ पिबाथः पिबतम् ॥ ३॥

अथ चतुर्थी–

आनोयातंदिवस्पर्यान्तरिक्षादधप्रिया ।
पुत्रःकण्वस्यवामिहसुषावसोम्यंमधु ॥ ४ ॥

आ । नः । यातम् । दिवः । परि । आ । अन्तरिक्षात् । अधऽप्रिया ।
पुत्रः । कण्वस्य । वाम् । इह । सुसाव । सोम्यम् । मधु ॥ ४ ॥

हे अश्विनौ दिवस्परि दिवोधि द्युलोकात् नोस्मानायातमागच्छतम् पञ्चम्याः परावध्यर्थेइति विसर्जनीयस्य सत्वम् । हे अधप्रिया अधः अधस्तात् अस्मिन्लोके विद्यमानेन सोमेन प्रीयमाणौयद्वा कथप्रिया छान्दसोवर्णलोपः कथया स्तुत्या प्रीयमाणौ।हे ईदृशावश्विनौ अन्तरिक्षात् अप्यागच्छतम् इहास्मिन्यज्ञे कण्वस्य ऋषेः पुत्रः सोम्यं सोममयं मधु वां युवाभ्यां युवयोरर्थं सुषाव अभिषुणोति अतआयातमित्यन्वयः ॥ ४ ॥

अथ पञ्चमी–

आनोयातमुपश्रुत्यश्विनासोमपीतये ।
स्वाहास्तोमस्यवर्धनाप्रकवीधीतिभिर्नरा ॥ ५ ॥ २५ ॥

आ । नः । यातम् । उपऽश्रुति । अश्विना । सोमऽपीतये ।
स्वाहा । स्तोमस्य । वर्धना । प्र । कवी इति ।
धीतिऽभिः । नरा ॥ ५॥ २५ ॥

हे अश्विना अश्विनौ नोस्माकं उपश्रुति श्रूयतइति श्रुत् स्तुतिः उपगताश्रुद्यस्मिन् तस्मिन् यज्ञे सोमपीतये सोमपानाय आयातमागच्छतम् । हे वर्धना वर्धनौ कवी क्रान्तदर्शिनावश्विनौ स्वाहा स्वाहाकृतौ स्वाहाकारेण सम्यगिष्टौ सन्तौ यद्वा स्वाहेति वाङ्नाम स्तुतिरूपया वाचा स्तुतौ वाचा स्तोमस्य स्तोतुः प्रवर्धकौ भवतम् । तथा हे नरा नेतारावश्विनौ धीतिभिः

तिभिः हेतुभूताभिः आयातमागच्छतम् । तथा अन्तरिक्षात् अन्तरालात् मध्यमाल्लोकात् अप्यागच्छतम् आगत्यच कण्वानां कण्वगोत्राणामस्माकं सवने यज्ञे प्रातःसवनादौ सुतमभिषुतं मधु मधुरं सोमं हे अश्विनौ पिबाथः पिबतम् ॥ ३॥

अथ चतुर्थी–

आनोयातंदिवस्पर्यान्तरिक्षादधप्रिया ।
पुत्रःकण्वस्यवामिहसुषावसोम्यंमधु ॥ ४ ॥

आ । नः । यातम् । दिवः । परि । आ । अन्तरिक्षात् । अधऽप्रिया ।
पुत्रः । कण्वस्य । वाम् । इह । सुसाव । सोम्यम् । मधु ॥ ४ ॥

हे अश्विनौ दिवस्परि दिवोधि द्युलोकात् नोस्मानायातमागच्छतम् पञ्चम्याः परावध्यर्थइति विसर्जनीयस्य सत्वम् । हे अधप्रिया अधः अधस्तात् अस्मिन्लोके विद्यमानेन सोमेन प्रीयमाणौ यद्वा कधप्रिया छान्दसोवर्णलोपः कधया स्तुत्या प्रीयमाणौ । हे ईदृशावश्विनौ अन्तरिक्षात् अप्यागच्छतम् इहास्मिन्यज्ञे कण्वस्य ऋषेः पुत्रः सोम्यं सोममयं मधु वां युवाभ्यां युवयोरर्थं सुषाव अभिषुणोति अतआयातमित्यन्वयः ॥ ४ ॥

अथ पञ्चमी–

आनोयातमुपश्रुत्यश्विनासोमपीतये ।
स्वाहास्तोमस्यवर्धनाप्रकवीधीतिभिर्नरा ॥ ५ ॥ २५ ॥

आ । नः । यातम् । उपऽश्रुति । अश्विना । सोमऽपीतये ।
स्वाहा । स्तोमस्य । वर्धना । प्र । कवी इति ।
धीतिऽभिः । नरा ॥ ५ ॥ २५ ॥

हे अश्विना अश्विनौ नोस्माकं उपश्रुति श्रूयतइति श्रुत् स्तुतिः उपगताश्रुद्यस्मिन् तस्मिन् यज्ञे सोमपीतये सोमपानाय आयातमागच्छतम् । हे वर्धना वर्धनौ कवी क्रान्तदर्शिनावश्विनौ स्वाहा स्वाहाकृतौ स्वाहाकारेण सम्यगिष्टौ सन्तौ यद्वा स्वाहेति वाङ्नाम स्तुतिरूपया वाचा स्तुतौ वाचा स्तोमस्य स्तोतुः प्रवर्धकौ भवतम् । तथा हे नरा नेतारावश्विनौ धीतिभिः

कर्मभिः यद्वश्च प्रवर्धकौ भवतम्। यद्वा स्वाहेत्यादीन्यामन्त्रितानि हे स्वाहा स्वाहाकृतौ स्तोमस्य स्तोत्रस्य स्तोतुर्वा हे प्रवर्धना प्रवर्धयितारौ हे कवी क्रान्तदर्शिनौ धीतिभिः बुद्धिभिरात्मीयैःकर्मभिर्वा हे नरा सर्वेषां नेतारावश्विनौ सोमपानायायातमित्येकमेववाक्यम्। अस्मिन्पक्षे धीतिभिरित्यपरांगवत्वाभावः छान्दसः। यद्वा धीतिभिर्ध्यातव्याभिर्युष्मदीयाभिरूतिभिः सार्धमायातमिति क्रियया संबन्धः ॥ ५ ॥

॥ इति पञ्चमस्याष्टमे पञ्चविंशोवर्गः ॥ २५ ॥

अथ षष्ठी—

यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा ।
आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥ ६ ॥

यत् । चित् । हि । वाम् । पुरा । ऋषयः । जुहूरे । अवसे । नरा । आ ।
यातम् । अश्विना । आ । गतम् । उप । इमाम् । सुऽस्तुतिम् । मम ॥६॥

हे नरा नेतारावश्विनौ यच्चिद्धि यदा खलु वां युवां पुरा पूर्वस्मिन्काले ऋषयः अतीन्द्रियार्थदर्शिनः स्तोतारः अवसे रक्षणाय जुहूरे जुहुविरे स्तुतिभिराहृयन्। ह्वयतेर्लिटि अभ्यस्तस्यचेति सम्प्रसारणं हलइतिदीर्घः इरयोरे इति रेभावः तदानीं हे अश्विनौ आयातमागच्छतम् आगतवन्तौ स्थः अतोमम मदीयां इमां सुष्टुतिं शोभनां स्तुतिमपि उपागतमुपागच्छतम् ॥ ६ ॥

अथ सप्तमी—

दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा ।
धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥ ७ ॥

दिवः । चित् । रोचनात् । अधि । आ । नः । गन्तम् । स्वःऽविदा ।
धीभिः । वत्सऽप्रचेतसा । स्तोमेभिः । हवनऽश्रुता ॥ ७ ॥

हे स्वर्विदा स्वः सूर्यस्य द्युलोकस्य वा लंभयितारावश्विनौ दिवश्चिद् द्युलोकाच्च रोचनादधि रोचमानादन्तरिक्षाच्च नोस्मानागन्तमागच्छतम् पूर्ववदधिः पञ्चम्यर्थानुवादकः। हे वत्सप्रचेतसा वत्सेस्तोतरि प्रकृष्टज्ञानौ यद्वा वत्सं निवासकं वेदितव्यं वा प्रकृष्टं चेतो-

ह्वानं ययोस्तौ तथोक्तौ तौ युवां धीतिभिरात्मीयाभिर्बुद्धिभिः सहागच्छतं हे हवनश्रु-ता हवनस्यास्मदीयस्याह्वानस्य स्तोत्रस्य श्रोतारौ स्तोमेभिः स्तोत्रैरस्मत्कर्तृकैर्युज्यमानौ-सन्तौ आगच्छतम् ॥ ७ ॥

अथाष्टमी—

किमन्येपर्यासतेस्मत्स्तोमेभिरश्विना ।
पुत्रःकण्वस्यवामृषिर्गीर्भिर्वत्सोअवीवृधत् ॥ ८ ॥

किम् । अन्ये । परि । आसते । अस्मत् । स्तोमेभिः । अश्विना ।
पुत्रः । कण्वस्य । वाम् । ऋषिः । गीःऽभिः । वत्सः । अवीवृधत् ॥ ८ ॥

अस्मदस्मत्तोन्येव्यतिरिक्ताः स्तोतारः स्तोमेभिः स्तोत्रैः अश्विना अश्विनौ देवौ किं पर्यासते अस्मद्व्यतिरिक्ताः केप्यश्विनौ स्तोतुं नशक्नुवन्तीत्यर्थः । कण्वस्य ऋषेः पुत्र ऋषिः मन्त्रद्रष्टा वत्सः गीर्भिः स्तुतिभिः हे अश्विनौ वां युवां अवीवृधत् अवर्धयत् ॥ ८ ॥

अथ नवमी—

आवांविप्रइहावसेह्वत्स्तोमेभिरश्विना ।
अरिप्रावृत्रहन्तमातानोभूतंमयोभुवा ॥ ९ ॥

आ । वाम् । विप्रः । इह । अवसे । अह्वत् । स्तोमेभिः । अश्विना ।
अरिप्रा । वृत्रहन्ऽतमा । ता । नः । भूतम् । मयःऽभुवा ॥ ९ ॥

हे अश्विना अश्विनौ विप्रोमेधावी स्तोता इहास्मिन् यागे अवसे रक्षणार्थं स्तोमेभिः स्तोत्रैः वां युवां आह्वत् आहूतवान् ह्वयतेर्लुङि लिपिसिचिह्वश्चेति च्लेरङादेशः । हे अरिप्रा रिप्रमितिपापनाम अपापौ हे वृत्रहन्तमा वृत्राणां शत्रूणां हन्तृतमौ ता तौ तादृशौ युवां नोस्माकं मयोभुवा सुखस्य भावयितारौ भूतं भवतम् ॥ ९ ॥

अथ दशमी—

आयद्वांयोषणारथमतिष्ठद्वाजिनीवसू ।
विश्वान्यश्विनायुवंप्रधीतान्यगच्छतम् ॥ १० ॥ २६ ॥

आ । यत् । वाम् । योषणा । रथम् । अतिष्ठत् । वाजिनीवसू इति वाजिनीऽवसू । विश्वानि । अश्विना । युवम् । प्र । धीतानि । अगच्छतम् ॥ १० ॥ २६ ॥

हे वाजिनीवसू वाजिनी हविष्मती यागक्रिया तस्यां विद्यमानस्वांशलक्षणधनावश्विनौ योषणा योषित्सूर्या आजिधावनेन प्रियमाणासती वां युवयोरथं यद्यदा आतिष्ठत् आस्थितवती आरूढवती तदा हे अश्विना अश्विनौ युवं युवां धीतानि ध्यातान्यभिलषितानि विश्वानि सर्वाणि प्रकर्षेणागच्छतम् प्राप्तम् ॥ १० ॥

॥ इति पंचमस्याष्टमे षड्विंशो वर्गः ॥ २६ ॥

अथैकादशी—

अतःसहस्रनिर्णिजारथेनायातमश्विना ।
वत्सोवांमधुमद्वचोशंसीत्काव्यःकविः ॥ ११ ॥

अतः । सहस्रऽनिर्निजा । रथेन । आ । यातम् । अश्विना । वत्सः । वाम् । मधुऽमत् । वचः । अशंसीत् । काव्यः । कविः ॥ ११ ॥

हे अश्विना अश्विनौ येषु लोकेषु यत्र वर्तेथे अतोस्मात् स्थानात् सहस्रनिर्णिजा निर्णिगिति रूपनाम स्वर्णमयतया बहुविधरूपयुक्तेन रथेन आयातमागच्छतम् काव्यः कवेः पुत्रः कविर्मेधावी वत्सऋषिः वां युवाभ्यां युवयोरर्थं मधुमत् माधुर्योपेतं वचोवचनमुक्थं अशंसीत् शंसितवान् यतएवमतआगच्छतमित्यर्थः ॥ ११ ॥

अथ द्वादशी—

पुरुमन्द्रापुरूवसूमनोतरारयीणाम् ।
स्तोमंमेअश्विनाविममभिवह्नीअनूषाताम् ॥ १२ ॥

पुरुऽमन्द्रा । पुरुवसू इति पुरुऽवसू । मनोतरा । रयीणाम् । स्तोमम् । मे । अश्विनौ । इमम् । अभि । वह्नी इति । अनूषाताम् ॥ १२ ॥

पुरुमन्द्रा बहुमदौ बहुभिः सोमैर्मादयितव्यौ वा पुरुवसू बहुधनौ बहूनां निवासकौवा रयीणां धनानां मनोतरा मन्तारौ दातारौ मन्यतेस्तृचि पृषोदरादित्वाद्रूपसिद्धिः नामन्यतरस्यामिति रैशब्दात् नामउदात्तत्वम । वह्नी कृत्स्नस्य जगतोवोढारौ ईदृशावश्विनौ मे मम इमं स्तोत्रं अभ्यनूषातां सम्यक्स्तुतमिति प्राशंसिषातां । णुस्तुतौ यद्वा नुवतिरत्र श्रवणार्थे वर्तते अभिप्राप्तावश्रौष्टाम् ॥ १२ ॥

अथ त्रयोदशी–

आनोविश्वान्यश्विनाधत्तंराधांस्यह्रंया ।
कृतंनंऋत्वियांवतोमानोरीरधतंनिदे ॥ १३ ॥

आ । नः । विश्वानि । अश्विना । धत्तम् । राधांसि । अह्रंया ।
कृतम् । नः । ऋत्वियंऽवतः । मा । नः । रीरधतम् । निदे ॥ १३ ॥

हे अश्विना अश्विनौ अह्रया अह्रयाणि अह्रीतिकरणानि अलज्जाहेतूनि प्रशस्तानि विश्वानि सर्वाणि राधांसि धनानि नोस्मभ्यं आधत्तं प्रयच्छतम् । अपिच नोस्मान् ऋत्वियावतः ऋतौ कालेभवं प्रजोत्पादनरूपं कर्म ऋत्वियं तद्वतः कृतम् कुरुतम् । तथा निदे निंदायै निन्दकाय वा नोस्मान् मारीरधतं मावशं नैष्टम् ॥ १३ ॥

अथ चतुर्दशी–

यन्नासत्यापरावतियद्वास्थोअध्यम्बंरे ।
अतःसहस्रंनिर्णिजारथेनायातमश्विना ॥ १४ ॥

यत् । नासत्या । पराऽवति । यत् । वा । स्थः । अधि । अम्बरे ।
अतः । सहस्रंऽनिर्निजा । रथेन । आ । यातम् । अश्विना ॥ १४ ॥

हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा अश्विनौ यद्यदि परावति दूरदेशे स्थः यद्वा यदिच अंबरे अन्तिकनामैतत् समीपे स्थोभवथः । अधिः सप्तम्यर्थानुवादी अतोस्मात्सर्वस्मात्स्थानात् सहस्रनिर्णिजा बहुविधरूपेण रथेन हे अश्विनावागच्छतम् ॥ १४ ॥

अथ पञ्चदशी–

यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् ।
तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम् ॥ १५ ॥ २७ ॥

यः । वाम् । नासत्यौ । ऋषिः । गीःऽभिः । वत्सः । अवीवृधत् ।
तस्मै । सहस्रऽनिर्निजम् । इषम् । धत्तम् । घृतऽश्चुतम् ॥ १५ ॥२७॥

हे नासत्यौ यो वत्साख्य ऋषिः वां युवां गीर्भिः स्तुतिभिः अवीवृधत् अवर्धयत् तस्मै ऋषये सहस्रनिर्णिजं बहुविधरूपं घृतश्चुतं घृतं क्षरन्तीं इषमन्नं धत्तं प्रयच्छतम् ॥ १५ ॥

॥ इति पञ्चमस्याष्टमे सप्तविंशोवर्गः ॥ २७ ॥

अथ षोडशी–

प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम् ।
यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती ॥ १६ ॥

प्र । अस्मै । ऊर्जम् । घृतऽश्चुतम् । अश्विना । यच्छतम् । युवम् ।
यः । वाम् । सुम्नायं । तुस्तवत् । वसुऽयात् । दानुनः । पती इति ॥१६ ॥

हे अश्विना अश्विनौ अस्मै स्तोत्रे घृतश्चुतं घृतधारया युक्तं ऊर्जं बलकरमन्नरसं युवं युवां प्रयच्छतं दत्तं हे दानुनस्पती दानस्याधिपती वां युवां सुम्नाय सुखार्थं यस्तुष्टवत्तुयात् यश्च वसूयात् वसुधनमात्मनइच्छेत् अस्माइत्यन्वयः ॥ १६ ॥

अथ सप्तदशी–

आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥ १७ ॥

आ । नः । गन्तम् । रिशादसा । इमम् । स्तोमम् । पुरुऽभुजा ।
कृतम् । नः । सुऽश्रियः । नरा । इमा । दातम् । अभिष्टये ॥ १७ ॥

हे रिशादसा रिशतां हिंसतां निरसितारौ यद्वा रिशानां हिंसकानां अत्तारौ भक्षयितारौ हे पुरुभुजा बहुलस्य हविषो भोक्तारौ बहूनां पालकौ वा हे अश्विनौ नोस्माकमिमं स्तोमं स्तोत्रं आगन्तमभिगच्छतम् आगत्य च हे नरा नेतारौ नोस्मान् सुश्रियः सुश्रीकान् शोभनया सम्पदा युक्तान् कर्तं कुरुतम्। तदर्थं इमा इमानि पुरोवर्तमानानि पार्थिवानि अभिष्टये अभिमतये दातं ददतम् ददातेर्लोटि छान्दसः शपोलुक् ॥ १७ ॥

अथाष्टादशी–

आवांविश्वाभिरूतिभिःप्रियमेधाअहूषत ।
राजन्तावध्वराणामश्विनायामहूतिषु ॥ १८ ॥

आ । वाम् । विश्वाभिः । ऊतिऽभिः । प्रियऽमेधाः । अहूषत ।
राजन्तौ । अध्वराणाम् । अश्विना । यामऽहूतिषु ॥ १८ ॥

हे अश्विना अश्विनौ यामहूतिषु यामानां यातॄणां देवानां हूतिराह्वानं येषु यागेषु तेषु प्रियमेधाः प्रिययज्ञाः एतत्संज्ञाऋषयः अध्वराणां यज्ञानां राजन्तौ ईश्वरौ राजतिरैश्वर्यकर्मा अश्विनौ हि देवानामध्वर्यूआस्तामितिहि ब्राह्मणम्। ईदृशौ विश्वाभिः सर्वाभिरूतिभीरक्षाभिः सहितौ वां युवां आहूषत आह्वयन् अस्तुवन्नित्यर्थः ॥ १८ ॥

अथैकोनविंशी–

आनोगन्तंमयोभुवाश्विनाशम्भुवायुवम् ।
योवांविपन्यूधीतिभिर्गीर्भिर्वत्सोअवीवृधत् ॥ १९ ॥

आ । नः । गन्तम् । मयःऽभुवा । अश्विना । शम्ऽभुवा । युवम् ।
यः । वाम् । विपन्यू इति । धीतिऽभिः । गीःऽभिः । वत्सः । अवीवृधत् ॥ १९ ॥

हे अश्विना अश्विनौ मयोभुवा मयसः सुखस्य भावयितारौ शंभुवा रोगाणां शमस्य भावयितारौ युवं युवां नोस्मानागन्तमागच्छतम्। हे विपन्यू स्तुत्यावश्विनौ योवत्सः स्तोता वां युवां धीतिभिः कर्मभिः परिचरणैः गीर्भिः स्तुतिभिश्च अवीवृधत् अवर्धयत् तानस्मानिति पूर्वत्रान्वयः ॥ १९ ॥

१ तै० ब्रा० ३.२.२.।

अथ विंशी—

याभिः॒कण्वं॒मेधा॑तिथिं॒याभि॒र्वशं॒दश॑व्रजम् ।
याभि॒र्गोश॑र्य॒माव॑तं॒ताभि॑र्नो॒वत॑ंनरा ॥ २० ॥ २८ ॥

याभिः॑ । कण्व॑म् । मेध॑ऽअतिथिम् । याभिः॑ । वश॑म् । दश॑ऽव्रजम् ।
याभिः॑ । गोऽश॑र्यम् । आव॑तम । ताभिः॑ । नः॒ । अ॒व॒त॒म् । न॒रा॒ ॥ २० ॥ २८ ॥

हे अश्विनौ याभिरूतिभिः कण्वमृषिं मेधातिथिं च आवतं अरक्षतम् याभिश्च वशं एतत्संज्ञं दशव्रजं च आवतम् याभिश्च गोशर्यं शीर्णगोर्यस्य सगोशर्यः शयुः तथाचाम्नातम्—शयवेचिन्नासत्याशचीभिर्जसुरयेस्तर्यंपिप्यथुर्गामिति[1] । ईदृशं गोशर्यं शयुं आवतं अरक्षतम् हे नरा नेतारौ ताभिरूतिभिर्नोस्मानवतं रक्षतम् ॥ २० ॥

॥ इति पञ्चमस्याष्टमेष्टाविंशोवर्गः ॥ २८ ॥

अथैकविंशी—

याभि॒र्नरा॑त्र॒सद॑स्यु॒माव॑तं॒कृत्व्ये॒धने॑ ।
ताभिः॒ष्व१॒स्माँअ॑श्विना॒प्राव॑तं॒वाज॑सातये ॥ २१ ॥

याभिः॑ । न॒रा॒ । त्र॒सद॑स्युम् । आव॑तम् । कृत्व्ये॑ । धने॑ । ताभिः॑ ।
सु । अ॒स्मान् । अ॒श्वि॒ना॒ । प्र । अ॒व॒त॒म् ॥ वाज॑ऽसातये ॥ २१ ॥

हे नरा नेतारावश्विनौ धने कृत्व्ये कर्तव्ये माप्तव्ये सति त्रसदस्युं एतत्संज्ञं पुरुकुत्सपुत्रमृषिं याभिरूतिभिरावतमरक्षतम हे अश्विनौ ताभिरूतिभिः सु सुष्ठु अस्मान्प्रावतं प्ररक्षतं किमर्थं वाजसातये वाजस्यान्नस्य बलस्य वा संभजनार्थम् ॥ २१ ॥

अथ द्वाविंशी—

प्रवां॒स्तोमाः॑सुवृ॒क्तयो॒गिरो॑वर्धन्त्वश्विना ।
पुरु॒त्रा॒वृ॒त्र॒ह॑न्तमा॒तानो॑भूतंपुरु॒स्पृहा॑ ॥ २२ ॥

---

[1] ऋ० सं० १. ८. १२.

पुरुमन्द्रा बहुमदौ बहुभिः सोमैर्मादयितव्यौ वा पुरुवसू बहुधनौ बहूनां निवासकौवा रयीणां धनानां मनोतरा मन्तारौ दातारौ मन्यतेस्तृचि पृषोदरादित्वाद्रूपसिद्धिः नामन्यतरस्यामिति रैशब्दात् नामउदात्तत्वम् । वह्नी कृत्स्नस्य जगतोवोढारौ ईदृशावश्विनौ मे मम इमं स्तोत्रं अभ्यनूषातां सम्यक्स्तुतमिति माशंसिषातां । णुस्तुतौ यद्वा नुवतिरत्र श्रवणार्थे वर्तते अभिप्रायवशोत्त्वाम् ॥ १२ ॥

अथ त्रयोदशी—

आनोविश्वान्यश्विनाधत्तंराधांस्यह्रया ।
कृतंनऋत्वियावतोमानोरीरधतंनिदे ॥ १३ ॥

आ । नः । विश्वानि । अश्विना । धत्तम् । राधांसि । अह्रया ।
कृतम् । नः । ऋत्वियऽवतः । मा । नः । रीरधतम् । निदे ॥ १३ ॥

हे अश्विना अश्विनौ अह्रया अह्रयाणि अह्रीतिकरणानि अलज्जाहेतूनि प्रशस्तानि विश्वानि सर्वाणि राधांसि धनानि नोस्मभ्यं आधत्तं प्रयच्छतम् । अपिच नोस्मान् ऋत्वियावतः ऋतौ कालेभवं प्रजोत्पादनरूपं कर्म ऋत्वियं तद्वतः कृतम् कुरुतम् । तथा निदे निंदायै निन्दकाय वा नोस्मान् मारीरधतं मावशं नैष्टम् ॥ १३ ॥

अथ चतुर्दशी—

यन्नासत्यापरावतियद्वास्थोअध्यम्बरे ।
अतःसहस्रंनिर्णिजारथेनायातमश्विना ॥ १४ ॥

यत् । नासत्या । पराऽवति । यत् । वा । स्थः । अधि । अम्बरे ।
अतः । सहस्रऽनिर्निजा । रथेन । आ । यातम् । अश्विना ॥ १४ ॥

हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा अश्विनौ यद्यदि परावति दूरदेशे स्थः यद्वा यदिच अंबरे अन्तिकनामैतत् समीपे स्थोभवथः । अधिः सप्तम्यर्थानुवादी अतोस्मात्सर्वस्मात्स्थानात्र सहस्रनिर्णिजा बहुविधरूपेण रथेन हे अश्विनावागच्छतम् ॥ १४ ॥

अथ पञ्चदशी–

योवांनासत्या॒वृषि॑र्गी॒र्भिर्व॒त्सोअवी॑वृधत् ।
तस्मै॑स॒हस्र॑निर्णिज॒मिषं॑धत्तंघृत॒श्चुत॑म् ॥ १५ ॥ २७ ॥

यः । वा॒म् । ना॒स॒त्यौ॒ । ऋषिः॑ । गीः॒ऽभिः । व॒त्सः । अवी॑वृधत् ।
तस्मै॑ । स॒ह॒स्र॑ऽनिर्निजम् । इषम् । ध॒त्त॒म् । घृ॒त॒ऽश्चुत॑म् ॥ १५ ॥२७॥

हे नासत्यौ योवत्साख्यऋषिः वां युवां गीर्भिः स्तुतिभिः अवीवृधत् अवर्धयत् तस्मै ऋषये सहस्रनिर्णिजं बहुविधरूपं घृतश्चुतं घृतं क्षरन्तीं इषमन्नं धत्तं प्रयच्छतम् ॥ १५ ॥

॥ इति पञ्चमस्याष्टमे सप्तविंशोवर्गः ॥ २७ ॥

अथ षोडशी–

प्रास्मा॒ऊर्जं॑घृत॒श्चुत॒मश्वि॑ना॒यच्छ॑तंयुवम् ।
योवांसु॒म्नायं॑तु॒ष्टव॑द्वसूयाद्दा॑नुनस्पती ॥ १६ ॥

प्र । अ॒स्मै॒ । ऊर्ज॑म् । घृ॒त॒ऽश्चुत॑म् । अश्वि॑ना । यच्छ॑तम् । यु॒वम् ।
यः । वा॒म् । सु॒म्नाय॑ । तु॒स्तव॑त् । व॒सु॒ऽयात् । दा॒नु॒नः॒ । प॒ती॒ इति॑ ॥१६ ॥

हे अश्विना अश्विनौ अस्मै स्तोत्रे घृतश्चुतं घृतधारया युक्तं ऊर्जं बलकरमन्नरसं युवं युवां प्रयच्छतं दत्तं हे दानुनस्पती दानस्याधिपती वां युवां सुम्नाय सुखार्थं यस्तुष्टवत्तुयात् यश्च वसूयात् वसुधनमात्मनइच्छेत् अस्मा इत्यन्वयः ॥ १६ ॥

अथ सप्तदशी–

आनो॑गन्तंरिशादसे॒मंस्तोमं॑पुरुभुजा ।
कृ॒तंनः॑सुश्रियो॑नरे॒मादा॑तम॒भिष्ट॑ये ॥ १७ ॥

आ । नः॒ । ग॒न्त॒म् । रि॒शा॒द॒सा॒ । इ॒मम् । स्तोम॑म् । पु॒रु॒ऽभु॒जा॒ ।
कृ॒तम् । नः॒ । सु॒ऽश्रियः॑ । न॒रा॒ । इ॒मा । दा॒त॒म् । अ॒भिष्ट॑ये ॥ १७ ॥

हे रिशादसा रिशतां हिंसतां निरसितारौ यद्वा रिशानां हिंसकानां अत्तारौ भक्षयितारौ हे पुरुभुजा बहुलस्य हविषोभोक्तारौ बहूनां पालकौ वा हे अश्विनौ नोस्माकमिमं स्तोमं स्तोत्रं आगन्तमभिगच्छतम् आगत्यच हे नरा नेतारौ नोस्मान् सुश्रियः सुश्रीकान् शोभनया सम्पदा युक्तान् कृतं कुरुतम्। तदर्थं इमा इमानि पुरोवर्तमानानि पार्थिवानि अभिष्टये अभिमाषये दातं दत्तम् ददातेर्लोटि छान्दसः शपोलुक् ॥ १७ ॥

अथाष्टादशी–

आवांविश्वाभिरूतिभिःप्रियमेधाअहूषत ।
राजन्तावध्वराणामश्विनायामहूतिषु ॥ १८ ॥

आ । वाम् । विश्वाभिः । ऊतिऽभिः । प्रियऽमेधाः । अहूषत ।
राजन्तौ । अध्वराणाम् । अश्विना । यामऽहूतिषु ॥ १८ ॥

हे अश्विना अश्विनौ यामहूतिषु यामानां यातॄणां देवानां हूतिराह्वानं येषु यागेषु तेषु प्रियमेधाः प्रियपज्ञाः एतत्संज्ञाऋषयः अध्वराणां यज्ञानां राजन्तौ ईश्वरौ राजतिरैश्वर्यकर्मा अश्विनौ हि देवानामध्वर्यूआस्तामितिहि ब्राह्मणम्[1]। ईदृशौ विश्वाभिः सर्वाभिरूतिभीरक्षाभिः सहितौ वां युवां आहूषत आह्वयन् अस्तुवन्नित्यर्थः ॥ १८ ॥

अथैकोनविंशी–

आनोगन्तंमयोभुवाश्विनाशम्भुवायुवम् ।
योवांविपन्यूधीतिभिर्गीर्भिर्वत्सोअवीवृधत् ॥ १९ ॥

आ । नः । गन्तम् । मयःऽभुवा । अश्विना । शम्ऽभुवा । युवम् ।
यः । वाम् । विपन्यू इति । धीतिऽभिः । गीःऽभिः । वत्सः । अवीवृधत् ॥ १९ ॥

हे अश्विना अश्विनौ मयोभुवा मयसः सुखस्य भावयितारौ शंभुवा रोगाणां शमस्य भावयितारौ युवं युवां नोस्मानागन्तमागच्छतम्। हे विपन्यू स्तुत्यावश्विनौ योवत्सः स्तोता वां युवां धीतिभिः कर्मभिः परिचरणैः गीर्भिः स्तुतिभिश्च अवीवृधत् अवर्धयत् तानस्मानिति पूर्वत्रान्वयः ॥ १९ ॥

---

[1] तै० ब्रा० ३.२.२.।

अथ विंशी—

याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम् ।
याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥ २० ॥ २८ ॥

याभिः । कण्वम् । मेधऽअतिथिम् । याभिः । वशम् । दशऽव्रजम् ।
याभिः । गोऽशर्यम् । आवतम् । ताभिः । नः । अवतम् । नरा ॥ २० ॥ २८ ॥

हे अश्विनौ याभिरूतिभिः कण्वमृषिं मेधातिथिं च आवतं अरक्षतम् याभिश्च वशं एतत्संज्ञं दशव्रजं च आवतम् याभिश्च गोशर्यं शीर्णागोर्यस्य स गोशर्यः शयुः तथाचाम्नातम्—शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गामिति[1] । ईदृशं गोशर्यं शयुं आवतं अरक्षतम् हे नरा नेतारौ ताभिरूतिभिर्नोऽस्मानवतं रक्षतम् ॥ २० ॥

॥ इति पञ्चमस्याष्टमे अष्टाविंशो वर्गः ॥ २८ ॥

अथैकविंशी—

याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने ।
ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये ॥ २१ ॥

याभिः । नरा । त्रसदस्युम् । आवतम् । कृत्व्ये । धने । ताभिः ।
सु । अस्मान् । अश्विना । प्र । अवतम् ॥ वाजऽसातये ॥ २१ ॥

हे नरा नेतारावश्विनौ धने कृत्व्ये कर्तव्ये प्राप्तव्ये सति त्रसदस्युं एतत्संज्ञं पुरुकुत्सपुत्रमृषिं याभिरूतिभिरावतमरक्षतम् हे अश्विनौ ताभिरूतिभिः सु सुष्ठु अस्मान्प्रावतं प्ररक्षतं किमर्थं वाजसातये वाजस्यान्नस्य बलस्य वा संभजनार्थम् ॥ २१ ॥

अथ द्वाविंशी—

प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना ।
पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥ २२ ॥

---

1 ऋ० सं० १. ८. १२.

प्र । वाम् । स्तोमाः । सुऽवृक्तयः । गिरः । वर्धन्तु । अश्विना ।
पुरुऽत्रा । वृत्रहन्ऽतमा । ता । नः । भूतम् । पुरुऽस्पृहा ॥ २२ ॥

हे अश्विनौ स्तोमाः प्रगीतमन्त्ररूपाःस्तुतयः सुवृक्तयः सुभवृत्ताः सुष्ठु दोषवर्जितावा गिरः शस्त्ररूपावाचश्च वां युवां प्रवर्धन्तु प्रवर्धयन्तु । अपिच हे पुरुत्रा बहूनां त्रातारौ हे वृत्रहन्तमा वृत्राणां शत्रूणां हन्तृतमौ ईदृशौ हे अश्विनौ ता तौ युवां नोस्माकं पुरुस्पृहा पुरु बहुलं स्पृहणीयावीप्सितव्यौ भूतं भवतम् ॥ २२ ॥

अथ त्रयोविंशी–

त्रीणिपदान्यश्विनोराविःसान्तिगुहापरः ।
कवीऋतस्यपत्मभिरर्वाग्जीवेभ्यस्परि ॥ २३ ॥ २९ ॥

त्रीणि । पदानि । अश्विनोः । आविः । सन्ति । गुहा । परः ।
कवी इति । ऋतस्य । पत्मऽभिः । अर्वाक् । जीवेभ्यः । परि ॥ २३॥२९॥

त्रीणि त्रिसंख्याकानि अनयोरश्विनोर्देवयोरथस्य संबन्धीनि पदानि चक्राणि गुहा गुहायां वर्तमानानि एतावन्तं कालमदृश्यमानानि परः गुहायाः परस्तात् दृष्टिगोचरेदेशे आविः सांति आविर्भवन्ति सांहितिकश्छान्दसोदीर्घः व्यत्ययेननिघाताभावः । यद्वा सन्तीत्येतदस्तेः शतरि जसि रूपम् आविर्भूतानि दृश्यन्ते अश्विनोरथस्य चक्रत्रयोपेतत्वंच–रथस्त्रिचक्रःपरिवर्ततेइत्यादिंनिगमान्तरेप्रसिद्धम् । कवी क्रान्तदर्शिनौ अश्विनौ ऋतस्य सत्यस्योदकस्य यज्ञस्य वा हेतुभूतैः पत्मभिः यैः पदैः जीवेभ्यस्परि परिरुपर्यर्थः पञ्चम्याः परावध्यर्थइति सत्वम् जीवानामुपरि जीवेभ्यस्माद्धु अर्वागभिमुखं आगच्छतमिति शेषः तानि पदानीदानीं उपलभ्यन्त इत्यन्वयः ॥ २३ ॥

॥ इति पञ्चमस्याष्टमे एकोनत्रिंशोवर्गः ॥ २९ ॥

आनूनमित्येकविंशत्यृचं चतुर्थं सूक्तं शशकर्णस्यार्षं अश्विदेवत्यं विंश्येकविंश्यौ द्वितीयातृतीयेचेति चतस्रोगायत्र्यः प्रथमा चतुर्थी षष्ठी चतुर्दशी पञ्चदशीचेति पञ्चबृहत्यः पञ्चमी ककुप् मध्यमश्चेत्ककुप् इत्युक्तलक्षणसद्भावात् दशमीत्रिष्टुप् एकादशी विराट् द्वादशी जगती

१ ऋ० सं० ३.७.७।

शिष्टाअनुष्टुभः । तथाचानुक्रान्तम्—आनूनंसैका शशकर्णोत्रैगायत्र्यावुपाद्येचाद्याचतुर्थीपष्ठी-चतुर्दश्याद्येचबृहत्यः पञ्चमीककुब्दशम्याद्यास्त्रिष्टुब्विराड्जगत्यइति । अग्नोर्यामे ब्राह्मणाच्छंसि-नोतिरिक्तोक्थ्ये इदं सूक्तं स्तोत्रियतृचि—आनूनमश्विनावयंरथमिति ।

तत्र प्रथमा—

आनूनर्मश्विनायुवंवत्सस्यंगन्तमर्वसे ।
प्रास्मैयच्छतमवृकंपृथुच्छर्दिर्युयुतंयाअरातयः ॥१ ॥

आ । नूनम् । अश्विना । युवम् । वत्सस्य । गन्तम् ।
अवसे । प्र । अस्मै । यच्छतम् । अवृकम् । पृथु ।
छर्दिः । युयुतम् । याः । अरातयः ॥ १ ॥

हे अश्विना अश्विनौ युवं युवां वत्सस्य स्तोतुर्मम अवसे रक्षणार्थं नूनमवश्यं आगन्त-मागच्छतम् आगत्यचास्माकमस्मै अवृकं बाधकरहितं पृथुविस्तीर्णं छर्दिर्गृहं प्रयच्छतं प्रदत्तम् । तथा याः अरातयः अदानशीलाः शत्रुभूताः प्रजास्तायुयुतं स्तोतृभ्यः पृथक्कुरुतम् ॥ १ ॥

अथ द्वितीया—

यदन्तरिक्षेयद्दिवियत्पञ्चमानुषाँअनु ।
नृम्णंतद्धत्तमश्विना ॥ २ ॥

यत् । अन्तरिक्षे । यत् । दिवि । यत् । पञ्च । मानुषान् ।
अनु । नृम्णम् । तत् । धत्तम् । अश्विना ॥ २ ॥

अन्तरिक्षे गन्धर्वादिभिः सेविते मध्यमे लोके यन्नृम्णं धनमस्ति दिवि द्युलोकेच यद-स्ति पञ्च पञ्चसंख्याकान्मानुषान् मनुष्यान् अनु । लक्षणे अनोःकर्मप्रवचनीयत्वम् कर्मप्रवच-नीययुक्तइतिद्वितीया पञ्चविधामनुष्याः निषादपञ्चमाश्चत्वारोवर्णाअत्रवर्तते तत्रचेहलोके यन्नृ-म्णं धनमस्ति हे अश्विना अश्विनौ तत्त्रिविधं नृम्णं धनं धत्तं अस्मभ्यं प्रयच्छतम् ॥ २ ॥

अथ तृतीया—

येवांदंसांस्यश्विनाविप्रांसःपरिमामृशुः ।
एवेत्काण्वस्यंबोधतम् ॥ ३ ॥

ये । वाम् । दंसांसि । अश्विना । विप्रासः । परिऽमामृशुः ।
एव । इत् । काण्वस्य । बोधतम् ॥ ३ ॥

हे अश्विनौ वां युवयोः संबन्धीनि दंसांसि कर्माणि परिचरणात्मकानि ये विप्रासो-विप्रामेधाविनोयजमानाः परिमामृशुः परिमृशन्ति पुनःपुनः स्पृशन्ति अनुतिष्ठन्तीत्यर्थः यथा तदीयानि परिचरणानि युवां जानीथः एवेत् एवमेव काण्वस्य कण्वपुत्रस्य मम परिचरणं बोधतमवगच्छतम् ॥ ३ ॥

अथ चतुर्थी—

अयंवांघर्मोअश्विनास्तोमेनपरिषिच्यते ।
अयंसोमोमधुमान्वाजिनीवसूयेनवृत्रंचिकेतथः ॥ ४ ॥

अयम् । वाम् । घर्मः । अश्विना । स्तोमेन । परि । सिच्यते ।
अयम् । सोमः । मधुऽमान् । वाजिनीवसू इति वाजिनीऽवसू ।
येन । वृत्रम् । चिकेतथः ॥ ४ ॥

हे अश्विनौ वां युवयोः संबन्धी अयं घर्मः प्रवर्ग्यं स्तोमेन स्तोत्रेण ऋक्सामरूपेण परिषिच्यते आर्द्रीक्रियते यथा युवयोस्तृप्तिकरोभवति तथा क्रियतइत्यर्थः यद्वा घर्मस्य हविषआधारभूतोमहावीरोघर्मः सः स्तोमेन स्तोतव्येन पयसा परिषिच्यते आसिच्यते वां युवयोरर्थं । अपिच हे वाजिनीवसू अन्नवद्धनौ अयं सोमस्तार्तीयसवनिकोमधुमान् माधुर्यवान् युवाभ्यां दीयते येन युवां वृत्रमावरकं शत्रुं चिकेतथः हन्तव्यतया जानीथः अयं घर्मः सोमश्चेत्युभयत्रान्वयः ॥ ४ ॥

अथ पञ्चमी—

यदप्सुयद्वनस्पतौयदोषधीषुपुरुदंससाकृतम् ।
तेनमाविष्टमश्विना ॥ ५ ॥ ३० ॥

यत् । अप्ऽसु । यत् । वनस्पतौ । यत् । ओषधीषु ।
पुरुऽदंससा । कृतम् । तेन । मा । अविष्टम् । अश्विना ॥ ५ ॥ ३० ॥

हे पुरुदंससा बहुकर्माणावश्विनौ अप्स्वुदकेषु यद्भेषजं कृतं युवामकार्ष्टम करोतेर्लुङि मन्त्रेघसेत्यादिनाच्लेर्लुक् तथा वनस्पतौ वनानां पतिर्वनस्पतिः पारस्करादित्वात्सुट् उभेवनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् जातावेदमेकवचनम् वनस्पतिषु वृक्षेषु यच्च भेषजं युवामकुरुतम् ओषधीषु ओषः पाकः आसु धीयतइति ओषधयोव्रीह्यादयः कर्मण्यधिकरणेचेति दधातेरधिकरणेकिप्रत्ययः दासीभारादिषु पठितत्वात्पूर्वपदप्रकृतिस्वरत्वम् ओषधेश्च विभक्तावप्रथमायामितिदीर्घः व्रीह्यादिष्वोषधीषुच यद्भेषजं कृतं युवामकार्ष्टम् । हे अश्विना अश्विनौ तेन सर्वेण भेषजेन मा मां अविष्टं रक्षतम् अवतेर्लोटि सिब्बहुलमिति बहुलग्रहणात् सिप् तलद्द् ॥ ५ ॥

॥ इति पञ्चमस्याष्टमे त्रिंशोवर्गः ॥ ३० ॥

अथ षष्ठी—

यन्नासत्याभुरण्यथोयद्वादेवभिषज्यथः ।
अयंवांवत्सोमतिभिर्नविन्धतेहविष्मन्तंहिगच्छथः ॥ ६ ॥

यत् । नासत्या । भुरण्यथः । यत् । वा । देवा । भिषज्यथः ।
अयम् । वाम् । वत्सः । मतिऽभिः । न । विन्धते । हविष्मन्तम् ।
हि । गच्छथः ॥ ६ ॥

हे नासत्या सत्यस्वभावावश्विनौ यत् यौ युवां भुरण्यथः सर्वं जगत्पोषयथः । भुरणधारणपोषणयोः कंड्वादिः हे देवा दानादिगुणयुक्तौ अश्विनौ छान्दसः सांहितिकोह्रस्वः यद्वा यौ च युवां भिषज्यथः सर्वस्य प्राणिजातस्य भैषज्यं रोगोपशमनं कुरुथः भिषज चिकित्सायाम् अयमपि कंड्वादिः तौ वां युवां अयं वत्सः स्तोता मतिभिर्मननीयैः केवलैः स्तोत्रैर्न विंधते नविन्दते नलभते वर्णविकारश्छान्दसः । कुतइतिचेदुच्यते हविष्मन्तं हविर्युक्तं स्तोतारं हि युवां गच्छथः तस्माद्युवां हविर्भिर्युक्तैः स्तोत्रैः प्रसीदथ इतिभावः ॥ ६ ॥

प्रवर्ग्येमहावीरे गोपयस्यासिच्यमाने आनूनमित्येषानुवक्तव्या सूत्र्यतेहि—आनूनमश्विनोर्ऋषिरितिगव्य आसुतेसिञ्चतश्रियमित्याज्यइति ।

सैषा सप्तमी–

आनूनमश्विनोर्ऋषिःस्तोमंचिकेतवामया ।
आसोमंमधुमत्तमंघर्मंसिञ्चादथर्वणि ॥ ७ ॥

आ । नूनम् । अश्विनोः । ऋषिः । स्तोमम् । चिकेत । वामया ।
आ । सोमम् । मधुमत्ऽतमम् । घर्मम् । सिञ्चात् । अथर्वणि ॥ ७ ॥

हे अश्विनौ यदा युवामागच्छेयाथां यथा तदानीं युवयोरश्विनोः स्तोमं स्तोत्रं ऋषिर्मन्त्रद्रष्टा वामया वननीयया उत्कृष्टया बुद्ध्या नूनमवश्यं आचिकेत अभिजानीयात् कितज्ञाने छान्दसोलिट् । तथा मधुमत्तमं अतिशयेन मधुरं सोमं घर्मं प्रवर्ग्यसंबन्धिघर्माख्यं हविश्च अथर्वणि अहिंसकेग्नौ यद्वा अथर्वाऋषिः तेननिर्मथितोग्निरुपचारादथर्वेत्युच्यते अथर्वणानिर्मथनञ्च–त्वामग्नेपुष्करादधीत्यादिनिगमान्तरेणगम्यते । तस्मिन्नग्नौ आसिञ्चात् आसिञ्चेत् प्रक्षिपेत् अतः शीघ्रमागच्छतमित्यर्थः ॥ ७ ॥

अथाष्टमी–

आनूनंरघुवर्तनिंरथंतिष्ठाथोअश्विना ।
आवांस्तोमाइमेममनभोनचुच्यवीरत ॥ ८ ॥

आ । नूनम् । रघुऽवर्तनिम् । रथम् । तिष्ठाथः । अश्विना ।
आ । वाम् । स्तोमाः । इमे । मम । नभः । न । चुच्यवीरत ॥ ८ ॥

हे अश्विनौ लघुवर्तनिं रघुवर्तनं शीघ्रगमनं रथं नूनमवश्यमिदानीमेव आतिष्ठाथः आतिष्ठतं अधिरोहतम् वालमूललघ्वलमितिलघोर्लकारस्यरेफः । मम मदीयाइमे स्तोमाः स्तोत्राणि नभोन सूर्यमिव तेजस्विनौ वां युवां आचुच्यवीरत आच्यवन्ते अभिगच्छन्ति यद्वा च्यवतिरन्तर्भावितण्यर्थः आच्यवयन्ति युवामभिमापयन्ति ॥ ८ ॥

अथ नवमी–

यदद्यवांनासत्योक्थैराचुच्युवीमहि ।
यद्वावाणीभिरश्विनेवेत्काण्वस्यबोधतम् ॥ ९ ॥

१ ऋ० सं० ६. ५. ३३.।

यत् । अद्य । वाम् । नासत्या । उक्थैः । आऽचुच्युवीमहि ।
यत् । वा । वाणीभिः । अश्विना । एव । इत् । काण्वस्य ।
बोधतम् ॥ ९ ॥

हे नासत्यौ अद्येदानीं उक्थैः शस्त्रैः यद्यथा येन प्रकारेण वां आचुच्युवीमहि आगमयेम। हे अश्विनौ यद्वा यथा वाणीभिः उक्थव्यतिरिक्ताभिरपि वाग्भिः स्तुतिभिः युवामागमयेम एवेत एवमेव तथैव काण्वस्य मम तदुक्थादिकं बोधतमवगच्छतम्॥ ९॥

अथ दशमी—

यद्वांकक्षीवाँउतयद्व्यश्वऋषिर्यद्वांदीर्घतमाजुहाव ।
पृथीयद्वांवैन्यःसादनेष्वेवेदतोअश्विनाचेतयेथाम् ॥ १०॥ ३१ ॥

यत् । वाम् । कक्षीवान् । उत । यत् । विऽअश्वः । ऋषिः । यत् । वाम् ।
दीर्घऽतमाः । जुहाव । पृथी । यत् । वाम् । वैन्यः । सदनेषु । एव ।
इत् । अतः । अश्विना । चेतयेथाम् ॥ १० ॥ ३१ ॥

हे अश्विनौ वां युवां कक्षीवानृषिः यद्यदा जुहाव तुष्टाव उतापिच व्यश्वः एतत्संज्ञऋषिश्च यद्यदा जुहाव यद्यदाच वां युवां दीर्घतमाऋषिः जुहाव सदनेषु यज्ञगृहेषु वैन्योवेनस्य पुत्रः पृथी एतत्संज्ञोराजर्षिः वां युवां यद्यथा जुहाव तुष्टाव एवेत् एवमेव स्तुवतोमम अतः इदं स्तोत्रं इदम्शब्दात् द्वितीयार्थेतसिः हे अश्विनौ चेतयेथां जानीतम् ॥ १०॥

॥ इति पञ्चमस्याष्टमे एकत्रिंशोवर्गः ॥ ३१ ॥

अथैकादशी—

यातंछर्दिष्पाउतनःपरस्पाभूतंजगत्पाउतनस्तनूपा ।
वर्तिस्तोकायतनयाययातम् ॥ ११ ॥

यातम् । छर्दिःऽपौ । उत । नः । परःऽपा । भूतम् । जगत्ऽपौ ।
उत । नः । तनूऽपा । वर्तिः । तोकाय । तनयाय । यातम् ॥ ११ ॥

हे अश्विनौ छर्दिष्पौ छर्दिरिति गृहनाम तस्यास्मदीयस्य पालकौ सन्तौ युवां यातमागच्छतं। उतापिच नोस्माकं परस्पा परं अतिशयेन पालकौ भूतं भवतं पारस्करादित्वात्सुट्। तथा जगत्पौ सर्वस्य जगतः जङ्गमस्य प्राणिजातस्यास्मदीयस्य पालकौ भवतम्। उतापिच नोस्माकं तनूपा तनूनां शरीराणां तनयानां वा पालकौ भवतम् एतत्सर्वार्थं तोकाय तोकस्य पुत्रस्य तनयाय तनयस्य पौत्रस्य चास्मदीयस्य वर्तिर्गृहं यातं गच्छतम् ॥ ११ ॥

अथ द्वादशी—

यदिन्द्रे॑ण॒ सर॑थं॒ याथो॑ अश्विना॒ यद्वा॑ वा॒युना॒ भव॑थः॒ समो॑कसा।
यदा॑दि॒त्येभि॑र्ऋ॒भुभिः॑ स॒जोष॑सा॒ यद्वा॒ विष्णो॑र्वि॒क्रम॑णेषु॒ तिष्ठ॑थः ॥ १२ ॥

यत्। इन्द्रे॑ण। स॒ऽरथ॑म्। या॒थः। अ॒श्वि॒ना॒। यत्। वा॒।
वा॒युना॑। भव॑थः। सम्ऽओ॑कसा। यत्। आ॒दि॒त्येभिः॑। ऋ॒भुऽभिः॑।
स॒ऽजोष॑सा। यत्। वा॒। विष्णोः॑। वि॒ऽक्रम॑णेषु। तिष्ठ॑थः ॥ १२ ॥

हे अश्विनौ इन्द्रेणसह सरथं समानमेकंरथं आस्थाय यद्यदि याथोगच्छथः यद्वा यद्विवा वायुना सह समोकसा समाननिवासौ भवथः यद्दिवा आदित्येभिः अदितेः पुत्रैः मित्रादिभिः ऋभुभिश्च सजोषसा सहप्रीयमाणौ वर्तेथे यद्वा यद्विवा विष्णोर्विक्रमणेषु विष्णुना देवेन विक्रान्तेषु त्रिषु लोकेषु तिष्ठथः अतः सर्वस्मादपि स्थानादागच्छतमितिशेषः ॥१२ ॥

अथ त्रयोदशी—

यद॒द्याश्विना॑व॒हं हु॒वेय॒ वाज॑सातये।
यत्पृ॒त्सु तु॒र्वणे॒ सह॒स्तच्छ्रेष्ठ॑म॒श्विनो॒रवः॑ ॥ १३ ॥

यत्। अ॒द्य। अ॒श्विनौ॑। अ॒हम्। हु॒वेय॑। वाज॑ऽसातये। यत्।
पृ॒त्ऽसु। तु॒र्वणे॑। सहः॑। तत्। श्रेष्ठ॑म्। अ॒श्विनोः॑। अवः॑ ॥ १३ ॥

यद्यदा अहमश्विनौ वाजसातये संग्रामार्थं हुवेय आह्वयेय अद्येदानीं तावागच्छतमिति शेषः। पृत्सु पृतनासु संग्रामेषु तुर्वणे शत्रूणां हिंसने यत्सहः शत्रूणामभिभवित्रु रक्षणं अश्विनोः तदवोरक्षणं श्रेष्ठं प्रशस्यतमं अतस्तावाह्वयामीतिभावः ॥ १३ ॥

अथ चतुर्दशी–

आनूनंयातमश्विनेमाहव्यानिवांहिता ।
इमेसोमासोअधितुर्वशेयदाविमेकण्वेषुवामथ ॥ १४ ॥

आ । नूनम् । यातम् । अश्विना । इमा । हव्यानि । वाम् ।
हिता । इमे । सोमासः । अधि । तुर्वशे । यदौ । इमे । कण्वेषु ।
वाम् । अथ ॥ १४ ॥

हे अश्विनौ नूनमवश्यं आयातमागच्छतम् इमा इमानि पुरोवर्तीनि हव्यानि हवींषि वां युवाभ्यां हिता हितानि यद्वा युवयोरर्थं विहितानि कृतानि इमेच सोमासः सोमाः तुर्वशे यदौ च वर्तमानाः वां युवाभ्यां युवयोरर्थे संस्कृता वा अधिः सप्तम्यर्थानुवादकः। अथ अपिच कण्वेषु कण्वपुत्रेषु अस्मासु च इमे सोमाः वां युवाभ्यां दत्ताः अतआयातमित्यर्थः ॥ १४ ॥

अथ पञ्चदशी–

यन्नासत्यापराकेअर्वाकेअस्तिभेषजम् ।
तेननूनंविमदायप्रचेतसाछर्दिर्वत्साययच्छतम् ॥१५॥३२॥

यत् । नासत्या । पराके । अर्वाके । अस्ति । भेषजम् । तेन । नूनम् ।
विऽमदाय । प्रऽचेतसा । छर्दिः । वत्साय । यच्छतम् ॥ १५ ॥ ३२ ॥

हे नासत्यावश्विनौ पराके दूरदेशे अर्वाके समीपेच यद्युवयोः संबन्धि भेषजं रोगोपशमनकारणमस्ति तेन भेषजेन सहितं छर्दिर्गृहं हे प्रचेतसा प्रकृष्टज्ञानावश्विनौ विमदाय लुप्तोपममेतत् एतत्संज्ञायेव ऋषये वत्साय नूनमवश्यं यच्छतं प्रयच्छतम् ॥ १५॥

॥ इति पञ्चमस्याष्टमे द्वात्रिंशोवर्गः ॥ ३२ ॥

अथ षोडशी–

अभुत्स्युप्रदेव्यासाकंवाचाहमश्विनोः ।
व्यावर्देव्यामतिंविरातिंमर्त्येभ्यः ॥ १६ ॥

अभुत्सि । ऊँ इति । प्र । देव्या । साकम् । वाचा । अहम् । अश्विनोः ।
वि । आवः । देवि । आ । मतिम् । वि । रातिम् । मर्त्येभ्यः ॥ १६ ॥

अश्विनोः संबन्धिन्या देव्या द्योतमानया वाचा स्तुतिरूपया साकं सह अहं प्राभुत्सि प्रबुद्धोस्मि उइतिपूरणः हे देवि द्योतमाने उपस्त्वश्च मतिं मयाकृतां स्तुतिं आ अभिलक्ष्य व्यावः तमांसि विवृणु अपगमय प्रकाशयेत्यर्थः वृणोतेश्छान्दसे लुङिमन्त्रेघसेत्यादिना च्लेर्लुक् छन्दस्यपिदृश्यतइत्याडागमः। अपिच मर्त्येभ्योमनुष्येभ्यः स्तोतृभ्योस्मभ्यं रातिं धनं व्यावः प्रकाशय ॥ १६॥

अथ सप्तदशी—

प्रबोधयोषोअश्विनाप्रदेविसूनृतेमहि ।
प्रयज्ञहोतरानुषक्प्रमदायश्रवोबृहत् ॥ १७ ॥

प्र । बोधय । उषः । अश्विना । प्र । देवि । सूनृते । महि । प्र ।
यज्ञऽहोतः । आनुषक् । प्र । मदाय । श्रवः । बृहत् ॥ १७॥

हे उषः अश्विनौ देवौ प्रबोधय अस्मत्स्तोत्रस्य श्रवणार्थं । हे देवि दानादिगुणयुक्ते हे सूनृते सुष्ठु नेत्रि हे महि महति इत्थं महाभागा त्वं अश्विनौ प्रबोधय । हे यज्ञहोतः यज्ञानां यष्टव्यानां देवानामाह्वातर्होतर्वा आनुषगनुपक्वं संततं यथाभवति तथा अश्विनौ स्तुतिभिः प्रबोधय। तथा मदाय अश्विनोर्मदोत्पादनार्थं बृहन्महत् श्रवः श्रवणीयं सोमलक्षणमन्नं अस्माभिः प्रकल्पितम् ॥ १७॥

अथाष्टादशी—

यदुषोयासिभानुनासंसूर्येणरोचसे ।
आहायमश्विनोरथोवर्तिर्यातिनृपाय्यम् ॥ १८ ॥

यत् । उषः । यासि । भानुना । सम् । सूर्येण । रोचसे । आ । ह ।
अयम् । अश्विनोः । रथः । वर्तिः । याति । नृऽपाय्यम् ॥ १८ ॥

हे उषः भानुना दीप्त्यासह यद्यदा यासि गच्छसि तदानीं सूर्येण संरोचसे सम्यग्दीप्यसे। अपिच तस्मिन्समये अश्विनोरथं रथः नृपाय्यं यत् नृभिर्नेतृभिर्ऋत्विग्भिः पालनीयं वर्तिर्यज्ञगृहं आयाति ह आगच्छति खलु ॥ १८ ॥

अथैकोनविंशी–

यदापीतासोअंशवोगावोनदुह्नऊधभिः।
यद्वावाणीरनूषतप्रदेवयन्तोअश्विना ॥ १९ ॥

यत्। आऽपीतासः। अंशवः। गावः। न। दुह्ने। ऊधःऽभिः।
यत्। वा। वाणीः। अनूषत। प्र। देवऽयन्तः। अश्विना ॥ १९ ॥

यद्यदा आपीतासः आसमन्तात्पीतवर्णा अंशवः सोमलताः ऊधभिः गावोन गावइव दुह्ने रसं दुहते लोपस्तआत्मनेपदेष्विति तलोपः बहुलंछन्दसीतिरुडागमः। यद्वा यदाच देवयन्तो-देवान्कामयमानाः ऋत्विजः वाणीर्वाचः स्तुतीः अनूषत अस्तुवन् अकुर्वन्नित्यर्थः। तदा अश्विना अश्विनौ देवौ मावतं प्ररक्षतम् ॥ १९ ॥

अथविंशी–

प्रद्युम्नायप्रशवसेप्रनृषाह्यायशर्मणे। प्रदक्षायप्रचेतसा ॥ २० ॥

प्र। द्युम्नाय। प्र। शवसे। प्र। नृऽसह्याय।
शर्मणे। प्र। दक्षाय। प्रऽचेतसा ॥ २० ॥

प्रचेतसा प्रकृष्टज्ञानावश्विनौ द्युम्नाय द्योतमानायान्नाय यशसे वा तादर्थ्येचतुर्थी द्युम्नार्थं अस्मान्प्ररक्षतम् शवसे बलाय च प्ररक्षतम् नृषह्याय नृभिः सोढव्याय शर्मणे सुखाय च प्ररक्षतम् दक्षाय वृद्ध्यर्थं प्ररक्षतम्। यद्वा द्युम्नायेत्यादौ क्रियाग्रहणमपि कर्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थी द्युम्नादीन्यस्मभ्यं प्रयच्छतमित्यर्थः ॥ २० ॥

अथैकविंशी–

यंनूनंधीभिरश्विनापितुर्योनानिषीदथः।
यद्वासुम्नेभिरुक्थ्या ॥ २१ ॥ ३२ ॥

यत् । नूनम् । धीभिः । अश्विना । पितुः । योना ।
निऽसीदथः । यत् । वा । सुम्नेभिः । उक्थ्या ॥ २१ ॥ ३३ ॥

अश्विनौ पितुः पालयितुर्द्युलोकस्य संबन्धिनि योना योनौ स्थाने यद्यदि धीभिः कर्मभिः सह निषीदथोनिवसथः यद्वा यदिवा हे उक्थ्या उक्थ्यौ प्रशस्यौ सुम्नेभिः सुम्नैः सुखैः सह निवसथःतदास्माभिः स्तुतौ संतावागच्छतमितिशेषः । अथवा पितुः पालयितुर्यजमानस्य संबन्धिनि योनौ यज्ञगृहे धीभिः स्तुतिभिः सार्धं यदि निवसथः यदिच सुम्नैः सुखकरैर्हविर्भिश्च सह निवसथः तदागच्छतम् । नूनमिति पदपूरणः उक्तंच यास्केन—अथापि पदपूरणः नूनंसातेप्रतिवरंजरित्रेइति[1] ॥ २१ ॥

॥ इति पञ्चमस्याष्टमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

यत्स्थइति षळृचं पञ्चमं सूक्तम् कण्वपुत्रस्य प्रगाथस्यार्षं आश्विनं आद्याबृहती द्वितीया मध्येज्योतिस्त्रिष्टुप् यतोष्टकस्ततोज्योतिरिति उक्तलक्षणसद्भावात् तृतीया अनुष्टुप् चतुर्थी आस्तारपंक्तिः अन्त्यौचेदास्तारपङ्क्तिरितितल्लक्षणम् पञ्चमी बृहती षष्ठी सतोबृहती । तथाचानुक्रान्तम्—यत्स्थःषट् प्रगाथोपश्यव बृहतीमध्येज्योतिरनुष्टुबास्तारपङ्क्तिःप्रगाथइति । प्रातरनुवाकाश्विने क्रतौ बार्हतेछन्दस्याश्विनशस्त्रेचेदंसूक्तम् सूत्र्यतेहि—धुम्नीवांयत्स्थइतिबार्हतमिति ।

तत्र प्रथमा—

यत्स्थोदीर्घप्रसद्मनियद्वादोरोचनेदिवः ।
यद्वासमुद्रेअध्याकृतेगृहेतआयातमश्विना ॥ १ ॥

यत् । स्थः । दीर्घऽप्रसद्मनि । यत् । वा । अदः । रोचने । दिवः ।
यत् । वा । समुद्रे । अधि । आऽकृते । गृहे ।
अतः । आ । यातम् । अश्विना ॥ १ ॥

हे अश्विनौ दीर्घप्रसद्मनि प्रसीदन्त्येषु देवाइति प्रसद्मानोयज्ञगृहाः दीर्घाआयताः प्रसद्मानोयस्मिन् तस्मिन्लोके यत् यदिस्थोभवथोवर्तेथे यद्वा यदिवा अदः अमुष्मि-

[1] नि० १. ६ ।

यत् । नूनम् । धीभिः । अश्विना । पितुः । योना ।
निऽसीदथः । यत् । वा । सुम्नेभिः । उक्थ्या ॥ २१ ॥ ३३ ॥

अश्विनौ पितुः पालयितुर्द्युलोकस्य संबन्धिनि योना योनौ स्थाने यद्यदि धीभिः कर्मभिः सह निषीदथो निवसथः यद्वा यदिवा हे उक्थ्या उक्थ्यौ प्रशस्यौ सुम्नेभिः सुम्नैः सुखैः सह निवसथः तदास्माभिः स्तुतौ संतावागच्छतमितिशेषः । अथवा पितुः पालयितुर्यजमानस्य संबन्धिनि योनौ यज्ञगृहे धीभिः स्तुतिभिः सार्धं यदि निवसथः यदिच सुम्नैः सुखकरैर्हविर्भिश्च सह निवसथः तत्रागच्छतम् । नूनमिति पदपूरणः उक्तंच यास्केन–अथापि पदपूरणः नूनंसातेप्रतिवरंजरित्रेइति [1] ॥ २१ ॥

॥ इति पञ्चमस्याष्टमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

यत्स्थइति पळृचं पञ्चमं सूक्तम् कण्वपुत्रस्य प्रगाथस्यार्षं आश्विनं आद्याबृहती द्वितीया मध्येज्योतिस्त्रिष्टुप् यतोष्टकस्ततोज्योतिरिति उक्तलक्षणसद्भावात् तृतीया अनुष्टुप् चतुर्थी आस्तारपंक्तिः अन्त्यौचेदास्तारपङ्क्तिरितितल्लक्षणम् पञ्चमी बृहती षष्ठी सतोबृहती । तथाचानुक्रान्तम्–यत्स्थःषट् प्रगाथोपश्यत बृहतीमध्येज्योतिरनुष्टुबास्तारपङ्क्तिःप्रगाथइति । प्रातरनुवाकाश्विने क्रतौ बार्हतेछन्दस्याश्विनशस्त्रेचेदंसूक्तम् सूत्र्यतेहि–युन्नीवांयत्स्थइतिबार्हतमिति ।

तत्र प्रथमा–

यत्स्थोदीर्घप्रसद्मनियद्वादोरोचनेदिवः ।
यद्वासमुद्रेअध्याकृतेगृहेतआयातमश्विना ॥ १ ॥

यत् । स्थः । दीर्घऽप्रसद्मनि । यत् । वा । अदः । रोचने । दिवः ।
यत् । वा । समुद्रे । अधि । आऽकृते । गृहे ।
अतः । आ । यातम् । अश्विना ॥ १ ॥

हे अश्विनौ दीर्घप्रसद्मनि प्रसीदन्त्येषु देवाइति प्रसद्मानोयज्ञगृहाः दीर्घाआयताः प्रसद्मानोयस्मिन् तस्मिन्लोके यत् यदिस्थोभवथोवर्तेथे यद्वा यदिवा अदः अमुष्मि-

---

[1] नि० १. ६ ।

न् दिवोद्युलोकस्य संबन्धिनि रोचने रोचमाने स्थाने भवथः यद्वा यद्दिवा समुद्रे अन्तरिक्षे समुद्रवन्त्यस्मादापइति समुद्रमन्तरिक्षंतस्मिन् आकृते निर्मिते गृहे अधिवसथः अतस्तिवयादपिस्थानात् हे अश्विनावायातमागच्छतम् ॥ १ ॥

अथ द्वितीया–

यद्वायज्ञंमनवेसंमिमिक्षथुरेवेत्काण्वस्यबोधतम् ।
बृहस्पतिंविश्वान्देवाँअहंहुवइन्द्राविष्णूअश्विनावाशुहेषसा ॥ २॥

यत् । वा । यज्ञम् । मनवे । सम्ऽमिमिक्षथुः । एव । इत् ।
काण्वस्य । बोधतम् । बृहस्पतिम् । विश्वान् । देवान् । अहम् ।
हुवे । इन्द्राविष्णू इति । अश्विनौ । आशुऽहेषसा ॥ २ ॥

हे अश्विनौ यद्वा यथावा येन प्रकारेण मनवे प्रजापतये यजमानाय यज्ञं संमिमिक्षथुः संसिक्तवन्तौ युवां कृतवन्तौ एवेत् एवमेव काण्वस्य कण्वगोत्रस्य ममयज्ञं कर्तुं बोधतमवगच्छतम् । अपिच बृहस्पतिं बृहतां देवानां पतिं देवपुरोहितं विश्वान्सर्वान्मित्रादीन्देवांश्च इन्द्राविष्णू च आशुहेषसा शीघ्राश्वौ यद्वा हेषृशब्दे शीघ्रं सर्वत्र शब्द्यमानौ स्तूयमानावश्विनौ च अहं हुवे आह्वये ॥ २ ॥

अथ तृतीया–

त्यान्वश्विनाहुवेसुदंससागृभेकृता ।
ययोरस्तिप्रणःसख्यंदेवेष्वध्याप्यम् ॥ ३ ॥

त्या । नु । अश्विना । हुवे । सुऽदंससा । गृभे । कृता । ययोः ।
अस्ति । प्र । नः । सख्यम् । देवेषु । अधि । आप्यम् ॥ ३ ॥

त्या त्यौ पूर्वोक्तगुणावश्विनौ नु क्षिप्रमहं हुवे आह्वयामि कीदृशौ सुदंससा शोभनकर्माणौ गृभे गृहे ग्रहणाय अस्माभिर्दत्तानां हविषां स्वीकरणाय अस्मभ्यं धनदानाय वा कृता कृतौ प्रादुर्भूतौ देवेषु मध्ये अधिः सप्तम्यर्थानुवादी ययोरश्विनोः आप्यमाप्तव्यं नोस्माकं सख्यं सखित्वं प्रास्ति प्रभवति उत्कर्षेण वर्तते तौ हुवइत्यन्वयः ॥ ३ ॥

अथ चतुर्थी–

यथोरधि प्र यज्ञा असूरे सन्ति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥ ४॥

ययोः । अधि । प्र । यज्ञाः । असूरे । सन्ति । सूरयः ।
ता । यज्ञस्य । अध्वरस्य । प्रऽचेतसा । स्वधाभिः ।
या । पिबतः । सोम्यम् । मधु ॥ ४ ॥

ययोरश्विनोरध्युपरि यज्ञाः ज्योतिष्टोमादयः सर्वेयागाः प्रसन्ति प्रभवन्ति छिन्नस्य यज्ञशिरसोऽश्विभ्यांसन्धानात् । तथाच–यज्ञशिरसोऽछिद्यते इत्युपक्रम्य तैत्तिरीयकम्–तावेतद्यज्ञशिरःप्रत्यधत्ताम् यदाश्विनोगृह्यते यज्ञस्यनिष्कृत्याइति[1] । असूरे स्तोतृरहितेपि देशे ययोश्च सूरयः स्तोतारः सन्ति तावश्विनौ अध्वरस्य हिंसाप्रत्यवायरहितस्य यज्ञस्य ज्योतिष्टोमादेः प्रचेतसा प्रकृष्टज्ञातारौ स्वधाभिः बलहेतुभिः स्तुतिभिः आह्वयामीतिशेषः या यावश्विनौ सोम्यं सोममयं मधु मधुरं सोमरसं पिबतः ॥ ४ ॥

अथ पञ्चमी–

यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू ।
यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम् ॥ ५ ॥

यत् । अद्य । अश्विनौ । अपाक् । यत् । प्राक् । स्थः ।
वाजिनीवसू इति वाजिनीऽवसू । यत् । द्रुह्यवि । अनवि ।
तुर्वशे । यदौ । हुवे । वाम् । अथ । मा । आ । गतम् ॥ ५ ॥

हे अश्विनौ अद्येदानीं यद्यदि अपाक् प्रतीच्यां दिशि स्थोभवथोवर्तेथे हे वाजिनीवसू अन्नवन्तौ यद्यदि प्राक् प्राच्यां दिशि स्थोभवथः यत् यदिवा द्रुह्यवि अनवि तुर्वशे यदौ द्रुह्युप्रभृतिषु चतुर्षु स्तोतृषु संनिहितौ भवथः एवं सर्वत्र संनिहितौ वां युवां हुवे अहमाह्वयामि अथानन्तरमेव मा मां आगतम् आगच्छतम् ॥ ५ ॥

---

1 तै० सं० ६. ४. ९. ।

अथ षष्ठी–

यद॒न्तरि॑क्षे॒ पत॑थः पुरुभुजा॒ यद्वे॒मे रोद॑सी॒ अनु॑ ।
यद्वा॑ स्व॒धाभि॑रधि॒तिष्ठ॑थो॒ रथ॒मत॒ आ या॑तमश्विना ॥६॥३४॥

यत् । अ॒न्तरि॑क्षे । पत॑थः । पु॒रु॒ऽभु॒जा॒ । यत् । वा॒ ।
इ॒मे इति॑ । रोद॑सी॒ इति॑ । अनु॑ । यत् । वा॒ । स्व॒धाभिः॑ ।
अ॒धि॒ऽतिष्ठ॑थः । रथ॑म् । अतः॑ । आ । या॒त॒म् । अ॒श्वि॒ना॒ ॥६॥ ३४ ॥

हे पुरुभुजा बहूनां पालयितारौ बहुलहविषो भोक्तारौ वा यद्यदि अन्तरिक्षे पतथो गच्छथः यद्वा यदि वा इमे रोदसी द्यावापृथिव्यावनु अनुलक्ष्य गच्छथः यद्वा यदि वा स्वधाभिः आत्मीयैस्तेजोभिर्बलैर्वा सार्धं रथं अधितिष्ठथः रथे उपविशथः अधिशीङ्स्थासामिति आधारस्य कर्मसंज्ञा । अतः सर्वस्मात्स्थानात् हे अश्विनौ आयातमागच्छतम् ॥ ६ ॥

॥ इति पञ्चमस्याष्टमे चतुस्त्रिंशो वर्गः ॥ ३४ ॥

त्वमग्ने इति दशर्चं षष्ठं सूक्तं कण्वगोत्रस्य वत्सस्यार्षं आग्नेयम् आद्या प्रतिष्ठागायत्री अष्टकसप्तकषट्कोपेतत्वात् द्वितीया वर्धमाना षट्कसप्तकाष्टकोपेतत्वात् । तथाचोक्तं–षट्कसप्तकाष्टकैर्वर्धमाना विपरीता प्रतिष्ठेति । दशमी त्रिष्टुप् शिष्टा गायत्र्यः । तथाचानुक्रान्तम्–त्वमग्ने दश वत्स आग्नेयं गायत्रं अन्त्या त्रिष्टुप् आद्या प्रतिष्ठाद्या वर्धमानेति । प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे च उत्तमावर्जमेतत्सूक्तं सूत्र्यते हि–त्वमग्ने व्रतपा इत्युत्तमामुद्धरेदिति । व्रातपत्यां त्वमग्ने व्रतपा इति आद्यानुवाक्या । सूत्रितञ्च–त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीति ।

सैषा प्रथमा–

त्वम॑ग्ने व्रत॒पा अ॑सि दे॒व आ मर्त्ये॒ष्वा । त्वं य॒ज्ञेष्वीड्यः॑ ॥ १ ॥

त्वम् । अ॒ग्ने॒ । व्र॒त॒ऽपाः । अ॒सि॒ । दे॒वः । आ । मर्त्ये॑षु । आ ।
त्वम् । य॒ज्ञेषु॑ । ईड्यः॑ ॥ १ ॥

हे अग्ने देवो द्योतमानस्त्वं मर्त्येष्वा मनुष्येषु च आ देवेषु च मध्ये व्रतपा असि व्रतानां कर्मणां रक्षिता भवसि अतःकारणात् यज्ञेषु त्वमीड्यः स्तुत्योसि ॥ १ ॥

अथ द्वितीया—

त्वमसिप्रशस्योविदथेषुसहन्त्य। अग्नेरथीरध्वराणाम्॥ २॥

त्वम्। असि। प्रऽशस्यः। विदथेषु। सहन्त्य। अग्ने। रथीः।
अध्वराणाम्॥ २॥

हे सहन्त्य शत्रूणामभिभवितरग्नेविदथेषु यज्ञेषु त्वं प्रशस्यः स्तुत्योसि अध्वराणां यागानां रथीर्नेताच भवसि॥ २॥

अथ तृतीया—

सत्वमस्मदपद्विषोयुयोधिजातवेदः। अदेवीरग्नेअरातीः॥ ३॥

सः। त्वम्। अस्मत्। अप। द्विषः। युयोधि। जातऽवेदः।
अदेवीः। अग्ने। अरातीः॥ ३॥

हे जातवेदः जातानां वेदितरग्ने सपूर्वोक्तगुणस्त्वं अस्मदस्मत्तः द्विषोद्वेष्टॄन् शत्रून् अपयुयोधि पृथक्कुरु। अदेवीरासुरीः अरातीः शत्रुसेनाश्च पृथक्कुरु॥ ३॥

अथ चतुर्थी—

अन्तिचित्सन्तमहयज्ञंमर्तस्यरिपोः। नोपवेषिजातवेदः॥ ४॥

अन्ति। चित्। सन्तम्। अह। यज्ञम्। मर्तस्य। रिपोः। न।
उप। वेषि। जातऽवेदः॥ ४॥

हे जातवेदः अन्तिचित् अन्तिकेपि सन्तं भवन्तं समीपे विद्यमानमपि रिपोः अस्मच्छत्रोर्मर्तस्य मनुष्यस्य यज्ञं नोपवेषि अहशब्दोवधारणे नैवकामयसे॥ ४॥

अथ पञ्चमी—

मर्ताअमर्त्यस्यतेभूरिनाममनामहे। विप्रासोजातवेदसः॥ ५॥ ३५॥

मर्ताः। अमर्त्यस्य। ते। भूरि। नाम। मनामहे। विप्रासः।
जातऽवेदसः॥ ५॥ ३५॥

मर्ता मनुष्याः विप्रासो मेधाविनोवयं हे अग्ने जातवेदसो जातानां वेदितुः अमर्त्यस्य मरणरहितस्य देवस्य ते तव भूरि विस्तृतं नाम स्तोत्रं मनामहे जानीमः कुर्मइति यावत् ॥५॥

॥ इति पञ्चमस्याष्टमे पंचत्रिंशोवर्गः ॥ ३५ ॥

अथ षष्ठी–

विप्रं॒विप्रा॑सो॒ऽव॑से दे॒वं मर्ता॑स ऊ॒तये॑ । अ॒ग्निं गी॒र्भिर्ह॑वामहे ॥ ६ ॥

विप्र॑म् । विप्रा॑सः । अव॑से । दे॒वम् । मर्ता॑सः । ऊ॒तये॑ । अ॒ग्निम् । गीः॒ऽभिः । ह॒वा॒म॒हे॒ ॥ ६ ॥

विप्रासोमेधाविनः मर्तासोमनुष्यावयं विप्रं मेधाविनं देवं दानादिगुणयुक्तमग्निं अवसे हविर्भिः तर्पयितुं ऊतये अस्माकं रक्षणार्थं च गीर्भिः स्तुतिभिः हवामहे आह्वयामहे ॥ ६ ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने आतेवत्सइति वैकल्पिकःस्तोत्रियस्तृचः सूत्रितश्च– आतेवत्सोमनोयमदामेरथूरंरयिंभरेति ।

तृचे प्रथमा सूक्ते सप्तमी–

आ ते॑ व॒त्सो मनो॑ यमत्पर॒माच्चि॑त्स॒धस्था॑त् । अग्ने॒ त्वांका॑मया गि॒रा ॥ ७ ॥

आ । ते॒ । व॒त्सः । मनः॑ । य॒म॒त् । प॒र॒मात् । चि॒त् । स॒धऽस्था॑त् । अग्ने॑ । त्वाम्ऽका॑मया । गि॒रा ॥ ७ ॥

हे अग्ने वत्सऋषिः ते तव मनः परमाच्चित् उत्कृष्टादपि सधस्थानात् सहस्थात् द्युलोकात् आयमत् आयमयति । केन साधनेन त्वां कामया त्वामभिलषंत्या गिरा स्तुत्या ॥७॥

अथाष्टमी–

पु॒रु॒त्रा हि स॒दृङ्ङसि॒ विशो॒ विश्वा॒ अनु॑ प्र॒भुः । स॒मत्सु॑ त्वा हवामहे ॥ ८ ॥

पु॒रु॒ऽत्रा । हि । स॒ऽदृङ् । असि॑ । विशः॑ । विश्वाः॑ । अनु॑ । प्र॒ऽभुः । स॒मत्ऽसु॑ । त्वा॒ । ह॒वा॒म॒हे॒ ॥ ८ ॥

हे अग्ने पुरुत्रा बहुषु देशेषु त्वं सदृङ्ङसि समानदृष्टा भवसि हिपूरणः अतएव विश्वाः सर्वाविशः प्रजाः अनु अनुलक्ष्य प्रभुरीश्वरोभवसि । ईदृशं त्वा त्वां समत्सु सङ्ग्रामेषु रक्षणार्थं हवामहे आह्वयामहे ॥ ८ ॥

अथ नवमी–

समत्स्वग्निमवसे वाजयन्तो हवामहे । वाजेषु चित्रराधसम् ॥ ९ ॥

समत्ऽसु । अग्निम् । अवसे । वाजऽयन्तः । हवामहे ।
वाजेषु । चित्रऽराधसम् ॥ ९ ॥

समत्सु सहमदनेषु सङ्ग्रामेषु वाजयन्तोबलमिच्छन्तोवयं अवसे रक्षणार्थमग्निं हवामहे कीदृशं वाजेषु सङ्ग्रामेषु चित्रराधसं चायनीयधनम् ॥ ९॥

अथ दशमी–

प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥ १० ॥ ३६ ॥

प्रत्नः । हि । कम् । ईड्यः । अध्वरेषु । सनात् । च । होता ।
नव्यः । च । सत्सि । स्वाम् । च । अग्ने । तन्वम् । पिप्रयस्व ।
अस्मभ्यम् । च । सौभगम् । आ । यजस्व ॥ १० ३६ ॥

हे अग्ने अध्वरेषु यज्ञेषु ईड्यः स्तुत्यस्त्वं प्रत्नोहि चिरन्तनः खलु भवति कमितिपूरकः तथा सनात् चिरकालादारभ्य होता देवानामाह्वाता च सन् नव्यः स्तुत्यश्च सन् सत्सि य-ज्ञेषु निषीदसि । हे अग्ने देवानां हविर्वहंस्त्वं स्वां च तन्वं आत्मीयं च शरीरं पिप्रयस्व त्वदीयेन हविर्भागेन तर्पय अस्मभ्यं स्तोतृभ्यश्च सौभगं सुभगत्वं च आयजस्व प्रदेहि सुभगशब्दाद्भा-वार्थे सुभगान्मन्त्रइत्युद्गात्रादिषु पाठादञ्प्रत्ययः ॥ १० ॥

॥ इति पञ्चमस्याष्टमे षट्त्रिंशोवर्गः ॥ ३६॥
वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण साय-णाचार्येणविरचितेमाधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टकेअष्टमोध्यायः ॥८ ॥

॥ इतिपञ्चमाष्टकः समाप्तः ॥ ५ ॥